कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

डॉ. रेणुका बोकारे

M-2366
03/03/15

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
श्रीमद् भागवत तृतीय ते दशम (पूर्वार्ध) पूर्णिका	—	श्रीकृष्ण कथा	दशम स्कंध अपूर्ण बाकी संपूर्ण	—	चौकोन	—	देवनागरी	छापील ग्रंथ कागद	—	—	ठिक	भागवत पुराण ग्रंथ —

16/02/2015

अथ सचूर्णिकश्रीमद्भागवते तृतीयस्कंधारंभः

॥ श्रीगणेशाय नमः ॥ अथ श्रीमद्भागवततृतीयस्कंधचूर्णिका प्रारभ्यते ॥ तृतीये तु त्रयस्त्रिंशदध्यायैः सर्गवर्णनम् । ईशेच्छया गुणक्षोभात्सर्गो ब्रह्मांडसंभवः
॥१॥ तत्र तु प्रथमेऽध्याये बंधून् हित्वा गतायुषः ॥ निर्गतस्योद्धवेनादौ संवादः क्षत्तुरुच्यते ॥ २ ॥ श्रीशुक उवाच ॥ हे नृप, एवं पुरा स्वगृहं हित्वा वनं
प्रविष्टो विदुरो मैत्रेयंप्रति पृष्टवान् ॥ १ ॥ विदुरस्य यद्गृहंप्रति, पांडवानां दौत्यकर्ता श्रीकृष्णो दुर्योधनगृहं त्यक्त्वाऽनाहूतोऽपि प्रविवेश ॥ २ ॥ राजोवाच ॥
भगवता मैत्रेयेण सह विदुरस्य समागमः संवादश्च कुत्र बभूव । हे प्रभो, तन्नो वर्णय ॥३॥ विदुरस्य श्रेष्ठे मैत्रेये प्रश्नोऽल्पार्थस्योदयकर्ता नहि ॥४॥ सूत उवाच॥
एवं राज्ञा पृष्टः शुकः श्रूयतामिति तं प्रत्याह ॥५॥ श्रीशुक उवाच ॥ यदा धृतराष्ट्रः खलान्स्वपुत्रान् पुष्णन् पितृहीनान् पांडवान् लाक्षाभवने ददाह ॥ ६ ॥

ॐनमो भगवते वासुदेवाय ॥ श्रीशुक उवाच ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल ॥ क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत्
॥१॥ यद्वा अयं मंत्रकृद्वो भगवानखिलेश्वरः ॥ पौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥२॥ ॥ राजोवाच ॥ कुत्र क्षत्तुर्भगवता
मैत्रेयेणास संगमः ॥ कदा वा सह संवाद एतद्वर्णय नः प्रभो ॥ ३ ॥ न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः ॥ तस्मिन्वरीयसि
प्रश्नः साधुवादोपबृंहितः ॥४॥ सूत उवाच ॥ स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं सुबहुवित्प्रीतात्मा
श्रूयतामिति ॥ ५ ॥ श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून्पुष्णन्नधर्मेण विनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्य सुतान्विबंधून्प्रवेश्य
लाक्षाभवने ददाह ॥ ६ ॥ यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यम् ॥ न वारयामास नृपः स्नुषायाः
स्वास्रैर्हरंत्याः कुचकुंकुमानि ॥७॥ द्यूते त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य ॥ न याचतोऽदात्समयेन दायं तमोजुषाणो
यदजातशत्रोः ॥ ८ ॥ यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ॥ न तानि पुंसाममृतायनानि राजोरु
मेने क्षतपुण्यलेशः ॥९॥ यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्वजेन ॥ अथाह तन्मंत्रदृशां वरीयान्यन्मंत्रिणो वैदुरिकं
वदंति ॥१०॥ अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः ॥ सहानुजो यत्र वृकोदराहिः श्वसन्रुषा यत्त्वमलं बिभेषि
॥११॥ पार्थांस्तु देवो भगवान्मुकुंदो गृहीतवान्स क्षितिदेवदेवः ॥ आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥ १२ ॥
स एष दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यमत्या ॥ पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय ॥१३॥ ॥

यदा सभायां स्नुषाया द्रौपद्या दुःशासनकृतं केशाकर्षणरूपं निंद्यं सुतकर्म न निवारयामास ॥७॥ ततश्च द्यूतेऽधर्मेण जितस्य वनवासानंतरमागतस्य पूर्वसंकेतितं
स्वभागं याचतो धर्मस्य विभागं न ददौ ॥ ८ ॥ यदा च धर्मराजेन सामार्थं प्रेषितः श्रीकृष्णः सभायां गत्वा यानि वाक्यान्यूचे तानि धृतराष्ट्रः साधु न
मेने ॥९॥ यदा धृतराष्ट्रेण विचारार्थमाहूतो विदुरोंऽतर्गृहं प्रविश्य नीतिरूपं वाक्यमाह ॥१०॥ तदेवाह । हे बंधो धृतराष्ट्र, तवापराधं सहमानस्य युधिष्ठिरस्य
विभागं देहि । यत्रापराधेऽनुजैः सह भीमरूपः सर्पः क्रोधेन श्वसन् वर्तते ॥११॥ पांडवांस्तु भगवान् कृष्ण आत्मीयत्वेन गृहीतवान् । स कृष्णः स्वपुर्यां सुखमास्ते
॥१२॥ किंच । यं पुत्रबुद्ध्या त्वं पुष्णासि तं कृष्णद्वेषिणं पुत्रं कुलकौशलाय शीघ्रं त्यज ॥ १३ ॥ ॥ ॥

इति विदुरेणोक्ते सति कर्णदुःशासनशकुनिदुर्योधनादिभिः कोपाद्विदुरस्तिरस्कृतः ॥१४॥ तिरस्कारमाह । एनं कपटिनं दासीपुत्रमत्र क आजुहाव । यो यस्यान्नेन
पुष्टस्तस्मिन्नेव प्रतिकूलः सन् परेषां कार्ये वर्तते । अतो जीवमात्रशेषो पुराच्छीघ्रं निष्कास्यताम् ॥१५॥ एवं धृतराष्ट्रपुरतोऽतिकठोरवाक्यैर्मर्मसु ताडितोऽपि
गतव्यथो विदुरः सभाद्वारि धनुर्निधाय हास्तिनापुरान्निरगात् ॥१६॥ ततः स विदुरः पुण्यचिकीर्षया हरेर्निवासस्थानानि क्षेत्राणि जगाम ॥१७॥ स एकाक्येव
भगवन्मूर्तिभिरलंकृतेषु पुण्योपवनाद्रिकुंजेषु सरित्सरःसु तीर्थादिषु च चचार ॥१८॥ स प्रतितीर्थं स्नातोऽधःशयानोऽवधूतवेषः स्वजनैरलक्षितः पृथिवीं पर्यटन्
हरिसंतोषकराणि व्रतानि चेरे ॥१९॥ एवं भारतमेव वर्षं व्रजन् यावता कालेन प्रभासं गतवांस्तावत्कृष्णसहायेन धर्मराज एकच्छत्रां पृथ्वीं पालयामास ॥२०॥

इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण ॥ असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन ॥१४॥ क एनमत्रोपजुहाव
जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः ॥ तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः ॥१५॥ स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः
पुरो मर्मसु ताडितोऽपि ॥ स्वयं धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः ॥१६॥ स निर्गतः
कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि ॥ अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः ॥१७॥ पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु
सरित्सरस्सु ॥ अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ॥१८॥ गां पर्यटन्मेध्यविविक्तवृत्तिः
सदाप्लुतोऽधःशयनोऽवधूतः ॥ अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि ॥१९॥ इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान्प्रभासम्
॥ तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥२०॥ तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयम्
॥ संस्पर्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगियाय तूष्णीम् ॥२१॥ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः
॥ तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे ॥२२॥ अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः ॥
प्रत्यंगमुख्यांकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरंति ॥२३॥ ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च ॥ कालेन तावद्यमुनामुपेत्य
तत्रोद्धवं भागवतं ददर्श ॥२४॥ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतम् ॥ आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानाम्
॥२५॥ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ ॥ आसात उर्व्याः कुशलं विधाय कृतक्षणौ
कुशलं शूरगेहे ॥२६॥ कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः ॥ यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन २७

तत्र प्रभासे कौरवाणां नाशं श्रुत्वा शोचन् सन् सरस्वतीं ययौ ॥२१॥ ततस्तस्यास्तीरे त्रितर्षेः शुक्रस्य मनोः पृथोरग्नेर्वायोरसितस्य सुदासस्य गवां गुहस्य श्राद्धदेवस्य
च तीर्थानि क्रमेण सेवितवान् ॥२२॥ अन्यानि च ऋषिभिर्देवैश्च कृतानि विष्णोश्चक्रचिह्नांकितानि मंदिराणि सिषेवे । येषां मंदिराणां दर्शनात् श्रीकृष्णस्मरणं भवति
॥२३॥ ततः सुराष्ट्रसौवीरकुरुमत्स्यादिदेशान् गत्वा कालेन यमुनां प्राप्य तत्र भागवतमुद्धवं ददर्श ॥२४॥ तदा वासुदेवानुचरमुद्धवमालिंग्य स्वज्ञातीनां कुशलं
पप्रच्छ ॥२५॥ हे उद्धव, ब्रह्मप्रार्थनया भूमाववतीर्णौ रामकृष्णौ पृथ्व्याः कल्याणं विधाय शूरसेनगृहे कुशलमासाते किम् ॥ २६ ॥ अस्माकं पूज्यो वसुदेवः सुखी किम् ।

यो भगिनीनां पितृवद्धनं ददाति ॥२७॥ यादवानां सेनापतिः प्रद्युम्नः सुखी किम् ॥२८॥ सात्वतवृष्णिभोजादीनां पतिरुग्रसेनः सुखी कच्चित् । यं श्रीकृष्णो राज्येऽभ्यषिंचत् ॥२९॥ हे सौम्य, हरेः सदृशः सांबः सुखी किम् ॥३०॥ सात्यकिः सुखी किम् । यः श्रीकृष्णसेवयैव तदीयां गतिं लेभे॥ ३१ ॥ यः कृष्णपादांकितमार्गपांसुषु व्यलुठत् सोऽक्रूरः क्षेमी किम्॥ ३२ ॥ देवक्याः कल्याणं कच्चित् । या स्वगर्भे देवं दधार ॥३३॥ सात्वतां मनोरथपूरकोऽनिरुद्धः सुखी किम्। वेदा यं शब्दस्योत्पत्तिकारणं वदंति ॥ ३४ ॥ हे सौम्य, अन्ये च हृदीकचारुदेष्णगदादयः स्वस्ति विचरंति किम् ॥ ३५ ॥ अथ कुरूणां कुशलं पृच्छति । हे

कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः ॥ यं रुक्मिणी भगवतोऽभिलेभे आराध्य विप्रान्स्मरमादिसर्गे ॥२८॥ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् ॥२९॥ कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी रथिनां साधु सांबः॥ असूत यं जाबवती व्रताढ्या देवं गुहं योंऽबिकया धृतोऽग्रे॥३०॥ क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः ॥ लेभेंऽजसाऽधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम् ॥३१॥ कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥३२॥ कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः॥ या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थम् ॥३३॥ अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः॥ यमामनंति स्म ह शब्दयोनिं मनोमयं सत्वतुरीयतत्त्वम् ॥ ३४ ॥ अपिस्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये ॥ हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौम्य ॥ ३५ ॥ अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुम् ॥ दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्त्या ॥३६॥ किंवा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचत् ॥ यस्यांघ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रम् ॥ ३७ ॥ कच्चिद्यशोधा रथयूथपानां गांडीवधन्वोपरतारिरास्ते ॥ अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ॥३८॥ यमावुतस्वित्तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव ॥ रेमात उद्दायमृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्रात् ॥ ३९ ॥ अहो पृथापि ध्रियतेऽर्भकार्थे राजर्षिवर्येण विनापि तेन ॥ यस्त्वेकवीरोऽधिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ॥ ४० ॥ सौम्यानुशोचे तमधः पतंतं भ्रात्रे परेताय विदुद्रुहे यः ॥ निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान्समनुव्रतेन ॥४१॥ सोऽहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः ॥ नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन् गतविस्मयोऽत्र ॥ ४२ ॥ ॥

उद्धव, युधिष्ठिरो धर्मेण धर्ममर्यादां परिरक्षति किम् । यस्य सभायां साम्राज्यलक्ष्म्या दुर्योधनोऽतप्यत ॥ ३६ ॥ अहो सर्पवदतिक्रोधी भीमः कृतापराधेषु क्रोधं किं व्यमुचन्नो वा । यस्य पादघातं युद्धभूमिर्न सेहे ॥३७॥ रथसमूहरक्षकाणां मध्ये कीर्तिंधारी पार्थः नष्टशत्रुः सन् सुखी कच्चित् ॥३८॥ किंच । नकुलसहदेवौ युद्धे दुर्योधनात्स्वराज्यं समाच्छिद्य क्रीडेते किम् ॥३९॥ अहो कुंत्यपि पांडुना विना पुत्रार्थे जीवति किम् ॥४०॥ हे सौम्य, अधःपतंतं तं धृतराष्ट्रमहं शोचे । यो मृतस्यापि पांडोस्तत्पुत्रद्रोहेण द्रोहं कृतवान् । येनाहं स्वपुर्या निष्कासितः ॥४१॥ सोऽहं हरेः प्रसादात्तन्माहात्म्यं पश्यन् गतविस्मयोऽत्र विचरामि ॥४२॥

नूनं श्रीकृष्ण उन्मत्तानां राज्ञां वधाय भूमेर्भारहरणार्थं च कौरवाणामपराधान् सेहे ॥ ४३ ॥ किंच । अजस्य तस्य जन्म दुष्टनाशनाय । अकर्तुस्तस्य कर्माणि पुरुषाणां कर्मसु प्रवृत्तये भवंति ॥४४॥ अतो हे सखे, पवित्रकीर्तेस्तस्य भगवतो वार्तां मे कथय ॥ ४५ ॥ इति श्रीमद्भागवतचूर्णिकायां तृतीयस्कंधे प्रथमोऽध्यायः ॥१॥ ॥ द्वितीये कृष्णविश्लेषादनुशोचन्नथोद्धवः । क्षत्रे बालचरित्राणि कृष्णस्यावर्णयच्छ्वसन् ॥ १ ॥ श्रीशुक उवाच ॥ एवं विदुरेण पृष्ट उद्धवः श्रीकृष्णाश्रयां वार्तां प्रतिवक्तुं न चोत्सेहे ॥१॥ यः पंचवर्षात्मको मात्रा प्रातर्भोजनायाहूतः सन् बालक्रीडया कृष्णस्य पूजां रचयन् भोजनमपि नैच्छत् ॥२॥ स तस्य सेवया वृद्धत्वं प्राप्तः सन् प्रभोः पादौ स्मरन् श्रीकृष्णवार्तां कथं ब्रूयात् ॥३॥ स तीव्रेण भक्तियोगेन कृष्णस्वरूपे निमग्नो मुहूर्तं तूष्णीं बभूव ॥ ४ ॥

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ॥ वधात्प्रपन्नार्तिजिहीर्षयेशोऽप्युपैक्षताघं भगवान्कुरूणाम् ॥४३॥ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम् ॥ नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतंत्रम् ॥४४॥ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥४५॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥१॥ श्रीशुक उवाच ॥ इति भागवतः पृष्टः क्षत्रा वार्तां प्रियाश्रयाम् ॥ प्रतिवक्तुं न चोत्सेह औत्कंठ्यात्स्मारितेश्वरः ॥ १ ॥ यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छद्रचयन्यस्य सपर्यां बाललीलया ॥२॥ स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ॥३॥ स मुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशम् ॥ तीव्रेण भक्तियोगेन निमग्नः साधुनिर्वृतः ॥ ४ ॥ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः ॥ पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥ ५ ॥ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ॥६॥ उद्धव उवाच ॥ कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह ॥ किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहम् ॥७॥ दुर्भगो बत लोकोऽयं यदवो नितरामपि ॥ ये संवसंतो न विदुर्हरिं मीना इवोडुपम् ॥८॥ इंगितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः॥ सात्वतामृषभं सर्वे भूतावासममंसत ॥९॥ देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः ॥ भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ ॥१०॥ प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् ॥ आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनम् ॥११॥ यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् ॥ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणांगम् ॥ १२ ॥ ॥ ॥

तदा रोमांचितो मीलितदृशा प्रेमाश्रूणि मुंचन् विदुरेण कृतार्थो लक्षितः ॥५॥ ततः शनैर्भगवद्ध्यानादेहानुसंधानं प्राप्तः सन् नेत्रे विमृज्य विदुरं प्रत्याह ॥६॥ उद्धव उवाच ॥ श्रीकृष्णसूर्येऽस्तंगते सति कालसर्पेण गिलितानां बंधूनां कुशलं किं नु ब्रूयाम् ॥७॥ अयं लोको दुर्भगो बत । यादवास्तु नितरां दुर्भगाः ये कृष्णेन सहवसंतोऽपि तमीश्वरं न विदुः ॥८॥ इंगितज्ञा अपि यादवा अस्मास्वयं श्रेष्ठ इति कृष्णं मेनिरे ॥९॥ किंच । ये यादवा देवमायया मोहितास्तेऽयमस्मद्बंधुरितिवदंति । शिशुपालादयो वैरं कृत्वा निंदंति ॥१०॥ यो नृणां स्वबिंबं दर्शयित्वांतरधात् ॥११॥ यद्बिंबं मनुष्यलीला योग्यं गृहीतं तत्सर्वेषां विस्मयजनकं बभूव ॥ १२॥

धर्मराजस्य राजसूये यज्ञे त्रिभुवनस्थो लोकः यं निरीक्ष्य ब्रह्मण इदं महत्कौशलमिति मेने ॥ १३॥ यस्यानुरागहास्यविनोदलीलावलोकनैः प्राप्तमाना गोपिका असमापितकृत्या एव यस्यावलोकने तस्थुः ॥१४॥ बिंबदर्शने कारणमाह । देवादिशांतरूपेषु दैत्यादिदुष्टरूपैः पीड्यमानेषु सत्सु परमकारुणिको भगवान् जन्मना रहितोऽपि प्रादुर्बभूव ॥१५॥ किंच । यद्वसुदेवगृहेऽजस्य जन्म अनंतवीर्योऽपि च यः शत्रुभयाद्व्रजे वासं चकार तन्मां खेदयति ॥१६॥ यः पित्रोः पादावभिवंद्य हे तात, हे अंब, युवयोः शुश्रूषामकुर्वाणानामपि नः प्रसीदतमिति यदाह तत्स्मरतो मे चेतो व्यथयति ॥१७॥ तस्य कृष्णस्य चरणारविंदरेणुं विस्मर्तुं कः समर्थो भवेत् न कोऽपि ॥१८॥ किंच । राजसूये यज्ञे कृष्णं द्विषतोऽपि शिशुपालस्य सिद्धिर्भवद्भिर्दृष्टा । तद्वियोगं कः सहेत ॥१९॥ तथैव वीरा युद्धे कृ-

यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः ॥ कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत॥१३॥ यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः ॥ व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः ॥ १४ ॥ स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा ॥ परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान्यथाग्निः ॥ १५ ॥ मां खेदयत्येतदजस्य जन्मविडंबनं यद्वसुदेवगेहे ॥ व्रजे च वासोऽरिभयादिव स्वयं पुराद्यवात्सीद्यदनंतवीर्यः ॥ १६ ॥ दुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवंद्य पित्रोः ॥ तातांब कंसादुरुशंकितानां प्रसीदतं नोऽकृतनिष्कृतीनाम् ॥१७॥ को वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान्विजिघ्रन् ॥ यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार ॥ १८ ॥ दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः ॥ यां योगिनः संस्पृहयंति सम्यग्योगेन कस्तद्विरहं सहेत ॥१९॥ तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदम् ॥ नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥२०॥ स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याऽऽप्तसमस्तकामः॥ बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः॥२१॥ तत्तस्य कैंकर्यमलंभृतान्नो विग्लापयत्यंग यदुग्रसेनम् ॥ तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति ॥ २२ ॥ अहो बकीयं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी ॥ लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥ २३ ॥ मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ॥ ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतंतम् ॥२४॥ वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥२५॥ ततो नंदव्रजमितः पित्रा कंसाद्धि बिभ्यता॥ एकादश समास्तत्र गूढार्चिः सबलोऽवसत् ॥२६॥ ॥

ष्णमुखारविंदं नेत्रैः पिबंतोऽर्जुनास्त्रेण पूताः संतोऽस्य पदं प्रापुः ॥२०॥ यमपेक्ष्यान्यस्य साम्यमतिशयश्च नास्ति तस्य जगदीशस्य ॥२१॥ यत्किंकरत्वं तन्नो विग्लापयति । यो राज्यासने स्थितमुग्रसेनं स्वयमग्रे तिष्ठन् हे देव, नः आज्ञां कुर्विति विज्ञापितवान् ॥२२॥ अहो इयं पूतना यं जिघांसया स्तनयोर्धृतं कालकूटं विषं पाययामास । सापि मातृयोग्यां गतिं लेभे । एतादृशं दयालुं त्यक्त्वान्यं कं शरणं व्रजेम ॥२३॥ अहमसुरान् भागवतान् मन्ये । ये युद्धे गरुडारूढं चक्रायुधं हरिं पश्यंतो देहं जहुः ॥२४॥ यो ब्रह्मणा प्रार्थितः सन् भूमेर्भारहरणाय वसुदेवस्य देवक्यां जातः ॥२५॥ ततश्च कंसाद्धिभ्यता वसुदेवेन नंदव्रजं नीतः ।

तत्र बलरामसहित एकादश वर्षाण्यवसत् ॥२६॥ तत्र यमुनाया उपवने वत्सांश्चारयन् क्रीडतिस्म ॥२७॥ क्वचिद्रुदन्निव हसन्निव च व्रजौकसां प्रेक्षणीयां कौमारीं चेष्टां दर्शयामास ॥२८॥ स एव किंचिदधिकवयः सन् गोधनं चारयन् वेणुशब्दं कुर्वन् गोपान् रमयामास ॥ २९ ॥ किंच । कंसेन प्रेरितान् दैत्यान् लीलया जघान ॥३०॥ कालियं दमयित्वा विषयुक्तजलपानेन मृतान् गोगोपान् जीवयामास ॥ ३१ ॥ इंद्रस्य मानभंगं कुर्वन् गोवर्धनोत्सवं नंदादिभिः कारयामास ॥३२॥ कोपादिंद्रे वर्षति सति गोवर्धनोद्धरणं कृत्वा गोपादीन् संरक्षितवान् ॥३३॥ शरदि चंद्रकिरणैः प्रकाशितायां रात्र्यां स्त्रीमंडलं रमयन् स्वयं च गायन् रेमे ॥३४॥ इति श्रीमद्भागवतचू०तृतीय०द्वितीयोऽध्यायः ॥२॥ ॥ तृतीये मथुरामेत्य व्रजात्कंसवधादिकम् । यत्कृतं द्वारकायां च कृष्णेन तदवर्णयत्

परीतो वत्सपैर्वत्सांश्चारयन्व्याहरद्विभुः ॥ यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे ॥२७॥ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम् ॥ रुदन्निव हसन्मुग्धबालसिंहावलोकनः ॥२८॥ स एव गोधनं लक्ष्म्या निकेतं सितगोवृषम् ॥ चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् ॥२९॥ प्रयुक्तान्भोजराजेन मायिनः कामरूपिणः ॥ लीलया व्यनुदत्तांस्तान्बालः क्रीडनकानिव ॥३०॥ विपन्नान्विषपानेन निगृह्य भुजगाधिपम् ॥ उत्थाप्यापाययद्गावस्तत्तोयं प्रकृतिस्थितम् ॥३१॥ अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः ॥ वित्तस्य चोरुभारस्य चिकीर्षन्सव्द्ययं विभुः ॥३२॥ वर्षतींद्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः ॥ गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता ॥३३॥ शरच्छशिकरैर्मृष्टं मानयन्रजनीमुखम् ॥ गायन्कलपदं रेमे स्त्रीणां मंडलमंडनः ॥३४॥ इति श्रीमद्भागवते तृतीयस्कंधे द्वितीयोऽध्यायः ॥२॥

॥ उद्धव उवाच ॥ ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः ॥ निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्याम् ॥१॥ सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरम् ॥ तस्मै प्रादाद्वरं पुत्रं मृतं पंचजनोदरात् ॥२॥ समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषाम् ॥ गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ॥ ३ ॥ ककुद्मतोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह ॥ तद्भग्नमानानपि गृध्यतोऽज्ञान् जघ्नेऽक्षतः शस्त्रभृतः स्वशस्त्रैः ॥४॥ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुराच्छेद् द्युतरुं यदर्थे ॥ वज्र्याद्रवत्तं सगणो रुषांऽधः क्रीडामृगो नूनमयं वधूनाम् ॥५॥ सुतं मृधे स्वं वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्मथितं धरित्र्या ॥ आमंत्रितस्तत्तनयाय शेषं दत्वा तदंतःपुरमाविवेश ॥६॥ तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबंधुम् ॥ उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ॥७॥ आसां मुहूर्त एकस्मिन्नानागारेषु योषिताम् ॥ सविधं जगृहे पाणीननुरूपः स्वमायया

॥१॥ उद्धव उवाच ॥ ततो वसुदेवदेवक्योः सुखचिकीर्षया बलदेवसंयुक्तो मथुरां गत्वा कंसं राजमंचात् पृथिव्यां निपात्य तं हतं पित्रोः सुखार्थं व्यकर्षयत् ॥१॥ ततोऽवंतिकायां सांदीपनिना प्रोक्तं वेदमधीत्य तस्मै मृतं पुत्रं प्रादात् ॥२॥ ततः सर्वेषां पश्यतां परस्परसंकेतरूपेण गांधर्वविधिना रुक्मिणीं परिणीतवान् ॥३॥ ततोऽविद्धनासिकान् सप्तवृषान् दमयित्वा नाग्नजितीमुपयेमे ॥४॥ सत्यभामायाः प्रियार्थमिंद्रं जित्वा पारिजातमानीतवान् ॥५॥ पृथिव्या प्रार्थितः सन् युद्धे भौमासुरं हत्वा तत्पुत्राय भगदत्ताय राज्यं दत्वा तस्यांतर्गृहं विवेश ॥६॥ तत्र भौमासुरेणानीता नरदेवकन्या हरिं वव्रुः ॥ ७ ॥ ततस्ताः सर्वाः कन्या द्वारकां

नीत्वा भगवान् कृष्ण एकस्मिन् मुहूर्ते तासां पाणिं जगृहे ॥८॥ तत एकैकस्यां दश दश पुत्रान् जनयामास ॥९॥ कालयवनजरासंधशाल्वादीन् मुचुकुंदभीमादिनिमित्तभूतैः कृत्वा स्वयमेव हतवान् ॥१०॥ शंबरद्विविदबाणमुरदंतवक्रादींश्च हतवान् । कांश्चान्यैरघातयत् ॥११॥ अथ कुरुक्षेत्रे कौरवपांडवानां मिलितैः सैन्यैर्भूमिश्चकंपे ॥१२॥ ततो युद्धे भग्नोरुं दुर्योधनं धरण्यां पतितं पश्यन्नपि कृष्णः संतोषं न प्राप ॥१३॥ यतो भीष्मभीमादिभिर्नाशितोऽष्टादशाक्षौहिणिकोऽयं भूभारः कियान् । कुतः । यतो यादवानां दुर्जयं सैन्यं तथैवोर्वरितमस्ति ॥१४॥ यदैषां मिथो विवादो भविष्यति तदैवैषां नाशः स्यात् इयानेवैषां वधोपायो नान्योऽस्ति ॥१५॥ एवं संचिंत्य युधिष्ठिरं राज्ये संस्थाप्य सुहृदो नंदयामास ॥१६॥ ब्रह्मास्त्रेण दग्धं पूरोर्वंशं रक्षित्वा ॥ १७ ॥ धर्मराजं त्रिभिरश्वमेधैरयाजयत् । स धर्मोऽपि बंधुभिः सह भूमिं रक्षन् राज्यसुखमनुभूतवान् ॥१८॥ भगवानपि द्वारकायामासक्तिरहितः सन् विषयान् सिषेवे ॥ १९ ॥ किंच । स्निग्धहास्यावलोकनेन अमृततुल्यया वाण्या शुद्धचरितेन च ॥२०॥ इमं लोकं परलोकं यदूंश्च नितरां रमयन् स्वयं रेमे ॥२१॥ ततो बहून् संवत्सरगणान् रममाणस्य कृष्णस्य गृहेषु वैराग्यं समजायत ॥२२॥ दैवाधीनेषु कामेषु स्वयं दैवाधीनः पुमान् को विश्वासं कुर्यात् ॥ २३ ॥ कदाचित्पुर्यां क्रीडद्भिर्यादवकुमारैः कोपिता ऋषयो भगवन्मतं जानंतः संतः शापं ददुः ॥२४॥ ततः कतिपयैर्मासैर्यदुभोजाद्याः शापमुक्तये प्रभासक्षेत्रं ययुः ॥ २५ ॥ ॥ ॥

तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः ॥ एकैकस्यां दश दश प्रकृतेर्विबुभूषया ॥९॥ कालमागधशाल्वादीननीके रुंधतः पुरम् ॥
अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशत् ॥१०॥ शंबरं द्विविदं बाणं मुरं बल्वलमेव च ॥ अन्यांश्च दंतवक्रादीनवधीत्कांश्च घातयत् ॥११॥
अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान् ॥ चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥१२॥ सकर्णदुःशासनसौबलानां
कुमंत्रपाकेन हतश्रियायुषम् ॥ सुयोधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननंद पश्यन् ॥१३॥ कियान्भुवोऽयं क्षपितोरुभारो यद्द्रोण-
भीष्मार्जुनभीमम्मूलैः ॥ अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम् ॥१४॥ मिथो यदैषां भविता विवादो मध्वा मदाताम्रविलोचनानाम् ॥
नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेंऽतर्दधते स्वयं स्म ॥ १५ ॥ एवं संचिंत्य भगवान्स्वराज्ये स्थाप्य धर्मजम् ॥
नंदमायास सुहृदः साधूनां वर्त्म दर्शयन् ॥१६॥ उत्तरायां धृतः पूरोर्वंशः साध्वभिमन्युना ॥ स वै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः
॥१७॥ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः ॥ सोऽपि क्ष्मामनुजै रक्षन्रेमे कृष्णमनुव्रतः ॥१८॥ भगवानपि विश्वात्मा लोकवेदपथानुगः ॥
कामान्सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः ॥१९॥ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया ॥ चरित्रेणानवद्येन श्रीनिकेतेन चात्मना ॥२०॥
इमं लोकममुं चैव रमयन्सुतरां यदून् ॥ रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः ॥२१॥ तस्यैवं रममाणस्य संवत्सरगणान्बहून् ॥
गृहमेधेषु योगेषु विरागः समजायत ॥२२॥ दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् ॥ को विस्रंभेत योगेन
योगेश्वरमनुव्रतः ॥२३॥ पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः ॥ कोपिता मुनयः शेपुर्भगवन्मतकोविदाः ॥२४॥ ततः कतिपयैर्मासैर्वृष्णिभोजांधकादयः ॥
ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः ॥ २५ ॥ ॥ ॥ ॥

तत्र स्नात्वा देवर्षिपितॄंस्तर्पयित्वा ब्राह्मणेभ्यो गा ददुः ॥२६॥ तथा हिरण्यं रजतं शय्यां वस्त्राणि कंबलान् रथानश्वान् गजान् कन्याः पृथ्वीम् ॥२७॥ चतुर्विधमन्नं च दत्वा मस्तकैः प्रणेमुः ॥२८॥ इति श्रीमद्भागवतचू० तृतीय० तृतीयोऽध्यायः ॥३॥ ॥ चतुर्थे बंधुनिधनं श्रुत्वाऽऽत्मज्ञानलब्धये । उद्धवस्योपदेशेन क्षत्ता मैत्रेयमागमत् ॥१॥ उद्धव उवाच ॥ अथ ब्राह्मणैरनुज्ञातास्ते यादवा भोजनं कृत्वा मदिरां पीत्वा तया विभ्रंशितबुद्धयः परस्परं दुःसहं मर्मभेदकं भाषणं चक्रुः ॥१॥ तदा मदिरादोषेण विषमीकृतचेतसां तेषां यादवानां सूर्येऽस्तं गते सति वेणूनामिव मर्दनमासीत् ॥ २ ॥ भगवान् स्वमायाया गतिं वीक्ष्य सरस्वत्या जलमाचम्याश्वत्थवृक्षमूलमुपाविशत् ॥३॥ मां तु द्वारकायामेव पूर्वमुक्तवान् । हे उद्धव, त्वं बदरिकाश्रमं प्रयाहीति ॥ ४ ॥ एवमुक्तोऽपि तदभिप्रायं जानन्नहं

तत्र स्नात्वा पितॄन्देवानृषींश्चैव तदंभसा ॥ तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः ॥२६॥ हिरण्यं रजतं शय्यां वासांस्यजिनकंबलान् ॥ यानं रथानिभान्कन्या धरां वृत्तिकरीमपि ॥२७॥ अन्नं चोरुरसं तेभ्यो दत्वा भगवदर्पणम् ॥ गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः ॥२८॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे तृतीयोऽध्यायः ॥३॥ उद्धव उवाच ॥ अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीम् ॥ तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ॥१॥ तेषां मैरेयदोषेण विषमीकृतचेतसाम्॥ निम्लोचति रवावासीद्वेणूनामिव मर्दनम् ॥२॥ भगवान्स्वात्ममायाया गतिं तामवलोक्य सः ॥ सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥३॥ अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह ॥ बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥४॥ अथापि तदभिप्रेतं जानन्नहमरिंदम ॥ पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥ अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिम् ॥ श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् ॥६॥ श्यामावदातं विरजं प्रशांतारुणलोचनम्॥ दोर्भिश्चतुर्भिर्विदितं पीतकौशांबरेण च॥७॥वाम ऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहम् ॥ अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलम् ॥८॥ तस्मिन्महाभागवतो द्वैपायनसुहृत्सखा ॥ लोकाननुचरन्सिद्ध आससाद यदृच्छया ॥९॥ तस्यानुरक्तस्य मुनेर्मुकुंदः प्रमोदभावानतकंधरस्य ॥ आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच॥१०॥श्रीभगवानुवाच ॥वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः ॥ सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः॥ ११ ॥ स एष भावश्चरमो भवानामासादितस्ते मदनुग्रहो यत्॥ यन्मां नृलोकान्रह उत्सृजंतं दिष्ट्या ददृश्वान्विशदानुवृत्त्या ॥१२॥ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ॥ ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदंति॥१३॥

तत्पृष्ठतो गतवान् ॥५॥ तत्र सरस्वतीतीर आसीनम् ॥६॥ श्यामरूपमरुणलोचनं चतुर्भुजं पीतांबरधरम् ॥७॥ वाम ऊरौ कृतदक्षिणांघ्रिं पृष्ठभागेन कोमलाश्वत्थवृक्षमवष्टभ्य स्थितं कृष्णमहमद्राक्षम् ॥८॥ तदैव भगवान्मैत्रेयो यदृच्छया तत्रागमत् ॥९॥ तदा मुकुंदः प्रेमयुक्तस्य मैत्रेयस्य शृण्वतः सतो मां गतश्रमं कुर्वन् सन्नुवाच ॥१०॥ श्रीभगवानुवाच ॥ हे उद्धव, तव मनसि यदीप्सितं तदहं वेद्मि । यदन्यैर्दुष्प्रापं तत्साधनं ते ददामि ॥ ११ ॥ हे उद्धव, तव जन्मनां मध्ये इदमंत्यं जन्म । यत एकांतभक्त्या त्वं मां पुनर्दृष्टवानसि ॥१२॥ किंच । मया सृष्ट्यारंभे यज्ज्ञानं ब्रह्मणे प्रोक्तं यच्च सूरयो भागवतं वदंति तत्ते कथयामि १३

भगवतैवं परमादरेणोक्तोऽहं रोमांचितशरीरोऽश्रूणि मुंचन् कृतांजलिः सन् हरिं बभाषे ॥ १४ ॥ हे ईश, तव चरणकमलं सेवमानानां पुंसां धर्मार्थकाममोक्षेषु चतुर्ष्वपि पुरुषार्थेषु को दुर्लभः न कोऽपि । तथापि तानहं नेच्छामि ॥ १५ ॥ जन्मरहितस्य ते जन्म, कालात्मनस्तव शत्रुभयात्पलायनं, स्वात्मनि रममाणस्य स्त्रीभिः सह गृहाश्रम इति यत्तत्र विदुषामपि धीः खिद्यति ॥१६॥ किंच । त्वं गुप्तभाषणेषु मामाहूय संशयरहितोऽपि मूढवन्मां यत्पृष्टवांस्तन्मे मनो मोहयति ॥१७॥ हे हरे, यज्ज्ञानं त्वया ब्रह्मण उक्तं तद्ग्रहणाय योग्यं चेत्तर्हि नः वद । येन संसारदुःखं तरेम ॥१८॥ एवं हृदयस्थिताभिप्राये निवेदिते सति स भगवान् मह्यमात्मनः परमस्थितिरूपं ज्ञानं प्रोवाच ॥१९॥ ततोऽहं तत्पादौ प्रणम्य तं च प्रदक्षिणीकृत्य वियोगदुःखातुरः सन्निहागतः॥२०॥ इतः परं तस्य दयितं

इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोऽहम् ॥ स्नेहोत्थरोमा स्खलिताक्षरस्तं मुंचन् शुचः प्रांजलिराबभाषे ॥१४॥ को
न्वीश ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह ॥ तथापि नाहं प्रवृणोमि भूमन्भवत्पदांभोजनिषेवणोत्सुकः ॥१५॥ कर्मा-
ण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात्पलायनम् ॥ कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति धीर्विदामिह
॥१६॥ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः ॥ पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्नो मनो मोहयतीव देव ॥१७॥
ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रम् ॥ अपि क्षमं नो ग्रहणाय भर्तर्वदांजसा यद्वृजिनं तरेम ॥१८॥ इत्या-
वेदितहार्दाय मह्यं स भगवान्परः ॥ आदिदेशारविंदाक्ष आत्मनः परमां स्थितिम् ॥१९॥ स एवमाराधितपादतीर्थादधीततत्त्वा-
त्मविबोधमार्गः ॥ प्रणम्य पादौ परिवृत्य देवमिहागतोऽहं विरहातुरात्मा ॥ २० ॥ सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभोः ॥
गमिष्ये दयितं तस्य बदर्याश्रममंडलम् ॥२१॥ यत्र नारायणो देवो नरश्च भगवानृषिः ॥ मृदु तीव्रं तपो दीर्घं तेपाते लोकभा-
वनौ॥२२॥श्रीशुक उवाच ॥ इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधम् ॥ ज्ञानेनाशमयत्क्षत्ता शोकमुत्पतितं बुधः॥२३॥ स तं महा-
भागवतं व्रजंतं कौरवर्षभः ॥ विश्रंभादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे ॥ २४॥ विदुर उवाच ॥ ज्ञानं परं स्वात्मरहःप्रकाशं यदाह
योगेश्वर ईश्वरस्ते ॥ वक्तुं भवान्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरंति ॥२५॥ उद्धव उवाच॥ ननु ते तत्त्वसंराध्य ऋषिः
कौषारवोंऽति मे॥ साक्षाद्भगवताऽऽदिष्टो मर्त्यलोकं जिहासता ॥ २६ ॥ श्रीशुक उवाच ॥ इति सह विदुरेण विश्वमूर्तेर्गुणकथया
सुधया प्लावितोरुतापः ॥ क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोऽगात् ॥२७॥ ॥

बदर्याश्रममंडलं गमिष्यामि ॥२१॥ यत्र नारायणो नरश्च आकल्पांतं परोपद्रवशून्यं दुश्चरं तपस्तेपाते ॥२२॥ श्रीशुक उवाच ॥ विदुर उद्धवादेवं सुहृदां वध निशम्य प्राप्तं शोकं ज्ञानेन शमयामास ॥२३॥ ततो विदुरो व्रजंतमुद्धवमिदमाह ॥२४॥ विदुर उवाच ॥ हे उद्धव, योगेश्वरः कृष्णस्तुभ्यं यज्ज्ञानमाह तन्नो वक्तुमर्हसि ॥२५॥ उद्धव उवाच ॥ हे विदुर, मनुष्यलोकं त्यक्तुमिच्छता भगवता आज्ञापितो मैत्रेयस्ते ज्ञानं वक्ष्यति । अहं न वक्ष्यामि । यतः स एवाज्ञापितोऽस्ति ॥२६॥ श्रीशुक उवाच ॥ इति विदुरेण सह हरेर्गुणान् कथयन् यमुनायाः पुलिन एकां रात्रिं स्थित्वोद्धवो वनं जगाम ॥२७॥ ॥

परिक्षिदुवाच ॥ सर्वे यादवाः शापान्नष्टाः । हरिरपि शरीरं तत्याज । उद्धव एव कथमवशिष्टः ॥२८॥ श्रीशुक उवाच ॥ ब्रह्मशापनिमित्तेन हरिः स्वकुलं संहृत्य देहं त्यजन् सन्निदं चिंतयामास ॥२९॥ मयि लोकादुपरते सति मदाश्रयं ज्ञानमुद्धव एवार्हति ॥३०॥ अतस्तज्ज्ञानं लोकानां कथयितुमिहोद्धवस्तिष्ठतु । यतो मत्तः स ईषदपि न्यूनो न भवति ॥३१॥ एवं भगवताऽऽज्ञप्त उद्धवः कंचित्कालमत्र स्थितः । ततो बदर्याश्रमं गत्वा समाधिना हरिमाराधयामास ॥३२॥ विदुरोऽपि परमात्मनः श्रीकृष्णस्य स्तुत्यानि कर्माणि ॥ ३३ ॥ धीराणां धैर्यवर्धनं देहत्यागं चोद्धवाच्छ्रुत्वा ॥ ३४ ॥ हे नृप, भगवताऽऽत्मस्मरणं च कृतमिति श्रुत्वोद्धवे गते सति प्रेमविह्वलः सन् रुरोद ॥ ३५ ॥ ततः कालिंद्याः सकाशात्कतिपयैर्दिवसैर्यत्र मैत्रेयस्तिष्ठति तद्गंगाद्वारं ययौ ॥ ३६ ॥ इति श्रीमद्भागवत-

॥ राजोवाच ॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः ॥ स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः ॥२८॥ श्रीशुक उवाच ॥ ब्रह्मशापापदेशेन कालेनामोघवांछितः ॥ संहृत्य स्वकुलं नूनं त्यक्ष्यन्देहमचिंतयत् ॥ २९ ॥ अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयम् ॥ अर्हत्युद्धव एवाद्धा संप्रत्यात्मवतां वरः ॥३०॥ नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः ॥ अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ॥३१॥ एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना ॥ बदर्याश्रममासाद्य हरिमीजे समाधिना ॥३२॥ विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः ॥ क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ॥३३॥ देहन्यासं च तस्यैवं धीराणां धैर्यवर्धनम् ॥ अन्येषां दुष्करतरं पशूनां विक्लवात्मनाम् ॥ ३४ ॥ आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितम् ॥ ध्यायन्गते भागवते रुरोद प्रेमविह्वलः ॥ ३५ ॥ कालिंद्याः कतिभिः सिद्ध अहोभिर्भरतर्षभः ॥ प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ॥३६॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे चतुर्थोऽध्यायः ॥४॥ ॥ श्रीशुक उवाच ॥ द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम् ॥ क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः ॥१॥ विदुर उवाच ॥ सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा ॥ विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भगवान्वदेन्नः ॥२॥ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ॥ अनुग्रहायेह चरंति नूनं भूतानि भव्यानि जनार्दनस्य ॥३॥ तत्साधुवर्यादिश वर्त्म शं नः संराधितो भगवान्येन पुंसाम् ॥ हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणम् ॥४॥ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः ॥ यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ॥ ५ ॥ ॥

चू० तृती० चतुर्थोऽध्यायः ॥४॥ ॥ पंचमे भगवल्लीलां क्षत्त्रा पृष्टो महामुनिः । प्रोवाच महदादीनां सर्गं तैश्च हरेः स्तुतिम् ॥१॥ उक्तश्चतुर्भिरध्यायैः क्षत्तुमैत्रेयसंगमः । संवादस्तु तयोः स्कंधद्वयेनाथ निगद्यते ॥२॥ श्रीशुक उ० ॥ गंगाद्वार आसीनं मैत्रेयंप्रति गत्वा विदुरः पप्रच्छ ॥१॥ विदुर उ० ॥ हे मैत्रय, लोकः सुखाय कर्माणि करोति । तैः सुखं दुःखोपशमं वा नाप्नोति । किंतु भूयो दुःखमेव विंदते । अत एवंविधे संसारे यत्कर्तुं योग्यं तद्भगवान् नः कथयतु ॥२॥ भवत्सदृशा भगवद्भक्ता इह श्रीकृष्णविमुखानामनुग्रहाय चरंति ॥३॥ हे साधुश्रेष्ठ, येन हरिर्हृदि स्थितः सन् ज्ञानं ददाति तं मार्गं नः कथय ॥४॥ भगवानिदमग्रे यथा ससर्ज तथाऽऽवता-

रान् धृत्वा यद्यत्कर्माकरोत्तन्नो वद ॥५॥ किंच । स स्वहृदयाकाशे इदं विश्वं स्थापयित्वा निवृत्तव्यापारः सन् योगमायायां यथा शेते । पुनः सृष्टिकाले ब्रह्मादिरूपेण
यथा आसीत् ॥६॥ तथा स हरिर्द्विजगोसुराणां क्षेमाय मत्स्याद्यवतारभेदैः क्रीडन् यानि कर्माणि करोति ॥ ७ ॥ अपि च। हरिर्यैस्तत्वभेदैर्लोकानलो[१]कान्
लोकपालांश्च कल्पयामास ॥८॥ किंच । स येन प्रकारेण जीवानां स्वभावकृतकर्मरूपनामानां भेदं कृतवान् तन्नः कथय ॥९॥ हे मैत्रेय, मया व्यासमुखाद्बहूनि
व्रतानि श्रुतानि तृप्तिरपि जाता परंतु हरिकथाश्रवणेन न तृप्यामि ॥ १० ॥ कृष्णस्य कथामृतात्कस्तृप्येत । यत्कथामृतं नरस्य गृहप्रीतिं छिनत्ति

यथा पुनः स्वे स्व इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः ॥ योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथाऽऽसीत् ॥६॥ क्रीडन्विधत्ते
द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः ॥ मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ॥७॥ यैस्तत्वभेदैरधिलोकनाथो
लोकानलोकान्सह लोकपालान् ॥ अचीक्लृपद्यत्र हि सर्वसत्वनिकायभेदोऽधिकृतः प्रतीतः ॥८॥ येन प्रजानामुत
आत्मकर्मरूपाभिधानां च भिधां व्यधत्त ॥ नारायणो विश्वसृडात्मयोनिरेतच्च नो वर्णय विप्रवर्य ॥९॥ परावरेषां भगवन्व्रतानि
श्रुतानि मे व्यासमुखादभीक्ष्णम् ॥ अतृप्नुम क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् ॥१०॥ कस्तृप्नुयात्तीर्थपदोऽभिधानात्
सत्रेषु वः सूरिभिरीड्यमानात् ॥ यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ॥ ११ ॥ मुनिर्विवक्षुर्भगवद्गुणानां
सखापि ते भारतमाह कृष्णः ॥ यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायाम् ॥ १२ ॥ सा श्रद्दधानस्य विवर्धमाना
विरक्तिमन्यत्र करोति पुंसः ॥ हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु धत्ते॥१३॥ तान् शोच्यशोच्यानविदोऽनुशोचे हरेः
कथायां विमुखानघेन ॥ क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनाम् ॥१४॥ तदस्य कौषारव शर्मदातुर्हरेः कथामेव
कथासु सारम् ॥ उद्धृत्य पुष्पेभ्य इवाऽऽर्तबंधो शिवाय नः कीर्तय तीर्थकीर्तेः॥१५॥ स विश्वजन्मस्थितिसंयमार्थे कृतावतारः
प्रगृहीतशक्तिः ॥ चकार कर्माण्यतिपूरुषाणि यानीश्वरः कीर्तय तानि मह्यम् ॥१६॥ श्रीशुक उवाच ॥ स एवं भगवान्पृष्टः क्षत्रा
कौषारविर्मुनिः ॥ पुंसां निःश्रेयसार्थेन तमाह बहु मानयन् ॥१७॥ मैत्रेय उवाच ॥ साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता॥
कीर्तिं वितन्वता लोके आत्मनोऽधोक्षजात्मनः॥१८॥नैतच्चित्रं त्वयि क्षत्तर्बादरायणवीर्यजे ॥ गृहीतोऽनन्यभावेन यत्त्वया हरिरीश्वरः१९

॥११॥ हे मुने, व्यासो भगवद्गुणान् वक्तुमिच्छुः सन् भारतमाह । यस्मिन् भारते विषयसुखवर्णनद्वारा मनुष्याणां बुद्धिर्हरिकथायां नीता ॥ १२॥ सा मतिः
पुंसो गृहादिषु विरक्तिं करोति ॥१३॥ अतो भगवत्कथायां ये विमुखास्तान् शोचे। येषामायुर्व्यर्थं गच्छति॥१४॥अतो हे मैत्रेय, जगतः कल्याणाय सर्वकथासु
सारभूतां हरेः कथामेव नः कथय॥१५॥स विश्वस्य जन्मस्थितिसंहारार्थे कृतावतारः सन् यानि कर्माणि चकार तानि मह्यं कीर्तय॥१६॥ श्रीशुक उवाच॥ हे नृप,
एवं विदुरेण पृष्टो मैत्रेयस्तं संमानयन्नाह ॥१७॥मैत्रेय उवाच॥ हे साधो, लोकाननुगृह्णता त्वया साधु पृष्टम्॥१८॥ त्वयाऽनन्यभावेन हरिर्गृहीत एतच्चित्रं न॥१९॥

---

[१] अलोकान्–लोकालोकपर्वताद्बहिर्भागान् ।

भवान् साक्षाद्यम एव मांडव्यऋषेः शापयोगेन व्यासाद्दास्यां जातोऽस्ति ॥ २० ॥ तव ज्ञानोपदेशाय भगवान् निजधाम गच्छन् सन् मामादिशत् ॥ २१ ॥ अथ भगवल्लीला अनुक्रमेण तुभ्यं वर्णयामि ॥२२॥ आदौ सृष्टेः पूर्वमात्मैक एवासीत् ॥२३॥ स आत्मा द्रष्टा सन् यदा दृश्यं नापश्यत् तदा आत्मानमसंतमिव मेने ॥२४॥ ततः कार्यकारणरूपां मायां ससर्ज ॥२५॥ ततो ज्ञानशक्तियुक्तः सन् तस्यां मायायामात्मांशभूतेन पुरुषेण वीर्यं (चिदाभासं) आधत्त ॥ २६ ॥ ततो मायातो महत्तत्वं जातम् ॥२७॥ तन्महत्तत्वमपि विश्वस्य स्रष्टुमिच्छया आत्मानं रूपांतरमनयत् ॥ २८ ॥ महत्तत्वात्सात्विकराजसतामसभेदेन त्रिधाऽहंकारो

मांडव्यशापाद्भगवान्प्रजासंयमनो यमः ॥ भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतात् ॥२०॥ भवान्भगवतो नित्यं संमतः सानुगस्य
च ॥ यस्य ज्ञानोपदेशाय माऽऽदिशद्भगवान्व्रजन् ॥२१॥ अथ ते भगवल्लीला योगमायोपबृंहिताः ॥ विश्वस्थित्युद्भवांतार्था
वर्णयाम्यनुपूर्वशः ॥२२॥ भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः ॥ आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः ॥२३॥ स वा
एष तदा द्रष्टा नापश्यद्दृश्यमेकराट् ॥ मेनेऽसंतमिवात्मानं सुप्तशक्तिरसुप्तदृक् ॥२४॥ सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ॥ माया
नाम महाभाग ययेदं निर्ममे विभुः ॥२५॥ कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ॥ पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥२६॥ ततो
ऽभवन्महत्तत्वमव्यक्तात्कालचोदितात् ॥ विज्ञानात्माऽऽत्मदेहस्थं विश्वं व्यंजंस्तमोनुदः ॥२७॥ सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः
॥ आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया ॥२८॥ महत्तत्वाद्विकुर्वाणादहंतत्वं व्यजायत ॥ कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः
॥२९॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ अहंतत्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ॥ वैकारिकाश्च ये देवा अर्थाभिव्यंजनं
यतः ॥३०॥ तैजसानींद्रियाण्येव ज्ञानकर्ममयानि च ॥ तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ॥३१॥ कालमायांशयोगेन भगवद्वीक्षितं
नभः ॥ नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ॥३२॥ अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः ॥ ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य
लोचनम् ॥३३॥ अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम् ॥ आधत्तांभो रसमयं कालमायांशयोगतः ॥३४॥ ज्योतिषांभोऽनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितम्
॥ महीं गंधगुणामाधात्कालमायांशयोगतः ॥३५॥ भूतानां नभआदीनां यद्यद्भव्यावरावरम् ॥ तेषां परानुसंसर्गाद्यथासंख्यं
गुणान्विदुः ॥३६॥ एते देवाः कला विष्णोः कालमायांशलिंगिनः ॥ नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुम् ॥३७॥ देवा ऊचुः ॥
नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रम् ॥ यन्मूलकेता यतयोंऽजसोरु संसारदुःखं बहिरुत्क्षिपंति ॥ ३८ ॥ ॥

बभूव सात्विकाहंकारान्मनो देवाश्चाभवन् ॥२९॥३०॥ राजसाहंकाराज्ज्ञानकर्मेंद्रियाणि । तामसाच्छब्दो जातः ॥३१॥ ततः कालमायांशयोगेन भगवता वीक्षिताच्छब्दादाकाशमभूत् । आकाशात्स्पर्शवान् वायुर्जातः ॥३२॥ वायोर्विकुर्वाणाद्रूपवानग्निर्जातः ॥३३॥ अग्नेः सकाशाद्रसमयं जलं जातम् ॥३४॥ जलाद्गंधवती पृथ्वी जाता ॥३५॥ हे विदुर, आकाशादिपंचभूतानां यथाक्रममुत्तरोत्तरमेकैकाधिकान् शब्दस्पर्शादीन् गुणान् विदुः ॥३६॥ एते विष्णोरंशा देवा ब्रह्मांडरचनायामशक्ताः संतो विभुं तुष्टुवुः ॥३७॥ देवा ऊचुः ॥ हे देव, शरणागतानां तापोपशमने छत्ररूपं ते चरणारविंदं वयं नमामः ॥ ३८ ॥ ॥

हे पितः, त्वत्पादभजनं विना तापत्रयपीडिता जीवाः सुखं न लभंते ॥३९॥ हे ईश, ऋषयो वेदानाश्रित्य यत्तव पदमन्वेषयंति तत्तव चरणं वयं प्रपन्नाः स्मः ॥४०॥ यत्पदं हृदये ध्यात्वा ज्ञानेन धीरा भवंति तत्पदं वयं शरणं व्रजेम ॥४१॥ यत्तव चरणकमलं स्मृतं सद्भक्तानां मोक्षसुखं ददाति ॥ ४२ ॥ किंच । पुंसां स्वदेह एव वसतोऽपि तव दुष्प्रापं यत्तत्ते पदांबुजं वयं भजेम ॥४३॥ हे परमेश्वर, विषयासक्ताः पुरुषास्त्वद्भक्तान् न पश्यंति ॥४४॥ हे प्रभो, त्वत्कथामृतपानेन स्वच्छांतःकरणा ये पुरुषास्ते ज्ञानं प्राप्य वैकुंठलोकं प्राप्नुयुः॥४५॥ तथाऽपरे ज्ञानिनः योगबलेन मायां जित्वा श्रमेण मोक्षं प्राप्नुवंति । त्वत्कथाश्रवणादिना तु श्रमं विनैव मोक्षः प्राप्तो भवति ॥४६॥ एवं स्तुत्वा प्रार्थयंते। हे आद्य, यदर्थं त्वया वयं सृष्टास्तत्कार्यं कर्तुं वयं न शक्नुमः॥४७॥ हे अज, वयं यथा

धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणोपहता न शर्म ॥ आत्मँल्लभंते भगवंस्तवांघ्रिच्छायां सविद्यामत आश्रयेम ॥३९॥ मार्गंति यत्ते मुखपद्मनीडैश्छंदःसुपर्णैरृषयो विविक्ते ॥ यस्याघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः ॥४०॥ यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधाय ॥ ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंऽघ्रिसरोजपीठम् ॥४१॥ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते ॥ व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसाम् ॥४२॥ यत्सानुबंधेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ॥ पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जम् ॥४३॥ तान्वा असद्वृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश ॥ अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥४४॥ पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये ॥ वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुंठधिष्ण्यम् ॥४५॥ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया ते ॥४६॥ तत्ते वयं लोकसिसृक्षयाऽऽद्य त्वयानुसृष्टास्त्रिभिरात्मभिः स्म ॥ सर्वे वियुक्ताः स्वविहारतंत्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥४७॥ यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र ॥ यथोभयेषां त इमे हि लोका बलिं हरंतोऽन्नमदंत्यनूहाः॥४८॥ त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ॥ त्वं देवशक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ॥४९॥ ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणाम् ॥५०॥ इति श्रीम०महा०तृतीयस्कंधे पंचमोऽध्यायः ॥५॥ ॥ ऋषिरुवाच ॥ इति तासां स्वशक्तीनां सतीनामसमेत्य सः ॥ प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः ॥१॥ कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ॥ त्रयोविंशतितत्वानां गणं युगपदाविशत् ॥ २॥

तत्तत्काले सर्वान्भोगांस्तुभ्यं समर्पयाम। येन प्रकारेण वयमन्नं च भक्षयाम । तथा त्वद्विषयं ज्ञानमस्माकं त्वं देहि ॥४८॥ हे देव, सर्वेषामस्माकमुत्पादकस्त्वमेवाद्यः कूटस्थोऽसि ॥४९॥ हे आत्मन्, यथास्माभिर्ब्रह्मांडरचना स्यात्तथाऽनुग्रहो विधीयताम् ॥५०॥ इति श्रीमद्भागवतचू० तृ० पंचमोऽध्यायः ॥५॥ ॥ षष्ठे तैरीश्वराविष्टैः सृष्टिमाह विराट्तनोः । अधिदैवादिभेदं च तत्रैव भगवत्कृतम् ॥ १ ॥ मैत्रेय उवाच ॥ हे विदुर, अमिलित्वा स्थितानां महदादीनां तत्वानां स्थितिं दृष्ट्वा भगवान् ॥१॥ कालसंज्ञां शक्तिं गृहीत्वा प्रकृत्यादित्रयोविंशतितत्वानां गणमंतर्यामिरूपेण युगपदाविशत् ॥ २ ॥ ॥ ॥

भिन्नं तं गणं चेष्टारूपया क्रियाशक्त्या संयोजयामास ॥३॥ तदा जागृतया क्रियाशक्त्या युक्तो गणः स्वांशैर्विराड्देहं जनयामास ॥४॥ स गणोऽन्योन्यं संयोगं प्राप्य स्वांशेन पुरुषरूपतां प्राप्तः ॥५॥ सोंऽतर्यामी विराट्पुरुषः ब्रह्मांडकोशे उदकेषु सहस्रसंवत्सरान् वसन् ॥६॥ स आत्मानमेकधा–'हृदयावच्छिन्नचैतन्यरूपेण' त्रिधा–'अध्यात्माधिदैवाधिभूतेति भेदेन' दशधा–'प्राणरूपेण' व्यभजत् ॥७॥ अयं विराट्पुरुषः सर्वजीवानामात्मा सन् परमात्मन आद्योऽवतारः ॥ ८ ॥ ॥९॥ स ईशस्तत्वानां विज्ञापितं स्मरन् तेषां विविधवृत्तिसंपादनार्थं चिच्छक्त्या विराड्देहमेवं करिष्यामीति विचारितवान् ॥१०॥ अथ तस्य स्थानानि निरभिद्यंत तानि मत्तः श्रृणु ॥११॥ आदौ तस्य मुखं निर्भिन्नं तत्राग्निर्देवता वागिंद्रियं वक्तव्यं विषयः । यया वाचा जीवः शब्दमुच्चारयति ॥१२॥ ततस्तालुरुत्पन्ना ।

सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् ॥ भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥३॥ प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः ॥ प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपूरुषम् ॥४॥ परेण विशता स्वस्मिन्मात्रया विश्वसृड्गणः ॥ चुक्षोभान्योन्यमासाद्य यस्मिँल्लोकाश्चराचराः ॥५॥ हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् ॥ आंडकोश उवासाप्सु सर्वसत्वोपबृंहितः ॥ ६ ॥ स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् ॥ विबभाजाऽऽत्मनात्मानमेकधा दशधा त्रिधा ॥७॥ एष ह्यशेषसत्वानामात्मांशः परमात्मनः ॥ आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥८॥ साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा ॥ विराट् प्राणो दशविधा एकधा हृदयेन च ॥९॥ स्मरन्विश्वसृजामीशो विज्ञापितमधोक्षजः ॥ विराजमतपत्स्वेन तेजसैषां विवृत्तये ॥ १० ॥ अथ तस्याभितप्तस्य कति चायतनानि ह ॥ निरभिद्यंत देवानां तानि मे गदतः शृणु ॥ ११ ॥ तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत्पदम् ॥ वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते ॥१२॥ निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः ॥ जिह्वयांऽशेन च रसं ययासौ प्रतिपद्यते ॥१३॥ निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम् ॥ घ्राणेनांशेन गंधस्य प्रतिपत्तिर्यतो भवेत् ॥१४॥ निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशद्विभोः ॥ चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् ॥१५॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् ॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥१६॥ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः ॥ श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते ॥१७॥ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः ॥ अंशेन रोमभिः कंडूं यैरसौ प्रतिपद्यते ॥१८॥ मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत् ॥ रेतसांशेन येनासावानंदं प्रतिपद्यते ॥१९॥ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् ॥ पायुनांशेन येनासौ विसर्गं प्रतिपद्यते ॥ २० ॥ ॥

तस्यां वरुणो देवता जिह्वेंद्रियं रसो विषयः । यया जिह्वया जीवो रसं जानाति ॥१३॥ ततो नासिके उत्पन्ने । तत्र अश्विनौ देवते घ्राणमिंद्रियं गंधो विषयः । येन गंधं जिघ्रति ॥१४॥ ततोऽक्षिणी उत्पन्ने । तत्र सूर्यो देवता चक्षुरिंद्रियं रूपं विषयः । येन रूपं पश्यति ॥१५॥ ततश्चर्माण्युत्पन्नानि । तत्र वायुर्देवता त्वगिंद्रियं स्पर्शो विषयः । येन स्पर्शं जानाति ॥१६॥ अथ कर्णावुत्पन्नौ । तत्र दिशो देवताः श्रोत्रमिंद्रियं शब्दो विषयः । येन शब्दज्ञानं भवति ॥१७॥ ततस्त्वगुत्पन्ना । तत्र ओषधयो देवताः रोमाणींद्रियं कंडूर्विषयः ॥१८॥ ततो मेंढ्रमुत्पन्नम् । तत्र प्रजापतिर्देवता रेत इंद्रियं सुखं विषयः । येनानंदः प्राप्यते ॥१९॥ ततो गुदमुत्पन्नम् । तत्र मित्रो

देवता पायुरिंद्रियं विसर्गों विषयः। येन मलत्यागं करोति ॥२०॥ विराट्पुरुषस्य हस्तावुत्पन्नौ। तत्र इंद्रो देवता वार्तेंद्रियं जीविकाविषयः। येन व्यापारं करोति। अस्य
पादावुत्पन्नौ। तत्र विष्णुर्देवता गतिरिंद्रियं प्राप्यं विषयः। येन गमनागमने करोति ॥२२॥ ततोऽस्य बुद्धिरुत्पन्ना। तत्र ब्रह्मा देवता ज्ञानमिंद्रियं ज्ञातव्यं विषयः। येन
निश्चयात्मकं ज्ञानं जायते ॥२३॥ ततोऽस्य हृदयमुत्पन्नम्। तत्र चंद्रो देवता मन इंद्रियं संकल्पविकल्पौ विषयौ। याभ्यां कर्तव्याकर्तव्यविचारं करोति ॥२४॥
ततोऽहंकार उत्पन्नः। तत्र रुद्रो देवताऽहंवृत्तिरिंद्रियं क्रिया विषयः। येनाहं करोमीत्यभिमानं करोति ॥२५॥ अस्यांतःकरणमुत्पन्नम्। तत्र क्षेत्रज्ञो देवता चित्तमिंद्रियं
विज्ञानं विषयः॥२६॥अस्य विराड्रूपस्य शिरसः स्वर्ग उत्पन्नः। पद्भ्यां धरा। नाभेः खम्। येषु सत्वादिगुणपरिणामाः सुरादयो दृश्यंते ॥२७॥ तत्र सत्व-

हस्तावस्य विनिर्भिन्नाविंद्रः स्वःपतिराविशत् ॥ वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते ॥२१॥ पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥
गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते ॥२२॥ (बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् ॥ बोधेनांशेन
बोद्धव्यप्रतिपत्तिर्यतो भवेत्) ॥२३॥ हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत्॥मनसांशेन येनासौ विक्रियां प्रतिपद्यते॥२४॥
आत्मानं चास्य निर्भिन्नमभिमानोऽविशत्पदम् ॥ कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते ॥ २५ ॥ सत्वं चास्य विनिर्भिन्नं महान्धिष्ण्यमुपाविशत् ॥
चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते ॥२६॥ शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत ॥गुणानां वृत्तयो
येषु प्रतीयंते सुरादयः ॥२७॥ आत्यंतिकेन सत्वेन दिवं देवाः प्रपेदिरे ॥ धरां रजःस्वभावेन पणयो ये च ताननु ॥ २८ ॥
तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः ॥ उभयोरंतरं व्योम ये रुद्रपार्षदां गणाः ॥२९॥ मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह॥ यस्तून्मुखत्वाद्वर्णानां
मुख्योऽभूद्ब्राह्मणो गुरुः ॥३०॥ बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः ॥ यो जातस्त्रायते वर्णान्पौरुषः कंटकक्षतात्
॥३१॥ विशोऽवर्तंत तस्योर्वोर्लोकवृत्तिकरीर्विभोः ॥ वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत् ॥ ३२ ॥ पद्भ्यां भगवतो जज्ञे
शुश्रूषाधर्मसिद्धये ॥ तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ॥ ३३ ॥ एते वर्णाः स्वधर्मेण यजंति स्वगुरुं हरिम् ॥ श्रद्धयाऽऽत्मविशुद्ध्यर्थं
यज्जाताः सह वृत्तिभिः ॥३४॥ एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः ॥ कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयम्
॥३५॥ अथापि कीर्तयाम्यंग यथामति यथाश्रुतम् ॥ कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधाऽसतीम्॥ ३६ ॥ एकांतलाभं वचसो
नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः ॥ श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगम् ॥ ३७ ॥ ॥

गुणेन देवाः स्वर्गं प्रपेदिरे। रजोगुणेन मनुष्या भूमिं प्राप्ताः। तमोगुणेन भूतगणा आकाशं प्राप्ताः॥२८॥२९॥पुरुषस्य मुखतो ब्राह्मण उत्पन्नः। यस्तु मुखोद्भवत्वाद्वर्णानां
गुरुरभूत् ॥३०॥ बाहुभ्यां क्षत्रियो जातः। यः प्रजाः सर्वोपद्रवाद्रक्षति॥३१॥ तस्योरूभ्यां वैश्यो जातः। यः स्ववृत्त्या नृणां जीविकां संपादितवान् ॥३२॥शुश्रूषाधर्मसिद्धये
पद्भ्यां शूद्रो जातः ॥३३॥ एते चत्वारो वर्णा आत्मशुद्ध्यर्थं स्वधर्मेण हरिं यजंति ॥३४॥ हे विदुर, एतद्भगवतो विराड्रूपं पूर्णत्वेन कथयितुं कः समर्थो
भवेत्॥३५॥अथापि गुरुमुखाद्यथाश्रुतं तथा हरेः कीर्तिं कथयामि ॥३६॥ भगवतः सर्वान् गुणान् अज्ञात्वापि यथामति कीर्तने श्रवणे वाऽवश्यं मोक्षो भवति ॥३७॥

हे विदुर, हरेर्महिमा संवत्सरसहस्रांतेऽपि ब्रह्मणापि ज्ञातः किं नैव ॥३८॥ अहो हरेर्माया मायिनामपि मोहिनी । यस्माद्धरिः स्वयमपि स्वमायाया गतिरेतावतीति
न वेद । अनंतत्वात् ॥३९॥ अतो दुर्ज्ञेयत्वात्केवलं तस्मै भगवते केवलं नमस्करोमि ॥४०॥ इति श्रीमद्भागवतचू०तृ० षष्ठोऽध्यायः ॥ ६ ॥ ॥ सप्तमे
संशयच्छेदि प्रतिनंद्य मुनेर्वचः । पुनः क्षत्रा कृता नाना प्रश्नाः सम्यगुदीरिताः ॥१॥ श्रीशुक उवाच ॥ विदुरो मैत्रेयाद्विराडुत्पत्तिं श्रुत्वा प्रत्यभाषत ॥१॥ विदुर
उवाच ॥ हे ब्रह्मन्, निर्विकारस्य क्रिया निर्गुणस्य गुणाश्च लीलयापि कथं युज्येरन् ॥२॥ स्वतस्तृप्तस्य भगवतो बालकवल्लीलापि न युज्येत ॥३॥ यः स्वमायया
विश्वं सृजति पालयति नाशयति च ॥४॥ देशभेदतः कालभेदतः बाल्याद्यवस्थाभेदतः स्वतः अन्यतो वा यस्य बोधो न लिप्यते सोऽविद्यया कथं युज्येत ॥५॥

आत्मनोऽवसितो वत्स महिमा कविनाऽऽदिना ॥ संवत्सरसहस्रांते धिया योगविपक्कया ॥३८॥ अतो भगवतो माया मायिनामपि
मोहिनी ॥ यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ॥ ३९ ॥ यतोऽप्राप्य न्यवर्तंत वाचश्च मनसा सह ॥ अहं चान्य इमे
देवास्तस्मै भगवते नमः ॥४०॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणं
मैत्रेयं द्वैपायनसुतो बुधः ॥ प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥१॥ ॥ विदुर उवाच ॥ ब्रह्मन्कथं भगवतश्चिन्मात्रस्याविकारिणः
॥ लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः ॥ २ ॥ क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः ॥ स्वतस्तृप्तस्य
च कथं निवृत्तस्य सदान्यतः॥ ३ ॥अस्राक्षीद्भगवान्विश्वं गुणमय्याऽऽत्ममायया ॥ तया संस्थापयत्येतद्भूयः प्रत्यपिधास्यति
॥४॥ देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः ॥ अविलुप्तावबोधात्मा स युज्येताजया कथम् ॥५॥ भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः
॥ अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥६॥ एतस्मिन्मे मनो विद्वन्खिद्यतेऽज्ञानसंकटे ॥ तन्नः पराणुद
विभो कश्मलं मानसं महत् ॥७॥ ॥ श्रीशुक उवाच ॥ स इत्थं चोदितः क्षत्रा तत्त्वजिज्ञासुना मुनिः ॥ प्रत्याह भगवच्चित्तः
स्मयन्निव गतस्मयः ॥ ८ ॥ ॥ मैत्रेय उवाच ॥ सेयं भगवतो माया यन्नयेन विरुध्यते ॥ ईश्वरस्य विमुक्तस्य कार्पण्यमुत
बंधनम् ॥९॥ यदर्थेन विनामुष्य पुंस आत्मविपर्ययः ॥ प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः ॥१०॥ यथा जले चंद्रमसः कंपादिस्तत्कृतो
गुणः ॥ दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ॥११॥ स वै निवृत्तधर्मेण वासुदेवानुकंपया ॥ भगवद्भक्तियोगेन तिरोधत्ते
शनैरिह ॥१२॥ यदेंद्रियोपरामोऽथ द्रष्ट्रात्मनि परे हरौ ॥ विलीयंते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः ॥१३॥ ॥

एष एको भगवान् सर्वक्षेत्रेषु स्थितः। तस्य कर्मभिर्दुर्भगत्वं क्लेशो वा कुतः ॥६॥ एतस्मिन्नज्ञानसंकटे मे मनः खिद्यतेऽतस्तत्संकटं दूरीकुरु ॥७॥ श्रीशुक उवाच ॥ हे नृप,
एवं विदुरेण प्रेरितो मैत्रेयस्तं प्रत्याह ॥८॥ मैत्रेय उवाच ॥ सेयं भगवतो माया । या तर्केण न ज्ञायते ॥९॥ यथा स्वप्ने मम शिरश्छिन्नमिति मृषा सत् सत्यमेव
प्रतीयते तद्वत् ॥१०॥ यथा जले प्रतिबिंबितस्य चंद्रस्यैव कंपादिधर्मो नत्वाकाशस्थितस्य चंद्रस्य। तथा देहादिधर्मो मिथ्याभूतोऽपि जीवस्यैव नत्वीश्वरस्य ॥११
सा माया निवृत्तिधर्मेण वासुदेवकृपया भक्तियोगेन च शनैस्तिरोधत्ते ॥१२॥ यदांऽतर्यामिरूपे आत्मनि इंद्रियाणां नैश्चल्यं भवेत् तदा क्लेशा विलीयंते ॥१३॥

भगवद्गुणानामनुवादः श्रवणं च सर्वक्लेशनाशं करोति किं पुनस्त्वच्चरणसेवा ॥१४॥ विदुर उवाच ॥ हे मैत्रेय, ईशस्य जगत्कर्तृत्वादि कथं जीवस्य संसारश्च
कथम्। एवंभूतो यो मम संशयोऽभूत् स तु तव सोपपत्तिकभाषणेन गतः । अतोऽधुनेश्वरस्य स्वातंत्र्ये जीवस्य पारतंत्र्ये च मे मनो निःसंशयं जातम् ॥१५॥
किंच । एतद्दुर्भगत्वादि सर्वं मायाश्रयमिति यत्त्वयोक्तं तत्साधु ॥१६॥ यो लोके केवलं विषयासक्तो यश्च प्रकृतेः परमीश्वरं प्राप्तस्तावुभौ सुखं जीवतः । यस्तु
दुःखानुसंधानेन प्रपंचं हातुमिच्छति आत्मस्वरूपानुभवाभावाद्धातुं च न शक्नोति स क्लिश्यते ॥१७॥ अपिच। अत्र संसारेऽर्थो नास्ति किंतु प्रतीतिर्वर्तते। सापि
युष्मच्चरणसेवया गच्छेत् ॥१८॥ भगवत्पादयोः प्रेमोत्सवः संसारं नाशयति ॥१९॥ अल्पपुण्यस्य पुंसो वैकुंठमार्गभूतानां साधूनां सेवैव दुर्लभा ॥२०॥ अपि

अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः ॥ कुतः पुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा ॥१४॥ ॥ विदुर उवाच॥
संछिन्नः संशयो मह्यं तव सूक्तासिना विभो ॥ उभयत्रापि भगवन्मनो मे संप्रधावति ॥१५॥ साध्वेतद्व्याहृतं विद्वन्नात्ममायायनं
हरेः ॥ आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः ॥१६॥ यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ॥ तावुभौ सुखमेधेते क्लिश्यत्यंतरितो
जनः ॥१७॥ अर्थाभावं विनिश्चित्य प्रतीतस्यापि नात्मनः ॥ तां चापि युष्मच्चरणसेवयाहं पराणुदे ॥१८॥ यत्सेवया
भगवतः कूटस्थस्य मधुद्विषः ॥ रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः ॥१९॥ दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु ॥ यत्रोपगीयते
नित्यं देवदेवो जनार्दनः ॥ २० ॥ सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् ॥ तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः
॥२१॥ यमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुबाहुकम् ॥ यत्र विश्व इमे लोकाः सविकाशं समासते ॥२२॥ यस्मिन्दशविधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत्
॥ त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः ॥२३॥ यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः ॥ प्रजा विचित्राकृतय आसन्याभिरिदं
ततम् ॥२४॥ प्रजापतीनां स पतिश्चिक्लृपे कान्प्रजापतीन् ॥ सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् ॥२५॥ एतेषामपि
वंशांश्च वंश्यानुचरितानि च ॥ उपर्यधश्च ये लोका भूमेर्मित्रात्मजाऽऽसते॥२६॥ तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय ॥ तिर्यङ्मानुषदेवानां
सरीसृपपतत्रिणाम् ॥ वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदाम् ॥२७॥ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम् ॥
सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमम् ॥२८॥ वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ॥ ऋषीणां जन्मकर्मादि वेदस्य च विकर्षणम्
॥२९॥ यज्ञस्य च वितानानि योगस्य च पथः प्रभो ॥ नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतम् ॥ ३० ॥ ॥

च। यो महत्तत्वाद्यंशैः विराजं सृष्ट्वा तदनु प्राविशत् ॥२१॥ यं सहस्रचरणोरुबाह्वादिविशिष्टं वदंति । यत्रेमे लोका असंकोचेन तिष्ठंति ॥२२॥ यस्मिन्निंद्रियाणि
विषया देवताश्चैतैः सहितो दशविधः प्राणस्त्वयोक्तस्तस्य ब्रह्माद्या विभूतीर्वद ॥२३॥ यासु विभूतिषु विश्वं पुत्रपौत्रादिभिर्व्याप्तम् ॥२४॥ स ब्रह्मा यान् प्रजापतीन्
सर्गाननुसर्गान् मनून् मन्वंतराधिपांश्च ससर्ज ॥२५॥ तेषां वंशान् वंश्यानुचरितं च त्रयाणां लोकानां प्रमाणं च ॥२६॥ तिर्यङ्मनुष्यदेवसरीसृपपक्षिणां चतुर्विधप्राणिनामुत्पत्तिं
च वद॥२७॥ भगवद्गुणावताराणां विक्रमान्॥२८॥ वर्णाश्रमविभागान् ऋषीणां जन्म कर्म च। वेदविभागान्॥२९॥ यज्ञविस्तारान् योगज्ञानसांख्यानां

मार्गांश्च वद ॥३०॥ पाखंडप्रवृत्तिं जीवस्य गतिम् ॥३१॥ धर्मार्थकाममोक्षोपायान् कृषिवाणिज्यदंडनीत्यादीनां विधिम् ॥३२॥ श्राद्धविधिं पितृणां सर्गं ग्रहनक्षत्रादीनां स्थितिम् ॥३३॥ दानस्य तपस इष्टापूर्तयोश्च फलं प्रवासस्थस्य धर्मं आपद्धर्मम् ॥३४॥ येन मार्गेण जनार्दनस्तुष्येत् यादृशानां भक्तानां च प्रसीदति तद्ब्रूहि ॥३५॥ हे विदुर, दीनवत्सला गुरवः शिष्याणां पुत्राणां चापृष्टमपि यद्योग्यं तद्ब्रूयुः॥३६॥तत्त्वानां प्रलयम् ॥३७॥ पुरुषस्य स्थितिं जीवस्य तत्त्वं जीवेश्वरयोरैक्यप्रतिपादकमौपनिषदं ज्ञानम् ॥३८॥ तत्साधनानि च वद । मनुष्याणां स्वतः ज्ञानं भक्तिर्वैराग्यं च कथं भवति तद्वद॥३९॥एतान् प्रश्नान् हेरः कर्म ज्ञातुमिच्छया मया कृतान् त्वं मायया नष्टचक्षुषो मे ब्रूहि ॥४०॥ वेदयज्ञतपोदानादि साधनानि जीवाभयप्रदानस्य कलामपि न कुर्वंति ॥ ४१ ॥ श्रीशुक

पाखंडपथवैषम्यं प्रतिलोमनिवेशनम्॥जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः॥३१॥धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः ॥ वार्ताया दंडनीतेश्च श्रुतस्य च विधिं पृथक्॥३२॥श्राद्धस्य च विधिं ब्रह्मन्पितृणां सर्गमेव च॥ग्रहनक्षत्रताराणां कालावयवसंस्थितिम्॥३३॥दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलम् ॥ प्रवासस्थस्य यो धर्मो यश्च पुंस उतापदि॥३४॥ येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः॥संप्रसीदति वा येषामेतदाख्याहि चानघ॥३५॥अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम॥अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः॥३६॥तत्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः॥तत्रेमं क उपासीरन्कउस्विदनुशेरते॥३७॥पुरुषस्य च संस्थानं स्वरूपं वा परस्य च ॥ ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनम्॥३८॥निमित्तानि च तस्येह प्रोक्तान्यनघ सूरिभिः ॥ स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा॥३९॥ एतान्मे पृच्छतः प्रश्नान्हरेः कर्मविवित्सया॥ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः॥४०॥ सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ॥जीवाभयप्रदानस्य न कुर्वीरन्कलामपि ॥४१॥श्रीशुक उवाच॥स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः॥प्रवृद्धहर्षो भगवत्कथायां संचोदितस्तं प्रहसन्निवाह॥४२॥इति श्रीमद्भा० महा० तृती०सप्तमोऽध्यायः॥७॥

मैत्रेय उवाच ॥ सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ॥ बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णम् ॥१॥ सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य॥प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः॥२॥ आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठसत्वम् ॥ विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ॥३॥ स्वमेव धिष्ण्यं बहु मानयन्तं यं वासुदेवाभिधमामनंति ॥ प्रत्यग्धृताक्षांबुजकोशमीषदुन्मीलयंतं विबुधोदयाय ॥४॥ ॥

उवाच ॥ इति विदुरेण पृष्टो मैत्रेयो हर्षयुक्तः सन् तं प्रत्याह ॥४२॥ इति श्रीमद्भागवतचू० तृती० सप्तमोऽध्यायः ॥७॥ ॥ अष्टमे समभूद्ब्रह्मा नाभेस्तु जलशायिनः । तमजानन् जलेऽबिभ्यत्तपसाऽ तोषयद्विभुम् ॥ १ ॥ मैत्रय उवाच ॥ हे विदुर, अहो अयं पूरुवंशः साधुभिः सेव्योऽस्ति । यस्मिन् वंशे लोकपालो यमस्त्वं भूत्वा भगवत्कीर्तिं पदे पदे नूतनयसि ॥१॥ अतोऽहं नृणां दुःखनाशाय महासुखप्राप्तये च भागवतं नाम पुराणं प्रारभे। यत् संकर्षणः सनत्कुमारादीन् कथयामास॥ २ ॥ तदेवाह। एकदा सनकादयस्तत्त्वं ज्ञातुमिच्छवः संतः पातालतले गत्वा तत्रासीनमाद्यं संकर्षणं पप्रच्छुः ॥३॥ कथंभूतं तम् । स्वकीयमाश्रयं वासु-

देवसंज्ञं सर्वोत्कर्षेण पूजयंतं कृपावलोकेन सनकादीनामभ्युदयार्थं नेत्रे उन्मीलयंतम् ॥४॥ तादृशमनंतं दृष्ट्वा गंगोदकेनार्द्रैः स्वजटाकलापैस्तच्चरणं नमंतः ॥५॥ तेन कृतानि कर्माणि गृणंतश्च संतस्तं संकर्षणं पप्रच्छुः ॥ ६ ॥ तदा संकर्षणो निवृत्तिधर्माभिरतं सनत्कुमारंप्रति भागवतं वदतिस्म । ततः सनत्कुमारः प्रश्नं कुर्वते सांख्यायनाय वदतिस्म ॥७॥ सांख्यायनोऽपि मम गुरवे पराशराय बृहस्पतये च जगाद ॥८॥ स पराशरो मह्यं कथयामास । अहं तद्भागवतं हे विदुर, ते श्रद्धालवे कथयामि ॥ ९ ॥ हे विदुर, यदा इदं विश्वं प्रलयकालीनसमुद्रोदके निमग्नमासीत्तदा मायाविनोदं परित्यज्य शेषशय्यायां शयानः श्रीनारायणो नेत्रे निमील्य ॥१०॥ तस्मिन् सलिले उवास । यथा अप्रकटदाहशक्तिरग्निः काष्ठे तिष्ठति तद्वत् ॥ ११ ॥ स चतुर्युगानां सहस्रं योगनिद्रयोदकेषु स्वपन् स्वदेहे

स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानम्॥पद्मं यदर्चंत्यहिराजकन्याः सप्रेम नानाबलिभिर्वरार्थाः॥५॥मुहुर्गृणंतो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः॥किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रम्॥६॥प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन॥सनत्कुमाराय स चाह पृष्टः सांख्यायनायांग धृतव्रताय॥७॥सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः॥जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च॥८॥प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम्॥सोऽहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय॥९॥उदाप्लुतं विश्वमिदं तदाऽऽसीद्यन्निद्रया मीलितदृङ्न्यमीलयत्॥अहींद्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः॥१०॥सोंतःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः॥उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः॥११॥चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या॥कालाख्ययाऽऽसादितकर्मतंत्रो लोकानपीतान्ददृशे स्वदेहे॥१२॥तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोऽर्थो रजसा तनीयान्॥गुणेन कालानुगतेन विद्धः सूष्यंस्तदाऽभिद्यत नाभिदेशात्॥१३॥सपद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन॥स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ॥१४॥ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् ॥ तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदंति सोऽभूत् ॥१५॥ तस्यां स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः ॥ परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥१६॥ तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढम्॥उपाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाऽविददादिदेवः॥१७॥क एष योऽसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु॥अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सतानुभाव्यम् ॥१८॥

लीनान् लोकान् ददर्श ॥१२॥ यदा च भगवतो लोकसिसृक्षा जाता तदा तन्नाभितः कमलं प्रादुर्बभूव ॥ १३ ॥ तत्कमलं स्वतेजसा सूर्य इव विशालं तज्जलं प्रकाशयत् सत्तस्माज्जलादुदतिष्ठत् ॥१४॥ तत्कमलं यस्माज्जातं स एव विष्णुस्तस्मिन् कमले ब्रह्मरूपो बभूव । यं च स्वयंभुवं वदंति ॥ १५ ॥ स पद्मकर्णिकायां स्थितो लोकमपश्यन् प्रतिदिशमवलोकनेन चत्वारि मुखानि लेभे ॥१६॥ ततस्तत्प्रलयोदकान्निःसृतं कमलमाश्रितः स ब्रह्मा तत्पद्मं लोकतत्त्वमात्मानं च साक्षान्न ज्ञातवान्॥१७॥तदाह।योऽसावहं कमल आसीन एष कः। एकमेव चैतत्कमलमुदके कुतो वा जातम् । यत्रैतत्कमलं स्थितं तदस्याधस्तात्किंचिदस्ति ॥१८॥

स एवं विचार्य तत्कमलनाडीद्वाऽरांतर्जलं प्रविश्य विचिन्वन्नपि स्वस्योत्पत्तिकारणं न ज्ञातवान् ॥१९॥ एवं स्वकारणं विचिन्वतस्तस्य शतसंवत्सरात्मकः कालो गतः ॥२०॥ ततोऽन्वेषणान्निवृत्तो ब्रह्मा पुनस्तत्कमलं स्थित्वा समाधिस्थो बभूव ॥२१॥ तदा पूर्वं यं संवत्सरशतं विचिन्वन्नपि नापश्यत्तमात्मानं स्वयमेवांतर्हृदये प्रकाशितमपश्यत् ॥२२॥ कथंभूतं तम् । शेषपर्यंके एकं शयानम् ॥२३॥ मरकतश्यामं पीतांबरं वनमालिनम् ॥२४॥ स्वमानेन सार्धत्रयहस्तविस्तीर्णदेहं विचित्रदिव्यभूषणम् ॥२५॥ कामनया भजतां पुरुषाणां मनोरथपूरकं स्वचरणकमलं कृपया प्रदर्शयंतम् ॥ २६ ॥ परिस्फुरत्कुंडलाभ्यां मंडितेन मंदहासयुक्तेन

स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश ॥ नार्वाग्गतस्तत्खरनालनालनाभिं विचिन्वंस्तदविंदताजः ॥१९॥ तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत्सुमहांस्त्रिणेमिः ॥ यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः ॥ २०॥ ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः ॥ शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ॥ २१ ॥ कालेन सोऽजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः ॥ स्वयं तदंतर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वम् ॥ २२ ॥ मृणालगौरायतशेषभोगपर्यंक एकं पुरुषं शयानम् ॥ फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोये ॥२३॥ प्रेक्षां क्षिपंतं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्ध्नः ॥ रत्नोदधारौषधिसौमनस्यवनस्रजो वेणुभुजांघ्रिपांघ्रेः ॥ २४ ॥ आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण ॥ विचित्रदिव्याभरणांशुकानां कृताश्रियाऽपाश्रितवेषदेहम् ॥ २५ ॥ पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चतां कामदुघांघ्रिपद्मम् ॥ प्रदर्शयंतं कृपया नखेंदुमयूखभिन्नांगुलिचारुपत्रम् ॥२६॥ मुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन ॥ शोणायितेनाधरबिम्बभासा प्रत्यर्हयंतं सुनसेन सुभ्र्वा ॥ २७ ॥ कदंबकिंजल्कपिशंगवाससा स्वलंकृतं मेखलया नितंबे ॥ हारेण चानंतधनेन वत्स श्रीवत्सवक्षस्थलवल्लभेन ॥ २८ ॥ परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखम् ॥ अव्यक्तमूलं भुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शम् ॥२९॥ चराचरौको भगवन्महीध्रमहींद्रबंधुं सलिलोपगूढम् ॥ किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भम् ॥ ३० ॥ निवीतमाम्नायमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिम् ॥ सूर्येंदुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदम् ॥ ३१ ॥ तर्ह्येव तन्नाभिसरःसरोजमात्मानमंभः श्वसनं वियच्च ॥ ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ॥ ३२ ॥ स कर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा ॥ अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥ ॥

मुखेन पूजकान् संमानयंतम् ॥२७॥ मेखलया हारेण श्रीवत्सेन च स्वलंकृतम् ॥२८॥ अमूल्यांगदैर्व्याप्तदोर्दंडं शेषस्य फणैः संवेष्टितस्कंधम् ॥२९॥ चराचराणां स्थानं कौस्तुभधरम् ॥३०॥ सूर्यचंद्रादिभिरपि स्वव्यापारैराकलयितुमशक्यं हरिं ददर्श ॥ ३१ ॥ तदैव लोकसृष्टौ प्राप्तज्ञानः सन् तस्य नाभिसरोवरे कमलं आत्मानं जलं प्रलयवायुमाकाशं च ददर्श ॥३२॥ तदा भगवति प्रवेशितचित्तः सन् विभुं तुष्टाव ॥३३॥ इति श्रीमद्भागवतचू० तृती० अष्टमोऽध्यायः ॥ ८ ॥

नवमे तपसा तुष्टं दृष्ट्वा नारायणं त्वजः। अस्तौदेकार्णवे सीदन् लोकसर्गचिकीर्षया ॥१॥ ब्रह्मोवाच ॥ हे भगवन्, बहुकालोपासनेन त्वं अद्य मया ज्ञातोऽसि। देहधारिभिर्भगवतस्तव तत्त्वं न ज्ञायते इयं महती दुःखवार्ताऽस्ति। यतस्त्वमेव सत्यत्वाज्ज्ञातुं योग्यः। त्वद्व्यतिरिक्तं यद्भासते तत्सत्यं न भवति। यतो मायया त्वं पंचमहाभूतादिस्वरूपो भासि ॥१॥ हे ईश, मायासंबंधरहितेनापि त्वयाऽवतारशतैकबीजमेतद्रूपमुपासकानामनुग्रहाय प्रकटीकृतम्। यस्य नाभिकमलादहमुत्पन्नोऽस्मि ॥२॥ हे सर्वोत्कृष्ट, यत्प्रकाशरूपं भेदरहितं आनंदमात्रं भवतो निर्गुणं स्वरूपं तदेतस्माद्रूपाद्भिन्नं न पश्यामि किंतु इदमेव तत्। अतः कारणात्तव जगत्कारणभूतमिदं रूपमहमाश्रितोऽस्मि ॥ ३ ॥ हे जगन्मंगल, न उपासकानां कल्याणार्थं तदेतद्रूपं येन भवता ध्याने दर्शितं तस्मै तुभ्यं भगवते नमः

ब्रह्मोवाच॥ ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यम्॥ नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि ॥१॥ रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय॥ आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमाविरासम् ॥२॥ नातः परं परम यद्भवतः स्वरूपमानंदमात्रमविकल्पमविद्धवर्चः ॥ पश्यामि विश्वसृजमेकमविश्वमात्मन्भूतेंद्रियात्मकमदस्त उपाश्रितोऽस्मि॥३॥ तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानाम्॥ तस्मै नमो भगवतेऽनुविधेम तुभ्यं योऽनादृतो नरकभाग्भिरसत्प्रसंगैः॥४॥ ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतम्॥ भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयांबुरुहात्स्वपुंसाम् ॥ ५ ॥ तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः॥ तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेंऽघ्रिमभयं प्रवृणीत लोकः॥६॥ दैवेन ते हतधियो भवतः प्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रिया ये॥ कुर्वंति कामसुखलेशलवाय दीना लोभाभिभूतमनसोऽकुशलानि शश्वत्॥७॥ क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च॥ कामाग्निनाऽच्युत रुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे॥८॥ यावत्पृथक्त्वमिदमात्मन इंद्रियार्थमायाबलं भगवतो जन ईश पश्येत्॥ तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं वहती क्रियार्था॥ ९॥ अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः॥ दैवाहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसंगविमुखा इह संसरंति ॥१०॥ त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो तनुनाथ पुंसाम्॥ यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥११॥ ॥

॥४॥ हे नाथ, ये तु त्वत्कथाश्रवणमत्यादरेण कुर्वंति तेषां भक्तानां हृदये त्वं नित्यं प्रकाशसे ॥५॥ किंच। यावल्लोको भयरहितं ते चरणमूलं नाश्रयेत् तावत्तस्य द्रव्यगृहसुहृन्निमित्तं भयं शोकः इच्छा पराभवः महालोभः ममेति दुराग्रहश्च भवति ॥ ६ ॥ ये सर्वदुःखनिवर्तकाच्छ्रवणकीर्तनादिरूपात्तव प्रसंगाद्विमुखेंद्रियाः संतः कामसुखाद्यर्थं सकामानि कर्माणि कुर्वंति ते दैवेन नष्टबुद्धयो ज्ञातव्याः ॥७॥ हे हरे, क्षुधातृषाशीतोष्णवातादिभिः पीड्यमानाः प्रजा दृष्ट्वा मे मनः सीदति ॥८॥ जनो यावत्त्वद्रूपमिदं जगत्त्वत्तः पृथगिति पश्येत् तावत्तस्य जन्ममरणादिरूपः संसारो नोपरमेत् ॥९॥ हे देव, तव श्रवणकीर्तनादिप्रसंगरहिता ऋषयोऽपि दैवेन हतार्थोद्यमाः संत इह संसरंति ॥१०॥ हे नाथ, त्वं भक्तानां हृत्कमले तिष्ठसि। किंच। भक्ता यद्यत्तव रूपं स्वेच्छया ध्यायंति तत्तद्रूपं तेषामनुग्र-

हाय त्वं प्रकटयसि ॥११॥ यथा सर्वभूतेषु दयया त्वं तुष्यसि तथा सकामैर्देवगणैर्बहुपूजोपहारैराराधितोऽपि त्वं तेषां न प्रसीदसि ॥१२॥ अतो यज्ञदानतपआदिभिस्तवेश्वरस्य निष्कामत्वेनाराधनमेव श्रेष्ठम् ॥ १३ ॥ हे प्रभो, सर्वदा चैतन्यस्वरूपेण निरस्तभेदभ्रमायेश्वराय तुभ्यं नमः॥१४॥ प्राणांतसमये ये तव नामानि गृणंति तेऽनेकजन्मपापं तदैव त्यक्त्वा तव पदं प्राप्नुवंति ॥ १५ ॥ त्रयो ब्रह्माद्याः स्कंधा यस्य मरीच्यादिमन्वादिरूपाः शाखोपशाखा यस्य तथाभूतः सन् य एको ववृधे तस्मै तुभ्यं भुवनाकाराय वृक्षाय नमः ॥ १६ ॥ हे ईश, लोकस्त्वत्पूजनरूपे कर्मणि अदत्तचित्तः सन् यावदस्मिन् लोके वर्तते तावद्यस्तस्य जीविताशां छिनत्ति तस्मै तुभ्यं कालाय नमः ॥ १७ ॥ अहं द्विपरार्धकालपर्यंतं ब्रह्मपदं समारूढोऽपि कालात्त्वत्तो भीतः सन् त्वत्प्राप्तये तपस्तप्तवान्

नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः॥ यत्सर्वभूतदययाऽसदलभ्ययैको नानाजनेष्ववहितः सुहृदंतरात्मा ॥१२॥ पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च॥ आराधनं भगवतस्तव सत्क्रियार्थो धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र॥१३॥ शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै॥ विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते नम इदं चक्रमेश्वराय ॥१४॥ यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुविगमे विवशा गृणंति॥ ते नैकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये ॥१५॥ यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलम्॥ भित्त्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रुमाय ॥१६॥ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे॥ यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥१७॥ यस्माद्बिभेम्यहमपि द्विपरार्धधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत्॥ तेपे तपो बहुसवोऽवरुरुत्समानस्तस्मै नमो भगवतेऽधिमखाय तुभ्यम्॥१८॥ तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः॥ रेमे निरस्तरतिरप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय ॥१९॥ योऽविद्ययानुपहतोऽपि दशार्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः॥ अंतर्जलेऽहिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन्॥२०॥ यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण॥ तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकसन्नलिनेक्षणाय॥ २१ ॥ सोऽहं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान्भगेन॥ तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ॥२२॥ एष प्रपन्नवरदो रमयाऽऽत्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः॥ तस्मिन्स्वविक्रममिदं सृजतोऽपि चेतो युंजीत कर्म शमलं च यथा विजह्याम् ॥२३॥

तस्मै तुभ्यं यज्ञाधिष्ठात्रे नमः ॥१८॥ यः स्वधर्ममर्यादापालनार्थं देवतिर्यङ्मनुष्यादियोनिषु कृतावतारः सन् रेमे तस्मै पुरुषोत्तमाय नमः ॥ १९ ॥ किंच। निद्रयाऽनभिभूतोऽपि यः स्वोदरे विश्वं प्रविलाप्य जलमध्ये शेषशय्यायां निद्रां चकार। किं कुर्वन् अज्ञजनस्य निद्रासुखमीदृगिति प्रदर्शयन् ॥२०॥ यन्नाभिकमलात्सृष्टिकर्ताहं यदनुग्रहेण जातस्तस्मै ते नमः ॥२१॥ एवं स्तुत्वा प्रार्थयते। हे ईश, यथाहं विश्वं स्रष्टुं समर्थो भविष्यामि तथा ममोपर्यनुग्रहः क्रियताम् ॥२२॥ किंच। इदं विश्वं तवाज्ञया सृजतो मे चेतस्तस्मिन् कर्मणि त्वं प्रवर्तय। किंच। सृष्टिनिमित्तजं पापं यथाहं त्यक्ष्यामि तथा क्रियताम् ॥ २३ ॥ ॥

यस्मादहमुत्पन्नस्तस्यानंतशक्तेर्विचित्रं रूपं विस्तारयतो मे वेदवाण्या विस्मृतिर्मा भवतु॥२४॥सोऽसौ भगवान्नेत्रकमलमुद्घाटयन् विश्वोद्भवायास्मदनुग्रहाय चोत्थाय
मधुरया वाण्या मम खेदं दूरीकरोतु ॥२५॥ मैत्रेय उवाच ॥ ब्रह्मा एवं स्तुत्वा श्रांतवद्विरराम ॥२६॥ तदा भगवान् ब्रह्मणोऽभिप्रायं ज्ञात्वा प्रलयोदकेन खिन्नचेतसं ब्रह्माणम्॥२७॥मोहं शमयन्निव प्राह॥२८॥श्रीभगवानुवाच ॥ हे वेदगर्भ, त्वमालस्यं मा कुरु। सृष्टिविषये उद्युक्तो भव। त्वं यन्मां प्रार्थयसे तन्मया पूर्वमेव संपादितमस्ति
॥२९॥ त्वं भूयस्तपो मदाश्रयां विद्यां चातिष्ठ। ताभ्यां स्वहृदये स्पष्टान् सर्वान् लोकान् पश्यसि ॥३०॥ ततो भक्तियुक्तः सन्नात्मनि लोके च व्याप्तं मां द्रक्ष्यसि ॥३१॥

नाभिह्रदादिह सतोंऽभसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतशक्तेः॥ रूपं विचित्रमिदमस्य विवृण्वतो मे मारीरिषीष्ट निगमस्य
गिरां विसर्गः ॥२४॥ सोऽसावदभ्रकरुणो भगवान्विवृद्धप्रेमस्मितेन नयनांबुरुहं विजृंभन् ॥ उत्थाय विश्वविजयाय च नो विषादं
माध्व्या गिरापनयतात्पुरुषः पुराणः ॥२५॥ मैत्रेय उवाच ॥ स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः॥ यावन्मनोवचः स्तुत्वा
विरराम स खिन्नवत्॥२६॥ अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः॥ विषण्णचेतसं तेन कल्पव्यतिकरांभसा ॥२७॥लोकसंस्थानविज्ञान
आत्मनः परिखिद्यतः॥ तमाहागाधया वाचा कश्मलं शमयन्निव ॥२८॥ श्रीभगवानुवाच ॥ मा वेदगर्भ गास्तंद्रीं सर्ग उद्यममावह
॥ तन्मयाऽऽपादितं ह्यग्रे यन्मां प्रार्थयते भवान् ॥ २९॥ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयाम् ॥ ताभ्यामंतर्हृदि
ब्रह्मन्लोकान्द्रक्ष्यस्यपावृतान् ॥३०॥ तत आत्मनि लोके च भक्तियुक्तः समाहितः ॥ द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनः
॥३१॥ यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितम् ॥ प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलम् ॥३२॥ यदा रहितमात्मानं
भूतेंद्रियगुणाशयैः ॥ स्वरूपेण मयोपेतं पश्यन्स्वाराज्यमृच्छति ॥३३॥ नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ॥ नात्मावसीदत्यस्मिंस्ते
वर्षीयान्मदनुग्रहः ॥३४॥ ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः ॥ यन्मनो मयि निर्बद्धं प्रजाः संसृजतोऽपि
ते ॥३५॥ ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम् ॥ यन्मां त्वं मन्यसेऽयुक्तं भूतेंद्रियगुणात्मभिः ॥ ३६ ॥ तुभ्यं मद्विचिकित्सायामात्मा
मे दर्शितोऽबहिः ॥ नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥३७॥ यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युदयांकितम्॥
यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ॥३८॥ प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेच्छया ॥ यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन्
॥३९॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् ॥ तस्याशु संप्रसीदेयं सर्वकामवरेश्वरः ॥ ४० ॥ ॥

यदा सर्वभूतेषु स्थितं मां जनः पश्येत् तदैव स्वस्याज्ञानं जह्यात्॥३२॥यदा भूतेंद्रियगुणाशयै रहितं जीवं मयैकीभूतं पश्येत्तदा मोक्षं प्राप्नोति॥३३॥नानाप्रकारककर्मविस्तारेण
सह बह्वीः प्रजाः सिसृक्षतस्तव देहः श्रमं न प्राप्स्यति ॥३४॥ यतस्तव मनो मयि संबद्धमतो रजोगुणस्त्वां न बध्नाति ॥ ३५ ॥ अद्य त्वया देहिनां
दुर्विज्ञेयोऽप्यहं ज्ञातः ॥३६॥ किंच। सलिले पद्मस्य मूलं विचिन्वतस्तव हृदये एव मयैतत्स्वरूपं दर्शितम्॥३७॥ हे ब्रह्मन्, मत्कथाभ्युदयांकितं यत्स्तोत्रं त्वं
कृतवानसि। यच्च तपसि ते निष्ठा यच्च हृदि मद्दर्शनं एष सर्वोऽपि मदनुग्रहः॥३८॥ अहं ते प्रीतोऽस्मि। तव भद्रमस्तु॥३९॥यः पुमान् त्वत्कृतेन स्तोत्रेण स्तुत्वा

मां भजेत् तस्य शीघ्रमहं प्रसन्नः स्याम् ॥४०॥ यज्ञदानतपोयोगादिभिः सिद्धं यन्मोक्षफलं तत्सर्वं मत्प्रीतिरेवेति तत्त्वविदां मतम् ॥४१॥ अहं सर्वेषां प्रियतम
आत्माऽस्मि । अतो मयि रतिं कुर्यात् ॥४२॥ हे ब्रह्मन्, याः प्रजा मयि लीना बभूवुस्ता यथापूर्वं त्वं सृज ॥४३॥ मैत्रेय उवाच ॥ एवं ब्रह्मणे स्वेन रूपेण सृष्टि-
ज्ञानं प्रकाश्य कमलनाभो भगवानंतर्दधे ॥४४॥ इति श्रीमद्भागवतचू० तृती० नवमोऽध्यायः ॥९॥ ॥ दशमे कालसंप्रश्नं प्रतिवक्तुं तदुद्भवः । प्राकृतादि-
विभागेन सर्गस्तु दशधोच्यते ॥१॥ विदुर उवाच ॥ भगवति नारायणेंऽतर्हिते सति ब्रह्मा दैहिकीर्मानसीश्च प्रजाः कतिधा ससर्ज ॥१॥ हे मैत्रेय, मया येऽन्ये
प्रश्नाः कृतास्तेषां चोत्तरं वद ॥२॥ सूत उवाच । हे शौनक, एवं विदुरेण प्रेरितो मैत्रेयो हृदि स्थितानां तेषां प्रश्नानामुत्तरं वक्तुमाह ॥ ३ ॥ मैत्रेय उवाच ॥

पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना॥राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम्॥४१॥अहमात्माऽऽत्मनां धातः प्रेष्ठः सन्प्रेयसामपि॥
अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ॥४२॥ सर्ववेदमयेनेदमात्मनात्मात्मयोनिना ॥ प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते॥४३॥
मैत्रेय उवाच ॥ तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः ॥ व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोदधे ॥ ४४॥ इति श्रीमद्भा०म०तृ०नवमो-
ऽध्यायः ॥९॥ ॥ विदुर उवाच ॥ अंतर्हिते भगवति ब्रह्मा लोकपितामहः ॥ प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः ॥१॥ ये
च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम ॥ तान्वदस्वानुपूर्व्येण छिंधि नः सर्वसंशयान् ॥२॥ सूत उवाच ॥ एवं संचोदितस्तेन क्षत्त्रा
कौषारवो मुनिः ॥ प्रीतः प्रत्याह तान्प्रश्नान्हृदिस्थानथ भार्गव ॥३॥ मैत्रेय उवाच ॥ विरिंचोऽपि तथा चक्रे दिव्यं वर्षशतं तपः ॥ आत्म-
न्यात्मानमावेश्य यदाह भगवानजः ॥४॥ तद्विलोक्याब्जसंभूतो वायुना यदधिष्ठितः ॥ पद्ममंभश्च तत्कालकृतवीर्येण कंपितम् ॥ ५ ॥
तपसा ह्येधमानेन विद्यया चात्मसंस्थया ॥ विवृद्धविज्ञानबलो न्यपाद्वायुं सहांभसा ॥६॥ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितम् ॥
अनेन लोकान्प्राग्लीनान्कल्पिताऽस्मीत्यचिंतयत् ॥७॥ पद्मकोशं तदाविश्य भगवत्कर्मचोदितः॥एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्वि-
सप्तधा ॥८॥ एतावान् जीवलोकस्य संस्थाभेदः समाहृतः॥ धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ ॥९॥ विदुर उवाच ॥ यदात्थ बहुरू-
पस्य हरेरद्भुतकर्मणः॥कालाख्यं लक्षणं ब्रह्मन्यथा वर्णय नः प्रभो॥१०॥मैत्रेय उवाच ॥ गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः ॥ पुरुष-
स्तदुपादानमात्मानं लीलयाऽसृजत्॥११॥विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया॥ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना ॥१२॥

ततो ब्रह्मापि भगवान् यदाह तत्तपो दिव्यं वर्षशतं तेपे ॥ ४ ॥ ततो ब्रह्मा वायुना कंपितं तत्कमलं जलं च विलोक्य ॥ ५ ॥ तपसा विद्यया च युक्तः सन्
जलेन सह सर्वं वायुं पीतवान् ॥ ६ ॥ ततो ब्रह्मा आकाशव्यापि तत्कमलं विलोक्यानेन कमलेनैव पूर्वं लीनान् त्रीन् लोकान् स्रक्ष्यामीत्यचिंतयत् ॥ ७ ॥
ततः पद्मकोशं प्रविश्य तं कमलकोशं लोकत्रयरूपेण विबभाज ॥८॥ ब्रह्मणः प्रतिदिवसे जीवानां भोगस्थानस्य रचनाविशेषस्त्रैलोक्यरूप एवोक्तः ॥९॥ विदुर
उवाच ॥ हे ब्रह्मन्, बहुरूपस्य हरेः कालाख्यं लक्षणं नो वर्णय ॥ १० ॥ मैत्रेय उवाच ॥ गुणानामाद्यंतशून्यो महदादिपरिणामो येन लक्ष्यते स काल इत्य-
भिधीयते । ईश्वरस्तेन निमित्तभूतेनात्मानं विश्वस्वरूपेण ससर्ज॥११॥विष्णुमायया संहृतं विश्वं ब्रह्मस्वरूपे लीनं सत्कालेन निमित्तेन पृथक् प्रकाशितम् ॥१२॥

यथेदानीं विश्वमस्ति तथा पूर्वमासीत्। अथ प्राकृतादिसर्गान् शृणु । तत्र प्रकृतेर्जाता महत्तत्वादयः षट् प्राकृताः सर्गाः । विकृतेर्जाता मनुष्यादयस्त्रयो वैकृताः सर्गाः । प्राकृतवैकृतमिश्रितो यः स दशमः सर्गः ॥१३॥ तानेव सर्गानाह । आद्यो हरेः सकाशाद्गुणानां वैषम्यरूपो महत्तत्वस्य सर्गः ॥ १४ ॥ ततोऽहंकारस्य द्वितीयः सर्गः । महाभूतानां तृतीयः सर्गः । इंद्रियाणां चतुर्थः सर्गः। देवतानां पंचमः सर्गः ॥ १५ ॥ १६ ॥ जीवानामावरणविक्षेपशक्तिरूपायाः पंचवि[1]धाया अविद्याया यः स षष्ठः सर्गः । एते षट् प्राकृताः सर्गाः । अथ वैकृतान् शृणु ॥ १७ ॥ वृक्षाणां सर्गः सप्तमः । स षड्विधः ॥ १८ ॥ वनस्पतिः ओषधिः लता त्वक्सारः वीरुधः द्रुमाश्चेति ॥ १९ ॥ अथ पशुपक्षिणामष्टमः सर्गः स चाष्टाविंशतिधा ॥ २० ॥ गौः अजः महिषः हरिणः सूकरः गवयः रुरुः मेषः उष्ट्रः एते

यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम् ॥ सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः॥१३॥कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः॥
आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः ॥१४॥ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः ॥ भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्य-
शक्तिमान् ॥१५॥ चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्मकः ॥ वैकारिको देवसर्गः पंचमो यन्मयं मनः ॥ १६ ॥ षष्ठस्तु तमसः
सर्गो यस्त्वबुद्धिकृतः प्रभो ॥ षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु ॥१७॥ रजोभाजो भगवतो लीलेयं हरिमेधसः ॥ सप्तमो
मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥१८॥ वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः ॥ उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशे-
षिणः ॥१९॥ तिरश्चामष्टमः सर्गः सोऽष्टाविंशतिधो मतः ॥ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥२०॥ गौरजो महिषः कृष्णः
सूकरो गवयो रुरुः ॥ द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥२१॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ॥ एते चैकशफाः
क्षत्तः शृणु पंचनखान्पशून् ॥२२॥ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ ॥ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः
॥२३॥ कंकगृध्रवटश्येनभासभल्लूकबर्हिणः ॥ हंससारसचक्राह्वकाकोलूकादयः खगाः ॥ २४ ॥ अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो
नृणाम् ॥ रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः॥२५॥ वैकृतास्त्रय एवैते देवसर्गश्च सत्तम ॥ वैकारिकस्तु यः प्रोक्तः कौमा-
रस्तूभयात्मकः ॥२६॥ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः ॥ गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ॥२७॥ ॥

नव ९ द्विशफाः ॥२१॥ खरः अश्वः अश्वतरः गौरः शरभः चमरी एते षट् ६ एकशफाः॥२२॥ श्वा सृगालः वृकः व्याघ्रः मार्जारः शशः शल्लकः सिंहः कपिः गजः कूर्मः गोधा मकरादयः एतेत्रयोदश १३ पंचनखाः॥२३॥ कंकः गृध्रः वटः श्येनः भासः भल्लूकः मयूरः हंसः सारसः चक्रवाकः काकः उलूकादयः एते द्वादश १२ पक्षिणः एवम[2]ष्टाविंशतिर्भेदाः ॥२४॥ मनुष्याणां सर्गो नवमः। स च स्त्रीपुरुषात्मक एकविधः । ते नरा रजोधिकाः दुःखे च सुखमानिनः ॥२५॥ उभया[3]त्मकः कुमाराणां सर्गो दशमः। देवानां सर्गो वैकृतांतर्गत एव ॥२६॥ स देवसर्गोऽष्टविधः—देवाः १ पितरः २ असुराः ३ गंधर्वाप्सरसः ४ यक्षरक्षांसि ५ चारणाः ६ ॥२७॥

---

[1] अविद्यायाः पंच प्रकाराः द्वादशाध्याये द्वितीयश्लोके स्पष्टा भविष्यंति । [2] मकरादयो जलचराः कंकादयो द्वादश पक्षिणश्चैकत्वेन गृहीता अतोऽष्टाविंशतिः । [3] प्राकृतवैकृतात्मकः सनत्कुमारादीनां सर्गः। तेषां देवत्वेन मनुष्यत्वेन च प्रसिद्धेः ।

भूतप्रेतपिशाचाः ७ सिद्धचारणविद्याधराः ८ किंनरादयश्चै[1] तेऽष्ट ८ इमे दश सर्गा ब्रह्मणा कृताः॥२८॥ अतः परं वंशान् मन्वंतराणि च कथयामि। एवं श्रीहरिरात्मन ऽऽत्मानं सृजति॥२९॥(अत्र सृष्टौ पूर्वापरनियमो नास्ति॥१॥ब्रह्मणः प्रतिदिने चतुर्दशमन्वंतरेषु मन्वादयः षट् भिन्ना भिन्ना भवंति॥२॥इति श्रीमद्भागवतचू० तृतीय० दशमोऽध्यायः॥१०॥ ॥ तत एकादशे कालपरमाण्वादिलक्षणैः। युगमन्वंतरादिभ्यः कल्पमानादि वर्ण्यते॥१॥ मैत्रेय उवाच॥हे विदुर, महत्तत्वादीनां यश्च[2]रमोंऽशः स परमाणुर्विज्ञेयः॥१॥यस्य अतिसूक्ष्मोंऽशः परमाणुः स एवातिस्थूलः परमम[3]हान् पदार्थः॥२॥यथा सूक्ष्मः स्थूलश्चायं पदार्थः एवं कालोऽपि सूक्ष्मः स्थूलश्चानुमितः॥३॥अनुमानांतरमाह। सूर्यो यावता कालेन परमाणुदेशमतिक्रम्य याति तावान् कालः परमाणुः। यावता च द्वादशराश्यात्मकं सर्वं भुवनकोशमतिक्रामति तावान् कालः परममहान्॥४॥ द्वौ परमाणू अणुः स्यात्। त्रयोऽणवस्त्रसरेणुः स्यात्। स गवाक्षप्रविष्टेषु सूर्यकिरणेषु दृश्यते। स च भूमौ न पतति॥५॥त्रयस्त्रसरेणवः त्रुटिः। शतं त्रुटयो वेधः। त्रयो वेधा लवः॥६॥त्रयो लवा निमेषः। त्रयो निमेषाः क्षणः। पंच क्षणाः काष्ठा। पंचदश काष्ठा लघु॥७॥दशपंच लघूनि घटिका। द्वे घटिके मुहूर्तः। षट् सप्त वा घटिका मनुष्याणां प्रहरः॥८॥घटिकाप्रमाणमाह। षट्पलमितं ताम्रपात्रं विंशतिगुंजामितसुवर्णस्य कृतया चतुरंगुलपरिमितया शलाकया मूलदेशे कृतच्छिद्रं तेन च्छिद्रेण यावत्प्रस्थपरिमितं जलं प्रविशति तेन च निमग्नं भवति तावान् कालो घटिका॥९॥ अष्टौ यामा नृणामहोरात्रं पंचदशाहोरात्रैः पक्षः। स शुक्लः कृष्णश्च ॥१०॥ द्वौ पक्षौ मासः। तत्पितॄणामहर्निशम्। द्वौ मासौ ऋतुः। त्रयो ऋतव अयनं तद्दक्षिणमुत्तरं च ॥११॥ ॥

भूतप्रेतपिशाचाश्च विद्याध्राः किंनरादयः ॥ दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः ॥२८॥ अतः परं प्रवक्ष्यामि वंशान्मन्वंतराणि च ॥ एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः ॥ सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना ॥ २९॥ (गुणव्यत्यय एतस्मिन्मायावित्वादधीशितुः ॥ न पौर्वापर्यमिच्छंति नद्यां भ्राम्यद्भ्रमेरिव ॥१॥ देवासुरादयः क्षत्तः कल्पेऽस्मिन्ये च कीर्तिताः ॥ त एव नामरूपाभ्यामासन्मन्वंतरांतरे ॥२॥) इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे दशमोऽध्यायः ॥१०॥ ॥ मैत्रेय उवाच॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ॥ परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥१॥ सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानविशेषो निरंतरः ॥२॥ एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥३॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुताम् ॥ ततोऽविशेषभुग्यस्तु स कालः परमो महान् ॥४॥ अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः ॥ जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥५॥ त्रसरेणुत्रिकं भुंक्ते यः कालः स त्रुटिः स्मृतः ॥ शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः ॥६॥ निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः ॥ क्षणान्पंच विदुः काष्ठां लघु ता दश पंच च ॥७॥ लघूनि वै समाम्नाता दश पंच च नाडिका ॥ ते द्वे मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम् ॥ ८ ॥ द्वादशार्धपलोन्मानं चतुर्भिश्चतुरंगुलैः ॥ स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतम् ॥९॥ यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे॥पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद ॥१०॥ तयोः समुच्चयो मासः पितॄणां तदहर्निशम् ॥ द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥११॥ ॥

---

[1] आदिशब्देन किंपुरुषाश्वमुखादयो ग्राह्याः। [2] यस्य पुनरग्रे केनापि प्रकारेणांशः कर्तुं न शक्यते सोऽतिसूक्ष्मोंऽश इत्यर्थः। [3] सर्वोऽपि प्रपंचः परममहानित्यर्थः।

अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः ॥ संवत्सरशतं नृणां परमायुर्निरूपितम् ॥ १२ ॥ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् ॥ संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥१३॥ संवत्सरः परिवत्सर इडावत्सर एव च ॥ अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥१४॥ यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥ कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय ॥ १५ ॥ विदुर उवाच ॥ पितृदेवमनुष्याणामायुः परमिदं स्मृतम् ॥ परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः ॥१६॥ भगवान्वेद कालस्य गतिं भगवतो ननु ॥ विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा ॥१७॥ मैत्रेय उवाच ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम् ॥१८॥ चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥१९॥ संध्यांऽशयोरंतरेण यः कालः शतसंख्ययोः ॥ तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ॥ २० ॥ धर्मश्चतुष्पान्मनुजान्कृते समनुवर्तते ॥ स एवान्येष्वधर्मेण व्येति पादेन वर्धता ॥२१॥ त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनम् ॥ तावत्येव निशा तात यन्निमीलति विश्वसृक् ॥ २२ ॥ निशावसाना आरब्धो लोककल्पोऽनुवर्तते ॥ यावद्दिनं भगवतो मनून्भुंजंश्चतुर्दश ॥२३॥ स्वं स्वं कालं मनुर्भुंक्ते साधिकां ह्येकसप्ततिम् ॥ मन्वन्तरेषु मनवस्तद्वंश्या ऋषयः सुराः ॥ भवंति चैव युगपत्सुरेशाश्चानु ये च तान् ॥२४॥ एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः॥ तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः ॥२५॥ मन्वंतरेषु भगवान्बिभ्रत्सत्वं स्वमूर्तिभिः ॥ मन्वादिभिरिदं विश्वमवत्युदितपौरुषः ॥२६॥ तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ॥ कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये ॥२७॥ ॥

द्वे अयने देवानामहोरात्रं तन्नृणां संवत्सरः । एवं नृणामायुः संवत्सरशतम् ॥१२॥ सूर्यः परमाण्वादिना संवत्सरावसानेन भुवनकोशं पर्यटति ॥१३॥ संवत्सरः पंचविधः—संवत्सरः परिवत्सर इडावत्सरोऽनुवत्सरो वत्सर इति ॥१४॥ यः कालात्मा सूर्यः पुंसो मोहनिवृत्तयेंऽतरिक्षे धावति तस्मै संवत्सरपंचकप्रवर्तकाय हे जनाः, यूयं पूजां कुरुत ॥१५॥ विदुर उवाच ॥ पितृदेवमनुष्याणामायुस्त्वयोक्तम् । ये तु त्रैलोक्याद्बहिः संति तेषां गतिं वद ॥ १६ ॥ धीरा योगसिद्धेन चक्षुषा विश्वं विचक्षते ॥१७॥ मैत्रेय उवाच ॥ कृतं त्रेता द्वापरं कलिश्चेति चतुर्युगं देवानां द्वादशभिर्वर्षसहस्रैर्भवति ॥१८॥ कृतादियुगे चत्वारि त्रीणि द्वे एकमिति यथाक्रमं सहस्राणि द्विगुणानि शतानि च वर्षाणां प्रमाणमाहुः ॥१९॥ या शतसंख्योक्ता स युगस्याद्यंतयोः संध्यांशकालः संध्यांशयोर्मध्ये यः कालस्तं युगं वदंति ॥२०॥ कृते चतुर्भिः पादैः पूर्णो धर्मो वर्तते । त्रेतादिषु पादेन पादेन क्षीयते ॥२१॥ त्रिलोक्या बहिर्महर्लोकजनलोकतपोलोकसत्यलोकस्थितानां भृग्वादीनां चतुर्युगाणां सहस्रमेकं दिनम्। तावती रात्रिः। यस्यां ब्रह्मा स्वपिति ॥२२॥ ब्रह्मणो दिने चतुर्दश मनवो भवंति ॥२३॥ ते मनवः किंचिदधिकां चतुर्युगानामेकसप्ततिं स्वं स्वं कालं भुंजते। तेषु मन्वंतरेषु मनवो मनुपुत्रा ऋषयो देवा हरेरवताराश्च भवंति ॥ २४ ॥ एष दैनंदिनः सर्गः। यत्र तिर्यङ्मनुष्यदेवानां कर्मभिः संभवः ॥२५॥ प्रतिमन्वंतरं भगवानवतारं धृत्वा विश्वं रक्षति ॥२६॥ ब्रह्मा सायंकाले सृष्टिव्यापारमुपसंहृत्य स्वपिति ॥ २७ ॥ ॥

तमेवान्वपिधीयंते लोका भूरादयस्त्रयः ॥ निशायामनुवृत्तायां निर्मुक्तशशिभास्करम् ॥२८॥ त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना ॥ यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ॥ २९ ॥ तावत्त्रिभुवनं सद्यः कल्पांतैधितसिंधवः ॥ प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ॥३०॥ अंतः स तस्मिन्सलिल आस्तेऽनंतासनो हरिः ॥ योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ॥३१॥ एवंविधैरहोरात्रैः कालगत्योपलक्षितैः ॥ अपक्षितमिवास्यापि परमायुर्वयःशतम् ॥ ३२ ॥ यदर्धमायुषस्तस्य परार्धमभिधीयते ॥ पूर्वः परार्धोऽपक्रांतो ह्यपरोऽद्य प्रवर्तते ॥ ३३ ॥ पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् ॥ कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ॥३४॥ तस्यैव चांते कल्पोऽभूद्यं पाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहम् ॥३५॥ अयं तु कथितः कल्पो द्वितीयस्यापि भारत ॥ वाराह इति विख्यातो यत्रासीत्सूकरो हरिः ॥३६॥ कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते ॥ अव्याकृतस्यानंतस्य अनादेर्जगदात्मनः ॥३७॥ कालोऽयं परमाण्वादिर्द्विपरार्धांत ईश्वरः ॥ नैवेशितुं प्रभुर्भूम्न ईश्वरो धाम मानिनाम् ॥३८॥ विकारैः सहितो युक्तैर्विशेषादिभिरावृतः ॥ आंडकोशो बहिरयं पंचाशत्कोटिविस्तृतः ॥ ३९ ॥ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ॥ लक्ष्यतेंऽतंगताश्चान्ये कोटिशो ह्यंडराशयः ॥ ४० ॥ तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ॥ विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥ ४१ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे एकादशोऽध्यायः ॥ ११ ॥ ॥ मैत्रेय उवाच ॥ इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः ॥ महिमा वेदगर्भोऽथ यथाऽस्राक्षीन्निबोध मे ॥ १ ॥ ससर्जाग्रेंऽधतामिस्रमथ तामिस्रमादिकृत् ॥ महामोहं च मोहं च तमश्चाज्ञानवृत्तयः ॥ २ ॥ ॥ ॥ ॥

तदा भूरादयस्त्रयो लोकाः सूर्यचंद्राभ्यां सह प्रलयाय कल्पंते ॥२८॥ तदा भृग्वादयो ऋषयस्त्रिलोक्यां संकर्षणमुखाज्जातेनाग्निना दह्यमानायां सत्यां ऊष्मणा पीडिताः संतो महर्लोकाज्जनलोकं यांति ॥२९॥ तावत्कल्पांतेन वृद्धिं गताः समुद्राः सद्यस्त्रिभुवनं प्लावयंति ॥ ३० ॥ तदा जनलोकवासिभिः स्तूयमानो हरिः सलिले शेषशयने शेते ॥३१॥ एवमहोरात्रैर्ब्रह्मणः शतवर्षात्मकमप्यायुर्गतप्रायम् ॥ ३२ ॥ तस्यायुषोऽर्धं परार्धमभिधीयते। तत्र पूर्वः परार्धो गतः। अपरोऽधुना प्रवर्तते ॥३३॥ पूर्वपरार्धस्यादौ ब्राह्मो नाम कल्पो बभूव ॥३४॥ पूर्वपरार्धस्यांते पाद्मकल्पो बभूव ॥३५॥ इदानीं तु वाराहः कल्पः। स द्वितीयपरार्धस्यादौ कथितः। यत्र हरिर्वराहो बभूव ॥३६॥ एवं द्विपरार्धाख्यकालोऽनंतस्य निमेषवदुपचर्यते ॥३७॥ एवं परमाण्वादिद्विपरार्धांतः कालो देहगेहाभिमानिनामेव नियमने समर्थो नेश्वरस्य ॥३८॥ अयमंडकोशः पंचाशत्कोटियोजनविशालः ॥३९॥ पृथिव्याद्यैर्दशगुणोत्तरैरष्टभिरावरणैर्वेष्टितः स ईश्वरे परमाणुवल्लक्ष्यते । यस्मिन्ननंते एवंभूताः कोटिशोंऽडराशयः संति ॥४०॥ तत्सर्वकारणानां कारणं परं ब्रह्म वदंति ॥४१॥ इति श्रीमद्भागवतचू० तृती० एकादशोऽध्यायः ॥११॥ ॥ द्वादशे तु कुमारादिमनःसर्गासमेधनात् । कायद्वैधेन यौनस्तु मनुसर्गोऽनुवर्ण्यते ॥१॥ मैत्रेय उवाच ॥ हे विदुर, परमात्मनः कालस्वरूपं तुभ्यं कथितम् । अथ ब्रह्मा यथाऽस्राक्षीत्तन्मत्तः श्रृणु ॥१॥ ब्रह्मा प्रथमं पंचाविद्यावृत्तीः ससर्ज । ताश्च–१ स्वरूपाप्रकाशः २ देहाद्यहंबुद्धिः ३ भोगेच्छा ४ तत्प्रतिघाते क्रोधः ५ तन्ना-

शेऽहमेव मृतोऽस्मीति बुद्धिरिति ॥२॥ तां पापरूपां सृष्टिं दृष्ट्वा ब्रह्मा आत्मानं नाभ्यनंदत् । ततो मनसा सनकं सनंदनं सनातनं सनत्कुमारं चेति चतुरः सुतान् ससर्ज ॥३॥४॥ ततस्तानाह । हे पुत्रकाः, यूयं प्रजाः सृजत । तदा ते मोक्षधर्माणः सर्गं नैच्छन्॥ ५ ॥ तदा तान्प्रति क्रुद्धो ब्रह्मा । तं क्रोधमुपशमयितुं प्रवृत्तः ॥६॥ तदा बुद्ध्या निगृह्यमाणोऽपि स क्रोधो ब्रह्मणो भ्रुवोर्मध्यात्तत्कालं मन्युनामकः पुत्रो जातः ॥७॥ स रुदन् वदतिस्म । हे धातः, मम नामानि स्थानानि च कुरु ॥८॥ तदा ब्रह्मा तद्वचः श्रुत्वा प्राह । हे वत्स, त्वं मारोदीः । तव भाषितमहं करोमि॥ ९ ॥ हे सुरश्रेष्ठ, यस्मात्त्वं बालक इव रोदनं कृतवान् अतः प्रजास्त्वां नाम्ना रुद्र इति कथयिष्यंति ॥१०॥ हे रुद्र, तवैकादश निवासस्थानानि हृदयमिंद्रियाणि प्राण आकाशं वायुरग्निर्जलं मही सूर्यश्चंद्रस्तप इति॥११॥

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत॥ भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत्॥३॥सनकं च सनंदं च सनातनमथात्मभूः ॥ सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ॥४॥ तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः ॥ तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ॥५॥ सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः ॥ क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ॥६॥ धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापतेः ॥ सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ॥७॥ स वै रुरोद देवानां पूर्वजो भगवान्भवः ॥ नामानि कुरु मे धातः स्थानानि च जगद्गुरो ॥८॥ इति तस्य वचः पाद्मो भगवान्परिपालयन् ॥ अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते ॥९॥ यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ॥ ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः ॥१०॥ हृदिंद्रियाण्यसुर्व्योम वायुरग्निर्जलं मही ॥ सूर्यश्चंद्रस्तपश्चैव स्थानान्यग्रे कृतानि मे ॥११॥ मन्युर्मनुर्महिनसो महान् शिवः ऋतुध्वजः ॥ उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥१२॥ धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलांबिका॥ इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः ॥१३॥ गृहाणैतानि नामानि स्थानानि च सयोषणः॥ एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः ॥१४॥ इत्यादिष्टः स गुरुणा भगवान्नीललोहितः ॥ सत्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः ॥१५॥ रुद्राणां रुद्रसृष्टानां समन्ताद्ग्रसतां जगत् ॥ निशम्यासंख्यशो यूथान्प्रजापतिरशंकत ॥ १६ ॥ अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम ॥ मया सह दहंतीभिर्दिशश्चक्षुर्भिरुल्बणैः ॥१७॥ तप आतिष्ठ भद्रं ते सर्वभूतसुखावहम् ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥१८॥ तपसैव परं ज्योतिर्भगवंतमधोक्षजम् ॥ सर्वभूतगुहावासमंजसा विंदते पुमान् ॥ १९ ॥ ॥

अथ तवैकादश नामानि—मन्युर्मनुर्महिनसो महान् शिवः ऋतुध्वजः उग्ररेता भवः कालो वामदेवो धृतव्रत इति ॥ १२ ॥ अथ तवैकादश स्त्रियः—धीः वृत्तिः उशना उमा नियुत् सर्पिः इला अंबिका इरावती सुधा दीक्षा चेति ॥१३॥ हे रुद्र, एतानि स्थानानि नामानि च गृहाण । उत च। एभिः स्त्रीभिः सह बह्वीः प्रजाः सृज ॥१४॥ इति ब्रह्मणा आदिष्टो रुद्रस्तीव्रस्वभावेनात्मतुल्याः प्रजाः ससर्ज ॥१५॥ तदा समंताज्जगत् ग्रसतां रुद्रसृष्टानां रुद्राणामसंख्यातान्समुदायान् दृष्ट्वा ब्रह्मा प्राह ॥१६॥ हे रुद्र, मया सह दिशो दहंतीभिरीदृशीभिः सृष्टाभिः प्रजाभिरलम् ॥१७॥ हे रुद्र, ते भद्रमस्तु । अतः परं त्वं सर्वभूतसुखावहं तप आतिष्ठ ॥१८॥ पुमान् तपसैव सर्वभूतगुहावासं हरिं विंदते ॥ १९ ॥ ॥ ॥ ॥

मैत्रेय उवाच ॥ एवं श्रुत्वा रुद्रस्तपः कर्तुमिलावृतं नाम वनं विवेश ॥२०॥ ततो ब्रह्मा दश पुत्रान् जनयामास ॥२१॥ ते च—मरीचिः अत्रिः अंगिराः पुलस्त्यः पुलहः क्रतुः भृगुः वसिष्ठः दक्षः नारदश्चेति ॥२२॥ तत्र ब्रह्मण उत्संगान्नारदो जातः । अंगुष्ठाद्दक्षः । प्राणाद्वसिष्ठः । त्वचो भृगुः । करात्क्रतुः ॥२३॥ नाभितः पुलहः । कर्णयोः पुलस्त्यः । मुखादंगिराः । नेत्रादग्निः । मनसो मरीचिरिति ॥२४॥ ततो दक्षिणस्तनाद्धर्मः पृष्ठभागादधर्मश्च जातः । ततोऽधर्मान्मृत्युर्जातः ॥२५॥ ब्रह्मणो हृदयात्कामः । भ्रुकुटेः क्रोधः । अधरोष्ठाल्लोभः । मुखाद्वाणी । शिश्नात्समुद्राः । गुदाद्राक्षसः ॥२६॥ छायायाः कर्दमश्च जज्ञे । एवं ब्रह्मणो मनसो देहतश्च जगत् जज्ञे ॥२७॥ हे विदुर, सकामो ब्रह्मा अकामया स्वकन्यया सरस्वत्या सह रंतुं मनश्चक्र इति नः श्रुतम् ॥२८॥ तदा मरीच्यादयः पुत्रा अधर्मे

मैत्रेय उवाच ॥ एवमात्मभुवादिष्टः परिक्रम्य गिरां पतिम् ॥ बाढमित्युमामंत्र्य विवेश तपसे वनम् ॥ २० ॥ अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य लोकसंतानहेतवः ॥२१॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥२२॥ उत्संगान्नारदो जज्ञे दक्षोंऽगुष्ठात्स्वयंभुवः ॥ प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः ॥ २३ ॥ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोर्ऋषिः ॥ अंगिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् ॥२४॥ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयम् ॥ अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः ॥२५॥ हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् ॥ आस्याद्वाक् सिंधवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः ॥२६॥ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः ॥ मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् ॥२७॥ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः ॥ अकामां चकमे क्षत्तः सकाम इति नः श्रुतम् ॥ २८ ॥ तमधर्मे कृतमतिं विलोक्य पितरं सुताः ॥ मरीचिमुख्या मुनयो विश्रंभात्प्रत्यबोधयन् ॥ २९ ॥ नैतत्पूर्वैः कृतं त्वद्ये न करिष्यंति चापरे ॥ यत्त्वं दुहितरं गच्छेरनिगृह्यांगजं प्रभुः ॥ ३० ॥ तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ॥ यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ॥३१॥ तस्मै नमो भगवते य इदं स्वेन रोचिषा ॥ आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ॥ ३२ ॥ स इत्थं गृणतः पुत्रान्पुरो दृष्ट्वा प्रजापतीन् ॥ प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा ॥ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ॥ ३३ ॥ कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथा पुरा ॥३४॥ चातुर्होत्रं कर्मतंत्रमुपवेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥ ३५ ॥ ॥

कृतबुद्धिं पितरं विलोक्य प्रत्यबोधयन् ॥२९॥ हे प्रभो, अद्य यत्त्वं दुहितरं गंतुमिच्छसि तत्पूर्वैर्न कृतं अपरे च न करिष्यंति ॥३०॥ हे जगद्गुरो, अतितेजस्विनामपि एतत्कर्म कीर्तिदं न भवति । येषां वर्तनमनुतिष्ठन् सन् लोकः क्षेमाय कल्पते ॥ ३१ ॥ यः स्वतेजसेदं जगत् जनयामास स धर्मं पातुमर्हति तस्मै ते नमः ॥३२॥ एवं वदतः पुत्रान् दृष्ट्वा लज्जितो ब्रह्मा तां तनुं तत्याज । तत्तमो जातं तद्दिशो जगृहुः ॥ ३३ ॥ ततः कदाचिद्ध्यायतो ब्रह्मणश्चतुर्भ्यो मुखेभ्यश्चत्वारो वेदाः ॥३४॥ चातुर्होत्रं[१] यज्ञविस्तारः उपवेदाः न्यायाः धर्मस्य चत्वारः पादाः आश्रमास्तद्वृत्तयश्च बभूवुः ॥ ३५ ॥ ॥ ॥

---

[१] होता अध्वर्युः उद्गाता ब्रह्मा चेत्येषामृत्विजां कर्म ।

विदुर उवाच ॥ स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥३६॥ मैत्रेय उवाच ॥ ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ॥ शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥३७॥ आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ॥३८॥ इतिहासपुराणानि पंचमं वेदमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥३९॥ षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम् ॥४०॥ विद्यादानं तपः सत्यं धर्मस्येति पदानि च ॥ आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ॥ ४१ ॥ सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ॥ वार्ता संचयशालीनशिलोंछ इति वै गृहे ॥४२॥ वैखानसा वालखिल्यौदुम्बराः फेनपा वने ॥ न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ ॥४३॥ आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्तथैव च ॥ एवं व्याहृतयश्चासन्प्रणवो ह्यस्य दह्रतः ॥४४॥ तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ॥ त्रिष्टुम्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः ॥४५॥ मज्जायाः पंक्तिरुत्पन्ना बृहती प्राणतोऽभवत् ॥ स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ॥४६॥ ऊष्माणमिंद्रियाण्याहुरंतस्था बलमात्मनः ॥ स्वराः सप्त विहारेण भवंति स्म प्रजापतेः ॥ ४७ ॥ ॥

विदुर उवाच ॥ ब्रह्मा मुखतो यद्यत्ससर्ज तद्ब्रूहि ॥३६॥ मैत्रेय उवाच ॥ ब्रह्मा पूर्वादिभिर्मुखैर्ऋग्यजुःसामाथर्वाख्यान् वेदान् ससर्ज । शस्त्रं[1] इज्यां[2] स्तुतिस्तोमं[3] प्रायश्चित्तं[4] चासृजत् ॥ ३७ ॥ तथा आयुर्वेदं धनुर्वेदं गांधर्ववेदं शिल्पाख्यवेदमिति चतुर उपवेदान् पूर्वादिमुखेभ्यः ससर्ज ॥ ३८ ॥ इतिहासपुराणानि पंचमं वेदं च सर्वमुखेभ्यः ससर्ज ॥३९॥ तथा षोडश्युक्थौ, चयनाग्निष्टोमौ, आप्तोर्यामातिरात्रौ, वाजपेयगोसवौ च पूर्वादिमुखतः ससर्ज ॥ ४० ॥ विद्या दानं तपः सत्यमिति धर्मस्य पदानि । चतुर आश्रमान् तद्वृत्तीश्च ससर्ज ॥४१॥ ततः सावित्रं[5] प्राजापत्यं[6] ब्राह्मं[7] नैष्ठिकं[8] चेति ब्रह्मचारिणां वृत्तीः । वार्ता[9] संचयः[10] शालीनं[11] शिलोंछं[12] इति गृहस्थानां वृत्तीश्च ससर्ज ॥४२॥ वैखानसो[13] वालखिल्यः[14] औदुंबरः[15] फेनपश्[16]चेति वानप्रस्थानां वृत्तीः । कुटीचकः[17] बह्वोदः[18] हंसः[19] निष्क्रियश्[20]चेति संन्यासिनां वृत्तीश्च पूर्वादिमुखतः ससर्ज ॥४३॥ तथैव आन्वीक्षिकी[21] त्रयी[22] वार्ता[23] दंडनीति[24]श्च बभूवुः । एवं चतस्रो व्याहृतय[25]श्चासन् ॥ ४४ ॥ तस्य हृदयाकाशात्प्रणवो रोमभ्य उष्णिक् १ त्वचो गायत्री २ । मांसात् त्रिष्टुप् ३ । स्नायुतोऽनुष्टुप् ४ । अस्थितो जगती ५ ॥४५॥ मज्जायाः पंक्तिः ६ । प्राणतो बृहती ७ । इति सप्त छंदांसि समभवन् ॥४६॥ तस्य ब्रह्मणो जीवात्—ककारादिमकारांतानि २५ स्पर्शाक्षराणि । देहतोऽकारादि १६ स्वराः । इंद्रियेभ्यः शषसहाक्ष-

---

[1] शस्त्रमप्रगीतमंत्रस्तोत्रं होतुः कर्म । [2] इज्या--यजनमध्वर्योः कर्म । [3] स्तुतिः संगीतं स्तोमं--तदर्थमृक्समुदायं उद्गातुः कर्म । [4] प्रायश्चित्तं ब्रह्मणः कर्म । [5] सावित्रं ब्रह्मचर्यं उपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रम् । [6] प्राजापत्यं-व्रतान्याचरतः संवत्सरपर्यंतम् । [7] ब्राह्मं-वेदग्रहणांतम् । [8] नैष्ठिकं-आमरणांतम् । [9] वार्ता-अनिषिद्धकृष्यादिवृत्तिः । [10] संचयो-याजनादिवृत्तिः । [11] शालीनमयाचितवृत्तिः । [12] शिलोंछः-भूमौ पतितकणिशैः कणैश्च वृत्तिः । [13] वैखानसः-अकृष्टपच्यवृत्तिः । [14] वालखिल्यः-नवेऽन्ने लब्धे पूर्वसंचितान्नत्यागी । [15] औदुंबरः-प्रातरुत्थाय यां दिशं प्रथमं पश्यति तत आहृतैः फलादिभिर्जीवन् । [16] फेनपः-स्वयं पतितैः फलादिभिर्जीवन् । [17] कुटीचकः स्वाश्रमकर्मप्रधानः । [18] बह्वोदः-कर्मोपसर्जनीकृत्य ज्ञानप्रधानः । [19] हंसो-ज्ञानाभ्यासनिष्ठः । [20] निष्क्रियः-प्राप्ततत्त्वः । [21] आन्वीक्षिकी-मोक्षप्राप्तिकरी आत्मविद्या । [22] त्रयी स्वर्गादिफलदात्री कर्मविद्या । [23] देहनिर्वाहिका कृष्यादिः । [24] दंडनीतिर्द्रव्यसंपादनकरी राजनीतिः । [25] भूः भुवः स्वः भूर्भुवःस्वः इति व्यस्तसमस्ताश्चत्वारो व्याहृतयः ।

राणि । बलात् यरलवाक्षराणि । क्रीडया सप्त स्वरा[१] आसन् ॥४७॥ एवं शब्दब्रह्मस्वरूपिणस्तस्य ब्रह्मणः परमेश्वरो नित्यं प्रकाशते ॥ ४८ ॥ ब्रह्मा एवं सृष्टिं कृत्वा ततोऽन्यां तनुं धृत्वा सृष्टिं कर्तुमिच्छितवान्। मरीच्यादीनामृषीणां कृतमपि सर्गमविस्तृतं ज्ञात्वा तद्वृद्धये भूयश्चिंतयामास। अहो एतदद्भुतम् । सृष्टिं कुर्वतोऽपि मे ॥४९॥५०॥ प्रजा न वर्धते । अत्र दैवं विघातकम्। एवं चिंतयतो ब्रह्मणो देहो द्विधा बभूव। ताभ्यां रूपविभागाभ्यां मिथुनं जातम् ॥५१॥५२॥ तत्र यः पुमान् स स्वायंभुवो मनुः। या स्त्री सा शतरूपा । सा तस्य स्त्री बभूव ॥ ५३ ॥ ततो मिथुनधर्मेण प्रजा वृद्धिं प्राप्ताः स स्वायंभुवो मनुः शतरूपायां प्रियव्रतोत्तानपादौ द्वौ पुत्रौ आकूतिर्देवहूतिः प्रसूतिरिति तिस्रः कन्याश्च जनयामास ॥५४॥५५॥ तासां तिसृणां मध्ये आकूतिं ब्रह्मपुत्राय रुचये देवहूतिं कर्दमाय प्रसूतिं

शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः ॥ ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः ॥ ४८ ॥ ततोऽपरामुपादाय स सर्गाय मनो दधे ॥ ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतम् ॥ ४९ ॥ ज्ञात्वा तद्धृदये भूयश्चिंतयामास कौरव ॥ अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ॥ ५० ॥ न ह्येधंते प्रजा नूनं दैवमत्र विघातकम् ॥ एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा ॥ ५१ ॥ कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ॥ ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥ ५२ ॥ यस्तु तत्र पुमान्सोऽभून्मनुः स्वायंभुवः स्वराट् ॥ स्त्री याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः ॥५३॥ तदा मिथुनधर्मेण प्रजा ह्येधांबभूविरे॥ स चापि शतरूपायां पंचापत्यान्यजीजनत् ॥५४॥ प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ॥५५॥ आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमाम् ॥ दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ॥५६॥ इति श्रीम० तृतीय० द्वादशोऽध्यायः ॥१२॥ श्रीशुक उवाच ॥ निशम्य वाचं वदतो मुनेः पुण्यतमां नृप ॥ भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥१॥ विदुर उवाच ॥ स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः ॥ प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने ॥२॥ चरितं तस्य राजर्षेरादिराजस्य सत्तम ॥ ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ॥३॥ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोऽर्थः ॥ यत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषाम् ॥४॥ श्रीशुक उवाच ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानम् ॥ प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥५॥ मैत्रेय उवाच ॥ यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः ॥ प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ॥६॥

दक्षाय च ददौ । ततस्तासां वंशवृद्ध्या जगत्पूरितम् ॥५६॥ इति श्रीमद्भागवतचू० तृती० द्वादशोऽध्यायः ॥१२॥ ॥ त्रयोदशे सिसृक्षायां मनोराकस्मिकाप्लुताम् । धरामुद्धर्तुमुद्भूतात्क्रोडाद्दैत्यानुसूदनम् ॥१॥ श्रीशुक उवाच ॥ विदुरो मैत्रेयस्य पुण्यतमां वाणीं निशम्य पुनः पप्रच्छ ॥ १ ॥ विदुर उवाच ॥ हे मैत्रेय, स्वायंभुवो मनुः प्रियां पत्नीं प्राप्य ततः किं चकार ॥२॥ तस्यादिराजस्य चरितं मे ब्रूहि ॥ ३ ॥ येषां हृदये भगवच्चरणारविंदं तेषां भक्तानां गुणानुवादश्रवणं पुंसां श्रेयस्करम् ॥४॥ श्रीशुक उवाच ॥ इति ब्रुवाणं विदुरंप्रति भगवत्कथायां प्रवर्तमानो हृष्टरोमा मैत्रेयः प्राह ॥५॥ मैत्रेय उवाच ॥ हे विदुर, यदा भार्यया

---

१ निषादः ऋषभः गांधारः षड्जः मध्यमः धैवतः पंचमश्चेति सप्त स्वराः ।

सह स्वायंभुवो मनुर्जातस्तदा प्राजलिः सन् ब्रह्माणं वदतिस्म ॥६॥ हे भगवन्, त्वं नः पिता पोषकश्च । अतस्तव शुश्रूषा केन कर्मणा भवेत्तद्वद ॥७॥ तुभ्यं नमः । यत्कृत्वा मम इह लोके यशः परलोके सद्गतिश्च भवेत्तत्कर्तुमनुज्ञां देहि॥८॥ ब्रह्मोवाच ॥ हे तात, अहं तुभ्यं प्रीतोऽस्मि । युवाभ्यां दंपतीभ्यां स्वस्ति भूयात् ॥९॥ पुत्रैः पितुराज्ञा कर्तव्या इयमेव गुरोः पूजा ॥१०॥ अतस्त्वमस्यामपत्यान्युत्पाद्य धर्मेण पृथ्वीं पालयन् यज्ञैर्हरिं यज ॥११॥ हे मनो, प्रजारक्षया मे शुश्रूषणं भवेत्। ईश्वरश्च तव तुष्टो भविष्यति ॥१२॥ येषां हरिर्न तुष्टस्तेषां सर्वोऽपि श्रमो व्यर्थ एव ॥१३॥ मनुरुवाच ॥ हे भगवन्, तवाज्ञामनुवर्तयिष्ये । अतोऽत्र स्थाने स्थातव्यमिति स्थानमाज्ञापय ॥१४॥ स्थानं पृथ्वीति चेदत आह । प्रजानां मम च निवासस्थानं या मही सा जले निमग्नास्ति । अस्या उद्धरणे

त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता ॥ अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत्॥७॥ तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु ॥ यत्कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥८॥ ब्रह्मोवाच ॥ प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर॥ यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनार्पितम् ॥९॥ एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ ॥ शक्त्याऽप्रमत्तैर्गृह्येत सादरं गतमत्सरैः॥१०॥ स त्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः ॥ उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ॥११॥ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप ॥ भगवांस्ते प्रजाभर्तुर्हृषीकेशोऽनुतुष्यति ॥१२॥ येषां न तुष्टो भगवान्यज्ञलिंगो जनार्दनः॥ तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयम् ॥१३॥ मनुरुवाच ॥ आदेशेऽहं भगवतो वर्तेयामीवसूदन ॥ स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो ॥१४॥ यदोकः सर्वसत्वानां मही मग्ना महांभसि ॥ अस्या उद्धरणे यत्नो देव देव्या विधीयताम् ॥१५॥ मैत्रेय उवाच ॥ परमेष्ठी त्वपां मध्ये तथा सन्नामवेक्ष्य गाम् ॥ कथमेनां समुन्नेष्य इति दध्यौ धिया चिरम् ॥१६॥ सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता ॥ अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः॥ यस्याहं हृदयादासं स ईशो विदधातु मे ॥१७॥ इत्यभिध्यायतो नासाविवरात्सहसाऽनघ ॥ वराहतोको निरगादंगुष्ठपरिमाणकः ॥१८॥ तस्याभिपश्यतः खस्थः क्षणेन किल भारत ॥ गजमात्रः प्रववृधे तदद्भुतमभून्महत्॥१९॥ मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह ॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा ॥२०॥ किमेतत्सौकरव्याजं सत्वं दिव्यमवस्थितम् ॥ अहो बताश्चर्यमिदं नासाया मे विनिःसृतम् ॥२१॥ दृष्टोंऽगुष्ठशिरोमात्रः क्षणाद्गंडशिलासमः ॥ अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः ॥२२॥

यत्नं कुरु ॥१५॥ तदा ब्रह्मा जलमध्ये मग्नां महीं वीक्ष्य कथमेनां समुद्धरिष्यामीत्यचिंतयत् ॥ १६ ॥ अहो मे सृष्टिं कुर्वतः सतः क्षितिर्जलैः प्लाव्यमाना सती रसातलं गता । अत्र किं कर्तव्यम् । यस्य प्रभोर्हृदयाकाशादहमुत्पन्नः स ईशो मे कार्यं संपादयतु ॥१७॥ इति ध्यायतस्तस्य ब्रह्मणो नासाविवरादंगुष्ठपरिमाणको वराहतोको निरगात् ॥१८॥ तदा ब्रह्मणः पश्यतः सतः स वराहतोक आकाशे स्थितः सन् गजप्रमाणो ववृधे ॥१९॥ ततो मरीचिप्रमुखैः कुमारैश्च सह ब्रह्मा किमेतदिति तर्कयामास ॥२०॥ अहो वराहरूपधारि एतत्किं सत्वं मे नासायाः सकाशाद्विनिःसृतमेतन्महदाश्चर्यम् ॥ २१ ॥ अयं वराहः पूर्वमंगुष्ठपर्वमात्रो दृष्टः स क्षणात् स्थूलपाषाणसदृशः । अतएव भगवान् एष मे मनः खेदयन् जातः किम् ॥ २२॥ ॥ ॥ ॥

इति ब्रह्मणो मीमांसतः सतो भगवान् यज्ञरूपो वराहो जगर्ज ॥२३॥ तेन स्वगर्जितेन हरिर्ब्रह्माणं ऋषींश्च हर्षयामास ॥२४॥ तद्ध्वनिं श्रुत्वा जनस्तपःसत्यनिवासिनो जना अयं यज्ञवराह इति ऋग्यजुःसाममंत्रैस्तुष्टुवुः ॥२५॥ तदा वराहस्तेषामुत्कर्षार्थं भूयो विनद्य जलं प्रविवेश ॥२६॥ तदा ऊर्ध्वपुच्छः आकाशचारी स्कंधस्थकेशान् विधुन्वन् श्वेतदंष्ट्रो हरिः शुशुभे ॥ २७ ॥ स स्वयं यज्ञांगोऽपि पशुरिव घ्राणेन पृथिव्याः स्थानं जिघ्रन् करालदंष्ट्रोऽपि प्रेमदृष्ट्या विप्रानूर्ध्वं वीक्ष्य जलं प्रविवेश ॥२८॥ तदा वज्रपर्वतसदृशस्य भगवतोंगस्य निपातवेगेन भिन्नमर्यादः समुद्र आर्त इव शब्दं कुर्वन् भो यज्ञेश्वर, मां पाहीत्येवं चुक्रोश ॥२९॥ वराहस्तु खुरैस्तज्जलं विदारयन् रसातले महीं ददर्श ॥३०॥ तदा निमग्नां महीं स्वदंष्ट्रयोद्धृत्य रसाया उत्थितो भगवान् शुशुभे। तदांभसि गदामुद्यम्यागच्छंतं

इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः ॥ भगवान्यज्ञपुरुषो जगर्जागेंद्रसंनिभः ॥२३॥ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् ॥ स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः ॥२४॥ निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म ॥२५॥ तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादम् ॥ विनद्य भूयो विबुधोदयाय गजेंद्रलीलो जलमाविवेश ॥२६॥ उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन्खररोमशत्वक् ॥ खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः ॥२७॥ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रोडापदेशः स्वयमध्वरांगः ॥ करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्गृणतोऽविशल्कम् ॥२८॥ स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति ॥२९॥ खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायाम् ॥ ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ॥३०॥ स्वदंष्ट्रयोद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः ॥ तत्रापि दैत्यं गदयाऽऽपतंतं सुनाभसंदीपिततीव्रमन्युः ॥३१॥ जघान रुंधानमसह्यविक्रमं स लीलयेभं मृगराडिवांभसि ॥ तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो जगतीं विभिंदन् ॥ ३२ ॥ तमालनीलं सितदंतकोट्या क्ष्मामुत्क्षिपंतं गजलीलयांग ॥ प्रज्ञाय बद्धांजलयोऽनुवाकैर्विरिंचिमुख्या उपतस्थुरीशम् ॥३३॥ ऋषय ऊचुः ॥ जितं जितं तेऽजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः ॥ यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ॥३४॥ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकम् ॥ छंदांसि यस्य त्वचि बर्हि रोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रम् ॥३५॥ स्रुक् तुंड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे ॥ प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ॥ ३६ ॥

॥३१॥ असह्यविक्रमं दैत्यं लीलया हत्वा तद्रक्तपंकांकितगंडतुंडो[१] जलादूर्ध्वं निर्गतः ॥३२॥ तदा ब्रह्ममरीच्यादयो दंतकोट्या पृथिवीमुत्क्षिपंतं तमालनीलं हरिं दृष्ट्वा बद्धांजलयस्तुष्टुवुः ॥३३॥ ऋषय ऊचुः ॥ हे यज्ञपालक, त्वया जितं जितम् । स्वां वेदमयीं तनुं धुन्वते ते नमः । यद्रोमगर्तेषु यज्ञा निलिल्युः ॥ ३४ ॥ हे ईश, यज्ञात्मकं ते रूपं दुष्कृतात्मनां दुर्दर्शनम् । यस्य त्वचि-गायत्र्यादीनि छंदांसि । रोमसु-दर्भाः । नेत्रयोः-आज्यम् । चरणेषु-होत्रादिकर्मचतुष्टयम् ॥३५॥ मुखाग्रे- स्रुक् । नासिकयोः-स्रुवः । उदरे-भक्षणपात्रम् । कर्णरंध्रे-चमसाः । हे देव, यत्ते भक्षणं-तदग्निहोत्रम् ॥ ३६ ॥ ॥ ॥

---

[१] तस्य रक्तमेव पंकस्तेनांकितौ गंडौ तुडं च यस्य सः।

दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः ॥ जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते
॥३७॥ सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः ॥ सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः
॥३८॥ नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः
॥३९॥ दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथा वनान्निःसरतो दता धृता मतंगजेंद्रस्य सपत्रपद्मिनी
॥४०॥ त्रयीमयं रूपमिदं च सौकरं भूमंडलेनाथ दता धृतेन ते ॥ चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रमः
॥४१॥ संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ॥ विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥४२॥ कः श्रद्दधीतान्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणम् ॥ न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयम् ॥४३॥ विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयम् ॥ सटाशिखोद्धूतशिवांबुबिंदुभिर्विमृज्यमाना
भृशमीश पाविताः ॥४४॥ स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः ॥ यद्योगमायागुणयोगमोहितं विश्वं समस्तं
भगवन्विधेहि शम् ॥४५॥ मैत्रेय उवाच ॥ इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः ॥ सलिले स्वखुराक्रांत उपाधत्तावितावनिम् ॥४६॥
स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः ॥ रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ॥४७॥ य एवमेतां हरिमेधसो हरेः
कथां सुभद्रां कथनीयमायिनः ॥ शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति ॥४८॥ तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः ॥ अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पराम् ॥४९॥ को नाम
लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधाम् ॥ आपीय कर्णांजलिभिर्भवापहामहो विरज्येत विना नरेतरम् ॥ ५० ॥

तव ग्रीवायां-उपसन्नामकास्तिस्र इष्टयः। दंष्ट्रायां-दीक्षानंतरेष्टिः समाप्तेष्टिश्चेति द्वयम् ॥ ३७ ॥ रेतसि-सोमपानम्। बाल्याद्यवस्थासु-प्रातःसवनादीनि। तव
सर्वसंधिषु सर्वसत्राणि संति ॥३८॥ हे यज्ञ, सर्वमंत्रादिरूपाय क्रियात्मने ज्ञानप्रदाय गुरवे ते नमः ॥३९॥ हे भगवन्, दंष्ट्राग्रकोट्या त्वया धृतेयं भूमिर्विराजते ॥४०॥ हे नाथ, इदं ते ऋग्यजुःसाममयं सौकरं रूपं भूमंडलधारणेन नितरां शोभते ॥४१॥ जगतां मातरमेतां पृथ्वीं स्थावरजंगमानां निवासस्थानार्थं
स्थापय। यतस्त्वं जगतां पितासि। अतस्त्वया सहास्यै मात्रे नमनं करिष्यामः ॥४२॥ हे प्रभो, पृथिव्या उद्धरणमन्यः कः कुर्यान्न कोऽपि। यो माययेदं जगत्सृजते तस्मिंस्त्वयीदमाश्चर्यं न ॥४३॥ हे ईश, निजं वपुर्विधुन्वता त्वया सटाशिंखोद्धूतशिवांबुबिंदुभिः[1] सिच्यमाना जनस्तपःसत्यनिवासिनो वयं पवित्रीकृताः ॥४४॥ हे भगवन्, योगमायया मोहितस्य विश्वस्य मंगलं विधेहि ॥४५॥ मैत्रेय उवाच ॥ एवं मुनिभिः स्तूयमानो हरी रसातलादानीतां पृथ्वीमप्सु
न्यस्य ॥४६॥ स्वशक्त्या स्थिरां च कृत्वा ययौ ॥४७॥ एवमेतां हरेः कथां यः शृणुयात् श्रावयेद्वा तस्य जनार्दन आशु प्रसीदति ॥४८॥ तस्मिन् प्रसन्ने सति
किं दुर्लभम्। प्रसन्नो भगवान् भजतां स्वगतिं विधत्ते ॥४९॥ इमां भवापहां भगवत्कथासुधां कर्णांजलिभिः पीत्वा पशुं विना को विरमेत् ॥ ५० ॥ ॥

---

[1] सटानां शिखाभिरग्रैः उद्धूता उच्छलिता ये शिवा अंबुबिंदवस्तैः।

इति श्रीमद्भागवतचू० तृ० त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ चतुर्दशे निदानं तु तद्वधे वक्तुमुच्यते ॥ संध्यायां कश्यपाद्गर्भसंभवः कामतो दितेः ॥ १ ॥ श्रीशुक उवाच ॥ मैत्रेयेण सूकरात्मनो हरेर्वर्णितां कथां श्रुत्वा नातितृप्तो विदुरः पुनः पप्रच्छ ॥१॥ विदुर उवाच ॥ हे मुनिश्रेष्ठ, यज्ञमूर्तिना हरिणा हिरण्याक्षो हत इति त्वन्मुखाच्छ्रुतम् ॥२॥ तस्य स्वदंष्ट्राग्रेण भूमिमुद्धरतो वराहस्य दैत्यराजस्य च कस्माद्धेतोर्युद्धं बभूव ॥ ३ ॥ मैत्रेय उवाच । हे वीर, त्वया साधु पृष्टम् । यस्मात्त्वं हरेरवतारकथां पृच्छसि ॥४॥ यया कथया ध्रुवो बाल एव मृत्योर्मस्तके पदं दत्वा विष्णुपदमारुरोह ॥५॥ अस्मिन् विषये पूर्वं देवानां पृच्छतां सतां ब्रह्मणा इतिहासः कथितः । स मया श्रुतस्तं त्वं शृणु ॥६॥ एकदा दक्षकन्या दितिः पुत्रकामा सती संध्यायामग्निं हुत्वा होमशालायां स्थितं पतिं कश्यपं कामे-

इति श्रीम० महापु० तृतीय० वराहप्रादुर्भावानुवर्णने त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीशुक उवाच ॥ निशम्य कौषारविणोपवर्णितां
हरेः कथां कारणसूकरात्मनः ॥ पुनः स पप्रच्छ तमुद्यतांजलिर्न चातितृप्तो विदुरो धृतव्रतः ॥१॥ विदुर उवाच ॥ तेनैव
तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना ॥ आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम ॥२॥ तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राग्रेण लीलया ॥
दैत्यराजस्य च ब्रह्मन्कस्माद्धेतोरभून्मृधः ॥३॥ मैत्रेय उवाच ॥ साधु वीर त्वया पृष्टमवतारकथां हरेः ॥ यत्त्वं पृच्छसि मर्त्यानां
मृत्युपाशविशातनीम् ॥४॥ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः ॥ मृत्योः कृत्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदम् ॥५॥ अथात्रापीतिहासोऽयं
श्रुतो मे वर्णितः पुरा ॥ ब्रह्मणा देवदेवेन देवानामनुपृच्छताम् ॥६॥ दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिम् ॥
अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ॥७॥ इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिम् ॥ निम्लोचत्यर्क आसीनमग्न्यगारे समाहितम्
॥८॥ दितिरुवाच ॥ एष मां त्वत्कृते विद्वन्काम आत्तशरासनः ॥ दुनोति दीनां विक्रम्य रंभामिव मतंगजः ॥९॥ तद्भवान्दह्यमानायां
सपत्नीनां समृद्धिभिः ॥ प्रजावतीनां भद्रं ते मय्यायुंक्तामनुग्रहम् ॥१०॥ भर्तर्याप्तोरुमानानां लोकानाविशते यशः ॥ पतिर्भवद्विधो
यासां प्रजया ननु जायते ॥११॥ पुरा पिता नो भगवान्दक्षो दुहितृवत्सलः ॥ कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् ॥१२॥
स विदित्वात्मजानां नो भावं संतानभावनः ॥ त्रयोदशाददात्तासां यास्ते शीलमनुव्रताः ॥१३॥ अथ मे कुरु कल्याण कामं
कंजविलोचन ॥ आर्तोपसर्पणं भूमन्नमोघं हि महीयसि ॥१४॥ इति तां वीरमारीचः कृपणां बहुभाषिणीम् ॥ प्रत्याहानुनयन्वाचा
प्रवृद्धानंगकश्मलाम् ॥१५॥ एष तेऽहं विधास्यामि प्रियं भीरु यदिच्छसि ॥ तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः ॥१६॥

च्छया चकमे ॥७॥८॥ दितिरुवाच ॥ हे विद्वन्, त्वया सह रंतुमयं कामो मां पीडयति ॥ ९ ॥ पुत्रवतीनां सपत्नीनां समृद्धिभिर्दह्यमानायां मयि प्रसादं कुरु ॥१०॥ यासां भवत्सदृशः पतिरस्ति तासां यशो लोकान् व्याप्नोति ॥११॥ पुरा नः पिता दक्षो हे वत्साः, यूयं कं पतिं वृणुथेति नः पृथक् पृथक् पप्रच्छ ॥ १२ ॥ ततः स दक्षः स्वकन्यानां नस्त्वयि भावं विदित्वा तासां मध्ये त्रयोदश तुभ्यं ददौ ॥१३॥ अतो हे कमलनेत्र, मे मनोरथं पूर्णं कुरु ॥१४॥ एवं श्रुत्वा कश्यपः प्रवृद्धकामेन प्राप्तमोहां तां दितिं प्रत्याह ॥१५॥ कश्यप उवाच ॥ हे भीरु, तव मनोरथं पूर्णं करिष्यामि। यस्याः स्त्रियः सकाशाद्धर्मार्थकामसिद्धिर्भवति तस्या

मनोरथं पूर्णं को न कुर्यात् ॥१६॥ स्त्रीसहितः पुरुषोऽन्नादिदानेन संकटादन्यान् जनान् तारयन् स्वयं च तरति ॥१७॥ हे मानिनि, यां स्त्रियमर्धांगं वदंति। यस्यां गृहकृत्यं स्थापयित्वा पुमान्निश्चिंतश्चरति ॥१८॥ वयं यामाश्रित्येतराश्रमैर्दुर्जयानिंद्रियशत्रून् जयेम ॥ १९ ॥ हे गृहेश्वरि, तां त्वां प्रत्युपकारैस्त्वत्सदृशा भवितुं यावज्जीवं प्रत्युपकुर्वतोऽपि वयं न समर्थाः ॥२०॥ अथापि तव प्रजारूपं मनोरथमहं पूर्णं करवाणि । त्वं मुहूर्तं धैर्यं धृत्वा प्रतीक्षस्व ॥२१॥ कुतः। एषा घोरतमा वेला यस्यां रुद्रानुचराश्चरंति ॥२२॥ हे साध्वि, अस्यां संध्यायां भगवान् शिवो भूतगणैः सह वृषभारूढो भूत्वा संचरति ॥२३॥ श्मशानस्थलस्थितधूलिना प्रकाशितजटासमूहः स ते देवरः सोमसूर्याग्निनेत्रैः पश्यति ॥२४॥ यस्य लोके स्वजनः परो वा अत्यादरयुक्तोऽतिनिंद्यश्च कश्चिदपि नास्ति। किंच।

सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् ॥ व्यसनार्णवमत्येति जलयानैर्यथार्णवम् ॥१७॥ यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि ॥ यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः ॥१८॥ यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः॥ वयं जयेम हेलाभिर्दस्यून्दुर्गपतिर्यथा ॥१९॥ न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि ॥ अप्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः॥२०॥ अथापि काममेतं ते प्रजात्यै करवाण्यलम् ॥ यथा मां नातिवोचंति मुहूर्तं प्रतिपालय ॥२१॥ एषा घोरतमा वेला घोराणां घोरदर्शना ॥ चरंति यस्यां भूतानि भूतेशानुचराणि ह ॥२२॥ एतस्यां साध्वि संध्यायां भगवान्भूतभावनः॥ परीतो भूतपर्षद्भिर्वृषेणाटति भूतराट् ॥ २३ ॥ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ॥ भस्मावगुंठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते ॥ २४ ॥ न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः ॥ वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां बत भुक्तभोगाम् ॥२५॥ यस्यानवद्याचरितं मनीषिणो गृणंत्यविद्यापटलं बिभित्सवः ॥ निरस्तसाम्यातिशयोऽपि यत्स्वयं पिशाचचर्यामचरद्गतिः सताम् ॥२६॥ हसंति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितम् ॥ यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितम् ॥२७॥ ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया ॥ आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनम् ॥२८॥ मैत्रेय उवाच ॥ सैवं संविदिते भर्त्रा मन्मथोन्मथितेंद्रिया ॥ जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा ॥२९॥ स विदित्वाथ भार्यायास्तं निर्बंधं विकर्मणि ॥ नत्वा दिष्टाय रहसि तयाथोपविवेश ह ॥३०॥ अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः ॥ ध्यायन्जजाप विरजं ब्रह्म ज्योतिः सनातनम् ॥३१॥ दितिस्तु व्रीडिता तेन कर्मावद्येन भारत ॥ उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ॥३२॥

येन स्वचरणेन निर्माल्यवद्दूरतस्त्यक्तां संपत्तिं वयं महाप्रसाद इत्याशास्महे ॥२५॥ ज्ञानिनो यस्य चरित्रं वर्णयंति। यः स्वयं निरस्तसाम्यातिशयोऽपि पिशाचचर्यां चरति ॥२६॥ भाग्यहीना यस्य चरित्रं हसंति ॥२७॥ ब्रह्मादयो यत्कृतं मार्गं पालयंति । माया च यस्याज्ञाकरी तस्य शिवस्य चरित्रमतर्क्यमस्ति ॥२८॥ मैत्रेय उवाच ॥ एतद्दितिः श्रुत्वाऽपि वेश्येव भर्तुर्वस्त्रं जग्राह ॥ २९ ॥ तदा कश्यपो भार्याया निषिद्धे कर्मण्यत्यंतमाग्रहं ज्ञात्वा दैवाय नत्वा तया सह रहसि जगाम ॥३०॥ अथ स्नात्वा प्राणानायम्य गायत्रीं जजाप ॥३१॥ दितिस्तु तेन कर्मणा लज्जिताऽधोमुखी सती पतिं बभाषे ॥ ३२ ॥ ॥

दितिरुवाच ॥ हे ब्रह्मन्, रुद्रो मदपराधान्मे गर्भं मावधीत् । यस्याहमपराधं कृतवती ॥३३॥ तस्मै रुद्रायोग्राय दुष्टेषु धृतदंडाय शिवाय नमः ॥ ३४ ॥ स मे भगिनीपतिर्महानुग्रहो भगवान् नः प्रसीदतु ॥३५॥ मैत्रेय उवाच ॥ एवं दितेर्वाक्यं श्रुत्वा निवृत्तसंध्यानियमः कश्यपस्तामाह ॥ ३६ ॥ हे भद्रे, तव मनसोऽशुचित्वात् संध्याकालरूपमुहूर्तदोषात् ममाज्ञालंघनात् देवानां हेलनाच्च ॥३७॥ तव जठरे अधमौ द्वौ पुत्रौ भविष्यतः । तौ त्रैलोक्यस्थान् जनान् मुहुराक्रंदयिष्यतः ॥३८॥ ताभ्यां पुत्राभ्यां निरपराधिनां दीनानां प्राणिनां हन्यमानानां सतां साधुषु च कोपितेषु सत्सु ॥३९॥ तदा विश्वेश्वरो भगवान् क्रुद्धः सन् अवतीर्य तौ हनिष्यति ॥४०॥ दितिरुवाच ॥ पुत्रवधं भगवत आशासे परंतु क्रुद्धाद्ब्राह्मणात्स वधो माभूत् ॥४१॥ यतो ब्रह्मशापेन दग्धं प्राणिनं नरकस्थिता अपि न गृह्णंति ॥४२॥ कश्यप उवाच ॥ हे दिते, तव कृतकर्मणः पश्चात्तापो जातः । विष्णौ शिवे मयि च पूज्यबुद्धिर्जाता ॥ ४३ ॥ अतस्ते पौत्राणां मध्ये एकः पौत्रः साधुर्भविष्यति । साधवो यस्य यशो गास्यंति ॥४४॥ यस्य स्वभावमात्मनि संपादयितुं साधवः स्वचित्तं निर्वैरत्वादिभिर्योगैः शोधयिष्यंति ॥४५॥ यत्प्रसादादिदं विश्वं प्रसीदति स भगवान् यस्य ‘ भगवानेव सत्य इति’ भावनया संतोषं प्राप्स्यते ॥ ४६ ॥ स ते पौत्रो महाभागवतः प्रवृद्धभक्त्या शोधिते चित्ते हरिं निवेश्य देहाद्यभिमानं त्यक्ष्यति ॥४७॥ अपिच । स विषयेष्वलंपटः सुस्वभावो गुणाकरो जगतः शोकहर्ता भविष्यति ॥ ४८ ॥ ॥

दितिरुवाच ॥ मा मे गर्भमिमं ब्रह्मन्भूतानामृषभोऽवधीत् ॥ रुद्रः पतिर्हि भूतानां यस्याकरवमंहसम् ॥३३॥ नमो रुद्राय महते देवायोग्राय मीढुषे ॥ शिवाय न्यस्तदंडाय धृतदंडाय मन्यवे ॥३४॥ स नः प्रसीदतां भामो भगवानुर्वनुग्रहः ॥ व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः सतीपतिः ॥३५॥ मैत्रेय उवाच ॥ स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीम् ॥ निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ॥३६॥ कश्यप उवाच ॥ अप्रायत्यादात्मनस्ते दोषान्मौहूर्तिकादुत ॥ मन्निदेशातिचारेण देवानां चातिहेलनात् ॥३७॥ भविष्यतस्तवाभद्रावभद्रे जाठराधमौ ॥ लोकान्सपालांस्त्रींश्चंडि मुहुराक्रंदयिष्यतः ॥३८॥ प्राणिनां हन्यमानानां दीनानामकृतागसाम् ॥ स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ॥३९॥ तदा विश्वेश्वरः क्रुद्धो भगवांल्लोकभावनः ॥ हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्वधृक् ॥४०॥ दितिरुवाच ॥ वधं भगवता साक्षात्सुनाभोदारबाहुना ॥ आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणाद्विभो ॥४१॥ न ब्रह्मदंडदग्धस्य न भूतभयदस्य च ॥ नारकाश्चानुगृह्णंति यां यां योनिमसौ गतः ॥४१॥ कश्यप उवाच ॥ कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् ॥ भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥४३॥ पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः ॥ गास्यंति यद्यशः शुद्धं भगवद्यशसा समम् ॥४४॥ योगैर्हेमेव दुर्वर्णं भावयिष्यंति साधवः ॥ निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुम् ॥४५॥ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकम्॥ स स्वदृग्भगवान्यस्य तोष्यतेऽनन्यया दृशा ॥४६॥ स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः ॥ प्रवृद्धभक्त्या ह्यनुभाविताशये निवेश्य वैकुंठमिमं विहास्यति ॥४७॥ अलंपटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु ॥ अभूतशत्रुर्जगतः शोकहर्ता नैदाघिकं तापमिवोडुराजः॥४८॥

एतादृशस्ते पौत्रः स्फुरत्कुंडलमंडिताननं कमलनेत्रं लक्ष्मीपतिं भगवंतं द्रक्ष्यति॥४९॥ मैत्रेय उवाच ॥ भागवतः पौत्रो भाव्यः पुत्रयोर्वधश्च कृष्णाद्भविष्यतीति
श्रुत्वा दितिर्भृशमानंदं प्राप ॥५०॥ इति श्रीमद्भागवतचू० तृती० चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ हृतप्रभैः सुरैः पृष्टः प्राह पंचदशे विधिः । तद्बीजं विप्रशापादि
वैकुंठे विष्णुभृत्ययोः ॥१॥ मैत्रेय उवाच ॥ दितिस्तत्काश्यपं वीर्यमुदरे शतं वर्षाणि दधार ॥१॥ तेन वीर्येणांधकारः प्रवृत्तः । तेन लोके व्याप्ते सति
भीता इंद्रादयो देवा ब्रह्माणं गत्वा प्रार्थयामासुः ॥२॥ देवा ऊचुः ॥ हे भगवन्, त्वं कालेनाकुंठितज्ञानोऽसि । तवाज्ञातं किंचिदपि नास्ति । अत एतत्तमः
कुतः प्राप्तमिति जानासि । तथापि भीता वयं निवेदयामः ॥ ३ ॥ हे लोकनाथानां शिखामणे, त्वं सर्वभूतानामभिप्रायं जानासि ॥४॥ मायया ब्रह्मदेहं प्राप्तवते

अंतर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपम् ॥ पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुंडलमंडिताननम् ॥ ४९ ॥ मैत्रेय
उवाच॥ श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशम्॥ पुत्रयोश्च वधं कृष्णाद्विदित्वाऽऽसीन्महामनाः॥६०॥ इति श्रीमद्भागवते महापु०
तृतीयस्कंधे दितिकश्यपसंवादे चतुर्दशोऽध्यायः ॥ १४॥ ॥ मैत्रेय उवाच ॥ प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः ॥ दधार
वर्षाणि शतं शंकमाना सुरार्दनात् ॥ १ ॥ लोके तेन हताऽऽलोके लोकपाला हतौजसः॥ न्यवेदयन्विश्वसृजे ध्वांतव्यतिकरं दिशाम्
॥२॥ देवा ऊचुः ॥ तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशम् ॥ न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ॥३ ॥ देवदेव
जगद्धातर्लोकनाथशिखामणे ॥ परेषामपरेषां त्वं भूतानामसि भाववित् ॥४॥ नमो विज्ञानवीर्याय माययेदमुपेयुषे ॥ गृहीतगुणभेदाय
नमस्तेऽव्यक्तयोनये ॥ ५॥ ये त्वानन्येन भावेन भावयंत्यात्मभावनम् ॥ आत्मनि प्रोतभुवनं परं सदसदात्मकम्
॥ ६ ॥ तेषां सुपक्वयोगानां जितश्वासेंद्रियात्मनाम् ॥ लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ॥ ७॥ यस्य वाचा प्रजाः सर्वा
गावस्तंत्येव यंत्रिताः ॥ हरंति बलिमायत्तास्तस्मै मुख्याय ते नमः ॥ ८ ॥ स त्वं विधत्स्व शं भूमंस्तमसा लुप्तकर्मणाम् ॥
अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुम् ॥९॥ एष देव दितेर्गर्भ ओजः काश्यपमर्पितम्॥ दिशस्तिमिरयन्सर्वा वर्धतेऽग्निरिवैधसि
॥ १० ॥ मैत्रेय उवाच ॥ स प्रहस्य महाबाहो भगवान् शब्दगोचरः ॥ प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरया गिरा ॥११॥ ब्रह्मोवाच
॥ मानसा मे सुता युष्मत्पूर्वजाः सनकादयः ॥ चेरुर्विहायसा लोकाँल्लोकेषु विगतस्पृहाः ॥ १२ ॥ त एकदा भगवतो
वैकुंठस्यामलात्मनः ॥ ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतम् ॥ १३ ॥ ॥ ॥ ॥

गृहीतरजोगुणाय तुभ्यं नमः ॥५॥ ये त्वां निष्कामभावेन ध्यायंति ॥ ६ ॥ तेषां जितप्राणेंद्रियमनसां प्राप्तयुष्मत्प्रसादानां कुतश्चिदपि पराभवो न भवति
॥७॥ यस्य वाक्तंत्या बद्धाः प्रजा यस्मै पूजामर्पयंति तस्मै ते नमः ॥८॥ हे ईश, स त्वं तमसा लुप्तकर्मणां नः कल्याणं कुरु । विपत्तिं प्राप्तानस्मान् दयार्द्रदृष्ट्यावलोकयितुमर्हसि
॥९॥ इदं काश्यपं तेजो दितेर्गर्भो दिशोंऽधकारयुक्ताः कुर्वन् वर्धते ॥ १० ॥ मैत्रेय उवाच ॥ तदा ब्रह्मा प्रहस्य देवानुवाच ॥ ११ ॥ हे
देवाः, युष्मत्पूर्वजा मे मानसाः पुत्राः सनकादयो गतस्पृहाः संतो लोकेषु चेरुः ॥१२॥ एकदा ते सर्वलोकनमस्कृतं वैकुंठाख्यं लोकं ययुः ॥ १३ ॥ ॥

वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्तयः ॥ येऽनिमित्तनिमित्तेन धर्मेणाराधयन्हरिम् ॥१४॥ यत्र चाद्यः पुमानास्ते भगवान् शब्दगोचरः ॥ सत्वं विष्टभ्य विरजं स्वानां नो मृडयन्वृषः ॥१५॥ यत्र नैश्रेयसं नाम वनं कामदुघैर्द्रुमैः ॥ सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् ॥ १६ ॥ वैमानिकाः सललनाश्चरितानि यत्र गायंति लोकशमलपक्षणानि भर्तुः ॥ अंतर्जलेऽनुविकसन्मधुमाधवीनां गंधेन खंडितधियोऽप्यनिलं क्षिपंतः ॥१७॥ पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः ॥ कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृंगाधिपे हरिकथामिव गायमाने ॥ १८ ॥ मंदारकुंदकुरवोत्पलचंपकार्णपुंनागनागबकुलांबुजपारिजाताः ॥ गंधेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयंति ॥१९॥ यत्संकुलं हरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहैममयैर्विमानैः ॥ येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः ॥ २० ॥ श्री रूपिणी क्वणयती चरणारविंदं लीलांबुजेन हरिसद्मनि मुक्तदोषा ॥ संलक्ष्यते स्फटिककुड्य उपेतहेम्नि संमार्जतीव यदनुग्रहणेऽन्ययत्नः ॥ २१ ॥ वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशम् ॥ अभ्यर्चती स्वलकमुन्नसमीक्ष्य वक्रमुच्छेषितं भगवतेत्यमतांग यच्छ्रीः ॥२२॥ यन्न व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येऽन्यविषयाः कुकथा मतिघ्नीः ॥ यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान् क्षिपंत्यशरणेषु तमःसु हंत ॥२३॥ येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र ॥ नाराधनं भगवतो वितरंत्यमुष्य संमोहिता विततया बत मायया ते ॥२४॥ यच्च व्रजंत्यनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः ॥ भर्तुर्मिथः सुयशसः कथनानुरागवैक्लव्यबाष्पकलया पुलकीकृतांगाः ॥ २५ ॥ तद्विश्वगुर्वधिकृतं भुवनैकवंद्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥ आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुंठम् ॥ २६ ॥ ॥

यत्र सर्वे पुरुषा विष्णुसदृशमूर्तयो विष्णुमाराधयंति ॥१४॥ यत्र वेदांतैकवेद्यो भगवान् शुद्धसत्वगुणमयीं मूर्तिं धृत्वा नो भक्तानां सुखार्थमास्ते ॥१५॥ यत्र कामपूरकैर्वृक्षैः शोभितं नैश्रेयसं नाम वनमास्ते ॥१६॥ यत्र सस्त्रीका देवा वसंतकालीनपुष्पाणां गंधेन खंडितबुद्धयोऽपि तद्गंधप्रापकं वायुं तिरस्कुर्वंतो हरेश्चरितानि गायंति ॥१७॥ किंच । यत्र वने भ्रमराधिपे उच्चैर्हरिकथामिव गायमाने सति पारावतकोकिलसारसचक्रवाकानां शब्दः क्षणमात्रं विरमते ॥ १८ ॥ मंदारपारिजातकचंपकादिपुष्पजातयो वृक्षाः सुगंधयुक्ता अपि श्रीहरिणा तुलस्या गंधेऽर्चिते सति तस्यास्तपो बहु मानयंति॥१९॥यत्र वैदूर्यमारकतसुवर्णमयैरनेकैर्विमानैः स्त्रीभिश्च सह देवाः पर्यटंति॥२०॥यत्र लक्ष्मीर्हरेर्गृहे स्फटिकभित्तिषु संमार्जनं कुर्वतीव लक्ष्यते ॥२१॥सा श्रीः स्वकीये लक्ष्मीवने तुलसीभिः श्रीविष्णुं पूजयंती सती विमलामृतासु वापीषु प्रतिबिंबितं स्वमुखं वीक्ष्य भगवता चुंबितं सदेतदतिशयेन शोभत इति मेने॥२२॥किंच । ये बुद्धिभ्रंशिका अर्थकामादिवार्ताः शृण्वंति ते तद्वैकुंठं न व्रजंति ॥२३॥ हे देवाः, यस्यां तत्त्वज्ञानं भवति तां मनुष्यजातिं प्राप्ताः संतोऽपि ये हरेराराधनं न कुर्वंति ते भगवन्मायया नूनं मोहिता इति ज्ञातव्यम्॥२४॥ये यमनियमान् त्यक्त्वा मिथो भगवत्कथाप्रेम्णा बाष्पकलया सह पुलकीकृतांगा भवंति ते तत्र गच्छंति॥२५॥ तत्र वैकुंठे योगमायाबलेन

सनकादयो गत्वा तद्वैकुंठं विलोक्य हर्षं प्रापुः॥२६॥ततस्तस्मिन्वैकुंठे षट् प्राकारद्वाराण्यतीत्य सप्तमे द्वारे गृहीतगदौ बाहुभूषणकुंडलकिरीटधारणेन सुंदरवेषौ वनमालिकया युक्तौ, कुटिलया भ्रुवा आरक्तनेत्राभ्यां च किंचित्क्रुद्धं मुखं धारयंतौ॥२७॥२८॥जयविजयनामानौ द्वारपालौ दृष्ट्वा यथा पूर्वाणि षट् द्वाराणि विविशुस्तथा तस्मिन्सप्तमे द्वारेऽपि तावपृष्ट्वैव विविशुः॥२९॥ तदा तौ द्वारपालौ वृद्धानपि पंचवर्षबालसदृशान् नग्नान् चतुरः कुमारान् वीक्ष्य वेत्रेण निवारितवंतौ॥३०॥ तदा हरेर्द्वारपालाभ्यां निषिध्यमानास्ते कुमारा भगवद्दर्शनेच्छाभंगे जाते सति किंचित्क्रुद्धाः संत ऊचुः॥३१॥ अहो इह वसतां समदर्शिनां मध्ये कपटयुक्तयोर्युवयोरेव कोऽयं विषमः स्वभावः॥३२॥ इह स्थिता विद्वांसो विश्वकुक्षौ भगवति स्वात्मनो भेदं न पश्यंति। किंत्वैक्यमेव पश्यंति। यथा भूलो-

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायाम्॥ देवावचक्षत गृहीतगदौ परार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ॥२७॥मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयाऽसितचतुष्टयबाहुमध्ये॥ वक्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां रक्तेक्षणेन च मनाग्रभसं दधानौ॥२८॥द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिकायाः॥सर्वत्र तेऽविषमया मुनयः स्वदृष्ट्या ये संचरंत्यविहता विगताभिशंकाः॥२९॥तान्वीक्ष्य वातरशनांश्चतुरः कुमारान्वृद्धान्दशार्धवयसो विदितात्मतत्त्वान्॥ वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ॥३०॥ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्याम्॥ ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः॥३१॥ मुनय ऊचुः॥ को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः॥ तस्मिन्प्रशांतपुरुषे गतविग्रहे वां को वात्मवत्कुहकयोः परिशंकनीयः॥३२॥ न ह्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः॥ पश्यंति यत्र युवयोः सुरलिंगिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य॥३३॥तद्धाममुष्य परमस्य विकुंठभर्तुः कर्तुं प्रकृष्टमिह धीमहि मंदधीभ्याम्॥ लोकानितो व्रजतमंतरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र॥३४॥तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः॥ सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण॥३५॥भूयादघोनि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेलनमप्यशेषम्॥मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोऽधः॥३६॥एवं तदैव भगवानरविंदनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः॥ तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः ३७

कादौ राजद्वारपालानां कश्चिद्विरुद्धः पुरुषोंऽतः प्रविश्य महाराजस्योदरं भेत्स्यतीति भयं भवति। तथेह भगवद्वसतावपि हरेस्तादृग्भयं येन कारणेन युवयोरुत्पादितं तत्किं न किमपि॥३३॥ अथाप्यस्माद्धेतोर्भवंताविह वस्तुं नार्हौ। यत्रेमे कामक्रोधलोभाः संति तं लोकं युवां गच्छतम्॥३४॥ इति तेषां भाषणरूपमनिवारं ब्रह्मशापं श्रुत्वा हरेः सेवकावपि तौ द्वौ नितरां भीतौ। ततस्तेषां पादग्रहणं कुर्वंतौ संतौ दंडवत्पेततुरूचतुश्च॥३५॥ हे मुनीश्वराः, भवद्भिरावयोरुचितो दंडः कृतः। स मूढयोनीर्व्रजतोरप्यावयोर्भगवत्स्मृतिनाशको माभूत्॥३६॥एवं स्वपार्षदैर्महत्सु कृतमपराधं ज्ञात्वा तदैव भगवाँल्लक्ष्म्या सह त्वरया तत्र ययौ ३७

---

१ कैश्चित्प्रवेष्टव्यं कैश्चिन्नेत्येवंभूतः।

तदा ते सनकादयः पश्चात् स्वकीयसेवकैर्यस्य छत्रचामरादिकं गमनयोग्यं साहित्यमानीय दत्तं तं त्वरयाऽऽगतं श्रीहरिं ददृशुः ॥३८॥ कथंभूतं हरिम् । द्वारपालयोः सनकादीनां च प्रसादे सुमुखं प्रेमकटाक्षेण हृदि सुखयंतम्॥ ३९ ॥ पीतांबरकांचीवनमालाधरं गरुडस्कंधे स्थापितहस्तं इतरेण हस्तेन कमलं भ्रामयंतम् ॥४०॥ किरीटकुंडलहारकौस्तुभधरम् ॥४१॥ किंच । अहमेव सर्वसौंदर्यनिधिरिति लक्ष्म्या गर्वोऽपि यस्मिन् भगवत्स्वरूपेऽस्तं गत इति भृत्यैः स्वमनसि तर्कितम्। एवमतिसुंदरं श्रीविष्णुं दृष्ट्वा मुनयः शिरोभिर्मुदा नमश्चक्रुः॥४२॥ तदा हरिचरणारविंदयोस्तुलसीसुगंधवायुर्नासिकाच्छिद्रेणांतः प्रविश्य ब्रह्मानंदसे-

तं त्वागतं प्रतिहृतौपयिकं स्वपुंभिस्तेऽचक्षताक्षविषयं स्वसमाधिभाग्यम् ॥ हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकरांबुम् ॥३८॥ कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशंतम् ॥ श्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुभगयंतमिवात्मधिष्ण्यम् ॥३९॥ पीतांशुके पृथुनितंबिनि विस्फुरंत्या कांच्यालिभिर्विरुतया वनमालया च ॥ वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जम् ॥४०॥ विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत्किरीटम् ॥ दोर्दंडषंडविवरे हरता परार्ध्यहारेण कंधरगतेन च कौस्तुभेन ॥४१॥ अत्रोपसृष्टमिति चोत्स्मितमिंदिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यम् ॥ मह्यं भवस्य भवतां च भजंतमंगं नेमुर्निरीक्ष्य न वितृप्तदृशो मुदा कैः ॥ ४२ ॥ तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः ॥ अंतर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥४३॥ ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुंदरतराधरकुंदहासम् ॥ लब्धाशिषः पुनरवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्रयणं निदध्युः ॥४४॥ पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहु मतं नयनाभिरामम् ॥ पौंस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ॥४५॥ कुमारा ऊचुः ॥ योंऽतर्हितो हृदि गतोऽपि दुरात्मनां त्वं सोऽद्यैव नो नयनमूलमनंतराद्धः ॥ यर्ह्येव कर्णविवरेण गुहां गतो नः पित्राऽनुवर्णितरहा भवदुद्भवेन ॥४६॥ तं त्वा विदाम भगवन्परमात्मतत्त्वं सत्वेन संप्रति रतिं रचयंतमेषाम् ॥ यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयो विरागाः ॥४७॥ नात्यंतिकं विगणयंत्यपि ते प्रसादं किंत्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ॥ येंऽग त्वदंघ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ४८ ॥ कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद्यदि नु ते पदयो रमेत ॥ वाचश्च नस्तुलसिवद्यदि तेंऽघ्रिशोभाः पूर्येत ते गुणगणैर्यदि कर्णरंध्रः ॥ ४९ ॥

विनामपि तेषां मुनीनां चित्ते हर्षं देहे रोमांचोद्गमं च चकार ॥ ४३ ॥ ततस्ते भगवतः सुंदरं मुखमुद्वीक्ष्य पुनश्च तस्य चरणद्वयं वीक्ष्य पूर्णमनोरथाः संतः तच्चरणद्वयं ध्यातवंतः ॥४४॥ ततो योगिनां ध्यानविषयभूतमणिमाद्यष्टैश्वर्ययुतं हरिं तुष्टुवुः ॥४५॥ कुमारा ऊचुः ॥ हे अनंत, त्वन्नाभिकमलोद्भूतेन नः पित्रा ब्रह्मणाऽस्माकं यदा त्वं वर्णितोऽसि तदैव नः कर्णमार्गेण बुद्धिं प्राप्तोऽसि। नयनैस्त्वद्यैव दृष्टः ॥४६॥ विरक्ता मुनयः श्रवणादिभक्तियोगैर्हृदि यं विदुस्तं त्वां परमात्मानं विदाम ॥४७॥ ये त्वत्कथारसज्ञास्ते मोक्षाख्यमपि तव प्रसादं नाद्रियंते ॥ ४८ ॥ हे भगवन्, इतः पूर्वमस्माकं दुःखं नाभवत्। इदानीं तु सर्वा-

ण्यपि दुःखानि प्राप्तानि । यतस्त्वद्भक्तौ शप्तौ । अतस्तैः स्वपापैर्निरयेष्वस्माकं जन्म भवतु । तथापि त्वत्प्रसादेन तव चरणध्यानं त्वद्गुणगणानां नित्यं कीर्तनं
श्रवणं च भवत्विति वयं प्रार्थयामहे ॥४९॥ हे विपुलकीर्ते, यदिदं रूपं त्वं प्रकटितवानसि तेनास्माकं दृष्टयः परमानंदं प्राप्ताः । अतस्तुभ्यमिदं नमनं विधेम
॥५०॥ इति श्रीमद्भागवतचू० तृती० पंचदशोऽध्यायः ॥१५॥ ॥ हरिणा सांत्वितैर्विप्रैरनुतप्तैस्तु षोडशे । तयोरसुरभावेऽपि कृतोऽनुग्रह ईर्यते ॥१॥ ब्रह्मोवाच
॥ हे देवाः, इति वदतां मुनीनां वचः प्रतिनंद्य वैकुंठवासी विभुर्जगाद ॥१॥ श्रीभगवानुवाच ॥ एतौ जयविजयौ मत्पार्षदौ मां तुच्छीकृत्य युष्माकमपराधं
कृतवंतौ ॥२॥ भवद्भिरेतयोर्यो दंडः कृतः स एवास्माभिर्मान्यः कृतः ॥३॥ कुतः । ब्राह्मणाः मे परं दैवतं अतो वः प्रसादयामि । द्वारपालैर्यः कृतोऽ-

प्रादुश्चकर्थ यदिदं पुरुहूतरूपं तेनेश निर्वृतिमवापुरलं दृशो नः ॥ तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां दुरुदयो भगवान्प्रतीतः
॥५०॥ इति श्रीम०म०तृती०पंचदशोऽध्यायः॥१५॥ ॥ ब्रह्मोवाच ॥ इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम् ॥ प्रतिनंद्य जगादेदं विकुंठनिलयो
विभुः ॥१॥ श्रीभगवानुवाच ॥ एतौ तौ पार्षदौ मह्यं जयो विजय एव च ॥ कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमम् ॥ २ ॥
यस्त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः ॥ स एवानुमतोऽस्माभिर्मुनयो देवहेलनात् ॥३॥ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे ॥ तद्धीत्यात्मकृतं
मन्ये यत्स्वपुंभिरसत्कृताः ॥ ४ ॥ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि ॥ सोऽसाधुवादस्तत्कीर्तिं हंति त्वचमिवामयः
॥५॥ यस्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः ॥ सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिंद्यां स्वबाहुमपि
वः प्रतिकूलवृत्तिम् ॥ ६ ॥ यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलम् ॥ न श्रीर्विरक्तमपि मां विजहाति यस्याः
प्रेक्षालवार्थ इतरे नियमान्वहंति ॥७॥ नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन ॥ यद्ब्राह्मणस्य मुखतश्चरतोऽनुघासं
तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥ ८ ॥ येषां बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः ॥ विप्रांस्तु
को न विषहेत यदर्हणांभः सद्यः पुनाति सहचंद्रललाम लोकान् ॥९॥ ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि च
भेदबुद्ध्या ॥ द्रक्ष्यंत्यघक्षतदृशो ह्यहिमन्यवस्तान्गृध्रा रुषा मम कुषंत्यधिदंडनेतुः ॥ १० ॥ ये ब्राह्मणान्मयि धिया क्षिपतोऽर्चयंतस्तुष्यद्धृदः
स्मितसुधोक्षितपद्मवक्त्राः ॥ वाण्यानुरागकलयाऽऽत्मजवद्गृणंतः संबोधयंत्यहमिवाहमुपाहृतस्तैः ॥ ११ ॥ ॥

पराधः स मयैव कृत इति मन्ये ॥४॥ किंच । भृत्येनापराधे कृते सति लोकः स्वामिनो नामानि गृह्णाति । यतः सोऽपवादस्तस्य स्वामिनः कीर्तिं हंति ॥ ५ ॥
अहं तु युष्माकमपराधकर्तारं स्वबाहुमपि छिंद्याम् । काऽन्यस्य कथा ॥६॥ ब्राह्मणसेवया पवित्रं विरक्तमपि मां लक्ष्मीर्न त्यजति ॥७॥ अहं यथा क्षरता घृतेन
विलोडितं पायसादि प्रतिग्रासं रसास्वादपूर्वकं भुंजानस्य ब्राह्मणस्य मुखेनाश्नामि तथा यज्ञेऽग्निमुखेन हुतं होमद्रव्यमपि नाश्नामि ॥ ८ ॥ यस्य मम पादोदकं
लोकान् सद्यः पुनाति सोऽहं येषां पादरजः किरीटैर्बिभर्मि । तेषामपराधं कर्तुं कः समर्थः । नकोऽपि ॥९॥ किंच । गावो ब्राह्मणाश्च मे मूर्तयः । अतो ये तान् ‘एते भगवदधिष्ठानं
न भवंतीति’ भेददृष्ट्या पश्यंति तान् मदाज्ञाधारकस्य यमस्य गृध्राकारा दूताश्चंचुभिश्छिंदंति॥१०॥ये ब्राह्मणान् मद्बुद्ध्या पूजयंति तैरहं वशीकृतोऽस्मि ११

इमौ ममाभिप्रायमजानंतौ संतौ युष्मदपराधं कृतवंतौ । इमौ पुनः स्वल्पकालेनैव ममांतिकं यथा प्राप्स्यतस्तथा मयि प्रसादो भवद्भिः क्रियताम् ॥१२॥ ब्रह्मोवाच॥ एवं प्रियां वाणीं निशम्य तेषां मनो नाऽतृप्यत् ॥१३॥ ततस्तां वाणीं विचार्यापि किमस्मानभिनंदति निंदति वेति तत्त्वं न विदुः॥१४॥ ततोऽभिनंदतीति ज्ञात्वा हृष्टा भूत्वा प्रांजलयः संतः प्रोचुः ॥१५॥ ऋषय ऊचुः ॥ हे भगवन्, तव चिकीर्षितं वयं न विद्मः । सर्वेश्वरस्त्वं मयि प्रसादः क्रियतामिति प्रभाषसे ॥१६॥ किंच । विप्राणां देवानां च भगवान् आत्मा दैवतं च । स त्वं मे ब्राह्मणाः परं दैवतमिति वदसि । अस्तु॥१७॥ अहो धर्मस्तेऽवतारै रक्ष्यते ॥१८॥ योगिनो यदनुग्रहात्सद्यो मृत्युं तरंति स भगवान् परैरनुगृह्येतेति किंस्वित् । न किंचिदित्यर्थः॥१९॥ किंच। अर्थिनो यस्याः पादरेणुं शिरसा दधते सा लक्ष्मीः

तन्मे स्वभर्तुरवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः॥भूयो ममांतिकमितां तदनुग्रहो मे यत्कल्पतामचिरतो भृतयोर्विवासः॥१२॥ ब्रह्मोवाच ॥ अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीम् ॥ नास्वाद्य मन्युदष्टानां तेषामात्माप्यतृप्यत॥१३॥ सतीं व्यादाय शृण्वंतो लघ्वीं गुर्वर्थगह्वराम् ॥ विगाह्यागाधगंभीरां न विदुस्तच्चिकीर्षितम् ॥१४॥ ते योगमाययारब्धपारमेष्ठ्यमहोदयम्॥प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुभितत्वचः ॥१५॥ ऋषय ऊचुः ॥ न वयं भगवन्विद्मस्तव देव चिकीर्षितम्॥कृतो मेऽनुग्रहश्चेति यदध्यक्षः प्रभाषसे॥१६॥ ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो ॥ विप्राणां देवदेवानां भगवानात्मदैवतम् ॥ १७॥ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव ॥ धर्मस्य परमो गुह्यो निर्विकारो भवान्मतः ॥१८॥ तरंति ह्यंजसा मृत्युं निवृत्ता यदनुग्रहात् ॥ योगिनः स भवान्किंस्विदनुगृह्येत यत्परैः ॥१९॥ यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः ॥ धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना ॥२०॥ यस्तां विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतप्रसंगः ॥ स त्वं द्विजानुपथपुण्यरजःपुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वम् ॥२१॥ धर्मस्य ते भगवतस्त्रियुगस्त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थम् ॥ नूनं भृतं तदभिघाति रजस्तमश्च सत्वेन नो वरदया तनुवा निरस्य ॥२२॥ न त्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन॥ तर्ह्येव नंक्ष्यति शिवस्तव देव पंथा लोकोऽग्रहीष्यदृषभस्य हि तत्प्रमाणम् ॥२३॥ तत्तेऽनभीष्टमिव सत्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः ॥ नैतावता त्र्यधिपतेर्बत विश्वभर्तुस्तेजः क्षतं त्ववनतस्य स ते विनोदः॥२४॥ यं वानयोर्दममधीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकम् ॥ अस्मासु वा य उचितो ध्रियतां सं दंडो येऽनागसौ वयमयुंक्ष्महि किल्बिषेण ॥२५॥

प्रतिक्षणं त्वदंघ्रिं सेवते ॥२०॥ शुद्धभावैः सेवमानामपि तां लक्ष्मीं यस्त्वं नातीवाद्रियसे तस्य तव ब्राह्मणपादरजसैश्वर्यमहं प्राप्त इति यद्भाषणं तल्लोकसंग्रहमात्रम् ॥२१॥ हे षड्गुणैश्वर्यसंपन्न, धर्मरूपस्य तव तपःशौचदयारूपैस्त्रिभिश्चरणैर्द्विजानां देवानां च प्रयोजनार्थमिदं चराचरं जगत्पालितम् ॥२२॥ हे देव, यदा द्विजकुलं त्वं न रक्षिता तदा वेदमार्गो नाशं यास्यति॥२३॥ हे ईश, धर्मरक्षणार्थं ब्राह्मणानां नमनं कृतवतस्तव प्रभावो न क्षीयते । यतः स नमनादिस्तव विनोदोऽस्ति ॥२४॥ किंच । अस्माभिरनयोर्दंडः कृतः स भवताऽनुमंतव्यः अधिका जीविका वा दातव्या । अथवा यतो निरपराधावेतौ प्रति वयं शापेन योजि-

तवंतस्ततस्तं शापं दूरीकर्तुमस्मासु योग्यो दंडः क्रियताम्। तत्सर्वं वयमनुमन्यामहे॥२५॥ श्रीभगवानुवाच॥ एतौ सद्यो दैत्ययोनिं प्राप्य क्रोधसमाधिना मयि बद्धवैरौ
संतौ भूयो जन्मत्रयेण मत्समीपं शीघ्रमेष्यतः। हे विप्राः, अयं शापो मयैव निर्मित इति जानीत॥२६॥ ब्रह्मोवाच। अथ ते मुनयो वैकुंठलोकं हरिं च दृष्ट्वा॥२७॥ भगवंतं
परिक्रम्य प्रणम्य च वैष्णवीं श्रियं प्रशसंतः संतः प्रतिजग्मुः॥२८॥ततो भगवान् स्वपार्षदौ प्राह। हे जयविजयौ, माभैष्टम्। युवां कल्याणमस्तु॥२९॥(एकदा मयि शयिते
सति अंतः प्रविशंत्या लक्ष्म्या द्वारे युवाभ्यां प्रतिबंधः कृतः। तदा क्रुद्धया तयैतद्ब्राह्मणैरुक्तं निर्दिष्टमस्ति॥३०॥) युवां मयि वैरयोगेन ब्रह्मशापं निस्तीर्य मे समीपं
स्वल्पकालेन प्रत्येष्यथः॥३१॥इति तावादिश्य हरिरतिशयेन शोभायुक्तं स्वगृहं प्रविवेश॥३२॥ततस्तौ ब्रह्मशापाद्धतश्रियौ नष्टगर्वौ च बभूवतुः॥३३॥ तदा वैकुंठात्

॥ श्रीभगवानुवाच ॥ एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ ॥ भूयः सकाशमुपयास्यत आशु यो वः
शापो मयैव निमितस्तदवैत विप्राः ॥ २६ ॥ ब्रह्मोवाच ॥ अथ ते मुनयो दृष्ट्वा नयनानंदभाजनम् ॥ वैकुंठं तदधिष्ठानं विकुंठं च
स्वयंप्रभम् ॥२७॥ भगवंतं परिक्रम्य प्रणिपत्यानुमान्य च ॥ प्रतिजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियम् ॥ २८ ॥ भगवाननुगावाह
यातं मा भैष्टमस्तु शम् ॥ ब्रह्मतेजः समर्थोऽपि हंतुं नेच्छे मतं तु मे ॥२९॥(एतत्पुरैव निर्दिष्टं रमया क्रुद्धया यदा॥पुरापवारिता
द्वारि विशंती मय्युपारते ॥३०॥) मयि संरंभयोगेन निस्तीर्य ब्रह्महेलनम् ॥ प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः
॥३१॥ द्वाःस्थावादिश्य भगवान्विमानश्रेणिभूषणम् ॥ सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ॥३२॥ तौ तु गीर्वाणऋषभौ
दुस्तराद्धरिलोकतः ॥ हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ॥ ३३ ॥ तदा विकुंठधिषणात्तयोर्निपतमानयोः ॥ हाहाकारो
महानासीद्विमानाग्र्येषु पुत्रकाः ॥३४॥ तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः ॥ दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणम् ॥ ३५ ॥
तयोरसुरयोरद्य तेजसा यमयोर्हि वः ॥ आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ॥३६॥ विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि
दुरत्यययोगमायः॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः॥३७॥ इति श्रीमद्भागवते
महापुराणे तृतीयस्कंधे षोडशोऽध्यायः ॥ १६ ॥ ॥ मैत्रेय उवाच ॥ निशम्यात्मभुवा गीतं कारणं शंकयोज्झिताः ॥ ततः
सर्वे न्यवर्तंत त्रिदिवाय दिवौकसः ॥१॥ दितिस्तु भर्तुरादेशादपत्यपरिशंकिनी ॥ पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥२॥
उत्पाता बहवस्तत्र निपेतुर्जायमानयोः ॥ दिवि भुव्यंतरिक्षे च लोकस्योरुभयावहाः ॥ ३ ॥ ॥ ॥

सद्यस्तयोः पतमानयोः सतोर्विमानेषु महान् हाहाकारो बभूव॥३४॥ अधुना हे देवाः, तौ जयविजयौ दितेर्जठरे काश्यपं वीर्यं प्राप्तौ स्तः॥३५॥तयोस्तेजसा युष्माकं तेजस्तिरस्कृतम्॥३६॥जगत
उत्पत्तिस्थितिसंहारहेतुर्यो भगवान् स एव वः कल्याणं करिष्यति। तत्रास्माकं विचारेण क उपयोगः? न कोऽपि॥३७॥इति श्रीमद्भा॰चू॰
तृती॰ षोडशोऽध्यायः॥१६॥ ॥ततः सप्तदशे जन्म तयोर्लोकभयंकरम्। हिरण्याक्षप्रभावश्च वर्ण्यते दिग्जयेऽद्भुतः॥१॥ मैत्रेय उवाच ॥ हे विदुर, देवा ब्रह्मवाक्यं
निशम्य शंकारहिताः संतः स्वर्गं ययुः॥१॥ दितिः पूर्णे वर्षशते यमौ पुत्रौ प्रसुषुवे॥२॥तदा तयोर्जायमानयोः सतोर्दिवि भुव्यंतरिक्षे च बहव उत्पाता बभूवुः॥३॥

तानाह । पर्वतैः सह भूप्रदेशाश्चेलुः । दिशो जज्वलुः । केतव उदयं प्रापुः ॥४॥ दुःस्पर्शो वायुर्वृक्षानुन्मूलयन् ववौ ॥५॥ व्योम्नि सतडिन्मेघानां समूहेनाकाशेंऽधकारव्याप्ते सति तमसा कस्यापि स्थलं नादृश्यत ॥६॥ समुद्रः क्षुभितोदरश्चुक्रोश । सवापीकूपाः सरितश्चुक्षुभुः ॥७॥ राहुणा ग्रस्तयोश्चंद्रसूर्ययोर्मुहुः परिवेषा अभूवन् । पर्वतगुहाभ्यो रथनादवन्नादा जज्ञिरे ॥८॥ सृगालोलूकानां शब्दैः सह शिवा मुखतोऽग्निं वमंत्यः सत्यो दुष्टशब्दं चक्रुः ॥९॥ श्वाना इतस्तत ऊर्ध्वमुखै रोदनं चक्रुः ॥१०॥ खरास्तीक्ष्णखुरैर्भूतलं ताडयंतः स्वजातिशब्दं च कुर्वंतः संतः पर्यधावन् ॥११॥ पक्षिणो गर्दभशब्देन भीताः क्रोशंतः संतो नीडादुदपतन् । पशवश्च तच्छब्देन शकृन्मूत्रमकुर्वत ॥१२॥ गावस्त्रसंत्यो रक्तदोहा बभूवुः । देवप्रतिमा व्यरुदन् ॥ १३ ॥ शनिभौमादिक्रूरग्रहा गुरुबुधानतिक्रम्य

सहाचला भुवश्चेलुर्दिशः सर्वाः प्रजज्वलुः॥सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः॥४॥ ववौ वायुः सुदुःस्पर्शः फूत्कारानीरयन्मुहुः॥ उन्मूलयन्नगपतीन्वात्यानीको रजोध्वजः॥५॥ उद्धसत्तडिदंभोदघटया नष्टभागणे॥ व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदम्॥६॥ चुक्रोश विमना वार्धिरुदूर्मिः क्षुभितोदरः॥ सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंकजाः॥७॥मुहुः परिधयोऽभूवन्सराह्वोः शशिसूर्ययोः॥ निर्घाता रथनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे॥८॥ अंतर्ग्रामेषु मुखतो वमन्त्यो वह्निमुल्बणम्॥ सृगालोलूकटंकारैः प्रणेदुरशिवं शिवाः॥९॥ संगीतवद्रोदनवदुन्नमय्य शिरोधराम्॥ व्यमुंचन्विविधा वाचो ग्रामसिंहास्ततस्ततः॥ १०॥ खराश्च कर्कशैः क्षत्तः खुरैर्घ्नंतो धरातलम्॥ खार्काररभसा मत्ताः पर्यधावन्वरूथशः॥११॥ रुदंतो रासभत्रस्ता नीडादुदपतन्खगाः॥ घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत॥ १२॥ गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः॥ व्यरुदन्देवलिंगानि द्रुमाः पेतुर्विनानिलम्॥ १३॥ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः॥ अतिचेरुर्वक्रगत्या युयुधुश्च परस्परम्॥१४॥ दृष्ट्वान्यांश्च महोत्पातानतत्तत्त्वविदः प्रजाः॥ ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवम्॥१५॥ तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ॥ ववृधातेऽश्मसारेण कायेनाद्रिपती इव॥१६॥दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ॥ गां कंपयंतौ चरणैः पदे पदे कट्या सुकांच्यार्कमतीत्य तस्थतुः॥ १७॥ प्रजापतिर्नाम तयोरकार्षीद्यः प्राक्स्वदेहाद्यमयोरजायत॥ तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः॥ १८॥ चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च॥ वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः॥ १९॥ हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहम्॥ गदापाणिर्दिवं यातो युयुत्सुर्मृगयन्रणम्॥२०॥ तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरम्॥ वैजयंत्या स्रजा जुष्टमंसन्यस्तमहागदम्॥२१॥ ॥

जग्मुः । वक्रगत्या युयुधुश्च ॥१४॥ एतानन्यांश्च महोत्पातान् दृष्ट्वा भीताः प्रजा ब्रह्मपुत्रान् विना विश्वप्रलयं मेनिरे ॥ १५ ॥ तावादिदैत्यौ सहसा पूर्वसिद्धं स्वपौरुषं प्रकटयिष्यंतौ लोहवत्कायेन पर्वताविव ववृधाते ॥१६॥ हेमकिरीटाग्रैः स्वर्गं स्पृशंतौ संतौ कट्या सूर्यं समतीत्य तस्थतुः ॥ १७॥ कश्यपस्तयोर्नामकरणं चकार । ज्येष्ठं हिरण्यकशिपुं अनुजं हिरण्याक्षं च प्रजा विदुः ॥१८॥ ततो हिरण्यकशिपुर्ब्रह्मवरेण त्रैलोक्यं वशं चक्रे ॥१९॥ हिरण्याक्षो गदापाणिर्योद्धुमिच्छुः सन् संग्रामस्थानं शोधयन् स्वर्ग गतः ॥२०॥ तदा देवा दुःसहवेगं स्कंधे न्यस्तमहागदम् ॥ २१ ॥ ॥ ॥

अकुतोभयं शौर्यवीर्यबलेन गर्वितं तं दैत्यं दृष्ट्वा भीताः संतो गुप्ता बभूवुः ॥ २२ ॥ तदा हिरण्याक्षः स्वतेजसा गुप्तान् पौरुषहीनान् तान् ज्ञात्वा भृशं व्यनदत् ॥२३॥ ततः स्वर्गान्निवृत्तो जलक्रीडां कर्तुमिच्छन् समुद्रं प्रविवेश ॥२४॥ तं दृष्ट्वा वरुणदूता जलचरा अहन्यमाना अपि तत्तेजसा पराभूताः संतो दूरतरं पलायनं चक्रुः ॥२५॥ जलधौ सोऽनेकवर्षं क्रीडन् गदया तरंगान् ताडयन् विभावरीं नाम वरुणराजधानीं प्राप्तः ॥ २६ ॥ तत्र वरुणं दृष्ट्वा तमुपहसितुं नीचवत्प्रणिपत्योवाच ॥ हे महाधिराज वरुण, त्वं मया सह युद्धं कुरु ॥२७॥ यतस्त्वं पुरा लोके सर्वदैत्यदानवान् विजित्य राजसूययज्ञेन यजनं कृतवान् ॥ २८ ॥ एवं शत्रुणा दृढं वंचितो वरुण उत्पन्नं क्रोधं धिया शमयन् जगाद ॥ हे दैत्य, वयं युद्धात्संप्रति उपरमं प्राप्ताः ॥ २९ ॥ त्वां युद्धे संतुष्टं कर्तुं पुराणपुरुषादन्यं न

मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयम् ॥ भीता निलिल्यिरे देवास्ताक्ष्यंत्रस्ता इवाहयः ॥२२॥ स वै तिरोहितान्दृष्ट्वा महसा स्वेन दैत्यराट् ॥ सेंद्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशम् ॥२३॥ ततो निवृत्तः क्रीडिष्यन्गंभीरं भीमनिःस्वनम् ॥ विजगाहे महासत्वो वार्धिं मत्त इव द्विपः ॥२४॥ तस्मिन्प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियःससाध्वसाः ॥ अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः ॥२५॥ स वर्षपूगानुदधौ महाबलश्चरन्महोर्मीन् श्वसनेरितान्मुहुः ॥ मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः ॥२६॥ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसम् ॥ स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगम् ॥२७॥ त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनाम् ॥ विजित्य लोकेऽखिलदैत्यदानवान्यद्राजसूयेन पुरायजत्प्रभो ॥२८॥ स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपां पतिः ॥ रोषं समुत्थं शमयन्स्वया धिया व्यवोचदंगोपशमं गता वयम् ॥२९॥ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदम् ॥ आराधयिष्यत्यसुर्षभेहितं मनस्विनो यं गृणते भवादृशाः ॥ ३० ॥ तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः ॥ यस्त्वद्विधानामसतां प्रशांतये रूपाणि धत्ते सदनुग्रहेच्छया ॥३१॥ इति श्रीम०म०तृती०हिरण्याक्षदिग्विजये सप्तदशोऽध्यायः ॥१७॥ ॥मैत्रेय उवाच ॥ तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः ॥ हरेर्विदित्वा गतिमंग नारदाद्रसातलं निर्विविशे त्वरान्वितः ॥ १ ॥ ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया ॥ मुष्णंतमक्ष्णा स्वरुचोऽरुणश्रिया जहास चाहो वनगोचरो मृगः ॥२॥ आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता ॥ न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ॥३॥

पश्यामि अतस्त्वंप्रति गच्छ । भवादृशाः शूरा यं स्तुवंति ॥ ३० ॥ हे वीर, तं प्राप्य रणांगणे त्वं श्वभिर्वेष्टितः सन् शयिष्यसे। यस्त्वद्विधानां दुष्टानां नाशाय सतामनुग्रहेच्छया चावतारान् धत्ते ॥३१॥ इति श्रीमद्भागवतचू० तृती० सप्तदशोऽध्यायः ॥ १७ ॥ ॥ अष्टादशे हिरण्याक्षधरोद्धर्तृवराहयोः ॥ निर्विशेषं महायुद्धं देवक्षोभि निरूप्यते ॥१॥ मैत्रेय उवाच ॥ एवं जलेशभाषितं श्रुत्वा तस्य गणनामकृत्वा नारदाद्धरेः स्थितिं विदित्वा त्वरया स रसातलं विवेश ॥१॥ तत्र पृथ्वीं दंष्ट्रयोर्ध्वं नयंतं वराहं दृष्ट्वा अहो वनचरोऽयं मृगो जले दृश्यत इत्युक्त्वोच्चैर्जहास जगाद च ॥२॥ हे सूकराकृते देवाधम[1], ब्रह्मणेयं पृथ्वी रसौक-

---

[1] देवा अधमा यस्मादिति वास्तवोऽर्थः।

सामस्माकमर्पितास्ति । इमां मुंच मुंच । मम पश्यतः सतोऽनया सह त्वं सुखं न यास्यसि ॥ ३ ॥ त्वमस्मत्तो दूरे स्थित्वा असुरान् हंसि अतो गदया त्वां हत्वा सुहृदां शोकाश्रूणि प्रमार्जये ॥४॥ मद्गदया त्वयि संस्थिते[1] सति सर्वे देवा निर्मूला भविष्यंति[2] ॥५॥ स हरिः शत्रोर्दुर्भाषणशस्त्रेण पीड्यमानः सन् दंष्ट्राग्रस्थितां पृथ्वीं भीतां दृष्ट्वा हिरण्याक्षदुर्भाषणानि सहमान एव जलमध्यान्निरगात् ॥ ६ ॥ तदा हिरण्याक्षो जलान्निर्गच्छंतं हरिमनु निर्गतः सन् जगाद । निर्लज्जानां[3] निंदितं किमस्ति? तेषां पलायनमप्ययुक्तं न ॥ ७ ॥ एवमुक्तोऽपि भगवान् सलिलोपरि पृथ्वीं संस्थाप्य स्वकीययाऽऽधारशक्त्या तां स्थिरीचकार । तदा देवैः पुष्पवृष्ट्या पूजितो ब्रह्मणा च स्तुतो बभूव ॥८॥ ततो देवानां भयनिवृत्तये प्रचंडक्रोधो भूत्वा प्रहसंस्तं हिरण्याक्षं बभाषे ॥९॥ श्रीभगवानुवाच ॥ वयं वनगो[4]-

त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंत्यसुरान्परोक्षजित् ॥ त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे सुहृच्छुचः ॥ ४ ॥ त्वयि संस्थिते गदया शीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यम् ॥ बलिं हरंत्यृषयो ये च देवाः स्वयं सर्वे न भविष्यंत्यमूलाः ॥५॥ स तुद्यमानोऽरिदुरुक्ततोमरैर्दंष्ट्राग्रगां गामुपलक्ष्य भीताम् ॥ तोदं मृषन्निरगादंबुमध्याद्ग्राहाहतः सकरेणुर्यथेभः ॥६॥ तं निःसरंतं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः ॥ करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद्गतह्रियां किं त्वसतां विगर्हितम् ॥ ७ ॥ स गामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वम् ॥ अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोऽरेः ॥८॥ परानुषक्तं तपनीयोपकल्पं महागदं कांचनचित्रदंशम् ॥ मर्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ॥९॥ श्रीभगवानुवाच ॥ सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान्मृगये ग्रामसिंहान् ॥ न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णंत्यभद्र ॥१०॥ एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविताස्ते ॥ तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरम् ॥ ११ ॥ त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः ॥ संस्थाप्य चास्मान्प्रमृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः ॥ १२ ॥ मैत्रेय उवाच ॥ सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशम् ॥ आजहारोल्बणं क्रोधं क्रीड्यमानोऽहिराडिव ॥१३॥ सृजन्नमर्षितः श्वासान्मन्युप्रचलितेंद्रियः ॥ आसाद्य तरसा दैत्यो गदयाऽभ्यहनद्धरिम् ॥ १४ ॥ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि ॥ अवंचयत्तिरश्चीनो योगारूढ इवांतकम् ॥ १५ ॥ ॥ ॥

चरा मृगाः[5] सत्यम् । अहं युष्मद्विधान् ग्रामसिंहान् मृगये । हे पाप, मृत्युपाशैर्बद्धस्य तव कत्थनं वीराः न गृह्णंति ॥१०॥ अहो त्वया स्वगदया वयं पलायनं कारिताः । अतोऽसमर्था अपि त्वदग्रे तिष्ठामः । कुतः । बलिना सह वैरं संपाद्य क्व गच्छामः ॥११॥ अतस्त्वं मां संस्थाप्य स्वकानां शोकाश्रूणि शीघ्रं प्रमार्जय । यः स्वयं कृतां प्रतिज्ञां त्यजति सोऽसभ्यो ज्ञेयः ॥१२॥ मैत्रेय उवाच ॥ एवं हरिणा रुषा प्रलब्धः उपहसितश्च हिरण्याक्षः सर्प इव दुःसहं क्रोधं प्राप्तः ॥१३॥ ततः क्रोधेन क्षुभितेंद्रियः सन् गदया हरिं जघान ॥१४॥ भगवांस्तु रिपुणा उरसि विसृष्टं गदाप्रहारं किंचिद्वक्रो भूत्वा वंचयामास ॥ १५ ॥ ॥

---

[1] सुखं स्थिते सति। [2] भविष्यंति किं नैवेत्यर्थः। [3] अस्माकमिति शेषः। [4] जलशायिनः। [5] साधुगवेष्याः।

पुनः स्वां गदां गृहीत्वा मुहुर्मुहुर्भ्रामयंतं दैत्यंप्रति हरिः क्रुद्धः सन्नभ्यधावत् ॥१६॥ स्वगदया च तं दैत्यं दक्षिणस्यां भ्रुकुटौ जघान । तदा दैत्यस्तु हरिगदामप्राप्तामेव स्वगदया जघ्ने ॥१७॥ एवं तौ मिथो जेतुमिच्छया गदाभ्यां जघ्नतुः ॥१८॥ ततो गदायुद्धस्य विचित्रमार्गान् संचरतोस्तयोस्तीक्ष्णगदाप्रहारेण शरीराद्रुधिरं सुस्राव ॥१९॥ एवं महीनिमित्तं द्वेषं कुर्वतोस्तयोर्युद्धं द्रष्टुमृषिभिः सह ब्रह्मा तत्र प्राप्तः ॥२०॥ स ब्रह्मा मदोन्मत्तमतिपराक्रमं दैत्यं दृष्ट्वा आदिसूकरं जगाद ॥२१॥ ब्रह्मोवाच ॥ हे देव, एष दैत्यः त्वच्चरणंप्रति शरणागतानां देवब्राह्मणगवाम् ॥ २२ ॥ अपराधकर्ता भयकर्ता प्राणादिहर्ता मत्तो वरं प्राप्तः सन् प्रतियोद्धारं गवेषयन् कंटक इव लोकान् पर्यटति ॥२३॥ अतो गर्विष्ठं मायाविनं निरंकुशमेनं बालवन्माक्रीड ॥२४॥ एष यावत्संध्यां प्राप्य न वर्धते ताव-

पुनर्गदां स्वामादाय भ्रामयंतमभीक्षणशः ॥ अभ्यधावद्धरिः क्रुद्धः संरंभाद्दष्टदच्छदम् ॥ १६ ॥ ततश्च गदयाऽरातिं दक्षिणस्यां भ्रुवि प्रभुः ॥ आजघ्ने स तु तां सौम्य गदया कोविदोऽहनत् ॥१७॥ एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च ॥ जिगीषया सुसंरब्धावन्योऽन्यमभिजघ्नतुः ॥१८॥ तयोः स्पृधोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्व्योः ॥ विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः ॥१९॥ दैत्यस्य यज्ञावयवस्य मायागृहीतवाराहतनोर्महात्मनः ॥ कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥२०॥ आसन्नशौंडीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम् ॥ विलक्ष्य दैत्यं भगवान्सहस्रणीर्जगाद नारायणमादिसूकरम् ॥ २१ ॥ ब्रह्मोवाच ॥ एष ते देवदेवानामंघ्रिमूलमुपेयुषाम् ॥ विप्राणां सौरभेयीणां भूतानामप्यनागसाम् ॥२२॥ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः ॥ अन्वेषन्नप्रतिरथो लोकानटति कंटकः ॥२३॥ मैनं मायाविनं दृप्तं निरंकुशमसत्तमम् ॥ आक्रीड बालवद्देव यथाऽऽशीविषमुत्थितम् ॥२४॥ न यावदेष वर्धेत स्वां वेलां प्राप्य दारुणः ॥ स्वां देवमायामास्थाय तावज्जह्यघमच्युत ॥२५॥ एषा घोरतमा संध्या लोकच्छंबट्करी प्रभो ॥ उपसर्पति सर्वात्मन्सुराणां जयमावह ॥ २६ ॥ अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात् ॥ शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम् ॥ २७ ॥ दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयम् ॥ विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे हिरण्याक्षवधेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ मैत्रेय उवाच ॥ अवधार्य विरिंचस्य निर्व्यलीकामृतं वचः ॥ प्रहस्य प्रेमगर्भेण तदपांगेन सोऽग्रहीत् ॥१॥ ततः सपत्नं मुखतश्चरंतमकुतोभयम् ॥ जघानोत्पत्य गदया हनावसुरमक्षजः ॥ २ ॥ ॥ ॥

त्त्वमेनं जहि ॥२५॥ हे सर्वात्मन्, एषा लोकनाशकरी संध्या यावन्न समायाति तावत्त्वं देवानां जयं कुरु ॥२६॥ अधुनाभिजिन्नाम मौहूर्तिको योगः किंचिच्छेषोऽस्ति तावन्नः कल्याणार्थमेनं जहि ॥२७॥ त्वयैव शापानुग्रहकाले निर्मितं त्वां मृत्युमेष स्वयमेव प्राप्तः । अत एनं हत्वा लोकान् सुखे स्थापय ॥ २८ ॥ इति श्रीमद्भागवतचू॰ तृती॰ अष्टादशोऽध्यायः ॥१८॥ ॥ ऊनविंशे विरिंचादिप्रार्थितेन महामृधे । वराहेण हिरण्याक्षवधः श्लाघ्योऽनुवर्ण्यते ॥१॥ मैत्रेय उवाच ॥ हरिर्ब्रह्मणो निष्कपटं भाषणं श्रुत्वा प्रहस्य कटाक्षेण ब्रह्माणं विलोक्य तद्वचो जग्राह ॥१॥ ततोऽग्रे स्थितं दैत्यं हरिर्गदया हनौ जघान ॥ २ ॥ ॥

तदा हिरण्याक्षेण स्वगदया ताडिता भगवद्गदा हस्तात्पपात। तदद्भुतमिवाभवत् ॥३॥ तदा प्राप्ताकाशोऽपि स दैत्यो युद्धे धर्मं मानयन् निरायुधं हरिं न प्राहरत् ॥४॥ हस्ताद्गदायां पतितायां सत्यां हाहाकारो बभूव । ततो भगवान् तस्य धर्मं मानयामास स्वचक्रं च सस्मार ॥५॥ तदा भगवत्प्रभावमजानतामाकाशचारिणां देवानां वाचस्ते कल्याणमस्तु त्वं दैत्यं जहीति बभूवुः ॥६॥ स दैत्यो धृतचक्रमग्रे स्थितं हरिं दृष्ट्वा क्रोधेन श्वसन्नधरोष्ठमदशत् ॥ ७ ॥ ततश्चक्षुर्भ्यां दहन्निव पश्यन् सन् हतोऽसीत्युक्त्वा गदया हरिं जघान ॥८॥ तदा शत्रोः पश्यतः सतो भगवान् तां गदां वामपादेन प्राहरत् ॥ ९ ॥ आह च । हे दैत्य, यतस्त्वं जेतुमिच्छसि तत आयुधं गृहाण । इत्युक्तो दैत्यो भूयो हरिं गदया प्रहृत्य सिंहनादं चकार ॥ १० ॥ भगवानापतंतीं तां गदां वीक्ष्य लीलया जग्राह

सा हता तेन गदया विहता भगवत्करात्॥विघूर्णिताऽपतद्रेजे तदद्भुतमिवाभवत्॥३॥स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम्॥मानयन्स
मृधे धर्मं विष्वक्सेनं प्रकोपयन्॥४॥गदायामपविद्धायां हाहाकारे विनिर्गते॥मानयामास तद्धर्मं सुनाभं चास्मरद्विभुः॥५॥तं व्यग्रचक्रं दितिपुत्राधमेन
स्वपार्षदमुख्येन विषज्जमानम्॥चित्रा वाचोऽतद्विदां खेचराणां तत्रास्मासन्स्वस्ति तेऽमुं जहीति॥६॥स तं निशाम्यात्तरथांगमग्रतो
व्यवस्थितं पद्मपलाशलोचनम्॥विलोक्य चामर्षपरिप्लुतेंद्रियो रुषा स्वदंतच्छदमादशच्छ्वसन्॥७॥करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव
॥अभिप्लुत्य स्वगदया हतोऽसीत्याहनद्धरिम् ॥८॥ पदा सव्येन तां साधो भगवान्यज्ञसूकरः॥ लीलया मिषतः शत्रोः प्राहरद्वातरंहसम्
॥९॥ आह चायुधमाधत्स्व घटस्व त्वं जिगीषसि ॥ इत्युक्तः स तदा भूयस्ताडयन्व्यनदद्भृशम् ॥ १० ॥ तां स आपततीं वीक्ष्य भगवान्समवस्थितः
॥ जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥११॥ स्वपौरुषे प्रतिहते हतमानो महासुरः॥ नैच्छद्गदां दीयमानां हरिणा विगतप्रभः
॥१२॥जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपम्॥यज्ञाय धृतरूपाय विप्रायाभिचरन्यथा॥१३॥तदोजसा दैत्यमहाभटार्पितं चकासदंतःख
उदीर्णदीधिति॥ चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झितम्॥१४॥वृक्णे स्वशूले बहुधाऽरिणा हरेः प्रत्येत्य विस्तीर्णमुरो
विभूतिमत् ॥ प्रवृद्धरोषः स कठोरमुष्टिना नदन्प्रहृत्यांतरधीयतासुरः॥१५॥ तेनेत्थमाहतः क्षत्तर्भगवानादिसूकरः॥ नाकंपत मनाक् क्वापि
स्रजा हत इव द्विपः॥१६॥ अथोरुधा सृजन्मायां योगमायेश्वरे हरौ॥ यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमम् ॥१७॥ प्रववुर्वायवश्चंडास्तमः
पांसवमैरयन्॥दिग्भ्यो निपेतुर्ग्रावाणःक्षेपणैः प्रहिता इव॥१८॥द्यौर्नष्टभगणाऽभ्रौघैः सविद्युत्स्तनयित्नुभिः॥ वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि
चासकृत् ॥१९॥ गिरयः प्रत्यदृश्यंत नानायुधमुचोऽनघ॥ दिग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्धजाः ॥२०॥ ॥

॥११॥ एवं स्वपौरुषे नष्टे दैत्यो हरिणा दीयमानां गदां नैच्छत् ॥१२॥ ततस्त्रिशिखं शूलं हरिंप्रति चिक्षेप ॥१३॥ तदा हरिराकाशे प्रकाशमानं तच्छूलं स्वचक्रेण चिच्छेद ॥१४॥ पुनर्दैत्यः क्रुद्धः सन् दृढमुष्टिना हरेर्वक्षःस्थलं प्रताड्यांतरधीयत ॥१५॥ तेन प्रहारेण भगवानीषदपि नाकंपत ॥१६॥ अथ दैत्यो योगमायेश्वरे हरावुरुधा मायां ससर्ज । यां दृष्ट्वा लोकाः प्रलयं मेनिरे ॥१७॥ प्रचंडा वायवो ववुः दिग्भ्यो ग्रावाणः पेतुः ॥१८॥ मेघसमूहैराच्छादितनक्षत्रगणमाकाशमासीत् । मेघाः पूयकेशरक्तविष्ठामूत्रास्थीनि ववृषुः ॥१९॥ नानायुधानि मुंचंतो गिरयस्तथा नग्ना राक्षस्यश्च व्यदृश्यंत ॥ २० ॥ ॥

तथा यक्षराक्षसैश्छिंधि भिंधि मारयेत्येवंरूपा वाच उत्सृष्टाः ॥२१॥ तदा भगवान् सुदर्शनास्त्रेण ताः सर्वा माया अनाशयत् ॥२२॥ तदा दितेर्हृदये कंपो बभूव। स्तनाच्च रक्तं प्रसुस्रुवे॥२३॥दैत्यः स्वमायासु नष्टासु सतीषु पुनः केशवं प्राप्य मुष्टिभिर्जघान। तदा भगवान् स्वमुष्टिना तस्य कर्णमूले जघान ॥२४॥२५॥ एवं विश्वजिता भगवता ताडितः स दैत्यो मरणकाले भ्रमच्छरीरो बहिर्निर्गतनेत्रो विशीर्णबाहुचरणशिरोरुहो भूत्वा भूमौ पपात ॥२६॥ तदा ब्रह्मादयो देवास्तत्रैत्य भूमौ पतितं तं दैत्यं वीक्ष्य शशंसुः। अहो इमं मृत्युं को लभेत न कोऽपि ॥२७॥ अहो अस्य दैत्यस्य भाग्यं किं वर्णनीयम्। यं योगिनो योगसमाधिना ध्यायंति तस्य भगवतो मुखं प्रपश्यन्नयं दैत्यस्तनुं विससर्ज ॥२८॥ एतौ भगवत्पार्षदौ ब्रह्मशापादसद्गतिं प्राप्तौ । पुनस्त्रिभिर्जन्मभिः स्वस्थानं प्रपत्स्येते ॥ २९ ॥ देवा

बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुंजरैः॥आततायिभिरुत्सृष्टा हिंस्रा वाचोऽतिवैशसाः॥२१॥प्रादुष्कृतानां मायानामासुरीणां विनाशयत्॥ सुदर्शनास्त्रं भगवान्प्रायुंक्त दयितं त्रिपात्॥ २२ ॥ तदा दितेः समभवत्सहसा हृदि वेपथुः॥ स्मरंत्या भर्तुरादेशं स्तनाच्चासृक् प्रसुस्रुवे ॥२३॥ विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवम्॥ रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः॥ २४ ॥ तं मुष्टिभिर्विनिघ्नंतं वज्रसारैरधोक्षजः॥ करेण कर्णमूलेऽहन्यथा त्वाष्ट्रं मरुत्पतिः ॥२५॥ स आहतो विश्वजिता ह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचनः॥ विशीर्णबाह्वंघ्रिशिरोरुहोऽपतद्यथा नगेंद्रो लुलितो नभस्वता॥ २६ ॥ क्षितौ शयानं तमकुंठवर्चसं करालदंष्ट्रं परिदष्टदच्छदम्॥ अजादयो वीक्ष्य शशंसुरागता अहो इमां को नु लभेत संस्थितिम् ॥२७॥ यं योगिनो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षया॥ तस्यैष दैत्यापसदः पदाऽऽहतो मुखं प्रपश्यंस्तनुमुत्ससर्ज ह ॥२८॥ एतौ तौ पार्षदावस्य शापाद्यातावसद्गतिम्॥ पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः ॥२९॥ देवा ऊचुः ॥ नमो नमस्तेऽखिलयज्ञतंतवे स्थितौ गृहीतामलसत्वमूर्तये॥ दिष्ट्या हतोऽयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश निर्वृताः ॥३०॥ मैत्रेय उवाच ॥ एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरिरादिसूकरः॥ जगाम लोकं स्वमखंडितोत्सवं समीडितः पुष्करविष्टरादिभिः ॥३१॥ मया यथानूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितम्॥ यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः॥ ३२ ॥ सूत उवाच ॥ इति कौषारवाख्यातामाश्रुत्य भगवत्कथाम्॥ क्षत्ताऽऽनंदं परं लेभे महाभागवतो द्विज ॥३३॥ अन्येषां पुण्यश्लोकानामुद्दामयशसां सताम्॥ उपश्रुत्य भवेन्मोदः श्रीवत्सांकस्य किं पुनः ॥३४॥ यो गजेंद्रं झषग्रस्तं ध्यायंतं चरणांबुजम्॥ क्रोशंतीनां करेणूनां कृच्छ्रतोऽमोचयद्द्रुतम्॥ ३५॥ ॥

ऊचुः॥ हे हरे, सर्वयज्ञानां विस्ताररूपिणे ते नमः। जगतां मर्मभेदकोऽयं दैत्यो हतः। त्वच्चरणभक्त्या च वयमानंदं प्राप्ताः। एतत्समीचीनं जातम्॥ ३०॥ मैत्रेय उवाच॥ एवमादिवराहोऽसह्यपराक्रमं हिरण्याक्षं हत्वा ब्रह्मादिभिः संस्तुतः सन् अंतर्धानं प्राप्तः॥ ३१॥ हे विदुर, हरिर्येन प्रकारेण हिरण्याक्षं जघान तादृशं तस्य चरित्रं मया ते कथितम् ॥३२॥ सूत उवाच। हे शौनक, मैत्रेयेण कथितामेतां भगवत्कथां श्रुत्वा महाभागवतो विदुर आनंदं लेभे॥३३॥ अन्येषां भक्तानां कथां श्रुत्वा हर्षो भवेत्किं पुनरीश्वरस्य ॥३४॥ यो ग्राहग्रस्तं गजेंद्रं दुःखतो मोचयामास॥ ३५॥ ॥ ॥

तं सुखाराध्यं कृतज्ञः को न सेवेत सर्वोऽपि सेवेतैव ॥३६॥ इदमाख्यानं यः श्रृणोति श्रावयेद्वा स ब्रह्मवधादपि मुच्यते ॥ ३७॥ एतन्महापुण्यं धनप्रदं कीर्तिकरमाख्यानं श्रृण्वतां पुंसामंतकाले नारायणः स्वस्वरूपप्राप्तिं ददाति ॥३८॥ इति श्रीमद्भागवतचू० तृती० एकोनविंशोऽध्यायः ॥१९॥ ॥ विंशे वराहजन्मादिव्यवधानादथादितः । सर्गोऽनुस्मार्यते वक्तुमन्वयं प्रस्तुतं मनोः ॥१॥ शौनक उवाच ॥ हे सूत, स्वायंभुवो मनुर्महीं स्थानं प्राप्य प्राणिनः कैरुपायैः सृष्टवान् ॥१॥ महाभागवतो विदुरः कृष्णस्य निःसीमप्रेमयुक्तो मित्रः ॥२॥ माहात्म्ये वेदव्यासादन्यूनः । यतः सर्वात्मना श्रीकृष्णमाश्रितः ॥३॥ एवंविधो विदुरो गंगाद्वारे स्थितं मैत्रेयं किं पप्रच्छ ॥४॥ तयोः संवदतोः सतोः प्रवृत्ता या हरिकथास्ता नः कीर्तय ॥५॥ रसज्ञो हरिलीलामृतं पिंबन् कोऽनु तृप्येत न कोऽपि ॥६॥

तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः॥कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः॥३६॥ यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं कारणसूकरात्मनः॥ शृणोति गायत्यनुमोदतेंऽजसा विमुच्यते ब्रह्मवधादपि द्विजाः॥३७॥ एतन्महापुण्यमलं पवित्रं धन्यं यशस्यं पदमायुराशिषाम्॥ प्राणेंद्रियाणां युधि शौर्यवर्धनं नारायणोंऽते गतिरंग शृण्वताम्॥३८॥ इति श्रीम० म० तृ० हिरण्याक्षवधो नाम एकोनविंशोऽध्यायः ॥१९॥ ॥ शौनक उवाच ॥ महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः॥ कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनाम् ॥१॥ क्षत्ता महाभागवतः कृष्णस्यैकांतिकः सुहृत्॥ यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति॥ २॥ द्वैपायनादनवरो महित्वे तस्य देहजः॥ सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः॥३॥ किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया॥ उपगम्य कुशावर्त आसीनं तत्त्ववित्तमम्॥ ४॥ तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः॥ आपो गांगा इवाघघ्नीर्हरेः पादांबुजाश्रयाः॥५॥ता नः कीर्तय भद्रं ते कीर्तन्योदारकर्मणः॥ रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन्॥६॥ एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः॥ भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति॥७॥ सूत उवाच॥ हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात् ॥ लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो मुनिमाह भारतः ॥८॥ विदुर उवाच॥ प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन्॥ किमारभत मे ब्रह्मन्प्रब्रूह्यव्यक्तमार्गवित्॥ ९॥ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः॥ ते वै ब्रह्मण आदेशात्कथमेतदभावयन्॥१०॥ सद्वितीयाः किमसृजन्स्वतंत्रा उत कर्मसु ॥ आहोस्वित्संहताः सर्व इदं स्म समकल्पयन् ॥११॥ मैत्रेय उवाच ॥ दैवेन दुर्वितर्क्येण परेणानिमिषेण च ॥ जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ॥१२॥ रजःप्रधानान्महतस्त्रिलिंगो दैवचोदितात् ॥ जातः ससर्ज भूतादिर्वियदादीनि पंचशः ॥ १३ ॥ ॥

एवं शौनकादिभिः पृष्टः सूतस्तान् प्रोवाच ॥७॥ सूत उवाच ॥ हे ऋषयः, आदिवराहस्य चरितं श्रुत्वा जातहर्षो विदुरः पुनर्मैत्रेयं प्राह ॥ ८ ॥ विदुर उवाच ॥ ब्रह्मा प्रजासर्गे मरीच्यादीन् प्रजापतीन् सृष्ट्वाऽग्रे किमारभत ॥ ९ ॥ किंच । ये मरीच्यादयो ऋषयः स्वायंभुवो मनुश्च ते एतज्जगत्कथमुत्पादयामासुः ॥१०॥ ते भार्यासहिता भार्यारहिता वा तथा सर्वे एकत्र मिलिता अमिलिता वा इदमुत्पादयामासुः ॥११॥ मैत्रेय उवाच ॥ भगवतः सकाशाज्जातक्षोभं यत्प्रधानं तस्मान्महत्तत्वमासीत् ॥१२॥ तस्मात्सत्वरजस्तमात्मकोऽहंकारो जातः । स पंचमहाभूतादीनि पंचविंशतितत्वानि ससर्ज ॥ १३ ॥ ॥ ॥

तानि च एकैकशो ब्रह्मांडं स्रष्टुमसमर्थानि संति ततः सर्वाण्येकत्र मिलित्वा ब्रह्मांडं ससृजुः ॥१४॥ तदंडं सहस्रवर्षपर्यंतं जले स्थितम् । तदंडमाश्रित्येश्वरोऽधिष्ठितः॥१५॥तस्य विराड्रूपस्य नाभिकमलाद्ब्रह्माऽभूत् ॥१६॥ स भगवताधिष्ठितः सन् नामरूपादिक्रमेण लोकस्थितिं निर्ममे ॥१७॥ आदौ स्वच्छायया पंचप्रकारामविद्यां ससर्ज ॥१८॥ ततस्तामात्मनस्तनुं तत्याज । सा तनू रात्रिर्बभूव । तां यक्षरक्षांसि जगृहुः॥१९॥ तानि यक्षरक्षांसि क्षुधातृषाभ्यां पीडितानि भूत्वा तं ब्रह्माणं भक्षयितुमभिदुद्रुवुः। तदा केचिदेनं मा रक्षतेत्यूचुरन्ये तु भक्षयतेत्यूचुः॥२०॥ तदा ब्रह्मा भीतः सन् तानाह । हे यक्षरक्षांसि यूयं मे प्रजा जाताः स्थ। अतो मां मा भक्षयत किंतु रक्षत । तत्र ये जक्षध्वमित्यूचुस्ते यक्षाः ये तु मा रक्षतेत्यूचुस्ते राक्षसाः॥२१॥ ततो ब्रह्मा स्वप्रभया देवान् ससर्ज। ततस्तेन त्यक्ता

तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकम् ॥ संहत्य दैवयोगेन हैममंडमवासृजन् ॥ १४ ॥ सोऽशयिष्टाब्धिसलिले आंडकोशो निरात्मकः ॥ साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः ॥१५॥ तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति ॥ सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् ॥१६॥ सोऽनुविष्टो भगवता यः शेते सलिलाशये ॥ लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया ॥ १७॥ ससर्ज छायया विद्यां पंचपर्वाणमग्रतः ॥ तामिस्रमंधतामिस्रं तमो मोहो महातमः ॥१८॥ विससर्जात्मनः कायं नाभिनंदंस्तमोमयम् ॥ जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवाम् ॥ १९ ॥ क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः ॥ मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ॥२०॥ देवस्तानाह संविग्नो मा मां जक्षत रक्षत ॥ अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ ॥२१॥ देवताः प्रभया या या दीव्यन्प्रमुखतोऽसृजत् ॥ ते अहार्षुर्देवयंतो विसृष्टां तां प्रभामहः ॥२२॥ देवोऽदेवान्जघनतः सृजति स्मातिलोलुपान् ॥ त एनं लोलुपतया मैथुनायाभिपेदिरे ॥२३॥ ततो हसन्स भगवानसुरैर्निरपत्रपैः ॥ अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् ॥ २४ ॥ स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिम् ॥ अनुग्रहाय भक्तानामनुरूपात्मदर्शनम् ॥ २५ ॥ पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः ॥ ता इमा यभितुं पापा उपाक्रामंति मां प्रभो ॥ २६ ॥ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः ॥ त्वमेकः क्लेशदस्तेषामनासन्नपदां तव ॥ २७ ॥ सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः ॥ विमुंचात्मतनुं घोरामित्युक्तो विमुमोच ह ॥ २८ ॥ तां क्वणच्चरणांभोजां मदविह्वललोचनाम् ॥ कांचीकलापविलसद्दुकूलच्छन्नरोधसम् ॥ २९॥ अन्योन्याश्लेषयोत्तुंगनिरंतरपयोधराम् ॥ सुनासां सुद्विजां स्निग्धहासलीलावलोकनाम् ॥ ३० ॥ ॥ ॥

सा प्रभा दिवसरूपा जाता । तां देवा जगृहुः ॥२२॥ ब्रह्मा कटिपुरोभागात्स्त्रीलंपटानसुरान् ससर्ज । ते कामातुरा भूत्वा ब्रह्माणंप्रत्येव मैथुनाय प्राप्ताः ॥२३॥ तदा ब्रह्मा भीतः सन्नपलायत ॥२४॥ ततः प्रपन्नार्तिहरं श्रीहरिंप्रति शरणं गत्वोवाच॥२५॥ हे परमात्मन्, अहं तवाज्ञया प्रजा असृजम् । ताः प्रजा मां मैथुनेन धर्षयितुं प्रवृत्ताः ॥२६॥ त्वमेवैको लोकानां क्लेशनाशनोऽसि । अभक्तानां क्लेशदश्चासि ॥२७॥ एवं श्रुत्वा हरिस्तां तनुं त्यजेति ब्रह्माणं जगाद । तदा ब्रह्मा तां तनुं तत्याज ॥२८॥ सा सायंतनी संध्या बभूव । तां क्वणच्चरणकमलां मदविह्वलनेत्राम् ॥ २९ ॥ सुनासां सुदतीं श्रृंगारलीलासूचकावलोकनाम् ॥ ३० ॥

दृष्ट्वा तां स्त्रियं मत्वा सर्वेऽसुरा मुमुहुराहुश्च ॥३१॥ अहो अस्या रूपम् । अहो धैर्यम् । अहो नवं वयः ॥३२॥ एवं बहुप्रकारैर्वितर्कयंतोऽसुराः स्त्रीरूपिणीं तां संध्यां पप्रच्छुः ॥३३॥ हे रंभोरु, त्वं जात्या कासि । कस्य कन्यासि । अत्र ते को वा कार्यभागः ॥३४॥ अस्तु । जातिकुलादिप्रश्नेन किम् । हे अबले, यत्तव दर्शनं जातं तद्भद्रं जातम् । त्वं कंदुकक्रीडयाऽस्माकं मनः क्षोभयसि ॥ ३५ ॥ हे शोभने, तव चरणकमलमेकत्र स्थिरं न भवति । कंदुकक्रीडया तव कृशा कटिः श्रमं प्राप्नोति ॥३६॥ इति मूढबुद्धयोऽसुरास्तां सायंतनीं संध्यां स्त्रियं मत्वा जगृहुः ॥३७॥ ब्रह्मा प्रहस्य कांत्या गंधर्वाप्सरसां गणान् ससर्ज ॥ ३८ ॥ ततस्तेन त्यक्ता तनुश्चंद्रप्रभारूपा बभूव । तां विश्वावसुप्रमुखा गंधर्वा जगृहुः ॥३९॥ ब्रह्मा स्वस्यालस्येन भूतपिशाचान् ससर्ज । ततो नग्नान् मुक्तकेशान् तान्

गूहंतीं व्रीडयात्मानं नीलालकवरूथिनीम् ॥ उपलभ्यासुरा धर्मं सर्वे संमुमुहुः स्त्रियम् ॥३१॥ अहो रूपमहो धैर्यमहो अस्या नवं वयः ॥ मध्ये कामयमानानामकामेव विसर्पति ॥३२॥ वितर्कयंतो बहुधा तां संध्यां प्रमदाकृतिम् ॥ अभिसंभाव्य विश्रंभात्पर्यपृच्छन्कुमेधसः ॥३३॥ कासि कस्यासि रंभोरु को वार्थस्तेऽत्र भामिनि ॥ रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ॥ ३४ ॥ या वा काचित्त्वमबले दिष्ट्या संदर्शनं तव ॥ उत्सुनोषीक्षमाणानां कंदुकक्रीडया मनः ॥ ३५ ॥ नैकत्र ते जयति शालिनि पादपद्मं घ्नंत्या मुहुः करतलेन पतत्पतंगम् ॥ मध्यं विषीदति बृहत्स्तनभारभीतं शांतेव दृष्टिरमला सुशिखासमूहः ॥ ३६ ॥ इति सायंतनीं संध्यामसुराः प्रमदायतीम् ॥ प्रलोभयंतीं जगृहुर्मत्वा मूढधियः स्त्रियम् ॥ ३७ ॥ प्रहस्य भावगंभीरं जिघ्रंत्यात्मानमात्मना ॥ कांत्या ससर्ज भगवान्गंधर्वाप्सरसां गणान् ॥३८॥ विससर्ज तनुं तां वै ज्योत्स्नां कांतिमतीं प्रियाम् ॥ त एव चाददुः प्रीत्या विश्वावसुपुरोगमाः ॥३९॥ सृष्ट्वा भूतपिशाचांश्च भगवानात्मतंद्रिणा ॥ दिग्वाससो मुक्तकेशान्वीक्ष्य चामीलयद्दृशौ ॥ ४० ॥ जगृहुस्तद्विसृष्टां तां जृंभणाख्यां तनुं प्रभोः ॥ निद्रामिंद्रियविक्लेदो यया भूतेषु दृश्यते ॥ येनोच्छिष्टान्धर्षयंति तमुन्मादं प्रचक्षते ॥ ४१ ॥ ऊर्जस्वंतं मन्यमान आत्मानं भगवानजः ॥ साध्यान्गणान्पितृगणान्परोक्षेणासृजत्प्रभुः ॥ ४२ ॥ त आत्मसर्गं तं कायं पितरः प्रतिपेदिरे ॥ साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते ॥ ४३ ॥ सिद्धान्विद्याधरांश्चैव तिरोधानेन सोऽसृजत् ॥ तेभ्योऽददात्तमात्मानमंतर्धानाख्यमद्भुतम् ॥४४॥ स किंनरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः ॥ मानयन्नात्मनाऽऽत्मानमात्माभासं विलोकयन् ॥ ४५ ॥ ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना ॥ मिथुनीभूय गायंतस्तमेवोषसि कर्मभिः ॥ ४६ ॥ ॥

वीक्ष्य दृशौ मीलयामास ॥४०॥ तेन त्यक्तां जृंभणाख्यां तनुं ते जगृहुः । यया जनेषु निद्रेंद्रियग्लानता च दृश्यते ॥ ४१ ॥ ब्रह्मा एकदा आत्मानं बलवंतं मन्यमानः सन् अदृश्यरूपेण साध्यान् पितृगणांश्च ससर्ज ॥४२॥ ततस्तेन त्यक्तां तां तनुं साध्याः पितरश्च जगृहुः । यदर्थं कर्मनिपुणा जनाः साध्येभ्यः पितृगणेभ्यश्च श्राद्धादिना हव्यं कव्यं च ददति ॥४३॥ ब्रह्मा अंतर्धानशक्त्या सिद्धान् विद्याधरांश्च ससर्ज । ते ब्रह्मणा त्यक्तां तां तनुं जगृहुः ॥ ४४ ॥ ब्रह्मा प्रतिबिंबेन किन्नरान् किंपुरुषान् ससर्ज ॥४५॥ ते ब्रह्मणा त्यक्तं तद्रूपं जगृहुः । ते किन्नरकिंपुरुषा एकत्र मिलित्वा तं ब्रह्माणमुषसि गायंति ॥ ४६ ॥ ॥

बहुचिंतया शयानो ब्रह्मा क्रोधात्तद्वपुरुत्ससर्ज ॥४७॥ तस्माद्देहाद्ये केशा गलितास्तेऽ[1]हयः सर्पा नागाश्च जाताः॥ ४८॥ अथ ब्रह्मा एकदा आत्मानं कृतकृत्यं मन्यमानो मनसा मनून् ससर्ज ॥४९॥ तेभ्यः स्वां पौरुषीं तनुं ददौ । तदा ते ब्रह्माणं प्रशशंसुः ॥५० ॥ हे ब्रह्मन्, त्वया सुकृतं कृतं बत । अस्मिन् मनुसर्गे अग्निहोत्रादिकाः क्रियाः सुप्रतिष्ठिताः संति । अतो देवैः सह वयमन्नं भक्षयामहे॥५१॥ एकदा ब्रह्मा तपोयोगसमाधिभिर्ऋषीन् ससर्ज ॥५२॥ तेभ्य एकैकशः समाधियोगतपोज्ञानवैराग्यादियुक्तं स्वदेहस्यांशं ददौ ॥५३॥ इति श्रीमद्भागवतचूर्णिकायां तृती० विंशतितमोऽध्यायः ॥ २० ॥ ॥ एकविंशे तपोविद्यातोषितेन तु विष्णुना । कर्दमस्य मनोः पुत्र्या विवाहघटनोच्यते ॥१॥ विदुर उवाच ॥ स्वायंभुवस्य मनोर्वंशः कथ्यतां यत्र मैथुनेन प्रजा एधिरे ॥१॥ तस्य प्रिय-

देहेन वै भोगवता शयानो बहुचिंतया ॥ सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः ॥४७॥ येऽहीयंतामुतः केशा अहयस्तेंऽग जज्ञिरे ॥ सर्पाः प्रसर्पतः क्रूरा नागा भोगोरुकंधराः ॥४८॥ स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः ॥ तदा मनून्ससर्जांते मनसा लोकभावनान् ॥४९॥ तेभ्यः सोऽत्यसृजत्स्वीयं पुरं पुरुषमात्मवान् ॥ तान्दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम् ॥५०॥ अहो एतज्जगत्स्रष्टः सुकृतं बत ते कृतम् ॥ प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदामहे ॥५१॥ तपसा विद्यया युक्तो योगेन सुसमाधिना ॥ ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ॥५२॥ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः ॥ यत्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ॥५३॥ इति श्रीम०म०तृ०विंशतितमोऽध्यायः॥२०॥ ॥ विदुर उवाच ॥ स्वायंभुवस्य च मनोर्वंशः परमसंमतः॥ कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः॥१॥प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै ॥ यथाधर्मं जुगुपतुः सप्तद्वीपवतीं महीम्॥२॥ तस्य वै दुहिता ब्रह्मन्देवहूतीति विश्रुता ॥ पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ॥३॥ तस्यां स वै महायोगी युक्तायां योगलक्षणैः ॥ ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद॥४॥रुचिर्यो भगवान्ब्रह्मन्दक्षो वा ब्रह्मणः सुतः ॥ यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीम् ॥५॥ मैत्रेय उवाच ॥ प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः ॥ सरस्वत्यां तपस्तेपे सहस्राणां समा दश ॥६॥ ततः समाधियुक्तेन क्रियायोगेन कर्दमः ॥ संप्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषम् ॥७॥ तावत्प्रसन्नो भगवान्पुष्कराक्षः कृते युगे ॥ दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥८॥ स तं विरजमर्काभं सितपद्मोत्पलस्रजम् ॥ स्निग्धनीलालकव्रातवक्त्राब्जं विरजोंऽबरम् ॥९॥ किरीटिनं कुंडलिनं शंखचक्रगदाधरम् ॥ श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणम् ॥ १० ॥ ॥

व्रतोत्तानपादौ द्वौ पुत्रौ सप्तद्वीपवतीं पृथ्वीं यथाधर्मं ररक्षतुः ॥२॥ तस्य दुहिता या देवहूतिः सा कर्दमस्य पत्नी त्वयोक्ता ॥३॥ तस्यां स कर्दमः कति पुत्रानुत्पादयामास ॥४॥ आकूत्यां रुचिः प्रसूत्यां च दक्षो यथा सृष्टिं चक्रतुस्तद्वद ॥५॥ मैत्रेय उवाच ॥ ब्रह्मणा प्रजाः सृजेत्युक्तः कर्दमः सरस्वत्यां दशसहस्रवर्षाणि भक्त्या हरिं ध्यायन् तपस्तेपे ॥६॥ ततस्तास्मिंस्तपसि पूजाप्रकारेण भक्तवरदातारं हरिं सिषेवे ॥७॥ तदा भगवान् कृतयुगे प्रसन्नः सन् तस्य प्रत्यक्षो बभूव ॥८॥ कर्दमः सूर्यसदृशं विरजोंबरम् ॥ ९ ॥ किरीटिनं कुंडलिनं शंखचक्रगदाधरम् ॥ १० ॥ ॥ ॥

---

[1] सविषनिर्विषादिभेदेनाहिसर्पादिभेदा ज्ञातव्याः।

विन्यस्तचरणांभोजमंसदेशे गरुत्मतः ॥ दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकंधरम् ॥११॥ जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः ॥ गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृतांजलिः ॥१२॥ ऋषिरुवाच ॥ जुष्टं बताद्याखिलसत्त्वराशेः सांसिध्यमक्ष्णोस्तव दर्शनान्नः ॥ यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो रूढयोगाः ॥ १३ ॥ ये मायया ते हतमेधसस्त्वत्पादारविंदं भवसिंधुपोतम् ॥ उपासते कामलवाय तेषां रासीश कामान्निरयेऽपि ये स्युः ॥१४॥ तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुम् ॥ उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य ॥१५॥ प्रजापतेस्ते वचसाऽधीश तंत्या लोकः किलायं कामहतो नु बद्धः ॥ अहं च लोकानुगतो वहामि बलिं च शुक्लानिमिषाय तुभ्यम् ॥ १६ ॥ लोकांश्च लोकानुगतान्पशूंश्च हित्वा श्रितास्ते चरणातपत्रम् ॥ परस्परं त्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः ॥१७॥ न तेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व ॥ षण्नेम्यनंतच्छदि यत्त्रिणाभि करालस्रोतो जगदाच्छिद्य धावत् ॥१८॥ एकः स्वयं सन् जगतः सिसृक्षया द्वितीययात्मन्नधियोगमायया ॥ सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवन्स्वशक्तिभिः ॥१९॥ नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मम् ॥ अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः ॥२०॥ तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतंत्रम् ॥ नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षम् ॥२१॥ ऋषिरुवाच ॥ इत्यव्यलीकं प्रणतोऽब्जनाभस्तमाबभाषे वचसाऽमृतेन ॥ सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः ॥२२॥ श्रीभगवानुवाच ॥ विदित्वा तव चैत्यं मे पुरैव समयोजि तत् ॥ यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः ॥२३॥ न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणम् ॥ भवद्विधेष्वतितरां मयि संगृभितात्मनाम् ॥२४॥ प्रजापतिसुतः सम्राण्मनुर्विख्यातमंगलः ॥ ब्रह्मावर्तं योऽधिवसन् शास्ति सप्तार्णवां महीम् ॥२५॥ स चेह विप्र राजर्षिर्महिष्या शतरूपया ॥ आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः ॥ २६ ॥ ॥

गरुडारूढं गगने स्थितं हरिं दृष्ट्वा ॥११॥ प्राप्तमनोरथः कर्दमः क्षितौ मूर्ध्ना नमस्कारं कृत्वा कृतांजलिः सन् तुष्टाव ॥ १२ ॥ कर्दम उवाच ॥ हे भगवन्, तव दर्शनान्मे नयनयोः साफल्यं जातम् ॥१३॥ ये कामसुखार्थं ते चरणारविंदं भजंति ते मूढा एव ॥१४॥ तथाहमपि स्त्रीकामः सन् तव मनोरथपूरकं चरणं नमामि ॥१५॥ हे शुद्धसत्वमूर्ते, अहं ऋणत्रयदूरीकरणार्थं कालरूपिणे तुभ्यं बलिसमर्पणार्थं च भार्यामिच्छामि ॥१६॥ ये विषयासक्तान् लोकाननादृत्य तव चरणरूपं छत्रमाश्रितास्तेषां त्वत्कथामृतं पिबतां देहधर्मरूपं तापत्रयं निवर्तते ॥१७॥ हे ईश, तव यत्कालचक्रं तज्जगदाकृष्य धावदपि त्वद्भक्तानामायुराकृष्य धावन्न भवति ॥१८॥ हे हरे, स्वयं त्वमेक एव योगमाययेदं विश्वं सृजसि पासि हरसि ॥१९॥ हे अधीश, त्वं नो भजतां शब्दादिविषयसुखं तवाप्रियमप्यस्मदनुग्रहाय मायया विस्तारयसि ॥२०॥ तं त्वां सततमहं नमामि ॥२१॥ मैत्रेय उवाच ॥ इति श्रुत्वा भगवान् अमृततुल्यया वाण्या तं बभाषे ॥२२॥ श्रीभगवानुवाच ॥ हे कर्दम, तवेच्छां ज्ञात्वैतत्पुरैव मया योजितमस्ति ॥२३॥ हे प्रजाध्यक्ष, मम पूजनं मृषा न भवति। भवद्विधेषु तु कदापि न भवति ॥२४॥ ब्रह्मपुत्रो मनुर्ब्रह्मावर्ते वसन् सप्तसमुद्रां पृथ्वीं पालयति ॥२५॥ स मनुः शतरूपानाम्न्या भार्यया सह त्वां दिदृक्षुः परश्व इह समायास्यति ॥ २६ ॥ ॥

ततो वयःशीलगुणान्वितां पतिं मृगयंतीं स्वां कन्यां ते दास्यति ॥२७॥ हे ब्रह्मन्, सा राजकन्या दशवर्षसहस्रपर्यंतं यथेच्छं त्वां सेवयिष्यति ॥ २८ ॥ ततस्त्वत्तस्तस्यां नव कन्या भविष्यंति । मरीच्यादिऋषयस्तव कन्यासु पुत्रानुत्पादयिष्यंति ॥२९॥ त्वं च सर्वकर्मफलं मयि समर्प्य मां शरणमेष्यसि॥३०॥किंच। जीवेषु गार्हस्थ्यधर्मेण दयां कृत्वा संन्यासेनाभयं च दत्वा आत्मानं जगता सह मय्येकीभूतं द्रक्ष्यसि ॥३१॥ अहमंशकलया त्वद्वीर्येण तव क्षेत्रे देवहूत्यामवतारं धृत्वा मात्रे तत्वसंहितां कथयिष्ये ॥३२॥ मैत्रेय उवाच ॥ इत्युक्त्वा भगवान् तस्य कर्दमस्य पश्यतः सतो गरुडस्य पक्षैरुच्चारितं साम श्रृण्वन् तस्माद्बिंदुसरसो जगाम ॥३३॥३४॥ अथ कर्दमो बिंदुसरोवरे भगवता परश्व इत्युक्तं कालं प्रतीक्षमाणस्तस्थौ ॥३५॥ मनुः पत्नीकन्याभ्यां सह सुवर्णालंकारभूषितं रथं

आत्मजामसितापांगीं वयःशीलगुणान्विताम् ॥ मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभो ॥२७॥ समाहितं ते हृदयं यत्रेमान्परिवत्सरान् ॥ सा त्वां ब्रह्मन्नृपवधूः काममाशु भजिष्यति ॥२८॥ या त आत्मभृतं वीर्यं नवधा प्रसविष्यति ॥ वीर्ये त्वदीये ऋषय आधास्यंत्यंजसात्मनः ॥२९॥ त्वं च सम्यगनुष्ठाय निदेशं म उशत्तमः ॥ मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे ॥३०॥ कृत्वा दयां च जीवेषु दत्वा चाभयमात्मवान् ॥ मय्यात्मानं सहजगद्रक्ष्यस्यात्मनि चापि माम् ॥३१॥ सहाहं स्वांशकलया त्वद्वीर्येण महामुने ॥ तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्वसंहिताम् ॥३२॥ मैत्रेय उवाच ॥ एवं तमनुभाष्याथ भगवान्प्रत्यगक्षजः ॥ जगाम बिंदुसरसः सरस्वत्या परिश्रितात् ॥३३॥ निरीक्षतस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः ॥ आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितं स्तोममुदीर्णसाम ॥३४॥ अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः ॥ आस्ते स्म बिंदुसरसि तं कालं प्रतिपालयन् ॥३५॥ मनुः स्यंदनमास्थाय शातकौंभपरिच्छदम् ॥ आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीम् ॥३६॥ तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत् ॥ उपायादाश्रमपदं मुनेः शांतव्रतस्य तत् ॥३७॥ यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः ॥ कृपया संपरीतस्य प्रपन्नेऽर्पितया भृशम् ॥३८॥ तद्वै बिंदुसरो नाम सरस्वत्या परिप्लुतम् ॥ पुण्यं शिवामृतजलं महर्षिगणसेवितम् ॥ ३९ ॥ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः ॥ सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियान्वितम् ॥ ४० ॥ मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमम् ॥ मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलम् ॥ ४१ ॥ कदंबचंपकाशोककरंजबकुलासनैः ॥ कुंदमंदारकुटजैश्चूतपोतैरलंकृतम् ॥ ४२ ॥ कारंडवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः ॥ सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥ ४३ ॥ तथैव हरिणैः क्रोडैः श्वाविद्गवयकुंजरैः ॥ गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम् ॥ ४४ ॥ ॥

समास्थाय पृथ्वीं पर्यटन् ॥३६॥ भगवान् यद्दिनमादिशत्तस्मिन् दिने बिंदुसरोवरसमीपे कर्दमस्याश्रमं जगाम ॥३७॥ तमाश्रमं वर्णयति । यस्मिन् भगवतो नेत्रात् कर्दमेऽर्पितया कृपयाऽश्रुबिंदवो न्यपतन् ॥३८॥ तत्सरस्वत्या वेष्टितं बिंदुसरोवरं नाम । तच्च पुण्यद्रुमलताजालैर्युक्तम् । पुण्यामृतजलम् । महर्षिगणसेवितम् ॥३९॥ पुण्यद्रुमादिसमूहैर्युक्तं सर्वर्तुफलपुष्पाढ्यं उन्मत्तपक्षिगणैः शब्दितं मत्तमयूरैः कृतनृत्यसंभ्रमम् ॥ ४० ॥ ४१ ॥ कदंबचंपकाशोकबकुलकुंदमंदाराम्रपनसादिभिर्वृक्षैः समन्वितम् ॥४२॥ कारंडवहंससारसचक्रवाकादिभिः शब्दितम् ॥४३॥ तथा हरिणसूकरशल्लकसिंहमर्कटनकुलादिभिः संवेष्टितम् ॥ ४४ ॥

मनुरेतादृशमाश्रमं सरोवरं च दृष्ट्वा तत्रासीनं मुनिं ददर्श ॥४५॥ तं कीदृशं । चिरं तपः कुर्वाणमपि भगवता स्वनेत्राभ्यामवलोकनान्नातिकृशम् ॥४६॥ प्रांशुं कमलनेत्रं जटाधारिणं वल्कलवाससं मलिनमुग्रतपसा प्रकाशमानं मुनिं दृष्ट्वा मनुस्तत्समीपं जगाम ॥४७॥ अथ कर्दमः पर्णकुटिकायामायांतं पुरः प्रणतं च स्वायंभुवं मनुमाशीर्भिः समभिनंद्य पूजया सत्कृतवान् ॥४८॥ ततो मुनिर्भगवदादेशं स्मरन् मनुं जगाद ॥४९॥ हे देव, तवागमनं सतां संरक्षणायासतां वधाय च भवति । त्वं हरेः पालिनी शक्तिरसि ॥५०॥ यः सूर्यचंद्रेंद्रादीनां रूपाणि धत्ते तस्मै विष्णुरूपाय ते नमः ॥५१॥ त्वं जयप्रदं रथमनारुह्य ॥ ५२॥ महत्या सेनया सह यदा भुवो मंडलं न पर्यटसि ॥५३॥ तदैव वर्णाश्रमधर्माः शीघ्रं दस्युभिर्भिद्येरन् ॥ ५४ ॥ लुब्धैर्मनुष्यैरधर्मश्च वृद्धिं प्राप्येत । त्वयि शयाने सति

प्रविश्य तत्तीर्थवरमादिराजः सहात्मजः ॥ ददर्श मुनिमासीनं तस्मिन्हुतहुताशनम् ॥ ४५ ॥ विद्योतमानं वपुषा तपस्युग्रयुजा चिरम् ॥ नातिक्षामं भगवतः स्निग्धापांगावलोकनात् ॥ तद्व्याहृतामृतकलापीयूषश्रवणेन च ॥ ४६ ॥ प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससम् ॥ उपसंसृत्य मलिनं यथार्हणमसंस्कृतम् ॥ ४७ ॥ अथोटजमुपायातं नृदेवं प्रणतं पुरः ॥ सपर्यया पर्यगृह्णात्प्रतिनंद्यानुरूपया ॥ ४८ ॥ गृहीतार्हणमासीनं संयतं प्रीणयन्मुनिः ॥ स्मरन्भगवदादेशमित्याह श्लक्ष्णया गिरा ॥ ४९ ॥ नूनं चंक्रमणं देव सतां संरक्षणाय ते ॥ वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी ॥ ५० ॥ योऽर्केंद्वग्नींद्रवायूनां यमधर्मप्रचेतसाम् ॥ रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः ॥ ५१॥ न यदा रथमास्थाय जैत्रं मणिगणार्पितम् ॥ विस्फूर्जच्चंडकोदंडो रथेन त्रासयन्नघान् ॥५२॥ स्वसैन्यचरणक्षुण्णं वेपयन्मंडलं भुवः॥ विकर्षन्बृहतीं सेनां पर्यटस्यंशुमानिव ॥५३॥ तदैव सेतवः सर्वे वर्णाश्रमनिबंधनाः ॥ भगवद्रचिता राजन्भिद्येरन्बत दस्युभिः ॥५४॥ अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभिः ॥ शयाने त्वयि लोकोऽयं दस्युग्रस्तो विनंक्ष्यति ॥५५॥ अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः ॥ तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ॥५६॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे एकविंशतितमोऽध्यायः ॥२१॥ ॥ मैत्रेय उवाच ॥ एवमाविष्कृताशेषगुणकर्मोदयो मुनिम् ॥ सव्रीड इव तं सम्राडुपारतमुवाच ह ॥१॥ मनुरुवाच ॥ ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया ॥ छंदोमयस्तपोविद्यायोगयुक्तानलंपटान् ॥२॥ तत्राणायासृजच्चास्मान्दोःसहस्रात्सहस्रपात् ॥ हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ॥३॥ अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः ॥ रक्षति स्माव्ययो देवः स यः सदसदात्मकः ॥ ४ ॥ ॥ ॥

दस्युग्रस्तोऽयं लोको विनंक्ष्यति ॥५५॥ हे वीर, त्वां पृच्छे । त्वं यदर्थमिहागतोऽसि तत्कथ्यतां वयं तद्धर्षेण स्वीकुर्महे ॥५६॥ इति श्रीमद्भागवतचू० तृती० एकविंशोऽध्यायः ॥२१॥ ॥ द्वाविंशे कर्दमायादाद्यथादिष्टं हि विष्णुना । मनुर्दुहितरं देवहूतिमित्युपवर्ण्यते ॥ १ ॥ मैत्रेय उवाच ॥ एवमुक्त्वा विरतं मुनिं सम्राड् मनुरुवाच ॥१॥ मनुरुवाच ॥ हे मुने, ब्रह्मा वेदप्रवर्तनेच्छया तपोविद्यायोगयुक्तान् युष्मान् ब्राह्मणान् स्वमुखतः ससर्ज ॥ २ ॥ तेषां पालनाय बाहुतोऽस्मान् ससर्ज । अतस्तस्य हृदयं ब्राह्मणकुलं शरीरं क्षत्रियकुलमिति वदंति ॥३॥ अतोऽन्योन्यं ब्राह्मणकुलं क्षत्रियकुलं च स सर्वात्मको देव एव रक्षति॥४॥

हे ऋषे, तव दर्शनान्मे सर्वसंशयाश्छिन्नाः । यतस्त्वं रक्षितुमिच्छोर्मे धर्ममात्थ ॥५॥ पवित्रं त्वत्पादरजो मया शिरसा स्पृष्टमेतन्महद्भाग्यम् ॥६॥ हे मुने, त्वया
अनुशासनादिरूपो मदुपरि महाननुग्रहः कृत एतच्च भद्रं जातम् ॥७॥ अतस्त्वं मे दीनस्य विज्ञापनं कृपया श्रोतुमर्हसि ॥ ८ ॥ प्रियव्रतोत्तानपदोः स्वसा इयं
मम कन्या वयःशीलगुणादिभिर्योग्यं पतिमिच्छंती सती ॥९॥ नारदात्तव गुणशीलादीन् श्रुत्वा त्वां वरयितुं कृतनिश्चया जाता ॥१०॥ हे द्विजश्रेष्ठ, मया श्र-
द्धयात्रानीतां गृहस्थाश्रमकर्मसु योग्यां तां त्वं स्वीकुरु ॥११॥ स्वतः प्राप्तस्य प्रत्याख्यानं विरक्तस्यापि नोचितं किं पुनर्विषयासक्तस्य ॥१२॥ यः प्राप्तमनादृत्य
पुनः कृपणंप्रति याचते तस्य यशो मानश्च क्षीयेते ॥ १३ ॥ त्वं च परिणेतुकाम इति मया श्रुतमस्ति । अत एनां गृहाण ॥ १४ ॥ कर्दम उवाच ॥ अहं परि-

तव संदर्शनादेव छिन्ना मे सर्वसंशयाः ॥ यत्स्वयं भगवान्प्रीत्या धर्ममाह रिरक्षिषोः ॥५॥ दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो यो-
ऽकृतात्मनाम् ॥ दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः शिवम् ॥६॥ दिष्ट्या त्वयानुशिष्टोऽहं कृतश्चानुग्रहो महान् ॥ अपावृतैः
कर्णरंध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ॥७॥ स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम ॥ श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ॥८॥ प्रियव्र-
तोत्तानपदोः स्वसेयं दुहिता मम ॥ अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः ॥९॥ यदा तु भवतः शीलश्रुतरूपवयोगुणान् ॥ अश्रृ-
णोन्नारदादेषा त्वय्यासीत्कृतनिश्चया ॥१०॥ तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपहृतां मया ॥ सर्वात्मनानुरूपां ते गृहमेधिषु कर्मसु ॥ ११ ॥
उद्यतस्य हि कामस्य प्रतिवादो न शस्यते ॥ अपि निर्मुक्तसंगस्य कामरक्तस्य किं पुनः ॥१२॥ य उद्यतमनादृत्य कीनाशमभियाचते ॥
क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥१३॥ अहं त्वाश्रृणवं विद्वन्विवाहार्थं समुद्यतम् ॥ अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृ-
हाण मे ॥१४॥ ऋषिरुवाच ॥ बाढमुद्वोढुकामोऽहमप्रत्ता च तवात्मजा ॥ आवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः ॥१५॥ कामः
स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः ॥ क एव ते तनयां नाद्रियेत स्वयैव कांत्या क्षिपतीमिव श्रियम् ॥१६॥
यां हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविह्वलाक्षीम् ॥ विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः ॥१७॥ तां
प्रार्थयंतीं ललनाललाममसेवितश्रीचरणैरदृष्टाम् ॥ वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियाताम् ॥१८॥ अतो भ-
जिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे ॥ अतो धर्मान्पारमहंस्यमुख्यान् शुक्लप्रोक्तान्बहुमन्येऽविहिंस्रान् ॥ १९ ॥
यतोऽभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वावतिष्ठते ॥ प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननंतः ॥ २० ॥ ॥

णेतुकाम इति त्वयोक्तं सत्यम् । अत आवयोरनुरूपो विवाहविधिर्भूयात् ॥१५॥ स्वकीययांगकांत्या भूषणादिशोभां तिरस्कुर्वतीं ते कन्यां को नाद्रियेत ? ॥१६॥
नूपुरशब्दयुक्तयोश्चरणयोर्गतिसहितं राजमंदिरपृष्ठभागे कंदुकक्रीडया विक्रीडतीं यां विलोक्य विश्वावसुनामको गंधर्वो मोहेन विमानात् पपात ॥१७॥ स्त्रीणां
भूषणभूतां स्वयं प्राप्तां तां कन्यां बुधः को नाम नांगीकुर्यात् ॥१८॥ अतो यावत्प्रजोत्पत्तिर्भवेत्तावद्गार्हस्थ्यं स्वीकरिष्ये । ततः पारमहंस्यान् शमदमादिधर्मान्
स्वीकरिष्ये ॥१९॥ किंच । ऋणत्रयदूरीकरणानंतरं मादृशानां संन्यास एव भगवतोक्तः ॥ २० ॥ ॥ ॥

मैत्रेय उवाच ॥ कर्दमो मुनिरेवमुक्त्वा तूष्णीं बभूव । तदा देवहूत्याश्चित्तं मुनेर्मुखं दृष्ट्वा लोभयुक्तं जातम् ॥२१॥ तदा मनुः कन्यायाः पत्न्याश्च निश्चयं ज्ञात्वा गुणगणसंपन्नाय तस्मै कर्दमाय गुणगणयुक्तां कन्यां दत्वा मुमुदे ॥२२॥ तदा राज्ञी शतरूपा तयोर्दंपत्योर्वस्त्रभूषणगृहोपस्कराणि विवाहकाले प्रदेयानि वस्तूनि च ददौ ॥२३॥ मनुर्दत्तां कन्यां बाहुभ्यामालिंग्य वात्सल्यात्क्षुभितांतःकरणो बभूव ॥२४॥ स तस्या वियोगं सोढुमक्षमो हे अंब, हे वत्से, इति ब्रुवन् नेत्रोदकैस्तस्याः केशान् सिषेच ॥२५॥ ततो मुनिमामंत्र्य सभार्यः सहानुगो रथमारुह्य ॥२६॥ सरस्वतीतीरस्थानामृषीणामाश्रमसंपदः पश्यन् स्वपुरं ययौ ॥ २७ ॥ तदा प्रजा आगतं मनुं ज्ञात्वा प्रहर्षिताः सत्यो ब्रह्मावर्ताद्गीतवाद्यैः संमुखं ययुः ॥ २८ ॥ मनुस्तैः सह बर्हिष्मतीं नाम स्वपुरीं जगाम । यत्र शरीरं कंपयतो

मैत्रेय उवाच ॥ स उग्रधन्वन्नियदेवाबभाष आसीच्च तूष्णीमरविंदनाभम् ॥ धियोपगृह्णन्स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः ॥२१॥ सोऽनुज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटम् ॥ तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः ॥२२॥ शतरूपा महाराज्ञी पारिबर्हान्महाधनान् ॥ दंपत्योः पर्यदात्प्रीत्या भूषावासःपरिच्छदान् ॥२३॥ प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः ॥ उपगुह्य च बाहुभ्यामौत्कंठ्योन्मथिताशयः ॥२४॥ अशक्नुवंस्तद्विरहं मुंचन्बाष्पकलां मुहुः ॥ आसिंचदंब वत्सेति नेत्रोदैर्दुहितुः शिखाः ॥२५॥ आमंत्र्य तं मुनिवरमनुज्ञातः सहानुगः ॥ प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः ॥२६॥ उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः ॥ ऋषीणामुपशांतानां पश्यन्नाश्रमसंपदः ॥२७॥ तमायांतमभिप्रेत्य ब्रह्मावर्तात्प्रजाः पतिम् ॥ गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः ॥२८॥ बर्हिष्मतीनाम पुरी सर्वसंपत्समन्विता ॥ न्यपतन्यत्र रोमाणि यज्ञस्यांगं विधुन्वतः ॥ २९ ॥ कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः ॥ ऋषयो यैः पराभाव्य यज्ञघ्नान्यज्ञमीजिरे ॥३०॥ कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः ॥ अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवम् ॥३१॥ बर्हिष्मतीं नाम विभुर्यां निर्विश्य समावसत् ॥ तस्यां प्रविष्टो भवनं तापत्रयविनाशनम् ॥३२॥ सभार्यः सप्रजः कामान्बुभुजेऽन्याविरोधतः ॥ संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः ॥ प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन्हरेः कथाः ॥३३॥ निष्णातं योगमायासु मुनिं स्वायंभुवं मनुम् ॥ यदा भ्रंशयितुं भोगा न शेकुर्भगवत्परम् ॥ ३४ ॥ अयातयामास्तस्यासन्यामाः स्वांतरयापनाः ॥ शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥ ३५ ॥ स एवं स्वांतरं निन्ये युगानामेकसप्ततिम् ॥ वासुदेवप्रसंगेन परिभूतगतित्रयः ॥ ३६ ॥ ॥ ॥

वराहस्य रोमाणि न्यपतन् ॥२९॥ ते केशाः कुशाः काशाश्चासन् । ऋषयो यैर्यज्ञविध्वंसकान् राक्षसादीन् पराभाव्य यज्ञैर्विष्णुमीजिरे ॥३०॥ मनुर्भुवं स्थानं लब्ध्वा कुशकाशमयमासनमास्तीर्य यज्ञपुरुषमयजत् ॥३१॥ स तस्यां पुर्यां प्रविश्य स्वभवनं प्रविष्टः सन् भोगान् बुभुजे ॥३२॥ उषसि सुरगायकैः संकीर्त्यमानोऽपि स्वयं हरेरेव कथाः श्रृण्वन् भोगान् बुभुजे ॥३३॥ ते भोगा ऐच्छिकभोगरचनासु निष्णातं तं मनुं किंचिदपि विषयासक्तं कर्तुं न शेकुः ॥३४॥ विष्णोः कथाः श्रृण्वतो ब्रुवतश्च तस्य कालावयवाः सफला आसन् ॥३५॥ स वासुदेवकथाप्रसंगेन युगानामेकसप्ततिं कालं निन्ये ॥ ३६ ॥ ॥

शारीरमानसादिक्लेशा हरिसंश्रयं जनं न बाधंते ॥३७॥ यो मनुर्ऋषिभिः पृष्टः सन् नानाविधान् धर्मान् प्राह ॥३८॥ तस्यादिराजस्य ते चरितं कथितम् । अथ देवहूत्याः प्रभावं शृणु ॥३९॥ इति श्रीमद्भागवतचू० तृ० द्वाविंशोऽध्यायः ॥२२॥ ॥ त्रयोविंशे तपोयोगनिर्मिते सर्वसंपदि । विमाने कामगे चित्रा तयो रतिरुदीर्यते ॥१॥ मैत्रेय उवाच ॥ सा देवहूतिः पितृभ्यां गमने कृते सति पतिमनोगतं जानती सती आत्मनः शौचेन गौरवेण दमेन शुश्रूषया मधुरवाण्या च पतिं पर्यचरत् ॥१॥२॥ कपटद्वेषलोभादीन् विसृज्य तं पतिं तोषयामास॥३॥ एवं बहुकाले गते सति दैवमप्यन्यथा कर्तुं समर्थः स ऋषिः कृपायुक्तः सन् ॥४॥ बहुकालपर्यंतं सेवाव्रतधर्मेणातिकृशामात्मनोऽनुरूपां तां देवहूतिं जगाद ॥ ५ ॥ हे मानवि, तव शुश्रूषया परमया भक्त्या च तुष्टोऽस्मि । यतो देहिनां

शारीरा मानसा दिव्या वैयासे ये च मानुषाः ॥ भौतिकाश्च कथं क्लेशा बाधंते हरिसंश्रयम् ॥ ३७ ॥ यः पृष्टो मुनिभिः प्राह धर्मान्नानाविधान् शुभान् ॥ नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ॥३८॥ एतत्त आदिराजस्य मनोश्चरितमद्भुतम् ॥ वर्णितं वर्णनीयस्य तदपत्योदयं शृणु॥३९॥इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे द्वाविंशतितमोऽध्यायः॥२२॥ ॥ मैत्रेय उवाच॥ पितृभ्यां प्रस्थिते साध्वी पतिमिंगितकोविदा ॥ नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुम् ॥ १ ॥ विश्रंभेणात्मशौचेन गौरवेण दमेन च ॥ शुश्रूषया सौहृदेन वाचा मधुरया च भो ॥२॥ विसृज्य कामं दंभं च द्वेषं लोभमघं मदम् ॥ अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ॥ ३ ॥ स वै देवर्षिवर्यस्तां मानवीं समनुव्रताम् ॥ दैवाद्गरीयसः पत्युराशासानां महाशिषः ॥ ४ ॥ कालेन भूयसा क्षामां कर्शितां व्रतचर्यया ॥ प्रेमगद्गदया वाचा पीडितः कृपयाब्रवीत् ॥५॥ कर्दम उवाच ॥ तुष्टोऽहमद्य तव मानवि मानदायाः शुश्रूषया परमया परया च भक्त्या ॥ यो देहिनामयमतीव सुहृत्स्वदेहो नावेक्षितः समुचितः क्षपितुं मदर्थे ॥ ६ ॥ ये मे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः ॥ तानेव ते मदनुसेवनयावरुद्धान्दृष्टिं प्रपश्य वितराम्यभयानशोकान् ॥७॥ अन्ये पुनर्भगवतो भ्रुव उद्विजृंभविभ्रंशितार्थरचनाः किमुरुक्रमस्य ॥सिद्धासि भुंक्ष्व विभवान्निजधर्मदोहान्दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ॥८॥ एवं ब्रुवाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत् ॥ संप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडावलोकविलसद्धसिताननाऽऽह ॥ ९ ॥ देवहूतिरुवाच ॥ राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः ॥ यस्तेऽभ्यधायि समयः सकृदंगसंगो भूयाद्गरीयसि गुणप्रसवः सतीनाम् ॥ १०॥ ॥ ॥

प्रियोऽपि देहस्त्वया मत्सेवया कृशीकृतः ॥६॥ अतो मया तपःसमाधिविद्यासु चित्तैकाग्र्येण ये भगवत्प्रसादाः संपादितास्ते मम सेवया त्वयापि वशीकृताः । तांस्ते दिव्यां दृष्टिं दत्वा दर्शयामि त्वं पश्य ॥७॥ त्वं पातिव्रत्येन सिद्धासि । अतोऽन्यैर्दुष्प्रापान् दिव्यान् भोगान् भुंक्ष्व ॥८॥ एवं ब्रुवाणं हरेः सर्वयोगमायासु उपासनासु च निपुणं पतिं वीक्ष्य सा सलज्जितहास्यावलोकनेन वदतिस्म॥९॥ देवहूतिरुवाच॥ हे भर्तः, त्वय्येतत्सर्वं सिद्धमेव तदहं जानामि । अतो यस्त्वया विवाहसमये गर्भधारणपर्यंतं तवांगसंगं करिष्यामीति संकेतः कृतः स परिपूर्णो भवतु ॥१०॥ ॥ ॥

हे ईश, रंतुमिच्छया मया देहः कर्शितः। स देहो यथा रतिसमर्थो भवेत् तथा कुरु । किंच । क्रीडायोग्यं भवनं संपादय ॥११॥ मैत्रेय उवाच ॥ कर्दमः प्रियायाः प्रियमिच्छन् योगसामर्थ्येन तर्ह्येव यथेच्छगमनशीलं विमानमचीकरत् ॥१२॥ कथंभूतं तत् । सर्वकामदुघं मणिस्तंभैः शोभितम् ॥ १३ ॥ सर्वकालसुखावहं विचित्रध्वजपताकादिभिः समलंकृतम् ॥१४॥ विचित्रपुष्पमालाभिर्दुकूलक्षौमकौशेयैर्नानावस्त्रैश्च विराजितम् ॥१५॥ उपर्युपरि रचितगृहेषु पृथक् पृथक् स्थले शय्याभिः पर्यंकव्यजनासनैश्च कमनीयम् ॥१६॥ तत्र तत्र मरकतस्थल्या विद्रुमवेदिभिश्च जुष्टम् ॥ १७॥ द्वारेषु प्रवालनिर्मितोदुंबरैः वज्रखचितकपाटैश्च शोभितम् ॥१८॥ वज्रभित्तिषु विचित्रवितानैर्हेमतोरणैश्च जुष्टम् ॥१९॥ हंसपारावतयूथैस्तत्रतत्र कूजितम् ॥२०॥ क्रीडास्थानशयनस्थानोपभोगस्थानप्रांगणादिभिः

तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्शितोऽतिरिंसयात्मा ॥ सिद्ध्येत ते कृतमनोभवधर्षिताया दीनस्तदीश भवनं सदृशं विचक्ष्व ॥११॥ मैत्रेय उवाच ॥ प्रियायाः प्रियमन्विच्छन्कर्दमो योगमास्थितः ॥ विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् ॥१२॥ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितम् ॥ सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतम् ॥१३॥ दिव्योपकरणोपेतं सर्वकालसुखावहम् ॥ पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतम् ॥१४॥ स्रग्भिर्विचित्रमाल्याभिर्मंजुसिंजत्षडंघ्रिभिः ॥ दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् ॥१५॥ उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् ॥ क्षिप्तैः कशिपुभिः कांतं पर्यंकव्यजनासनैः ॥ १६ ॥ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितम् ॥ महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः ॥१७॥ द्वाःसु विद्रुमदेहल्या भातं वज्रकपाटवत् ॥ शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रितम् ॥ १८॥ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः ॥ जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः ॥१९॥ हंसपारावतव्रातैस्तत्र तत्र निकूजितम् ॥ कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च ॥२०॥ विहारस्थानविश्रामसंवेशप्रांगणाजिरैः ॥ यथोपजोषं रचितैर्विस्मापनमिवात्मनः ॥२१॥ ईदृग्गृहं तत्पश्यंतीं नातिप्रीतेन चेतसा ॥ सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयम् ॥२२॥ निमज्ज्यास्मिन्ह्रदे भीरु विमानमिदमारुह ॥ इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणाम् ॥२३॥ सा तद्भर्तुः समादाय वचः कुवलयेक्षणा ॥ सरजं बिभ्रती वासो वेणीभूतांश्च मूर्धजान् ॥ २४ ॥ अंगं च मलपंकेन संछन्नं शबलस्तनम् ॥ आविवेश सरस्वत्याः सरः शिवजलाशयम् ॥२५॥ सांतःसरसि वेश्मस्थाः शतानि दश कन्यकाः ॥ सर्वाः किशोरवयसो ददर्शोत्पलगंधयः ॥२६॥ तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांजलयः स्त्रियः ॥ वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किम् ॥२७॥ स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीम् ॥ दुकूले निर्मले नूत्ने ददुरस्यै च मानद ॥ २८ ॥ ॥

शोभितम् ॥२१॥ ईदृग्विमानरूपं गृहं दृष्ट्वा मलिनदेहत्वात्सा संतुष्टचित्ता नासीत् । तदा तस्याश्चित्तज्ञः कर्दम आह ॥ २२ ॥ हे भीरु, अस्मिन् बिंदुसरोवरे निमज्य तत इदं विमानमारुह ॥२३॥ तदा मलिनं वस्त्रं वेणीभूतान् केशांश्च बिभ्रती सा तद्वचः श्रुत्वा ॥ २४ ॥ मलिनांगा कृशस्तनी सरस्वतीनदीमध्यस्थं तद्बिंदुसर आविवेश ॥२५॥ सा तत्र निमग्ना सती तदैव कमलगंधयः किशोरवयसः सहस्रं कन्या ददर्श ॥२६॥ ताः कन्या देवहूतिं प्राप्य प्रांजलय ऊचुः । वयं तव दास्यः स्मः, त्वं न आज्ञां कुरु ॥२७॥ इत्युक्त्वा ताः कन्या तैलादिमर्दनेन तां देवहूतिं स्नापयित्वा तस्यै निर्मले दुकूले ददुः ॥ २८ ॥ ॥

अमौल्यानि भूषणानि सर्वगुणोपेतमन्नममृतमिव पानं च ददुः ॥२९॥ अथ देवहूतिरादर्शे स्वात्मानं विरजांबरं कन्याभिर्बहुमानितम् ॥ ३० ॥ कृतशिरःस्नानं
सर्वाभरणभूषितं निष्कग्रीवं वलयिनं कांचननूपुरम् ॥३१॥ बहुरत्नखचितकांच्याऽमौल्यहारेण कुंकुमादिमंगलद्रव्येण च भूषितं ददर्श ॥ ३२ ॥ सुंदरदंतैर्भ्रुवा
कटाक्षयुक्तैर्नेत्रैः कुंतलकेशैश्च शोभमानमुखमात्मानं दृष्ट्वा ॥३३॥ यदा पतिं सस्मार। तदा सा यत्र पतिस्तत्रैव स्वयमपि दासीभिः सहास्तेस्म ॥ ३४ ॥ तदा सा
आत्मानं तस्य योगमायाप्रभावं च दृष्ट्वेदं किमिति संशयं प्राप ॥३५॥ स कर्दमः कृतमंगलस्नानां शोभायमानां रुचिरस्तनीं ॥३६॥ सुवस्त्रधरां विद्याधरीसहस्रेण
सेव्यमानां तां दृष्ट्वा जातप्रेमभावः सन् तया सह विमानमारुरोह ॥ ३७ ॥ तदा विमाने स्त्रिया दासीभिश्च सह कर्दमः आकाशे ताराभिरावृतश्चंद्र इव

भूषणानि पराध्यानि वरीयांसि द्युमंति च ॥ अन्नं सर्वगुणोपेतं पानं चैवामृतासवम् ॥२९॥ अथादर्शे स्वमात्मानं स्रग्विणं विरजांबरम् ॥
विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानितम् ॥३०॥ स्नातं कृतशिरःस्नानं सर्वाभरणभूषितम् ॥ निष्कग्रीवं वलयिनं कूजत्कांचननूपुरम्
॥३१॥ श्रोण्योरध्यस्तया कांच्या कांचन्या बहुरत्नया॥ हारेण च महार्हेण रुचकेन च भूषितम् ॥३२॥ सुदता सुभ्रुवा श्लक्ष्णस्निग्धापांगेन
चक्षुषा ॥ पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखम् ॥ ३३ ॥ यदा सस्मार ऋषभमृषीणां दयितं पतिम् ॥ तत्र चास्ते सह स्त्रीभिर्यत्रास्ते स
प्रजापतिः ॥३४॥ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा ॥ निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत ॥३५॥ स तां कृतमलस्नानां विभ्राजंतीम
पूर्ववत् ॥ आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीम् ॥ ३६ ॥ विद्याधरीसहस्रेण सेव्यमानां सुवाससम् ॥ जातभावो विमानं तदारोहयदमित्रहन्
॥३७॥ तस्मिन्नलुप्तमहिमा प्रिययानुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने ॥ बभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत
इवोडुपतिर्नभःस्थः ॥३८॥ तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु॥ सिद्धैर्नुतो द्युधुनिपातशिवस्वनासु
रेमे चिरं धनदवल्ललनावरूथी ॥३९॥ वैश्रंभके सुरसने नंदने पुष्पभद्रके॥ मानसे चैत्ररथ्ये च स रेमे रामया रतः ॥४०॥ भ्राजिष्णुना
विमानेन कामगेन महीयसा ॥ वैमानिकानत्यशेत चरँल्लोकान्यथानिलः ॥४१॥ किं दुरापादनं तेषां पुंसामुद्दामचेतसाम् ॥
यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ॥ ४२ ॥ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान्स्वसंस्थया ॥ बह्वाश्चर्यं महायोगी स्वाश्रमाय
न्यवर्तत ॥४३॥ विभज्य नवधाऽऽत्मानं मानवीं सुरतोत्सुकाम् ॥ रामां निरमयन्रेमे वर्षपूगान्मुहूर्तवत् ॥४४॥ तस्मिन्विमान उत्कृष्टां
शय्यां रतिकरीं श्रिता ॥ न चाबुद्ध्यत तं कालं पत्याऽपीच्येन संगता ॥ ४५ ॥ ॥ ॥

रराज ॥३८॥ स तेन विमानेन मेरोर्दरीषु सिद्धैः स्तुतः सन् कुबेर इव चिरं रेमे ॥ ३९ ॥ वैश्रंभक-सुरसन-नंदन-पुष्पभद्रक-चैत्ररथनामसु देवोद्यानेषु मानसे
सरोवरे च भार्यया सह रेमे ॥४०॥ कामगेन विमानेन विमानगामिनो देवानप्यतिक्रम्येच्छितस्थलेषु व्यचरत् ॥४१॥ यैर्भवच्चरण आश्रितस्तेषां दुर्लभं किम् न
किमपि ॥ ४२ ॥ एवं पत्न्यै भूगोलं सर्वं दर्शयित्वा पुनः स्वाश्रमं प्राप्य ॥ ४३ ॥ आत्मनो नव रूपाणि कृत्वा स्त्रियं रमयन् बहूनि वर्षाणि मुहूर्तवद्रेमे॥ ४४ ॥
तदा देवहूतिरुत्कृष्टां शय्यामाश्रित्य सुंदरेण पतिना संगता सती गतं कालं नाबुध्यत ॥ ४५ ॥ ॥ ॥ ॥

एवं दंपत्यो रममाणयोः सतोः शतवर्षाणि क्षणवद्व्यतीयुः ॥४६॥ मुनिस्तस्या बह्वपत्यसंकल्पं जानन् नवधा वीर्यमाधत्त ॥ ४७॥ सा सद्यश्चारुसर्वांगीर्नव कन्याः सुषुवे ॥४८॥ ततः पतिं प्रव्रजिष्यंतं दृष्ट्वा सा देवहूतिर्बहिः स्मयमानाऽतस्तु व्याकुलहृदया ॥ ४९॥ अधोमुख्यश्रुकलां मुंचती सती पतिं जगाद ॥ ५० ॥ हे मुने, त्वया यत् प्रतिश्रुतं तत्संपादितम् । अथापि शरणागतताया मे त्वमभयं दातुमर्हसि ॥५१॥ हे ब्रह्मन्, त्वयि वनं प्रव्रजिते सति तव कन्याभिः स्वयमेवात्मनो योग्याः पतयो विमृग्या इति दैन्यं प्राप्तम् । मे ज्ञानोपदेशाय कश्चिद्ब्रह्मवित् पुत्रश्चापेक्षितः स कंचित्कालं त्वदवस्थानेन भविष्यति ॥ ५२ ॥ हे प्रभो, विषयप्रसंगात् गतेनैतावता कालेनालम् ॥५३॥ तव सामर्थ्यमजानत्या मया त्वयि विषयभोगार्थं संगः कृतः ॥५४॥ स संगो मे अभयायास्तु । कुतः । अज्ञा-

एवं योगानुभावेन दंपत्यो रममाणयोः ॥ शतं व्यतीयुः शरदः काममालसयोर्मनाक् ॥४६॥ तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित् ॥ नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ॥४७॥ अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः ॥ सर्वास्ताश्चारुसर्वाग्यो लोहितोत्पलगंधयः ॥४८॥ पतिं सा प्रव्रजिष्यंतं तदाऽऽलक्ष्योशती सती ॥ स्मयमाना विक्लवेन हृदयेन विदूयता ॥ ४९ ॥ लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया ॥ उवाच ललितां वाचं निरुध्याश्रुकलां शनैः ॥५०॥ देवहूतिरुवाच ॥ सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतम् ॥ अथापि मे प्रपन्नाया अभयं दातुमर्हसि ॥५१॥ ब्रह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः ॥ कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनम् ॥५२॥ एतावतालं कालेन व्यतिक्रांतेन मे प्रभो ॥ इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः ॥५३॥ इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः ॥ अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ॥५४॥ संगो यः संसृतेर्हेतुरसत्सु विहितोऽधिया ॥ स एव साधुषु कृतो निःसंगत्वाय कल्पते ॥५५॥ नेह यत्कर्म धर्माय न विरागाय कल्पते ॥ न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥५६॥ साहं भगवतो नूनं वंचिता मायया दृढम् ॥ यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ॥५७॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने त्रयोविंशोऽध्यायः ॥२३॥ ॥ मैत्रेय उवाच ॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ॥ दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥१॥ ऋषिरुवाच ॥ मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते ॥ भगवांस्तेऽक्षरो गर्भमदूरात्संप्रपत्स्यते ॥२॥ धृतव्रतासि भद्रं ते दमेन नियमेन च ॥ तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ॥३॥ स त्वयाऽऽराधितः शुक्लो वितन्वन्मामकं यशः ॥ छेत्ता ते हृदयग्रंथिमौदर्यो ब्रह्मभावनः ॥ ४ ॥ ॥

नेनापि साधुषु कृतः संगो मोक्षाय कल्पते ॥५५॥ यस्य पुंसः कर्म धर्माय वैराग्याय हरिसेवार्थं च न भवेत्स जीवन्नपि मृतः ॥५६॥ अहं भगवन्मायया वंचितास्मि । यतो मुक्तिदं त्वां पतिं प्राप्य बंधनान्मोक्तुमिच्छां न कृतवती ॥५७॥ इति श्रीमद्भागवतचू० तृतीय० त्रयोविंशोऽध्यायः ॥ २३ ॥ चतुर्विंशे ततो जन्म कपिलस्याह तत्पितुः । प्रव्रज्यां तमनुज्ञाप्य ऋणत्रयविमोक्षतः ॥१॥ मैत्रेय उवाच ॥ दयालुः कर्दमः खिन्नां तां विलोक्य भगवदुक्तं स्मरन्वदतिस्म ॥१॥ कर्दम उवाच ॥ हे राजपुत्रि, त्वं खेदं मा कुरु । भगवांस्ते गर्भं शीघ्रं प्राप्स्यति ॥२॥ अतो यमनियमतपोदानादिभिः श्रद्धया चेश्वरं भज ॥३॥ त्वयाऽऽराधितः स भगवान्

मामकं यशो जगति वितन्वन् त्वदुदरेऽवतारं गृहीत्वा तव तत्त्वज्ञानोपदेशेन हृदयग्रंथिभेदं करिष्यति ॥ ४ ॥ मैत्रेय उवाच ॥ देवहूतिरपि तद्वाक्ये विश्वासं धृत्वा श्रद्धया हरिं भेजे ॥५॥ ततो बहुतरे काले गते सति भगवान् कार्दमं वीर्यं प्राप्तः सन् तस्यां दारुण्यग्निरिव जज्ञे ॥ ६ ॥ तदा स्वर्गे देवा हर्षेण वाद्यानि वादयामासुः । गंधर्वा जगुः । अप्सरसो ननृतुः ॥७॥ देवाः पुष्पवृष्टिं चक्रुः । दिशः प्रसेदुः ॥ ८ ॥ तदा ब्रह्मा मरीच्यादिभिर्ऋषिभिः सह कर्दमस्याश्रमं प्राप ॥९॥ सांख्यशास्त्रप्रवर्तनाय जातं भगवंतं ज्ञात्वा ॥ १० ॥ तस्य चिकीर्षितं सत्कुर्वन् कर्दमं देवहूतिं च जगाद ॥ ११ ॥ ब्रह्मोवाच ॥ हे पुत्र, मम वचस्त्वया सम्यग्गृहीतम् ॥१२॥ गुरोर्वचो गौरवेण बाढमित्यनुमन्येति यत् एतावत्येव पितरि पुत्रकैः शुश्रूषा कार्या ॥१३॥ इमाः कन्या एतेभ्यो मरीच्यादिभ्यो ऋषिभ्यस्त्वं देहि । ताः स्वैर्वंशैरनेकधा सृष्टिं वर्धयिष्यंति तेन तव यशो भुवि विस्तरिष्यति॥१४॥१५॥ अहं भूतानां सर्वाभीष्टप्रदमाद्यं पुरुषं तव गृहे स्वमाययावतीर्णं जानामि ॥ १६ ॥ स ज्ञानविज्ञानयोगेन मुमुक्षूणां कर्मवासना उत्पाटयिष्यति॥१७॥ हे मनुकन्ये देवहूति, कैटभारिर्भगवान् ते गर्भं प्रविष्टः । अयं तवाविद्यासंशयरूपं हृदयग्रंथिं छित्वा पृथिवीं विचरिष्यति ॥१८॥ अयं सिद्धगणाधीशो लोके कपिल इति नाम प्राप्स्यति ॥१९॥ मैत्रेय उवाच ॥ ब्रह्मा एवमुक्त्वा मरीच्यादिऋषीन् तत्र विवाहार्थमवस्थाप्य सनकादिभिर्नारदेन च सह सत्यलोकं ययौ ॥ २० ॥ ब्रह्मणि गते सति कर्दमः स्वकन्या मरीच्यादिभ्यो ददौ॥२१॥

मैत्रेय उवाच ॥ देवहूत्यपि संदेशं गौरवेण प्रजापतेः ॥ सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुम् ॥५॥ तस्यां बहुतिथे काले भग-
वान्मधुसूदनः ॥ कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥६॥ अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः ॥ गायंति तं स्म
गंधर्वा नृत्यंत्यप्सरसो मुदा ॥७॥ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः ॥ प्रसेदुश्च दिशः सर्वा अंभांसि च मनांसि च ॥८॥
तत्कर्दमाश्रमपदं सरस्वत्या परिश्रितम् ॥ स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात्॥९॥भगवंतं परं ब्रह्म सत्वेनांशेन शत्रुहन् ॥
तत्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ॥१०॥ सभाजयन्विशुद्धेन चेतसा तच्चिकीर्षितम् ॥ प्रहृष्यमाणैरसुभिः कर्दमं चेद-
मभ्यधात् ॥ ११ ॥ ब्रह्मोवाच ॥ त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः ॥ यन्मे संजगृहे वाक्यं भवान्मानद मानयन्
॥१२॥ एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः ॥ बाढमित्यनुमन्येत गौरवेण गुरोर्वचः ॥ १३ ॥ इमा दुहितरः सभ्य तव वत्स
सुमध्यमाः ॥ सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यंत्यनेकधा ॥१४॥ अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि ॥ आत्मजाः परिदेह्यद्य
विस्तृणीहि यशो भुवि ॥१५॥ वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया ॥ भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने ॥१६॥ ज्ञानवि-
ज्ञानयोगेन कर्मणामुद्धरन् जटाः ॥ हिरण्यकेशः पद्माक्षः पद्ममुद्रापदांबुजः ॥ १७ ॥ एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः ॥
अविद्यासंशयग्रंथिं छित्त्वा गां विचरिष्यति ॥१८॥ अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः ॥ लोके कपिल इत्याख्यां गंता
ते कीर्तिवर्धनः ॥१९॥ मैत्रेय उवाच ॥ तावाश्वास्य जगत्स्रष्टा कुमारैः सह नारदः॥ हंसो हंसेन यानेन त्रिधाम परमं ययौ॥२०॥
गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः ॥ यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः ॥ २१ ॥ ॥ ॥

मरीचये कलां कन्याम् । अत्रयेऽनसूयाम् । अंगिरसे श्रद्धाम् । पुलस्त्याय हविर्भुवम् ॥ २२ ॥ पुलहाय गतिम् । क्रतवे क्रियाम् । भृगवे ख्यातिम् । वसिष्ठायारुंधतीम् ॥२३॥ अथर्वणे शांतिं च ददौ । ततः कृतोद्वाहान् तानृषीन् प्रियवस्तूनि दत्वा संतोषितवान् ॥ २४ ॥ ततो हर्षयुक्तास्ते ऋषयस्तमामंत्र्य सस्त्रीकाः स्वं स्वमाश्रमं जग्मुः ॥२५॥ कर्दमो भगवंतमवतीर्णं ज्ञात्वैकांत उपसंगम्य प्रणम्य बभाषे॥२६॥ अहो संसारे स्वपातकैः पच्यमानानां देवता बहुकालेन प्रसीदंति ॥२७॥ सर्वे योगिनो योगसमाधिना त्वां द्रष्टुं यतंते ॥२८॥ स त्वमस्माकं लघुत्वमगणयित्वा स्ववाक्यं सत्यं कर्तुमस्माकं गृहेषु जातोऽसि ॥ २९ ॥ ३० ॥ हे भगवन्, प्राकृतरूपरहितस्य तवाऽलौकिकानि चतुर्भुजादिरूपाणि योग्यानि । तथापि यानि ते भक्तानां रोचंते तानि मनुष्यसदृशान्यपि रूपाणि ते रोचंते॥३१॥

मरीचये कलां प्रादादनसूयामथात्रये ॥ श्रद्धामंगिरसेऽयच्छत्पुलस्त्याय हविर्भुवम् ॥२२॥ पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीम् ॥ ख्यातिं च भृगवेऽयच्छद्वसिष्ठायाप्यरुंधतीम् ॥२३॥ अथर्वणेऽददाच्छांतिं यया यज्ञो वितन्यते ॥ विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत् ॥२४॥ ततस्त ऋषयः क्षत्तः कृतदारा निमंत्र्य तम् ॥ प्रातिष्ठन्नंदिमापन्नाः स्वं स्वमाश्रममंडलम् ॥ २५ ॥ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् ॥ विविक्त उपसंगम्य प्रणम्य समभाषत ॥ २६ ॥ अहो पापच्यमानानां निरये स्वैरमंगलैः ॥ कालेन भूयसा नूनं प्रसीदंतीह देवताः ॥२७॥ बहुजन्मविपक्केन सम्यग्योगसमाधिना ॥ द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदम् ॥२८॥ स एव भगवानद्य हेलनं न गणय्य नः ॥ गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः ॥२९॥ स्वीयं वाक्यमृतं कर्तुमवतीर्णोऽसि मे गृहे ॥ चिकीर्षुर्भगवान् ज्ञानं भक्तानां मानवर्धनः ॥३०॥ तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ॥ यानि यानि च रोचंते स्वजनानामरूपिणः ॥३१॥ त्वां सूरिभिस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठम् ॥ ऐश्वर्यवैराग्ययशोऽवबोधवीर्यश्रियां पूर्तमहं प्रपद्ये ॥३२॥ परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालम् ॥ आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ॥३३॥ आस्माभिपृच्छेऽद्य पतिं प्रजानां त्वयावतीर्णार्ण उताप्तकामः ॥ परिव्रजत्पदवीमास्थितोऽहं चरिष्ये त्वां हृदि युंजन्विशोकः ॥ ३४ ॥ श्रीभगवानुवाच ॥ मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके ॥ अथाजनि मया तुभ्यं यदवोचमृतं मुने ॥ ३५ ॥ एतन्मे जन्म लोकेऽस्मिन्मुमुक्षूणां दुराशयात् ॥ प्रसंख्यानाय तत्वानां संमतायात्मदर्शने ॥ ३६ ॥ एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा ॥ तं प्रवर्तयितुं देहमिमं विद्धि मया भृतम् ॥ ३७ ॥ ॥ ॥

तं ज्ञानिभिस्तत्त्वज्ञानार्थं वंदितचरणमैश्वर्यवैराग्यज्ञानादिभिः पूर्णं त्वामहं शरणं प्रपद्ये ॥ ३२ ॥ किंच । परमेश्वरं स्वाधीनशक्तिं प्रकृतिमहत्तत्वादिप्रपंचरूपमात्मानुभूत्या लीनप्रपंचं सर्वज्ञं कपिलं त्वां नमस्करोमि ॥३३॥ अधुना पूर्णमनोरथोऽहं त्वां प्रार्थये । इतः परं संन्यासं गृहीत्वा त्वां हृदि स्मरन् पृथिवीं संचरिष्यामीति ॥३४॥ श्रीभगवानुवाच ॥ हे मुने, मया तुभ्यं यत्कथितं तत्सत्यं कर्तुं मया त्वद्गृहे जन्म स्वीकृतम् ॥३५॥ एतन्मे जन्म लोके प्रकृत्यादितत्वानां निरूपणार्थमस्ति ॥३६॥ हे मुने, एष ज्ञानमार्गः कालेन नष्टः । तं प्रवर्तयितुमिमं देहं मया धृतं विद्धि ॥ ३७ ॥ ॥ ॥

हे ऋषे, मयाऽनुज्ञातस्त्वं यथेच्छं गच्छ । परंतु मोक्षार्थं मां भज ॥३८॥ तेन भजनेन प्रत्यगात्मनि स्वप्रकाशमात्मानं मामीक्षमाणः सन् मोक्षं प्राप्स्यसि ॥३९॥ अहं मात्रे संचितक्रियमाणकर्मवासनोन्मूलिनीमध्यात्मविद्यां वितरिष्ये । यया सा माता भवाब्धिं तरिष्यति ॥४०॥ मैत्रेय उवाच ॥ एवं कपिलेनोक्तः स मुनिस्तं प्रदक्षिणीकृत्य वनं गत्वा ॥४१॥ मुनीनामहिंसादिलक्षणं व्रतमाचरन् निःसंगो महीं व्यचरत् ॥ ४२ ॥ तत एकांतभक्त्या निर्गुणे ब्रह्मणि मनो युंजन् ॥ ४३ ॥ निरहंकृतिर्निर्द्वंद्वः प्रशांतधीः ॥४४॥ वासुदेवे भगवति प्रत्यगात्मनि स्थिरीकृतचित्तः सन् ॥४५॥ सर्वभूतेषु स्थितं भगवंतं पश्यन् ॥४६॥ इच्छाद्वेषादिरहितः कालेन भगवद्गतिं प्राप ॥४७॥ इति श्रीमद्भागवतचू० तृती० चतुर्विंशोऽध्यायः॥२४॥ ॥ पंचविंशे जनन्या तु पृष्टो बंधविमोचनम् । आदावाह परं भक्तिलक्षणं कपिलः सुतः ॥१॥ कपिलेनार्पिता मात्रे गूढभावनियंत्रिता । योगमाणिक्यमंजूषा स्फुटमुद्घाट्यतेऽधुना ॥२॥ शौनक उवाच ॥ हे सूत, मनुष्याणामात्मतत्त्वज्ञापनार्थं तत्वसंख्याप्रवर्तको भगवान् कपिलो जातः ॥ १ ॥ सर्वयोगिनां मध्ये श्रेष्ठस्य तस्य कीर्तिश्रवणे ममेंद्रियाणि न तृप्यंति॥२॥ अतः स यानि यानि कर्माणि करोति तानि मे कीर्तय ॥३॥ सूत उवाच ॥ एवमात्मविद्यायां प्रेरितो मैत्रेयः प्रीतः सन् विदुरं जगाद ॥४॥ मैत्रेय उवाच ॥ पितरि कर्दमेऽरण्यं गते सति कपिलो मातुः प्रियचिकीर्षया तस्मिन् बिंदुसरोवरेऽवात्सीत् ॥५॥ एकदा ब्रह्मणो वचः स्मरंती देवहूतिरासने सुखोपविष्टं तं स्वसुतं जगाद॥६॥

गच्छ कामं मयाऽऽपृष्टो मयि संन्यस्तकर्मणा ॥ जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ॥ ३८॥ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयम् ॥ आत्मन्येवात्मना वीक्ष्य विशोकोऽभयमृच्छसि ॥३९॥ मात्रे आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणाम् ॥ वितरिष्ये यया चासौ भयं चातितरिष्यति ॥ ४० ॥ मैत्रेय उवाच ॥ एवं समुदितस्तेन कपिलेन प्रजापतिः ॥ दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ॥ ४१ ॥ व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः ॥ निःसंगो व्यचरत्क्षोणीमनग्निरनिकेतनः ॥ ४२ ॥ मनो ब्रह्मणि युंजानो यत्तत्सदसतः परम् ॥ गुणावभासे विगुण एकभक्त्यानुभाविते ॥ ४३ ॥ निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् ॥ प्रत्यक्प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ॥ ४४ ॥ वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि ॥ परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ॥४५॥ आत्मानं सर्वभूतेषु भगवंतमवस्थितम् ॥ अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥ ४६ ॥ इच्छाद्वेषविहीनेन सर्वत्र समचेतसा ॥ भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ॥४७॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेये चतुर्विंशतितमोऽध्यायः॥२४॥ ॥ शौनक उवाच ॥ कपिलस्तत्वसंख्याता भगवानात्ममायया ॥ जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥१॥ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनाम् ॥ विश्रुतौ श्रुतदेवस्य भूरि तृप्यंति मेऽसवः ॥२॥ यद्यद्विधत्ते भगवान्स्वच्छंदात्माऽऽत्ममायया ॥ तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय ॥३॥ सूत उवाच ॥ द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा॥ प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः ॥४॥ मैत्रेय उवाच ॥ पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया ॥ तस्मिन्बिंदुसरेऽवात्सीद्भगवान्कपिलः किल ॥५॥ तमासीनमकर्माणं तत्वमार्गाग्रदर्शनम् ॥ स्वसुतं देवहूत्याह धातुः संस्मरती वचः ॥ ६ ॥ ॥

देवहूतिरुवाच ॥ निर्विण्णा नितरां भूमन्नसदिंद्रियतर्षणात् ॥ येन संभाव्यमानेन प्रपन्नांधंतमः प्रभो ॥७॥ तस्य त्वं तमसोंऽधस्य दुष्पारस्याद्य पारगम् ॥ सच्चक्षुर्जन्मनामंते लब्धं मे त्वदनुग्रहात् ॥८॥ य आद्यो भगवान्पुंसामीश्वरो वै भवान्किल ॥ लोकस्य तमसांधस्य चक्षुः सूर्य इवोदितः ॥९॥ अथ मे देव संमोहमपाक्रष्टुं त्वमर्हसि ॥ योऽवग्रहोऽहं ममेतीत्येतस्मिन्योजितस्त्वया ॥१०॥ तं त्वागताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम् ॥ जिज्ञासयाहं प्रकृतेः पूरुषस्य नमामि सद्धर्मविदां वरिष्ठम् ॥११॥ मैत्रेय उवाच ॥ इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्धनम्॥ धियाभिनंद्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशोभिताननः ॥१२॥ श्रीभगवानुवाच ॥ योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे ॥ अत्यंतोपरतिर्यत्र दुःखस्य च सुखस्य च ॥१३॥ तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे ॥ ऋषीणां श्रोतुकामानां योगं सर्वांगनैपुणम् ॥१४॥ चेतः खल्वस्य बंधाय मुक्तये चात्मनो मतम् ॥ गुणेषु सक्तं बंधाय रतं वा पुंसि मुक्तये ॥१५॥ अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः ॥ वीतं यदा मनः शुद्धमदुःखमसुखं समम् ॥१६॥ तदा पुरुष आत्मानं केवलं प्रकृतेः परम् ॥ निरंतरं स्वयंज्योतिरणिमानमखंडितम् ॥१७॥ ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना ॥ परिपश्यत्युदासीनं प्रकृतिं च हतौजसम् ॥१८॥ न युज्यमानया भक्त्या भगवत्यखिलात्मनि ॥ सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये ॥ १९ ॥ प्रसंगमजरं पाशमात्मनः कवयो विदुः ॥ स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥२०॥ तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ॥ अजातशत्रवः शांताः साधवः साधुभूषणाः ॥ २१ ॥ मय्यनन्येन भावेन भक्तिं कुर्वंति ये दृढाम् ॥ मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः ॥ २२ ॥ ॥ ॥

हे भूमन्, अहमिंद्रियतृप्त्यर्थं यो विषयाभिलाषस्तस्मादत्यंतं श्रातास्मि । येनाधतमोरूपं संसारं प्राप्ता ॥ ७ ॥ तस्य दुष्पारस्य तमसोंऽतप्रापकं त्वमेव दिव्यं चक्षुर्मया बहुजन्मनामंतेऽद्य लब्धम् ॥८॥ यः पुंसामाद्य ईश्वरः स भगवान् तमसांधस्य लोकस्य सूर्य इवोदितोऽस्ति ॥९॥ अतो हे देव, मम देहगेहादौ अहंममेति यो मोहोऽस्ति तं दूरीकर्तुं त्वमर्हसि ॥१०॥ प्रकृतेः पुरुषस्य च जिज्ञासया त्वामहं शरणं गता सती नमामि ॥११॥ मैत्रेय उवाच ॥ इति स्वमातुः पुंसां मोक्षे रतिजनकं वचो निशम्य सतां गतिर्भगवान् बभाषे ॥१२॥ कपिल उवाच ॥ हे मातः, आत्मस्वरूपे मनोलयरूपो योग एव पुंसां मोक्षप्राप्तये मतः॥१३॥ हे अनघे, पुराहं ऋषीणां यं योगमुक्तवांस्तं ते वक्ष्यामि ॥१४॥ पुंसां चित्तं विषयेषु सक्तं बंधाय भवति। परमेश्वरे सक्तं मुक्तये च भवति ॥१५॥ अहंममेत्याद्यभिमानोत्थैः कामलोभादिभिर्मलै रहितं मनो यदा शुद्धं भवति ॥ १६ ॥ तदा ज्ञानवैराग्ययुक्तेन भक्तियोगेन स्वप्रकाशमात्मानं क्षीणबलां प्रकृतिं च पश्यति ॥१७॥१८॥ सर्वात्मरूपे भगवति भक्त्या विना योगिनां ब्रह्मसिद्धयेऽन्यः कल्याणकारको मार्गो नास्ति ॥१९॥ कवयः प्रसंगमेव जीवात्मनोऽजरं पाशं विदुः। स एव प्रसंगः साधुषु कृतश्चेत्तर्हि तदुद्घाटितं मोक्षद्वारं विदुः ॥२०॥ साधूनां लक्षणमाह । साधवः कारुणिकाः सर्वमित्रा अजातशत्रवः शांताः ॥ २१ ॥ मयि भक्तिं कुर्वाणाः मत्कृते त्यक्तकर्माणः त्यक्तस्वजनबांधवाः ॥ २२ ॥ ॥ ॥ ॥ ॥

मत्कथाः शृण्वंतः कथयंतश्च ये तान् विविधास्तापा न व्यथयंति ॥२३॥ हे साध्वि, ये एते साधव उक्तास्तेषु साधुषु समागमस्त्वया संपादनीयः ॥२४॥ साधुमुखान्मत्कथाश्रवणं भवति । तेन च मोक्षमार्गरूपे हरौ श्रद्धा रतिर्भक्तिश्च भवति ॥२५॥ भक्त्या पुमानैहिकामुष्मिकाद्विषयसुखाद्विरक्तो भूत्वोद्योगवान् सन् चित्तस्य ग्रहणे योगमार्गैर्यतिष्यते ॥२६॥ स ज्ञानवैराग्ययुक्तेन योगेन मय्यर्पितया भक्त्या चेहैव मां प्राप्नोति ॥ २७ ॥ देवहूतिरुवाच ॥ त्वयि योग्या भक्तिः का ?। यया तव मोक्षात्मकं स्वरूपमहं प्राप्स्यामि ॥२८॥ हे मोक्षरूप, त्वयोदितस्तत्त्वज्ञानजनको योगश्च कीदृशः । तस्यांगानि च कति संति ? ॥२९॥ तन्मे

मदाश्रयाः कथा मृष्टाः शृण्वंति कथयंति च ॥ तपंति विविधास्तापा नैतान्मद्गतचेतसः ॥२३॥ त एते साधवः साध्वि सर्वसंगविवर्जिताः ॥ संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते ॥२४॥ सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः ॥ तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥ २५ ॥ भक्त्या पुमान्जातविराग ऐंद्रियाद्दृष्टश्रुतान्मद्रचनानुचिंतया ॥ चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः ॥२६॥ असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन ॥ योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुंधे ॥२७॥ देवहूतिरुवाच ॥ काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा ॥ यया पदं ते निर्वाणमंजसान्वाश्नवा अहम् ॥२८॥ यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः ॥ कीदृशः कति चांगानि यतस्तत्त्वावबोधनम् ॥२९॥ तदेतन्मे विजानीहि यथाहं मंदधीर्हरे ॥ सुखं बुद्ध्येय दुर्बोधं योषा भवदनुग्रहात् ॥३०॥ मैत्रेय उवाच ॥ विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः ॥ तत्वाम्नायं यत्प्रवदंति सांख्यं प्रोवाच वै भक्तिवितानयोगम् ॥ ३१ ॥ श्रीभगवानुवाच ॥ देवानां गुणलिंगानामानुश्रविककर्मणाम् ॥ सत्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ ३२ ॥ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥ जरयत्याशु या कोशं विगीर्णमनलो यथा ॥३३॥ नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाभिरता मदीहाः ॥ येऽन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ॥३४॥ पश्यंति ते मे रुचिराण्यंब संतः प्रसन्नवक्त्रारुणलोचनानि ॥ रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदंति ॥ ३५ ॥ तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ॥ हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते ॥३६॥ ॥ ॥

वद। यथा योषिदहं भवदनुग्रहाच्छ्रमं विना जानीयां तथा त्वं प्रसादं कुरु ॥३०॥ मैत्रेय उवाच ॥ एवं मातुरभिप्रायं ज्ञात्वा जातस्नेहः कपिलस्तस्यै मात्रे सांख्यशास्त्रं भक्तिविस्तारं योगं च प्रोवाच ॥३१॥ कपिल उवाच ॥ हे मातः, शुद्धसत्वस्य पुंसः सत्वमूर्तौ हरौ सर्वेंद्रियाणां या निष्कामा वृत्तिः सा भक्तिरुच्यते ॥ ३२ ॥ सा मुक्तेरपि श्रेष्ठा । सा लिंगदेहं जरयति । यथा जाठराग्निर्भुक्तमन्नं जरयति तथा ॥३३॥ मत्पादसेवाभिरताः केचिद्भक्ता मुक्तिमपि न स्पृहयंति । किंतु । तेऽन्योन्यं मिलित्वा मम पराक्रमान् वर्णयंति ॥३४॥ ते मे सुंदराणि दिव्यानि रूपाणि पश्यंति । तैः सह श्रवणयोग्यां वाचं च वदंति ॥ ३५ ॥ मम सुंदरावयवैर्हृतचित्तान् तान्

---

[1] मुक्तेः सकाशाद्भक्तौ परमेश्वरानुभवसुखमधिकमिति भावः ।

पुरुषानिच्छाहीनानपि भक्तिर्मुक्तिं प्रापयति ॥३६॥ ते भक्ता अणिमाद्यष्टैश्वर्यं सत्यलोकादौ स्थितां भोगसंपत्तिं च यद्यपि न स्पृहयंति तथापि ते मे वैकुंठलोके ऐश्वर्यं भोगसंपत्तिं च प्राप्नुवंत्येव ॥ ३७॥ एवं सर्वभावेन मां ये भजंति तान् मदीयं कालचक्रं न ग्रसति ॥३८॥ ये भक्ता इमं लोकं परलोकं स्त्रीपुत्रधनपशुगृहादींश्च विसृज्य ॥३९॥ विश्वतोमुखं मां भजंति तान् मृत्युरूपात्संसारादहं तारयामि ॥४०॥ प्रकृतिपुरुषेश्वराद्भगवतो मत्तो विनान्यत्र पुंसां भयं न निवर्तते ॥४१॥ हे मातः, मद्भयाद्वायुर्वाति सूर्यस्तपतींद्रो वर्षति अग्निर्दहति मृत्युश्च चरति ॥ ४२ ॥ योगिन आत्मनः क्षेमाय ज्ञानवैराग्ययुक्तेन भक्तियोगेन मे पादमूलं शरणं व्रजंति ॥४३॥ भक्तियोगेन मयि यन्मनसः स्थिरीकरणं एतावानेवास्मिन् लोके पुंसां मोक्षोदयोऽस्ति ॥ ४४ ॥ इति श्रीमद्भागवतचू० तृतीय०

अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तम् ॥ श्रियं भागवतीं वा स्पृहयंति भद्रां परस्य मे तेऽश्नुवते तु लोके ॥३७॥ न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मे निमिषो लेढि हेतिः ॥ येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥३८॥ इमं लोकं तथैवामुमात्मानमुभयायिनम् ॥ आत्मानमनु ये चेह ये रायः पशवो गृहाः ॥३९॥ विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखम् ॥ भजंत्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥ ४० ॥ नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् ॥ आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥४१॥ मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ॥ वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥४२॥ ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ॥ क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयम् ॥४३॥ एतावानेव लोकेऽस्मिन्पुंसां निःश्रेयसोदयः ॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥४४॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने पंचविंशतितमोऽध्यायः ॥ २५ ॥ ॥ श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि तत्वानां लक्षणं पृथक् ॥ यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ॥१॥ ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम् ॥ यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनम् ॥२॥ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ॥ प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् ॥३॥ स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ॥ यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥४॥ गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ॥ विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥५॥ एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ॥ कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥६॥ ॥

पंचविंशोऽध्यायः ॥२५॥ ॥ षड्विंशे पुंप्रकृत्योस्तु विवेकायोपवर्ण्यते । सांख्येन सर्वभावानां जन्म लक्षणभेदतः ॥१॥ धात्रा पुत्राय यत्प्रोक्तं क्षत्रे मित्रासुतेन यत् । मात्रे सांख्यं तदध्यात्मं प्राधान्येनाह तत्त्ववित् ॥२॥ कपिल उवाच ॥ हे मातः, अथ ते प्रकृत्यादितत्वानां लक्षणं पृथक् प्रवक्ष्यामि । यज्ज्ञात्वा पुरुषः प्राकृतैर्गुणैर्विमुच्यते ॥१॥ तथा हृदयग्रंथिभेदनं मोक्षदं ज्ञानं च वर्णये ॥२॥ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः । येन समन्वितं विश्वं प्रकाशते ॥ ३ ॥ तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह । स व्यापक एवैष पुरुषो जीवो गुणमयीं लीलया प्राप्तां दैवीं प्रकृतिं यदृच्छयांऽगीकृतवान् ॥ ४ ॥ ततो गुणैर्विचित्राः प्रजाः सृजतीं तां प्रकृतिं विलोक्यात्मानं विस्मृतवान् ॥५॥ एवं प्रकृत्यध्यासेन प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि मन्यते ॥ ६ ॥ ॥

अयं कर्तृत्वाभिमान एवास्य संसृतिबंधो मायाकृतं[1] पारतंत्र्यं च भवति ॥७॥ पुरुषस्य देहेंद्रियदेवताभावप्राप्तौ कारणं प्रकृतिं विदुः । सुखदुःखानां भोक्तृत्वे तु कारणं प्रकृतेः परं पुरुषं[2] विदुः ॥८॥ देवहूतिरुवाच[3] ॥ हे कपिल, अस्य जगतः कारणयोः प्रकृतिपुरुषयोर्लक्षणं ब्रूहि ॥ ९॥ श्रीभगवानुवाच ॥ हे मातः, त्रिगुणात्मकमव्यक्तं यत्प्रधानं तदेव प्रकृतिं प्राहुः ॥१०॥ चतुर्विंशतिस्तत्वानि यस्मिन् गणे संति तं गणं प्रकृतिकार्यरूपं ब्रह्मविदो विदुः ॥११॥ अथ चतुर्विंशति तत्वान्याह । पृथिव्यप्तेजवाय्वाकाशानि पंच महाभूतानि, गंधरसरूपस्पर्शशब्दाः पंच तन्मात्राणि॥ १२ ॥ कर्णौ त्वक् दृक् जिह्वा नासिका वाक्करौ चरणौ मेढ्रं गुदमिति दशेंद्रियाणि ॥१३॥ मनोबुद्ध्यहंकारचित्तमित्यंतःकरणचतुष्टयम् ॥ एवं २४ तत्वानि ॥ १४ ॥ हे मातः, सगुणस्य ब्रह्मणः संख्याविशेष एतावान्

तदस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृतम् ॥ भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥ ७ ॥ कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः ॥ भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् ॥८॥ देवहूतिरुवाच ॥ प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकम् ॥९॥ श्रीभगवानुवाच ॥ यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥१०॥ पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ॥ एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥ ११ ॥ महाभूतानि पंचैव भूरापोऽग्निर्मरुन्नभः ॥ तन्मात्राणि च तावंति गंधादीनि मतानि मे ॥१२॥ इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः ॥ वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥१३॥ मनो बुद्धिमहंकारश्चित्तमित्यंतरात्मकम् ॥ चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥१४॥ एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह ॥ सन्निवेशो मया प्रोक्तो यः कालः पंचविंशकः ॥ १५ ॥ प्रभावं पौरुषं प्राहुः कालमेके यतो भयम् ॥ अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥ १६ ॥ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ॥ चेष्टा यतः स भगवान्काल इत्युपलक्षितः ॥१७॥ अंतः पुरुषरूपेण कालरूपेण यो बहिः ॥ समन्वेत्येष सत्वानां भगवानात्ममायया ॥ १८ ॥ दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ॥ आधत्त वीर्यं साऽसूत महत्तत्वं हिरण्मयम्॥ १९ ॥ विश्वमात्मगतं व्यंजन्कूटस्थो जगदंकुरः ॥ स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः ॥ २० ॥ ॥ ॥

चतुर्विंशतितत्वात्मक एव कथितः ॥ यस्तु कालः स पंचविंशकः ॥१५॥ एके तु पुरुषस्य पराक्रममेव कालं वदंति । स कालो द्विविधः । संहारकरः सृष्टिकरश्चेति । यतः प्रकृत्यविवेकिनो जीवस्य भयं भवति स संहारकरः ॥ १६ ॥ हे मानवि, गुणसमतारूपायाः प्रकृतेर्यतश्चलनादि चेष्टा भवति स कालः सृष्टिकरः ॥१७॥ एवं भगवान् सर्वप्राणिनामंतः पुरुषरूपेण वर्तते बहिश्च कालरूपेण वर्तते ॥१८॥ अथ तत्वानामुत्पत्तिपूर्वकं लक्षणान्याह । आदौ परः पुमान् जीवादृष्टात् क्षुभितधर्मायां मायायां चैतन्यशक्तिरूपं गर्भमाधत्त । तदा सा प्रकृतिः प्रकाशबहुलं महत्तत्वं सुषुवे ॥१९॥ स महान् स्वस्मिन् सूक्ष्मरूपेण स्थितं विश्वं

---

[1] प्रकृत्यविवेककृतमेतत्सर्वं भवतीत्यर्थः । [2] यद्यपि अहंकारगतमेव कर्तृत्वादिकं भोक्तृत्वं च तथापि विकारस्य जडावसानत्वादुपाधिप्राधान्यं भोगस्य चिदवसानत्वादुपहितप्राधान्यमिति । [3] तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वेदानीं जगत्कारणमीश्वरं तत्प्रकृतिं च पृच्छति ।

प्रकाशयन् प्रलयकालीनं तमः पपौ ॥२०॥ तन्महत्तत्वं भगवतः प्राप्तिस्थानम् । तस्यैवाधिभूतरूपेण महानिति संज्ञा । अध्यात्मरूपेण चित्तमिति उपास्यरूपेण वासुदेव इति ॥२१॥ स्वच्छत्वमविकारित्वं शांतत्वमिति चित्तस्य लक्षणम् ॥ २२ ॥ ततो विकुर्वाणान्महत्तत्वात्सात्विको राजसस्तामसश्चेति त्रिविधोऽहंकारो बभूव ॥२३॥ यस्मात् मनस इंद्रियाणां महाभूतानां च समुत्पत्तिः ॥२४॥ यं भूतेंद्रियमनोमयमहंकारं संकर्षणाख्यमनंतं प्रचक्षते ॥२५॥ देवतेंद्रियभूतरूपेण—कर्तृकरणकार्यतया शांतघोरमूढतया चाहंकारस्य लक्षणं ज्ञेयम् ॥२६॥ ततो विकुर्वाणात्सात्विकाहंकारात्संकल्पविकल्पात्मकं मनस्तत्वं जज्ञे ॥२७॥ यन्मनस्तत्वमिंद्रियाणामीश्वरमनिरुद्धाख्यं विदुः ॥२८॥ राजसाहंकाराद्बुद्धितत्वं बभूव ॥२९॥ यस्मात्संशयो मिथ्याज्ञानं निश्चयः स्मृतिश्च भवति ॥३०॥ राजसाहंका-

यत्तत्सत्वगुणं स्वच्छं शांतं भगवतः पदम् ॥ यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥२१॥ स्वच्छत्वमविकारित्वं शांतत्वमिति चेतसः ॥ वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥ २२ ॥ महत्तत्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् ॥ क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत ॥२३॥ वैकारिकस्तैजसश्च तामसश्च यतो भवः ॥ मनसश्चेंद्रियाणां च भूतानां महतामपि ॥२४॥ सहस्रशिरसं साक्षाद्यमनंतं प्रचक्षते ॥ संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयम् ॥२५॥ कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणम् ॥ शांतघोरविमूढत्वमिति वा स्यादहंकृतेः ॥ २६॥ वैकारिकाद्विकुर्वाणान्मनस्तत्वमजायत ॥ यत्संकल्पविकल्पाभ्यां वर्तते कामसंभवः ॥२७॥ यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् ॥ शारदेंदीवरश्यामं संराध्यं योगिभिः शनैः ॥२८॥ तैजसात्तु विकुर्वाणाद्बुद्धितत्वमभूत्सति ॥ द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः ॥ २९ ॥ संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ॥ स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥ ३० ॥ तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः ॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥ ३१ ॥ तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् ॥ शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगम् ॥ ३२ ॥ अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च ॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥३३॥ भूतानां छिद्रदातृत्वं बहिरंतरमेव च ॥ प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ॥ ३४ ॥ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः ॥ स्पर्शोऽभवत्ततो वायुस्त्वक् स्पर्शस्य च संग्रहः ॥ ३५ ॥ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च ॥ एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ॥३६॥ चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ॥ सर्वेंद्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् ॥ ३७ ॥ वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् ॥ समुत्थितं ततस्तेजश्चक्षू रूपोपलंभनम् ॥ ३८ ॥ ॥ ॥

राद्दशेंद्रियाणि बभूवुः । प्राणस्य कर्मेंद्रियाणां च क्रियाशक्तिर्ज्ञेया । बुद्धेर्ज्ञानेंद्रियाणां च विज्ञानशक्तिर्ज्ञातव्या ॥ ३१ ॥ तामसाहंकाराच्छब्दगुणयुक्तं नभो बभूव ॥ ३२ ॥ अर्थवाचकत्वं कुड्यांतरितस्य वक्तुर्ज्ञापकत्वं सूक्ष्मत्वं च शब्दस्य लक्षणम् ॥ ३३ ॥ भूतानामवकाशदातृत्वं नाड्यादिच्छिद्ररूपेण मनःप्राणादीनामाश्रयत्वं च नभसो लक्षणम् ॥ ३४॥ शब्दगुणयुक्तान्नभसः स्पर्शस्ततो वायुश्च बभूव ॥ ३५ ॥ मृदुत्वकठिनत्वशैत्योष्णत्वादिकं स्पर्शतो ज्ञायते ॥ ३६ ॥ वृक्षशाखादेश्चालनं तृणादेर्मेलनं गंधस्य घ्राणंप्रति संयोग इत्यादि वायोर्लक्षणम् ॥ ३७ ॥ वायोः सकाशाद्रूपमात्रं तेजो बभूव ॥ ३८ ॥ ॥

पदार्थस्याकारसमर्पकत्वं नीलपीतादिगुणानां स्पष्टीकरणत्वं तेजसो लक्षणम् ॥ ३९ ॥ प्रकाशनं तंदुलादेः पचनं शीतनाशनं द्रव्यशोषणादयस्तेजसो वृत्तयः ॥४०॥ रूपमात्रात्तेजसो विकुर्वाणाद्रसमात्रं जलं बभूव। तस्माद्रसग्राहिणी जिह्वा बभूव ॥ ४१ ॥ एको रसः संसर्गिद्रव्याणां विकारेण कषायमधुरतिक्तकट्वम्लाद्यनेकधा विभिद्यते ॥४२॥ आर्द्रीकरणं मृत्तिकादेः पिंडीकरणं तृप्तिदातृत्वं जीवनं तथा तृषादुःखनिवारणाद्या जलस्य वृत्तयः ॥४३॥ रसमात्रादंभसो विकुर्वाणाद्गंधवती पृथ्वी बभूव । ततो घ्राणम् ॥४४॥ एको गंधो–मिश्रगंधदुर्गंधसुगंधादिभिरनेकधा भिद्यते ॥४५॥ हरेः प्रतिमादिरूपेण साकारताप्रतिपादनं भूतानां स्थानं जलादीनां धारणत्वं पृथिव्या लक्षणम् ॥४६॥ आकाशस्य विशेषो गुणः श्रोत्रम् । वायोर्विशेषो गुणः स्पर्शनम् ॥४७॥ तेजसो विशेषो गुणश्चक्षुः । अंभ-

द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ॥ तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ॥३९॥ द्योतनं पचनं पानमदनं हिममर्दनम् ॥ तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ॥ ४० ॥ रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात् ॥ रसमात्रमभूत्तस्मादंभो जिह्वा रसग्रहः ॥ ४१ ॥ कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा ॥ भौतिकानां विकारेण रस एको विभिद्यते ॥ ४२ ॥ क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोंदनम् ॥ तापापनोदो भूयस्त्वमंभसो वृत्तयस्त्विमाः॥४३॥ रसमात्राद्विकुर्वाणादंभसो दैवचोदितात् ॥ गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः ॥४४॥ करंभपूतिसौरभ्यशांतोग्राम्लादिभिः पृथक् ॥ द्रव्यावयववैषम्याद्गंध एको विभिद्यते ॥४५॥ भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम् ॥ सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् ॥४६॥ नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते ॥ वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः ॥ ४७ ॥ तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते ॥ अंभोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः ॥ भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते ॥ ४८ ॥ परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् ॥ अतो विशेषो भावानां भूमावेवोपलक्ष्यते ॥ ४९ ॥ एतान्यसंहत्य यदा महदादीनि सप्त वै ॥ कालकर्मगुणोपेतो जगदादिरुपाविशत् ॥ ५० ॥ ततस्तेनानुविद्धेभ्यो युक्तेभ्योंऽडमचेतनम् ॥ उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥ ५१ ॥ एतदंडं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ॥ तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ॥ यत्र लोकवितानोऽयं रूपं भगवतो हरेः ॥ ५२ ॥ हिरण्मयादंडकोशादुत्थाय सलिलेशयात् ॥ तमाविश्य महादेवो बहुधा निर्बिभेद खम् ॥ ५३ ॥ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् ॥ वाण्या वह्निरथो नासे प्राणोऽतो घ्राण एतयोः॥ ५४ ॥ ॥ ॥

सो विशेषो गुणो जिह्वा । भूमेर्विशेषो गुणो घ्राणम् ॥४८॥ कारणस्य धर्मः कार्ये दृश्यते । अत आकाशादीनां शब्दादयः सर्वे गुणा भूमावेवोपलक्ष्यंते ॥४९॥ एतानि महदादीनि सप्त तत्वानि यदाऽमिलित्वा स्थितानि तदेश्वरस्तेषु प्राविशत् ॥ ५० ॥ तत ईश्वरेण क्षोभितेभ्यस्तत्वेभ्योऽचेतनमंडमुत्थितम् । ततो विराट्पुरुष उदतिष्ठत् ॥५१॥ एतदंडं भगवतो रूपम् यत्रेयं लोकस्थितिर्वर्तते ॥५२॥ तत्प्रकारमाह । अंडमधिष्ठाय स्थितो विराट्पुरुष एव तस्मिन्नंडे बहूनि छिद्राणि चकार ॥५३॥ तत्रादौ विराट्पुरुषस्य मुखं निरभिद्यत । तत्र वाण्या सहाग्निः प्राविशत् । ततो नासे निरभिद्येताम् । तत्र प्राणेन सह वायुः प्राविशत् ॥ ५४ ॥

घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः ॥ तस्मात्सूर्यो व्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः ॥ ५५ ॥ निर्बिभेद विराजस्त्वग्रोमश्मश्वादयस्ततः ॥ तत ओषधयश्चासन् शिश्नं निर्बिभिदे ततः ॥ ५६ ॥ रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् ॥ गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ॥५७॥ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् ॥ पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ॥ ५८ ॥ नाड्योऽस्य निरभिद्यंत ताभ्यो लोहितमाभृतम् ॥ नद्यस्ततः समभवन्नुदरं निरभिद्यत ॥ ५९ ॥ क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ॥ अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ॥ ६० ॥ मनसश्चंद्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः ॥ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥६१॥ एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् ॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ॥६२॥ वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ॥ घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ॥६३॥ अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ॥ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट् ॥ ६४ ॥ त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ॥ रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् ॥ ६५ ॥ गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ॥ हस्ताविंद्रो बलेनैव नोदतिष्ठत्तदा विराट् ॥ ६६ ॥ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ॥ नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ॥ ६७ ॥ क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट् ॥ हृदयं मनसा चंद्रो नोदतिष्ठत्तदा विराट् ॥ ६८ ॥ बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट् ॥ रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट् ॥ ६९ ॥ ॥ ॥ ॥

ततोऽक्षिणी निरभिद्येताम् । तत्र चक्षुषा सह सूर्यः प्राविशत् । ततः कर्णौ निरभिद्येताम् । तत्र श्रोत्रेण सह दिशः प्राविशन् ॥५५॥ अथ तस्य त्वग् निरभिद्यत । ततो रोमश्मश्वादयः । तेभ्य औषधय आसन् । ततः शिश्नं समुत्पन्नम् ॥५६॥ तत्र रेतसा सहापः प्राविशन् । गतो गुदं निरभिद्यत । तत्रापानवायुना सह मृत्युः प्राविशत् ॥ ५७ ॥ ततो हस्तौ जातौ । तत्र बलेन सहेंद्रः प्राविशत् । ततोऽस्य पादौ जातौ । तत्र गत्या सह हरिः प्राविशत् ॥ ५८ ॥ ततोऽस्य नाड्यो जाताः । तेषु रक्तेन सह नद्यः प्राविशन् । तत उदरं जातम् ॥५९॥ तत्र क्षुत्तृड्भ्यां सह समुद्रः प्राविशत् । अथास्य हृदयं समुत्पन्नम् । तत्र मनोबुद्ध्यहंकारचित्तैः सह चंद्रब्रह्मरुद्रक्षेत्रज्ञाः प्राविशन् ॥ ६० ॥ ६१ ॥ एवमुत्पन्ना एते देवा विराट्पुरुषमुत्थापयितुं नाशकन् । तदा पुनस्तमुत्थापयितुं क्रमात्स्वस्वच्छिद्राणि विविशुः ॥६२॥ तदेवाह । वह्निर्वाचा सह मुखं प्रविवेश । तदा विराट्पुरुषो नोदतिष्ठत् । ततो वायुर्घ्राणेन नासिके प्रवि० । तदा विराट् नोद० ॥६३॥ सूर्यश्चक्षुषा सहाक्षिणी प्रवि० । तदा विरा०नोद० । दिशः श्रोत्रेण सह कर्णौ प्राविशन् । तदा विरा० नोदति० ॥६४॥ ओषध्यो रोमभिस्त्वचं प्राविशन् । तदा विरा० नोद० । आपो रेतसा सह शिश्नं प्राविशन् । तदा विरा० नोद० ॥ ६५ ॥ मृत्युरपानवायुना सह गुदं प्रविवेश । तदा विरा० नोद० । इंद्रो बलेन सह हस्तौ प्रवि० । तदा विरा० नोद० ॥६६॥ विष्णुर्गत्या सह चरणौ प्रविवेश । तदा विरा० नोद० । नद्यो रक्तेन सह नाडीः प्राविशन् । तदा विरा० नोद० ॥६७॥ समुद्रः क्षुत्तृड्भ्यां सहोदरं प्रविवेश । तदा विरा० नोद० । चंद्रो मनसा सह हृदयं प्राविशत् । तदा विरा० नोद० ॥६८॥ ब्रह्मा बुद्ध्या सह हृदयं प्राविशत् ।

तदा विरा॰ नोद॰ । रुद्रोऽप्यहंकारेण सह हृदयं प्राविशत् । तदापि विरा॰ नोद॰ ॥६९॥ अथ क्षेत्रज्ञश्चित्तेन सह यदा हृदयं प्राविशत्। तदैव विराट्पुरुषः सलिलादुदतिष्ठत् ॥७०॥ यथा प्राणेंद्रियमनोधियः सुप्तं पुरुषं जीवेन विनोत्थापयितुं न समर्थास्तथाऽग्न्यादयो देवा अपि क्षेत्रज्ञं विना विराट्पुरुषमुत्थापयितुं न समर्थाः ॥७१॥ तं क्षेत्रज्ञं भक्त्या विरक्त्या ज्ञानेन च देहे विचार्य चिंतयेत् ॥७२॥ इति श्रीमद्भागवतचू॰ तृतीयस्कंधे षड्विंशोऽध्यायः ॥२६॥ ॥ सप्तविंशे ततः सम्यग्बहुसाधनयोगतः । पुंप्रकृत्योर्विवेकेन मोक्षरीतिर्निरूप्यते ॥ १ ॥ श्रीकपिल उवाच ॥ पुरुषो देहस्थोऽपि देहकृतैः सुखदुःखादिगुणैर्न लिप्यते। अविकारादकर्तृत्वान्निर्गुणत्वाच्च । यथा जलबिंबितसूर्यस्य जलगतकंपादिधर्मे भासमानेऽप्याकाशस्थो बिंबभूतः सूर्यो जलगतकंपादिधर्मैर्न युज्यते तद्वत् ॥१॥

चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा ॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥ ७० ॥ यथा प्रसुप्तं पुरुषं प्राणेंद्रियमनोधियः ॥ प्रभवंति विना येन नोत्थापयितुमोजसा ॥ ७१ ॥ तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया ॥ भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत् ॥ ७२ ॥ इति श्रीमद्भागवते महापुराणे तृतीय॰ षड्विंशतितमोऽध्यायः ॥ २६॥ ॥ श्रीभगवानुवाच ॥ प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ॥ १ ॥ स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते ॥ अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते ॥२॥ तेन संसारपदवीमवशोऽभ्येत्य निर्वृतः ॥ प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ॥३॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥४॥ अत एव शनैश्चित्तं प्रसक्तमसतां पथि ॥ भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशम् ॥ ५ ॥ यमादिभिर्योगपथैरभ्यसन् श्रद्धयान्वितः ॥ मयि भावेन सत्येन मत्कथाश्रवणेन च ॥६॥ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ॥ ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा ॥ ७ ॥ यदृच्छयोपलब्धेन संतुष्टो मितभुङ् मुनिः ॥ विविक्तशरणः शांतो मैत्रः करुण आत्मवान् ॥ ८ ॥ सानुबंधे च देहेऽस्मिन्नकुर्वन्नसदाग्रहम् ॥ ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ॥ ९ ॥ निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः ॥ उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक् ॥ १० ॥ मुक्तलिंगं सदाभासमसति प्रतिपद्यते ॥ सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयम् ॥ ११ ॥ यथा जलस्थ आभासः स्थलस्थेनावदृश्यते ॥ स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः ॥ १२ ॥ ॥ ॥

स एव पुरुषः प्रकृतेर्गुणेषु सक्तो भूत्वा कर्तास्मीत्यभिमन्यते ॥२॥ तेन प्रकृतिसंगकृतैः कर्मदोषैर्देवतिर्यङ्मनुष्यादियोनिषु संसारं प्राप्नोति ॥३॥ तथ्यांशेऽविद्यमानेऽपि जीवस्य संसारो न निवर्तते ॥४॥ अत एवासतां मार्गे सक्तं चित्तं भक्तियोगेन वैराग्येण च शनैः स्वाधीनं कुर्यात् ॥५॥ यमनियमादियोगमार्गैर्मयि निष्कपटेन भावेन मत्कथाश्रवणेन ॥ ६ ॥ सर्वभूतेषु समत्वेन निर्वैरेण संगत्यागेन मौनेन ॥ ७ ॥ यदृच्छालाभसंतोषेण परिमितभोजनेनैकांतसेवनेन शांत्या करुणया ॥८॥ स्त्रीपुत्रादिसहिते देहे ममतात्यागेन ज्ञानेन ॥९॥ एतैरुपायैर्बुद्धेर्जाग्रदाद्यवस्थाधर्मो भेदबुद्धिश्च निवर्तते । ततश्चक्षुरवच्छिन्नेनार्केण गगनस्थं सूर्यमिवाहंकारावच्छिन्नेनात्मना शुद्धमात्मानं पश्यन् ॥१०॥ निरुपाधिकं परिपूर्णं ब्रह्म प्राप्नोति ॥११॥ किंच । गृहकोणस्थितैः पुरुषैर्भित्त्यादौ स्थितेन सूर्यप्रति-

बिंबेन यथा प्रथमं जलस्थः सूर्यप्रतिबिंबो दृश्यते तेन चाकाशस्थितः सूर्यो लक्ष्यते ॥१२॥ एवं देहेंद्रियमनोभिरात्मबिंबैर्ब्रह्मप्रतिबिंबोऽहंकारो लक्षितो भवति। अहंकारेण च परमार्थज्ञानरूप आत्मा लक्षितो भवति ॥ १३ ॥ इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभवतो दर्शयति। हे मातः, भूतेंद्रियमनआदिषु निद्रया लीनेषु सत्सु यस्तत्र सदा निद्रारहितो निरहंकारः ॥१४॥ स आत्मा सुषुप्तौ अहंकारे नष्टे सति स्वयमनष्टोऽपि मृषैवात्मानं नष्टवन्मन्यते। यथा नष्टवित्तः पुरुषो विवशः सन्नष्टवद्भवति तद्वत् ॥१५॥ एवं विचार्य विवेकी पुरुष आत्मानं प्रतिपद्यते ॥१६॥ देवहूतिरुवाच ॥ हे कपिल, प्रकृतिपुरुषयोरन्योन्याश्रयत्वान्नित्यत्वाच्च प्रकृतिः पुरुषं न मुंचति ॥१७॥ यथा गंधस्य भूमेश्च पृथग्भेदो न भवति। एवं प्रकृतिपुरुषयोरपि भेदो न भवति ॥ १८ ॥ तस्मात्प्रकृतेर्गुणै-

एवं त्रिवृदहंकारो भूतेंद्रियमनोमयैः॥ स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक् ॥ १३ ॥ भूतसूक्ष्मेंद्रियमनोबुद्ध्यादिष्विह निद्रया॥ लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः॥१४॥ मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा॥ नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः ॥ १५ ॥ एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते॥ साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः॥१६॥ देवहूतिरुवाच॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित्॥ अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो॥१७॥ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः॥ अपां रसस्य च यथा तथा बुद्धेः परस्य च ॥१८॥ अकर्तुः कर्मबंधोऽयं पुरुषस्य यदाश्रयः॥ गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम्॥१९॥ क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणम्॥ अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते॥२०॥ श्रीभगवानुवाच॥ अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना ॥ तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरम्॥२१॥ ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा॥ तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना॥ २२॥ प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् ॥ तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः॥२३॥ भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः ॥ नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च ॥२४॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥२५॥ एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसम् ॥ युंजतो नापकुरुत आत्मारामस्य कर्हिचित् ॥ २६ ॥ यदैवमध्यात्मरतः कालेन बहुजन्मना॥ सर्वत्र जातवैराग्य आब्रह्मभवनान्मुनिः॥२७॥ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा ॥ निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम्॥२८॥ प्राप्नोतीहांजसा धीरः स्वदृशा छिन्नसंशयः॥ यद्गत्वा न निवर्तेत योगी लिंगाद्विनिर्गमे॥२९॥

रकर्तुः पुरुषस्य कर्मबंधो भवति चेत्तर्हि तेषु गुणेषु सत्सु तस्य पुरुषस्य कैवल्यं कथं भवतीति वद ॥१९॥ क्वचित्तत्वविचारेण गतप्रायस्यापि संसारस्य प्रकृतेर्गुणानां विद्यमानत्वात्पुनरुद्भवो दृश्यते ॥२०॥ श्रीकपिल उवाच ॥ निष्कामेण स्वधर्मेण तीव्रया भक्त्या ॥२१॥ ज्ञानेन वैराग्येण योगेन समाधिना च ॥२२॥ अहर्निशमभिभूयमाना पुरुषस्य प्रकृतिः शनैरंतर्हिता भवति ॥२३॥ भुक्तभोगा परित्यक्ता दृष्टदोषा च सा प्रकृतिः स्वानंदं प्राप्तस्य पुरुषस्याशुभं न धत्ते ॥ २४ ॥ यथा जाग्रतः पुंसः संस्कारवशेन स्फुरन्नपि स्वप्नो मोहाय न कल्पते ॥२५॥ एवं विदिततत्त्वस्य मयि मानसं युंजतः पुंसः प्रकृतिरपकारं न कुरुते ॥ २६ ॥ अतो यदा बहुजन्मना कालेन सर्वत्र जातवैराग्यः ॥२७॥ आत्मज्ञानेन छिन्नसंशयो मद्भक्तो भवति ॥ २८ ॥ तदा कैवल्याख्यं मत्स्थानं प्राप्नोति ॥ २९ ॥

यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेऽङ्ग ॥ अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः ॥३०॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने सप्तविंशतितमोऽध्यायः ॥ २७ ॥ ॥ श्रीभगवानुवाच ॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ॥ मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥ १ ॥ स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम् ॥ दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनम् ॥२॥ ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा ॥ मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ॥३॥ अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ॥ ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ॥४॥ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः ॥ प्रत्याहारश्चेंद्रियाणां विषयान्मनसा हृदि ॥ ५ ॥ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम् ॥ वैकुंठलीलाभिध्यानं समाधानं तथाऽऽत्मनः ॥ ६ ॥ एतैरन्यैश्च पथिभिर्मनो दुष्टमसत्पथम् ॥ बुद्ध्या युंजीत शनकैर्जितप्राणो ह्यतंद्रितः ॥७॥ शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम् ॥ तस्मिन्स्वस्ति समासीन ऋजुकायः समभ्यसेत् ॥८॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलम् ॥ ९ ॥ मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः ॥ वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम् ॥१०॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् ॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥११॥ यदा मनः स्वं विरजं योगेन सुसमाहितम् ॥ काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः ॥ १२ ॥ ॥

तस्य च तदा विघ्नरूपा अणिमादिसिद्धयः प्राप्ता भवंति । तासु यदि तस्य मनो न सज्जेत्तर्हि स मृत्युरहितामात्यंतिकीं गतिं प्राप्नोति ॥३०॥ इति श्रीमद्भागवतचू॰ तृती॰ सप्तविंशोऽध्यायः ॥२७॥ ॥ अष्टाविंशे ततोऽष्टांगयोगेन ध्यानशोभिना । सर्वोपाधिविनिर्मुक्तस्वरूपज्ञानमीर्यते ॥१॥ भक्तिं संक्षेपतः प्रोच्य सांख्यमाख्याय विस्तृतम् । अथाह वैष्णवं योगमष्टांगं कपिलो हरिः ॥ २ ॥ श्रीभगवानुवाच ॥ हे मातः, तव सबीजस्य[1] योगस्य लक्षणं वक्ष्ये । श्रृणु । येन योगेन प्रसन्नं मनः सन्मार्गं याति ॥१॥ शक्त्या स्वधर्माचरणम् । विधर्माच्च निवर्तनम् । दैवाल्लब्धेन संतोषः । आत्मविदां चरणपूजनम् ॥ २ ॥ धर्मार्थकामप्रतिपादकात्कर्मान्निवृत्तिः । मोक्षधर्मे रतिः । मितशुद्धभोजनम् । एकांतसेवनम् ॥३॥ अहिंसा सत्यं अस्तेयं यावत्कार्यं वस्तुनो ग्रहणं ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ॥४॥ मौनं आसनजयः स्थैर्यम् प्राणजयः विषयेभ्य इंद्रियाणामाकर्षणम् ॥५॥ मूलाधारादिषट्चक्राणां मध्ये एकस्मिन् स्थाने मनसा सह प्राणधारणम् ॥६॥ एतैरन्यैश्च व्रतादिभिर्मार्गैर्मनो बुद्ध्या युंजीत ॥७॥ ततः शुचौ देशे आसने स्थित्वा ऋजुकायः ॥ ८ ॥ पूरकुंभकरेचकैः[2] प्राणमार्गं संशोध्य चित्तं स्थिरीकुर्यात् ॥९॥ तदा जितश्वासस्य योगिनो मनः शुद्धं स्यात् ॥१०॥ प्राणायामैर्वातश्लेष्मादिदोषान् धारणया पापं इंद्रियाकर्षणेन विषयसंसर्गान् ध्यानेन क्रोधादिदोषांश्च दहेत् ॥११॥ यदा मनः स्थिरं भवेत्तदा स्वनासाग्रावलोकनो योगी भगवतो रूपं ध्यायेत् ॥१२॥ ॥ ॥

---

[1] योगो द्विविधः । सबीजो निर्बीजश्च । तत्र शनैः शनैरुपरमेदित्यादिगीतोक्तो निरालंबो निर्बीजः । स दुष्करः । भगवद्ध्यानरूपः सालंबः सबीजः स सुकरः । तस्य लक्षणं वक्ष्य इत्यर्थः ।

[2] बाह्यवायोरंतः प्रवेशनं पूरकः । प्रवेशितस्य धारणं कुंभकः । धृतस्य बहिर्निःसारणं रेचकः ।

कथंभूतं रूपम् । प्रसन्नवदनं अरुणलोचनं श्यामं शंखचक्रगदाधरम् ॥१३॥ पीतांबरधरं श्रीवत्सवक्षसं ग्रीवायां कौस्तुभधरम् ॥१४॥ वनमालया व्याप्तं अमूल्यहारवलयकिरीटांगदनूपुरैः शोभितम् ॥१५॥ भक्तानां हृत्कमले स्थितं शांतम् ॥ १६ ॥ अतिसुंदरदर्शनं सर्वलोकनमस्कृतम् ॥ १७ ॥ पुण्यश्लोकयशस्करं एतादृशं सर्वावयवयुक्तं देवं यावन्मनो भगवत्स्वरूपान्न च्यवते तावत् ध्यायेत् ॥ १८ ॥ स्थितं व्रजंतं आसीनं शयानं वा तं ध्यायेत् ॥ १९ ॥ एवं सर्वावयवयुतं हरिं ध्यात्वा तत एकैकावयवं ध्यायेत् ॥२०॥ तत्र पादादि ध्यानम् । आदौ वज्रांकुशध्वजकमलचिह्नयुक्तं भगवतश्चरणकमलं ध्यायेत् ॥ २१ ॥ यत्पादक्षालनेन नदीषु श्रेष्ठा गंगा प्रादुर्भूता । यां शिरसि धृत्वा शिवोऽप्यधिकं सुखं प्राप ॥२२॥ ततो ब्रह्मादिभिर्वंदितया लक्ष्म्या स्वकीययोरूर्वोर्निधाय करपल्लवकांत्या संलालितं भगवतो जानुद्वयं ध्यायेत् ॥२३॥ ततो गरुडस्कंधोपरि शोभमानावूरू ध्यायत् । ततो गुल्फपर्यंतं लंबायमानपीतांबरेण कांच्या च शोभितं कटिप्रदेशं ध्यायेत् ॥२४॥ ततो हरेः सर्वजगदधिष्ठाने उदरे स्थितं नाभिह्रदं ध्यायेत् । यत्र नाभिह्रदे ब्रह्मणः स्थानं लोककमलं बभूव ॥२५॥ ततः श्रेष्ठस्य भगवतो लक्ष्म्या अधिवासं वक्षःस्थलं कौस्तुभभूषितं कंठं च मनसा ध्यायेत् ॥ २६ ॥ तत इंद्रादिलोकपालानामाश्रयान् बाहून् सहस्रारं चक्रं शंखं च चिंतयेत् ॥ २७ ॥

प्रसन्नवदनांभोजं पद्मगर्भारुणेक्षणम् ॥ नीलोत्पलदलश्यामं शंखचक्रगदाधरम् ॥ १३ ॥ लसत्पंकजकिंजल्कपीतकौशेयवाससम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरम् ॥१४॥ मत्तद्विरेफकलया परीतं वनमालया ॥ परार्ध्यहारवलयकिरीटांगदनूपुरम् ॥ १५॥ कांचीगुणोल्लसच्छ्रोणिं हृदयांभोजविष्टरम् ॥ दर्शनीयतमं शांतं मनोनयनवर्धनम् ॥ १६ ॥ अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतम् ॥ संतं वयसि कैशोरे भृत्यानुग्रहकातरम् ॥१७॥ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम् ॥ ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः ॥१८॥ स्थितं व्रजंतमासीनं शयानं वा गुहाशयम् ॥ प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा ॥ १९ ॥ तस्मिँल्लब्धपदं चित्तं सर्वावयवसंस्थितम् ॥ विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः ॥ २० ॥ संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यम् ॥ उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारम् ॥२१॥ यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ॥ ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदम् ॥ २२ ॥ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवंदितया विधातुः ॥ ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् ॥२३॥ ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ ॥ व्यालंबिपीतवरवाससि वर्तमानकांचीकलापपरिरंभि नितंबबिंबम् ॥ २४ ॥ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मम् ॥ व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरम् ॥२५॥ वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानम् ॥ कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य ॥ २६ ॥ बाहूंश्च मंदरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् ॥ संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करसरोरुहराजहंसम् ॥ २७ ॥ ॥ ॥

युद्धे शत्रुरक्तकर्दमेन लिप्तां गदां कंठे मालां कौस्तुभं च स्मरेत् ॥२८॥ ततो मकराकारकुंडलयोः प्रचलनेन प्रकाशितगल्लं हरेर्मुखकमलं चिंतयेत् ॥ २९ ॥ ततो वक्रकुंतलसमूहसेवितं उल्लसद्भ्रुकुटियुक्तं कमलसदृशं नेत्रद्वयं ध्यायेत् ॥३०॥ ततो विपुलप्रसादं भक्ततापत्रयोपशमनकरं भगवतोऽवलोकं ध्यायेत् ॥३१॥ ततोऽखिलशोकाश्रुसागरशोषणं हरेर्मंदहासं ध्यायेत् । ततोऽत्युदारं मदनस्यापि मोहनाय रचितं भ्रूमंडलं ध्यायेत् ॥३२॥ ततोऽधरोष्ठकांत्या स्फुरदरुणदंतपंक्तियुक्तं हरेरुच्चैर्हसितं ध्यायेत् । एवं विष्णोः स्वरूपं हृदि ध्यायन् विष्णौ चित्तं स्थिरं कृत्वान्यत्किंचिदपि न चिंतयेत् ॥३३॥ एवं स्वहृदयाकाशे हरौ प्राप्तभावो भक्त्या

कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन ॥ मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कंठे ॥२८॥ भृत्यानुकंपितधियेह गृहीतमूर्तेः संचिंतयेद्भगवतो वदनारविंदम् ॥ यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतितामलकपोलमुदारनासम् ॥ २९ ॥ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुंतलवृंदजुष्टम् ॥ मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु ॥३०॥ तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय विसृष्टमक्ष्णोः ॥ स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहायाम् ॥३१ ॥ हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम् ॥ संमोहनाय रचितं निजमाययास्य भ्रूमंडलं मुनिकृते मकरध्वजस्य ॥३२॥ ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ॥ ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत् ॥३३॥ एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ॥ औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते ॥ ३४॥ मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः ॥ आत्मानमत्र पुरुषो व्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ ३५ ॥ सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये ॥ हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः ॥३६॥ देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यगमत्स्वरूपम् ॥ दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः ॥ ३७ ॥ देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३८ ॥ यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते ॥ अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ॥ ३९ ॥ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात् ॥ अप्यात्मत्वेनाभिमतात्तदग्निः पृथगुल्मुकात् ॥ ४० ॥ ॥

द्रवद्धृदयो हर्षाद्रोमांचितशरीर आनंदसमुद्रे निमग्नः पुमान् ध्यानसाधनभूतस्य चित्तस्य धारणेऽपि शिथिलप्रयत्नो भवति ॥३४॥ ततो ध्यातृध्येयविभागशून्यमखंडमात्मानं य ईक्षते ॥३५॥ स सुखदुःखादिकं सर्वमहंकारनिष्ठं पश्यति ॥ ३६ ॥ एवं सति देहाद्युपाधिनिर्मुक्तो भूत्वा जीवन्मुक्तो भवति । किंच । स्वदेहं स्थितं उत्थितं गतं प्राप्तं वा न पश्यति ॥३७॥ किंच । सेंद्रियो जीवोऽपि पूर्वसंस्कारवशेन यावत्प्रारब्धं कर्म तावज्जीवत्येव ॥३८॥ यथा पुत्रान्मित्राच्च मनुष्यः पृथग्दृश्यते तथात्मापि देहात्पृथक् ज्ञातव्यः ॥३९॥ यथा ज्वलत्काष्ठात् अग्निसंभूताद्धूमाद्वापि तद्दाहकः प्रकाशकश्चाग्निः पृथगेव ॥ ४० ॥ ॥

भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् ॥ आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ॥ ४१ ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ ईक्षेतानन्यभावेन भूतेष्विव तदात्मताम् ॥ ४२ ॥ स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते ॥ योनीनां गुणवैषम्यात्तथाऽऽत्मा प्रकृतौ स्थितः ॥ ४३ ॥ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकाम् ॥ दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ॥४४॥ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेये साधनानुष्ठानं नामाष्टाविंशतितमोऽध्यायः ॥ २८ ॥

॥ देवहूतिरुवाच ॥ लक्षणं महदादीनां प्रकृतेः पुरुषस्य च ॥ स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकम् ॥ १ ॥ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते ॥ भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो ॥ २ ॥ विरागो येन पुरुषो भगवन्सर्वतो भवेत् ॥ आचक्ष्व जीवलोकस्य विविधा मम संसृतीः ॥ ३ ॥ कालस्येश्वररूपस्य परेषां च परस्य ते ॥ स्वरूपं बत कुर्वंति यद्धेतोः कुशलं जनाः ॥ ४ ॥ लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये ॥ श्रांतस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः ॥ ५ ॥ मैत्रेय उवाच ॥ इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः ॥ आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः ॥ ६ ॥ श्रीभगवानुवाच ॥ भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते ॥ स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ॥ ७ ॥ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा ॥ संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामसः ॥८॥ विषयानभिसंधाय यश ऐश्वर्यमेव वा ॥ अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः॥९॥कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणम् ॥ यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः॥१०॥

एवंभूतेंद्रियांतःकरणाज्जीवसंज्ञितात् प्रधानाद्ब्रह्मसंज्ञित आत्मा पृथक् ॥ ४१ ॥ एवमुपाधितः पृथक्त्वमुक्त्वा तस्यैक्यमाह । सर्वभूतेष्वात्मानं सर्वभूतान्यात्मनि चानन्यभावेन पश्येत् ॥४२॥ यथा स्वोत्पत्तिस्थानेषु काष्ठेषु दीर्घह्रस्वादिरूपोऽग्निर्दृश्यते तथात्मा देवमनुष्यादिशरीरेषु तत्तत्स्वभावः प्रतीयते ॥४३॥ तस्मात्साधक इमां जीवस्य बंधहेतुं दैवीं प्रकृतिं तस्य देवस्य प्रसादेनैव जित्वा ब्रह्मत्वेनावतिष्ठते ॥४४॥ इति श्रीमद्भागवतचू०तृती०अष्टाविंशोऽध्यायः॥२८॥ एकोनत्रिंशके भक्तियोगस्तु बहुधोच्यते । कालस्य च बलं घोरा संसृतिश्च विरक्तये ॥ १ ॥ देवहूतिरुवाच ॥ हे भगवन्, प्रकृतेः पुरुषस्य महदादीनां च लक्षणं कथितम् । अधुना भक्तियोगस्य मार्गं मे विस्तरेण वद॥१॥२॥ जीवलोकस्य विविधाः संसृतीः कथय । यासां ज्ञानेन मुमुक्षोर्वैराग्यं भवेत् ॥३॥ ईश्वररूपस्य कालस्य स्वरूपं च वद ॥४॥ हे कपिल, संसारे पतितस्याज्ञस्य जनस्य प्रबोधाय त्वं योगसूर्य आविर्भूतोऽसि ॥ ५ ॥ मैत्रेय उवाच ॥ हे विदुर, इति मातुर्वचः श्रुत्वा प्रीतः कपिलस्तामाह ॥६॥ कपिल उवाच । हे देवहूति, पुरुषाणां फलसंकल्पभेदेन भक्तियोगो बहुविधो भवति ॥७॥ स यथा—यो भक्तो जीवात्मपरमात्मभेददर्शी सन् हिंसां दंभं मत्सरं च संकल्प्य मयि भक्तिं करोति स संकल्पानुसारेण कनिष्ठो मध्यम उत्तमश्च तामसो ज्ञेयः ॥ ८ ॥ यो भेददर्शी विषयान् कीर्तिमैश्वर्यं च संकल्प्य मां पूजयेत्स कनिष्ठो मध्यम उत्तमश्च राजसः ॥९॥ यश्च भेददर्शी पापक्षयं ईश्वरप्रीतिं यष्टव्यमिति वेदाज्ञां च संकल्प्य कर्म करोति स कनिष्ठो मध्यम उत्तमश्च सात्विकः । एवं श्रवणकीर्तनादिनवविधभक्तीनां प्रत्येकं नव नव भेदत्वेन ८१ एकाशीतिर्भक्तिभेदा भवंति ॥ १० ॥

निर्गुणा भक्तिस्त्वेकैव । मद्गुणश्रुतिमात्रेण सर्वांतर्यामिणि मयि फलानुसंधानशून्या अविच्छिन्ना या मनोगतिः सा निर्गुणस्य भक्तियोगस्य लक्षणमुक्तम् ॥११॥१२॥ तां निर्गुणां भक्तिं कुर्वतो जना मत्सेवनं विना सलोकतासमीपतासरूपतासायुज्यतारूपां चतुर्विधां दीयमानामपि मुक्तिं न गृह्णंति ॥ १३ ॥ स आत्यंतिको भक्तियोग उच्यते । येन गुणत्रयं हित्वा जीवो ब्रह्मत्वाय कल्पते ॥१४॥ अथ निर्गुणभक्तेः साधनान्याह । स्वधर्मेण कर्मयोगेन ॥१५॥ मन्मूर्तिदर्शनस्पर्शनपूजास्तुत्यभिवंदनैर्भूतेषु मद्भावनया वैराग्येण ॥१६॥ महतां बहुमानेन दीनानामनुकंपया आत्मतुल्येषु मैत्र्या यमेन नियमेन ॥ १७॥ वेदांतश्रवणेन मे नामसंकीर्तनेनाऽर्जवेन निरहंकारेण ॥१८॥ एतैरुपायैर्भक्तस्य चित्तं शुद्धं भूत्वा मामेति ॥१९॥ यथा वायुयोगाद्गंधो घ्राणं प्राप्नोति तथा योगरतस्य चित्त-

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ॥ मनोगतिरविच्छिन्ना यथा गंगांभसोंऽबुधौ ॥ ११ ॥ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ १२ ॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ दीयमानं न गृह्णंति विना मत्सेवनं जनाः ॥१३॥ स एव भक्तियोगाख्य आत्यंतिक उदाहृतः ॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥१४॥ निषेवितेनानिमित्तेन स्वधर्मेण महीयसा ॥ क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥१५॥ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः ॥ भूतेषु मद्भावनया सत्येनासंगमेन च ॥१६॥ महतां बहुमानेन दीनानामनुकंपया ॥ मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ॥ १७॥ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे ॥ आर्जवेनार्यसंगेन निरहंक्रियया तथा ॥१८॥ मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः ॥ पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि माम् ॥१९॥ यथा वातरथो घ्राणमावृंक्ते गंध आशयात् ॥ एवं योगरतं चेत आत्मानमविकारि यत् ॥२०॥ अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा ॥ तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडंबनम् ॥२१॥ यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरम् ॥ हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥२२॥ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः ॥ भूतेषु बद्धवैरस्य न मनः शांतिमृच्छति ॥२३॥ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे ॥ नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः ॥२४॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ॥ यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥२५॥ आत्मनश्च परस्यापि यः करोत्यंतरोदरम् ॥ तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥२६॥ अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ॥ अर्हयेद्दानमानाभ्यां मैत्र्याऽभिन्नेन चक्षुषा ॥२७॥ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ॥ ततः सचित्ताः प्रवरास्ततश्चेंद्रियवृत्तयः ॥ २८ ॥

मात्मानं प्राप्नोति ॥२०॥ यः सर्वभूतेषु स्थितमीश्वरं मामवज्ञाय ॥२१॥ प्रतिमामेव भजते स मौढ्याद्भस्मन्येव जुहोति ॥ २२ ॥ किंच । परकाये आत्मरूपं मां द्विषतो भिन्नदर्शिनो भूतेषु बद्धवैरस्य मनः शांतिं न प्राप्नोति ॥२३॥ भूतादिनिंदकस्य पुंसः बहुद्रव्ययुक्तयापि पूजयाऽहं न तुष्ये ॥२४॥ यावत्स्वहृदि सर्वभूतेषु च स्थितं मां न वेद तावदर्चादौ मामर्चयेत् ॥२५॥ य आत्मनः परस्य स्वल्पमपि भेदं पश्यति तस्य मृत्युरहं भयं करोमि ॥ २६ ॥ तस्मात्सर्वत्र स्थितं मामभिन्नया दृष्ट्या दानमानाभ्यां मैत्र्या च पूजयेत् ॥ २७ ॥ तत्रापि यथोत्तरं मानाद्यतिशयः कार्यः । अचेतनेभ्यः पाषाणादिभ्यः सचेतना वृक्षादयः श्रेष्ठाः ।

तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ॥ तेभ्यो गंधविदः श्रेष्ठास्ततः शब्दविदो वराः ॥२९॥ रूपभेदविदस्तत्र ततश्चोभयतोदतः ॥ तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥३०॥ ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ॥ ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥३१॥ अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् ॥ मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ॥३२॥ तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरंतरः ॥ मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ॥ न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥३३॥ मनसैतानि भूतानि प्रणमेद्बहु मानयन् ॥ ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥३४॥ भक्तियोगश्च योगश्च मया मानव्युदीरितः ॥ ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥३५॥ एतद्भगवतो रूपं ब्रह्मणः परमात्मनः ॥ परं प्रधानं पुरुषं दैवं कर्म विचेष्टितम् ॥३६॥ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते ॥ भूतानां महदादीनां यतो भिन्नदृशां भयम् ॥३७॥ योंऽतः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ॥ स विष्णवाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः ॥ ३८ ॥ न चास्य कश्चिद्दयितो न द्वेष्यो न च बांधवः ॥ आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमंतकृत् ॥ ३९ ॥ यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भायात् ॥ यद्भयाद्वर्षते देवो भगणो भाति यद्भयात् ॥४०॥ यद्वनस्पतयो भीता लताश्चौषधिभिः सह ॥ स्वे स्वे कालेऽभिगृह्णंति पुष्पाणि च फलानि च ॥४१॥ स्रवंति सरितो भीता नोत्सर्पत्युदधिर्यतः ॥ अग्निरिंधे सगिरिभिर्भूर्न मज्जति यद्भयात् ॥४२॥ नभो ददाति श्वसतां पदं यन्नियमाददः ॥ लोकं स्वदेहं तनुते महान्सप्तभिरावृतम् ॥ ४३ ॥ गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात् ॥ वर्ततेऽनुयुगं येषां वश एतच्चराचरम् ॥ ४४ ॥

तेभ्योऽपि ज्ञानेंद्रियवृत्तियुक्ताः सूर्यकमलादयः श्रेष्ठाः ॥२८॥ तेभ्यो मत्स्यादयः श्रेष्ठाः । तेभ्यो भ्रमरादयः । तेभ्यः सर्पादयः ॥ २९ ॥ तेभ्यः काकादयः । तेभ्यः पादरहिता उभयतोदंताः । तेभ्यो बहुपदः । तेभ्यश्चतुष्पादाः । तेभ्यो मनुष्याः श्रेष्ठाः ॥ ३० ॥ मनुष्येषु चत्वारो वर्णाः श्रेष्ठाः । वर्णेषु ब्राह्मणाः । तेषु वेदज्ञः । ततोऽर्थज्ञः ॥३१॥ अर्थज्ञान्मीमांसकः । ततो निष्कामभक्तः ॥३२॥ तस्मान्मय्यर्पिता[1]शेषक्रियार्थात्मा श्रेष्ठः । तस्मादन्यं श्रेष्ठं न पश्यामि॥३३॥ सर्वभूतेष्वीश्वरो जीवकलया प्रविष्ट इति मत्वा मनसा सर्वभूतानि प्रणमेत् ॥ ३४ ॥ हे मानवि, मया भक्तियोगोऽष्टांगयोगश्च ते कथितः । ययोर्मध्ये एकेनापि पुरुषः परमेश्वरं व्रजेत् ॥३५॥ एतत्प्रधानपुरुषात्मकं परमात्मनो भगवतो रूपं दैवमित्यभिधीयते। यस्य प्रेरणेन जीवानां कर्मकृता विचित्राः संसृतयो भवंति ॥३६॥ एतदेव भगवतो रूपं काल इति चाभिधीयते । यतः देहाभिमानिनां जीवानां भयं भवति ॥३७॥ यः कालः सर्वप्राणिनामंतः प्रविश्य भूतैर्भूतानि संहरति ॥३८॥ यस्य कालस्य कश्चित्प्रियो द्वेष्यश्च नास्ति । असौ सावधः सन्नसावधं जनमाविश्य संहरति ॥ ३९ ॥ यद्भयाद्वातो वाति । सूर्यस्तपतींद्रो वर्षति ॥ ४० ॥ यद्भयाद्वनस्पतयो लता ओषधयश्च भीताः संतः स्वे स्वे काले पुष्पाणि फलानि च गृह्णंति ॥ ४१ ॥ यतो भीता नद्यः स्रवंति समुद्रो मर्यादां न त्यजति । अग्निर्दीप्यते भूमिर्न मज्जति ॥४२॥ यस्याज्ञया आकाशं प्राणिनां स्थानं ददाति । तथा महत्तत्वं स्वदेहं सप्तावरणवेष्टितं कृत्वा विस्तारयति॥४३॥ यद्भयाद्ब्रह्मादयो देवा जगतः सृष्ट्यादिषु वारंवारं प्रवर्तंते ॥४४॥ ॥ ॥ ॥

---

[1] अर्पिताः अशेषाः क्रिया अर्थास्तत्फलानि आत्मा देहश्च येन सः ।

एवंभूतोऽनंतः कालः सर्वेषामंतकरः सन् जनं पित्रादिना जनयति मृत्युनांतकमपि मारयति ॥४५॥ इति श्रीमद्भागवतचू॰तृती॰ एकोनात्रिंशोऽध्यायः ॥२९॥
त्रिंशे तु कायकांतादिललनाकुलचेतसाम् । कामिनां तामसी पापादधोगतिरुदीर्यते ॥ १ ॥ कपिल उवाच ॥ तस्यानंतस्य कालस्य विक्रमं कोऽपि न वेद । यथा
विचाल्यमानापि मेघपंक्तिर्वायुविक्रमं न वेत्ति तद्वत् ॥१॥ नरः सुखहेतवे प्रयत्नेन यं यमर्थं संपादयति तं तं कालो विनाशयति ॥२॥ अयं दुर्मतिर्जनः अशाश्वतस्य
देहस्य शाश्वतत्वं मन्यते गृहक्षेत्रद्रव्याणां च स्थिरत्वं मन्यते ॥ ३ ॥ अस्मिन् संसारे जंतुर्यां यां योनिं व्रजेत्तस्यां तस्यां सुखं मन्यते । विरक्तो न भवति
॥४॥ नरकस्थोऽपि देहं त्यक्तुं नेच्छति । तत्रापि सुखं मन्यते ॥५॥ किंच । देहस्त्रीपुत्रगृहपशुद्रव्यबंधुषु विस्तृतमनोरथो जनः कृतार्थोऽस्मीति मन्यते ॥ ६ ॥

सोऽनंतोऽतकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनांतकम् ॥४५॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे
कापिलेयोपाख्याने एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥ कपिल उवाच ॥ तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमम् ॥
काल्यमानोऽपि बलिनो वायोरिव घनावलिः ॥ १ ॥ यं यमर्थमुपादत्ते दुःखेन सुखहेतवे ॥ तं तं धुनोति भगवान्पुमान् शोचति
यत्कृते ॥ २ ॥ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः ॥ ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ॥ ३ ॥ जंतुर्वै भव एतस्मिन्यां
यां योनिमनुव्रजेत् ॥ तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ॥४॥ नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति ॥
नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ॥ ५ ॥ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ निरूढमूलहृदय आत्मानं बहु मन्यते
॥ ६ ॥ संदह्यमानसर्वांग एषामुद्वहनाधिना ॥ करोत्यविरतं मूढो दुरितानि दुराशयः ॥ ७ ॥ आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां
च मायया ॥ रहो रचितयाऽऽलापैः शिशूनां कलभाषिणाम् ॥ ८ ॥ गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः ॥ कुर्वन्दुःखप्रतीकारं
सुखवन्मन्यते गृही ॥ ९ ॥ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् ॥ पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम्
॥ १० ॥ वार्तायां लुप्यमानायामारब्धायां पुनः पुनः ॥ लोभाभिभूतो निःसत्वः परार्थे कुरुते स्पृहाम् ॥ ११ ॥ कुटुंबभरणाकल्पो
मंदभाग्यो वृथोद्यमः ॥ श्रिया विहीनः कृपणो ध्यायन् श्वसिति मूढधीः ॥ १२ ॥ एवं स्वभरणाकल्पं तत्कलत्रादयस्तथा ॥ नाद्रियंते
यथापूर्वं कीनाशा इव गोजरम् ॥ १३ ॥ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः ॥ जरयोपात्तवैरूप्यो मरणाभिमुखो
गृहे ॥ १४ ॥ आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन् ॥ आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः ॥ १५ ॥ ॥

निरंतरं तेषां पोषणचिंतया पातकानि कुरुते ॥७॥ रहसि स्त्रीसंभोगादिसुखेन शिशूनां कलभाषणेन च सुखं मन्यते ॥ ८ ॥ कपटधर्मेषु दुःखबहुलेषु गृहेषु
दुःखप्रतीकारं कुर्वन् सुखवन्मन्यते ॥९॥ येषां पोषणेन पुमान् अधो याति तान् पुत्रादीन् हिंसया संपादितैर्द्रव्यैः पुष्णाति ॥ १० ॥ किंच जीविकायां लुप्यमानायां
अशक्तः सन् परद्रव्ये स्पृहां कुरुते ॥११॥ ततः कुटुंबपोषणेऽसमर्थो द्रव्यहीनः सन् श्वासोच्छ्वासान् मुंचति ॥१२॥ एवं स्वपोषणेऽसमर्थं तं स्त्रीपुत्रादयो
नाद्रियंते । कृषीवला वृद्धबलीवर्दमिव ॥१३॥ तत्राप्यप्राप्तवैराग्यो जरया प्राप्तवैरूप्यो गृहे मरणाभिमुखः सन् ॥१४॥ पुत्रादिभिरपमानेन समीपं प्रक्षि-

समन्नादिकं श्वान इव भुंजानो रोगी निराहारः स्वल्पचेष्टितः सन् आस्ते ॥ १५॥ वायुना बहिर्निर्गतनेत्रोंऽतः कासश्वासकृतायासः कफेन संरुद्धनाडीमार्गः कंठे घुरघुरशब्दं करोति ॥१६॥ तदा कालपाशवशं गतः शोचद्भिः स्वजनबंधुभिर्वेष्टितो हे बंधो, हे तातेति हूयमानोऽपि गुरुवेदनया न ब्रूते ॥१७॥ किंतु । कालपाशवशंगतः सन् स्वानां रुदतां सतां म्रियते ॥१८॥ स तदा प्राप्तौ भयंकरौ द्वौ यमदूतौ दृष्ट्वा त्रस्तहृदयः सन् शकृन्मूत्रं मुंचति ॥ १९ ॥ ततस्तौ यमदूतौ तं यातनादेहे निरुद्ध्य गले पाशैर्बद्ध्वा दीर्घं मार्गं नयतः । इह राजदूता दंडार्हं पुरुषं यथा नयंति तद्वत् ॥२०॥ ततो दूतयोस्तर्जनैर्भिन्नहृदयः पथि श्वभिर्भक्ष्यमाणः स्वपापं स्मरन् ॥२१॥ क्षुधातृषायुक्तः सूर्यकिरणदावानलवायुभिस्तप्तः पृष्ठे कशया ताडितस्तप्तवालुके पथि निराश्रमोदकेऽशक्तोऽपि चलति ॥ २२ ॥

वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः ॥ कासश्वासकृतायासः कंठे घुरघुरायते ॥१६॥ शयानः परिशोचद्भिः परिवीतः स्वबंधुभिः ॥ वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः॥१७॥एवं कुटुंबभरणे व्यापृतात्माऽजितेंद्रियः॥म्रियते रुदतां स्वानामुरुवेदनयास्तधीः॥१८॥ यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ ॥ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति ॥१९॥ यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात् ॥ नयतो दीर्घमध्वानं दंड्यं राजभटा यथा ॥ २० ॥ तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः ॥ पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् ॥२१॥ क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके ॥ कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रमोदके ॥२२॥ तत्र तत्र पतन् श्रांतो मूर्छितः पुनरुत्थितः ॥ पथा पापीयसा नीतस्तमसा यमसादनम् ॥ २३ ॥ योजनानां सहस्राणि नवतिं नव चाध्वनः ॥ त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः॥२४॥आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः॥ आत्ममांसादनं क्वापि स्वकृतं परतोऽपि वा॥२५॥ जीवतश्चांत्राभ्युद्धारः श्वगृध्रैर्यमसादने ॥ सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसम्॥२६॥ कृंतनं चावयवशो गजादिभ्यो भिदापनम् ॥ पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्तयोः ॥२७॥ यास्तामिस्रांधतामिस्रा रौरवाद्याश्च यातनाः॥भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः॥२८॥अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते॥या यातना वै नारक्यस्ता इहाप्युपलक्षिताः ॥२९॥एवं कुटुंबं बिभ्राण उदरंभर एव वा ॥ विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशम् ॥३०॥ एकः प्रपद्यते ध्वांतं हित्वेदं स्वकलेवरम् ॥ कुशलेतरपाथेयो भूतद्रोहेण यद्भृतम् ॥३१॥ दैवेनासादितं तस्य शमलं निरये पुमान् ॥ भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः ॥३२॥

तत्र तत्र पतन् श्रांतो मूर्छितः पुनरुत्थित एवं यमसदनं द्वाभ्यां त्रिभिर्वा मुहूर्तैं ९९नवनवतिसहस्रयोजनानि नीतः सन् यातनाः प्राप्नोति ॥ २३ ॥ २४ ॥ तत्र यमलोके स्वगात्राणां ज्वलनं स्वमांसभक्षणम्॥२५॥श्वगृध्रैरंत्राभ्युद्धारं दशद्भिः सर्पवृश्चिकादिभिः पीडाम् ॥२६॥ अवयवानां छेदनं गिरिशृंगेभ्यः पातनं जलगर्तयो रोधनं च प्राप्नोति॥२७॥ तामिस्त्ररौरवाद्याश्च नरकयातना नरो वा नारी वा मिथः संगेन निर्मिता भुंक्ते॥२८॥ हे मातः, नरकः स्वर्गश्चात्रैव। तत्रत्यं सुखदुःखादि अत्रापि कीटकादौ दृश्यते॥२९॥ एवं कुटुंबं स्वदेहं च पुष्णन् अंतकाले तद्द्वयमपीहैव विसृज्य नरके तत्फलमीदृशं भुंक्ते॥३०॥ स एको भूतद्रोहेण पोषितं स्थूलं कलेवरमिह हित्वा ॥३१॥ नरकं प्राप्येश्वरेण प्रापितं कुटुंबपोषणस्य पापं भुंक्ते ॥ ३२ ॥ ॥ ॥

यः केवलेनाधर्मेण कुटुंबं पुष्णाति स नरकस्य चरमं स्थानमंधतामिस्रं याति ॥३३॥ हे मातः, ततो मनुष्यदेहस्य प्राप्तेः पूर्वं यावत्यो यातनाः श्वसूकरादियोनयश्च ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापः शुचिः सन् पुनर्नरदेहं प्राप्नोति ॥३४॥ इति श्रीमद्भागवतचू० तृती० त्रिंशोऽध्यायः ॥३०॥ ॥ एकत्रिंशे विमिश्रैस्तु पुण्यपापैरिहांतरा ॥ मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः ॥१॥ कपिल उवाच ॥ जंतुर्देहप्राप्तये दैवप्रेरितेन कर्मणा पुंसो रेतःकणाश्रयः स्त्रिया उदरं प्रविष्टो भवति ॥१॥ तत्रैकरात्रेण शुक्रशोणितमिश्रणं भवति । पंचरात्रेण बुद्बुदम् । दशाहेन बदरीफलसदृशम् । ततः पेशी अंडं वा ॥२॥ मासेन शिरः द्विमासेन हस्तपादाद्यंगानां विभागः। त्रिभिर्नखरोमास्थिचर्मणां लिंगस्य छिद्राणां चोद्भवो भवति॥३॥ चतुर्भिः सप्त धातवः। पंचभिः क्षुधातृषोद्भवः । षड्भिर्ज-

केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः ॥ याति जीवोंऽधतामिस्रं चरमं तमसः पदम् ॥ ३३ ॥ अधस्तान्नरलोकस्य यावतीर्यातनादयः॥ क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने कर्मविपाको नाम त्रिंशत्तमोऽध्यायः ॥३०॥ ॥ श्रीभगवानुवाच ॥ कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये ॥ स्त्रिया प्रविष्ट उदरं पुंसो रेतःकणाश्रयः ॥ १ ॥ कललं त्वेकरात्रेण पंचरात्रेण बुद्बुदम् ॥ दशाहेन तु कर्कंधूः पेश्यंडं वा ततः परम् ॥२॥ मासेन तु शिरो द्वाभ्यां बाह्वंघ्र्याद्यंगविग्रहः ॥ नखलोमास्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ॥३॥ चतुर्भिर्धातवः सप्त पंचभिः क्षुत्तृडुद्भवः ॥ षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ॥४॥ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते ॥ शेते विण्मूत्रयोर्गर्ते स जंतुर्जंतुसंभवे ॥५॥ कृमिभिः क्षतसर्वांगः सौकुमार्यात्प्रतिक्षणम् ॥ मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ॥६॥ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः ॥ मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ॥७॥ उल्बेन संवृतस्तस्मिन्नंत्रैश्च बहिरावृतः ॥ आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥८॥ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे ॥ तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवम् ॥ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विंदते ॥ ९ ॥ आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः ॥ नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः ॥ १० ॥ नाथमान ऋषिर्भीतः सप्तवध्रिः कृतांजलिः ॥ स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ॥ ११ ॥ जंतुरुवाच ॥ तस्योपसन्नमवितुं जगदिच्छयात्तनानातनोर्भुवि चलच्चरणारविंदम् ॥ सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा ॥ १२ ॥ ॥

रायुणा वेष्टितो दक्षिणे कुक्षौ भ्राम्यति ॥४॥ जंतुर्मात्रा भक्षितान्नपानाद्यैर्वर्धमानो विण्मूत्रगर्ते शेते॥५॥ तत्र कृमिभिर्विद्धसर्वांगो मूर्छां प्राप्नोति॥६॥ मातृभुक्तैः कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिः सर्वांगेषु जातवेदनः ॥७॥ जरायुणा बद्धः कुंडलीभूतपृष्ठग्रीवः कुक्षौ शिरः कृत्वा आस्ते ॥८॥ तत्र पंजरे शुक इव स्वांगचेष्टायामसमर्थः पूर्वकर्मवशाल्लब्धस्मृतिर्जन्मशतोद्भवं कर्म स्मरन् सुखं न प्राप्नोति॥ ९ ॥ ततः सप्तममासादारभ्य लब्धज्ञानोऽपि सूतिवातैः कंपितः सन्नैकत्र नास्ते ॥१०॥ ततः कृतांजलिः सन् येनोदरेऽर्पितस्तं परमेश्वरं वाण्या स्तौति ॥११॥ जीव आह । येनेश्वरेणासतो मेऽनुरूपा ईदृशी गर्भवासादिरूपा गतिर्दर्शिता तस्य भगवतश्चरणारविंदमहं शरणं व्रजामि॥ १२ ॥ ॥ ॥ ॥

अत्र मातुर्देहे भूतेंद्रियाशयमयीं मायां समाश्रित्य कर्मभिर्बद्ध इव य आस्ते सोऽहं निरुपाधिमविकारमत्रैव स्थितमखंडबोधं तं नमामि ॥ १३ ॥ यः पंचभूतरचिते देहे मिथ्यैव छन्नो वस्तुतोऽसंगः सोऽहं प्रकृतिपुरुषयोर्नियंतारं तं वंदे ॥१४॥ ननु ज्ञानेनायं बंधो निवर्तिष्यते किं परमेश्वरवंदनेन तत्राह । यन्मायया नष्टस्मृतिः संसारमार्गे चरन् जीव ईश्वरानुग्रहं विना कया युक्त्या निजस्वरूपं जानीयात् । अत ईश्वर एव सेव्यः ॥ १५ ॥ यः सर्वांतर्यामी मह्यं त्रैकालिकं ज्ञानं ददौ । तमीशमहं तापत्रयोपशमनाय भजामि ॥ १६ ॥ अथ स्वदुःखं विज्ञापयन्नाह । हे भगवन्, अत्र मातुर्जठराग्निना तप्तदेहो रक्तविष्ठामूत्रकूपे पतितः स्वमासान् गणयन् विवराद्बहिर्निर्गंतुमिच्छामि । अतस्त्वं बहिः कदा निर्वास्यसि ॥ १७ ॥ य ईदृशं ज्ञानं मे ददौ स स्वकृतेनोपकारेण स्वयं तुष्यतु ।

यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेंद्रियाशयमयीमवलंब्य मायाम् ॥ आस्ते विशुद्धमविकारमखंडबोधमातप्यमानहृदयेऽवसितं नमामि ॥१३॥ यः पंचभूतरचिते रहितः शरीरे छन्नो यथेंद्रियगुणार्थचिदात्मकोऽहम् ॥ तेनाविकुंठमहिमानमृषिं तमेनं वंदे परं प्रकृतिपूरुषयोः पुमांसम् ॥ १४ ॥ यन्माययोरुगुणकर्मनिबंधनेऽस्मिन्सांसारिके पथि चरंस्तदभिश्रमेण ॥ नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमंतरेण ॥१५॥ ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः ॥ तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम ॥१६॥ देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः ॥ इच्छन्नितो विवसितुं गणयन्स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदा नु ॥१७॥ येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन ॥ स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनांजलिमस्य कुर्यात् ॥१८॥ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे ॥ यत्सृष्ट्या स तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतम् ॥ १९ ॥ सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरंधकूपे ॥ यत्रोपयातमुपसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत् ॥२०॥ तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव ॥ भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्यदुपसादितविष्णुपादः ॥ २१ ॥ कपिल उवाच ॥ एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः ॥ सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः ॥ २२ ॥ तेनावसृष्टः सहसा कृत्वावाक्शिर आतुरः ॥ विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः॥ २३ ॥ ॥

यतः केवलं नमस्कारं विना तत्कृतोपकारे प्रत्युपकारं कः कुर्यान्न कोऽपि ॥१८॥ अहं पुनर्यद्दत्तेन विवेकज्ञानेन शमदमादियुक्तशरीरवान् जातोऽस्मि तं पुरुषं बहिर्हृदि चापरोक्षतया पश्यामि ॥१९॥ हे विभो, बहुदुःखवासं यथा स्यात्तथा गर्भे वसन्नप्यहं गर्भाद्बहिर्गंतुं नेच्छामि । कुतः । अंधकूपप्राये बहिःस्थले उपगतं प्राणिनं तव माया व्याप्नोति । यां मायामनु देहेऽहंबुद्धिः संसारचक्रं च प्राप्यते ॥ २० ॥ अतोऽत्रैव सर्वं कर्मफलं भुक्त्वा हृदये विष्णुपादौ धृत्वा आत्मानमुद्धरिष्ये ॥ २१ ॥ कपिल उवाच ॥ एवं जीवः स्तुवन् वर्तते । तं दशमे मासे प्राप्ते सूतिकावायुः प्रसूत्यै सद्योऽवाङ्मुखं कृत्वा क्षिपति ॥ २२ ॥ ततोऽवाक् शिरः कृत्वा हतस्मृतिः सन् कृच्छ्रेण विनिष्क्रामति ॥२३॥ ॥ ॥ ॥

तदा भुवि रक्तमूत्रे पतितोऽज्ञानं प्राप्तः सन् ज्ञाने गते सति रोदिति ॥ २४ ॥ किंच । तस्याभिप्रायमविदुषो मात्रादयस्तस्मिन् स्तनपानार्थं रुदति सति उदरव्यथां प्रकल्प्य निंबरसपानं कारयंति। उदरव्यथया रोदने सति स्तनपानं च कारयंति ॥२५॥ मत्कुणादियुक्ते मलिनपर्यंके शायितोऽवयवानां कंडूयनेऽसमर्थः सन् रोदिति ॥२६॥ मत्कुणमशकादयस्तं तुदंति ॥२७॥ एवं पंचवर्षात्मके वयसि शैशवं दुःख दशवर्षात्मके पौगंडे वयसि अध्ययनादि दुःखं च भुक्त्वा तारुण्यं प्राप्य । इच्छितार्थस्यालाभात् शोकेन व्याप्तो दीप्तक्रोधोऽभिमानेन आत्मनाशाय कामिजनेषु विरोधं करोति ॥ २८ ॥ २९ ॥ पंचभूतात्मके देहेऽहंममेति मतिं च करोति ॥३०॥ देहार्थं च कर्म करोति । येन कर्मणा बद्धः सन् पुनः पुनः संसृतिं याति ॥ ३१ ॥ यदि जंतुः शिश्नोदरकृतोद्यमैरसद्भिर्युक्तः सन् तेषां मार्गे

पतितो भुव्यसृङ्मूत्रे विष्ठाभूरिव चेष्टते ॥ रोरूयति गते ज्ञाने विपरीतां गतिं गतः ॥२४॥ परच्छंदं न विदुषा पुष्यमाणो जनेन सः ॥
अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः ॥२५॥ शायितोऽशुचि पर्यंके जंतुः स्वेदजदूषिते ॥ नेशः कंडूयनेंऽगानामासनोत्थानचेष्टने ॥२६॥
तुदंत्यामत्वचं दंशा मशका मत्कुणादयः ॥ रुदंतं विगतज्ञानं कृमयः कृमिकं यथा ॥२७॥ इत्येवं शैशवं भुक्त्वा दुःखं पौगंडमेव च ॥
अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः ॥२८॥ सह देहेन मानेन वर्धमानेन मन्युना ॥ करोति विग्रहं कामी कामिष्वंताय
चात्मनः ॥२९॥ भूतैः पंचभिरारब्धे देहे देह्यबुधोऽसकृत् ॥ अहंममेत्यसद्ग्राहः करोति कुमतिर्मतिम् ॥३०॥ तदर्थं कुरुते कर्म यद्बद्धो
याति संसृतिम् ॥ योऽनुयाति ददन्क्लेशमविद्याकर्मबंधनः ॥३१॥ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः ॥ आस्थितो रमते जंतुस्तमो
विशति पूर्ववत् ॥३२॥ सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा ॥ शमो दमो भगश्चेति यत्संगाद्याति संक्षयम् ॥३३॥ तेष्वशांतेषु मूढेषु
खंडितात्मस्वसाधुषु ॥ संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥३४॥ न तथास्य भवेन्मोहो बंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथा पुंसो
यथा तत्संगिसंगतः ॥३५॥ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः ॥ रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ॥३६॥ तत्सृष्टसृष्टसृष्टेषु कोऽन्वखंडितधीः
पुमान् ॥ ऋषिं नारायणमृते योषिन्मय्यहे मायया ॥३७॥ बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् ॥ या करोति
पदाक्रांतान् भ्रूविजृंभेण केवलम् ॥ ३८ ॥ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः ॥ मत्सेवया प्रतिलब्धात्मलाभो
वदंति या निरयद्वारमस्य ॥ ३९ ॥ योपयाति शनैर्माया योषिद्देवविनिर्मिता ॥ तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतम् ॥ ४० ॥

रमते तर्हि स पूर्ववन्नरकं विशति ॥३२॥ येषामसतां संगात्सत्यशौचदयामौनशमदमादयः क्षयं यांति ॥ ३३ ॥ तेषु अशांतेषु मूढेषु योषितां क्रीडामृगवदधीनेषु संगं न कुर्यात् ॥३४॥ यथा स्त्रीणां स्त्रीसंगिनां च संगान्मोहो बंधश्च भवति तथान्यसंगान्न भवति ॥३५॥ अहो ब्रह्मा स्वकन्यां दृष्ट्वा मोहितः सन् मृगरूपां सतीं तामनु स्वयं मृगाकारः सन्नन्वधावत् ॥३६॥ अतः स्त्रीमय्या मायया नरनारायणौ विना कः पुमान् मोहं न प्राप्नुयात् ॥३७॥ हे मातः, स्त्रीरूपाया मे मायाया बलं पश्य । या दिग्विजयिनः शूरानपि केवलं भ्रूकटाक्षेण पदाक्रांतान् करोति ॥ ३८ ॥ अतो योगं कुर्वन् पुमान् कदाचिदपि प्रमदासु संगं न कुर्यात् ॥३९॥ या स्त्रीरूपा माया शुश्रूषादिमिषेणोपयाति तामात्मनो मृत्युरूपां पश्येत् ॥ ४० ॥ ॥ ॥

मुमुक्षुं स्त्रियं प्रत्यप्येतदेवाह । जीवः पूर्वजन्मनि स्वयं पुमान् सन्नपि अंतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्यान्यजन्मनि पुरुषवदाचरंतीं मन्मायां मोहात्पतिं मन्यते ॥४१॥ तां पुरुषरूपां मायामप्यात्मनो मृत्युरूपां जानीयात् ॥४२॥ एवं जीवस्य संसृतिमुक्त्वा तत्कारणमाह । जीवो लिंगदेहेन लोकांतरं व्रजन् कर्माणि भुंक्ते स्थूलदेहेन च पुनः कर्माणि करोति॥४३॥ जीवस्य जन्ममरणप्रकारमाह । आत्मन उपाधिर्लिंगदेहः भोगायतनं स्थूलदेहश्च तयोः स्वस्वकार्याऽक्षमता जीवस्य मरणमुच्यते । तयोराविर्भावस्तु जन्मोच्यते॥४४॥ किंच । स्थूलशरीरस्य विषयग्रहणे यदा अयोग्यत्वं तदा तन्मरणम् यदा चेदमेवाहमित्यभिमानेन स्थूलशरीरस्य दर्शनं तदा सोत्पत्तिः ॥४५॥ अत्र दृष्टांतः । नेत्रगोलकादेः रूपादिदर्शने काचकामलादिदोषेण यदा अयोग्यता भवति तदैव चक्षुष इंद्रियस्याप्ययोग्यता । यदा स्थानचक्षुषोरयोग्यता तदैव द्रष्टुर्जीवस्य द्रष्टृत्वाऽयोग्यता ॥४६॥ तस्माद्धे मातः, मरणात्त्रासो न कार्यः जीवने च दैन्यं न कार्यम् । किंतु । धीर

यां मन्यते पतिं मोहान्मन्मायामृषभायतीम् ॥ स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदम् ॥४१॥ तामात्मनो विजानीयात्पत्यपत्यगृहात्मकम् ॥ दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ॥४२॥ देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् ॥ भुंजान एव कर्माणि करोत्यविरतं पुमान् ॥४३॥ जीवो ह्यस्यानुगो देहो भूतेंद्रियमनोमयः ॥ तन्निरोधोऽस्य मरणमाविर्भावस्तु संभवः ॥४४॥ द्रव्योपलब्धिस्थानस्य द्रव्येक्षायोग्यता यदा ॥ तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनम् ॥४५॥ यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा ॥ तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ॥४६॥ तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः ॥ बुद्ध्वा जीवगतिं धीरो मुक्तसंगश्चरेदिह ॥४७॥ सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया ॥ मायाविरचिते लोके चरेन्न्यस्य कलेवरम् ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने जीवगतिर्नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ ॥ कपिल उवाच ॥ अथ यो गृहमेधीयान्धर्मानेवावसन्गृहे ॥ काममर्थं च धर्मान्स्वान्दोग्धि भूयः पिपर्ति तान् ॥१॥ स चापि भगवद्धर्मात्काममूढः पराङ्मुखः॥ यजते क्रतुभिर्देवान्पितॄंश्च श्रद्धयान्वितः ॥ २ ॥ तच्छ्रद्धयाऽऽक्रांतमतिः पितृदेवव्रतः पुमान् ॥ गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यति ॥३॥ यदा चाहींद्रशय्यायां शेतेऽनंतासनो हरिः ॥ तदा लोका लयं यांति त एते गृहमेधिनाम् ॥ ४ ॥ ॥ ॥ ॥

एवं[2]भूतां जीवगतिं बुद्ध्वा मुक्तसंगश्चरेत् ॥४७॥ तस्माज्ज्ञानवैराग्ययुक्तया बुद्ध्या मायारचिते लोके देहासक्तिं त्यक्त्वा विचरेत् ॥४८॥ इति श्रीमद्भागवतचू० तृतीय० एकत्रिंशोऽध्यायः ॥३१॥ ॥ द्वात्रिंशे सात्विकैर्धर्मैरूर्ध्वा गतिरुदीर्यते ॥ तत्त्वज्ञानविहीनस्य ततश्च पुनरागतिः ॥१॥ कपिल उवाच ॥ अथ यो गृहस्थाश्रमी स्वधर्मानाचरन् सकामो वर्तते । स पुनः पुनर्धर्मार्थकामप्रतिपादकानि कर्माण्याचरति ॥ १ ॥ स भगवद्धर्मात्पराङ्मुखः सन् श्रद्धया यज्ञैर्देवान् पितॄंश्च यजन् ॥२॥ चांद्रमसं लोकं गत्वा भोगावसाने पुनरत्रागच्छति ॥३॥ ते चांद्रमसादिलोका अपि यदाऽनंतो भगवान् शेषशय्यायां शेते तदा लयं यांति ॥४॥

---

१ ज्ञानेंद्रियकर्मेंद्रियप्राणपंचकमनोबुद्धियुक्तो लिंगदेहः । स ज्ञानेन मुक्तिप्राप्तिपर्यंतमनुवर्तते । तत आत्मनि लीयते । स्थूलदेहस्यैव कर्मवशाद्वारंवारमुत्पत्तिनाशौ भवतः । २ वस्तुतो जीवस्य जन्ममरणादि किमपि नास्तीत्यर्थः ।

येऽनासक्ता ईश्वरे समर्पितकर्माणः शुद्धचेतसः ॥५॥ निवृत्तिधर्मनिरता निरहंकाराः ॥ ६ ॥ ते सूयद्वोरर्ण परिपूर्णं पुरुषं यांति ॥ ७ ॥ ते द्विपरार्धावसाने यो महाप्रलयस्तावद्ब्रह्मलोकमध्यासते ॥ ८ ॥ ब्रह्मा द्विपरार्धकालपर्यंतं स्वाधिकारं कृत्वा पृथिव्यादितत्वैर्युक्तं ब्रह्मांडं संहर्तुमिच्छुः सन्नीश्वरस्वरूपं प्रविशति तदा महाप्रलयो भवति ॥९॥ तदा ब्रह्मलोकं गता ये योगिनस्ते ब्रह्मणा सह मोक्षं यांति ॥१०॥ तस्मात् हे भामिनि, सर्वभूतानां हृत्पद्मेषु स्थितं परमात्मानं भक्त्या शरणं व्रज ॥११॥ एवं भगवद्भक्तानां निरंतरमेव तत्प्राप्तिः । भेदेनोपासने तु ब्रह्मादयोऽपि पुनरावर्तंते किमुतान्य इत्याह । स्थिरचराणां य आद्यो ब्रह्मा सो-

ये स्वधर्मान्न दुह्यंति धीराः कामार्थहेतवे ॥ निःसंगा न्यस्तकर्माणः प्रशांताः शुद्धचेतसः ॥५॥ निवृत्तिधर्मनिरता निर्ममा निरहंकृताः ॥ स्वधर्माख्येन सत्वेन परिशुद्धेन चेतसा ॥६॥ सूर्यद्वारेण ते यांति पुरुषं विश्वतोमुखम् ॥ परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनम् ॥ ७ ॥ द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते ॥ तावदध्यासते लोकं परस्य परचिंतकाः ॥ ८ ॥ क्ष्मांभोऽनलानिलवियन्मन इंद्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः ॥ अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयंभूः ॥ ९ ॥ एवं परेत्य भगवंतमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः ॥ तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः ॥ १० ॥ अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयम् ॥ श्रुतानुभावं शरणं व्रज भावेन भामिनि ॥ ११ ॥ आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः ॥ योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥ १२ ॥ भेददृष्ट्याऽभिमानेन निःसंगेनापि कर्मणा॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ॥ १३ ॥ स संसृत्य पुनः काले कालेनेश्वरमूर्तिना ॥ जाते गुणव्यतिकरे यथापूर्वं प्रजायते ॥ १४ ॥ ऐश्वर्यं पारमेष्ठ्यं च तेऽपि धर्मविनिर्मितम् ॥ निषेव्य पुनरायांति गुणव्यतिकरे सति ॥ १५ ॥ ये त्विहासक्तमनसः कर्मसु श्रद्धयान्विताः ॥ कुर्वंत्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः ॥ १६ ॥ रजसा कुंठमनसः कामात्मानो जितेंद्रियाः ॥ पितॄन्यजंत्यनुदिनं गृहेष्वभिरताशयाः ॥ १७ ॥ त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः ॥ कथायां कथनीयोरुविक्रमस्य मधुद्विषः ॥ १८ ॥ नूनं दैवेन विहता ये चाच्युतकथासुधाम् ॥ हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः ॥ १९ ॥ दक्षिणेन यथार्यम्णः पितृलोकं व्रजंति ते ॥ प्रजामनुप्रजायंते श्मशानांतक्रियाकृतः ॥ २० ॥ ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति ॥ पतंति विवशा देवैः सद्यो विभ्रंशितोदयाः ॥ २१ ॥ ॥ ॥ ॥ ॥

ऽपि मरीच्यादिभिर्योगेश्वरादिभिश्च सह ॥१२॥ निष्कामेण कर्मणा युक्तोऽपि भेददृष्ट्या कर्तृत्वाभिमानेन च सगुणं ब्रह्म प्राप्यापि ॥१३॥ पुनः सृष्ट्यारंभे कालेन सत्वादिगुणमिश्रणे जाते सति यथापूर्वं प्रजायते ॥१४॥ मरीच्यादयोऽपि स्वकर्मनिर्मितमैश्वर्यं निषेव्य पुनर्गुणमिश्रणे जाते सति पुनः स्वाधिकारं प्राप्नुवंति ॥१५॥ ये तु इह कर्मासक्तमनसः संतः काम्यानि नित्यानि च कर्माणि कुर्वंति ॥१६॥ ये चाजितेंद्रियाः संतोऽनुदिनं पितॄन् यजंति ॥ १७ ॥ ते धर्मार्थकामपरा हरेः कथायां विमुखा भवंति ॥१८॥ ये चाच्युतकथासुधां हित्वाऽसद्गाथां शृण्वंति ॥१९॥ ते दक्षिणमार्गेण पितृलोकं व्रजंति ॥२०॥ ततस्ते पुण्यक्षयात्पुनरिमं

लोकं पतंति ॥२१॥ तस्मात् हे मातः, त्वं सर्वभावेन भक्त्या परमेश्वरं भजस्व ॥२२॥ वासुदेवे कृतो भक्तियोगो वैराग्यं ज्ञानं च जनयति ॥२३॥ यदा भक्तस्य चित्तं भगवति निश्चलं सदिंद्रियवृत्तिभिर्विषयेषु वैषम्यं न गृह्णाति ॥२४॥ तदा स भक्त आत्मना परमानंदोऽहमिति निश्चयं प्राप्य स्वप्रकाशमात्मानमीक्षते ॥२५॥ किंच । भगवान् दृश्यद्रष्टृकरणरूपेण पृथक् प्रतीयते वस्तुतो ज्ञानमात्रेणैक एव ॥२६॥ योगिजनस्य संपूर्णयोगेन प्रपंचसंगत्याग एव योगफलं प्राप्यते ॥२७॥ पराङ्मुखैरिंद्रियैः शब्दाद्यर्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैवावभाति न त्वर्थः पृथगस्ति ॥२८॥ यथाऽहंकारेंद्रियगुणादिकैर्महत्तत्वमेव भाति न तु महत्तत्वादहंकारादयः पृथक् संति तथा ज्ञानमपि शब्दस्पर्शादिरूपेण नानाप्रकारकं भाति ॥ २९ ॥ एतज्ज्ञानरूपं ब्रह्म निःसंगः पुरुषो योगाभ्यासेन भक्त्या च परिपश्यति ॥३०॥ हे पूज्ये, इत्येतद्ब्रह्मदर्शनं ज्ञानं ते कथितम् । येन प्रकृतिपुरुषयोस्तत्त्वं ज्ञायते ॥३१॥ निर्गुणब्रह्मपरेण ज्ञानयोगेन मदेकनिष्ठेन भक्तियोगेन वा भगवान् हरिरेव प्राप्यते । तयोर्द्वयोरप्येक एवार्थः ॥ ३२ ॥ यथैकः क्षीरादिपदार्थश्चक्षुषा शुक्लो रसनेन मधुरः स्पर्शनेन शीत इत्यादि नाना प्रतीयते एवमेको भगवान् शास्त्रमार्गैर्नाना प्रतीयते ॥३३॥ शास्त्रमार्गानाह । कर्मयज्ञदानतपःस्वाध्यायादिभिः ॥३४॥ योगेन सकामनिष्कामधर्मेण भक्तियोगेन ॥ ३५ ॥ आत्मज्ञानेन वैराग्येण चेत्येभिर्मार्गैर्भगवान् सगुणो निर्गुणः स्वप्रकाशः प्रतीयते ॥ ३६ ॥ हे मातः, ते भक्तियोगस्य स्वरूपं कालस्य गतिः ॥ ३७ ॥ जीवस्य बह्वीः संसृतीस्तत्वसंख्यानं वैराग्यं ज्ञानं च कथितम् ॥ ३८ ॥ ॥ ॥ ॥

तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनम् ॥ तद्गुणाश्रयया भक्त्या भजनीयपदांबुजम् ॥२२॥ वासुदेवे भगवति भक्तियोगः प्रयोजितः॥ जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनम् ॥२३॥ यदास्य चित्तमर्थेषु समेष्विंद्रियवृत्तिभिः॥ न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत॥२४॥ स तदैवात्मनाऽऽत्मानं निःसंगं समदर्शनम् ॥ हेयोपादेयरहितमारूढं पदमीक्षते ॥२५॥ ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् ॥ दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते॥२६॥ एतावानेव योगेन समग्रेणेह योगिनः॥ युज्यतेऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः॥२७॥ ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणम्॥ अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा॥२८॥ यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट्॥ एकादशविधस्तस्य वपुरंडं जगद्यतः ॥ २९ ॥ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः ॥ समाहितात्मा निःसंगो विरक्त्या परिपश्यति ॥३०॥ इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनम् ॥ येनानुबुद्ध्यते तत्त्वं प्रकृतेः पुरुषस्य च ॥३१॥ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ॥ द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥३२॥ यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः॥ एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ॥३३॥ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः ॥ आत्मेंद्रियजयेनापि संन्यासेन च कर्मणाम् ॥ ३४॥ योगेन विविधांगेन भक्तियोगेन चैव हि ॥ धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ॥ ३५ ॥ आत्मतत्त्वावबोधेन वैराग्येण दृढेन च ॥ ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ॥ ३६ ॥ प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधम् ॥ कालस्य चाव्यक्तगतेर्योंऽतर्धावति जंतुषु ॥३७॥ जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः ॥ यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ॥३८॥

इदं खलायानम्राय स्तब्धाय दुराचाराय दांभिकाय ॥३९॥ लोभिनेऽभक्ताय मद्भक्तद्विषां च नोपदिशेत् ॥४०॥ श्रद्धधानाय भक्ताय नम्राय भूतेषु कृतमैत्राय मत्सेवातत्पराय ॥४१॥ विरक्ताय शांतचित्ताय शुचय इदं समुपदिशेत् ॥४२॥ हे अंब, यः पुरुषः श्रद्धयेदं शृणुयात् यो वा पठेत् स मत्पदवीं प्राप्नोति॥४३॥ इति श्रीमद्भागवतचू० तृती० द्वात्रिंशोऽध्यायः ॥३२॥ ॥ त्रयस्त्रिंशे तु तस्यैव कपिलस्योपदेशतः । ज्ञानभावेन तन्मातुर्जीवन्मुक्तिरुदीर्यते ॥ १ ॥ मैत्रेय उवाच ॥ एवं कपिलस्य वचो निशम्य सा देवहूतिर्गतमोहा सती ज्ञानप्रवर्तकं तं कपिलं प्रणम्य तुष्टाव ॥ १ ॥ देवहूतिरुवाच ॥ हे भगवन्, तव जठराज्जातो ब्रह्मापि तव वपुः केवलं दध्यौ । न तु दृष्टवान् ॥२॥ स भवानेव विश्वस्य स्थितिसंहारान् करोति ॥३॥ यस्योदर एतद्विश्वमासीत् । यस्त्वं युगांते मायाशिशुः

नैतत्खलायोपदिशेन्नाविनीताय कर्हिचित् ॥ न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ॥३९॥ न लोलुपायोपदिशेन्न गृहारूढचेतसे॥ नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ॥४०॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे ॥ भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ॥ ४१ ॥ बहिर्जातविरागाय शांतचित्ताय दीयताम् ॥ निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ॥ ४२ ॥ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् ॥ यो वाऽभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ॥४३॥ इति श्रीम० म० तृती० कापिलेये द्वात्रिंशोऽध्यायः ॥३२॥ ॥ मैत्रेय उवाच ॥ एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ॥ विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्वविषयांकितसिद्धिभूमिम् ॥१॥ देवहूतिरुवाच ॥ अथाप्यजोंऽतःसलिले शयानं भूतेंद्रियार्थात्ममयं वपुस्ते ॥ गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥ स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः ॥ सर्गाद्यनीहो वितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ ३ ॥ स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् ॥ विश्वं युगांते वटपत्र एकः शेते स्म मायाशिशुरंघ्रिपानः ॥४॥ त्वं देहतंत्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये ॥ यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ॥५॥ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् ॥ श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ॥६॥ अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ॥ तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ॥७॥ तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भम् ॥८॥ मैत्रेय उवाच ॥ ईडितो भगवानेवं कपिलाख्यः परः पुमान् ॥ वाचा विक्लवयेत्याह मातरं मातृवत्सलः॥९॥

पादांगुष्ठं पिबन्नेको वटपत्रपुटे शेतेस्म सोऽजस्त्वं मया जठरेण कथं धृतः ॥४॥ त्वं दुष्टानां नाशाय भक्तानां समृद्धये देहं स्वीकरोषि । यथा तव सूकरादयोऽवतारास्तथा ज्ञानमार्गप्रदर्शनायायमप्यवतारोऽस्ति ॥५॥ हे भगवन्, त्वन्नामकीर्तनश्रवणादिभिः श्वपचोऽपि सद्यः सोमयागाय योग्यो भवति । अतस्त्वद्दर्शनादहं कृतार्थाऽस्मि ॥६॥ किंच । तव नाम यस्य जिह्वाग्रे वर्तते स श्वपचोऽपि गरीयान् । ये आर्यास्तव नाम गृणंति त एव तपोहोमतीर्थस्नानादि कृतवंतः ॥७॥ अहं तं ब्रह्मरूपं वेदगर्भं विष्णुं कपिलं त्वां वंदे ॥८॥ मैत्रये उवाच ॥ एवं स्तुतः कपिलो गंभीरवाण्या मातरं प्राह ॥९॥ ॥ ॥

कपिल उवाच ॥ हे मातः, मयोक्तेन मार्गेण त्वं शीघ्रं जीवन्मुक्तिं प्राप्स्यसि ॥१०॥ ब्रह्मवादिभिः सेवितं मे एतन्मतं श्रद्धया गृहाण । येन मां प्राप्स्यसि॥११॥ मैत्रेय उवाच ॥ एवं स भगवान् कपिल आत्मनो गतिं मात्रे प्रदर्श्य ब्रह्मवादिन्या तयाऽनुज्ञातः सन् ययौ ॥१२॥ सापि कपिलोक्तेन मार्गेण तस्मिन् बिंदुसरोवरनामके आश्रमे ॥१३॥ त्रिकालस्नानेन पिंगलान् केशान् तपसा कृशमात्मानं च बिभ्रती ॥ १४ ॥ कर्दमस्य योगनिर्मितविमानसंपत्तावपि निःस्पृहा बभूव ॥१५॥ तां संपत्तिं वर्णयति । यत्र मृदवः शुभ्राः शय्याः सौवर्णान्यासनानि ॥१६॥ स्वच्छस्फटिकभित्तिषु स्त्रीरत्नसंयुक्ता रत्नप्रदीपाः शोभंते ॥१७॥ यत्र कल्पवृक्षै रम्यं कूजद्विहंगमिथुनं उद्यानम् ॥१८॥ यत्रोद्याने प्रविष्टां देवहूतिं गंधर्वा जगुः ॥१९॥ एवंभूतां संपत्तिं त्यक्त्वा पुत्रवियोगातुरा सा किंचिच्छोकव्याकुलं मुखं चकार ॥२०॥ कर्दमे च वनं गते सति ज्ञाततत्त्वापि सा देवहूतिर्नष्टे वत्से गौरिव दीना बभूव ॥२१॥ ततः सा तमेव कपिलं हरिं ध्यायंती ॥ २२ ॥ तेन कपिलेनोक्तं–प्रसन्नवदनं सर्वावयवयुक्तं चरणादिभिन्नावयवयुक्तं च भगवद्रूपं ध्यात्वा ॥२३॥ भक्तियोगेन वैराग्येण ज्ञानेन ॥ २४ ॥ शुद्धेन मनसा आत्मानं सर्वगतं चिंतयंती सती ॥२५॥ ब्रह्मरूपे भगवति कृतबुद्धिः क्षीणक्लेशा ॥२६॥ निवृत्तगुणभ्रमा भूत्वा स्वदेहमपि न सस्मार ॥ २७ ॥ ॥

कपिल उवाच ॥ मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे ॥ आस्थितेन परां काष्ठामचिरादवरोत्स्यसि ॥ १० ॥ श्रद्धस्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः ॥ येन मामभवं याया मृत्युमृच्छंत्यतद्विदः ॥ ११ ॥ मैत्रेय उवाच ॥ इति प्रदर्श्य भगवान्सतीं तामात्मनो गतिम् ॥ स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो ययौ ॥१२॥ सा चापि तनयोक्तेन योगादेशेन योगयुक् ॥ तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता ॥ १३ ॥ अभीक्ष्णावगाहकपिशान् जटिलान्कुटिलालकान् ॥ आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशम् ॥ १४ ॥ प्रजापतेः कर्दमस्य तपोयोगविजृंभितम् ॥ स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि ॥ १५ ॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च ॥ १६ ॥ स्वच्छस्फटिककुड्येषु महामारकतेषु च ॥ रत्नप्रदीपा आभांति ललनारत्नसंयुताः ॥१७॥ गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः ॥ कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतम् ॥ १८ ॥ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः ॥ वाप्यामुत्पलगंधिन्यां कर्दमेनोपलालितम् ॥ १९ ॥ हित्वा तदीप्सिततममप्याखंडलयोषिताम् ॥ किंचिच्चकार वदनं पुत्रविश्लेषणातुरा ॥२०॥ वनं प्रव्रजिते पत्यावपत्यविरहातुरा ॥ ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला ॥ २१ ॥ तमेव ध्यायती देवमपत्यं कपिलं हरिम् ॥ बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे ॥ २२ ॥ ध्यायती भगवद्रूपं यदाह ध्यानगोचरम् ॥ सुतः प्रसन्नवदनं समस्तव्यस्तचिंतया ॥ २३ ॥ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा ॥ युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना ॥२४॥ विशुद्धेन तदात्मानमात्मना विश्वतोमुखम् ॥ स्वानुभूत्या तिरोभूतमायागुणविशेषणम् ॥ २५ ॥ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये ॥ निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः ॥२६॥ नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा ॥ न सस्मार तदाऽऽत्मानं स्वप्ने दृष्टमिवोत्थितः ॥ २७॥ ॥ ॥

तत स्तस्या देहः कर्दमोत्पादितविद्याधरीभिः पोष्यो मलैरवच्छन्नोऽपि सधूमोऽग्निरिव बभौ ॥२८॥ वासुदेवे प्रविष्टबुद्धिः सा देवहूतिर्मुक्तकेशं गतांबरं स्वांगं न बुबुधे ॥२९॥ एवं सा कपिलोक्तेन मार्गेण नित्ययुक्तं भगवंतं प्राप ॥ ३० ॥ हे विदुर, यत्र सा सिद्धिं प्राप्ता तत्स्थानं त्रैलोक्यविश्रुतं नाम्ना सिद्धपदमासीत् ॥३१॥ तस्यास्तन्मनुष्यशरीरं योगमार्गेण नष्टधातुमलं सत् विलीय सिद्धिदानाम नदी बभूव ॥३२॥ कपिलोऽपि मातरमामंत्र्य पितुराश्रमादैशानीं दिशं ययौ

तद्देहः परतः पोषोऽप्यकृशश्चाध्यसंभवात् ॥ बभौ मलैरवच्छन्नः सधूम इव पावकः ॥ २८ ॥ स्वांगं तपोयोगमयं मुक्तकेशं गतांबरम् ॥ दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥ २९ ॥ एवं सा कपिलोक्तेन मार्गेणाचिरतः परम् ॥ आत्मानं ब्रह्म निर्वाणं भगवंतमवाप ह ॥ ३० ॥ तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतम् ॥ नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥ ३१ ॥ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् ॥ स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ॥ ३२ ॥ कपिलोऽपि महायोगी भगवान्पितुराश्रमात् ॥ मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥ ३३ ॥ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः ॥ स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ॥३४॥ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः ॥ त्रयाणामपि लोकानामुपशांत्यै समाहितः ॥३५॥ एतन्निगदितं तात यत्पृष्टोऽहं तवानघ ॥ कपिलस्य च संवादो देवहूत्याश्च पावनः ॥३६॥ य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यम् ॥ भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदम् ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ ॥ इति तृतीयः स्कंधः समाप्तः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

॥३३॥ स सिद्धचारणगंधर्वादिभिः स्तूयमानः समुद्रेण स्तुतिपूर्वकं दत्ताश्रमस्थानः सन् ॥३४॥ सांख्याचार्यैरभिष्टुतस्त्रयाणां लोकानां शांत्यै योगमार्गमास्थाय आस्तेस्म ॥३५॥ हे विदुर, एवं कपिलस्य देवहूत्याश्च पवित्रः संवादस्ते कथितः ॥३६॥ यः पुमानेतत्कपिलमतं शृणोति श्रावयति वा स भगवति स्थापितबुद्धिः सन् भगवच्चरणकमलं प्राप्नोति ॥३७॥ इति श्रीमद्भागवतचूर्णिकायां तृतीयस्कंधे कपिलचरितं नाम त्रयस्त्रिंशोऽध्यायः ॥३३॥ ॥ श्रीकृष्णार्पणमस्तु ॥

इति सचूर्णिकश्रीमद्भागवते तृतीयस्कंधः समाप्तः

अथ सचूर्णिकश्रीमद्भागवते चतुर्थस्कंधारंभः

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ अथैकत्रिंशताध्यायैर्विसर्गस्तुर्य ईर्यते । विसर्गस्त्वीश्वराधीनैर्ब्रह्ममन्वादिभिः कृतः ॥१॥ तत्र तु प्रथमेऽध्याये मनुकन्यान्वयाः पृथक् । वर्ण्यंते यत्र यज्ञादिमूर्तिभिः प्रभवो हरेः ॥२॥ मैत्रेय उवाच ॥ हे विदुर, स्वायंभुवस्य मनोः शतरूपायां भार्यायां आकूतिर्देवहूतिः प्रसूतिश्चेति तिस्रः कन्या जज्ञिरे ॥१॥ तत्र स्वायंभुवमनू रुचये पुत्रिकाधर्मेण[१] आकूतिं प्रादात् ॥२॥ तस्यां मनुरेकं पुत्रमेकां कन्यां चोत्पादयामास ॥ ३ ॥ तत्र यः पुत्रः स यज्ञ इति संज्ञया विष्णोरवतारः । या कन्या सा दक्षिणानाम्नी लक्ष्म्या अंशभूता जाता ॥ ४ ॥ मनुस्तं पुत्रं यज्ञं स्वगृहे आनिनाय । रुचिर्दक्षिणां कन्यामग्रहीत् ॥५॥ ततः स यज्ञस्तां दक्षिणामुदवहत् । तस्यां द्वादश पुत्रान् जनयामास ॥६॥ ते च तोषः प्रतोषः संतोषो भद्रः शांतिः इडस्पतिः इध्मः कविः विभुः स्वह्नः सुदेवो रोचन इति द्वादश ॥७॥ ते स्वायंभुवमन्वंतरे हविर्भागग्राहिणस्तुषिता नाम देवा आसन् । तत्र मन्वंतरे मरीच्यादयः सप्त ऋषय आसन् ।

श्रीगणेशाय नमः ॥ मैत्रेय उवाच ॥ मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥१॥ आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः ॥ पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥२॥ प्रजापतिः स भगवान्रुचिस्तस्यामजीजनत् ॥ मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना ॥३॥ यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक् ॥ या स्त्री सा दक्षिणा भूतेरंशभूताऽनपायिनी ॥४॥ आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम् ॥ स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम् ॥५॥ तां कामयानां भगवानुवाह यजुषां पतिः ॥ तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥ ६ ॥ तोषः प्रतोषः संतोषो भद्रः शांतिरिडस्पतिः ॥ इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ॥७॥ तुषिता नाम ते देवा आसन्स्वायंभुवांतरे ॥ मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥८॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ ॥ तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदंतरम् ॥९॥ देवहूतिमदात्तात कर्दमायात्मजां मनुः ॥ तत्संबंधि श्रुतप्रायं भवता गदतो मम ॥१०॥ दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः ॥ प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान् ॥११॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः ॥ तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे ॥१२॥ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा ॥ कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥१३॥ पूर्णिमासूत विरजं विश्वगं च परंतप ॥ देवकुल्यां हरेः पादशौचाद्याऽभूत्सरिद्दिवः ॥१४॥ अत्रेः पत्न्यनसूया त्रीन् जज्ञे सुयशसः सुतान् ॥ दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् ॥१५॥

यज्ञो हरेरवतारः स एवेंद्र आसीत् ॥८॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ तत्पुत्रपौत्रनप्तॄणां वंशैस्तन्मन्वंतरं पालितम् ॥९॥ तथा मनुः कर्दमाय देवहूतिं प्रादात् । तच्चरितं तृतीयस्कंधे भवता बहुशः श्रुतप्रायम् ॥१०॥ तथा ब्रह्मपुत्राय दक्षाय प्रसूतिं कन्यां ददौ । दक्षस्य पुत्रपौत्रादिर्महान् वंशस्त्रैलोक्ये विस्तृत आसीत् ॥११॥ अतः परं कर्दमस्य नव कन्यानां वंशं शृणु ॥१२॥ मरीचेः पत्नी कला, कश्यपं पूर्णिमानं च सुषुवे । ययोर्वंशेन जगत् पूरितम् ॥ १३ ॥ कश्यपवंशं षष्ठस्कंधे वक्ष्ये । पूर्णिमा विरजं विश्वगं देवकुल्यां कन्यां च सुषुवे । या जन्मांतरे गंगा बभूव ॥१४॥ अत्रेः पत्नी नाम्ना अनसूया त्रीन् दत्तदुर्वासःसोमान्

---

[१] अस्यां कन्यायां यः पुत्रो भवेत्स मे पुत्रो भवेदिति भाषाबंधेन कन्यादानं पुत्रिकाधर्मः ।

विष्णुरुद्रब्रह्मांशसंभवान् त्रीन् पुत्रान् जज्ञे ॥ १५ ॥ विदुर उवाच ॥ अत्रेर्गृहे ब्रह्मविष्णुमहेश्वराः किं कर्तुमिच्छवो जाताः एतद्वद ॥ १६ ॥ मैत्रेय उवाच ॥ ब्रह्मणा सृष्टिं कर्तुं प्रेरितोऽत्रिः पत्न्या सह ऋक्षनामकं कुलाचलं प्राप्य ॥१७॥ तत्र पलाशाशोकवृक्षमंडिते निर्विंध्यानाम्न्या नद्या जलैर्नादिते वने ॥१८॥ एकेन पदा तिष्ठन् वर्षशतं वायुभोजनः प्राणायामेन मनो नियम्य तपः कुर्वन्निदमाह ॥१९॥ यो जगदीश्वरोऽस्ति स मे स्वतुल्यां प्रजां यच्छतु। तमहं शरणं प्रपद्ये ॥२०॥ ततो मुनेर्मस्तकान्निर्गतेन प्राणायामप्रदीप्तेनाग्निना तप्यमानं त्रैलोक्यं दृष्ट्वा ॥२१॥ ब्रह्मविष्णुमहेश्वरा देवा अत्रेराश्रमं ययुः ॥ २२ ॥ तदाऽत्रिस्तेषां सान्निध्येन प्रकाशितमनाः सन् तान् ददर्श ॥२३॥ वृषहंसगरुडारूढान् त्रिशूलकमंडलुचक्रधरान् कृपावलोकेन हास्यवदनेन च प्रसन्नत्वेन ज्ञापितान् तान्

विदुर उवाच ॥ अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यंतहेतवः ॥ किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो ॥ १६ ॥ मैत्रेय उवाच ॥ ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदां वरः ॥ सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥ १७ ॥ तस्मिन्प्रसूनस्तबकपलाशाशोककानने ॥ वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्यायाः समंततः ॥ १८ ॥ प्राणायामेन संयम्य मनो वर्षशतं मुनिः ॥ अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः ॥ १९ ॥ शरणं तं प्रपद्येऽहं य एव जगदीश्वरः ॥ प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् ॥ २० ॥ तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना ॥ निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥२१॥ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः ॥ वितायमानयशसस्तदाश्रमपदं ययुः ॥ २२ ॥ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः ॥ उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् ॥ २३ ॥ प्रणम्य दंडवद्भूमावुपतस्थेऽर्हणांजलिः ॥ वृषहंससुपर्णस्थान्स्वैः स्वैश्चिह्नैश्च चिह्नितान् ॥ २४ ॥ कृपावलोकेन हसद्वदनेनोपलंभितान् ॥ तद्रोचिषा प्रतिहते निमील्य पुनरक्षिणी ॥ २५ ॥ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः ॥ श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः ॥ २६ ॥ अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ॥ ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः ॥ २७ ॥ एको मयेह भगवान्विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम् ॥ अत्रागतास्तनुभृतां मनसोऽपि दूरा ब्रूत प्रसीदत महानिह विस्मयो मे ॥ २८ ॥ मैत्रेय उवाच ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः ॥ प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ॥ २९ ॥ देवा ऊचुः ॥ यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा ॥ सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयम् ॥ ३० ॥ ॥ ॥ ॥

त्रीन् देवान् दृष्ट्वा प्रणम्य पूजयामास । ततस्तेषां तेजसा प्रतिहते नेत्रे निमील्य ॥२४॥२५॥ चित्तं तदेकाग्रं कुर्वन् कृतांजलिर्मधुरया वाचा तुष्टाव ॥ २६ ॥ अत्रिरुवाच ॥ हे देवाः, युष्मानहं प्रणतोऽस्मि । मयैक एव देवः पुत्रप्राप्त्यर्थमाहूतः स भवत्सु क इति भवद्भिरेव कथनीयः ॥ २७ ॥ किंच । मया पुत्रोत्पत्त्यर्थं एको देवश्चित्ते ध्यातः । एवं सति मनसोऽप्यगोचरा यूयं त्रयो देवा अत्र कथमागताः ॥२८॥ मैत्रेय उवाच ॥ इत्यत्रेर्वचः श्रुत्वा त्रयस्ते देवाः प्रहस्योचुः ॥२९॥ देवा ऊचुः ॥ हे अत्रे, यदेकं तत्त्वं त्वं ध्यायसि त एव वयं त्रयः प्राप्ताः । अस्मद्दर्शनमन्यथा न भवति ॥ ३० ॥ ॥ ॥

अतोऽस्मदंशभूतास्ते त्रयः पुत्रा भूत्वा ते यशो विस्तारयिष्यंति ॥३१॥ एवं वरं दत्वा ताभ्यामनसूयात्रिभ्यां पूजितास्त्रयो देवा जग्मुः ॥ ३२ ॥ ततो ब्रह्मणोंऽशेन सोमो विष्णोरंशेन दत्तः शिवांशेन दुर्वासा एवं त्रयः पुत्रा बभूवुः ॥३३॥ ब्रह्मणस्तृतीयपुत्रस्यांगिरसः पत्नी श्रद्धानाम्नी, सिनीवालीं कुहूं राकां अनुमतिं चेति चतस्रः कन्या असूत ॥३४॥ अंगिरसः उतथ्यो बृहस्पतिश्चेति द्वौ पुत्रौ चासतुः ॥३५॥ ब्रह्मणश्चतुर्थः पुत्रः पुलस्त्यो हविर्भुवि भार्यायामगस्त्यं विश्रवसं च जनयामास॥३६॥ विश्रवा इडविडायां भार्यायां कुबेरं केशिन्यां पत्न्यां रावणं कुंभकर्णं विभीषणं च जनयामास॥३७॥ पंचमः पुलहो गत्यां भार्यायां कर्मश्रेष्ठं वरीयांसं सहिष्णुं चाजनयत् ॥३८॥ षष्ठः क्रतुः क्रियायां भार्यायां षष्टिसहस्राणि वालखिल्यान् ऋषीन् जनयामास ॥३९॥ अष्टमो वसिष्ठ ऊर्जायां (अरुंधत्यां) भार्यायां सप्त ब्रह्मर्षीन् जनयामास ॥४०॥ ते च–चित्रकेतुः सुरोचिः विरजा मित्र उल्बणो वसुभृद्यानो द्युमांश्चेति ॥ अन्ये च शक्त्यादयो वसिष्ठस्य पुत्रा आसन् ॥४१॥ अथर्वणश्चित्यां (शांतिनाम्न्यां) भार्यायां धृतव्रतं दध्यंचं चाजनयत् ॥४२॥ ब्रह्मणः सप्तमः पुत्रो भृगुः ख्यात्यां भार्यायां धातृविधातारौ पुत्रौ श्रियं कन्यां चाजनयत् ॥४३॥ ताभ्यां धातृविधातृभ्यां मेरुः आयतिं नियतिं च स्वकन्ये ददौ। धाता आयत्यां मृकंडमजनयत् । मृकंडान्मार्कंडेयः । विधाता नियत्यां प्राणमजनयत् । प्राणाद्वेदशिरा जातः । भृगोरन्यः पुत्रः कविः । कवेः शुक्रः ॥४४॥४५॥ हे विदुर, एषा ते कर्दमकन्यासंततिः कथिता ।

आथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः ॥ भवितारोंऽग भद्रं ते विस्रप्स्यंति च ते यशः ॥ ३१ ॥ एवं कामवरं दत्वा प्रतिजग्मुः सुरेश्वराः ॥ सभाजितास्तयोः सम्यग्दंपत्योर्मिषतोस्ततः ॥ ३२ ॥ सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् ॥ दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः ॥ ३३ ॥ श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः ॥ सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥ ३४ ॥ तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेंऽतरे ॥ उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः ॥ ३५ ॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि ॥ सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ॥ ३६ ॥ तस्य यक्षपतिर्देवः कुबेरस्त्विडविडासुतः ॥ रावणः कुंभकर्णश्च तथान्यस्यां विभीषणः ॥ ३७ ॥ पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान् ॥ कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत ॥ ऋषीन्षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा ॥ ३९ ॥ ऊर्जायां जज्ञिरे पुत्रा वसिष्ठस्य परंतप ॥ चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः ॥ ४० ॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ॥ उल्बणो वसुभृद्यानो द्युमान् शक्त्यादयोऽपरे ॥ ४१ ॥ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतम् ॥ दध्यंचमश्वशिरसं भृगोर्वंशं निबोध मे ॥ ४२ ॥ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत् ॥ धातारं च विधातारं श्रियं च भगवत्पराम् ॥ ४३ ॥ आयतिं नियतिं चैव सुते मेरुस्तयोरदात् ॥ ताभ्यां तयोरभवतां मृकंडः प्राण एव च ॥ ४४ ॥ मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः ॥ कविश्च भार्गवो यस्य भगवानुशना सुतः ॥ ४५ ॥ त एते मुनयः क्षत्तर्लोकान्सर्गैरभावयन् ॥ एष कर्दमदौहित्रसंतानः कथितस्तव ॥ शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ॥ ४६ ॥ ॥

सा श्टण्वतः पापं हरति ॥४६॥ ब्रह्मपुत्रो दक्षः प्रसूत्यां मनुकन्यायां षोडश कन्या अजनयत् ॥४७॥ तासु त्रयोदश धर्मायैकामग्नये एकां पितृभ्य एकां शिवाय च प्रादात् ॥४८॥ तत्र-श्रद्धा मैत्री दया शांतिः तुष्टिः पुष्टिः क्रिया उन्नतिः बुद्धिः मेधा तितिक्षा ह्रीः मूर्तिश्चेति १२ धर्मपत्न्यः ॥४९॥ श्रद्धा धर्मपत्नी शुभं पुत्रं प्रासूत । मैत्री प्रसादं दयाऽभयं शांतिः सुखं तुष्टिर्मुदं पुष्टिः स्मयम् ॥५०॥ क्रिया योगं उन्नतिर्दर्पं बुद्धिरर्थं मेधा स्मृतिं तितिक्षा क्षेमं ह्रीः प्रश्रयं प्रासूत ॥५१॥ मूर्तिर्नरनारायणावृषी प्रासूत । ययोर्जन्मसमये इदं विश्वमानंदं प्राप ॥५२॥ तदा लोकानां मनांसि दिशश्च प्रसेदुः । स्वर्गे देवा वाद्यानि वादयांचक्रिरे । स्वर्गाद्भुवि पुष्पवृष्टयः पेतुः ॥५३॥ मुनयस्तुष्टुवुः । गंधर्वकिंनरा जगुः । अप्सरसो ननृतुः । एवं परमं मंगलमासीत् । ब्रह्मादयस्तुष्टुवुः ॥५४॥ देवा ऊचुः ॥ यः

प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः ॥ तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ॥ ४७ ॥ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः ॥ पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ॥ ४८ ॥ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः ॥ बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ॥ ४९ ॥ श्रद्धासूत शुभं मैत्री प्रसादमभयं दया ॥ शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ॥५०॥ योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत ॥ मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ॥ ५१ ॥ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतम् ॥५२॥ मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः ॥ दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ॥ ५३ ॥ मुनयस्तुष्टुवुस्तुष्टा जगुर्गंधर्वकिंनराः ॥ नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलम् ॥ देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः ॥५४॥ देवा ऊचुः ॥ यो मायया विरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय ॥ एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ॥ ५५ ॥ सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान्सत्वेन नः सुरगणाननुमेयतत्त्वः ॥ दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविंदम् ॥ ५६ ॥ एवं सुरगणैस्तात भगवंतावभिष्टुतौ ॥ लब्धावलोकैर्ययतुरर्चितौ गंधमादनम् ॥५७॥ताविमौ वै भगवतो हरेरंशाविहागतौ ॥ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ॥ पावकं पवमानं च शुचिं च हुतभोजनम् ॥ ५९ ॥ तेभ्योऽग्नयः समभवंश्चत्वारिंशच्च पंच च ॥ त एवैकोनपंचाशत्साकं पितृपितामहैः ॥ ६० ॥ वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः ॥ आग्नेय्य इष्टयो यज्ञे निरूप्यंतेऽग्नयस्तु ते ॥ ६१ ॥ अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः ॥ साग्नयोऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ॥६२॥

स्वमायया आत्मनि विश्वं रचितवान् यश्च तमात्मानं धर्मगृहे प्रकटितवान् तस्मै पुरुषाय नमः ॥५५॥ सोऽयमस्मान् सुरगणान् दयावलोकनेन पश्यतु ॥५६॥ एवं देवैः स्तुतौ तौ नरनारायणौ गंधमादनपर्वतं ययतुः ॥५७॥ तौ हरेरंशाविह भुवोभारनाशाय श्रीकृष्णार्जुनौ जातौ ॥ ५८ ॥ अग्नेः पत्नी स्वाहा, पावकं पवमानं शुचिं चाजीजनत् । तेभ्यस्त्रिभ्यः पंचचत्वारिंशत् ४५ अग्नयो जाताः । एवं त्रयः पितरः ३ एकः पितामहः १ तैः सह तेऽग्नय एकोनपंचाशत् ४९ बभूवुः ६०॥ब्रह्मवादिभिर्यज्ञे तेषां नामभिरग्निदेवताका इष्टयो निरूप्यंते॥६१॥अग्निष्वात्ताः बर्हिषदः सौम्याः आज्यपाः साग्नयः अनग्नयश्च पितरस्तेषां पत्नी स्वधा ॥६२॥

सा वयुनां धारिणीं च द्वे कन्ये प्रासूत । ते द्वे अपि ब्रह्मवादिन्यौ जाते ॥६३॥ शिवस्य पत्नी सती तु पुत्रं न लेभे ॥ ६४ ॥ यतःसा दक्षकोपात्कौमारावस्थायामेव
योगमाश्रित्य देहं जहौ ॥६५॥ इति श्रीमद्भागवतचू० चतुर्थस्कंधे प्रथमोऽध्यायः ॥१॥ द्वितीये प्रथमाध्यायोपक्षिप्तभवदक्षयोः। विद्वेषे वर्ण्यते हेतुर्विश्वसृग्यज्ञसंभवः ॥१॥
विदुर उवाच ॥ हे मैत्रेय, शीलवतां श्रेष्ठे शिवे दक्षः स्वकन्यामनादृत्य कस्माद्द्वेषमकरोत् ॥ १ ॥ यतः चराचरगुरुं निर्वैरमात्मारामं शिवंप्रति
कः पुमान् द्वेष्टि न कोऽपि ॥२॥ हे मैत्रेय, जामातुः श्वशुरस्य द्वेषे किं कारणं तद्वद । यतः सती दुस्त्यजान् प्राणान् जहौ ॥ ३ ॥ मैत्रेय उवाच ॥पुरा
विश्वसृजां यज्ञे ऋषयः सर्वे देवा अग्नयश्च मिलिता आसन् ॥४॥ तत्सभायां तेजसा सूर्यमिव प्रकाशमानमागतं दक्षं दृष्ट्वा ॥ ५ ॥ ब्रह्माणं शिवं च विना ते

तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा ॥ उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥ ६३ ॥ भवस्य पत्नी तु सती भवं
देवमनुव्रता ॥ आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥ ६४ ॥ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ॥ अप्रौढैवात्मना
ऽऽत्मानमजहाद्योगसंयुता ॥ ६५ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे विदुरमैत्रेयसंवादे प्रथमोऽध्यायः ॥ १ ॥ विदुर
उवाच ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीम् ॥ १ ॥ कस्तं चराचरगुरुं निर्वैरं
शांतविग्रहम् ॥ आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥ २ ॥ एतदाख्याहि मे ब्रह्मन्जामातुः श्वशुरस्य च ॥ विद्वेषस्तु यतः
प्राणांस्तत्यजे दुस्त्यजान्सती ॥ ३ ॥ मैत्रेय उवाच॥ पुरा विश्वसृजां सत्रे समेताः परमर्षयः॥ तथाऽमरगणाः सर्वे सानुगा मुनयोऽग्नयः ॥ ४ ॥
तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा ॥ भ्राजमानं वितिमिरं कुर्वंतं तन्महत्सदः ॥ ५॥ उदतिष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यः
सहाग्नयः ॥ ऋते विरिंचं शर्वं च तद्भासाऽऽक्षिप्तचेतसः ॥ ६ ॥ सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः ॥ अजं लोकगुरुं
नत्वा निषसाद तदाज्ञया ॥ ७ ॥ प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः ॥ उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ॥ ८ ॥
श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः ॥ साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ॥ ९ ॥ अयं तु लोकपालानां यशोघ्नो निरपत्रपः॥
सद्भिराचरितः पंथा येन स्तब्धेन दूषितः ॥ १० ॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् ॥ पाणिं विप्राग्निमुखतः सावित्र्या
इव साधुवत् ॥ ११ ॥ गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः ॥ प्रत्युत्थानाभिवादार्हे वाचाप्यकृत नोचितम् ॥ १२ ॥
लुप्तक्रियायाशुचये मानिने भिन्नसेतवे ॥ अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरम् ॥ १३ ॥ ॥ ॥

सर्वे स्वासनेभ्य उदतिष्ठन् ॥६॥ तदा सर्वैः सभापतिभिः सत्कृतो दक्षो ब्रह्माणं नत्वा तदाज्ञया निषसाद ॥ ७ ॥ ततोऽनुत्थितं शिवं दृष्ट्वा वक्रदृष्ट्या चक्षुर्भ्यां
दहन्निव तं वीक्ष्य जगाद॥८॥ हे सभासदः, अज्ञानान्मत्सराच्च न ब्रुवतो मे वाक्यं श्रूयताम् ॥९॥ अयं शिवस्तु लोकपालानां यशोनाशकः निर्लज्जोऽस्ति । येन
सन्मार्गस्त्यक्तः ॥१०॥ एष मे शिष्यतां प्राप्तः । यतो विप्राग्निसमक्षं मृगनेत्राया मे पुत्र्याः पाणिं जग्राह ॥ ११ ॥ अयं मर्कटलोचनः प्रत्युत्थाननमस्कारयोग्ये
मयि वाण्यापि सत्कारं नाकरोत् ॥१२॥ अशुचये क्रियाभ्रष्टायास्मै शूद्राय वेदमिवाहं कन्यां प्रादाम् ॥१३॥ ॥ ॥

अयं श्मशानेषु भूतप्रेतगणैः सह नग्न उन्मत्तवद्धसन् रुदन् पर्यटति ॥१४॥ चिताभस्मकृतस्नानो मुंडमालाधरोऽस्थिभूषणः शिवोऽप्यशिवो भूतादीनां पतिः ॥१५॥ एवंभूताय दुष्टचित्ताय ब्रह्मणा प्रेरितेन मया साध्वी दत्ता बत ॥१६॥ मैत्रेय उवाच ॥ एवं दक्षो विनिंद्य क्रुद्धः सन् उदकमाचम्य शिवं शप्तुं प्रवृत्तः ॥१७॥ अयं यज्ञे देवैः सह भागं न लभताम् । यतो देवगणाधमः ॥ १८ ॥ तदा दक्षः सदस्यमुख्यैर्निषिध्यमानोऽपि शिवाय शापं दत्वा स्वगृहं ययौ ॥ १९ ॥ तदा शिवसेवकेषु मुख्यो नंदीश्वरस्तं शापं श्रुत्वा दक्षाय ये च शिवनिंदामन्वमोदंत तेभ्योऽपि शापान् ददौ ॥ २० ॥ यो भगवते शिवाय द्रुह्यति स दक्षः परमार्थतो विमुखो भवतु ॥२१॥ अयं दक्षो गृहेषु सक्तो नित्यं कर्म करोति ॥ २२ ॥ अतः स्त्रीकामोऽस्तु । य आत्मतत्त्वं विस्मृत्य पशुतुल्यो जातस्तस्मादसौ

प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन्रुदन् ॥१४॥ चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः ॥ शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः ॥ पतिः प्रमथभूतानां तमोमात्रात्मकात्मनाम् ॥१५॥ तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे ॥ दत्ता बत मया साध्वी चोदिते परमेष्ठिना ॥१६॥ मैत्रेय उवाच ॥ विनिंद्यैवं स गिरिशमप्रतीपमवस्थितम् ॥ दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे ॥१७॥ अयं तु देवयजन इंद्रोपेंद्रादिभिर्भवः ॥ सहभागं न लभतां देवैर्देवगणाधमः ॥१८॥ निषिध्यमानः स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापम् ॥ तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनम् ॥१९॥ विज्ञाय शापं गिरिशानुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः ॥ दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः ॥२०॥ य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥२१॥ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ॥ कर्मतंत्रं वितनुते वेदवादविपन्नधीः ॥२२॥ बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ॥ स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ॥२३॥ विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः ॥ संसरंत्विह ये चामुमनु शर्वावमानिनम् ॥ २४ ॥ गिरः श्रुतायाः पुष्पिण्या मधुगंधेन भूरिणा ॥ मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः ॥ २५ ॥ सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः ॥ वित्तदेहेंद्रियारामा याचका विचरंत्विह ॥ २६ ॥ तस्यैवं ददतः शापं श्रुत्वा द्विजकुलाय वै ॥ भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययम् ॥ २७ ॥ भवव्रतधरा ये च ये च तान्समनुव्रताः ॥ पाखंडिनस्ते भवंतु सच्छास्त्रपरिपंथिनः ॥ २८ ॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः ॥ विशंतु शिवदीक्षायां यत्र दैवं सुरासवम् ॥ २९ ॥ ॥ ॥ ॥

बस्तमुखो भवतु ॥२३॥ अयं दक्षोऽविद्यायां विद्याबुद्धिर्जडोऽस्तु । ये च दक्षमनुसरंति ते जन्ममरणादियातनामनुभवंतु ॥ २४ ॥ ये शिवद्वेष्टारस्तेऽर्थवादयुक्ताया वेदवाण्या माधुर्येण क्षोभितचित्ताः संतः कर्मस्वासक्ता भवंतु ॥२५॥ ये दक्षमनुसृता ब्राह्मणास्ते विद्यातपोव्रतयुक्ता अपि सर्वभक्षाः संत इह याचका भूत्वा विचरंतु ॥२६॥ एवं द्विजकुलाय दत्तं शापं श्रुत्वा भृगुस्तं नंदिकेश्वरं शशाप ॥२७॥ ये शिवव्रता ये चताननुसरंति ते सर्वेऽपि पाखंडिनो भवंतु॥२८॥ किंच । नष्टशौचा जटाभस्मास्थिधारिणः संतः शिवदीक्षायां प्रविशंतु । यत्र सुरा मद्यं चादरणीयमस्ति ॥ २९ ॥ ॥ ॥

किंच। यूयं वेदं ब्राह्मणांश्च निंदथ अतः पाखंडं श्रिता भवत ॥३०॥ यं पूर्वे ऋषय आश्रितवंतः यस्मिंश्च जनार्दनो मूलम्॥३१॥ तं शुद्धं वेदमार्गं विगर्ह्य पाखंडं यात। यत्र भूतराड् देवता॥३२॥ मैत्रेय उवाच ॥ ततः शिवो भृगुवाक्यं श्रुत्वा खिन्न इवानुचरैः सह निश्चक्राम॥३३॥ ते विश्वसृजः सहस्रसंवत्सरपर्यंतं सत्रं कृत्वा ॥३४॥ प्रयागेऽवभृथस्नानं कृत्वा सर्वे स्वं स्वं स्थानं ययुः ॥३५ ॥ इति श्रीमद्भागवतचू० चतुर्थस्कंधे द्वितीयोऽध्यायः ॥२॥ ॥ तृतीये तु सती तातयज्ञोत्सवदिदृक्षया। गमिष्यंती महेशेन वारिता नीतिहेतुभिः ॥ १ ॥ मैत्रेय उवाच ॥ हे विदुर, एवं सदा जामातुः श्वशुरस्यापि द्विषतोः सतोर्महान् कालो जगाम ॥१॥ यदा ब्रह्मणा प्रजापतीनामाधिपत्ये दक्षोऽभिषिक्तस्तदा तस्यातिगर्वो जातः ॥२॥ स एकदा वाजपेययज्ञेनेष्ट्वा शंकरादिब्रह्मनिष्ठांस्तिरस्कृत्य बृहस्पतिसवं नाम यज्ञं प्रारेभे ॥३॥ तस्मिन् यज्ञे सर्वे देवर्षिपितृदेवताः सपत्नीका आययुः॥ ४ ॥ तदा सती आकाशे विमानैर्गच्छतां देवानां मुखात् पितृयज्ञमहोत्सवं श्रुत्वा ॥५॥ विमानैर्देवस्त्रियः पतिभिः सह स्वलंकृत्य व्रजंतीर्दृष्ट्वा ॥६॥ स्वयमपि तत्र गंतुमुत्सुका सती शिवं बभाषे॥ ७ ॥ सत्युवाच ॥ हे शिव, सांप्रतं ते श्वशुरस्य गृहे यज्ञमहोत्सव आरब्धः किल। तत्र देवा व्रजंति ॥ ८ ॥ किंच। सभर्तृका मम भगिन्यस्तत्र गमिष्यंति पश्य पश्य। अहं च भवता सह तत्र गत्वाऽलंकारादिकं स्वीकर्तुमिच्छामि ॥९॥ तत्र बहुकालतो मातृभगिन्यादिकान् द्रष्टुमिच्छामि। हे मृड, ऋषिभिरनुष्ठीयमानं यज्ञमुन्नीयमानं ध्वजं च

ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ॥ सेतुं विधारणं पुंसामतः पाखंडमाश्रिताः॥३०॥ एष एव हि लोकानां शिवः पंथाः सनातनः॥ यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ॥३१॥ तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम् ॥ विगर्ह्य यात पाषंडं दैवं वो यत्र भूतराट् ॥३२॥ मैत्रेय उवाच॥ तस्यैवं वदतः शापं भृगोः स भगवान् भवः ॥ निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥३३॥ तेऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान्॥ संविधाय महेष्वास यत्रेज्यऋषभो हरिः ॥३४॥ आप्लुत्यावभृथं यत्र गंगायमुनयान्विता ॥ विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ॥३५॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे दक्षशापो नाम द्वितीयोऽध्यायः॥२॥ मैत्रेय उवाच॥ सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः॥ जामातुः श्वशुरस्यापि सुमहानतिचक्रमे॥१॥ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना॥ प्रजापतीनां सर्वेषामाधिपत्ये स्म योऽभवत्॥२॥ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च॥ बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥३॥ तस्मिन्ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः॥ आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः॥४॥ तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम्॥ सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम्॥५॥ व्रजंतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः॥ विमानयानाः सप्रेष्ठा निष्ककंठीः सुवाससः ॥ ६ ॥ दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः॥ पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत॥ ७ ॥ सत्युवाच॥ प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल॥ वयं च तत्राभिसराम वाम ते यद्यर्थितामी विबुधा व्रजंति हि ॥८॥ तस्मिन्भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः ॥ अहं च तस्मिन्भवताऽभिकामये सहोपनीतं परिबर्हमर्हितुम्॥ ९ ॥ तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरम् ॥ द्रक्ष्ये चिरोत्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजम्॥ १० ॥ ॥

द्रष्टुमिच्छामि ॥१०॥ हे भगवन्, त्वय्येतदाश्चर्यं न । तथापि स्त्री अहं तव स्वरूपं न वेद्मि । अत आत्मनो जन्मभूमिं द्रष्टुमिच्छामि ॥११॥ हे जन्मरहित,
अन्यस्त्रियः संबंधरहिता अपि सभर्तृकाः प्रयांतीः पश्य । यासां विमानैराकाशं व्याप्तमस्ति ॥१२॥ पितृगृहे कौतुकं श्रुत्वा कन्याया गंतुमिच्छा कथं न स्यात् ।
पतेर्गुरोः पितुश्च गृहमनाहूता अपि यांति ॥१३॥ तस्माद्भवान् मे इच्छितं कर्तुमर्हसि । त्वया स्वदेहार्धेऽपि मम स्थानं दत्तम् । अतः पितृगृहे गंतुं मामनुगृहाण
॥१४॥ श्रीशुक उवाच ॥ शिव एवं सतीवाक्यं श्रुत्वा विश्वसृजां समक्षं दक्षो यदाह तत्स्मरन् जगाद ॥१५॥ शिव उवाच ॥ हे शोभने, पित्रादिसंबंधिषु अनाहूता
अपि गच्छंतीति यत्त्वयोक्तं तद्योग्यमेव । तथापि ते पित्रादयोऽहंकारेण मदेन क्रोधेन च दोषदृष्टयो यदि न स्युस्तर्हि गंतव्यम् ॥ १६ ॥ विद्यातपोद्रव्य-

त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकम् ॥ तथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिम्
॥११॥ पश्य प्रयांतीरभवान्ययोषितोऽप्यलंकृताः कांतसखा वरूथशः ॥ यासां व्रजद्भिः शितिकंठ मंडितं नभो विमानैः कलहंसपांडुभिः
॥१२॥ कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते ॥ अनाहुता अप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च
केतनम् ॥१३॥ तन्मे प्रसीदेदममर्त्यवांछितं कर्तुं भवान्कारुणिको बतार्हति ॥ त्वयात्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता मानुगृहाण
याचितः ॥१४॥ ऋषिरुवाच ॥ एवं गिरित्रः प्रिययाभिभाषितः प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः ॥ संस्मारितो मर्मभिदः कुवागिषून्यानाह
को विश्वसृजां समक्षतः ॥१५॥ श्रीभगवानुवाच ॥ त्वयोदितं शोभनमेव शोभने अनाहुता अप्यभियंति बंधुषु ॥ ते यद्यनुत्पादित
दोषदृष्टयो बलीयसानात्म्यमदेन मन्युना ॥१६॥ विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः ॥ स्मृतौ हतायां
भृतमानदुर्दृशस्तब्धा न पश्यंति हि धाम भूयसाम् ॥१७॥ नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनाम् ॥ येऽभ्यागतान्वक्रधियाऽभिचक्षते
आरोपितभ्रूभिरमर्षणाक्षिभिः ॥१८॥ तथारिभिर्न व्यथते शिलीमुखैः शेतेऽर्दितांगो हृदयेन दूयता ॥
स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः ॥१९॥ व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु संमता
॥ अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥२०॥ पापच्यमानेन हृदाऽऽतुरेंद्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम्
॥ अकल्प एषामधिरोढुमंजसा पदं परं द्वेष्टि यथाऽसुरा हरिम् ॥ २१ ॥ प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु
मिथः सुमध्यमे ॥ प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥ २२ ॥ ॥ ॥ ॥

शरीरवयःकुलैर्ये गर्विष्ठास्ते श्रेष्ठानां तेजो न पश्यंति ॥ १७ ॥ एवंभूतानां तेषां स्वजनसमागमेच्छा नास्ति । ये समीपं प्राप्तान् स्वजनानपि वक्रधिया पश्यंति
तेषां गृहान् न गंतव्यम् ॥ १८ ॥ वक्रधियां स्वकीयानां दुर्भाषणैर्मर्मसु ताडितः पुमान् दिवानिशं यथा तप्यति तथा बाणैर्न व्यथते ॥ १९ ॥ त्वं दक्षकन्यानां
मध्ये मान्यासि । अथापि पितुः सकाशान्मानं न प्राप्स्यसे । यतो मदाश्रयाद्दक्षस्त्वयि परितप्यते ॥२०॥ निरहंकारिणां पुंसां पुण्यकीर्त्यादिसमृद्धीर्दृष्ट्वा संतप्तचित्तः
स दक्षस्तेषामैश्वर्यं प्राप्तुमशक्तः सन् परं द्वेष्टि ॥ २१ ॥ हे सुमध्यमे, प्रत्युत्थाननम्रतादर्शननमस्कारादिकं जनैर्मिथो यद्विधीयते तत्प्राज्ञैरंतर्यामिदृष्ट्या

वासुदेवाय विधीयते ॥२२॥ वासुदेवश्च शुद्धांतःकरणे प्रतीयते स मया मनसा नमस्कारेण सेव्यते ॥२३॥ दक्षः सर्वत्र व्याप्तं हरिं न जानाति । तस्मात्त्वया स पितापि नावलोकनीयः । यः पूर्वं विसृज्यां यज्ञगतं निरपराधं मां दुष्टभाषणैर्निंदितवान् ॥२४॥ हे देवि, मद्वचोऽतिक्रम्य यदि त्वं गच्छसि तर्हि तव कल्याणं न भविष्यति । संभावितस्यापकीर्तिर्मरणाय कल्पते ॥२५॥ इति श्रीमद्भागवतचू॰ चतुर्थस्कंधे तृतीयोऽध्यायः ॥३॥ ॥ चतुर्थे तु पतिं हित्वा गता पित्राऽवमानिता । रुषा निर्भर्त्स्य तं यज्ञे जहौ देहमितीर्यते ॥ १ ॥ मैत्रेय उवाच ॥ शंकर एवमुक्त्वा विरराम । तदा आप्तजनान् द्रष्टुमिच्छंती सा सती गृहान्निष्क्रामती पुनश्च आज्ञोल्लंघनेन गमने कृते शंकर आत्मनस्त्यागं करिष्यतीति शंकया पुनर्गृहं प्रविशती एवं द्विधा बभूव ॥ १ ॥ सा स्नेहाद्रुदती विह्वला सती शिवं रुषा भस्मी-

सत्वं विबुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ॥ सत्वे च तस्मिन्भगवान्वासुदेवो ह्यधोक्षजो मे नमसा विधीयते ॥२३॥
तत्ते निरीक्ष्यो न पितापि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये ॥ यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाऽकरोत्तिरः ॥२४॥
यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति ॥ संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते
॥२५॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे उमारुद्रसंवादे तृतीयोऽध्यायः ॥३॥ ॥ मैत्रेय उवाच ॥ एतावदुक्त्वा विरराम
शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन् ॥ सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती द्विधाऽऽस सा ॥१॥ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला ॥ भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः ॥ २ ॥ ततो विनिःश्वस्य
सती विहाय तं शोकेन रोषेण च दूयता हृदा ॥ पित्रोरगात्स्त्रैणविमूढधीर्गृहान्प्रेम्णाऽऽत्मनो योऽर्धमदात्सतां प्रियः ॥३॥ तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः ॥ सपार्षदयक्षा मणिमन्मदादयः पुरो वृषेंद्रास्तरसा गतव्यथाः ॥४॥ तां सारिकाकंदुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिता ययुः ॥ ५ ॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभांडं यजनं समाविशत् ॥ ६ ॥ तामागतां तत्र न
कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ॥ ऋते स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ॥७॥ सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च सादरम् ॥ दत्तां सपर्यां वरमासनं च सा नादत्त पित्राऽप्रतिनंदिता सती ॥८॥ अरुद्रभागं
तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ ॥ अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ॥ ९ ॥ ॥

करिष्यंतीवैक्षत ॥२॥ ततः सती विनिःश्वस्य तं शंकरं विहाय पित्रोर्गृहं जगाम ॥३॥ तदैकाकिनीं शीघ्रं गच्छंतीं तां सतीं मणिमन्मदादयः सहस्रशः शिवानुचरा अन्वगच्छन् ॥४॥ तदा ते तस्याः सारिकाकंदुकदर्पणादीनि क्रीडासाधनानि प्रगृह्य श्वेतच्छत्रादिभिस्तां नंदिकेश्वरमारोप्य दुंदुभिशंखादिवाद्यघोषादिभिः शोभिताः संतो ययुः ॥५॥ ततो देवर्षिभिर्व्याप्तं वेदघोषैर्नादितं यज्ञस्थानं सा समाविशत् ॥ ६ ॥ तदा तत्र गतां तां सतीं दक्षभयात् भगिनीर्जननीं च विना कोऽपि नादृतवान् ॥७॥ ततो मातृभगिन्यादिभिरादरेण दत्तां पूजां सा न जग्राह ॥ ८ ॥ ततस्तं यज्ञं रुद्रभागरहितं वीक्ष्य लोकान् धक्ष्यंतीव चुकोप ॥ ९ ॥

तदा कर्ममार्गाभ्यासेन जातगर्वं दक्षं विनिंद्य तस्य दक्षस्य वधायोत्थितान् स्वगणांश्च निवार्य सर्वेषां शृण्वतां सतां सा सती जगाद ॥ १० ॥ श्रीदेव्युवाच ॥ अहो यस्य लोके प्रियोऽप्रियश्च कोऽपि नास्ति तस्मिन् शिवे त्वां विना को विरोधं करिष्यति? न कोऽपि ॥११॥ भवत्सदृशाः पुमांसः परेषां गुणेषु दोषानेव गृह्णंति न तु गुणान्। केचित्साधवस्तु गुणेषु गुणान् दोषेषु दोषान् गृह्णंति। केचित् स्वल्पानपि गुणान् बहुलीकुर्वंति ते महत्तमाः। तेषु त्वमपराधं कल्पितवान् ॥१२॥ किंच। दुष्टेषु सर्वदा महतां निंदा एतदाश्चर्यं न ॥१३॥ यस्य द्व्यक्षरं शिवेति नाम सकृदुच्चारितं सत् शीघ्रं पापं हंति तं शिवं अमंगलरूपस्त्वं द्वेक्षि ॥१४॥ यस्य पादकमलं ब्रह्मानंदरसार्थिभिः सेवितं तस्मै त्वं द्रुह्यसि ॥१५॥ किंच। श्मशाने जटाः प्रसार्य क्रीडतस्तस्य धारितं भस्मादि ब्रह्मादयो मस्त-

जगर्ह साऽमर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयम् ॥ स्वतेजसा भूतगणान्समुत्थितान्निगृह्य देवी जगतोऽभिशृण्वतः॥१०॥ श्रीदेव्युवाच ॥ न यस्य लोकेऽस्त्यतिशायनः प्रियस्तथाप्रियो देहभृतां प्रियात्मनः ॥ तस्मिन्समस्तात्मनि मुक्तवैरके ऋते भवंतं कतमः प्रतीपयेत् ॥११॥ दोषान्परेषां हि गुणेष्वसाधवो गृह्णंति केचिन्न भवादृशा द्विज ॥ गुणांश्च फल्गून् बहुलीकरिष्णवो महत्तमास्तेष्वविदद्भवानघम् ॥१२॥ नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिंदा कुणपात्मवादिषु ॥ सेर्ष्यं महापूरुषपादपांसुभिर्निरस्ततेजःसु तदेव शोभनम् ॥१३॥ यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत् ॥ पवित्रकीर्तिं तमलंघ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः ॥१४॥ यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः ॥ लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान्द्रुह्यति विश्वबंधवे ॥१५॥ किंवा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने ॥ तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्धभिर्दधति तच्चरणावसृष्टम् ॥ १६ ॥ कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने ॥ छिंद्यात्प्रसह्य रुशतीमसतीं प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत्स धर्मः॥१७॥ अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकंठगर्हिणः ॥ जग्धस्य मोहाद्धि विशुद्धिमंधसो जुगुप्सितस्योद्धरणं प्रचक्षते ॥ १८ ॥ न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः ॥ यथा गतिर्देवमनुष्ययोः पृथक् स्व एव धर्मे न परं क्षिपेत्स्थितः ॥ १९ ॥ कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितम् ॥ विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्छति ॥२०॥ मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः ॥ तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगा अवधूतसेविताः ॥ २१ ॥ ॥

कैर्धारयंति ॥१६॥ यदा सभायां धर्मरक्षक ईश्वरो निंद्यते तदा तत्रस्थो जनः कर्णौ पिधायान्यत्र निर्गच्छेत्। समर्थश्चेन्निंदकस्य जिह्वां छित्वा स्वयमपि प्राणान् त्यजेदिति धर्मः ॥१७॥ अतः शिवनिंदकात्त्वत्त उत्पन्नं देहमहं न धारयिष्ये। अज्ञानेन भक्षितस्यापवित्रस्यान्नस्य वमनं विना पुरुषस्य शुद्धिर्नास्ति ॥१८॥ स्वात्मन्येव रममाणस्य मुनेर्बुद्धिर्विधिनिषेधरूपान् वेदवादान्प्रति न प्रवर्तते ॥१९॥ किंच। वेदे सकामं निष्कामं च कर्म वर्णितमस्ति। तद्ब्रह्मरूपे शिवे किंचिदपि न संगच्छते ॥२०॥ हे पितः, अस्माभिः संपादिता अणिमादिसिद्धयो युष्माकं न संति ॥ २१ ॥ ॥ ॥

हे दक्ष, कुजनस्य तव संबंधान्मम लज्जा भवति। अतो यो महतां अप्रियकर्ता तस्मात्त्वत्तो यन्मम जन्म तस्य धिक्कारोऽस्तु ॥२२॥ किंच। विनोदेनापि शंकरो हे दाक्षायणीति त्वत्संबंधवाचकं नाम यदा गृह्णाति तदाहं दुःखितचित्ता भवामि। तस्मात्त्वत्तो जातमिदं प्रेततुल्यं शरीरमहं त्यक्ष्यामि ॥२३॥ मैत्रेय उवाच॥ सती यज्ञे दक्षं प्रत्येवमुक्त्वा मौनं गृहीत्वोत्तराभिमुखी भूत्वा योगमार्गं स्वीकृतवती ॥२४॥ आदौ प्राणापानौ नाभिचक्रे समौ कृत्वा तत उदानवायुमुत्थाप्य तं हृदयादिस्थानेषु नीत्वा भ्रुकुट्योर्मध्यं निनाय ॥२५॥ एवं देहं त्यक्तुमिच्छती सा सती गात्रेषु वायोरग्नेश्च धारणां चकार ॥ २६ ॥ ततो भर्तुश्चरणकमलमेव ध्यायती तस्थौ। तदा तस्या देहः समाधिजाग्निना सद्यः प्रज्वलितोऽभूत् ॥२७॥ तदा खे भुवि च महान् हाहाकारो बभूव। सर्वे ऊचुश्च। अहो दक्षेण प्र-

नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना ॥ व्रीडा ममाभूत्कुजनप्रसंगतस्तज्जन्म धिग्यो महतामवद्यकृत् ॥ २२ ॥ गोत्रं त्वदीयं भगवान्वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ॥ व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदंगजम् ॥२३॥ मैत्रेय उवाच ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शांतवाक् ॥ स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत् ॥२४॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः ॥ शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदिताऽनयत् ॥२५॥ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् ॥ जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम् ॥२६॥ ततः स्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरम् ॥ ददर्श देहो हतकल्मषा सती सद्यः प्रजज्वाल समाधिजाग्निना ॥२७॥ तत्पश्यतां खे भुवि चाद्भुतं महद्धाहेति वादः सुमहानजायत ॥ हंत प्रिया दैवतमस्य देवी जहावसून्केन सती प्रकोपिता ॥२८॥ अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः ॥ जहावसून्यद्विमताऽऽत्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ॥ २९ ॥ सोऽयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेऽपकीर्तिं महतीमवाप्स्यति॥ यदंगजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेऽपराधतः ॥३०॥ वदत्येवं जने सत्या दृष्ट्वासुत्यागमद्भुतम् ॥ दक्षं तत्पार्षदा हंतुमुदतिष्ठन्नुदायुधाः ॥३१॥ तेषामापततां वेगं निशाम्य भगवान्भृगुः॥ यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ॥३२॥ अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा ॥ ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः ॥३३॥ तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः ॥ हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा ॥३४॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे सतीदेहोत्सर्गो नाम चतुर्थोऽध्यायः ॥४॥

कोपिता सती प्राणान् जहौ ॥२८॥ अहो यस्य स्थावरजंगमात्मकाः प्रजास्तस्य दक्षस्यैतन्महद्दौर्जन्यं पश्यत। येनावमानिता सती प्राणांस्तत्याज ॥ २९ ॥ अयं शिवद्वेषी महतीं दुष्कीर्तिं प्राप्स्यति। यो मरणायोद्युक्तामपि स्वां कन्यां न निवारितवान् ॥ ३० ॥ ततः सत्या देहत्यागं दृष्ट्वा शिवगणा धृतायुधाः संतो दक्षं हंतुमुदतिष्ठन् ॥३१॥ तेषां वेगं दृष्ट्वा भृगुर्यज्ञविघ्ननाशकेन मंत्रेण दक्षिणाग्नौ हवनं कृतवान् ॥३२॥ तदा ऋभवो नाम सहस्रशो देवा अग्निकुंडादुत्पन्नाः ॥३३॥ तदा ज्वलत्काष्ठायुधैस्तैर्हन्यमानाः शिवानुचरा दिशो दुद्रुवुः ॥३४॥ इति श्रीमद्भागवतचूर्णिकायां चतुर्थस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥ ॥

पंचमे तु सतीदेहत्यागमाकर्ण्य शंकरः । वीरभद्रं रुषोत्पाद्य तेन दक्षमघातयत् ॥ १ ॥ मैत्रेय उवाच ॥ हे विदुर, शिवो दक्षेणावमानिताया भवान्या निधनं नारदाच्छ्रुत्वा तद्यज्ञोद्भवैर्ऋभुनामकैर्देवैः पलायनं कारितं स्वसैन्यं च श्रुत्वाऽपारं क्रोधं धृतवान् ॥ १ ॥ ततः स शिवोऽधरोष्ठं संदश्य जटामुत्कृत्य सहसोत्थितः सन् गर्जनां कृत्वा तां जटां भुवि विससर्ज॥२॥ ततो जटायाः सकाशात् कृष्णवर्णः सहस्रबाहुः सूर्यसदृशनेत्रत्रययुतो भयंकरदंष्ट्रोऽनेकायुधधरः शरीरेण स्वर्गं स्पृशन् वीरभद्र उत्पन्नः ॥३॥ ततः किंकरोमीति ब्रुवंतं वीरभद्रं शिव आह। हे वीरभद्र, त्वं मे अंशोऽसि। अतो मद्गणानां त्वं मुख्यः सन् सयज्ञं दक्षं जहि ॥४॥ तदा वीरभद्रः शिवं प्रदक्षिणीकृत्य ॥५॥ नदद्भी रुद्रपार्षदैः सह मृत्योरपि संहारकं त्रिशूलं समुद्यम्य दक्षयज्ञंप्रति जगाम ॥ ६ ॥ तदा ऋत्विजो

मैत्रेय उवाच ॥ भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात् ॥ स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे ॥ १ ॥ क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषम् ॥ उत्कृत्य रुद्रः सहसोत्थितो हसन्गंभीरनादो विससर्ज तां भुवि ॥ २ ॥ ततोऽतिकायस्तनुवा स्पृशन्दिवं सहस्रबाहुर्घनरुक् त्रिसूर्यदृक् ॥ करालदंष्ट्रो ज्वलदग्निमूर्धजः कपालमाली विविधोद्यतायुधः ॥ ३ ॥ तं किं करोमीति गृणंतमाह बद्धांजलिं भगवान्भूतनाथः ॥ दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणी रुद्र भटांशको मे ॥ ४ ॥ आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुम् ॥ मेने तदात्मानमसंगरंहसा महीयसां तात सहः सहिष्णुम् ॥ ५ ॥ अन्वीयमानः स तु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम् ॥ उद्यम्य शूलं जगदंतकांतकं स प्राद्रवद्घोषणभूषणांघ्रिः ॥ ६ ॥ अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम् ॥ तमः किमेत्कुत एतद्रजोऽभूदिति द्विजा द्विजपत्न्यश्च दध्युः ॥ ७ ॥ वाता न वांति न हि संति दस्यवः प्राचीनबर्हिर्जीवति होग्रदंडः ॥ गावो न काल्यंत इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते ॥ ८ ॥ प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको वृजिनस्यैष तस्य ॥ यत्पश्यंतीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागाम् ॥ ९ ॥ यस्त्वंतकाले व्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः ॥ वितत्य नृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् ॥ १० ॥ अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या ॥ करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः ॥ ११ ॥ बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मखेमहात्मनः ॥ उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक् ॥ १२ ॥ ॥ ॥

यजमानः सदस्याश्चोत्तरस्यां दिश्युत्थितं रेणुं वीक्ष्यैतत्किमिति चिंतयामासुः ॥७॥ किंच । वाता न वांति। चौरा न संति । गावो न शीघ्रं नीयंते । एवं सत्येतद्रजः कुत उत्पन्नम्। अधुना लोकः किं प्रलयाय कल्पते ॥८॥ तदा दक्षपत्न्याद्याः स्त्रियः सत्याः कन्याया अपमानस्येदं फलमिति जगदुः ॥ ९ ॥ यः प्रलये स्वजटाकलापमव्यवस्थया प्रसार्य शूलाग्रे प्रोतितदिग्गजेंद्रो महाट्टहाससहितं हर्षेण नृत्यति ॥१०॥ तमसह्यतेजसं कोपयतो ब्रह्मणोऽपि किं कल्याणं स्यात् न स्यादेव । अन्यस्य तु का कथा ॥ ११ ॥ एवं दक्षस्य मखे बहुप्रकारेण जनैर्भाषणे कृते सति तदा सहस्रश उत्पाता उत्पेतुः ॥ १२ ॥ ॥

तावदनेकरूपैरुद्यदायुधै रुद्रानुचरैर्यज्ञोऽवारुध्यत ॥१३॥ तदा केचित् यज्ञमंडपे पूर्वपश्चिमस्तंभोपरि स्थापितमायतं काष्ठं बभंजुः। अपरे पत्नीशालां बभंजुः।
अन्ये आग्नीध्रशालां तथा यजमानगृहं बभंजुः ॥१४॥ केचित् यज्ञपात्राणि बभंजुः। केचित् अग्नीन्नाशयामासुः। केचित् कुंडेषु मूत्रोत्सर्गं चक्रुः। केचित्
वेदिका बिभिदुः ॥१५॥ अन्ये मुनीनबाधंत। एके पत्नीस्तर्जयामासुः। अपरे पलायितान् देवान् जगृहुः ॥१६॥मणिमान् भृगुं बबंध। वीरभद्रो दक्षं बबंध।
चंडीशः पूषणं बबंध। नंदीश्वरो भगमग्रहीत् ॥१७॥ तदा सर्वे ऋत्विजः सदस्या देवा रुद्रगणैः पाषाणैरर्द्यमानाः संतो दुद्रुवुः॥ १८॥ वीरभद्रो जुह्वतो भृगोः
श्मश्रूण्युत्पाटितवान्। यः पूर्वं विश्वसृजां सत्रे श्मश्रूणि दर्शयित्वा शंकरं जहास॥१९॥तथा भगं देवं भुवि पातयित्वा तस्य नेत्रे उद्धृतवान् ॥२०॥ पूष्णो देवस्य

तावत्स रुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः ॥ पिंगैः पिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत ॥१३॥ केचिद्बभंजुः
प्राग्वंशं पत्नीशालां तथापरे ॥ सद आग्नीध्रशालां च तद्विहारं महानसम् ॥१४॥ रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् ॥ कुंडेष्वमूत्रयन्
केचिद्बिभिदुर्वेदिमेखलाः ॥ १५ ॥ अबाधंत मुनीनन्य एके पत्नीरतर्जयन् ॥ अपरे जगृहुर्देवान्प्रत्यासन्नान्पलायितान्
॥१६॥ भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिम् ॥ चंडीशः पूषणं देवं भगं नंदीश्वरोऽग्रहीत् ॥१७॥ सर्व एवर्त्विजो दृष्ट्वा सदस्याः
सदिवौकसः ॥ तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाऽद्रवन् ॥१८॥ जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः ॥ भृगोर्लुलुंचे सदसि योऽहसच्छ्मश्रु
दर्शयन् ॥१९॥ भगस्य नेत्रे भगवान्पतितस्य रुषा भुवि ॥ उज्जहार सदःस्थोऽक्ष्णा यः शपंतमसूसुचत् ॥२०॥ पूष्णश्चापातयद्दंतान्
कालिंगस्य यथा बलः ॥ शप्यमाने गरिमणि योऽहसद्दर्शयन्दतः ॥२१॥ आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥ छिंदन्नपि
तदुद्धर्तुं नाशक्नोत्त्र्यंबकस्तदा ॥२२॥ शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥२३॥
दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे ॥ यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥ साधुवादस्तदा तेषां कर्म तत्तस्य
शंसताम् ॥ भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥ २५ ॥ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः ॥ तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयम्
॥ २६ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे दक्षयज्ञविध्वंसो नाम पंचमोऽध्यायः ॥५॥ मैत्रेय उवाच ॥
अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥ ॥ ॥

दंतांश्च पातयामास। यो रुद्रे निंद्यमाने दंतान् दर्शयन् जहास ॥२१॥ ततो वीरभद्रो दक्षशिरः खङ्गेन छिंदन्नपि समुद्धर्तुं नाशक्नोत् ॥२२॥ तदा मंत्रसहितैः
शस्त्रैरभिन्नत्वचं दक्षं दृष्ट्वा विस्मितः सन् चिरं दध्यौ ॥२३॥ तदा पशुवत्कंठनिष्पीडनादिना मारणोपायं दृष्ट्वा तेनोपायेन दक्षस्य शिर आहरत् ॥ २४ ॥ तदा
शिवगणानां साधुवादोऽभूत्। ब्राह्मणादयः शोकं चक्रुः ॥२५॥ वीरभद्रो दक्षिणाग्नौ तच्छिरो हुत्वा तद्यज्ञस्थानं दग्ध्वा कैलासं ययौ ॥२६॥ इति श्रीमद्भागवतचू॰चतु॰पंचमोऽध्यायः ॥५॥ ॥ षष्ठे तु देवसंघेन सह गत्वा भवं विधिः। सांत्वयामास दक्षादिजीवितार्द्यथमादरात् ॥ १ ॥ मैत्रेय उवाच ॥ हे विदुर,
अथ सर्वे देवगणा रुद्रसैन्यैः पराजिताः संतः शूलपट्टिशादिभिरायुधैः ॥ १ ॥ ॥ ॥ ॥

छिन्नसर्वांगा भयाकुलाः संतो ब्रह्मणे नमस्कृत्य तत्सर्वं न्यवेदयन् ॥२॥ पूर्वमिदं भावि ज्ञात्वा ब्रह्मा विष्णुश्च दक्षस्य यज्ञं न जग्मतुः॥३॥ ब्रह्मा देवानां वाक्यं श्रुत्वा प्राह । हे देवाः, अतितेजस्विनि पुरुषे कृतोऽपराधः कल्याणाय न भवति ॥ ४ ॥ यूयं तु कृतापराधाः । यतो दक्षयज्ञे रुद्रस्य भागं लुप्तवंतः । अतस्तत्पादौ प्रगृह्य शीघ्रं तं प्रसादयध्वम् ॥५॥ यज्ञस्य पुनःसंधानं प्रार्थ्यमानाः संतो यूयं, यस्मिन् कुपिते सति सपालो लोको नश्येत् तं शिवं क्षमापयध्वम् ॥६॥ अहमिंद्राद्याश्च देवा यस्य बलपराक्रमयोरियत्तां न विद्मः ॥७॥ इत्युक्त्वा ब्रह्मा देवर्षिपितृप्रजेशैः सह कैलासं ययौ ॥८॥ अथ कैलासं वर्णयति । योगसिद्धैः

संछिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या भयाकुला ॥ स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् ॥२॥ उपलभ्य पुरैवैतद्भगवानब्जसंभवः ॥ नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥३॥ तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि ॥ क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषताम् ॥४॥ अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं परादुः ॥ प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मम् ॥५॥ आशासाना जीवितमध्वरस्य लोकः सपालः कुपितेन यस्मिन् ॥ तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥६॥ नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम् ॥ विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतंत्रस्य क उपायं विधित्सेत् ॥७॥ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ॥ ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः ॥८॥ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः ॥ जुष्टं किंनरगंधर्वैरप्सरोभिर्वृतं सदा ॥९॥ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥१०॥ नानामलप्रस्रवणैर्नानाकंदरसानुभिः ॥ रमणं विहरंतीनां रमणैः सिद्धयोषिताम् ॥११॥ मयूरकेकाभिरुतं मदांधालिविमूर्छितम् ॥ प्लाविते रक्तकंठानां कूजितैश्च पतत्रिणाम् ॥ १२ ॥ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः ॥ व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः ॥१३॥ मंदारैः पारिजातैश्च सरलैश्चोपशोभितम् ॥ तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥१४॥ चूतैः कदंबैर्नीपैश्च नागपुन्नागचंपकैः ॥ पाटलाशोकबकुलैः कुंदैः कुरबकैरपि ॥१५॥ स्वर्णार्णशतपत्रैश्च वररेणुकजातिभिः ॥ कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मंडितम् ॥ १६ ॥ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः ॥ भूर्जैरोषधिभिः पूगै राजपूगैश्च जंबुभिः ॥ १७ ॥ खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः ॥ द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः ॥ १८ ॥ कुमुदोत्पलकह्लारशतपत्रवनर्धिभिः ॥ नलिनीषु कलं कूजत्खगवृंदोपशोभितम् ॥ १९ ॥ ॥ ॥

सेवितं गंधर्वकिन्नरादिभिर्वृतम् ॥ ९ ॥ अनेकमणिमयशिखरैर्युक्तम् । नानामृगपक्षिभिर्व्याप्तम् ॥१०॥ पतिभिः सह क्रीडंतीनां सिद्धयोषितां रतिप्रदम् ॥११॥ मयूरशब्दैर्नादितं भ्रमराणां गायनैः कोकिलानां मधुरस्वनैरितरपक्षिणां कूजितैश्च युक्तम् ॥१२॥ उच्चशाखाभिर्वृक्षैः पक्षिणःप्रति आह्वयंतमिव लक्षितम् ॥१३॥ मंदारैः पारिजातैः तमालैरर्जुनैः ॥ १४ ॥ कदंबैः पुन्नागैश्चंपकैरशोकैर्बकुलैश्च शोभितम् ॥ १५ ॥ मल्लिकाभिर्मालतीभिः पनसैरुदुंबरैः पिप्पलैर्वटैः पूगैर्जंबुभिः खर्जूरादिभिः अन्यैर्वृक्षजातिभिश्च मंडितम् ॥ १६ ॥ १७ ॥ १८ ॥ कुमुदोत्पलकल्हारादीनां समृद्धिभिः सरोवरेषु शब्दयुक्तैः पक्षिसमूहैः शोभितम् ॥ १९ ॥

किंच । मृगवानरवराहसिंहऋक्षव्याघ्रगोमहिष्यादिभिः सेवितम् ॥२०॥ वृककस्तूरीमृगादिभिः कदलीसमुदायैश्च शोभितम् ॥२१॥ एवमनेकदिव्यकौतुकैर्युक्तं कैलासं वीक्ष्य देवाद्या विस्मयं प्रापुः ॥२२॥ तत्र गिरौ कुबेरस्यालकानाम्नीं पुरीं सौगंधिकनामकं वनं च ददृशुः ॥२३॥ नगराद्बाह्यतो नंदालकनंदा चेति द्वे सरितौ च ददृशुः ॥२४॥ ययोः नद्योः प्रविश्य पुरुषान् सिंचंत्यो देवस्त्रियः क्रीडंति ॥२५॥ ययोर्नद्योर्जलं तृषारहिता अपि गजाः पिबंति करिणीः पाययंति च ॥२६॥ तां रौप्यसुवर्णरत्नमयविमानशतैर्व्याप्तां कुबेरपुरीं हित्वा पुरतः सौगंधिकं वनं ददृशुः । तत्कथंभूतं—कामदुघैर्वृक्षैः सुखकरम् ॥२७॥२८॥ मधुरकंठानां पक्षिणां शब्दैर्भ्रमरगुंजारवैश्च मंडितम् । कमलयुक्तैर्जलाशयैर्युक्तम् ॥ २९ ॥ वनहस्तिभिर्घर्षितानां हरिचंदनवृक्षाणां संबंधिवायुना यक्षस्त्रीणां मनस उन्मादजनकम्

मृगैः शाखामृगैः क्रोडैर्मृगेंद्रैर्ऋक्षशल्यकैः ॥ गवयैः शरभैर्व्याघ्रै रुरुभिर्महिषादिभिः ॥ २० ॥ कर्णांत्रैकपदाश्वास्यैर्निर्जुष्टं वृकनाभिभिः ॥
कदलीषंडसंरुद्धनलिनीपुलिनश्रियम् ॥२१॥ पर्यस्तं नंदया सत्याः स्नानपुण्यतरोदया ॥ विलोक्य भूतेशगिरिं विबुधा विस्मयं
ययुः ॥ २२ ॥ ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीम् ॥ वनं सौगंधिकं चापि यत्र तन्नाम पंकजम् ॥ २३ ॥ नंदा चालकनंदा
च सरितौ बाह्यतः पुरः ॥ तीर्थपादपदांभोजरजसातीव पावने ॥ २४ ॥ ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः ॥ क्रीडंति
पुंसः सिंचंत्यो विगाह्य रतिकर्शिताः ॥ २५ ॥ ययोस्तत्स्नानविभ्रष्टनवकुंकमपिंजरम् ॥ वितृषोऽपि पिबंत्यंभः पाययंतो गजा गजीः
॥ २६ ॥ तारहेममहारत्नविमानशतसंकुलाम् ॥ जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनम् ॥ २७ ॥ हित्वा यक्षेश्वरपुरीं वनं सौगंधिकं
च तत् ॥ द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः ॥ २८ ॥ रक्तकंठखगानीकस्वरमंडितषट्पदम् ॥ कलहंसकुलप्रेष्ठं खरदंडजलाशयम्
॥ २९ ॥ वनकुंजरसंघृष्टहरिचंदनवायुना ॥ अधिपुण्यजनस्त्रीणां मुहुरुन्मथयन्मनः ॥ ३० ॥ वैदूर्यकृतसोपाना
वाप्य उत्पलमालिनीः ॥ प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटम् ॥ ३१ ॥ स योजनशतोत्सेधः पादोनविटपा यतः ॥ पर्यक्कृताचलच्छायो
निर्नीडस्तापवर्जितः ॥ ३२ ॥ तस्मिन्महायोगमये मुमुक्षुशरणे सुराः ॥ ददृशुः शिवमासीनंत्यक्तामर्षमिवांतकम्
॥ ३३ ॥ सनंदनाद्यैर्महासिद्धैः शांतैः संशांतविग्रहम् ॥ उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम् ॥ ३४ ॥ विद्यातपो योगपथमास्थितं
तमधीश्वरम् ॥ चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलम् ॥ ३५ ॥ लिंगं च तापसाभीष्टं भस्मदंडजटाजिनम् ॥ अंगेन संध्याभ्ररुचा
चंद्रलेखां च बिभ्रतम् ॥३६॥ उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनम् ॥ नारदाय प्रवोचंतं पृच्छते शृण्वतां सताम् ॥३७॥

॥ ३० ॥ यत्र वैदूर्यमणिसोपानयुक्ता वाप्यः संति । एवंभूतं वनं दृष्ट्वा तत्समीपे एकं वटवृक्षं ददृशुः ॥ ३१ ॥ स शतयोजनप्रमाण उच्चः । पंचसप्ततियोजनप्रमाणैः शाखाभिः सर्वतो विस्तृतः ॥ ३२ ॥ तस्याधोभागे आसीनं शांतं शिवं ददृशुः ॥ ३३ ॥ कथंभूतं शिवम् । सनत्कुमारसनंदनादिभिर्महासिद्धैः कुबेरेण चोपास्यमानम् ॥ ३४ ॥ विद्यातपोयोगमार्गाणां प्रवर्तकं जगतो मित्रम् ॥ ३५ ॥ भस्मदंडजटाजिनधरं मस्तके चंद्ररेखां धारयंतम् ॥ ३६ ॥ दर्भासने उपविष्टं साधूनां शृण्वतां सतां नारदाय ब्रह्मज्ञानं कथयंतम् ॥ ३७ ॥ ॥ ॥ ॥

सव्यचरणकमलं दक्षिणोरौ स्थापयित्वा सव्ये जानुनि बाहुं कृत्वा दक्षिणहस्ते मणिबंधस्थाने रुद्राक्षमालां कृत्वा दक्षिणहस्तकृतया तर्कमुद्रया युक्तम् ॥३८॥ एवंभूतं शिवं दृष्ट्वा लोकपाला मुनयश्च प्रांजलयः प्रणेमुः ॥३९॥ तदा शिवो ब्रह्माणं दृष्ट्वोत्थाय शिरसा प्रणामं चक्रे ॥४०॥ तदा ये शिवमनुसृता ऋषयस्तेऽपि तस्मै ब्रह्मणे नमश्चक्रुः । ततो ब्रह्मा प्रहसन् शिवं जगाद ॥४१॥ ब्रह्मोवाच ॥ हे भगवन्, अहं त्वां विश्वस्य नियंतारं जाने । त्वमखंडं ब्रह्मासि ॥४२॥ हे भगवन्, त्वमेव स्वस्वरूपाभ्यां शिवशक्तिभ्यां क्रीडन् विश्वं सृजसि पासि भक्षयसि च ॥४३॥ त्वमेव दक्षेण निमित्तेन यज्ञं सृष्टवान् । त्वयैव लोके वेदमार्गः स्थापितः ॥४४॥ हे मंगल त्वं

कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि ॥ बाहुप्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया ॥३८॥ तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षाम् ॥ सलोकपाला मुनयो मनूनामाद्यं मनुं प्रांजलयः प्रणेमुः ॥३९॥ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवंदितांघ्रिः ॥ उत्थाय चक्रे शिरसाभिवंदनमर्हत्तमः कस्य यथैव विष्णुः ॥४०॥ तथापरे सिद्धगणा महर्षिभिर्ये वै समंतादनु नीललोहितम् ॥ नमस्कृतः प्राह शशांकशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ॥४१॥ ब्रह्मोवाच ॥ जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः ॥ शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरंतरम् ॥४२॥ त्वमेव भगवन्नेतच्छिवशक्त्योः सरूपयोः ॥ विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥४३॥ त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिताध्वरम् ॥ त्वयैव लोकेऽवसिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः ॥ ४४ ॥ त्वं कर्मणां मंगलमंगलानां कर्तुः स्म लोकं तनुषे स्वः परं वा ॥ अमंगलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ॥ ४५ ॥ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ॥ भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुम् ॥ ४६ ॥ पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम् ॥ परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मा वधीद्दैववधान्भवद्विधः ॥ ४७ ॥ यस्मिन्यदा पुष्करनाभमायया दुरंतया स्पृष्टधियः पृथग्दृशः ॥ कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्रमम् ॥ ४८ ॥ भवांस्तु पुंसः परमस्य मायया दुरंतयाऽस्पृष्टमतिः समस्तदृक् ॥ तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि प्रभो ॥ ४९ ॥ कुर्वध्वरस्योद्धरणं हतस्य भो त्वयाऽसमाप्तस्य मनो प्रजापतेः ॥ न यत्र भागं तव भागिनो ददुः कुयज्विनो येन मखो निनीयते ॥ ५० ॥ जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः ॥ भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत् ॥ ५१ ॥ ॥ ॥

शुभकर्मकर्तॄणां नराणां स्वर्गं मोक्षं च ददासि । अशुभकर्मकर्तॄणां नरकं ददासि ॥४५॥ त्वच्चरणार्पितचित्तानां साधूनां क्रोधो नोत्पद्यते । तव तु कुतः स्यात् ॥४६॥ अतो ये भेदबुद्धयो दुष्टचित्तास्तान् भवत्सदृशः साधुर्न हन्यात् ॥४७॥ यस्मिन् देशे यदा काले मोहितचित्ताः पृथग्दृष्टयो भवंति तदा तेषामपराधे भवादृशाः साधवो दयामेव कुर्वंति ॥४८॥ अतः कर्मासक्तचित्तेषु सापराधेषु त्वं प्रसादं कर्तुमर्हसि ॥४९॥ त्वया हतस्य यज्ञस्य त्वमुद्धारं कुरु । यत्र दुष्टा याज्ञिका भागयोग्यस्यापि तव भागं न ददुः । येन त्वया यज्ञः सफलीक्रियते ॥५०॥ अयं यजमानो दक्षो जीवतात् । भगो देवोऽक्षिणी प्राप्नोतु । भृगोः श्मश्रूणि रोहंतु । पूष्णो दंताश्च पूर्ववद्भवंतु ॥ ५१ ॥

आयुधपाषाणादिभिर्भग्नावयवाना देवानां ऋत्विजां च भवदनुग्रहादारोग्यमस्तु ॥५२॥ हे शिव, यो यज्ञावशिष्टोऽर्थः स तव भागोऽस्तु । अद्य तव भागेन यज्ञः पूर्णतां प्राप्नोतु ॥५३॥ इति श्रीमद्भागवतचू॰ चतु॰ षष्ठोऽध्यायः ॥६॥ ॥ सप्तमे विष्णुरुद्भूतः स्तुतो दक्षभवादिभिः । यज्ञं प्रवर्तयामास दक्षेणेति निरूप्यते ॥१॥ मैत्रेयउवाच ॥ हे विदुर, इति ब्रह्मणा प्रार्थितः शिवः प्रहस्य श्रूयतामिति जगाद ॥१॥ शिव उवाच ॥ हे ब्रह्मन्, देवमायामोहितानामज्ञानामपराधमहं न वर्णये न चिंतये च । तत्र मया दंडो धृतः ॥२॥ अस्तु । दग्धशिरसो दक्षस्य बस्तमुखं शिरो भवतु । भगो मित्रस्य चक्षुषा पश्यतु ॥३॥ पूषा पिष्टभुक् सन् यजमानदंतैर्भक्षयतु । देवाः पूर्ववदवयवयुक्ता भवंतु ॥४॥ येषामृत्विजानामवयवा नष्टास्ते अश्विनोर्बाहुभ्यां कृतबाहवः पूष्णो हस्ताभ्यां च कृतहस्ता भवंतु । भृगुस्तु बस्त-

देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः ॥ भवतानुगृहीतानामाशु मन्योऽस्त्वनातुरम् ॥५२॥ एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै ॥ यज्ञस्ते रुद्रभागेन कल्पतामद्य यज्ञहन् ॥५३॥ इति श्रीमद्भागवते चतुर्थस्कंधे रुद्रसांत्वनं नाम षष्ठोऽध्यायः ॥६॥ मैत्रेय उवाच ॥ इत्यजेनानुनीतेन भवेन परितुष्यता ॥ अभ्यधायि महाबाहो प्रहस्य श्रूयतामिति ॥१॥ श्रीमहादेव उवाच ॥ नाघं प्रजेश बालानां वर्णये नानुचिंतये ॥ देवमायाभिभूतानां दंडस्तत्र धृतो मया ॥२॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः ॥ मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ॥३॥ पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् ॥ देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः ॥४॥ बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः ॥ भवंत्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ॥५॥ मैत्रेय उवाच ॥ तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम् ॥ परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन् ॥६॥ ततो मीढ्वांसमामंत्र्य शुनासीराः सहर्षिभिः ॥ भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ॥७॥ विधाय कार्त्स्न्येन च तद्यदाह भगवान्भवः ॥ संदधुः कस्य कायेन सवनीयपशोः शिरः ॥ ८ ॥ संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः ॥ सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम् ॥९॥ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः ॥ शिवावलोकादभवच्छरद्ध्रद इवामलः ॥१०॥ भवस्तवाय कृतधीर्नाशक्नोदनुरागतः ॥ औत्कंठ्याद्बाष्पकलया संपरेतां सुतां स्मरन् ॥११॥ कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः ॥ शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥ दक्ष उवाच ॥ भूयाननुग्रह अहो भवता कृतो मे दंडस्त्वया मयि धृतो यदपि प्रलब्धः ॥ न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥१३॥ विद्यातपोव्रतधरान्मुखतः स्म विप्रान्ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक् ॥ तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदंडः ॥१४॥

श्मश्रुर्भवेत् ॥५॥ मैत्रेय उवाच ॥ इति शिवोक्तं श्रुत्वा सर्वे साध्विति जगदुः ॥६॥ ततो ऋषिसहिता ब्रह्मशिवसहिताश्च देवाः पुनर्यज्ञस्थानं ययुः ॥ ७ ॥ तत्र च ते यथा शिव आह तथैव चक्रुः । यज्ञियपशोः शिरो दक्षकायेन संदधुः ॥८॥ तदा रुद्रेण वीक्षितो दक्षः सद्यः सुप्त इवोत्तस्थौ ॥९॥ अथाग्रतः शिवं दृष्ट्वा स्वच्छांतःकरणो बभूव ॥१०॥ तदा शिवस्तुत्यै कृतबुद्धिर्दक्षो मृतां स्वां कन्यां स्मरन् ॥ ११ ॥ प्रेमविह्वलितो भूत्वा महता प्रयासेन मनः स्थिरं कृत्वा निष्कपटभावेन शिवं तुष्टाव ॥१२॥ दक्ष उवाच ॥ हे भगवन्, त्वया मयि दंडो न धृतः । किंतु । दंडरूपोऽनुग्रह एव कृतः॥ १३ ॥ हे ईश, त्वं ब्रह्मा भूत्वा संप्रदाय-

प्रवर्तनेनात्मतत्त्वं ज्ञापयितुं ब्राह्मणानुत्पादितवान् । तांश्च त्वं सर्वविपत्सु रक्षसि ॥१४॥ यो भगवानज्ञानेन मया सभायां दुरुक्तैर्निंदितोऽपि तत्सर्वं विस्मृत्य निंदयाऽधः पतंतं मां ररक्ष ॥१५॥ मैत्रेय उवाच ॥ एवं शिवं क्षमाप्य दक्षो ब्रह्माज्ञया ऋत्विगादिभिर्यज्ञकर्म प्रवर्तयामास ॥ १६ ॥ तदा ऋत्विजो वीराणां संपर्कदोषनिवृत्तये यज्ञकर्मप्रवृत्त्यर्थं च वैष्णवं त्रिकपालं पुरोडाशं सिद्धं चक्रुः ॥१७॥ ततः पुरोडाशाहुतिं गृहीतवताऽध्वर्युणा सह यजमानेन ध्यातः श्रीहरिः प्रादुरभूत् ॥१८॥ कथंभूतो हरिः । स्वतेजसा तेषां सभासदां तेजस्तिरस्कुर्वन् गरुडेन समीपं प्रापितः ॥ १९ ॥ श्यामः किरीटकुंडलयुतः । शंख-चक्र-गदा-पद्म-खड्ग-चर्म-बाण-धनुर्धरः ॥२०॥ वक्षसि लक्ष्म्या वनमालया छत्रचामरव्यजनैश्च शोभमानः ॥२१॥ एतादृशं प्राप्तं हरिं दृष्ट्वा ब्रह्मेंद्रशिवप्रमुखाः सर्वे देवाद्यास्तं प्रणेमुः ॥२२॥ ततस्ते तन्महिम्ना क्षुभितचित्ताः कृतांजलयो भूत्वा यथामति हरिं तुष्टुवुः ॥ २३ ॥ २४॥ तत्रादौ दक्षो यज्ञेश्वरं विष्णुमुत्तमैः पूजासंभारैः पूजयित्वा स्तुवन् सन् शरणं जगाम॥२५॥ दक्ष उवाच ॥ हे भगवन्, भवान् मायां तिरस्कृत्य स्वतंत्रः सन् तया मायया पुरुषत्वं प्राप्य तस्यां मायायां तिष्ठन् रागलोभादिभिर्युक्त इव आभासि॥२६॥ऋत्विज ऊचुः॥हे हरे,वयं नंदिकेश्वरशापात्कर्मणि दुराग्रहबुद्धयः संतस्तव तत्त्वं न विद्मः॥२७॥सदस्या ऊचुः॥ हे आश्रयप्रद,

योऽसौ मयाऽविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैरगणय्य तन्माम् ॥ अर्वाक्पतंतमर्हत्तमनिंदयापाद्दृष्ट्यार्द्रया स भगवान्स्वकृतेन तुष्येत् ॥१५॥ मैत्रेय उवाच ॥ क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमंत्रितः ॥ कर्म संतानयामास सोपाध्यायर्त्विगग्निभिः ॥१६॥ वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः ॥ पुरोडाशं निरवपन्वीरसंसर्गशुद्धये ॥१७॥ अध्वर्युणात्तहविषा यजमानो विशांपते ॥ धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः ॥१८॥ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश ॥ मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्रवाजिना ॥१९॥ श्यामो हिरण्यरशनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः ॥ कंब्वब्जचक्रशरचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः ॥२०॥ वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वम् ॥ पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः ॥२१॥ तमुपागतमालक्ष्य सर्वे सुरगणादयः ॥ प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः ॥२२॥ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः ॥ मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजम् ॥२३॥ अप्यर्वाग्वृत्तयो यस्य महि त्वात्मभुवादयः ॥ यथामति गृणंति स्म कृतानुग्रहविग्रहम् ॥ २४ ॥ दक्षो गृहीतार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुम् ॥ सुनंदनंदाद्यनुगैर्वृतं मुदा गृणन्प्रपेदे प्रयतः कृतांजलिः ॥ २५ ॥ दक्ष उवाच ॥ शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम् ॥ तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इवात्मतंत्रः ॥ २६ ॥ ऋत्विज ऊचुः ॥ तत्त्वं न ते वयमनंजन रुद्रशापात्कर्मण्यवग्रहधियो भगवन्विदामः ॥ धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञानं यदर्थमधिदैवमदो व्यवस्थाः ॥ २७ ॥ सदस्या ऊचुः ॥ उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽतकोग्रव्यालान्विष्टे विषयमृगतृष्यात्मगेहोरुभारः ॥ द्वंद्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः ॥ २८ ॥ ॥ ॥

संसारमार्गे वर्तमानः अयं अज्ञसमूहः कामेन पीडितः सन् त्वत्पादरूपं विश्रांतिस्थानं कदा नु यास्यति ॥ २८ ॥ रुद्र उवाच ॥ हे वरद, त्वयि प्रविष्टचित्तं मां लोको यद्यपि सदाचारभ्रष्टं वदति तथापि त्वदनुग्रहेण तदहं न गणये ॥२९॥ भृगुरुवाच ॥ हे विष्णो, यस्य तव मायया गतबोधा ब्रह्मादयस्तव तत्त्वं न जानंति स त्वमेव नः प्रसीद ॥३०॥ ब्रह्मोवाच ॥ असौ पुरुष इंद्रियैर्यद्यत्पश्यति तत्तत्तव स्वरूपं न भवति । यतो मायामयात्प्रपंचात्त्वं व्यतिरिक्तोऽसि ॥ ३१ ॥ इंद्र उवाच ॥ हे हरे, अष्टभिर्बाहुदंडैर्युक्तमिदमपि तव स्वरूपं योग्यमेव । यतो मनोदृशामानंदकरमस्ति ॥३२॥ ऋत्विजां पत्न्य ऊचुः ॥ अयं यज्ञस्तव यजनार्थं ब्रह्मणा निर्मितः स शिवेन नाशितः । तं यज्ञं त्वं स्वकीयया कमलसदृशया दृष्ट्या पवित्रं कुरु ॥ ३३ ॥ ऋषय ऊचुः ॥ हे विष्णो, त्वं कर्म आचरसि

रुद्र उवाच ॥ तव वरद वरांघ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये ॥ यदि रचितधियं माविद्यलोकोपविद्धं जपति न गणये तत्त्वत्परानुग्रहेण ॥ २९ ॥ भृगुरुवाच ॥ यन्मायया गहनयापहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः ॥ नात्मन् श्रितं तव विदंत्यधुनापि तत्त्वं सोयं प्रसीदतु भवान्प्रणतात्मबंधुः ॥ ३० ॥ ब्रह्मोवाच ॥ नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत् ॥ ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वम् ॥ ३१ ॥ इंद्र उवाच ॥ इदमप्यच्युत विश्वभावनं वपुरानंदकरं मनोदृशाम् ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ॥ ३२ ॥ पत्न्य ऊचुः ॥ यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात् ॥ तं नस्त्वं शवशयनाभ शांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥ ३३ ॥ ऋषय ऊचुः ॥ अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे ॥ विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्ततीं भवान् ॥ ३४ ॥ सिद्धा ऊचुः ॥ अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः ॥ तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ॥ ३५ ॥ यजमान्युवाच ॥ स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः ॥ त्वामृतेऽधीश नांगैर्मखः शोभते शीर्षहीनः कबंधो यथा पूरुषः ॥ ३६ ॥ लोकपाला ऊचुः ॥ दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यम् ॥ माया ह्येषा भवदीया हि भूमन्यस्त्वं षष्ठः पंचभिर्भासि भूतैः ॥ ३७ ॥ योगेश्वरा ऊचुः ॥ प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः ॥ अथापि भक्त्येश तथोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल ॥ ३८ ॥ ॥ ॥ ॥

परंतु तेन न लिप्यसे । अन्ये संपत्त्यर्थं लक्ष्मीं भजंति । त्वं तु स्वयमेव सेवां कुर्वतीं तां नाद्रियसे ॥ ३४ ॥ सिद्धा ऊचुः ॥ अयं नो मनोगजस्त्वत्कथामृतनद्यां प्रविष्टः सन् संसारतापं न स्मरति । त्वत्कथामृताच्च बहिर्न निर्गच्छति ॥३५॥ यजमान्युवाच ॥ हे श्रीनिवास, तव स्वागतं तुभ्यं नमः । त्वमस्मान् पाहि । त्वां विनाऽयं यज्ञो न शोभते ॥३६॥ लोकपाला ऊचुः ॥ शुद्धसत्वानां त्वं शुद्धसत्वमूर्तिर्भासि नास्माकम् । अतो नो धिक् ॥३७॥ योगेश्वरा ऊचुः ॥ हे प्रभो, यस्त्वय्यात्मनः पृथक्त्वं नेक्षेत ततोऽन्यस्तव प्रियो नास्ति । अथापि हे भक्तवत्सल, भक्त्या त्वां भजतोऽस्माननुगृहाण ॥ ३८ ॥ ॥

स्वमायया स्वस्वरूपे ब्रह्मादिभेदबुद्धिं रचयते आत्मस्थित्या च भ्रमरहिताय तुभ्यं नमः ॥३९॥ वेद उवाच ॥ यस्य स्वरूपमहमन्ये ब्रह्मादयश्च न विदुः तस्मै
धर्मादीनां भक्तेश्च फलदात्रे तुभ्यं नमः ॥४०॥ अग्निरुवाच ॥ यत्तेजसा प्रदीप्ततेजा अहं यज्ञे घृतसेचितं होमद्रव्यं देवान्प्रति वहामि । तं यज्ञपालकं यज्ञमूर्तिं
च त्वां प्रणतोऽस्मि ॥४१॥ देवा ऊचुः ॥ यस्त्वं प्रलये विश्वं संहृत्य शयनं करोषि, स एव त्वमद्य प्रत्यक्षो भूत्वाऽस्मान् सेवकान् रक्षसि ॥ ४२ ॥ गंधर्वा
ऊचुः ॥ हे देव, एते मरीच्यादयो ऋषयो देवाश्च यस्यांशानामप्यंशावताराः संति । इदं ब्रह्मांडं च यस्य क्रीडोपकरणं तस्मै तुभ्यं नित्यं नमस्कारं कुर्मः

जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयाऽऽत्ममायया ॥ रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः
॥ ३९ ॥ ब्रह्मोवाच ॥ नमस्ते श्रितसत्वाय धर्मादीनां च सूतये ॥ निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥ ४० ॥
अग्निरुवाच ॥ यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तम् ॥ तं याज्ञियं पंचविधं च पंचभिः स्विष्टं यजुर्भिः
प्रणतोऽस्मि यज्ञम् ॥ ४१ ॥ देवा ऊचुः ॥ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन्सलिल उरगेंद्राधिशयने
॥ पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः ॥ ४२ ॥ गंधर्वा ऊचुः ॥
अंशांशास्ते देव मरीच्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः ॥ क्रीडाभांडं विश्वमिदं यस्य विभूमंस्तस्मै नित्यं नाथ नमस्ते
करवाम ॥ ४३ ॥ विद्याधरा ऊचुः ॥ त्वन्माययार्थमभिपद्य कलेवरेऽस्मिन्कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः ॥ क्षिप्तोऽप्यसद्विषयलालस
आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत् ॥ ४४ ॥ ब्राह्मणा ऊचुः ॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं
त्वं हि मंत्रः समिद्दर्भपात्राणि च ॥ त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥ ४५ ॥ त्वं पुरा
गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा ॥ स्तूयमानो नदँल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ॥४६॥
स प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम् ॥ कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यांति तस्मै
नमः ॥ ४७ ॥ मैत्रेय उवाच ॥ इति दक्षः कविर्यज्ञं भद्र रुद्रावमर्शितम् ॥ कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभावने ॥ ४८ ॥
भगवान्स्वेन भागेन सर्वात्मा सर्वभागभुक् ॥ दक्षं बभाष आभाष्य प्रीयमाण इवानघ ॥ ४९ ॥ श्रीभगवानुवाच ॥ अहं ब्रह्मा
च शर्वश्च जगतः कारणं परम् ॥ आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः ॥ ५० ॥ ॥ ॥ ॥

॥४३॥ विद्याधरा ऊचुः ॥ त्वन्माययाऽस्मिन् देहे गृहादौ चाहंममेत्यभिमानेन विषयासक्तोऽयं लोकः पुत्रादिभिस्तिरस्कृतोऽपि मोहं न त्यजति । त्वत्कथामृतसेवकस्तु
तं मोहं त्यजति ॥४४॥ ब्राह्मणा ऊचुः ॥ हे ईश, यज्ञो हविः अग्निः मंत्रः समिधो दर्भाः पात्राणि सदस्यादयश्च त्वमेवासि ॥४५॥ त्वं वराहः सन् स्वदंष्ट्रया
पृथ्वीं रसातलात् समुद्धृतवान् ॥४६॥ तव दर्शनमिच्छतां नस्त्वं प्रसीद । यस्य नामोच्चारणेन यज्ञविघ्ना नश्यंति तस्मै तुभ्यं नमोऽस्तु ॥४७॥ मैत्रेय उवाच
॥ एवं सर्वैर्हरौ कीर्त्यमाने सति दक्षो यज्ञं प्रवर्तयामास ॥४८॥ तदा सर्वात्मा सर्वभागभुक् भगवान् दक्षं बभाषे ॥ ४९ ॥ श्रीभगवानुवाच ॥ अहं ब्रह्मा

आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज ॥ सृजन् रक्षन्हरन्विश्वं दध्रे संज्ञां क्रियोचिताम् ॥५१॥ तस्मिन्ब्रह्मण्यद्वितीये केवले परमात्मनि ॥ ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥ ५२ ॥ यथा पुमान्न स्वांगेषु शिरःपाण्यादिषु क्वचित् ॥ पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ॥५३॥ त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ॥ सर्वभूतात्मनां ब्रह्मन्स शांतिमधिगच्छति ॥५४॥ मैत्रेय उवाच ॥ एवं भगवताऽऽदिष्टः प्रजापतिपतिर्हरिम् ॥ अर्चित्वा क्रतुना स्वेन देवानुभयतोऽयजत् ॥५५॥ रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः ॥ कर्मणोदवसानेन सोमपानितरानपि ॥ उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः ॥५६॥ तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ॥ धर्म एव मतिं दत्वा त्रिदशास्ते दिवं ययुः ॥ ५७ ॥ एवं दाक्षायणी हित्वा सती पूर्वकलेवरम् ॥ जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥ ५८ ॥ तमेव दयितं भूय आवृंक्ते पतिमंबिका ॥ अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषम् ॥५९॥ एतद्भगवतः शंभोः कर्म दक्षाध्वरद्रुहः ॥ श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ॥६०॥ इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणम् ॥ यो नित्यदाऽऽकर्ण्य नरोऽनुकीर्तयेद्धुनोत्यघं कौरव भक्तिभावतः ॥६१॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे दक्षयज्ञसंधानं नाम सप्तमोऽध्यायः ॥७॥ ॥ मैत्रेय उवाच ॥ सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ॥ नैते गृहान्ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥१॥ मृषाऽधर्मस्य भार्यासीद्दंभं मायां च शत्रुहन् ॥ असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः ॥२॥

च शिवश्च जगतः परं कारणम् ॥५०॥ अहमात्मा ईश्वरश्च सन् मायामाश्रित्य विश्वं सृजन् रक्षन् हरन् कर्मयोग्यां ब्रह्मादिसंज्ञां धारयामि ॥ ५१ ॥ एवं भूते ब्रह्मरूपे मयि ब्रह्मरुद्रौ भूतानि च भेदेन यः पश्यति सोऽज्ञः ॥५२॥ मत्परो ज्ञानी भूतेषु पारक्यबुद्धिं न कुरुते । यथा नरः शिरोहस्तपादादिषु स्वकीयावयवेषु पारक्यबुद्धिं न कुरुते तथा ॥५३॥ तस्मात्सर्वभूतात्मनां ब्रह्मविष्णुमहेश्वराणां मध्ये यो भेदं न पश्यति स शांतिं प्राप्नोति ॥५४॥ मैत्रेय उवाच ॥ एवं भगवताऽऽज्ञापितो दक्षः त्रिकपालेषु संस्कृतेन पुरोडाशेन हरिमिष्ट्वा ॥५५॥ यज्ञावशिष्टेन हवनीयद्रव्येण रुद्रं चेष्ट्वा यज्ञं समाप्यावभृथस्नानं चक्रे ॥५६॥ ततो देवादयो दक्षस्य धर्मे मतिं दत्वा स्वर्गं ययुः ॥५७॥ एवं दक्षकन्या सती पूर्वदेहं हित्वा हिमवतः पत्न्यां मेनिकायामुत्पन्नेति वयं शुश्रुम ॥५८॥ एवं सा सती पार्वतीरूपेण पुनस्तमेव पतिं सेवितवती ॥५९॥ एतत् दक्षयज्ञविध्वंसकस्य शंभोः कर्म बृहस्पतेः शिष्यादुद्धवान्मया श्रुतम् ॥ ६०॥ हे विदुर, इदं पवित्रं यशोवृद्धिकरमायुर्वृद्धिकरं च शिवचरित्रं यः शृणुयात्कीर्तयेद्वा स आत्मनोऽन्यस्य वा पापं नाशयति ॥६१॥ इति श्रीमद्भागवतचू० चतुर्थस्कंधे सप्तमोऽध्यायः ॥७॥ दक्षकन्यान्वये प्राप्ता दक्षयज्ञकथोदिता । मनुपुत्रान्वये प्राप्ता ध्रुवचर्याऽथ पंचभिः ॥१॥ अष्टमे गुरुदारोक्तिरोषमत्सरतः पुरात् । निर्गतेन ध्रुवेणाह तपसा तोषणं हरेः ॥२॥ मैत्रेय उवाच ॥ सनकाद्याश्चत्वारः पुत्रा नारदः ऋभुः हंसः अरुणिः यतिश्चैते ब्रह्मपुत्रा नैष्ठिका[1]ः संतो गृहाश्रमं न चक्रुः । अतस्तेषां वंशो नास्ति ॥१॥ ब्रह्मणः पृष्ठात् जातस्याधर्मस्य वंशं शृणु । अधर्मो मृषानाम्न्यां भार्यायां दंभं मायां चाजनयत् । तन्मिथुनमपुत्रो निर्ऋति[2]र्जगृहे ॥२॥ ॥

---

[1] देहावसानपर्यंतं ब्रह्मचर्यव्रतधारिणः । [2] नैर्ऋत्या दिशाया अधिपतिः ।

तयोर्लोभः शठता चाभूताम् । ताभ्यां क्रोधो हिंसा च जाते । ताभ्यां कलिर्दुरुक्तिश्च जाते ॥ ३ ॥ ताभ्यां भयः पुमान् मृत्युः स्त्री च जाते । ताभ्यां यातना नरकश्च जातौ ॥४॥ इममधर्मवंशं त्रिवारं श्रुत्वैतेषां त्यागद्वारा पुमान् मनसः पापवासनां हित्वा पुण्यं प्राप्नोति ॥५॥ अथ स्वायंभुवस्य मनोः पुण्यं वंशं कीर्तये ॥६॥ मनोः प्रियव्रतोत्तानपादौ द्वौ पुत्रौ जातौ ॥७॥ तत्रोत्तानपादस्य सुनीतिः सुरुचिश्चेति द्वे स्त्रियौ । तत्र सुरुचिः पतेः प्रिया । यस्याः पुत्रो ध्रुवः सा सुनीतिर्न प्रिया ॥८॥ एकदा राजा सुरुचेरुत्तमनामकं पुत्रमंकमारोप्य लालयन् सन् तदा अंकमारोढुमिच्छंतं ध्रुवं नाभ्यनंदत् ॥९॥ तदा सुरुचिस्तथांकारोहणं कुर्वंतं ध्रुवं दृष्ट्वा राज्ञः शृण्वतः सतो गर्विता सती ईर्ष्यासहितं जगाद ॥१०॥ हे वत्स, त्वं नृपतेरासनमारोढुं नार्हसि । यतस्त्वं मया कुक्षौ न धृतः॥११॥

तयोः समभवल्लोभो निकृतिश्च महामते ॥ ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥३॥ दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम ॥ तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ॥४॥ संग्रहेण मयाऽऽख्यातः प्रतिसर्गस्तवानघ ॥ त्रिःश्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलम् ॥५॥ अथातः कीर्तये वंशं पुण्यकीर्तेः कुरुद्वह ॥ स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ॥६॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ ॥ वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥ ७ ॥ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः ॥ सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥८॥ एकदा सुरुचेः पुत्रमंकमारोप्य लालयन् ॥ उत्तमं नारुरुक्षंतं ध्रुवं राजाभ्यनंदत ॥९॥ तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम् ॥ सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता ॥१०॥ न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति॥ न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ॥ ११॥ बालोऽसि बत नात्मानमन्यस्त्रीगर्भसंभृतम् ॥ नूनं वेद भवान्यस्य दुर्लभेऽर्थे मनोरथः ॥१२॥ तपसाऽऽराध्य पुरुषं तस्यैवानुग्रहेण मे ॥ गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम् ॥१३॥ मैत्रेय उवाच ॥ मातुः सपत्न्याः सुदुरुक्तिविद्धः श्वसन् रुषा दंडहतो यथाहिः ॥ हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन्सकाशम् ॥ १४ ॥ तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदुह्य बालम् ॥ निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्याः ॥ १५॥ सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला ॥ वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह ॥१६॥ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह बाला ॥ माऽमंगलं तात परेष्वमंस्था भुंक्ते जनो यत्परदुःखदस्तत् ॥ १७ ॥

भवान् अन्यस्त्रीगर्भसंभूतमात्मानं नूनं न वेद। यतस्त्वं बालोऽसि ॥१२॥ अत एवं मनोरथश्चेत् तर्हि तपसा हरिमाराध्य तत्कृपया मे गर्भे आत्मनो जन्मप्राप्त्यर्थं यत्नं कुरु ॥१३॥ मैत्रेय उवाच ॥ एवं सापत्नमातुर्दुर्भाषणरूपैर्बाणैर्विद्धो ध्रुवः सर्प इव श्वसन् पश्यंतं मौनीभूतं पितरं हित्वा रुदन् मातुः समीपं जगाम ॥१४॥ सुनीतिः सपत्न्या वाक्यं अंतःपुरजनमुखाच्छ्रुत्वा निःश्वसंतं रुदंतं बालमुत्संगे गृहीत्वा ॥१५॥ धैर्यं त्यक्त्वा शोकेन विललाप । सपत्न्या वाक्यं स्मरंती जगाद च ॥१६॥ हे तात, त्वं परकृतं दुर्भाषणरूपमपराधं मा चिंतय । यतो यो मनुष्यः परेभ्यो दुःखं ददाति स कालांतरे तद्दुःखं स्वयमेव भुंक्ते ॥ १७ ॥

---

१ तयोः सोदरयोरपि दांपत्यमधर्मांशतया । एवमुपर्यप्यधर्मवंशे भ्रातृभगिन्योर्धर्मविरुद्धा विवाहा जाताः ।

हे बालक, राजा मां भार्येति स्वीकर्तुमपि विलज्जते। त्वं च भाग्यहीनाया ममोदरे जातोऽसि। अतः सुरुच्या यद्वाक्यमुक्तं तत्सत्यम् ॥१८॥ त्वं यदि राज्यासनमिच्छसि तर्हि भगवंतमाराधय ॥१९॥ ब्रह्मा यस्य चरणकमलं निषेव्य योगिभिरपि वंदितं सर्वोत्कृष्टं स्थानं लेभे ॥२०॥ तथा ते पितामहो मनुः सर्वांतर्यामिदृष्ट्या भूरिदक्षिणैर्यज्ञैर्यमिष्ट्वा राज्यस्वर्गादि सुखं लेभे ॥२१॥ हे वत्स, तमेवेश्वरं मनसि ध्यात्वा भजस्व ॥२२॥ हरेर्विनाऽन्यं तव दुःखच्छिदं अहं न पश्यामि ॥२३॥ मैत्रेय उवाच ॥ एवं मातुर्वचः श्रुत्वा ध्रुवः पितुः पुरान्निर्जगाम ॥ २४ ॥ नारदो ध्रुवचिकीर्षितं ज्ञात्वा तत्रागत्य तं पाणिना मूर्ध्नि स्पृष्ट्वा जगाद ॥२५॥ अहो क्षत्रियाणां प्रभावं पश्यत ॥ बालोऽप्ययं मातुर्दुष्टवचांसि हृदि धारयति ॥२६॥ नारद उवाच ॥ हे पुत्रक, अस्मिन्बाल्ये वयसि तव मानापमानौ

सत्यंसुरुच्याभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः ॥ स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्माम् ॥ १८ ॥ आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकम् ॥ आराधयाधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ॥ १९ ॥ यस्यांघ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः ॥ अजोऽध्यतिष्ठत्खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवंद्यम् ॥२०॥ तथा मनुर्वो भगवान्पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः ॥ इष्ट्वाऽभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम् ॥२१॥ तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् ॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम् ॥२२॥ नान्यं ततः पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कंचन ॥ यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृग्यमाणया ॥२३॥ मैत्रेय उवाच ॥ एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः ॥ संनियम्यात्मनाऽऽत्मानं निश्चक्राम पितुः पुरात् ॥२४॥ नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितम् ॥ स्पृष्ट्वा मूर्धन्यघघ्नेन पाणिना प्राह विस्मितः ॥२५॥ अहो तेजः क्षत्रियाणां मानभंगममृष्यताम् ॥ बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥२६॥ नारद उवाच ॥ नाधुनाप्यवमानं ते सन्मानं वापि पुत्रक ॥ लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥२७॥ विकल्पे विद्यमानेऽपि न ह्यसंतोषहेतवः ॥ पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः ॥ २८ ॥ परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः ॥ दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः ॥२९॥ अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि ॥ यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ॥ ३० ॥ मुनयः पदवीं यस्य निःसंगेनोरुजन्मभिः ॥ न विदुर्मृगयंतोऽपि तीव्रयोगसमाधिना ॥३१॥ अतो निवर्ततामेष निर्बंधस्तव निष्फलः ॥ यतिष्यति भवान्काले श्रेयसां समुपस्थिते ॥३२॥ यस्य यद्दैवविहितं स तेन सुखदुःखयोः ॥ आत्मानं तोषयन्देही तमसः पारमृच्छति ॥३३॥

न पश्यामः ॥ २७ ॥ पुरुषस्य सुखं दुःखं वा निजकर्मभिरेव भवति ॥२८॥ ईश्वरानुकूल्यं विनोद्योगाः सफला न भवंति। अतो दैवेन यत्प्राप्तं तेनैव संतोषं प्राप्नुयात् ॥२९॥ हे ध्रुव, मात्रा उपदिष्टेनोपायेन यस्य देवस्य प्रसादं त्वं संपादयितुमिच्छसि स ईशो दुःखेनाराध्य इति मम मतम् ॥३०॥ यस्यं मार्गं मुनयस्तीव्रेण योगेन बहुजन्मभिर्मृगयंतोऽपि न विदुः ॥३१॥ अतोऽधुना निष्फलोऽयं तवाग्रहो निवर्तताम्। त्वं वृद्धावस्थायां भगवत्प्राप्तौ यत्नं करिष्यसि ॥ ३२ ॥ सुखं दुःखं च दैवानुरूपं लभ्यत इति मनसः संतोषं कुर्वन् देही मोक्षं प्राप्नोति ॥ ३३ ॥ ॥ ॥

अतो गुणैरधिकं दृष्ट्वा प्रीतिं कुर्यात् नेर्ष्याम् । गुणैर्हीनं दृष्ट्वा कृपां कुर्यान्न तिरस्कारम् । गुणैः समं दृष्ट्वा मैत्रीं कुर्यान्न स्पर्धाम् । एवं कृते सति दुःखं नाप्नोति ॥३४॥ ध्रुव उवाच ॥ हे नारद, भवता सुखदुःखयुक्तचित्तानां पुंसामयं मार्गो दर्शितः ॥३५॥ अथापि स सुरुच्या दुष्टभाषणरूपैर्बाणैर्भिन्ने मम हृदि न तिष्ठति ॥३६॥ त्रिभुवने श्रेष्ठमन्यैरसंपादितं स्थानमिच्छतो ममोपायं ब्रूहि ॥३७॥ भवान् लोकानां हितार्थं सूर्यवत्पर्यटति ॥३८॥ मैत्रेय उवाच ॥ इत्याकर्ण्य नारदः प्रीतः सन् तं जगाद॥३९॥ नारद उवाच ॥ हे बाल, जनन्या तव यो मार्गः कथितः स एव ते इष्टकार्यसाधकः । स च भगवान् वासुदेव एव । अतस्तं भज ॥४०॥

गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ॥ मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥३४॥ ध्रुव उवाच ॥ सोऽयं शमो भगवता
सुखदुःखहतात्मनाम् ॥ दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥ ३५ ॥ अथापि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः ॥ सुरुच्या
दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ॥ ३६ ॥ पदं त्रिभुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम्
॥३७॥ नूनं भवान्भगवतो योंऽगजः परमेष्ठिनः ॥ वितुदन्नटते वीणां हितार्थं जगतोऽर्कवत् ॥ ३८ ॥ मैत्रेय उवाच ॥ इत्युदाहृतमाकर्ण्य
भगवान्नारदस्तदा ॥ प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंपया ॥ ३९ ॥ नारद उवाच ॥ जनन्याभिहितः पंथाः
स वै निःश्रेयसस्य ते ॥ भगवान्वासुदेवस्तं भज तत्प्रवणात्मना ॥ ४० ॥ धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः ॥
एकमेव हरेस्तत्र कारणं पादसेवनम् ॥ ४१ ॥ तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि ॥ पुण्यं मधुवनं यत्र सान्निध्यं
नित्यदा हरेः ॥ ४२ ॥ स्नात्वाऽनुसवनं तस्मिन्कालिंद्याः सलिले शिवे ॥ कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ॥ ४३ ॥
प्राणायामेन त्रिवृता प्राणेंद्रियमनोमलम् ॥ शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम् ॥ ४४ ॥ प्रसादाभिमुखं शश्वत्प्रसन्नवदनेक्षणम्
॥ सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरम् ॥ ४५ ॥ तरुणं रमणीयांगमरुणोष्ठेक्षणाधरम् ॥ प्रणताश्रयणं नृम्णं शरण्यं
करुणार्णवम् ॥ ४६ ॥ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनम् ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् ॥ ४७ ॥ किरीटिनं
कुंडलिनं केयूरवलयान्वितम् ॥ कौस्तुभाभरणग्रीवं पीतकौशेयवाससम् ॥ ४८ ॥ कांचीकलापपर्यस्तं लसत्कांचननूपुरम् ॥ दर्शनीयतमं
शांतं मनोनयनवर्धनम् ॥ ४९ ॥ पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चताम् ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम्
॥ ५० ॥ स्मयमानमभिध्यायेत्सानुरागावलोकनम् ॥ नियतेनैकभूतेन मनसा वरदर्षभम् ॥ ५१ ॥ ॥

धर्मार्थकाममोक्षरूपमात्मनः श्रेयो य इच्छेत्तस्य हरिचरणसेवनमेव साधनमस्ति ॥४१॥ तस्मात् हे तात ध्रुव, त्वं मधुवने गत्वा ॥४२॥ तत्र यमुनाजले त्रिकालं स्नात्वाऽऽसने उपविश्य यमनियमान् धृत्वा ॥४३॥ प्राणायामेन मनोमलं हित्वा मनसा हरिं ध्यायस्व ॥ ४४ ॥ कथंभूतम् । प्रसादसुमुखं प्रसन्नमुखनेत्रं सुनासिकं सुभ्रुवं सुकपोलम् ॥४५॥ तरुणं सुंदरावयवं सुखकरम् ॥४६॥ श्रीवत्सलाञ्छनं मेघश्यामं वनमालिनं चतुर्भुजं शंखचक्रगदापद्मधरम् ॥४७॥ किरीटकुंडलबाहुभूषणकौस्तुभधरं पीतांबरम् ॥४८॥ देदीप्यमानसुवर्णनूपुरं मनोनयनहर्षकरम् ॥ ४९ ॥ स्वभक्तानां मनसि स्थितम् ॥५०॥ एतादृशं वरदश्रेष्ठं हरिमेकाग्रचित्तेन ध्यायेत् ॥५१॥

एवं ध्यानं कुर्वतः पुंसो मनो विषयेषु न सज्जते ॥ ५२ ॥ हे ध्रुव, जपयोग्यो मंत्रश्च श्रूयताम् । यं सप्तरात्रं प्रपठन् पुरुष आकाशचारिणो देवानपि पश्यति ॥५३॥ ॐनमो भगवते वासुदेवाय ॥ अनेन मंत्रेण वनसंबंधिभिः पुष्पमूलफलादिभिस्तुलस्या च हरेर्देशकालयोग्यां पदार्थमयीं पूजां कुर्यात् ॥ ५४ ॥ ५५ ॥ तद्यथा–परिमितकंदमूलादिभक्षको मौनी एकाग्रचित्तः सन् शिलाकाष्ठादिनिर्मितायां श्रीहरिप्रतिमायां पृथिवीजलादिषु वा श्रीहरिं ध्यात्वा पूजयेत् ॥ ५६ ॥ तत उत्तमश्लोकस्यावतारचरित्राणि चिंतयेत् ॥५७॥ सर्वानपि पूजोपचारान् हरये द्वादशाक्षरमंत्रेणैव समर्पयेत् ॥५८॥ एवं देहमनोवाग्भिः पूजितो भगवान् ॥ ५९ ॥ पुंसां धर्मार्थकाममोक्षेषु इष्टं फलं ददाति ॥ ६० ॥ हे ध्रुव, इंद्रियैर्विषयसेवने विरक्तः सन् भक्तियोगेन मुक्त्यर्थे हरिं भजेत् ॥ ६१ ॥ एवं नारदवचः

एवं भगवतो रूपं सुभद्रं ध्यायतो मनः ॥ निवृत्त्या परया तूर्णं संपन्नं न निवर्तते ॥५२॥ जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज ॥
यं सप्तरात्रं प्रपठन्पुमान्पश्यति खेचरान् ॥५३॥ "ॐ नमो भगवते वासुदेवाय" ॥ मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः ॥ सपर्यां
विविधैर्द्रव्यैर्देशकालविभागवित् ॥५४॥ सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुम्
॥५५॥ लब्ध्वा द्रव्यमयीमर्चां क्षित्यंब्वादिषु वार्चयेत् ॥ आभृतात्मा मुनिः शांतो यतवाङ् मितवन्यभुक् ॥५६॥ स्वेच्छावतारचरितैरचिंत्यनिजमायया ॥
करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमम् ॥५७॥ परिचर्या भगवतो यावत्यः पूर्वसेविताः ॥ ता मंत्रहृदयेनैव
प्रयुंज्यान्मंत्रमूर्तये ॥५८॥ एवं कायेन मनसा वचसा च मनोगतम् ॥ परिचर्यमाणो भगवान्भक्तिमत्परिचर्यया ॥५९॥ पुंसाममायिनां
सम्यग्भजतां भाववर्धनः ॥ श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनाम् ॥६०॥ विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा ॥ तं
निरंतरभावेन भजेताद्धा विमुक्तये ॥६१॥ इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ॥ ययौ मधुवनं पुण्यं हरेश्चरणचर्चितम् ॥६२॥
तपोवनं गते तस्मिन्प्रविष्टोंऽतःपुरं मुनिः ॥ अर्हितार्हणको राजा सुखासीन उवाच तम् ॥६३॥ नारद उवाच ॥ राजन्किं ध्यायसे
दीर्घं मुखेन परिशुष्यता ॥ किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः ॥६४॥ राजोवाच ॥ सुतो मे बालको ब्रह्मन् स्त्रैणेनाकरुणात्मना ॥
निर्वासितः पंचवर्षः सह मात्रा महान्कविः ॥६५॥ अप्यनाथं वने ब्रह्मन्मास्मादंत्यर्भकं वृकाः ॥ श्रांतं शयानं
क्षुधितं परिम्लानमुखांबुजम् ॥६६॥ अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय ॥ योंऽकं प्रेम्णाऽऽरुरुक्षंतं नाभ्यनंदमसत्तमः ॥६७॥
नारद उवाच ॥ मा मा शुचः स्वतनयं देवगुप्तं विशांपते ॥ तत्प्रभावमविज्ञाय प्रावृंक्ते यद्यशो जगत् ॥ ६८ ॥ ॥

श्रुत्वा ध्रुवस्तं प्रदक्षिणीकृत्य प्रणम्य च मधुवनं ययौ ॥ ६२ ॥ एवं ध्रुवे तपोवनं गते सति नारद उत्तानपादस्य नगरं गत्वा राज्ञा पूजितः सन् पुत्रशोकातुरं तं राजानं जगाद ॥६३॥ नारद उवाच ॥ हे राजन्, शुष्केण मुखेन दीर्घं किं ध्यायसे ॥६४॥ राजोवाच ॥ हे ब्रह्मन्, स्त्रीजितेन मया पंचवर्षो बालो मात्रा सह नगराद्बहिर्निर्वासितः ॥ ६५ ॥ हे नारद, वने तं श्रांतं क्षुधितं शयानं वृकादयः किं न खादंति ॥ ६६ ॥ अहो स्त्रीजितस्य मे दुष्टचित्तत्वं पश्य । प्रेम्णा अंकमारोढुमिच्छंतं तं ध्रुवमहं नाभ्यनंदम् ॥६७॥ नारद उवाच ॥ हे राजन् , यस्य यशो विश्वं व्याप्नोति तेन श्रीहरिणा संरक्षितं पुत्रं त्वं मा शुचः ॥ ६८ ॥

सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ॥ एष्यत्यचिरतो राजन्यशो विपुलयंस्तव ॥ ६९ ॥ मैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः ॥ राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत् ॥ ७० ॥ तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् ॥ समाहितः पर्यचरदृष्यादेशेन पूरुषम् ॥ ७१ ॥ त्रिरात्रांते त्रिरात्रांते कपित्थबदराशनः ॥ आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन्हरिम् ॥ ७२ ॥ द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने ॥ तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयद्विभुम् ॥७३॥ तृतीयं चानयन्मासं नवमे नवमेऽहनि ॥ अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥ ७४ ॥ चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि ॥ वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ॥७५॥ पंचमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः ॥ ध्यायन्ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६ ॥ सर्वतो मन आकृष्य हृदि भूतेंद्रियाशयम् ॥ ध्यायन्भगवतो रूपं नाद्राक्षीत्किंचनापरम् ॥ ७७ ॥ आधारं महदादीनां प्रधानपुरुषेश्वरम् ॥ ब्रह्म धारयमाणस्य त्रयो लोकाश्चकंपिरे ॥ ७८ ॥ यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडिता मही ॥ ननाम तत्रार्धमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥ ७९ ॥ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धिया ॥ लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥ ८० ॥ देवा ऊचुः ॥ नैवं विदामो भगवन्प्राणरोधं चराचरस्याखिलसत्वधाम्नः ॥ विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् ॥ ८१ ॥ श्रीभगवानुवाच ॥ मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम ॥ यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८२ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे ध्रुवचरितेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥

स तव पुत्रो देवैरपि कर्तुमशक्यं कर्म कृत्वा ते यशो विस्तारयन् शीघ्रमेवैष्यति ॥ ६९ ॥ मैत्रेय उवाच ॥ इति नारदेनोक्तं श्रुत्वा राजा राजलक्ष्मीमप्यनादृत्य पुत्रमेव चिंतयामास ॥७०॥ ध्रुवस्तु मधुवनं गत्वा तां रात्रिमुपोष्यैकाग्रचित्तः सन् नारदोक्तेन मंत्रेण हरिं पूजयामास ॥७१॥ ततस्त्रिरात्रांते त्रिरात्रांते कपित्थबदरभक्षको हरिं पूजयन् मासं निन्ये ॥७२॥ ततः षष्ठे षष्ठे दिने गलिततृणपर्णानि भक्षयित्वा द्वितीयं मासं निन्ये ॥७३॥ ततो नवमे नवमेऽहनि जलभक्षः सन् समाधिना हरिं ध्यायन् तृतीयं मासं निन्ये ॥७४॥ ततो द्वादशे द्वादशेऽहनि वायुभक्षो जितश्वासो देवं ध्यायन् चतुर्थं मासं निन्ये ॥७५॥ पंचमे मासि प्राप्ते सति जितश्वासो ध्रुव एकपादेन वृक्ष इव स्थित्वा ॥७६॥ सर्वतो मन आकृष्य ब्रह्म ध्यायन् तस्मादन्यं किंचिदपि नाद्राक्षीत् ॥७७॥ एवं ब्रह्मधारयमाणस्य सतस्त्रयो लोकाश्चकंपिरे ॥७८॥ यदा स एकपादेन तस्थौ तदा तदंगुष्ठनिपीडिता पृथिवी ननाम ॥७९॥ तदा तस्य श्वासनिरोधेन जगतः प्राणनिरोधो जातः । तदा सर्वे देवाद्या भीताः संतो हरिं शरणं गत्वोचुः ॥ ८० ॥ देवा ऊचुः ॥ हे भगवन्, सर्वस्य जगत एतादृशं प्राणनिरोधं वयं कदापि न दृष्टवंतः । अतो भयाद्वयं त्वां शरणं प्राप्ताः । एतस्मात्संकटादस्माकं मुक्तिं कुरु ॥८१ ॥ श्रीभगवानुवाच ॥ हे देवाः, यूयं मा भैष्ट । यस्माद्वः प्राणनिरोधो जातस्तं ध्रुवं बालमहं तपसो निवर्तयिष्ये । यूयं स्वस्थानं यात ॥ ८२ ॥ इति श्रीमद्भागवतचू० चतुर्थ० अष्टमोऽध्यायः ॥ ८ ॥ ॥

मैत्रेय उवाच ॥ त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपम् ॥ सहस्रशीर्षापि ततो गरुमता मधोर्वनं भृत्यदिदृक्षया गतः ॥ १ ॥ स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभम् ॥ तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श ॥ २ ॥ तद्दर्शनेनागतसाध्वसः क्षिताववंदतांगं विनमय्य दंडवत् ॥ दृग्भ्यां प्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येन भुजैरिवाश्लिषन् ॥ ३ ॥ स तं विवक्षंतमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च हृद्यवस्थितः ॥ कृतांजलिं ब्रह्ममयेन कंबुना पस्पर्श बालं कृपया कपोले ॥ ४ ॥ स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः ॥ तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः ॥ ५ ॥ ध्रुव उवाच ॥ योंऽतः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ॥ अन्यांश्च हस्तचरणश्रवणत्वगादीन्प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥ ६ ॥ एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम् ॥ सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ॥ ७ ॥ त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः ॥ तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबंधो ॥ ८ ॥ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं निरयेऽपि नृणाम् ॥ ९ ॥ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किं त्वंतकासिलुलितात्पततां विमानात् ॥ १० ॥ भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानाम् ॥ येनांजसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ॥ ११ ॥ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ॥ ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृतप्रसंगाः ॥ १२ ॥ ॥ ॥ ॥

नवमे तु हरिं स्तुत्वा लब्ध्वा तस्माद्वरं ध्रुवः ॥ प्रत्यागत्याकरोद्राज्यं पित्रादत्तमितीर्यते ॥ १ ॥ मैत्रेय उवाच ॥ देवा भगवद्वाक्यान्निर्भया भूत्वा स्वर्गं ययुः । हरिरपि गरुडमारुह्य मधुवनं ययौ ॥१॥ ध्रुवो हृदिस्थं हरिं सहसैवांतर्हितं दृष्ट्वा व्युत्थितः सन् यादृशोंऽतःकरणे स्फुरितस्तादृशं हरिं बहिः स्थितं ददर्श ॥२॥ तद्दर्शनेन जातसंभ्रमः सन् दृग्भ्यां प्रपिबन्निव पश्यन् भूमौ दंडवन्ननाम ॥ ३ ॥ ततो हरिः स्वगुणान् वक्तुमिच्छंतं तं ज्ञात्वा तस्य कपोले शंखेन स्पर्शं कृतवान् ॥४॥ तदा शंखस्पर्शमात्रेणोत्पन्नज्ञानः स ध्रुवो भक्त्या प्रेमयुक्तः सन् तं तुष्टाव ॥५॥ ध्रुव उवाच ॥ यस्त्वमंतः प्रविश्य मम सुप्तां वाचमन्यानि च श्रवणत्वगादीनींद्रियाणि चिच्छक्त्या जीवयसि तस्मै तुभ्यं भगवते नमः ॥६॥ हे भगवन्, त्वमेको माययेदं सृष्ट्वा तदनुप्रविश्य नानाप्रकारो भासि॥७॥ हे हरे, त्वया दत्तेन ज्ञानेन त्वां शरणं प्राप्तो ब्रह्मा इदं विश्वं ददर्श । अतो मुक्तानामपि शरणं त्वां ये न भजंति ते कृतघ्नाः॥ ८ ॥ किंच । विषयजन्यं सुखं प्राणिनां नरकेऽप्यस्ति तदर्थं जन्ममरणनाशहेतुं त्वां ये भजंति ते नूनमतिमूढाः॥९॥ हे नाथ, तव चरणकमलध्यानात्कथाश्रवणेन च यत्सुखं स्यात्तन्निजानंदरूपे ब्रह्मण्यपि न भवति॥१०॥ अतो हे हरे, तव भक्तिं कुर्वतां साधूनां समागमो मे भूयात् । येन भवसमुद्रं तरिष्ये ॥११॥ ये त्वद्भक्तसमागमं कुर्वाणा मनुष्यास्ते प्रियं देहं

पुत्रादींश्च न स्मरंति ॥ १२ ॥ हे अज, तव स्थूलं विराड्रूपमात्रमहं वेद्मि । अतः परमीश्वररूपं ब्रह्मरूपं च न वेद्मि । तेन कारणेन मेऽभिमानो न निवर्तते॥१३॥
यो भवान् कल्पांत इदं जगत्संहृत्य शेषोत्संगे शेते । यस्य नाभिकमलाद्ब्रह्मा भवति तस्मै तुभ्यमहं प्रणतोऽस्मि ॥१४॥ हे ईश, त्वं नित्यमुक्तः शुद्धो ज्ञानस्वरूप
आत्माऽसि । स च त्वं जगत्पालने विष्णुरूपेण स्थितोऽसि॥१५॥ यस्मिन् विद्यादयो विविधाः शक्तयोऽकस्मादुद्भवंति तमानंदमात्रमविकारमहं शरणं
प्राप्तोऽस्मि ॥१६॥ हे भगवन्, यथा नूतनप्रसूता गौर्वत्संप्रति दुग्धं पाययित्वा तं वृकादिभ्योऽपि रक्षति तथा भक्तानुग्रहतत्परस्त्वं सकामभक्तानां वरदो भूत्वा
तान्संसारभयादपि रक्षसि ॥ १७॥ मैत्रेय उवाच ॥ एवं स्तुतिं श्रुत्वा प्रीतो हरिरिदमाह ॥ १८ ॥ श्रीभगवानुवाच ॥ हे ध्रुव, तव वांछितमहं वेद्मि । तच्च ते

तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम् ॥ रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र
वादः ॥१३॥ कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृगनंतसखस्तदंके ॥ यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान्भगवते
प्रणतोऽस्मि तस्मै ॥१४॥ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः॥ यद्बुद्ध्यवस्थितिमखंडितया
स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥१५॥ यस्मिन्विरुद्धगतयो ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात् ॥
तद्ब्रह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ॥१६॥ सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथा नु भजतः
पुरुषार्थमूर्तेः ॥ अप्येवमार्य भगवान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ १७॥ मैत्रेय उवाच ॥ अथाभिष्टुत
एवं वै सत्संकल्पेन धीमता ॥ भृत्यानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत् ॥१८॥ श्रीभगवानुवाच ॥ वेदाहं ते व्यवसितं हृदि राजन्यबालक
॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥१९॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति ॥ यत्र ग्रहर्क्षताराणां ज्योतिषां
चक्रमाहितम् ॥२०॥ मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनाम् ॥ धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ॥ चरंति दक्षिणीकृत्य
भ्रमंतो यत्सतारकाः ॥ २१ ॥ प्रस्थिते तु वनं पित्रा दत्वा गां धर्मसंश्रयः ॥ षट्त्रिंशद्वर्षसाहस्रं रक्षिताऽव्याहतेंद्रियः
॥२२॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः ॥ अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति ॥२३॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः
पुष्कलदक्षिणैः ॥ भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि ॥ २४ ॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतम् ॥
उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते गतः ॥ २५ ॥ ॥ ॥ ॥ ॥ ॥

ददामि । तव कल्याणमस्तु ॥१९॥ यत्र निहितं ग्रहनक्षत्रताराणां चक्रम् ॥२०॥ धान्यमर्दनाय भ्राम्यमाणानां पशूनां बंधनस्तंभे बलीवर्दसमूहवत्परितो भ्रमति
। यच्च लोकत्रयनाशेऽप्यनश्वरं यच्च प्रदक्षिणीकृत्य धर्माग्निकश्यपादयो मुनयश्चरंति तद्ध्रुवपदं ते दत्तमस्ति ॥२१॥ तव पितरि तुभ्यं पृथिवीं दत्वा वनं गते
सति त्वं षट्त्रिंशद्वर्षसाहस्रं राज्यं करिष्यसि ॥२२॥ त्वद्भ्रातरि उत्तमे मृगयायां नष्टे सति तन्माता सुरुचिस्तं मृगयंती सती दावाग्निं प्रवेक्ष्यति ॥ २३ ॥ त्वं
यज्ञैर्मामिष्ट्वा इह लोके उत्तमान् भोगान् भुक्त्वांऽते मां संस्मरिष्यसि ॥२४॥ ततो ऋषिभ्य उपरिष्टात् सर्वलोकनमस्कृतं अचलं मत्स्थानं गमिष्यसि ॥ २५॥

मैत्रेय उवाच ॥ इत्युक्त्वा भगवान् तस्य ध्रुवस्य पश्यतः सतः स्वधाम जगाम ॥२६॥ ध्रुवोऽपि स्वमनोरथं प्राप्य नातिसंतुष्टः सन् पुरं जगाम ॥२७॥ विदुर उवाच ॥ हे मैत्रेय, ध्रुवो हरेरचलं स्थानं लब्ध्वापि आत्मानमप्राप्तमनोरथमिव कथं मेने ॥२८॥ मैत्रेय उवाच ॥ सापत्नमातुर्वाग्बाणैर्विद्धो ध्रुवस्तान् वाग्बाणान् स्मरन् मुक्तिपतेर्मुक्तिं नैच्छत् तस्मात् तापं प्राप्तः ॥२९॥ ध्रुव उवाच ॥ सनकादयो बहुजन्माभ्यस्तेन समाधिना यस्य ज्ञानं संपादयंति तस्य हरेः पादच्छायां स्वल्पेन कालेन प्राप्याप्यहं भेददृष्टिः सन् दूरं गतः॥३०॥अहो मंदभाग्यस्य मेऽज्ञत्वं पश्यत । भवच्छिदः पादमूलं गत्वा यन्नाशवत् तद्याचितवानस्मि ॥३१॥ योऽहं सत्यमपि नारदस्य वचनं न गृहीतवान्। तस्य मे मतिर्देवैर्दूषिता ॥३२॥ दैवीं मायामाश्रित्य द्वितीयेऽविद्यमानेऽपि भ्रातैव शत्रुरिति दृष्ट्या हृद्रोगेण

॥ मैत्रेय उवाच ॥ इत्यर्चितः स भगवानतिदिश्यात्मनः पदम् ॥ बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः ॥२६॥ सोऽपि संकल्पजं विष्णोः पादसेवोपसादितम् ॥ प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरम् ॥२७॥ विदुर उवाच ॥ सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितम् ॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् ॥२८॥ मैत्रेय उवाच ॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन् ॥ नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान् ॥२९॥ ध्रुव उवाच ॥ समाधिना नैकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः ॥ मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथङ्मतिः ॥३०॥ अहो बत ममानात्म्यं मंदभाग्यस्य पश्यत ॥ भवच्छिदः पादमूलं गत्वा याचे यदंतवत् ॥३१॥ मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः ॥ यो नारदवचस्तथ्यं नाग्राहिषमसत्तमः ॥३२॥ दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् ॥ तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा ॥३३॥ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि ॥ प्रसाद्य जगदात्मानं तपसा दुष्प्रसादनम् ॥ भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः ॥३४ ॥ स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत ॥ ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः ॥ ३५ ॥ ॥ मैत्रेय उवाच ॥ न वै मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः ॥ वांछंति तद्दास्यमृतेऽर्थमात्मनो यदृच्छया लब्धमनःसमृद्धयः ॥ ३६ ॥ आकर्ण्यात्मजमायांतं संपरेत्य यथागतम् ॥ राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम ॥ ३७ ॥ श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः ॥ वार्ताहर्तुरतिप्रीतो हारं प्रादान्महाधनम् ॥ ३८ ॥ सदश्वं रथमारुह्य कार्तस्वरपरिष्कृतम् ॥ ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोऽमात्यबंधुभिः ॥ ३९ ॥ ॥ ॥

संतापमनुभवामि ॥३३॥ ईश्वरमाराध्य मयैतद्राज्यादि व्यर्थं प्रार्थितम् । भाग्यहीनोऽहं संसारनाशकं हरिंप्रति संसारमेव याचितवानस्मि ॥ ३४ ॥ अहो निजानंदं ददतो हरेः सकाशान्मयाऽभिमान एव याचितः ॥३५॥ मैत्रय उवाच ॥ हे विदुर, भवत्सदृशा भक्ता हरिदास्यं विनान्यत्किमपि न वांछंति ॥ ३६ ॥ अथोत्तानपादो राजा, यथा कश्चिन्मृतो मनुष्यः सजीवो भूत्वा श्मशानात्पुनरागच्छति तथा आगतं स्वपुत्रं ध्रुवं श्रुत्वा प्रथमं तद्वाक्ये विश्वासं न चकार ॥३७॥ ततो नारदोक्तं स्मृत्वा विश्वासेनातिसंतुष्टः सन् वार्तामानीतवतः सेवकस्य बहुमौल्यं हारं पारितोषिकं ददौ ॥३८॥ ततः स सुवर्णालंकारभूषितं रथमारुह्य ब्रा-

ह्मणैः कुलवृद्धैरमात्यैर्बंधुजनैश्च सह ॥३९॥ शंखदुंदुभिनादेन वेदघोषेण च सह पुत्रावलोकनेच्छुः संमुखं जगाम ॥४०॥ तथा सुरुचिः सुनीतिश्चोत्तमेन सह शिबिकामारुह्य संमुखं जग्मतुः ॥४१॥ ततो नगरसमीपे ध्रुवं दृष्ट्वा राजा रथात्तूर्णमवप्लुत्य प्रेमविह्वलः सन् ॥ ४२ ॥ तं दोर्भ्यां गृहीत्वाऽऽलिंगयामास ॥ ४३ ॥ ततो मूर्ध्नि घ्रात्वा प्राप्तमनोरथः सन् प्रेमाश्रुभिः पुत्रं स्नापयामास ॥४४॥ अथ ध्रुवः पितुः पादौ ननाम। तेन चाशीर्भिरभिमंत्रितः। ततो मातरौ ननाम॥४५॥ तदा सुरुचिस्तमुत्थाप्याऽऽलिंग्य गद्गदवाण्या चिरं जीवेत्याशीर्वादं ददौ ॥४६॥ मैत्रीसमदृष्ट्यादिगुणैर्यस्य भगवान् प्रसन्नस्तस्मै सर्वाण्यपि भूतानि नमंति॥४७॥ तत उत्तमो ध्रुवश्चोभौ प्रेमविह्वलौ भूत्वान्योन्यमालिलिंगतुः ॥४८॥ ततः सुनीतिः प्रियं सुतमालिंग्य तस्य स्पर्शेनानंदयुक्ता सती दुःखं जहौ ॥४९॥ तदा तस्या आनंदा-

शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः॥ निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः॥ ४०॥ सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते॥ आरुह्य शिबिकां सार्धमुत्तमेनाभिजग्मतुः ॥४१॥ तं दृष्ट्वोपवनाभ्याश आयांतं तरसा रथात्॥ अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः॥४२॥ परिरेभेऽगजं दोर्भ्यां दीर्घोत्कंठमनाः श्वसन् ॥ विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनम्॥ ४३ ॥ अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः॥ स्नापयामास तनयं जातोद्दाममनोरथः॥ ४४ ॥ अभिवंद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः॥ ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥४५॥ सुरुचिस्तं समुत्थाप्य पादावनतमर्भकम्॥ परिष्वज्याह जीवेति बाष्पगद्गदया गिरा॥ ४६ ॥ यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः॥ तस्मै नमंति भूतानि निम्नमाप इव स्वयम् ॥४७॥ उत्तमश्च ध्रुवश्चोभावन्योन्यं प्रेमविह्वलौ ॥ अंगसंगादुत्पुलकावस्रौघं मुहुरूहतुः ॥ ४८ ॥ सुनीतिरस्य जननी प्राणेभ्योऽपि प्रियं सुतम् ॥ उपगुह्य जहावाधिं तदंगस्पर्शनिर्वृता ॥४९॥ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः॥ तदाऽभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः ॥५०॥ तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा ॥ प्रतिलब्धश्चिरं नष्टो रक्षिता मंडलं भुवः ॥५१॥ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा ॥ यदनुध्यायिनो वीरा मृत्युं जिग्युः सुदुर्जयम् ॥५२॥ लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ॥ आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम् ॥५३॥ तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः ॥ सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः॥५४॥ चूतपल्लववासःस्रङ्मुक्तादामविलंबिभिः ॥ उपस्कृतं प्रतिद्वारमपां कुंभैः सदीपकैः ॥५५॥ प्राकारैर्गोपुरागारैः शातकुंभपरिच्छदैः ॥ सर्वतोऽलंकृतं श्रीमद्विमानशिखरद्युभिः ॥५६॥ मृष्टचत्वररथ्याट्टमार्ग चंदनचर्चितम् ॥ लाजाक्षतैः पुष्पफलैस्तंडुलैर्बलिभिर्युतम्॥ ५७॥ ॥

श्रुभिरभिषिक्ताभ्यां स्तनाभ्यां दुग्धं सुस्राव ॥५०॥ ततो जनाः सुनीतिं प्रशशंसुः । हे सुनीते, चिरं नष्टस्तव पुत्रः प्राप्तः एतद्दिष्ट्या । अयं च भूमंडलं रक्षिष्यति ॥५१॥ किंच । त्वया निश्चयेन भगवान् पूजितोऽस्ति ॥५२॥ नृपो ध्रुवं हस्तिनींप्रत्यारोप्यानेकशोभाढ्यं नगरं प्राविशत् ॥ ५३ ॥ कथंभूतं तन्नगरम् । सफलैः कदलीस्तंभैस्तोरणैर्लघुपूगैश्च शोभितम् ॥५४॥ आम्रपल्लवा वस्त्राणि पुष्पमाला मौक्तिकस्रजश्च येषां कंठे बद्धाः संति तैर्दीपयुक्तैर्जलकुंभैः प्रतिद्वारमलंकृतम् ॥ ५५ ॥ सुवर्णभूषितैः प्राकारैर्गोपुरैर्मंदिरैश्च सर्वतः समलंकृतम् ॥ ५६ ॥ संमार्जितांगणरथ्याराजमार्गम् । लाजाक्षतपुष्पफलादिभिर्युक्तम् ॥ ५७ ॥

तत्र तत्र पुरस्त्रियः पथि ध्रुवंप्रति सर्षपाक्षतदध्यंबुदूर्वापुष्पफलैः प्रविकिरंत्यः सत्यः ॥५८॥ आशिषो ददुः । ध्रुवस्तासां सुंदरगीतानि श्रृण्वन् पितुर्गृहं प्राविशत् ॥५९॥ स तस्मिन्नुत्तमे गृहे पित्रा लालितः सन् दिवि देववन्न्यवसत् ॥६०॥ तद्गृहं वर्णयति। यत्र पयःफेनसदृशाः शय्याः संति। सुवर्णमया उपस्कराःसंति ॥६१॥ यत्र स्फटिकभित्तिषु स्त्रीरत्नयुक्ता मणिप्रदीपाः शोभंते ॥६२॥ यत्र विचित्रैर्देववृक्षैर्गायन्मत्तभ्रमरैः शोभितान्युद्यानानि संति ॥ ६३ ॥ यत्र वैदूर्यमणीनां सोपानयुक्ता हंसकारंडवकुलैर्व्याप्ता वाप्यः संति ॥६४॥ तस्मिन्गृहे उत्तानपादो राजा पुत्रस्य प्रतापं श्रुत्वा दृष्ट्वा च परं विस्मयं प्राप ॥६५॥ ततः स प्राप्तयौवनं प्रजानां मान्यं च ध्रुवं दृष्ट्वा पृथिव्याः पतिं चक्रे ॥६६॥ तत आत्मनो वृद्धत्वं ज्ञात्वा संसाराद्विरक्तः सन्नात्मविचारार्थं वनं जगाम॥६७॥इति श्रीमद्भागवतचू०

ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः ॥ सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च ॥ ५८ ॥ उपजह्रुः प्रयुंजाना वात्सल्यादाशिषः सतीः ॥ श्रृण्वंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः ॥ ५९ ॥ महामणिव्रातमये स तस्मिन्भवनोत्तमे ॥ लालितो नितरां पित्रा न्यवसद्दिवि देववत् ॥ ६० ॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि महार्हाणि यत्र रौक्मा उपस्कराः॥६१॥ यत्र स्फटिककुड्येषु महामारकतेषु च ॥ मणिप्रदीपा आभांति ललनारत्नसंयुताः ॥ ६२ ॥ उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥ ६३ ॥ वाप्यो वैदूर्यसोपानाः पद्मोत्पलकुमुद्वतीः ॥ हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः ॥६४॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तम् ॥ श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परम् ॥ ६५ ॥ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतम् ॥ अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिम् ॥ ६६ ॥ आत्मानं च प्रवयसमाकलय्य विशांपतिः ॥ वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिम् ॥ ६७ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे ध्रुवराज्याभिषेकवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ ॥ मैत्रेय उवाच ॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ॥ उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥१॥ इलायामपि भार्यायां वायोः पुत्र्यां महाबलः ॥ पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ॥ २ ॥ उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा ॥ हतः पुण्यजनेनाद्रौ तन्मातास्य गतिं गता ॥ ३ ॥ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः ॥ जैत्रं स्यंदनमास्थाय गतः पुण्यजनालयम् ॥ ४ ॥ गत्वोदीचीं दिशं राजा रुद्रानुचरसेविताम् ॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलाम् ॥५॥ दध्मौ शंखं बृहद्बाहुः खं दिशश्चानुनादयन् ॥ येनोद्विग्नदृशः क्षत्तरुपदेव्योऽत्रसन्भृशम् ॥ ६ ॥ ॥ ॥

चतु० नवमोऽध्यायः ॥९॥ ॥ दशमे भ्रातृहंतॄणां यक्षाणामकरोद्वधम् । एक एवालकां गत्वा तस्य विक्रम उच्यते ॥१॥ मैत्रेय उवाच ॥ ध्रुवः शिशुमारस्य प्रजापतेर्भ्रमिं नाम कन्यां परिणीतवान्। तत्सुतौ कल्पवत्सरावास्ताम् ॥१॥ ध्रुवो वायोः पुत्र्यामिलानाम्न्यां द्वितीयायां भार्यायां उत्कलनामानं पुत्रं जनयामास ॥२॥ उत्तमस्तु अकृतविवाह एव हिमाचले मृगयार्थं गतः सन् तत्र यक्षेण हतः॥ तन्माता सुरुचिरपि तं पुत्रं मृगयंती सती दावाग्निना दग्ध्वा ममार ॥३॥ ध्रुवो भ्रातुर्वधं श्रुत्वा क्रोधयुक्तः सन् रथमारुह्य उत्तरदिशं गत्वा ॥४॥ हिमाचलद्रोण्यां यक्षव्याप्तामलकां नाम नगरीं दृष्ट्वा ॥५॥ आकाशं दिशश्च नादयन् शंखं

ततो निष्क्रम्य बलिन उपदेवमहाभटाः ॥ असहंतस्तन्निनादमभिपेतुरुदायुधाः ॥ ७ ॥ स तानापततो वीर उग्रधन्वा महारथः ॥ एकैकं युगपत्सर्वानहन्बाणैस्त्रिभिस्त्रिभिः ॥ ८ ॥ ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव हि ॥ मत्वा निरस्तमात्मानमाशंसन्कर्म तस्य तत् ॥ ९ ॥ तेऽपि चामुममृष्यंतः पादस्पर्शमिवोरगाः ॥ शरैरविध्यन्युगपद्द्विगुणं प्रचिकीर्षवः ॥ १० ॥ ततः परिघनिस्त्रिंशैः प्रासशूलपरश्वधैः ॥ शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैः शरैरपि ॥ ११ ॥ अभ्यवर्षन्प्रकुपिताः सरथं सहसारथिम् ॥ इच्छंतस्तत्प्रतीकर्तुमयुतानि त्रयोदश ॥१२॥ औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा ॥ न उपादृश्यत छन्न आसारेण यथा गिरिः ॥ १३ ॥ हाहाकारस्तदैवासीत्सिद्धानां दिवि पश्यताम् ॥ हतोऽयं मानवः सूर्यो मग्नः पुण्यजनार्णवे ॥ १४ ॥ नदत्सु यातुधानेषु जयकाशिष्वथो मृधे ॥ उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥१५॥ धनुर्विस्फूर्जयन्दिव्यं द्विषतां खेदमुद्वहन् ॥ अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः ॥१६॥ तस्य ते चापनिर्मुक्ता भित्त्वा वर्माणि रक्षसाम् ॥ कायानाविविशुस्तिग्मा गिरीनशनयो यथा ॥१७॥ भल्लैः संछिद्यमानानां शिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥१८॥ हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः ॥ आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥१९॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः ॥ प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेंद्रविक्रीडितयूथपा इव ॥२०॥ अपश्यमानः स तदाऽऽततायिनं महामृधे कंचन मानवोत्तमः ॥ पुरीं दिदृक्षन्नपि नाविशद्द्विषां न मायिनां वेद चिकीर्षितं जनः ॥२१॥ इति ब्रुवंश्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशंकितः ॥ शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥२२॥ क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः ॥ विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥२३॥

दध्मौ । तच्छब्देन यक्षस्त्रियोऽत्यंतमत्रसन् ॥६॥ ततो यक्षास्तं निनादं श्रुत्वा आयुधान्युद्यम्य ध्रुवमभिपेतुः॥७॥ ध्रुव आपततस्तान् त्रयोदशायुतानि १३०००० यक्षान् एकैकं त्रिभिस्त्रिभिर्बाणैर्युगपन्मस्तके विव्याध ॥८॥ ततस्ते आत्मानं पराजितं मत्वा ध्रुवस्य तत्कर्म तुष्टुवुः ॥९॥ ते यक्षा ध्रुवस्य तत्कर्मासहमानाः संतो द्विगुणैर्बाणैर्ध्रुवं विव्यधुः ॥१०॥ ततः प्रकुपितास्ते यक्षाः परिघखड्गपाशशूलकुठारादिभिः सरथं ध्रुवमभ्यवर्षन् ॥११॥१२॥ ततो ध्रुवस्तेषां शस्त्रवर्षेणाच्छादितः सन् वर्षधाराभिः पर्वत इव नादृश्यत ॥ १३ ॥ तदा आकाशे तत्पश्यतां सिद्धानां हाहाकारो बभूव । अहो अयं मनुवंशजः सूर्यतुल्यो ध्रुवो यक्षरूपे समुद्रे मग्नः॥१४॥ तदा युधि यक्षेषु जितंजितमिति नदत्सु सत्सु नीहारात्सूर्य इव शस्त्रसमूहाद्ध्रुवरथ उदतिष्ठत् ॥१५॥ ततो ध्रुवो धनुर्विस्फूर्जयन् तेषां शस्त्रौघं बाणैश्चूर्णयामास ॥१६॥ ध्रुवमुक्ता बाणा रक्षसां कवचानि भित्वा देहानाविविशुः ॥१७॥ तदा बाणैश्छिद्यमानानां रक्षसां सकुंडलैः शिरोभिरूरुभिर्बाहुभिः॥१८॥ हारबाहुभूषणकुंडलैरुष्णीषैश्चाऽऽस्तृतास्ता रणभूमयो रेजुः ॥१९॥ तदा हतावशिष्टा यक्षा ध्रुवबाणैश्छिन्नभिन्नावयवा दुद्रुवुः ॥२०॥ तदा ध्रुवो युधि कंचन शस्त्रपाणिं न पश्यन् तेषां पुरीं द्रष्टुमिच्छन्नपि तां नाविशत्। यतो मायिनां चिकीर्षितं जनो न वेद॥२१॥ एवं सारथिं ब्रुवन् ध्रुवो रिपूणां पुनरुद्योगाच्छंकितो जातः। तदैव ते यक्षा अदृश्या भूत्वाऽऽसुरीर्मायाः ससृजुः। ता एवाह। आदौ ध्रुवः समुद्रनादमिव नादं शुश्राव। ततो रजोऽदृश्यत ॥ २२ ॥ ततो मेघसमुदायेनाकाशं सर्वत

आच्छादितम् ॥२३॥ ते मेघा रक्तपूयविष्ठामूत्रमेदांसि ववृषुः । ध्रुवस्याग्रतो गगनात्कबंधा निपेतुः ॥ २४ ॥ ततः सर्वदिग्भ्यो गदापरिघनिस्त्रिंशमुसलपाषाणाः पेतुः ॥२५॥ ततः सर्वतः सर्पव्याघ्रगजसिंहादयोऽभ्यधावन् ॥२६॥ ततः समुद्रो लहरीभिर्भूमिं प्लावयन्निव ददृशे ॥२७॥ एवं ते यक्षा मायया भयंकरानुत्पातान् ससृजुः॥२८॥ तदा मुनय एतज्ज्ञात्वा ध्रुवसमीपमागत्य ध्रुवस्य कल्याणमिच्छंत आहुः॥२९॥ मुनय ऊचुः॥ हे औतानपादे, भगवान् शार्ङ्गधन्वा तव शत्रून् नाशयतु । यस्य नामोच्चारणेन लोको दुस्तरमपि मृत्युं तरति ॥३०॥ इति श्रीमद्भागवतचू॰ चतु॰ दशमोऽध्यायः ॥ १० ॥ ॥ एकादशे तु यक्षाणां क्षयं दृष्ट्वा मनुः स्वयम् । आगत्य वारयामास ध्रुवं तत्त्वोपदेशतः॥१॥ मैत्रेय उवाच ॥ एवं वदतामृषीणां वाचं निशम्य ध्रुवोऽप् उपस्पृश्य धनुषि नारायणास्त्रं

ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः ॥ निपेतुर्गगनादस्य कबंधान्यग्रतोऽनघ ॥२४॥ ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतोदिशम् ॥ गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः ॥२५॥ अहयोऽशनिनिःश्वासा वमंतोऽग्निं रुषाक्षिभिः ॥ अभ्यधावन्गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥२६॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवम् ॥ आससाद महाह्लादः कल्पांत इव भीषणः ॥२७॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनाम् ॥ ससृजुस्तिग्मगतय आसुर्या माययाऽसुराः ॥ २८॥ ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तराम् ॥ निशाम्य तस्य मुनयः शमाशंसन्समागताः ॥२९॥ मुनय ऊचुः ॥ औत्तानपादे भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् ॥ यन्नामधेयमभिधाय निशम्य चाद्धा लोकोंऽजसा तरति दुस्तरमंग मृत्युम् ॥ ३० ॥ इति श्रीम॰म॰चतुर्थस्कंधे दशमोऽध्यायः ॥१०॥ ॥ मैत्रेय उवाच ॥ निशम्य गदतामेवमृषीणां धनुषि ध्रुवः ॥ संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम्॥१॥ संधीयमान एतस्मिन्माया गुह्यकनिर्मिताः ॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा ॥२॥ तस्यार्षास्त्रं धनुषि प्रयुंजतः सुवर्णपुंखाः कलहंसवाससः ॥ विनिःसृता आविविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखंडिनः ॥३॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः ॥ तमभ्यधावन्कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः॥४॥ स तान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् ॥ निनाय लोकं परमर्कमंडलं व्रजंति निर्भिद्य यमूर्ध्वरेतसः ॥ ५ ॥ तान्हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः ॥ औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः॥६॥ मनुरुवाच ॥ अलं वत्सातिरोषेण तमोद्वारेण पाप्मना॥ येन पुण्यजनानेतानवधीस्त्वमनागसः ॥७॥ नास्मत्कुलोचितं तात कर्मैतत्सद्विगर्हितम् ॥ वधो यदुपदेवानामारब्धस्तेऽकृतैनसाम् ॥८॥ ॥

संदधे ॥१॥ अस्त्रे संधीयमाने सति गुह्यकनिर्मिता मायाः यथा ज्ञानप्राप्तौ क्लेशा नश्यंति तथा विनेशुः॥२॥ तस्मान्नारायणास्त्रतो बाणा निर्गत्य शत्रुसैन्यं विविशुः ॥३॥ तैस्तीक्ष्णैर्बाणैः पीडिता यक्षाः कुपिताः संतो ध्रुवमभ्यधावन् ॥४॥ ध्रुवस्तु बाणैर्यक्षान् छिन्नबाहूरुकंठोदरान् कृत्वा परलोकं निनाय ॥५॥ ध्रुवेण हन्यमानान् यक्षान् वीक्ष्य कृपया स्वायंभुवो मनुर्ऋषिभिः सह तत्रैत्य ध्रुवं जगाद ॥ ६ ॥ मनुरुवाच ॥ हे वत्स, पापरूपिणा नरकद्वारेण क्रोधेनालम् ॥ येन निरपराधान् यक्षांस्त्वं हतवान् ॥७॥ एतत्सद्भिर्निंदितं कर्मास्मत्कुलोचितं नहि । निरपराधिनां यक्षाणां यो वधस्त्वया आरब्ध इदं न्याय्यं च नहि ॥८॥

एकस्य यक्षस्यापराधप्रसंगेन त्वया बहवो यक्षा हताः ॥९॥ अयं भगवत्सेवकानां साधूनां मार्गो न हि ॥ १० ॥ त्वं दुराराध्यं हरिमाराध्य विष्णोः परमं पदं लब्ध्वा ॥११॥ साधूनां व्रतं शिक्षमाणः सन् कथं निंद्यं कर्म कृतवानसि ॥१२॥ महत्सु पुरुषेषु सहनशीलतया नीचेषु दयया समेषु मैत्र्या च सर्वात्मा भगवान् प्रसीदति ॥१३॥ भगवति प्रसन्ने सति पुरुषो मायागुणेभ्यो मुक्तः सन् ब्रह्मसुखं प्राप्नोति॥१४॥ देहाद्याकारेण परिणामं प्राप्तैः पंचमहाभूतैः स्त्रीपुरुषौ भवतः । तयोर्मैथुनादन्ययोः स्त्रीपुरुषयोः संभवो भवति ॥१५॥ एवं भगवन्मायया सृष्टिचक्रं प्रवर्तते ॥१६॥ ईश्वरस्तु तत्र निमित्तमात्रमस्ति । यथा लोहचुंबके निमित्ते सति लोहं भ्रमते तथा यस्मिन्नीश्वरे निमित्ते सति विश्वं प्रवर्तते ॥१७॥ स भगवानकर्तैव सन्निदं करोति । असंहर्ता सन्निदं संहरति । तस्य

नन्वेकस्यापराधेन प्रसंगाद्बहवो हताः ॥ भ्रातुर्वधाभितप्तेन त्वयांग भ्रातृवत्सल ॥९॥ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनाम् ॥ यदात्मानं पराग्गृह्य पशुवद्भूतवैशसम् ॥१०॥ सर्वभूतात्मभावेन भूतावासं हरिं भवान् ॥ आराध्याप दुराराध्यं विष्णोस्तत्परमं पदम् ॥११॥ स त्वं हरेरनुध्यातस्तत्पुंसामपि संमतः ॥ कथं त्ववद्यं कृतवाननुशिक्षन्सतां व्रतम् ॥ १२ ॥ तितिक्षया करुणया मैत्र्या चाखिलजंतुषु ॥ समत्वेन च सर्वात्मा भगवान्संप्रसीदति ॥१३॥ संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ॥ विमुक्तो जीवनिर्मुक्तो ब्रह्मनिर्वाणमृच्छति ॥१४॥ भूतैः पंचभिरारब्धैर्योषित्पुरुष एव हि ॥ तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह॥१५॥एवं प्रवर्तते सर्गः स्थितिः संयम एव च ॥ गुणव्यतिकराद्राजन्मायया परमात्मनः॥१६॥ निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः ॥ व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥१७॥ स खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः ॥ करोत्यकर्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥१८॥ सोऽनंतोंऽतकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनांतकम् ॥१९॥ न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः ॥ तं धावमानमनुधावंत्यनीशा यथा रजांस्यनिलं भूतसंघाः ॥ २० ॥ आयुषोऽपचयं जंतोस्तथैवोपचयं विभुः ॥ उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ ॥२१॥ केचित्कर्म वदंत्येनं स्वभावमपरे नृप ॥ एके कालं परे दैवं पुंसः काममुतापरे ॥२२॥ अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च ॥ न वै चिकीर्षितं तात को वेदाथ स्वसंभवम् ॥२३॥ न चैते पुत्रक भ्रातुर्हंतारो धनदानुगाः ॥ विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ॥ २४ ॥ ॥

भगवतः कालशक्तिरचिंत्यास्ति ॥१८॥ स कालरूपी भगवाननंतोऽनादिश्च सन् पित्रादिना पुत्रादिं जनयन् सृष्टिकर्ता भवति । मृत्युनांतकमपि मारयन् संहारकर्ता च भवति ॥१९॥ अस्येश्वरस्य स्वपक्षः परपक्षो वा नास्ति । यथा धावंतं वायुमनु रजांसि धावंति तथा तमीश्वरं प्रवर्तकं संतमनु कर्माधीनाः प्राणिसमूहाः सुखदुःखेऽनुभवंति ॥ २० ॥ असौ कर्माधीनस्य जंतोरकालमृत्युं कालमृत्योरपि रक्षां च विदधाति स्वयं तु द्वाभ्यामपि रहितः ॥ २१ ॥ तमीश्वरं केचित् कर्म केचित्स्वभावं केचित्कालं केचिद्दैवं केचित्कामं च वदंति ॥ २२ ॥ तस्याव्यक्तस्य परमेश्वरस्य कर्तुमिष्टं कोऽपि न वेद ॥ २३ ॥ हे पुत्र, एते यक्षास्तव भ्रातुर्हंतारो न हि । मृत्युजन्मनोः पुंसो दैवमेव कारणम् ॥ २४ ॥ ॥ ॥ ॥

स एव विश्वं स्वमायया सृजति अवति हंति च। तथापि गुणकर्मभिर्न सज्जते ॥२५॥२६॥ तस्माद्धे पुत्र, तमेव हरिं सर्वात्मना त्वं शरणं व्रज ॥२७॥ यः पंचवर्षस्त्वं वने
गत्वा तपसा हरिमाराध्य त्रैलोक्यमूर्ध्नि अचलं स्थानं लब्धवानसि ॥२८॥ तमेव मनसि स्थितं परमात्मानं त्वं विलोकय ॥२९॥ तस्मिन्ननंते भगवति भक्तिं विधायावि-
द्याग्रंथिं विभेत्स्यसि॥३०॥हे ध्रुव, श्रेयसां घातकरं क्रोधं विचारेण नियच्छ। औषधेन यथा रोगं नियच्छति तद्वत्॥३१॥ येन क्रोधेन व्याप्तात्पुरुषाल्लोकोऽत्यंतं बिभेति।
अतो बुधस्तद्वशं न गच्छेत् ॥३२॥ हे ध्रुव, त्वया कुबेरस्य तत्सेवकयक्षवधेनापमानः कृतः॥३३॥अतो नम्रत्वेन तं प्रसादय। यावन्महतां तेजो नः कुलं न नाशयति ता-

स एव विश्वं सृजति स एवावति हंति च॥ अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः॥२५॥ एष भूतानि भूतात्मा भूतेशो भूतभा-
वनः॥ स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च ॥२६॥ तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणम्॥ यस्मै
बलिं विश्वसृजो हरंति गावो यथा वै नसि दामयंत्रिताः ॥२७॥ यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा॥
वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ॥ २८ ॥ तमेनमंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम्॥
आत्मानमन्विच्छ विमुक्तमात्मदृग्यस्मिन्निदं भेदमसत्प्रतीयते ॥२९॥ त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपपन्नसम-
स्तशक्तौ॥ भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढम्॥३०॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां पर-
म्॥ श्रुतेन भूयसा राजन्नगदेन यथाऽऽमयम्॥३१॥ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशम्॥ न बुधस्तद्वशं गच्छेदिच्छन्नभयमा-
त्मनः॥३२॥ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतम्॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः॥३३॥ तं प्रसादय वत्साशु
सन्नत्या प्रश्रयोक्तिभिः॥ न यावन्महतां तेजः कुलं नोऽभिभविष्यति ॥३ ॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवम्॥ तेनाभि-
वंदितः साकमृषिभिः स्वपुरं ययौ॥३५॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे एकादशोऽध्यायः॥११॥ ॥ मैत्रेय उवाच॥
ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेतमन्युं भगवान्धनेश्वरः॥ तत्रागतश्चारणयक्षकिंनरैः संस्तूयमानोऽभ्यवदत्कृतांजलिम्॥ १ ॥
॥ धनद उवाच॥ भो भो क्षत्रियदायाद परितुष्टोऽस्मि तेऽनघ॥ यस्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः॥२॥ न भवानवधी-
द्यक्षान्न यक्षा भ्रातरं तव॥ काल एव हि भूतानां प्रभुरप्ययभावयोः॥३॥ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि॥ स्वाप्नीवाभा-
त्यतद्ध्यानाद्यया बंधविपर्ययौ॥४॥ तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजम्॥ सर्वभूतात्मभावेन सर्वभूतात्मविग्रहम्॥५॥ ॥

वत्॥३४॥ हे विदुर, एवं मनुः पौत्रमनुशास्य तेन वंदितः सन् ऋषिभिः सह स्वपुरं ययौ॥३५॥ इति श्रीमद्भा॰ चू॰ चतु॰एकादशोऽध्यायः॥११॥ द्वादशे धनदेना-
भिनंदितः पुरमागतः। यज्ञैरिष्ट्वा हरेः स्थानमारुरोहेति कीर्त्यते॥१॥ मैत्रेय उवाच॥ कुबरो ध्रुवं वधान्निवृत्तं ज्ञात्वा चारणयक्षकिंनरैः स्तूयमानः सन् तत्रागत्य ध्रुवं ज-
गाद॥ १॥ कुबेर उवाच॥ हे ध्रुव, अहं ते संतुष्टोऽस्मि। यतस्त्वं मनोरुपदेशेन दुस्त्यजं वैरं त्यक्तवानसि ॥ २॥ भवान् यक्षान्नावधीत्। न च यक्षास्तव भ्रातरं जघ्नुः।
किंतु काल एव सर्वेषां मृत्युजन्मनोः समर्थोऽस्ति ॥३॥ पुरुषस्याहं त्वमिति या बुद्धिः सा स्वप्नवन्मिथ्यैव। यया बंधो दुःखं च भवति ॥४॥ तस्मात् हे ध्रुव, ते

कल्याणमस्तु । त्वं स्वनगरं गच्छ ॥ ५ ॥ ततः संसारनाशकं सर्वव्यापकं हरिं भजस्व ॥ ६ ॥ हे ध्रुव, त्वं वरदानयोग्योऽसि । अतो मत्तो वरं वरय ॥ ७ ॥ मैत्रेय उवाच ॥ हे विदुर, तदा ध्रुवो हरावचलां स्मृतिं वव्रे । यया संसारं तरति ॥ ८ ॥ कुबेरः प्रीतेन मनसा तथेत्युक्त्वांतर्दधे । स ध्रुवोऽपि स्वनगरं ययौ ॥ ९ ॥ अथ ध्रुवो भूरिदक्षिणैर्यज्ञैर्हरिमयजत् ॥ १० ॥ ततो हरौ भक्तिं कुर्वन् सर्वभूतेष्वात्मनि चावस्थितं तमेव हरिं ददर्श ॥ ११ ॥ एवं सुशीलं ब्राह्मणभक्तं तं ध्रुवं सर्वाः प्रजाः पितृवन्मेनिरे ॥ १२ ॥ स क्षितिमंडलं ३६००० षड्त्रिंशद्वर्षसहस्रं पालयामास । सुखदुःखादिभोगैः पुण्यपापक्षयं कुर्वन् ॥ १३ ॥

भजस्व भजनीयांघ्रिमभवाय भवच्छिदम् ॥ युक्तं विरहितं शक्त्या गुणमय्यात्ममायया ॥ ६ ॥ वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशंकितः ॥ वरं वरार्होंऽबुजनाभपादयोरनंतरं त्वां वयमंग शुश्रुम ॥ ७ ॥ मैत्रेय उवाच ॥ स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः ॥ हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः ॥ ८ ॥ तस्य प्रीतेन मनसा तां दत्त्वैडविडस्ततः ॥ पश्यतोंऽतर्दधे सोऽपि स्वपुरं प्रत्यपद्यत ॥ ९ ॥ अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः ॥ द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदम् ॥ १० ॥ सर्वात्मन्यच्युतेऽसर्वे तीव्रौघां भक्तिमुद्वहन् ॥ ददर्शात्मनि भूतेषु तमेवावस्थितं विभुम् ॥ ११ ॥ तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलम् ॥ गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥ १२ ॥ षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमंडलम् ॥ भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम् ॥ १३ ॥ एवं बहुसवं कालं महात्माऽविचलेंद्रियः ॥ त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनम् ॥ १४ ॥ मन्यमान इदं विश्वं मायारचितमात्मनि ॥ अविद्यारचितस्वप्नगंधर्वनगरोपमम् ॥ १५ ॥ आत्मस्त्र्यपत्यसुहृदो बलमृद्धकोशमंतःपुरं परिविहारभुवश्च रम्याः ॥ भूमंडलं जलधिमेखलमाकलय्य कालोपसृष्टमिति स प्रययौ विशालाम् ॥ १६ ॥ तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वाऽऽसनं जितमरुन्मनसा हृताक्षः ॥ स्थूले दधार भगवत्प्रतिरूप एतद्ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ॥ १७ ॥ भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः ॥ विक्लिद्यमानहृदयः पुलकाचितांगो नात्मानमस्मरदसाविति मुक्तलिंगः ॥ १८ ॥ स ददर्श विमानाग्र्यं नभसोऽवतरद्ध्रुवः ॥ विभ्राजयद्दशदिशो राकापतिमिवोदितम् ॥ १९ ॥ तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणांबुजेक्षणौ ॥ स्थिताववष्टभ्य गदां सुवाससौ किरीटहारांगदचारुकुंडलौ ॥ २० ॥ ॥ ॥

धर्मार्थकाममोक्षसाधकं बहुकालं नीत्वा । इदं विश्वमात्मनि मायारचितं मन्यमानः सन् पुत्राय राज्यं दत्तवान् ॥ १४ ॥ १५ ॥ स्वयं च देहपुत्रस्त्रीसुहृदादीन् कोशराज्यादींश्च सर्वान् नाशवतो विचिंत्य बदरिकाश्रमं ययौ ॥ १६ ॥ तत्र स्नात्वा आसने उपविश्य जितचित्तः सन् भगवतो विराड्रूपे मनो दधार । ततः समाधौ ध्यातृध्यानध्येयभेदशून्यः सन् तद्विराड्रूपमपि व्यसृजत् ॥१७॥ एवं निरंतरं हरौ भक्तिं कुर्वन् तन्मयः सन् आत्मानं ध्रुवोऽहमित्यपि न सस्मार ॥१८॥ ततो ध्रुव आकाशादधोऽवतरद्विमानं ददर्श ॥१९॥ तस्मिन्विमाने स्थितौ चतुर्भुजौ श्यामौ किरीटहारांगदचारुकुंडलौ सुनंदनंदौ दृष्ट्वा ॥२०॥

उत्तमश्लोकस्य हरेरेतौ पार्षदाविति मत्वा शीघ्रमुत्थाय ननाम ॥२१॥ तदा सुनंदनंदौ तं कृष्णचरणाभिनिविष्टचित्तं बद्धांजलिं जगदतुः ॥२२॥ सुनंदनंदावूचतुः ॥ हे राजन्, तव कल्याणमस्तु । यस्त्वं पंचवर्षो देवं तपसा तोषितवान् ॥२३॥ तस्य हरेः पार्षदावावां त्वां भगवत्पदं नेतुमिह प्राप्तौ स्वः ॥२४॥ हे तात, त्वया दुर्जयं विष्णुपदं जितम् । यत्स्थानं सप्तर्षयोऽपि केवलमधः स्थिताः पश्यंति ॥२५॥ हे ध्रुव, ते पूर्वजैरन्यैरपि यन्नाधिष्ठितं तज्जगद्वंद्यं विष्णोः पदं त्वं प्राप्नुहि ॥२६॥ हे आयुष्मन्, भगवता प्रेषितमेतद्विमानमधिरोढुं त्वमर्हसि ॥२७॥ मैत्रेय उवाच ॥ ध्रुव एवं विष्णुपार्षदयोर्वचः श्रुत्वा स्नानं कृत्वा नित्यमंगलकृत्यं संपाद्य बदरिकाश्रमस्थानृषीन् प्रणम्य ॥२८॥ विमानं तौ पार्षदौ च नमस्कृत्य प्रकाशबहुलं स्वरूपं धारयन् तदारोढुमैच्छत् ॥२९॥ तदा मृत्युरागत्य

विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मृतक्रमः॥ ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहतांजलिः ॥२१॥ तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरम् ॥ सुनंदनंदावुपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ ॥ २२॥ सुनंदनंदावूचतुः॥ भो भो राजन्सुभद्रं ते वाचं नोऽवहितः शृणु ॥ यः पंचवर्षस्तपसा भवान्देवमतीतृपत् ॥२३॥ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदम् ॥२४॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परम्॥ आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षताराः परियंति दक्षिणम् ॥ २५ ॥अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित् ॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदम् ॥२६॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना ॥ उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ॥२७॥ मैत्रेय उवाच ॥ निशम्य वैकुंठनियोज्यमुख्ययोर्मधुच्युतं वाचमुरुक्रमप्रियः॥ कृताभिषेकः कृतनित्यमंगलो मुनीन्प्रणम्याशिषमभ्यवादयत् ॥ २८॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवंद्य च ॥ इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम् ॥ २९॥ तदोत्तानपदः पुत्रो ददर्शांतकमागतम् ॥ मृत्योर्मूर्ध्नि पदं दत्वा आरुरोहाद्भुतं गृहम् ॥ ३० ॥ तदा दुंदुभयो नेदुर्मृदंगपणवादयः ॥ गंधर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥ ३१ ॥ स च स्वर्लोकमारोक्ष्यन्सुनीतिं जननीं ध्रुवः ॥ अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपम् ॥ ३२ ॥ इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ ॥ दर्शयामासतुर्देवीं पुरो यानेन गच्छतीम् ॥ ३३ ॥ तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः ॥ अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ॥३४॥ त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि ॥ परस्ताद्यद्ध्रुवगतिर्विष्णोः पदमथाभ्यगात् ॥३५॥ यद्भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनुविभ्राजंत एते ॥ यन्नाव्रजन् जंतुषु येऽननुग्रहा व्रजंति भद्राणि चरंति येऽनिशम् ॥३६॥

जगाद । हे महाराज, मामंगीकुरु । तदा ध्रुव उवाच । हे मृत्यो, तव स्वागतम् । क्षणं तिष्ठ । एवमुक्त्वा ध्रुवो विष्णोः स्मरणं कृत्वा मृत्योर्मूर्ध्नि पदं दत्वा विमानमारुरोह ॥३०॥ तदा स्वर्गे देवैर्वादिता दुंदुभिमृदंगादयो नेदुः । गंधर्वा जगुः । पुष्पवृष्टयः पेतुः ॥३१॥ स ध्रुवः स्वर्गलोकं गच्छन् सन् दीनां मातरं हित्वाहं कथं स्वर्गं यास्यामीति जननीं सस्मार ॥ ३२॥ तदा विष्णुपार्षदौ ध्रुवाभिप्रायं ज्ञात्वा अग्रे विमानेन गच्छतीं सुनीतिं दर्शयामासतुः ॥ ३३ ॥ स्वर्गमार्गे स्तुवद्भिर्देवैः पुष्पैर्विकीर्यमाणो ध्रुवः ॥३४॥ ग्रहान् सप्तर्षींश्च समतिक्रम्य विष्णोः पदं जगाम ॥३५॥ यत् स्थानं स्वकांत्यैव प्रकाशमानं यस्य कांत्या त्रयो लोकाः

प्रकाशंते । ये प्राणिषु निर्दयास्ते यत् स्थानं न गच्छंति ॥३६॥ ये शांताः समदृष्टयस्ते यत् स्थानं गच्छंति ॥ ३७ ॥ एवं ध्रुवस्त्रयाणां लोकानां चूडामणिरिव जातः ॥३८॥ हे विदुर, यस्मिन् ध्रुवपदे निहितं ज्योतिषां चक्रं निरंतरं परितो भ्रमति ॥३९॥ नारदो ध्रुवप्रभावं विलोक्य प्रचेतसां सत्रे त्रीन् श्लोकान् जगौ ॥४०॥ नारद उवाच ॥ नूनं सुनीतेः पुत्रस्य ध्रुवस्य पराक्रममधिगंतुं योगिनोऽपि नैव समर्था भवंति । किं पुनर्नृपाः ॥४१॥ यः पंचवर्षः सुरुच्या वाग्बाणैर्भिन्नेन हृदयेन वनं गतः सन् अजितं हरिं जितवान् ॥४२॥ ध्रुवस्याधिरूढं पदं तत्पश्चाद्भुवि जातः कोऽपि क्षत्रियो बहुवर्षैरपि आरोढुमिच्छेदपि किम् । नैवेच्छेत् ॥४३॥ मैत्रेय उवाच ॥ हे विदुर, त्वया यत्पृष्टं तद्ध्रुवस्य चरितं मया कथितम् ॥४४॥ इदं धनवृद्धिकरं यशोवृद्धिकरमायुर्वृद्धिकरं स्वर्गप्राप्तिकरं पा-

शांताः समदृशः शुद्धाः सर्वभूतानुरंजनाः ॥ यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ॥३७॥ इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः ॥ अभूत्त्रयाणां लोकानां चूडामणिरिवामलः ॥३८॥ गंभीरवेगोऽनिमिषं ज्योतिषां चक्रमाहितम् ॥ यस्मिन्भ्रमति कौरव्य मेढ्यामिव गवां गणः॥३९॥ महिमानं विलोक्यास्य नारदो भगवानृषिः॥ आतोद्यं वितुदन् श्लोकान्सत्रेऽगायत्प्रचेतसाम् ॥४०॥ नारद उवाच ॥ नूनं सुनीतेः पतिदेवतायास्तपःप्रभावस्य सुतस्य तां गतिम् ॥ दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगंतुं प्रभवंति किं नृपाः ॥४१॥ यः पंचवर्षो गुरुदारवाक्शरैर्भिन्नेन यातो हृदयेन दूयता ॥ वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितम् ॥४२॥ यः क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः ॥ षट्पंचवर्षो यदहोभिरल्पैः प्रसाद्य वैकुंठमवाप तत्पदम्॥ ४३ ॥ मैत्रेय उवाच ॥ एतत्तेऽभिहितं सर्वं यत्पृष्टोऽहमिह त्वया ॥ ध्रुवस्योद्दामयशसश्चरितं संमतं सताम् ॥४४॥ धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् ॥ स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम् ॥४५॥ श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितम् ॥ भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ॥४६॥ महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः ॥ यत्र तेजस्तदिच्छूनां मनो यत्र मनस्विनाम् ॥४७॥ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनाम् ॥ सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् ॥४८॥ पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा ॥ दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥४९॥ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः॥ नेच्छंस्तत्रात्मनाऽऽत्मानं संतुष्ट इति सिध्यति ॥५०॥ ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतम् ॥ कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥५१॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः ॥ हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥ ५२ ॥

पनाशकं चास्ति ॥ ४५ ॥ एतदाख्यानं श्रुत्वा यया क्लेशसंक्षयो जायते तादृशी भगवति भक्तिर्भवति ॥ ४६ ॥ एतच्चरित्रं महत्त्वमिच्छतां पुंसां महत्त्वप्राप्तिकारणम् । अस्य श्रोतुः सुस्वभावादयो गुणा उत्पद्यंते ॥४७॥ एतच्चरित्रं प्रातःकाले सायंकाले च ब्राह्मणसमुदाये कीर्तयेत् ॥ ४८ ॥ पौर्णमास्याममावास्यायां द्वादश्यां श्रवणे दिनक्षये व्यतीपाते संक्रांतौ रविवासरेऽपि वा यः कीर्तयेत् ॥४९॥ यश्च श्रावयेत्स सिद्धिं प्राप्नोति ॥५०॥ किंच । यः पुमान् ज्ञानरहिताय पुरुषाय भगवन्मार्गेऽमृतरूपं ज्ञानं दद्यात् तस्य कृपालोः पुरुषस्य देवा अपि अनुग्रहं कुर्वंति ॥५१॥ हे विदुर, इदं ध्रुवाख्यानं मया ते कथितम् । यो ध्रुवो

बालक्रीडनकानि मातुर्गृहं च त्यक्त्वा विष्णुं शरणं जगाम ॥५२॥ इति श्रीमद्भागवत चू० चतु० द्वादशोऽध्यायः ॥ १२ ॥ ॥ एवं पंचभिरध्यायैर्ध्रुवचर्यानुवर्णिता । अथैकादशभिश्चित्रं पृथुचारित्रमुच्यते ॥१॥ तत्र त्रयोदशे वक्तुं पृथोर्जन्म ध्रुवान्वये । अंगो वेनपिता पुत्रक्रौर्याद्गत इतीर्यते ॥२॥ सूत उवाच ॥ हे शौनक, मैत्रेयाद्ध्रुवचरितं श्रुत्वा भगवद्भक्तियुक्तो विदुरः पुनस्तं पप्रच्छ ॥ १ ॥ विदुर उवाच ॥ हे मैत्रेय, ते प्रचेतसः के । कस्य वंशे जाताः।कुत्र वा सत्रमासते स्म ॥२॥ नारदं महाभागवतं मन्ये । येन हरेः पूजाविधिः प्रोक्तः ॥३॥ स्वधर्मशीलैः प्रचेतोभिः पूज्यमानो भगवान् नारदेन वर्णितः ॥४॥ तत्र प्रचेतसां सत्रे नारदेन या भगवत्कथा वर्णितास्ताः सर्वा मह्यं कथय ॥५॥ मैत्रेय उवाच ॥ ध्रुवस्येलायां भार्यायां जात उत्कलः पुत्रः पितरि वनं गते सति राज्यं

॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे ध्रुवचरितं नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ सूत उवाच ॥ निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणम् ॥ प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥१॥ विदुर उवाच ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत ॥ कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासते ॥२॥ मन्ये महाभागवतं नारदं देवदर्शनम् ॥ येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥३॥ स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः ॥ इज्यमानो भक्तिमता नारदेनेरितः किल ॥४॥ यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः ॥ मह्यं शुश्रूषवे ब्रह्मन्कार्त्स्न्येनाचष्टुमर्हसि ॥५॥ मैत्रेय उवाच ॥ ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनम् ॥ सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ॥६॥ स जन्मनोपशांतात्मा निःसंगः समदर्शनः ॥ ददर्श लोके विततमात्मानं लोकमात्मनि ॥७॥ आत्मानं ब्रह्मनिर्वाणं प्रत्यस्तमितविग्रहम् ॥ अवबोधरसैकात्म्यमानंदमनुसंततम् ॥८॥ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः ॥ स्वरूपमवरुंधानो नात्मनोऽन्यं तदैक्षत ॥ ९ ॥ जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः ॥ लक्षितः पथि बालानां प्रशांतार्चिरिवानलः ॥१०॥ मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः ॥ वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम् ॥११॥ स्वर्वीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् ॥ पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयम् ॥१२॥ पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः ॥ प्रातर्मध्यंदिनं सायमिति ह्यासन्प्रभासुताः ॥१३॥ प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः ॥ व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥१४॥ स चक्षुःसुतमाकूत्यां पत्न्यां मनुमवाप ह ॥ मनोरसूत महिषी विरजान्नड्वला सुतान् ॥ १५॥

नैच्छत् । ब्रह्मनिष्ठत्वात् ॥६॥ स जन्मतः शांतो निःसंगः समदर्शनो बभूव ॥७॥ अविच्छिन्नयोगाग्निना दग्धकर्मवासनः स स्वरूपभूतं शांतं ब्रह्म जानन्नात्मनोऽन्यं किमपि नैक्षत ॥८॥९॥ किं च। स सर्वज्ञोऽपि अज्ञजनैर्जडांधबधिरोन्मत्तमूकवल्लक्षितः सन् पृथिवीं चचार ॥१०॥तदा वृद्धा मंत्रिणस्तं राज्येऽयोग्यं मत्वा ध्रुवस्य भ्रमिनाम्न्या भार्यायाः कनिष्ठं वत्सरं नाम पुत्रं भूपतिं चक्रुः ॥ ११ ॥ वत्सरः स्वर्वीथ्यां भार्यायां पुष्पार्णं तिग्मकेतुं इषं ऊर्जं वसुं गयं इति षट् पुत्रानजनयत् ॥१२॥ पुष्पार्णस्य प्रभा दोषा च द्वे भार्ये । तत्र प्रभायाः प्रातः मध्यंदिनं सायं इति त्रयः पुत्राः ॥ १३ ॥ दोषायास्तु प्रदोषः निशीथः व्युष्टश्चेति त्रयः पुत्राः । व्युष्टात्पुष्करिण्यां सर्वतेजाः पुत्रो जातः ॥१४॥ स सर्वतेजा आकूत्यां पत्न्यां चक्षुःसंज्ञकं मनुं पुत्रमजनयत्। मनोर्नड्वलायां एकादश पुत्रा जाताः ॥१५॥

ते च– पुरुः कुत्सः त्रितः द्युम्नः सत्यवान् ऋतः व्रतः अग्निष्टोमः अतीरात्रः प्रद्युम्नः शिबिः उल्मुकः इति ॥१६॥ उल्मुकात्पुष्करिण्यां षट् पुत्रा जाताः । अंगः सुमनाः ख्यातिः क्रतुः अंगिराः गयः इति ॥१७॥ तत्रांगस्य पत्नी मृत्युकन्या सुनीथानाम । सा वेनं पुत्रं सुषुवे। तस्य दुष्टस्वभावेन निर्विण्णोंऽगो राजा नगरात्पलायितः ॥१८॥ यं च वेनं वाग्वज्रा मुनयः शेपुः। शापमात्रेण गतप्राणस्य तस्य दक्षिणं करं मुनयो ममंथुः॥१९॥ तदा अराजके लोके चौरैः पीडिताः प्रजाः संरक्षितुं नारायणांशः पृथुर्जातः ॥२०॥ विदुर उवाच ॥ साधोरंगस्य दुष्टः पुत्रः कथं बभूव। यस्मात्स राजा वनं गतवान् ॥२१॥ धर्मनिपुणा मुनयश्च केनापराधेन वेनराजाय मृत्युकरं शापं ददुः ॥२२॥ किं च। प्रजापालको राजा पापवानपि प्रजाभिरवज्ञां कर्तुमयोग्योऽस्ति। यतः स शरीरे इंद्रादिलोकपालानां तेजो धारयति ॥२३॥ एतद्वेनचेष्टितं मह्यमाख्याहि । यतस्त्वं सर्वज्ञोऽसि॥२४॥ मैत्रेय उवाच ॥ एकदा सोंऽगो राजाऽश्वमेधं चकार। तदा यज्ञे ऋषिभिराहूता देवा नाजग्मुः ॥२५॥ तदा विस्मिता ऋत्विजोंऽगं जगदुः । हे अंग, त्वया श्रद्धया संपादितानि अगतसारैर्मंत्रैश्च हूयमानानि होमद्रव्याणि देवता न गृह्णंति ॥२६॥२७॥ तस्य कारणं वयं न विद्मः ॥२८॥ मैत्रेय उवाच ॥ अंगो द्विजवचः श्रुत्वा खिन्नः सन् सदस्यान् पप्रच्छ ॥२९॥ हे सदस्याः, अस्मिन् यज्ञे देवाः कुतो नायांति। भागांश्च कुतो न गृह्णंति। मया एतादृशं किं पापं कृतं तद्ब्रूत ॥३०॥ सदसस्पतय ऊचुः । हे राजन्, तवैतज्जन्मभवं किंचिदपि पापं नास्ति। त-

पुरुं कुत्सं त्रितं द्युम्नं सत्यवंतमृतं व्रतम् ॥ अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकम् ॥१६॥ उल्मुकोऽजनयत्पुत्रान्पुष्करिण्यां षड्डुत्तमान् ॥ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयम् ॥१७॥ सुनीथांगस्य या पत्नी सुषुवे वेनमुल्बणम् ॥ यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात् ॥१८॥ यमंग शेपुः कुपिता वाग्वज्रा मुनयः किल ॥ गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करम् ॥१९॥ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः ॥ जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः ॥२०॥ विदुर उवाच ॥ तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः ॥ राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ ॥२१॥ किंवांहो वेन उद्दिश्य ब्रह्मदंडमयूयुजन् ॥ दंडव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥ २२ ॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि ॥ यदसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥ २३ ॥ एतदाख्याहि मे ब्रह्मन्सुनीथात्मजचेष्टितम् ॥ श्रद्दधानाय भक्ताय त्वं परावरवित्तमः ॥ २४ ॥ मैत्रेय उवाच ॥ अंगोऽश्वमेधं राजर्षिराजहार महाक्रतुम् ॥ नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः ॥२५॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः ॥ हवींषि हूयमानानि न ते गृह्णंति देवताः॥२६॥ राजन्हवींष्यदुष्टानि श्रद्धयाऽऽसादितानि ते॥ छंदांस्ययातयामानि योजितानि धृतव्रतैः ॥ २७ ॥ न विदामेह देवानां हेलनं वयमण्वपि ॥ यन्न गृह्णंति भागान्स्वान्ये देवाः कर्मसाक्षिणः ॥ २८ ॥ मैत्रेय उवाच ॥ अंगो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः ॥ तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥ २९ ॥ नागच्छंत्याहुता देवा न गृह्णंति ग्रहानिह ॥ सदसस्पतयो ब्रूत किमवद्यं मया कृतम् ॥ ३० ॥ सदसस्पतय ऊचुः ॥ नरदेवेह भवतो नाघं तावन्मनाक् स्थितम् ॥ अस्त्येकं प्राक्तनमघं यदिहेदृक् त्वमप्रजः ॥ ३१ ॥ ॥ ॥ ॥

थापि पूर्वजन्मकृतं किंचित्पापमस्ति । येन त्वमपुत्रोऽसि ॥ ३१ ॥ अतो यथा पुत्रः स्यात्तथा प्रयत्नं कुरु । भगवान् विष्णुः पुत्रकामेष्ट्याऽऽराधितश्चेत्तव पुत्रं दास्यति ॥३२॥ तदा देवा आगच्छंति भागांश्च ग्रहीष्यंति ॥३३॥ जनो यान् यान् कामानिच्छति तान्तान् हरिर्ददाति ॥३४॥ इति सभ्यभाषणं श्रुत्वा राज्ञा आज्ञप्ता विप्रा राज्ञः पुत्रोत्पत्तये विष्णवे पुरोडाशं निरवपन् ॥३५॥ तदाग्नेः सकाशात्स्वर्णपात्रे पायसमादायैकः पुरुष उत्तस्थौ ॥३६॥ राजा विप्राज्ञया तत्पायसं गृहीत्वा तस्यावघ्राणं च कृत्वा पत्न्यै ददौ॥३७॥ सा तत्प्राश्य गर्भं दधार । ततः प्रसूतिकाले प्राप्ते सति पुत्रं सुषुवे ॥३८॥ स बाल एव मातामहं मृत्युमनुसृतः । तेनाधार्मिको जातः ॥३९॥ तस्य व्याधवन्मृगमारणादि भयंकरं कर्म दृष्ट्वा जनोऽयं वेन आगच्छतीति चुक्रोश ॥४०॥ स वेनः क्रीडाकाले वयस्यान्

तथा साधय भद्रं ते आत्मानं सुप्रजं नृप ॥ इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥३२॥ तथा स्वभागधेयानि ग्रहीष्यंति दिवौकसः ॥ यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥३३॥ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयते जनः ॥ आराधितो यथैवेष तथा पुंसां फलोदयः ॥३४॥ इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये ॥ पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ॥३५॥ तस्मात्पुरुष उत्तस्थौ हेममाल्यमलांबरः ॥ हिरण्मयेन पात्रेण सिद्धमादाय पायसम् ॥३६॥ स विप्रानुमतो राजा गृहीत्वांजलिनौदनम् ॥ अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः ॥३७॥ सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युरादधे ॥ गर्भं काल उपावृत्ते कुमारं सुषवेऽप्रजा ॥३८॥ स बाल एव पुरुषो मातामहमनुव्रतः ॥ अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥३९॥ स शरासनमुद्यम्य मृगयुर्वनगोचरः ॥ हंत्यसाधुर्मृगान्दीनान्वेनोऽसावित्यरौज्जनः ॥४०॥ आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः ॥ प्रसह्य निरनुक्रोशः पशुमारममारयत् ॥ ४१ ॥ तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः ॥ यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः ॥ ४२ ॥ प्रायेणाभ्यर्चितो देवो येऽप्रजा गृहमेधिनः ॥ कदपत्यभृतं दुःखं ये न विंदंति दुर्भरम् ॥ ४३ ॥ यतः पापीयसी कीर्तिरधर्मश्च महान्नृणाम् ॥ यतो विरोधः सर्वेषां यत आधिरनंतकः ॥ ४४ ॥ कस्तं प्रजापदेशं वै मोहबंधनमात्मनः ॥ पंडितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ॥४५॥ कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् ॥ निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ॥४६॥ एवं स निर्विण्णमना नृपो गृहान्निशीथ उत्थाय महोदयोदयात् ॥ अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्ताम् ॥ ४७ ॥ विज्ञाय निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः ॥ विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः ॥ ४८ ॥ ॥

बलान् पशूनिव मारयामास॥४१॥ राजा तं दुष्टं पुत्रं वीक्ष्य तस्य शिक्षां कर्तुमसमर्थः सन् जगाद ॥४२॥ अहो ये जनाः कुपुत्रादुत्पन्नं दुःखं न जानंति तैर्हरिः पूजितः ॥४३॥ येन दुष्टपुत्रेण दुष्कीर्तिरधर्मः सर्वेषां विरोधो मनोदुःखं च भवति ॥४४॥ तं पुत्रनाममात्रमात्मनो मोहेन बंधनं कः पंडितः समीचीनं मन्येत न कोऽपि ॥४५॥ अहो इदानीं सत्पुत्राद्दुष्टं पुत्रं श्रेष्ठं मन्ये । यतो दुष्टपुत्रान्मनुष्यो गृहविषये वैराग्यं प्राप्नोति ॥४६॥ एवं नृपः खिन्नः सन् मध्यरात्र उत्थाय सुप्तां स्वभार्यां त्यक्त्वा गृहाद्गुप्तरूपेण पलायितः ॥ ४७ ॥ प्रातः पुरोहितामात्यसुहृद्गणादयस्तमन्वेषयामासुः ॥४८॥ ॥ ॥

ततस्तमलब्ध्वा पुरीं गत्वा रुदंतः संतस्तत्रागतेभ्यो ऋषिभ्यो राज्ञोऽप्राप्तिं न्यवेदयन् ॥४९॥ इति श्रीमद्भागवतचू० चतु० त्रयोदशोऽध्यायः ॥१३॥ ॥ चतुर्दशे तु दुष्पुत्रभयादंगे गते द्विजैः । अभिषिक्तस्य वेनस्य रोषात्तैर्वध उच्यते ॥१॥ मैत्रेय उवाच ॥ ततः प्रजानां क्षेमचिंतका भृग्वादयो ऋषयो नृणां रक्षणकर्तुरभावं दृष्ट्वा प्रजानाशं पश्यंतः संतः ॥ १ ॥ सुनीथायाः संमत्या प्रधानादीनामसंमतमपि वेनं राज्येऽभ्यषिंचन् ॥ २ ॥ तदा सर्वे चौरा राज्यासनगतं वेनं श्रुत्वा गुप्ता बभूवुः ॥३॥ ततः स राजलक्ष्म्या मत्तः सन् आत्मानमेव श्रेष्ठं मत्वा साधूनामपमानं चक्रे ॥ ४॥ स एकदा रथमारुह्य द्यावापृथिव्यौ कंपयन्निव पृथिव्यां भ्रमन् ॥५॥ दुंदुभिघोषेण हे द्विजाः, केनापि न यष्टव्यं न होतव्यं न दातव्यमिति धर्मं न्यवारयत् ॥६॥ तदा मुनयो मंत्रिणश्च वेनस्य दुर्वृत्तं वीक्ष्य

अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीम् ॥ ऋषीन्समेतानभिवंद्य साश्रवो न्यवेदयन्पौरव भर्तृविप्लवम् ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे त्रयोदशोऽध्यायः॥१३॥ ॥ मैत्रेय उवाच ॥ भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः॥ गोप्तर्यसति वै नृणां पश्यंतः पशुसाम्यताम् ॥१॥ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः ॥ प्रकृत्यसंमतं वेनमभ्यषिंचन्पतिं भुवः ॥२॥ श्रुत्वा नृपासनगतं वेनमत्युग्रशासनम् ॥ निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ॥३॥ स आरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः ॥ अवमेने महाभागांस्तब्धः संभावितः स्वतः ॥४॥ एवं मदांध उत्सिक्तो निरंकुश इव द्विपः ॥ पर्यटन्रथमास्थाय कंपयन्निव रोदसी ॥५॥ न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित् ॥ इति न्यवारयद्धर्मं भेरीघोषेण सर्वशः॥ ६ ॥ वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितम् ॥ विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ॥७॥ अहो उभयतः प्राप्तं लोकस्य व्यसनं महत् ॥ दारुण्युभयतो दीप्त इव तस्करपालयोः ॥८॥ अराजकभयादेष कृतो राजाऽतदर्हणः ॥ ततोऽप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनाम् ॥९॥ अहेरिव पयःपोषः पोषकस्याप्यनर्थभृत् ॥ वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः ॥१०॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः ॥ तथापि सांत्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥११॥ तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः॥ सांत्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत् ॥१२॥ लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा ॥ एवमध्यवसायैनं मुनयो गूढमन्यवः ॥ उपव्रज्याब्रुवन्वेनं सांत्वयित्वा च सामभिः ॥१३॥ मुनय ऊचुः ॥ नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भोः॥ आयुःश्रीबलकीर्तीनां तव तात विवर्धनम् ॥ १४ ॥ धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः ॥ लोकान्विशोकान्वितरत्यथानंत्यमसंगिनाम् ॥ १५ ॥ ॥

परस्परं जगदुः ॥७॥ अहो राजतस्करयोरुभयोरपि लोकस्य महद्दुःखं प्राप्तम् ॥८॥ अस्माभिरराजकभयादेष राजा कृतः । तस्मादेवाद्य भयं प्राप्तम् ॥९॥ यथा सर्पस्य क्षीरेण पोषणं पोषकस्याप्यनर्थकरं भवति । एवं स्वभावेनैव खलो वेनः ॥१०॥ एष पालको भूत्वा प्रजाः हंति । तथापि सांत्वनयुक्तिभिरेनं प्रार्थयिष्यामः । तेन तस्य पातकमस्मान्न स्पृशेत् ॥११॥ यदि सांत्वितोऽपि न श्रोष्यति ॥१२॥ तर्हि स्वतेजसा तं दहिष्याम इति निश्चित्य मुनयो वेनं गत्वोचुः ॥१३॥ मुनय ऊचुः॥ हे नृप, तवायुष्यसंपत्तिबलकीर्तीनां वृद्धिकरं यद्वयं विज्ञापयामहे तन्निबोध ॥१४॥ वाङ्मनोदेहबुद्धिभिराचरितो धर्मः पुंसां शोकरहितान्

स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः ॥ यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति ॥१६॥ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः ॥ रक्षन्यथा बलिं गृह्णन्निह प्रेत्य च मोदते ॥१७॥ यस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः ॥ इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमान्वितैः ॥१८॥ तस्य राज्ञो महाभाग भगवान्भूतभावनः ॥ परितुष्यति विश्वात्मा तिष्ठतो निजशासने॥१९॥तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे ॥ लोकाः सपाला ह्येतस्मै हरंति बलिमादृताः ॥२०॥ तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयम् ॥ यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्स्वदेशाननुरोद्धुमर्हसि॥२१॥ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः ॥ स्विष्टाः सुतुष्टाः प्रदिशंति वांछितं तद्धेलनं नार्हसि वीर चेष्टितुम् ॥२२॥ वेन उवाच ॥ बालिशा बत यूयं वा अधर्मे धर्ममानिनः ॥ ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥२३॥ अवजानंत्यमी मूढा नृपरूपिणमीश्वरम् ॥ नानुविंदंति ते भद्रमिह लोके परत्र च ॥२४॥ को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी ॥ भर्तृस्नेहविदूराणां यथा जारे कुयोषिताम् ॥२५॥ विष्णुर्विरिंचो गिरिश इंद्रो वायुर्यमो रविः ॥ पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः ॥२६॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः ॥ देहे भवंति नृपतेः सर्वदेवमयो नृपः ॥२७॥ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः ॥ बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक् पुमान् ॥ २८ ॥ मैत्रेय उवाच ॥ इत्थं विपर्ययमतिः पापीयानुत्पथं गतः ॥ अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमंगलः ॥२९॥ इति तेऽसत्कृतास्तेन द्विजाः पंडितमानिना ॥ भग्नायां भव्ययाच्ञायां तस्मै विदुर चुक्रुधुः ॥३०॥ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः ॥ जीवन् जगदसावाशु कुरुते भस्मसाद्ध्रुवम् ॥ ३१ ॥ नायमर्हत्यसद्वृत्तो नरदेववरासनम् ॥ योऽधियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः ॥ ३२ ॥ ॥

स्वर्गादिलोकान् ददाति निष्कामानां मोक्षं च ददाति ॥१५॥ हे वीर, स ते धर्मः कदाचिदपि मा विनश्यतु। धर्मे नष्टे सति राजैश्वर्याद्भ्रश्यति ॥१६॥ राजा चौरादिभ्यः प्रजा रक्षन्निह प्रेत्य च सुखं प्राप्नोति ॥१७॥ यस्य राज्ये जनैः स्वस्वधर्मेण भगवानिज्यते ॥१८॥ तस्य राज्ञो विश्वात्मा भगवान् तुष्यति ॥१९॥ तस्मिन् जगदीश्वरे तुष्टे सति अप्राप्यं किमस्ति न किमपि ॥२०॥ हे राजन्, अतस्तव समृद्धये सर्वनियंतारं भगवंतमनेकैर्यज्ञैर्यजतः स्वदेशस्थान् जनाननुसृत्य त्वं राज्यं कर्तुमर्हसि ॥२१॥ हे वीर, यज्ञेन तुष्टा देवा लोकानां वांछितं दिशंति ॥ अतस्तेषां देवानामवज्ञां कर्तुं नार्हसि ॥२२॥ वेन उवाच ॥ हे मुनयः, यूयं मूर्खा बत । अधर्मे धर्ममानिनः । येऽन्नादिप्रदं पतिं हित्वा जारं पतिं सेवंते ॥२३॥ ये भूपरूपिणमीश्वरं अवजानंति त इह परत्र च कल्याणं न प्राप्नुवंति ॥२४॥ हे मुनयः, यज्ञपुरुषो नाम कः? यत्र व ईदृशी भक्तिः ॥२५॥ अहो विष्णुर्ब्रह्मा शिव इंद्रो वायुर्यमादयश्च सर्वे देवा राज्ञो देहे वसंति ॥२६॥२७॥ तस्मात् हे विप्राः, मत्सररहिता यूयं कर्मभिर्मां यजध्वं बलिं च मह्यमर्पयत । मदन्य आराध्यः कोऽस्ति ॥ २८ ॥ मैत्रेय उवाच ॥ इत्थं विपरीतबुद्धिः स पापीयान् वेनः ऋषिवचो न मेने ॥२९॥ हे विदुर, एवं तेनापमानितास्ते मुनयस्तस्मै चुक्रुधुः ॥३०॥ अहो स्वभावेन क्रूर एष वेनो हन्यतां हन्यताम् । असौ जीवन् सन् जगद्भस्मसात्करिष्यति ॥ ३१ ॥ अयं राजासनं नार्हति । यतो यज्ञपतिं विष्णुं निंदति ॥ ३२ ॥ ॥ ॥ ॥

एनमेकं वेनं विनाऽन्यः कः पुमान् विष्णुं निंदेत् ॥३३॥ एवं निश्चित्य क्रोधयुक्ता मुनयो हुंकारैर्वेनं जघ्नुः ॥ ३४ ॥ ततः स्वाश्रमं जग्मुः ततः सुनीथा पुत्रदेहं मंत्रविद्यया तैलौषध्यादियोगेन च ररक्ष ॥३५॥ ततो बहुकालेनैकदा ऋषयः सरस्वतीतीरे स्थिताः संतः सत्कथाश्चक्रुः ॥३६॥ तदा लोकभयंकारान्महोत्पातान्वीक्ष्य राजहीनायाः प्रजायाश्चौरादिभिः पीडा न भवेत्किम् ॥३७॥ एवं विचारयंतः स्थिताः । तदा सर्वतो दिक्षु धावतां चौराणां संबंधि रजः समुत्थितम् ॥३८॥ तदा धनं लुंपतामन्योन्यं जिघांसतां च तेषां चौराणामुपद्रवं ज्ञात्वा ॥३९॥ तथा चौरप्रायं राजहीनं सत्वहीनं च देशं ज्ञात्वा तपःसामर्थ्येन चौरनिवारणे समर्था अपि । तथा दीनोपेक्षकस्य ब्राह्मणस्यापि पुण्यं क्षीयते किमुत क्षत्रियस्येति जानंतोऽपि चौरान्नावारयन् ॥४०॥४१॥ किंतु अयं राज्ञ एव मुख्यो

को वैनं परिचक्षीत वेनमेकमृतेऽशुभम् ॥ प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ॥ ३३ ॥ इत्थं व्यवसिता हंतुमृषयो रूढमन्यवः ॥ निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिंदया ॥ ३४ ॥ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरम् ॥ सुनीथा पालमायास विद्यायोगेन शोचती ॥ ३५ ॥ एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः ॥ हुत्वाग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥ ३६ ॥ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥ ३७ ॥ एवं मृशंत ऋषयो धावतां सर्वतोदिशम् ॥ पांसुः समुत्थितो भूरिश्चोराणामभिलुंपताम् ॥ ३८ ॥ तदुपद्रवमाज्ञाय लोकस्य वसु लुंपताम् ॥ भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसताम् ॥ ३९ ॥ चोरप्रायं जनपदं हीनसत्वमराजकम् ॥ लोकान्नावारयन् शक्ता अपि तद्दोषदर्शिनः ॥ ४० ॥ ब्राह्मणः समदृक् शांतो दीनानां समुपेक्षकः ॥ स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ॥ ४१ ॥ नांगस्य वंशो राजर्षेरेष संस्थातुमर्हति ॥ अमोघवीर्या हि नृपा वंशेऽस्मिन्केशवाश्रयाः ॥ ४२ ॥ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ॥ ममंथुरूरुं तरसा तत्रासीद्बाहुको नरः ॥ ४३ ॥ काककृष्णोऽतिह्रस्वांगो ह्रस्वबाहुर्महाहनुः ॥ ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्धजः ॥४४॥ तं तु तेऽवनतं दीनं किं करोमीति वादिनम् ॥ निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥४५॥ तस्य वंशास्तु नैषादा गिरिकाननगोचराः ॥ येनाहरज्जायमानो वेनकल्मषमुल्बणम् ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पृथुचरिते निषादोत्पत्तिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ मैत्रेय उवाच ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः ॥ बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥ १ ॥ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः ॥ ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम् ॥ २ ॥ ॥

धर्म इति ज्ञात्वा तथांऽगस्य राज्ञो वंशो नाशं प्राप्तुं नार्हतीत्यतो वेनदेहादेव कश्चिद्राजोत्पादनीय इति च निश्चित्य राजभवनं गत्वा मृतवेनदेहस्योरुं ममंथुः ॥४२॥४३॥ तस्मात् काककृष्णो ह्रस्वांगो महाहनुर्लघुबाहुपादो रक्तनेत्रस्ताम्रमूर्धजः पुरुषः प्रादुरभूत् ॥४४॥ तं किं करोमीति वादिनं निषीदेति जगदुः । स निषादो बभूव ॥४५॥ तस्य वंशजाः पर्पतवनाश्रया नैषादा जाताः । यतोऽसौ निषादो वेनस्य पापमहरत् ॥४६॥ इति श्रीमद्भा० चतु० चतुर्दशोऽध्यायः ॥१४॥ ततः पंचदशे विप्रैर्मथनाद्वेनबाहुतः । जातस्य तु पृथोरुक्तमभिषेकार्हणादिकम् ॥१॥ मैत्रेय उवाच ॥ अथ विप्रैः पुनस्तस्य मथ्यमानाभ्यां बाहुभ्यां मिथुनं सं-

जातम् । तद्दृष्ट्वा एतौ स्त्रीपुरुषौ ईश्वरांशाविति ज्ञात्वा ऋषयः संतुष्टाः संत ऊचुः ॥१॥२॥ ऋषय ऊचुः ॥ एष पुमान् साक्षाद्विष्णोरंशः । इयं स्त्री अपि लक्ष्म्या अंशः ॥३॥ अयं राज्ञां प्रथमः पृथुनामको राजा भविष्यति ॥४॥ इयं स्त्री पृथोः पत्नी नाम्ना अर्चिरिति भविष्यति ॥५॥ अयं लोकरक्षकः साक्षाद्धरेरंश एव जातः । इयं च तत्परा लक्ष्मीर्जज्ञे ॥६॥ मैत्रेय उवाच ॥ एवं विप्रास्तं प्रशंसंति स्म । गंधर्वा जगुः । सिद्धाः पुष्पवृष्टिं चक्रुः । अप्सरसो ननृतुः ॥७॥ स्वर्गलोके देवैर्वादिताः शंखमृदंगदुंदुभयो नेदुः । तत्र सर्वे देवर्षिपित्राद्या उपाजग्मुः ॥८॥ तदा ब्रह्मा पृथोर्दक्षिणे हस्ते रेखात्मकं विष्णोश्चक्रं पादयोः कमलचिह्नं च दृष्ट्वा तं हरेरवतारं मेने ॥९॥१०॥ ब्राह्मणैस्तस्याभिषेके आरब्धे सति जनाः सर्वतोऽभिषेकसाधनान्यानीतवंतः ॥११॥ सरित्समुद्रपर्वताः नागा गावः प्रक्षिणः पशवः स्वर्ग-

ऋषय ऊचुः ॥ एष विष्णोर्भगवतः कला भुवनपालनी ॥ इयं च लक्ष्म्याः संभूतिः पुरुषस्यानपायिनी ॥३॥ अत्र तु प्रथमो राज्ञां पुमान्प्रथयिता यशः ॥ पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः ॥४॥ इयं च सुदती देवी गुणभूषणभूषणा ॥ अर्चिर्नाम वरारोहा पृथुमेवावरुंधती ॥५॥ एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ॥ इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥६॥ मैत्रेय उवाच ॥ प्रशंसंति स्म तं विप्रा गंधर्वप्रवरा जगुः ॥ मुमुचुः सुमनोधाराः सिद्धा नृत्यंति स्वःस्त्रियः ॥७॥ शंखतूर्यमृदंगाद्या नेदुर्दुंदुभयो दिवि ॥ तत्र सर्व उपाजग्मुर्देवर्षिपितृणां गणाः ॥८॥ ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः ॥ वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ॥९॥ पादयोररविंदं च तं वै मेने हरेः कलाम् ॥ यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः ॥१०॥ तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः ॥ आभिषेचनिकान्यस्मा आजह्रुः सर्वतो जनाः ॥११॥ सरित्समुद्रा गिरयो नागा गावः खगा मृगाः ॥ द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनम् ॥१२॥ सोऽभिषिक्तो महाराजः सुवासाः साध्वलंकृतः ॥ पत्न्यार्चिषाऽलंकृतया विरेजेऽग्निरिवापरः ॥१३॥ तस्मै जहार धनदो हैमं वीरवरासनम् ॥ वरुणः सलिलस्रावमातपत्रं शशिप्रभम् ॥१४॥ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजम् ॥ इंद्रः किरीटमुत्कृष्टं दंडं संयमनं यमः ॥१५॥ ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमम् ॥ हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियम् ॥१६॥ दशचंद्रमसिं रुद्रः शतचंद्रं तथांबिका ॥ सोमोऽमृतमयानश्वांस्त्वष्टा रूपाश्रयं रथम् ॥ १७ ॥ अग्निराजगवं चापं सूर्यो रश्मिमयानिषून् ॥ भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहम् ॥१८॥ नाट्यं सुगीतं वादित्रमंतर्धानं च खेचराः॥ ऋषयश्चाशिषः सत्याः समुद्रः शंखमात्मजम् ॥१९॥ सिंधवः पर्वता नद्यो रथवीथीर्महात्मनः ॥ सूतोऽथ मागधो बंदी तं स्तोतुमुपतस्थिरे ॥ २० ॥ ॥

पृथिव्यादयश्चोपायनान्यानीतवंतः ॥१२॥ सोऽभिषिक्तः सुवासाः साध्वलंकृतः पृथुः पत्न्या सहाग्निरिव शुशुभे ॥१३॥ तस्मै कुबेरः सौवर्णं सिंहासनं ददौ । वरुणः श्वेतच्छत्रम् ॥१४॥ वायुर्द्वे व्यजने । धर्मः कीर्तिमयीं मालाम् । इंद्रो मुकुटम् । यमो दंडम् ॥१५॥ ब्रह्मा कवचम् । सरस्वती हारम् । हरिश्चक्रम् । लक्ष्मीः संपदम् ॥१६॥ रुद्रः खड्गम् । पार्वती चर्म । सोमोऽश्वान् । त्वष्टा रथम् ॥१७॥ अग्निश्चापम् । सूर्यो बाणान् । भूः पादुके । स्वर्गः पुष्पमालाम् ॥१८॥ विद्याधराद्याः नृत्यं गीतं वाद्यवादनं अंतर्धानकौशलं च दुदुः । ऋषय आशिषः । समुद्रः शंखम् ॥१९॥ सिंधवः पर्वता नद्यश्च रथमार्गान् ददुः । तदा सूतमागधबंदिनस्तं स्तोतुं

प्रवृत्ताः ॥२०॥ तदा प्रतापवान् पृथुः प्रहसन् तानिदमब्रवीत् ॥२१॥ पृथुरुवाच ॥ हे सूतमागधवंदिनः, अधुना अस्पष्टगुणस्य मम केषां गुणानामाश्रयेण स्तुतिः स्यात्? ॥२२॥ स्तुतियोग्यस्तु भगवानुत्तमश्लोक एव। तस्मात्कालांतरे स्पष्टगुणे मयि जाते सति यूयं स्तुतिं करिष्यथ ॥२३॥ महतां गुणानात्मनि संपादयितुं समर्थोऽपि अविद्यमानान् गुणान् संभावनामार्गेण कः स्तावयते॥२४॥किंच। परमोदाराः पुरुषा उचितामप्यात्मस्तुतिं न सहंते॥२५॥ अधुना लोके वयं श्रेष्ठैः कर्मभिरप्रख्याताः स्मः। अतो बालकवत्कथमात्मानं गापयिष्याम ॥२६॥ इति श्रीमद्भागवतचूर्णिकायां चतु० पंचदशोऽध्यायः ॥ १५ ॥ ॥ षोडशे सर्वलोकेशैः सत्कृतं भार्यया युतम्। मुनिप्रयुक्ताः सूताद्याः स्तुवंति स्मेति वर्ण्यते ॥१॥ मैत्रेय उवाच ॥ हे विदुर, इति ब्रुवाणं नृपतिं मुनिप्रेरिताः सूतमागधाद्या गायकास्तुष्टुवुः ॥१॥ हे देववर्य, तव महिमानुवर्णने वयं न समर्थाः। तव यशसि ब्रह्मादीनामपि बुद्धयो बभ्रमुः ॥२॥ तथापि मुनिप्रेरिताः संतो वयं हरेरंशस्य तव कर्माणि वर्णयिष्यामः ॥३॥ एष राजा धर्मपालकानां मध्ये श्रेष्ठो धर्ममर्यादारक्षको दुष्टानां शास्ता च भविष्यति॥४॥ अयं सर्व लोकपालानां तेजः स्वदेहे बिभर्ति॥५॥ करभारग्रहणकाले द्रव्यं गृह्णाति दुर्भिक्षकाले मुंचति। यथा सूर्योऽष्टौ मासान् भूमेर्जलं शोषयति वर्षासु मुंचति च तद्वत्॥६॥ अयं भूतानां निरंतरं करुणः सन् सहनशक्त्या भूमिरिव भविष्यति॥७॥अयमिंद्रेणावर्षणे कृते सति दुःखिताः प्रजाः स्वयं वृष्टिं कृत्वा रक्षिष्यति॥८॥ अयं वदनचंद्रेण लोकं चंद्रवत्सुखयि-

स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् ॥ मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत् ॥२१॥ पृथुरुवाच ॥ भो सूत हे मागध सौम्य बंदिँल्लोकेऽधुनाऽस्पष्टगुणस्य मे स्यात्॥ किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः॥२२॥ तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः॥ सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयंति सभ्याः॥२३॥ महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि ॥ तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ॥२४॥ प्रभवो ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः॥ ह्रीमंतः परमोदाराः पौरुषं वा विगर्हितम् ॥२५॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः ॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥२६॥ इति श्रीमद्भा० महा० चतुर्थस्कंधे पृथुचरिते पंचदशोऽध्यायः ॥१५॥ मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥१॥ नालं वयं ते महिमानुवर्णने यो देववर्योऽवततार मायया ॥ वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ॥२॥ अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृतादृताः ॥ यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि ॥३॥ एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन् ॥ गोप्ता च धर्मसेतूनां शास्ता तत्परिपंथिनाम् ॥४॥ एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः ॥ काले काले यथाभागं लोकयोरुभयोर्हितम् ॥५॥ वसु काल उपादत्ते काले चायं विमुंचति ॥ समः सर्वेषु भूतेषु प्रतपन्सूर्यवद्विभुः॥६॥ तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि ॥ भूतानां करुणः शश्वदार्तानां क्षितिवृत्तिमान् ॥७॥ देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः ॥ कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत् ॥८॥ आप्याययत्यसौ लोकं वदनामृतमूर्तिना ॥ सानुरागावलोकेन विशदस्मितचारुणा ॥ ९ ॥

ष्यति ॥९॥ अयमप्रकटितमार्गः संरक्षितद्रव्यो वरुण इव भविष्यति ॥१०॥ अयं शत्रुभिः सोढुमशक्योऽग्निरिव भविष्यति ॥११॥ सर्वभूतानामंतर्बहिर्व्यापकत्वेन वायुवद्वर्तिष्यते ॥१२॥ अयं राजा स्वशत्रोः सुतमपि दंडस्यायोग्यं चेन्न दंडयिष्यति। स्वपुत्रमपि दंडयोग्यं चेद्दंडयिष्यति ॥१३॥ मानसोत्तरपर्वतपर्यंतमस्याज्ञा गतिश्च प्रतिबंधरहिता भविष्यति ॥१४॥ अयमात्मचरितैर्लोकं रंजयिष्यति ॥१५॥ अयं दृढव्रतः सत्यप्रतिज्ञः वृद्धसेवकः भूतानां शरण्यः ॥१६॥ परस्त्रीषु मातृभक्तिः सतां किंकरः ॥१७॥ देहिनामात्मवत्प्रियः । दुष्टेषु यम इव शास्ता भविष्यति ॥१८॥ अयं साक्षाद्भगवान् कूटस्थ आत्मा कलयावतीर्णोऽस्ति ॥१९॥

अव्यक्तवर्त्मैष निगूढकार्यो गंभीरवेधा उपगुप्तवित्तः ॥ अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा ॥१०॥ दुरासदो दुर्विषह आसन्नोऽपि विदूरवत् ॥ नैवाभिभवितुं शक्यो वेनारण्युत्थितोऽनलः ॥११॥ अंतर्बहिश्च भूतानां पश्यन्कर्माणि चारणैः ॥ उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम् ॥ १२ ॥ नादंड्यं दंडयत्येष सुतमात्मद्विषामपि ॥ दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः ॥१३॥ अस्याप्रतिहतं चक्रं पृथोरामानसाचलात् ॥ वर्तते भगवानर्को यावत्तपति गोगणैः ॥१४॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः ॥ अथामुमाहू राजानं मनोरंजनकैः प्रजाः ॥१५॥ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः ॥ शरण्यः सर्वभूतानां मानदो दीनवत्सलः ॥१६॥ मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इवात्मनः ॥ प्रजासु पितृवत्स्निग्धः किंकरो ब्रह्मवादिनाम् ॥१७॥ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदिवर्धनः ॥ मुक्तसंगप्रसंगोऽयं दंडपाणिरसाधुषु ॥ १८ ॥ अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयावतीर्णः ॥ यस्मिन्नविद्यारचितं निरर्थकं पश्यंति नानात्वमपि प्रतीतम् ॥१९॥ अयं भुवो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः ॥ आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः ॥२०॥ अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यंति सलोकपालाः ॥ मंस्यंत एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उद्धरंत्यः ॥२१॥ अयं महीं गां दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानाम् ॥ यो लीलयाद्रीन्स्वशरासकोट्या भिंदन्समां गामकरोद्यथेंद्रः ॥२२॥ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाऽचरत्क्ष्मामविषह्यमाजौ ॥ तदा निलिल्युर्दिशि दिश्यसंतो लांगूलमुद्यम्य यथा मृगेंद्रः ॥२३॥ एषोऽश्वमेधान् शतमाजहार सरस्वती प्रादुरभावि यत्र ॥ अहारषीद्यस्य हयं पुरंदरः शतक्रतुश्चरमे वर्तमाने ॥२४॥ एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवंतमेकम् ॥ आराध्य भक्त्या लभतामलं तज्ज्ञानं यतो ब्रह्म परं विदंति ॥२५॥ तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः ॥२६॥

गृहीतधनुष्योऽयं रथमारुह्योदयाचलादस्ताचलपर्यंतं पर्यटन् सन् भूमंडलं पालयिष्यति ॥२०॥ इंद्रादिलोकपालसहिता राजानोऽस्मै करभारं दास्यंति ॥२१॥ सार्वभौमोऽयं गोरूपधारिणीं पृथ्वीं दोहिष्यति । स्वधनुष्याग्रेण पर्वतान् भिंदन् पृथ्वीं समां करिष्यति ॥२२॥ यदा धनुष्यं टनत्कारयन् पृथ्वीं चरिष्यति तदा चौरादयो दुष्टा दिशि दिशि गुप्ता भविष्यंति ॥२३॥ एष सरस्वतीनदीतीरेऽश्वमेधानां शतं करिष्यति । अस्य चरमेऽश्वमेधे इंद्रोऽश्वहरणं करिष्यति ॥२४॥ एष स्वगृहे प्राप्तं सनत्कुमारं संतोष्य तस्माद्विमलं ज्ञानं प्राप्स्यति ॥ २५ ॥ एवं प्रख्यातपराक्रमोऽयं तत्र तत्र विष्णुरूपस्यात्मनः कथाः श्रोष्यति ॥ २६ ॥

किंच । दिशो विजित्य स्वतेजसोत्पाटितलोकदुःखो देवदैत्यैरुपगीयमानो भुवः पतिर्भविता ॥२७॥ इति श्रीमद्भागवतचू॰ चतुर्थ॰ षोडशोऽध्यायः ॥१६॥ ततः सप्तदशे लोकक्षुधाः प्रशमयन् पृथुः । ग्रस्तबीजां महीं हंतुं यत्तो भीत्या तया स्तुतः ॥१॥ मैत्रेय उवाच ॥ एवंगुणैः कर्मभिश्च प्रख्यापितः पृथुस्तान् सूतमागधादीन् ब्राह्मणान् सेवकप्रधानपुरोहितांश्च सर्वानिच्छितपारितोषकदानैस्तोषितवान् ॥१॥२॥ विदुर उवाच ॥ पृथिवी गोरूपं कस्माद्दधार । यां पृथुर्दुदोह । तत्र वत्सः कः दुग्धं च किम् ॥३॥ स्वभावत एव पर्वतादिभिर्विषमा भूमिः पृथुना समा कथं कृता । इंद्रस्तस्य हयं कुतो जहार ॥४॥ स सनत्कुमाराज्ज्ञानं लब्ध्वा कां गतिं प्राप्तः ॥५॥ एतदन्यच्च विष्णोरवतारस्य पृथोश्चरितम् ॥६॥ भक्ताय मे वक्तुमर्हसि ॥७॥ सूत उवाच ॥ हे शौनक, एवं भगवत्कथांप्रति विदुरेण

दिशो विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः ॥ सुरासुरेंद्रैरुपगीयमानमहानुभावो भविता पतिर्भुवः ॥२७॥ इति श्रीम॰ महा॰ चतु॰ षोडशोऽध्यायः ॥१६॥ ॥ मैत्रेय उवाच ॥ एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः ॥ छंदयामास तान्कामैः प्रतिपूज्याभिनंद्य च ॥१॥ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः ॥ पौरान् जानपदान् श्रेणीः प्रकृतीः समपूजयत् ॥२॥ विदुर उवाच ॥ कस्माद्दधार गोरूपं धरित्री बहुरूपिणी ॥ यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किम् ॥३॥ प्रकृत्या विषमा देवी कृता तेन समा कथम् ॥ तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ॥४॥ सनत्कुमाराद्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात् ॥ लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ॥५॥ यच्चान्यदपि कृष्णस्य भवान् भगवतः प्रभोः ॥ श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम् ॥६॥ भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च ॥ वक्तुमर्हसि योऽदुह्यद्वैन्यरूपेण गामिमाम् ॥७॥ सूत उवाच ॥ चोदितो विदुरेणैवं वासुदेवकथां प्रति ॥ प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥८॥ मैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरंग विप्रैरामंत्रितो जनतायाश्च पालः ॥ प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥९॥ वयं राजन् जाठरेणाभितप्ता यथाग्निना कोठरस्थेन वृक्षाः ॥ त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥१०॥ तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव ॥ यावन्न नंक्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ॥११॥ मैत्रेय उवाच ॥ पृथुः प्रजानां करुणं निशम्य परिदेवितम् ॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत ॥१२॥ इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः ॥ संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा ॥१३॥ प्रवेपमाना धरणी निशाम्योदायुधं च तम् ॥ गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता ॥१४॥ तामन्वधावत्तद्वैन्यः कुपितोऽत्यरुणेक्षणः ॥ शरं धनुषि संधाय यत्र यत्र पलायते ॥१५॥

प्रेरितो मैत्रेय आह ॥८॥ मैत्रेय उवाच ॥ यदा ब्राह्मणैरभिषिक्तः पृथुस्तदाऽन्नरहिते भूमंडले सति क्षुधया कृशाः प्रजाः पृथुंप्रत्येत्य जगदुः ॥९॥ हे राजन्, वयं जठराग्निना तप्तास्त्वां शरणं प्राप्ताः ॥१०॥ अतो भवान् क्षुधापीडितानां नोऽन्नं दातुं यत्नं करोतु ॥११॥ मैत्रेय उवाच ॥ पृथुः प्रजानां दीनां वाचं निशम्य दीर्घं दध्यौ ॥१२॥ ततस्तासां प्रजानां दुःखनिमित्तं ज्ञात्वा क्रुद्धः सन् भूमिं हंतुं धनुषि बाणं संदधे ॥१३॥ तदा कंपमाना गोरूपधारिणी पृथ्वी हंतुं प्रवृत्तं पृथुं दृष्ट्वा भीता सती पलायनं चकार ॥ १४ ॥ सा यत्र यत्र पलायते तत्र तत्र धनुषि बाणं संधाय आरक्तनेत्रः पृथुस्तामन्वधावत् ॥ १५ ॥ ॥

सा दश दिशः त्रैलोक्यं च भ्रांत्वा तत्र तत्र पृष्ठभागे वैन्यं पृथुं ददर्श ॥१६॥ कुत्रापि पृथोः सकाशात्त्रातारं न लेभे । तदा पृथुं जगाद ॥१७॥ हे धर्मज्ञ, हे शरणागतवत्सल, मां त्राहि । भवान् भूतानां पालने स्थितोऽसि ॥१८॥ स त्वं निष्पापां स्त्रियं मां कथं हनिष्यसि ॥१९॥ किंच । जनाः कृतापराधास्वपि स्त्रीषु प्रहारं न कुर्वंति । भवत्सदृशाः प्रहारं न कुर्वंतीति किमु वक्तव्यम् ॥२०॥ हे वैन्य, दृढां नौकारूपां मां हत्वा प्रजा आत्मानं च जले कथं धारयिष्यसि ॥२१॥ पृथुरुवाच ॥हे वसुधे, मदाज्ञापराङ्मुखीं त्वामहं वधिष्यामि ॥२२॥ त्वं नित्यं गोरूपेण तृणं भक्षयसि। दुग्धं च न ददासि । एवंविधायां दुष्टायां त्वयि दंड एव

सा दिशो विदिशो देवी रोदसी चांतरं तयोः ॥ धावंती तत्र तत्रैनं ददर्शानूद्यतायुधम् ॥ १६ ॥ लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः ॥ त्रस्ता तदा निववृते हृदयेन विदूयता ॥ १७ ॥ उवाच च महाभागं धर्मज्ञापन्नवत्सल ॥ त्राहि मामपि भूतानां पालनेऽवस्थितो भवान् ॥ १८ ॥ स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषाम् ॥ अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥ १९ ॥ प्रहरंति न वै स्त्रीषु कृतागस्स्वपि जंतवः ॥ किमुत त्वद्विधा राजन्करुणा दीनवत्सलाः ॥ २० ॥ मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितम् ॥ आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि ॥ २१ ॥ पृथुरुवाच ॥ वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीम् ॥ भागं बर्हिषि या वृंक्ते न तनोति च नो वसु ॥ २२ ॥ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः ॥ तस्यामेवं हि दुष्टायां दंडो नात्र न शस्यते ॥ २३ ॥ त्वं खल्वोषधिबीजानि प्राक् सृष्टानि स्वयंभुवा ॥ न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः ॥ २४ ॥ अमूषां क्षुत्परीतानामार्तानां परिदेवितम् ॥ शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा ॥ २५ ॥ पुमान्योषिदुत क्लीब आत्मसंभावनोऽधमः ॥ भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः ॥ २६ ॥ त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः ॥ आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥ २७ ॥ एवं मन्युमयीं मूर्तिं कृतांतमिव बिभ्रतम् ॥ प्रणता प्रांजलिः प्राह मही संजातवेपथुः ॥ २८ ॥ धरोवाच ॥ नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ॥ नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥ २९ ॥ येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः ॥ स एव मां हंतुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ॥ ३० ॥ य एतदादावसृजच्चराचरं स्वमाययाऽऽत्माश्रययाऽवितर्क्यया ॥ तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ॥ ३१ ॥ ॥ ॥

योग्योऽस्ति ॥२३॥ ब्रह्मणा पूर्वं सृष्टान्यौषधिबीजानि त्वया ग्रसितानि तानि न मुंचसि ॥२४॥ अतः प्रजानां क्षुधं मद्बाणैर्भिन्नायास्तव मांसेन शमयिष्यामि ॥२५॥ पुरुषः स्त्री नपुंसको वा यो भूतेषु निर्दयस्तस्य वधे कृतेऽपि राज्ञां वधदोषो नास्ति ॥२६॥ अतः कपटेन गोरूपिणीं त्वां तिलशो हत्वाऽहं स्वयोगसामर्थ्येन प्रजा धारयिष्यामि ॥२७॥ एवं क्रोधमयीं मूर्तिं धारयंतं पृथुं कंपमाना मही प्राह ॥२८॥ धरोवाच ॥ परमपुरुषाय मायया शांतघोरादिमूर्तिधारिणे तुभ्यं नमः ॥२९॥ येन सृष्टिकर्त्रा त्वया जीवानां निवासस्थानमहं निर्मिता । स एव चेन्मां हंतुमुपस्थितस्तर्ह्यहमन्यं कं शरणं व्रजामि ॥३०॥ यः प्रथममिदं चराचरं जगत्ससर्ज ।

स एव धर्मपरो भवान् कथं मां जिघांससि ॥३१॥ नूनमीश्वरस्य भवतः कर्तव्यं जनैर्न लक्ष्यते ॥३२॥ यो भवान् जगतः सृष्ट्यादि करोति तस्मै पुरुषाय नमः
॥३३॥ हे अज, त्वं पुरा वराहरूपेण मां पातालादुद्धृतवानसि ॥३४॥ स एव त्वं जले नौकारूपायां मयि स्थिताः प्रजा रक्षितुमद्य पृथुरूपो जातः । स त्वं दुग्धनिमित्तं
मां कथं हंतुमिच्छसि ॥३५॥ ईश्वराणां चरितं केनापि न ज्ञायते । तेभ्यो वीराणां यशोवर्धकेभ्यो नमोऽस्तु ॥३६॥ इति श्रीमद्भागवतचू० चतुर्थ०
सप्तदशोऽध्यायः ॥ १७ ॥ ॥ अष्टादशे महीवाक्याद्वत्सपात्रादिभेदतः । पृथ्वादिभिस्तु सा दुग्धा स्वं स्वं दुग्धमितीर्यते ॥१॥ मैत्रेय उवाच ॥ हे विदुर, एवं
मही पृथुं स्तुत्वा रोषेण स्फुरिताधरोष्ठं तं दृष्ट्वा भीता सती पुनराह ॥१॥ हे राजन्, त्वं क्रोधं शमय । मम विज्ञापनं निबोध । ज्ञानी पुरुषः सर्वतः सारं गृह्णाति

नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जयया कृतात्मभिः ॥ न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ॥३२॥
सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ॥ तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ॥३३॥ स
वै भवानात्मविनिर्मितं जगद्भूतेंद्रियांतःकरणात्मकं विभो ॥ संस्थापयिष्यन्नज मां रसातलादभ्युज्जहारांभस आदिसूकरः ॥३४॥ अपामुपस्थे
मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल ॥ स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि
॥३५॥ नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ॥३६॥
इति श्रीम० महा० चतु० पृथुविजये धरित्रीनिग्रहो नाम सप्तदशोऽध्यायः ॥१७॥ मैत्रेय उवाच ॥ इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम्
॥ पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥१॥ सन्नियच्छाभिभो मन्युं निबोध श्रावितं च मे ॥ सर्वतः सारमादत्ते यथा
मधुकरो बुधः ॥२॥ अस्मिँल्लोकेऽथवाऽमुष्मिन्मुनिभिस्तत्त्वदर्शिभिः ॥ दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये ॥३॥ तानातिष्ठति
यः सम्यगुपायान् पूर्वदर्शितान् ॥ अवरः श्रद्धयोपेत उपेयान्विंदतेंऽजसा ॥४॥ताननादृत्य यो विद्वानर्थानारभते स्वयम् ॥ तस्य
व्यभिचरंत्यर्था आरब्धाश्च पुनः पुनः ॥५॥ पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते ॥ भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः
॥६॥ अपालितानादृता च भवद्भिर्लोकपालकैः ॥ चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥ ७ ॥ नूनं ता वीरुधः क्षीणा मयि
कालेन भूयसा ॥ तत्र योगेन दृष्टेन भवानादातुमर्हति ॥८॥ वत्सं कल्पय मे वीर येनाहं वत्सला तव ॥ धोक्ष्ये क्षीरमयान् कामाननुरूपं
च दोहनम् ॥९॥ दोग्धारं च महाबाहो भूतानां भूतभावन ॥ अन्नमीप्सितमूर्जस्वद्भगवान्वांछते यदि ॥ १० ॥

॥२॥ पूर्वं तत्त्वदर्शिभिर्ऋषिभिः पुरुषाणां कल्याणार्थमुपाया दृष्टाः प्रयुक्ताश्च ॥३॥ तान् योऽर्वाचीन आतिष्ठति स श्रेयः प्राप्नोति ॥४॥ यस्ताननादृत्यकार्याणि
प्रारभते तस्यारंभितानि कार्याणि न सिद्ध्यंति ॥ ५ ॥ पुरा ब्रह्मणौषधयः सृष्टाः । ता दुष्टै राजभिर्भुज्यमाना मया दृष्टाः ॥ ६ ॥ तदा लोके चोरप्राये जाते सति
यज्ञार्थे ता ओषधीरहमग्रसम् ॥ ७ ॥ ता बहुकालेन मयि क्षीणा जाताः । ता भवानुपायेन ग्रहीतुमर्हसि ॥ ८ ॥ हे वीर, यदि भवान्मत्तोऽन्नरूपं दुग्धं
वांछति तर्हि मे दोहनार्थं वत्सं दोहनपात्रं दोग्धारं च त्वं कल्पय ॥ ९ ॥ १० ॥ ॥ ॥ ॥

किंच । हे राजन्, मां समां कुरु । यथा मयि वर्षतौ मेघवृष्ट्युदकं सर्वतः स्थिरं स्यात् ॥११॥ इति भूमेर्वचः श्रुत्वा पृथुः प्रीतः सन् मनुं वत्सं कृत्वा स्वहस्ते स्वयमेवौषधीर्दुदोह ॥१२॥ ततोऽन्ये ऋष्यादयश्च पृथुना वशीकृतां तां पृथ्वीं इच्छानुरूपं दुग्धं दुदुहुः ॥१३॥ तदाह । ऋषयो बृहस्पतिं वत्सं कृत्वेंद्रियरूपे पात्रे पृथिव्या वेदमयं दोहं दुदुहुः ॥१४॥ देवा इंद्रं वत्सं कृत्वा सुवर्णपात्रेऽमृतमुत्साहशक्तिमिंद्रियशक्तिं देहशक्तिं च दुदुहुः ॥१५॥ दैत्याः प्रह्लादं वत्सं कृत्वा लोहपात्रे सुरां दुदुहुः ॥१६॥ गंधर्वाप्सरसो विश्वावसुं वत्सं कृत्वा कमलपात्रे वाङ्माधुर्यं सौंदर्यं च दुदुहुः ॥१७॥ पितरोऽर्यमणं वत्सं कृत्वा अपक्वमृन्मये पात्रे पितृणामन्नं दुदुहुः ॥१८॥ सिद्धाः कपिलं वत्सं कृत्वा अणिमादिसिद्धिं विद्याधरादयश्च तमेव कपिलं वत्सं कृत्वा खेचरत्वादिरूपां विद्यां दुदुहुः॥१९॥ मायिनो

समां च कुरु मां राजन्देववृष्टं यथा पयः ॥ अपर्तावपि भद्रं ते उपावर्तेत मे विभो ॥११॥ इति प्रियं हितं वाक्यं भुव आदाय भूपतिः ॥ वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ॥ १२ ॥ तथा परे च सर्वत्र सारमाददते बुधाः ॥ ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥ १३ ॥ ऋषयो दुदुहुर्देवीमिंद्रियेष्वथ सत्तम ॥ वत्सं बृहस्पतिं कृत्वा पयश्छंदोमयं शुचि ॥ १४ ॥ कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन् ॥ हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥ १५ ॥ दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् ॥ विधायादूदुहन्क्षीरमयःपात्रे सुरासवम् ॥ १६ ॥ गंधर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः ॥ वत्सं विश्वावसुं कृत्वा गांधर्वं मधु सौभगम् ॥ १७ ॥ वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत ॥ आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥१८॥ प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीम् ॥ सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥१९॥ अन्ये च मायिनो मायामंतर्धानाद्भुतात्मनाम् ॥ मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम् ॥ २० ॥ यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः ॥ भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥ २१ ॥ तथाऽहयो दंदशूकाः सर्पा नागाश्च तक्षकम् ॥ विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः ॥ २२ ॥ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् ॥ अरण्यपात्रे चाधुक्षन् मृगेंद्रेण च दंष्ट्रिणः ॥ २३ ॥ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ॥ सुपर्णवत्सा विहगाश्चरं चाचरमेव च ॥ २४ ॥ वटवत्सा वनस्पतयः पृथग्रसमयं पयः ॥ गिरयो हिमवद्वत्सा नानाधातून्स्वसानुषु ॥ २५ ॥ सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः ॥ सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥ २६ ॥ एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः ॥ दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ॥ २७ ॥ ॥

मयासुरं वत्सं कृत्वा संकल्पमात्रप्रभवां मायां दुदुहुः ॥२०॥ यक्षरक्षोभूतपिशाचा रुद्रं वत्सं कृत्वा कपालपात्रे रक्तं दुदुहुः ॥२१॥ सर्पनागाद्यास्तक्षकं वत्सं कृत्वा मुखपात्रे विषं दुदुहुः ॥२२॥ पशवो नंदिनं वत्सं कृत्वा अरण्यपात्रे तृणं दुदुहुः । व्याघ्रादयः सिंहं वत्सं कृत्वा स्वे शरीरे मांसं दुदुहुः ॥२३॥ पक्षिणो गरुडं वत्सं कृत्वा स्वदेहे कीटफलादि दुदुहुः ॥२४॥ वनस्पतयो वटं वत्सं कृत्वा स्वदेहे रसमयं पयो दुदुहुः । पर्वता हिमाचलं वत्सं कृत्वा स्वशिखरेषु स्वर्णगैरिकादिधातून् दुदुहुः॥ २५ ॥ एवं सर्वे स्वे स्वे पात्रे पृथक् पृथक् पयः कामदुघां पृथ्वीं दुदुहुः ॥२६॥ एवं पात्रवत्सादिभेदेन क्षीरभेदो जातः ॥२७॥

ततः प्रीतः पृथुर्भूमिं कन्यावत्प्रेमपात्रं चकार ॥२८॥ ततः स्वधनुष्याग्रेण पर्वतशिखराणि चूर्णयन् भूमंडलं प्रायः समं चक्रे ॥ २९ ॥ अथ जनानां यथायोग्यं निवासस्थानानि चक्रे ॥३०॥ ग्रामान् पुरः पत्तनानि आभीरनिवासान् गोनिवासान् सेनानिवासस्थानानि कर्षकग्रामादींश्च चक्रे ॥३१॥पृथिव्यां पृथोः पूर्वं पुरग्रामादिकल्पना नासीत् । तस्तत्र तत्र भयरहिताः प्रजा यथासुखं वसंति स्म ॥३२॥ इति श्रीमद्भागवतचू०चतुर्थस्कंधेऽष्टादशोऽध्यायः॥१८॥ ॥ ऊनविंशेऽश्वमेधांगहयापहरणात्पृथोः ॥ इंद्रं हंतुं प्रवृत्तस्य धात्रा वारणमुच्यते ॥१॥ मैत्रेय उवाच ॥ अथैकदा पृथुर्ब्रह्मावर्ते यत्र प्राची सरस्वत्यस्ति तत्र शताश्वमेधानां संकल्पं चकार ॥१॥ तदा शतक्रतुरिंद्रः पृथोर्यज्ञमहोत्सवं न सेहे ॥ २ ॥ यत्र ब्रह्मशिवाभ्यां सहितो भगवान् हरिर्गंधर्वादिभिरुपगीयमानः सन् प्रत्यक्षं ददृशे

ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः॥ दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः॥२८॥ चूर्णयन्स्वधनुष्कोट्या गिरिकूटानि राजराट् ॥ भूमंडलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥२९॥ अथास्मिन्भगवान्वैन्यः प्रजानां वृत्तिदः पिता ॥ निवासान्कल्पयांचक्रे तत्र तत्र यथार्हतः॥३०॥ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च॥घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान्॥३१॥ प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना ॥ यथासुखं वसंति स्म तत्र तत्राकुतोभयाः ॥३२॥ इति श्रीम०महा०चतु० पृथुविजयेऽष्टादशोऽध्यायः॥१८॥ मैत्रेय उवाच ॥ अथादीक्षत राजा तु हयमेधशतेन सः ॥ ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥१॥ तदभिप्रेत्य भगवान्कर्मातिशयमात्मनः॥ शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ॥२॥ यत्र यज्ञपतिः साक्षाद्भगवान्हरिरीश्वरः ॥ अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥३॥ अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः ॥ उपगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः ॥४॥ सिद्धविद्याधरा दैत्या दानवा गुह्यकादयः ॥ सुनंदनंदप्रमुखाः पार्षदप्रवरा हरेः ॥५॥ कपिलो नारदो दत्तो योगेशाः सनकादयः॥ तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥६॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ॥ दोग्धि स्माभीप्सितानर्थान्यजमानस्य भारत ॥७॥ ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् ॥ तरवो भूरिवर्ष्माणः प्रासूयंत मधुच्युतः ॥ ८ ॥ सिंधवो रत्ननिकरान्गिरयोऽन्नं चतुर्विधम् ॥ उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ॥९॥ इति चाधोक्षजेशस्य पृथोस्तु परमोदयम् ॥ असूयन्भगवानिंद्रः प्रतिघातमचीकरत् ॥१०॥ चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ॥ वैन्ये यज्ञपशुं स्पर्धन्नपोवाह तिरोहितः ॥११॥ तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा ॥ आमुक्तमिव पाखंडं योऽधर्मे धर्मविभ्रमः ॥१२॥ अत्रिणा चोदितो हंतुं पृथुपुत्रो महारथः ॥ अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ १३ ॥

॥३॥४॥ यत्र च गंधर्वमुन्यप्सरसो विद्याधरदैत्यदानवगुह्यकप्रभृतयः नंदसुनंदाद्याः ॥५॥ कपिलनारददत्तात्रेयसनकादयश्च प्राप्ताः ॥६॥ यत्र यज्ञे भूमिः पृथोः सर्वमनोरथपूरणकर्त्री बभूव ॥७॥ नद्यः क्षीरदध्यन्नगोरसान् वहंतिस्म । वृक्षाः फलानि प्रासूयंत ॥८॥ समुद्रा रत्नानि पर्वता भक्ष्यभोज्यादि चतुर्विधमन्नं ददुः सर्वे लोकपाला उपायनान्यानिन्युः ॥ ९ ॥ एवं पृथोः प्रभावमसहमान इंद्रस्तत्र विघ्नं चकार ॥ १० ॥ तदेवाह । इंद्रः शततमेऽश्वमेधे पाखंडिवेषं धृत्वाऽश्वं जहार ॥ ११ ॥ तदाऽऽकाशमार्गेण धावंतमिंद्रमत्रिर्ददर्श ॥ १२ ॥ तदा अत्रिणा प्रेरितो महारथः पृथुपुत्रस्तमन्वधावत् । तिष्ठ तिष्ठेति जगाद च ॥ १३ ॥

तं तादृशाकृतिं वीक्ष्य मेने धर्मशरीरिणम् ॥ जटिलं भस्मना छन्नं तस्मै बाणं न मुंचति ॥१४॥ वधान्निवृत्तं तं भूयो हंतवेऽत्रिरचोदयत् ॥ जहि यज्ञहनं तात महेंद्रं विबुधाधमम् ॥१५॥ एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा ॥ अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव ॥१६॥ सोऽश्वं रूपं च तद्धित्वा तस्मा अंतर्हितः स्वराट् ॥ वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥ १७ ॥ तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः ॥ नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ॥१८॥ उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः ॥ चषालयूपतश्छन्नो हिरण्यरशनं विभुः ॥१९॥ अत्रिः संदर्शयामास त्वरमाणं विहायसा ॥ कपालखट्वांगधरं वीरो नैनमबाधत ॥२०॥ अत्रिणा चोदितस्तस्मै संदधे विशिखं रुषा ॥ सोऽश्वं रूपं च तद्धित्वा तस्थावंतर्हितः स्वराट् ॥२१॥ वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् ॥ तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥ २२ ॥ यानि रूपाणि जगृहे इंद्रो हयजिहीर्षया ॥ तानि पापस्य खंडानि लिंगं खंडमिहोच्यते ॥ २३ ॥ एवमिंद्रे हरत्यश्वं वैन्ययज्ञजिघांसया ॥ तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृणाम् ॥ २४ ॥ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु ॥ प्रायेण सज्जते भ्रांत्या पेशलेषु च वाग्मिषु ॥ २५ ॥ तदभिज्ञाय भगवान्पृथुः पृथुपराक्रमः ॥ इंद्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥ २६ ॥ तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुष्प्रेक्ष्यमसह्यरंहसम् ॥ निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥ २७ ॥ वयं मरुत्वंतमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम् ॥ अयातयामोपहवैरनंतरं प्रसह्य राजन् जुहवाम तेऽहितम् ॥ २८ ॥ इत्यामंत्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा ॥ स्रुग्घस्तान् जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत ॥२९॥ न वध्यो भवतामिंद्रो यद्यज्ञो भगवत्तनुः ॥ यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥ ३० ॥ ॥

तं जटिलं भस्मना च छन्नं दृष्ट्वाऽयं धार्मिक इति बुद्ध्वा स तद्वधार्थं बाणं न मुमोच ॥१४॥ अत्रिर्वधान्निवृत्तं तं दृष्ट्वा हे तात, इमं यज्ञविघ्नकरमिंद्रं जहीति पुनर्जगाद ॥१५॥ ततः पृथुपुत्रः क्रुद्धः सन् पुनरिंद्रं प्रत्यन्वधावत ॥१६॥ तदेंद्रोऽश्वं तद्रूपं च हित्वांऽतर्हितः। स वीरोऽश्वमानीय यज्ञं ययौ ॥१७॥ तदा ऋषयस्तस्याद्भुतं कर्म वीक्ष्य विजिताश्व इति नाम ददुः ॥ १८ ॥ पुनरिंद्रोंऽधकारं निर्माय यूपस्तंभे सुवर्णरशनया बद्धं तमश्वं स्तंभाग्राद्रशनासहितं जहार ॥१९॥ तदा अत्रिः कपालखट्वांगधरं तमिंद्रं दर्शयामास। वीरो धर्मात्मानं तं वीक्ष्य न जंघान ॥ २०॥ पुनरत्रिणा प्रेरितः स राजपुत्रो रुषा तस्मै बाणं संदधे। इंद्रोऽश्वं तद्रूपं च हित्वांतर्हितः ॥२१॥ तदा स वीरोऽश्वं गृहीत्वा पितृयज्ञं जगाम ॥२२॥ एवमिंद्रोऽश्वहरणार्थं यानि यानि रूपाणि जगृहे तानि तानि पापस्य खंडानि मूढबुद्धयो जना धर्मबुद्ध्या जगृहुः ॥२३॥ एवं बहुवारमिंद्रगृहीतत्यक्तेषु पाखंडवेषेषु नृणां धर्म इति बुद्धिरभवत् ॥२४॥ जैनबौद्धकापालादिषूपधर्मेषु अयं धर्म एवेति प्रायेण नृणां बुद्धिः सज्जते ॥ २५ ॥ तदा कुपितः पृथुरिंद्रं हंतुं बाणमाददे ॥ २६ ॥ तदा तमृत्विजो निवारयामासुः। हे महामते राजन्, अस्मिन् यज्ञे पशोरन्यस्य वधस्ते योग्यो नास्ति ॥ २७ ॥ वयं यज्ञनाशकं ते शत्रुं सिद्धैराह्वानमंत्रैरिहानीय होष्यामः ॥ २८ ॥ इत्युक्त्वा स्रुग्घस्तान् जुह्वतो ऋत्विजःप्रति ब्रह्माऽऽगत्य प्रत्यषेधत ॥ २९ ॥ हे ऋत्विजः, भगवत्तनुरूप इंद्रो भवतां वधयोग्यो न भवति ॥ ३० ॥ ॥ ॥

अनेन सख्यमेव कर्तव्यम् । अन्यथा भूपः पाखंडं स्रक्ष्यतीत्याशयेनाह । हे द्विजाः, यज्ञविघ्नकारिणेंद्रेण कृतं पाखंडपथरूपमन्यायं पश्यत ॥३१॥ अतः पृथोरेकोनशतक्रतवो भवंतु । पृथुं प्रत्याह । हे नृप, भवतानुष्ठितैर्यज्ञैरलम् । भवान्मोक्षधर्मविदसि न त्विंद्रपदसाधकः ॥ ३२ ॥ अत इंद्राय क्रोधं कर्तुं नार्हसि । यतो भवानिंद्रश्चोभावपि हरेरंशौ स्तः ॥३३॥ हे नृप, त्वं यज्ञविघ्ने चिंतां मा कृथाः किंत्वस्मद्वच आदरेण शृणु ॥३४॥ एष ते क्रतुर्विरमतु । यत्र धर्मनाशकः पाखंडमार्गः प्रवर्तते ॥३५॥ एभिरिंद्रनिर्मितैः पाखंडैर्जना अधर्मं प्राप्नुवंति ॥३६॥ त्वं तु धर्मरक्षार्थं विष्णुकलयाऽवतीर्णोऽसि ॥३७॥ अतो हे प्रभो, स त्वं विचार्य विश्वसृजां भृग्वादीनां प्रजापालनरूपं संकल्पं पूरय । पाखंडमार्गं च जहि ॥३८॥ मैत्रेय उवाच ॥ तदा पृथुर्ब्रह्मवाक्यं श्रुत्वा यज्ञाग्रहं हित्वेंद्रेण स्नेहं कर्तुमै-

तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः॥ इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥ ३१ ॥ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः ॥ अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ॥ ३२ ॥ नैवात्मने महेंद्राय रोषमाहर्तुमर्हसि ॥ उभावपि हि भद्रं त उत्तमश्लोकविग्रहौ ॥३३॥ माऽस्मिन्महाराज कृथाः स्म चिंतां निशामयास्मद्वच आदृतात्मा ॥ यद्ध्यायतो दैवहतं नु कर्तुं मनोऽतिरुष्टं विशते तमोऽधम् ॥ ३४ ॥ क्रतुर्विरमतामेष देवेषु दुरवग्रहः ॥ धर्मव्यतिकरो यत्र पाखंडैरिंद्रनिर्मितैः ॥ ३५ ॥ एभिरिंद्रोपसंसृष्टैः पाखंडैर्हारिभिर्जनम् ॥ ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ॥ ३६ ॥ भवान्परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपम् ॥ वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैन्य ॥ ३७ ॥ स त्वं विमृश्यास्य भवं प्रजापते संकल्पनं विश्वसृजां पिपीपृहि ॥ ऐंद्रीं च मायामुपधर्ममातरं प्रचंडपाखंडपथं प्रभो जहि ॥ ३८ ॥ मैत्रेय उवाच ॥ इत्थं स लोकगुरुणा समादिष्टो विशांपतिः ॥ तथा च कृत्वा वात्सल्यं मघोनापि च संदधे ॥ ३९ ॥ कृतावभृथस्नानाय पृथवे भूरिकर्मणे ॥ वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥ ४० ॥ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः ॥ आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥ ४१ ॥ त्वयाहूता महाबाहो सर्व एव समागताः ॥ पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पृथुविजये एकोनविंशोऽध्यायः ॥ १९ ॥ ॥ मैत्रेय उवाच ॥ भगवानपि वैकुंठः साकं मघवता विभुः ॥ यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक् तमभाषत ॥ १ ॥ श्रीभगवानुवाच ॥ एष तेऽकारषीद्भंगं हयमेधशतस्य ह ॥ क्षमापयत आत्मानममुष्य क्षंतुमर्हसि ॥ २ ॥ सुधियः साधवो लोके नरदेव नरोत्तमाः ॥ नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरम् ॥ ३ ॥ ॥

च्छत् ॥ ३९ ॥ ततोऽवभृथस्नानं चकार । तदा देवास्तस्मै वरान् ददुः ॥ ४० ॥ प्राप्तदक्षिणा विप्रा आशिषश्च ददुः ॥ ४१ ॥ हे महाबाहो, त्वया वयमाहूताः सर्वे समागताः । दानमानाभ्यां पूजिताः संतः सर्वे संतोषं प्राप्ताः स्मः ॥ ४२ ॥ इति श्रीमद्भागवतचूर्णिकायां चतुर्थस्कंधे पृथुविजये एकोनविंशोऽध्यायः ॥१९॥ ॥ विंशे तु विष्णुना साक्षात्पृथोर्यज्ञेऽनुशासनम् । वरदानप्रसंगेन प्रीतिश्चान्योन्यमीर्यते ॥ १ ॥ मैत्रेय उवाच ॥ हे विदुर, भगवान् विष्णुरिंद्रेण सह यज्ञैस्तुष्टः सन् पृथुं बभाषे ॥१॥ श्रीभगवानुवाच ॥ हे राजन्, एष इंद्रस्तव यज्ञभंगं चकार । तदस्य कर्म त्वं क्षंतुमर्हसि ॥२॥ हे मनुष्यदेव, लोके साधवो अनात्मनो दे-

हस्याभिमानेन भूतेभ्यो न द्रुह्यंति ॥३॥ त्वत्सदृशाः पुरुषा यदि देवमायया मुह्यंति तर्हि ज्ञानवृद्धानां सेवायाः श्रम एव फलमिति स्यात् ॥४॥ अतो मायोत्पन्ने शरीरे विद्वानासक्तो न भवति ॥५॥ तदा शरीरेणोत्पादिते गृहे पुत्रे द्रव्ये वा को विद्वान्ममतां कुर्यात् ॥६॥ आत्मा त्वेकः शुद्धः स्वप्रकाशः साक्षी ॥७॥ तं स्वस्मिन् स्थितमात्मानं यः पुमान् वेद स देहस्थोऽपि देहगुणैर्न लिप्यते ॥८॥ यो निष्कामेण स्वधर्मेण नित्यं भक्त्या मां भजते तस्य मनः शनैः शांतिं लभते ॥ ९ ॥ ततः स मोक्षं प्राप्नोति ॥१०॥ य उदासीनमिव तथा देहेंद्रियादीनामध्यक्षमिव स्थितमात्मानं वेद स सुखं प्राप्नोति ॥ ११ ॥ ये मयि बद्धसौहृदास्ते संपत्सु विपत्सु च सुखदुःखादिविकारं न प्राप्नुवंति ॥१२॥ अतस्त्वं सुखदुःखयोः समः सन् सर्वलोकानां रक्षणं कुरु ॥ १३ ॥ हे राजन्, प्रजापालनमेव

पुरुषा यदि मुह्यंति त्वादृशा देवमायया ॥ श्रम एव परं जातो दीर्घया वृद्धसेवया ॥४॥ अतः कायमिमं विद्वानविद्याकामकर्मभिः ॥ आरब्ध इति नैवास्मिन्प्रतिबुद्धोऽनुषज्जते ॥५॥ असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे ॥ अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः ॥६॥ एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः ॥ सर्वगोऽनावृतः साक्षी निरात्माऽऽत्माऽऽत्मनः परः॥७॥ य एवं संतमात्मानमात्मस्थं वेद पूरुषः ॥ नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः ॥८॥ यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः ॥ भजते शनकैस्तस्य मनो राजन्प्रसीदति ॥९॥ परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः॥ शांतिं मे समवस्थानं ब्रह्म कैवल्यमश्नुते ॥१०॥ उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम् ॥ कूटस्थमिममात्मानं यो वेदाप्नोति शोभनम् ॥११॥ भिन्नस्य लिंगस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः ॥ दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियंते मयि बद्धसौहृदाः ॥१२॥ समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेंद्रियाशयः ॥ मयोपकॢप्ताखिललोकसंयुतो विधत्स्व वीराखिललोकरक्षणम् ॥१३॥ श्रेयः प्रजापालनमेव राज्ञो यत्सांपराये सुकृतात्षष्ठमंशम् ॥ हर्तान्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघमत्ति ॥१४॥ एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः ॥ ह्रस्वेन कालेन गृहोपयातान्द्रष्टासि सिद्धाननुरक्तलोकः ॥१५॥ वरं च मत्कंचन मानवेंद्र वृणीष्व तेऽहं गुणशीलयंत्रितः ॥ नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती ॥१६॥ मैत्रेय उवाच ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् ॥ अनुशासित आदेशं शिरसा जगृहे हरेः ॥१७॥ स्पृशंतं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा ॥ शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥१८॥ भगवानथ विश्वात्मा पृथुनोपहृतार्हणः ॥ समुज्जिहानया भक्त्या गृहीतचरणांबुजः ॥ १९ ॥

राज्ञः श्रेयस्करमस्ति । यतो राजा परलोके प्रजाभिः कृतस्य पुण्यस्य षष्ठं भागं गृह्णाति । अन्यथा प्रजानां पापं गृह्णाति ॥१४॥ अतः कारणाद्धे पृथो, त्वं पृथिव्या रक्षणं कुर्वन् सन् स्वल्पेन कालेन स्वगृहागतान् सनकादीन् द्रक्ष्यसि ॥ १५ ॥ अहं वशीकृतचित्तेन पुंसा यथा सुलभोऽस्मि तथा यज्ञादिभिर्न सुलभः । अतस्त्वं मत्तः कंचिद्वरं वृणीष्व ॥ १६ ॥ मैत्रेय उवाच ॥ हे विदुर, इत्थं भगवता बोधितः स पृथुर्लोकगुरोर्हरेस्तामाज्ञां शिरसा जगृहे ॥१७॥ ततः स्वकर्मणा लज्जितं पादयोः स्पृशंतमिंद्रं परिष्वज्य द्वेषं विससर्ज ॥१८॥ ततः पृथुना पूजितोविश्वात्मा भगवान् ॥ १९ ॥ ॥ ॥

प्रस्थानाभिमुखोऽपि पृथुं पश्यन् विलंबितः सन् प्रयाणं न कृतवान् ॥२०॥ भगवता वरार्थं प्रेरितः स पृथुर्हरिं मनसाऽऽलिंग्य प्रेमाश्रुलोचनो भूत्वा हरिं द्रष्टुं
नाशकत् ॥२१॥ अथाश्रूणि विमृज्य गरुडस्कंधे स्थापितहस्तं हरिं विलोकयन् जगाद ॥२२॥ पृथुरुवाच ॥ हे प्रभो, वरदेश्वरात्त्वत्तो ज्ञानी सन् बंधकान् वरान्
कथं वृणीते ॥२३॥ हे कैवल्यपते, यत्र तव यशःश्रवणादि सुखं नास्ति तादृशं कैवल्यमप्यहं नेच्छामि । अतस्तव यशःश्रवणार्थं दशसहस्रं कर्णान् कुरु एष
एव मे वरोऽस्तु ॥२४॥ त्वच्चरणकमलसंबंधी वायुः विस्मृततत्त्वानामपि पुनरात्मज्ञानं विस्तारयति । अतोऽस्माकमन्यैर्वरैरलम् ॥२५॥ हे मंगलकीर्ते, ते कल्याणकारकं
यशः साधुसमागमाद्यः सकृदपि शृणोति स गुणज्ञश्चेत्तर्हि त्वद्यशःश्रवणे पशुं विनान्यः को विरमेत्॥२६॥अहं लक्ष्मीरिव ते चरणांबुजं सेवे । तत्र लक्ष्म्या

प्रस्थानाभिमुखोऽप्येनमनुग्रहविलंबितः ॥ पश्यन्पद्मपलाशाक्षो न प्रतस्थे सुहृत्सताम् ॥२०॥ स आदिराजो रचितांजलिर्हरिं विलोकितुं
नाशकदश्रुलोचनः ॥ न किंचनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥ २१ ॥ अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह
पूरुषम् ॥ पदा स्पृशंतं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरंगविद्विषः ॥२२॥ पृथुरुवाच ॥ वरान्विभो त्वद्वरदेश्वराद्बुधः
कथं वृणीते गुणविक्रियात्मनाम् ॥ ये नारकाणामपि संति देहिनां तानीश कैवल्यपते वृणे न च ॥२३॥ न कामये नाथ तदप्यहं
क्वचिन्न यत्र युष्मच्चरणांबुजासवः ॥ महत्तमांतर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥२४॥ स उत्तमश्लोकमहन्मुखच्युतो
भवत्पदांभोजसुधाकणानिलः ॥ स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥२५॥ यशः शिवं सुश्रव आर्यसंगमे
यदृच्छया चोपशृणोति ते सकृत् ॥ कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥२६॥ अथाभजे त्वाखिलपूरुषोत्तमं गुणालयं
पद्मकरेव लालसः ॥ अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः ॥ २७॥ जगज्जनन्यां जगदीश वैशसं स्यादेव
यत्कर्मणि नः समीहितम् ॥ करोति फल्ग्वप्युरु दीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया॥२८॥ भजंत्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम्
॥ भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥२९॥ मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति
भजंतमात्थ यत् ॥ वाचा नु तंत्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः ॥३०॥ त्वन्मायया‌द्धा जन ईश खंडितो
यदन्यदाशास्त ऋतात्मनो बुधः ॥ यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम्॥३१॥ मैत्रेय उवाच ॥ इत्यादिराजेन
नुतः स विश्वदृक् तमाह राजन्मयि भक्तिरस्तु ते ॥ दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम् ॥ ३२ ॥

मम च कलहो माभूत् ॥२७॥ हे जगदीश, भक्तैस्तव समर्पितं स्वल्पमपि पत्रपुष्पादि त्वं बहु करोषि ॥२८॥ हे ईश, साधवो ज्ञानं प्राप्ता अपि त्वां भजंति ।
तेषां त्वच्चरणस्मरणाद्विनान्यत् किंचिदपि फलं नास्ति ॥२९॥ हे प्रभो, वरं वृणीष्वेति त्वं यद्वदसि तां ते गिरं जगन्मोहिनीमहं मन्ये । ते वेदवाणीरूपया
तंत्या यदि जनो बद्धो न स्यात् तर्हि पुनः पुनः फलैर्मोहितः सन् कर्म कथं कुर्यात् ॥ ३० ॥ अतो हे दीनवत्सल, यथा पिता बालकस्य हितमाचरति तथा
नो हितं कर्तुं त्वमेवार्हसि ॥ ३१ ॥ मैत्रेय उवाच ॥ इति पृथुना स्तुतो भगवान् जगाद । हे नृप, मयि ते भक्तिरस्तु ॥ ३२ ॥ ॥

हे नृपते, मयाऽऽज्ञापितं त्वं कुरु। मदाज्ञापालको लोकः सर्वत्र सुखं प्राप्नोति॥३३॥ मैत्रेय उवाच ॥ एवं हरिः पृथोर्वचनं प्रतिनंद्य तेन पूजितः सन् स्वस्थानं
गंतुमिच्छितवान् ॥३४॥ ततो राज्ञा संमानिताः सर्वे देवर्षिपितृगंधर्वसिद्धचारणमनुष्यादयः स्वं स्वं स्थानं ययुः ॥३५॥३६॥ भगवानपींद्रेण साकं स्वधाम प्रत्यगात्
॥३७॥ तदा पृथुर्देवदेवाय विष्णवे नमस्कृत्य स्वपुरं ययौ ॥३८॥ इति श्रीमद्भागवतचू० चतुर्थ० विंशतितमोऽध्यायः॥२०॥ ॥ एकविंशे तु पृथुना प्रजानामनुशासनम् ।
महासत्रे सुरादीनां महासदसि वर्ण्यते ॥१॥ मैत्रेय उवाच ॥ हे विदुर, कथंभूतं पृथोः पुरम् । मौक्तिकैः पुष्पमालाभिः स्वर्णतोरणैर्धूपदीपैस्तत्र
तत्र शोभितम् ॥१॥ चंदनागुरुपुष्पाक्षतलाजाभिः पूजितम् ॥२॥ कदलीस्तंभैः पूगवृक्षैर्वृक्षपल्लवमालाभिः शोभितम् ॥३॥ एतादृशे पुरे राज्ञः प्रवेशसमये

तत्त्वं कुरु मयादिष्टमप्रमत्तः प्रजापते ॥ मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ॥३३॥ मैत्रेय उवाच ॥ इति वैन्यस्य राजर्षेः प्रतिनंद्यार्थवद्वचः ॥
पूजितोऽनुगृहीत्वैनं गंतुं चक्रेऽच्युतो मतिम् ॥३४॥ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः ॥ किन्नराप्सरसो मर्त्याः
खगा भूतान्यनेकशः ॥३५॥ यज्ञेश्वरधिया राज्ञा वाग्वित्तांजलिभक्तितः ॥ सभाजिता ययुः सर्वे वैकुंठानुगतास्ततः ॥३६॥ भगवानपि
राजर्षेः सोपाध्यायस्य चाच्युतः ॥ हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत ॥३७॥ अदृष्टाय नमस्कृत्य नृपः संदर्शितात्मने ॥ अव्यक्ताय
च देवानां देवाय स्वपुरं ययौ ॥३८॥ इति श्रीमद्भा० महा० चतुर्थ० विंशोऽध्यायः ॥२०॥ मैत्रेय उवाच ॥ मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः
स्वर्णतोरणैः ॥ महासुरभिभिर्धूपैर्मंडितं तत्र तत्र वै ॥ १ ॥ चंदनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् ॥ पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिर्भिरर्चितम् ॥ २ ॥ सवृंदैः कदलीस्तंभैः पूगपोतैः परिष्कृतम् ॥ तरुपल्लवमालाभिः सर्वतः समलंकृतम् ॥३॥ प्रजास्तं दीपबलिभिः
संभृताशेषमंगलैः ॥ अभीयुर्मृष्टकन्याश्च मृष्टकुंडलमंडिताः ॥४॥ शंखदुंभिघोषेण ब्रह्मघोषेण चर्त्विजाम् ॥ विवेश भवनं वीरः
स्तूयमानो गतस्मयः ॥५॥ पूजितः पूजयामास तत्र तत्र महायशाः ॥ पौरान्जानपदांस्तांस्तान्प्रीतः प्रियवरप्रदः॥६॥ स एवमादीन्यनवद्यचेष्टितः
कर्माणि भूयांसि महान्महत्तमः ॥ कुर्वन् शशासावनिमंडलं यशः स्फीतं निधायारुरुहे परं पदम् ॥ ७ ॥ सूत
उवाच ॥ तदादिराजस्य यशोविजृंभितं गुणैरशेषैर्गुणवत्सभाजितम् ॥ क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणंतमर्चयन्
॥८॥ विदुर उवाच ॥ सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः ॥ बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम् ॥९॥ को न्वस्य
कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः ॥ लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धम् ॥ १० ॥

स्त्रियः कन्याश्च दध्यादीनि मंगलवस्तूनि गृहीत्वा संमुखं जग्मुः ॥४॥ तत्र शंखादिवाद्यघोषेण सर्वैः स्तूयमानः पृथुरनेकसंपद्भिर्युक्तं स्वगृहं प्रविवेश ॥५॥ तत्र
तत्र जनैः पूजितः स्वयं तांस्तान् पूजयामास ॥६॥ स पृथुरेवमादीनि कर्माणि कुर्वन् भूमंडलं शशास । ततो भूमौ विस्तृतां कीर्तिं संस्थाप्य वैकुंठपदमारुरोह
॥७॥ सूत उवाच ॥ हे शौनक, विदुरः पृथोर्यशो गृणंतं मैत्रेयं संमानयन् भूयः पप्रच्छ ॥८॥ विदुर उवाच ॥ विप्रै राज्येऽभिषिक्तो बाह्वोर्विष्णुतेजोधारकः
पृथुः किं चकार ॥ ९ ॥ अस्य पृथोः कीर्तिं को न शृणुयात् । सर्वे नृपा अद्यापि यत्पराक्रमोच्छिष्टमाचरंति। तस्य शुद्धं कर्म मे वद ॥ १० ॥ ॥

मैत्रेय उवाच ॥ पृथुर्गंगायमुनयोमध्येंऽतर्वेद्यां वसन् पुण्यक्षयेच्छया भोगान् बुभुजे ॥११॥ सप्तद्वीपेष्वेक एव दंडधरः स ब्राह्मणकुलं विष्णुभक्तांश्च विना सर्वत्राऽस्खलिताज्ञ आसीत् ॥१२॥ एकदा तस्य राज्ञो महायज्ञदीक्षा आसीत् । तत्र देवानां ब्रह्मर्षीणां राजर्षीणां च समाजो बभूव ॥१३॥ तत्समाजे सर्वेषु पूज्येषु पूजितेषु सत्सु ताराणां मध्ये चंद्र इव सभामध्ये स राजा उत्थितः ॥१४॥ कथंभूतः । उच्चः आजानुबाहुर्गौरः कमलनेत्रः सुस्मितमुखः ॥१५॥ विस्तीर्णवक्षस्थलः त्रिवलियुक्तोदरो निम्ननाभिः ॥१६॥ स्निग्धमूर्धजस्त्रिरेखांकितकंठः पीतांबरधरः ॥१७॥ दीक्षानियमे त्यक्तभूषणः कृष्णाजिनधरो दर्भहस्तः ॥ १८ ॥ एतादृशः पृथुरुत्थाय समंततः सर्वान् विलोकयन् निर्दोषं कर्णप्रियकरं गंभीरार्थयुक्तं च वचनं जगाद ॥ १९ ॥ २० ॥ पृथुरुवाच ॥ हे सभ्याः, युष्माकं कल्याणमस्तु ।

मैत्रेय उवाच ॥ गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन् ॥ आरब्धानेव बुभुजे भोगान्पुण्यजिहासया ॥ ११ ॥ सर्वत्रास्खलितादेशः
सप्तद्वीपैकदंडधृक् ॥ अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः॥१२॥एकदाऽऽसीन्महासत्रदीक्षा तत्र दिवौकसाम् ॥ समाजो ब्रह्मर्षीणां
च राजर्षीणां च सत्तम ॥१३॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ॥ उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥१४॥
प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः ॥ सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥१५॥ व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्युदलोदरः
॥ आवर्तनाभिरोजस्वी कांचनोरुरुदग्रपात् ॥१६॥ सूक्ष्मवक्रासितस्निग्धमूर्धजः कंबुकंधरः ॥ महाधने दुकूलाग्र्ये परिधायोपवीय
च ॥१७॥ व्यंजिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः ॥ कृष्णाजिनधरः श्रीमान्कुशपाणिः कृतोचितः ॥१८॥ शिशिरस्निग्धताराक्षः
समैक्षत समंततः ॥ ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव ॥ १९ ॥ चारु चित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवम् ॥
सर्वेषामुपकारार्थं तदा अनुवदन्निव ॥२०॥ राजोवाच ॥ सभ्याः शृणुत भद्रं वः साधवो य इहागताः ॥ सत्सु जिज्ञासुभिर्धर्ममावेद्यं
स्वमनीषितम् ॥ २१ ॥ अहं दंडधरो राजा प्रजानामिह योजितः ॥ रक्षिता वृत्तितः स्वेषु सेतुषु स्थापिता पृथक् ॥ २२ ॥
तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः ॥ लोकाः स्युः कामसंदोहा यस्य तुष्यति दिष्टदृक् ॥ २३ ॥ य उद्धरेत्करं राजा प्रजा
धर्मेष्वशिक्षयन् ॥ प्रजानां शमलं भुंक्ते भगं च स्वं जहाति सः ॥ २४ ॥ तत्प्रजा भर्तृपिंडार्थं स्वार्थमेवानसूयवः ॥ कुरुताधोक्षजधियस्तर्हि
मेऽनुग्रहः कृतः ॥२५॥ यूयं तदनुमोदध्वं पितृदेवर्षयोऽमलाः ॥ कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम् ॥ २६ ॥
अस्ति यज्ञपतिर्नाम केषांचिदर्हसत्तमाः ॥ इहामुत्र च लक्ष्यंते ज्योत्स्नावत्यः क्वचिद्भुवः ॥ २७ ॥ ॥

धर्मजिज्ञासुभिः पुंभिः स्वमनीषीतं साधुषु वक्तव्यम् ॥ २१ ॥ अहमिह भूलोके प्रजानां दंडधरो रक्षको वृत्तिदश्च राजा ऋषिभिर्योजितः ॥२२॥ अतो ब्रह्मवादिनो नरस्य यान् कामपूरकान् लोकानाहुस्ते प्रजारक्षणान्ममापि स्युः ॥२३॥ यो धर्मशिक्षणं विना प्रजाभ्यः करं गृह्णाति स राजा प्रजानां पापं भुंक्ते ॥ २४॥ तस्मात् हे प्रजाः, यूयं वासुदेवार्पणबुद्ध्या स्वधर्ममेवाचरत । एवं कृते मेऽनुग्रहः कृतो भवेत् ॥२५॥ हे देवाद्याः, यूयं तदनुमोदध्वम्। यतः कर्मकर्तुः शिक्षयितुरनुज्ञातुश्च फलं तुल्यं भवति ॥ २६ ॥ हे देवाः, यज्ञपतिर्नामेश्वरो बहूनां मतेऽस्ति । यतोऽस्मिन् लोके परलोके च भोगस्थानानि शरीराणि लक्ष्यंते ॥ २७॥

मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः ॥ प्रियव्रतस्य राजर्षेरंगस्यास्मत्पितुः पितुः ॥२८॥ ईदृशानामथान्येषामजस्य च भवस्य च ॥ प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता॥२९॥ दौहित्रादीनृते मृत्योः शोच्यान्धर्मविमोहितान् ॥ वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना ॥३०॥ यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः ॥ सद्यः क्षिणोत्यन्वहमेधती सती यथा पदांगुष्ठाविनिःसृता सरित् ॥३१॥ विनिर्धुताशेषमनोमलः पुमानसंगविज्ञानविशेषवीर्यवान् ॥ यदंघ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ॥३२॥ तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः ॥ अमायिनः कामदुघांघ्रिपंकजं यथाधिकारावसितार्थसिद्धयः ॥३३॥ असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः ॥ संपद्यतेऽर्थाशयलिंगनामभिर्विशुद्धविज्ञानघनः स्वरूपतः ॥३४॥ प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम् ॥ क्रियाफलत्वेन विभुर्विभाव्यते यथानलो दारुषु तद्गुणात्मकः॥३५॥ अहो ममामी वितरंत्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरम् ॥ स्वधर्मयोगेन यजंति मामका निरंतरं क्षोणितले दृढव्रताः ॥ ३६ ॥ मा जातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च ॥ देदीप्यमानेऽजित देवतानां कुले स्वयं राजकुलाद्द्विजानाम्॥३७॥ ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवंदनात् ॥ अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥३८॥ यत्सेवयाशेषगुहाशयः स्वराड्विप्रप्रियस्तुष्यति काममीश्वरः ॥ तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥३९॥ पुमाँल्लभेतानतिवेलमात्मनः प्रसीदतोऽत्यंतशमं स्वतः स्वयम् ॥ यं नित्यसंबंधनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम् ॥ ४० ॥ अश्नात्यनंतः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः॥ न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यपर्यगुः॥४१॥ यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः ॥ समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ॥ ४२ ॥

मनोः उत्तानपादस्य ध्रुवस्य प्रियव्रतस्य अंगस्य ॥२८॥ ब्रह्मणः शिवस्य प्रह्लादस्य बलेः ईदृशानामन्येषां च अवश्यं कर्मफलदात्रा ईश्वरेण भवितव्यमिति मतमस्ति ॥२९॥ केषांचिद्धर्ममूढानां वेनादीनां मात्रं नास्ति ॥३०॥ यतस्तपस्विनो भगवत्पादसेवयाऽशेषजन्मसंचितं बुद्धेर्मलं त्यजंति ॥३१॥ येन भगवच्चरणाश्रयः कृतः स क्लेशवहां संसृतिं न प्राप्नोति ॥३२॥ यूयं निष्कपटाः संतो मनोवचःकायगुणैस्तमेवेश्वरं भजत ॥३३॥ असावीश्वरः शुद्धो निर्गुणोऽपि सन् कर्ममार्गे संकल्पमंत्रदेवताघृतादिरूपेण यज्ञरूपो भवति ॥ यज्ञो वै विष्णुरिति श्रुतेः ॥३४॥ एष च विभुः परमानंदोऽपि शरीरे विषयाकारां बुद्धिं प्राप्य कर्मफलत्वेन प्रतीयते ॥३५॥ अहो इमे मामका जना निरंतरं भूतले हरिं यजंति ते ममानुग्रहं कुर्वंति ॥३६॥ अथ ब्राह्मणभक्तिं विधत्ते। महत्समृद्धिभिर्युक्तं यद्राजकुलस्य तेजस्तद्ब्राह्मणकुले वैष्णवकुले च स्वप्रभावं न करोतु ॥ ३७ ॥ अहो हरिर्ब्राह्मणचरणाभिवंदनात् स्थिरां लक्ष्मीं यशश्च प्राप ॥ ३८ ॥ ब्राह्मणसेवया हरिरत्यंतं तुष्यति। अतस्तद्ब्राह्मणकुलं भगवद्धर्मपरैर्भवद्भिः सर्वात्मना सेव्यताम् ॥३९॥ हे जनाः, ब्राह्मणकुलस्य नित्यं सेवया पुमान् ज्ञानाभ्यासं विनापि मोक्षं लभते॥४०॥ अनंतो ब्राह्मणमुखे हुतं यथाऽश्नाति तथाऽग्नौ हुतं नाश्नाति॥४१॥ये च ब्राह्मणा नित्यं चित्तैकाग्र्येण वेदं विचारयंति। यत्र वेदे इदं विश्वमादर्शे मुखमिव प्रकाशते।

तेषामहं पादसरोजरेणुमार्या वहेयाधिकिरीटमायुः ॥ यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजंति ॥४३॥ गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणतेऽनुसंपदः ॥ प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम् ॥ ४४ ॥ मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः ॥ तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ॥४५॥ पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ॥ ब्रह्मदंडहतः पपो यद्वेनोऽत्यतरत्तमः ॥ ४६ ॥ हिरण्यकशिपुश्चापि भगवन्निंदया तमः ॥ विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ॥४७॥ वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः ॥ यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि ॥४८॥ अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुंदनाथाः ॥ य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ॥४९॥ नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनम् ॥ प्रजानुरागो महतां प्रकृतिः करुणात्मनाम् ॥५०॥ अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो ॥ भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥५१॥ नमो विवृद्धसत्वाय पुरुषाय महीयसे ॥ यो ब्रह्मक्षत्रमाविश्य बिभर्तीदं स्वतेजसा ॥ ५२॥ इति श्रीमद्भागवते महापुराणे चतुर्थ० एकविंशोऽध्यायः ॥२१॥

मैत्रेय उवाच ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम् ॥ तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥१॥ तांस्तु सिद्धेश्वरान्राजा व्योम्नोऽवतरतोऽर्चिषा ॥ लोकानपापान्कुर्वत्या सानुगोऽचष्ट लक्षितान् ॥२॥ तद्दर्शनोद्गतान्प्राणान्प्रत्यादित्सुरिवोत्थितः ॥ स सदस्यानुगो वैन्य इंद्रियेशो गुणानिव ॥३॥ गौरवाद्यंत्रितः सभ्यः प्रश्रयानतकंधरः ॥ विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ॥ ४ ॥ तत्पादशौचसलिलैर्मार्जितालकबंधनः ॥ तत्र शीलवतां वृत्तमाचरन्मानयन्निव ॥५॥ हाटकासन आसीनान्स्वधिष्ण्येष्विव पावकान् ॥ श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ॥ ६ ॥ ॥

तेषां ब्राह्मणानां पादरेणुमहं किरीटेन धारयामि । यस्य धारणात्पुंसः पापनाशो भवति सद्गुणाश्च प्राप्नुवंति ॥ ४३ ॥ एवं श्रेष्ठं ब्राह्मणकुलं तथा गवां कुलं तथा जनार्दनश्च मह्यं प्रसीदताम् ॥४४॥ मैत्रेय उवाच ॥ एवं ब्रुवाणं पृथुं पितृदेवद्विजातयः सर्वे साधु साध्विति तुष्टुवुः ॥ ४५ ॥ पुत्रेण लोकान् जयत इति सत्यवती श्रुतिः । यतो वेनो ब्रह्मदंडहतोऽपि पृथुनामकात्पुत्रान्नरकमतरत् ॥४६॥ हिरण्यकशिपुरपि प्रह्लादस्य प्रतापात्तमस्ततार ॥४७॥ हे वीर, यस्य तव हरावीदृशी भक्तिः स त्वं बहुवर्षाणि जीव ॥४८॥ अहो वयमद्य त्वया नाथेन सनाथाः स्मः ॥४९॥ हे नाथ, सेवकानां यदनुशिक्षणं तत्तवाद्भुतं नहि । यत एष प्रजानुरागो दयालूनां साधूनां स्वभाव एव ॥५०॥ अद्य त्वया नस्तत्त्वोपदेशेन अज्ञानरूपस्य तमसः पारो दर्शितः ॥५१॥ अतो यो ब्राह्मणकुलमाविश्य क्षत्रियकुलं रक्षति। क्षत्रियकुलं चाविश्य ब्राह्मणकुलं रक्षति। उभयं चाविश्य जगद्रक्षति तस्मै। परमेश्वराय नमोऽस्तु॥५२॥इति श्रीमद्भा० चतु० एकविंशोऽध्यायः॥२१॥

द्वाविंशे तु परं ज्ञानं पृथवे हरिशासनात् । सनत्कुमारो भगवानुपादिशदितीर्यते ॥१॥ मैत्रेय उवाच ॥ हे विदुर, एवं पृथुंप्रति जनेषु कथयत्सु सत्सु तत्र चत्वारः सूर्यवर्चसः सनकादयो मुनय आजग्मुः ॥१॥ तदा पृथुराकाशादवतरतस्तान् ददर्श ॥२॥ तद्दर्शनात्प्राप्तप्राण इव पृथुः सभ्यैः सहित उत्थाय ॥३॥ नम्रमस्तकः सन् तान् सुवर्णासनेषूपवेश्य विधिवत्पूजयांचक्रे ॥४॥ ततस्तत्पादक्षालनोदकं मस्तके दधार ॥५॥ ततोऽग्निरिव सुवर्णासने स्थितान् तान् प्रीतः सन्नाह ॥६॥

पृथुरुवाच ॥ हे मुनयः, मया किं मंगलमाचरितम् । येन योगिनामपि दुर्लभं यद्युष्माकं दर्शनं तन्मे जातम् ॥७॥ विप्राः यस्य प्रसीदंति तस्य शिवो विष्णुश्च प्रसीददति ॥८॥ लोकेषु पर्यटनं कुर्वतोऽपि युष्मान् अयं लोको नैव लक्षयते ॥९॥ येषां गृहे भवादृशाः पूज्यंते ते धनरहिता अपि धन्याः ॥१०॥ भवत्सदृशवैष्णवानां पादतीर्थरहिता ये गृहास्ते सर्पाणां निवासस्थानभूता वृक्षकोटरा इव ज्ञातव्याः ॥११॥ हे मुनयः, युष्माकं स्वागतम् । यतो बाला एव भवंतो महांत्यपि नैष्ठिकब्रह्मचर्यादीनि व्रतानि चरंति ॥१२॥ हे नाथाः, दुःखयुक्ते संसारे स्वकर्मभिः पतितानां नः कुशलं कच्चित् ॥१३॥ भवत्सु आत्मारामेषु कुशलप्रश्नो न योग्यः । येषु भवत्सु कुशलाकुशला बुद्धिवृत्तय एव न संति ॥ १४ ॥ अस्मिन् संसारे लोकानां कल्याणं केन साधनेन भवेत् तद्युष्मान् पृच्छामि ॥१५॥

पृथुरुवाच ॥ अहो आचरितं किं मे मंगलं मंगलायनाः॥ यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः ॥७॥ किं तस्य दुर्लभतरमिह लोके परत्र च ॥ यस्य विप्राः प्रसीदंति शिवो विष्णुश्च सानुगः ॥८॥ नैव लक्षयते लोको लोकान्पर्यटतोऽपि यान् ॥ यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः ॥९॥ अधना अपि ते धन्याः साधवो गृहमेधिनः ॥ यद्गृहा ह्यर्हवर्यांबुतृणभूमीश्वरावराः ॥१०॥ व्यालालयद्रुमा वै तेऽप्यरिक्ताखिलसंपदः ॥ यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ॥११॥ स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमुक्षवः ॥ चरंति श्रद्धया धीरा बाला एव बृहंति च ॥१२॥ कच्चिन्नः कुशलं नाथा इंद्रियार्थार्थवेदिनाम् ॥ व्यसनावाप एतस्मिन्पतितानां स्वकर्मभिः ॥१३॥ भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते ॥ कुशलाकुशला यत्र न संति मतिवृत्तयः ॥१४॥ तदहं कृतविश्रंभः सुहृदो वस्तपस्विनाम् ॥ संपृच्छे भव एतस्मिन्क्षेमः केनांजसा भवेत् ॥१५॥ व्यक्तमात्मवतामात्मा भगवानात्मभावनः ॥ स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः ॥१६॥ मैत्रेय उवाच ॥ पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु ॥ स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह ॥ १७ ॥ सनत्कुमार उवाच ॥ साधु पृष्टं महाराज सर्वभूतहितात्मना॥ भवता विदुषा चापि साधूनां मतिरीदृशी ॥ १८ ॥ संगमः खलु साधूनामुभयेषां च संमतः ॥ यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शम् ॥१९॥ अस्त्येव राजन्भवतो मधुद्विषः पादारविंदस्य गुणानुवादने ॥ रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमंतरात्मनः ॥ २० ॥ शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः ॥ असंग आत्मव्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥२१॥ सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽऽध्यात्मिकयोगनिष्ठया ॥ योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च ॥ २२ ॥

भगवानेव भक्तानामनुग्रहाय भवत्सदृशसिद्धस्वरूपेण नित्यं चरति ॥१६॥ मैत्रेय उवाच ॥ हे विदुर, पृथोः श्रोत्रप्रियं वाक्यं श्रुत्वा कुमारो जगाद ॥१७॥ सनत्कुमार उवाच ॥ हे महाराज, त्वया साधु पृष्टम् ॥१८॥ साधूनां समागमो वक्तॄणां श्रोतॄणां च कल्याणकारको भवति ॥१९॥ हे राजन्, हरेर्गुणानुश्रवणे भवतो निश्चला प्रीतिरस्त्येव । सैव प्रीतिर्मनसो वासनात्मकं मलं धुनोति॥२०॥विचारयुक्तेषु शास्त्रेषु नृणां कल्याणार्थमियानेवार्थो निश्चितोऽस्ति । कोऽसौ । देहादौ वैराग्यं निर्गुणब्रह्मरूपे आत्मनि च या दृढा प्रीतिरिति ॥ २१ ॥ सा च प्रीतिर्गुरुवेदांतवाक्येषु विश्वासेन भगवद्धर्माचरणेन भगवत्कथया ॥ २२ ॥

अर्थकामानामनासक्त्या एकांतवासप्रीत्या ॥२३॥ अहिंसया भगवच्चरितामृतसेवनेन यमनियमादिना सुखदुःखादिसहनेन ॥ २४ ॥ हरिगुणवर्णनेन च निर्गुणे ब्रह्मणि अनायासेन प्रीतिः स्यात् ॥२५॥ यदा ब्रह्मणि प्रीतिर्भवति तदा पुमान् ज्ञानवैराग्ययोर्वेगेन जीवावरकं पंचमहाभूतात्मकं हृदयोपाधिं पुनर्वासनारहितं यथा स्यात्तथा दहति ॥२६॥ ततो दग्धहृदयोपाधिर्नर आत्मनः सकाशाद्बहिर्घटादिपदार्थान् अंतश्च सुखदुःखादि किमपि न पश्यति । यथा जागृतः पुमान् स्वप्ने भासितं द्रष्टृदृश्यात्मकं सर्वं न पश्यति तद्वत् ॥२७॥ यतः पुरुषोंऽतःकरणोपाधौ सत्येव द्रष्टृदृश्यसंबंधं पश्यति ॥ २८ ॥ यथा लोके जलदर्पणादौ निमित्ते सत्येवात्मनो बिंबप्रतिबिंबभेदं पश्यति नान्यथा ॥२९॥ पुंसां मन एवेंद्रियैर्विषयासक्तिं प्राप्य बुद्धेर्विचारसामर्थ्यं हरति॥३०॥ विचारसामर्थ्ये नष्टे सति

अर्थेंद्रियारामसगोष्ठ्यतृष्णया तत्संमतानामपरिग्रहेण च ॥ विविक्तरुच्या परितोष आत्मन्विना हरेर्गुणपीयूषपानात् ॥२३॥ अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यसीधुना ॥ यमैरकामैर्नियमैश्चाप्यनिंदया निरीहया द्वंद्वतितिक्षया च ॥२४॥ हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृंभमाणया॥ भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चांजसा रतिः॥२५॥ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा ॥ दहत्यवीर्यं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितोऽग्निः॥ २६॥ दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरंतर्विचष्टे ॥ परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने यथा पुरुषस्तद्विनाशे ॥२७॥ आत्मानमिंद्रियार्थं च परं यदुभयोरपि ॥ सत्याशय उपाधौ वै पुमान्पश्यति नान्यदा ॥२८॥ निमित्ते सति सर्वत्र जलादावपि पूरुषः ॥ आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ॥२९॥ इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ॥ चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात् ॥३०॥ भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये ॥ तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ॥ ३१ ॥ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः ॥ यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥ ३२॥ अर्थेंद्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् ॥ भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यताम् ॥३३॥ न कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीरिषुः ॥ धर्मार्थकाममोक्षाणां यदत्यंतविघातकम् ॥ ३४ ॥ तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते ॥ त्रैवर्ग्योऽर्थो यतो नित्यं कृतांतभयसंयुतः ॥ ३५ ॥ परेऽवरे च ये भावा गुणव्यतिकरादनु ॥ न तेषां विद्यते क्षेममीशविध्वंसिताशिषाम् ॥ ३६ ॥ तत्त्वं नरेंद्र जगतामथ तस्थुषां च देहेंद्रियासुधिषणात्मभिरावृतानाम् ॥ यः क्षेत्रवित्तपतया हृदि विष्वगाविः प्रत्यक्चकास्ति भगवांस्तमवेहि सोऽस्मि ॥ ३७ ॥ ॥

पूर्वपरानुसंधानरूपा स्मृतिर्नश्यति। स्मृतिक्षये स्वरूपसाक्षात्कारनाशो भवति॥३१॥ लोके आत्मनाशादन्यः पुंसः स्वार्थनाशो नास्ति॥३२॥ तस्माद्विषयचिंतनेन ज्ञानविज्ञानाद्भ्रंशितः पुमान् वृक्षादियोनित्वं प्राप्नोति ॥३३॥ अतः संसारं तर्तुमिच्छुः पुमान् धर्मार्थकाममोक्षनाशके वस्तुनि कर्हिचिदपि संगं न कुर्यात्॥३४॥ तत्रापि मोक्ष एव कदापि न नश्यति अतः सर्वोत्कृष्टः । धर्मार्थकामास्तु कालेन नश्यंति ॥ ३५ ॥ यतः सृष्टौ मायागुणक्षोभाद्ब्रह्मादयोऽस्मदादयश्च भवंति । तेषां सुखं नास्ति । यतस्तेषां मनोरथान् कालो नाशयति ॥ ३६ ॥ तस्मात् हे राजन्, चराचराणां हृदि यः प्रकाशते स एवाहमस्मीति त्वं जानीहि ॥ ३७॥

यस्मिन्निदं विश्वं कार्यकारणभावेन मिथ्याभूतमेव भासते तमहं शरणोऽस्मीति भावय ॥३८॥ साधवो यत्पादभक्त्या हृदयग्रंथिं छिंदंति तं वासुदेवं भज ॥३९॥ त्वं हरेश्चरणरूपां नौकां कृत्वा भवसमुद्रमुत्तर ॥४०॥ मैत्रेय उवाच ॥ एवं ब्रह्मपुत्रेण सनत्कुमारेण दर्शितात्ममार्गः स पृथुरुवाच ॥४१॥ पृथुरुवाच ॥ हे ब्रह्मन्, पूर्वमेव हरिणा मेऽनुग्रहः कृतः । तं संपादयितुं यूयमागताः ॥४२॥ तत्सर्वं कृपालुभिर्भवद्भिः संपादितम् । अतोऽहं युष्मभ्यं गुरुदक्षिणां कां ददे । यतः सर्वं साधूनामुच्छिष्टमस्ति ॥४३॥ तथापि प्राणस्त्रीपुत्राः सर्ववस्तुसहितं गृहं राज्यसैन्यभूमिकोशाश्चेति सर्वं भवतां निवेदितम् ॥४४॥ वेदशास्त्रविदेव सैनापत्यं राज्यं लोकशिक्षकत्वं

यस्मिन्निदं सदसदात्मतया विभाति मायाविवेकविधुति स्रजि वाऽहिबुद्धिः ॥ तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥३८॥ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति संतः ॥ तद्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम् ॥३९॥ कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीरषंति ॥ तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम् ॥४०॥ मैत्रेय उवाच ॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा ॥ दर्शितात्मगतिः सम्यक्प्रशस्योवाच तं नृपः ॥४१॥ राजोवाच ॥ कृतो मेऽनुग्रहः पूर्वं हरिणाऽऽर्तानुकंपिना ॥ तमापादयितुं ब्रह्मन्भगवन्यूयमागताः ॥४२॥ निष्पादितश्च कार्त्स्न्येन भगवद्भिर्घृणालुभिः ॥ साधूच्छिष्टं हि मे सर्वमात्मना सह किं ददे ॥ ४३ ॥ प्राणा दाराः सुता ब्रह्मन् गृहाश्च सपरिच्छदाः ॥ राज्यं बलं मही कोश इति सर्वं निवेदितम् ॥४४॥ सैनापत्यं च राज्यं च दंडनेतृत्वमेव च ॥ सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥४५॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च ॥ तस्यैवानुग्रहेणान्नं भुंजते क्षत्रियादयः ॥४६॥ यैरीदृशी भगवतो गतिरात्मवाद एकांततो निगमिभिः प्रतिपादिता नः ॥ तुष्यंत्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति विनोदपात्रम् ॥४७॥ मैत्रेय उवाच ॥ त आत्मयोगपतय आदिराजेन पूजिताः ॥ शीलं तदीयं शंसंतः खेऽभूवन्मिषतां नृणाम् ॥४८॥ वैन्यस्तु धुर्यो महतां संस्थित्याऽध्यात्मशिक्षया ॥ आप्तकाममिवात्मानं मेन आत्मन्यवस्थितः ॥४९॥ कर्माणि च यथाकालं यथादेशं यथाबलम् ॥ यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतम् ॥५०॥ फलं ब्रह्मणि विन्यस्य निर्विषंगः समाहितः ॥ कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परम् ॥ ५१ ॥ गृहेषु वर्तमानोऽपि स साम्राज्यश्रियान्वितः ॥ नासज्जतेंद्रियार्थेषु निरहंमतिरर्कवत् ॥ ५२ ॥ एवमध्यात्मयोगेन कर्माण्यनुसमाचरन् ॥ पुत्रानुत्पादयामास पंचार्चिष्यात्मसंमतान् ॥ ५३ ॥ ॥

न्यायाधीशत्वं सर्वलोकाधिपत्यत्वं चार्हति॥४५॥ब्राह्मणः स्वमेव भुंक्ते स्वमेव ददाति । तस्यानुग्रहेण क्षत्रियादयः केवलमन्नं भुंजते न तु दाने स्वतंत्राः॥४६॥यैरध्यात्मविचारे ईदृशी भगवतो गतिर्नः संपादिता तेषां प्रत्युपकारं कः करोति॥४७॥मैत्रेय उवाच ॥ एवमुक्त्वा आदिराजेन पूजिताः सनकादयस्तं प्रशंसंतः संत आकाशमार्गेण गताः ॥४८॥ वैन्यस्त्वध्यात्मशिक्षयाऽऽत्मनि मनःसंस्थाप्यात्मानं प्राप्तमनोरथमिव मेने ॥४९॥ स यथाकालं यथादेशं यथायोग्यं ब्रह्मार्पणबुद्ध्या कर्माणि चकार ॥५०॥कर्मफलं ब्रह्मणि समर्प्याऽऽत्मानं प्रकृतेः परं मन्यमानः सन् ॥५१॥ गृहे वर्तमानोऽपि विषयेषु नासज्जत॥५२॥ एवं ज्ञानयोगेन कर्माणि कुर्वन् अर्चिषि भार्यायां

पंच पुत्रान् जनयामास॥५३॥विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकमेवमुत्पाद्य सर्वलोकपालानां पृथक् पृथक् गुणानेको दधार॥५४॥ स मनोवाग्वृत्तिभिः प्रजा रंजयन् राजेति सार्थकं नाम दधार॥५५॥किंच । प्रजाभ्यो धनग्रहणे दुर्भिक्षादौ दाने च सूर्य इव बभूव॥५६॥अग्निरिवासह्यः इंद्र इव दुर्जयः क्षमया भूरिव स्वर्ग इव मनोरथपूरकः॥५७॥पर्जन्य इव यथाकामं तर्पयन् समुद्र इव दुर्बोधः धैर्येण मेरुरिव॥५८॥शिक्षायां यम इव धनी कुबेर इव वरुण इव सुरक्षितधनः॥५९॥ वायुरिव सर्वत्रगमनशक्तिः श्रीरुद्र इवाविषह्यः॥६०॥सौंदर्ये काम इव सिंह इव पराक्रमी प्रभुत्वे ब्रह्मेव॥६१॥ब्रह्मविचारे बृहस्पतिरिव जितेंद्रियत्वे विष्णुरिव गोगुरुविप्रादिषु भक्तिलोकलज्जानम्रतादिगुणैः परोपकारे च आत्मनैव तुल्यः॥६२॥एवं स राजा त्रैलोक्ये तत्र तत्र गीतया कीर्त्या सतां कर्णरंध्रेषु राम इव प्रविष्ट आसीत्

विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम् ॥ सर्वेषां लोकपालानां दधारैकः पृथुर्गुणान् ॥५४॥ गोपीथाय जगत्सृष्टेः काले स्वे स्वेऽच्युतात्मकः ॥ मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरंजयन्प्रजाः ॥५५॥ राजेत्यधान्नामधेयं सोमराज इवापरः ॥ सूर्यवद्विसृजन्गृह्णन्प्रतपंश्च भुवो वसु ॥५६॥ दुर्धर्षस्तेजसेवाग्निर्महेंद्र इव दुर्जयः ॥ तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणाम् ॥५७॥ वर्षति स्म यथाकामं पर्जन्य इव तर्पयन् ॥ समुद्र इव दुर्बोधः सत्वेनाचलराडिव ॥५८॥ धर्मराडिव शिक्षायामाश्चर्ये हिमवानिव ॥ कुबेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा ॥५९॥ मातरिश्वेव सर्वात्मा बलेन सहसौजसा ॥ अविषह्यतया देवो भगवान्भूतराडिव ॥६०॥ कंदर्प इव सौंदर्ये मनस्वी मृगराडिव ॥ वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः ॥६१॥ बृहस्पतिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः ॥ भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु ॥ ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ॥ ६२ ॥ कीर्त्योर्ध्वगीतया पुंभिस्त्रैलोक्ये तत्र तत्र ह ॥ प्रविष्टः कर्णरंध्रेषु स्त्रीणां रामः सतामिव ॥६३॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पृथुचरिते द्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ मैत्रेय उवाच ॥ दृष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्मवान् ॥ आत्मना वर्धिताशेषस्वानुसर्गः प्रजापतिः ॥१॥ जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत्सताम् ॥ निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान् ॥२॥ आत्मजेष्वात्मजां न्यस्य विरहाद्रुदतीमिव ॥ प्रजासु विमनःस्वेकः सदारोऽगात्तपोवनम् ॥ ३ ॥ तत्राप्यदाभ्यनियमो वैखानससुसंमते ॥ आरब्ध उग्रतपसि यथा स्वविजये पुरा ॥४॥ कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित् ॥ अब्भक्षः कतिचित्पक्षान्वायुभक्षस्ततः परम् ॥ ५ ॥

॥६३॥ इति श्रीमद्भागवतचू॰ चतुर्थ॰ द्वाविंशोऽध्यायः ॥२२॥ ॥ त्रयोविंशे सभार्यस्य वने नित्यसमाधिनः । विमानमधिरुह्याथ वैकुंठगतिरीर्यते ॥ १ ॥ मैत्रेय उवाच ॥ हे विदुर, पृथुरेकदा आत्मानं वृद्धं मत्वा मनसि विचारं कृतवान् ॥१॥ अहं यदर्थमिह जातः सोऽन्नादिसर्जनप्रकारो नगरग्रामादिरचनप्रकारश्च मया वर्धितः प्रजापालनरूपेश्वराज्ञा च संपादिता ॥२॥ इति विचार्य पुत्रेभ्यो राज्यं दत्वा प्रजासु खिन्नासु सतीषु स्त्रीसहितस्तपोवनं जगाम ॥३॥ तत्र वानप्रस्थानां संमतं तप आरब्धवान् ॥ ४ ॥ कंचित्कालं कंदमूलफलशुष्कपर्णाहारः क्वचिदुदकभक्षः क्वचिद्वायुभक्षः ॥ ५ ॥ ॥ ॥

---

१ निरुपम इत्यर्थः ।

ग्रीष्मे पंचाग्निसाधनः वर्षासु पर्जन्यसहः शीतकाल उदके आकंठमग्नः ॥६॥ जितप्राणः कृष्णमाराधयन् परं तप आचरत् ॥७॥ तेन तपसा निर्मलचित्तश्छिन्नवासनः ॥८॥ सनत्कुमारोपदिष्टेनाध्यात्मिकयोगेन पुरुषोत्तमं भेजे ॥९॥ तदा तस्य ब्रह्मणि एकनिष्ठा भक्तिर्जाता ॥ १० ॥ तया ज्ञानं वैराग्यं च बभूव । तेन ज्ञानेन हृदयग्रंथिं चिच्छेद ॥११॥ ततस्तज्ज्ञानमपि त्यक्तवान् । युक्तं चैतत् । यत आत्मप्राप्तौ यत्नवानपि पुमान् यावद्भगवत्कथासु रतिं न कुर्यात् तावद्योगसिद्धिष्वासक्तो भवति॥१२॥ एवं स पृथुरात्मन्यात्मानं संयोज्य काले ब्रह्मभूतः सन् देहं तत्याज ॥१३॥ देहत्यागप्रकारमाह । पार्ष्णिभ्यां गुदं प्रपीड्य मूलाधाराच्छनैर्वायुमाकृष्य तं च क्रमान्नाभिहृदयोदरकंठभ्रूमध्येषु स्थापयित्वा॥१४॥ ततस्तं वायुं ब्रह्मरंध्रे आवेश्य सिद्ध्यादिषु निस्पृहः सन् तं वायुं महाभूतरूपे वायावेकीकृतवान् ।

ग्रीष्मे पंचतपा वीरो वर्षास्वासारषाण्मुनिः ॥ आकंठमग्नः शिशिर उदके स्थंडिलेशयः ॥६॥ तितिक्षुर्यतवाग्दांत ऊर्ध्वरेता जितानिलः ॥
आरिराधयिषुः कृष्णमचरत्तप उत्तमम् ॥७॥ तेन क्रमानुसिद्धेन ध्वस्तकर्मामलाशयः ॥ प्राणायामैः संनिरुद्धषड्वर्गश्छिन्नबंधनः ॥८॥
सनत्कुमारो भगवान्यदाहाध्यात्मिकं परम् ॥ योगं तेनैव पुरुषमभजत्पुरुषर्षभः ॥९॥ भगवद्धर्मिणः साधोः श्रद्धया यततः सदा ॥
भक्तिर्भगवति ब्रह्मण्यनन्यविषयाभवत् ॥ १० ॥ तस्यानया भगवतः परिकर्मशुद्धसत्वात्मनस्तदनुसंस्मरणानुपूर्त्या ॥ ज्ञानं विरक्तिमद्
भून्निशितेन येन चिच्छेद संशयपदं निजजीवकोशम् ॥११॥ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन
येन ॥ तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् ॥१२॥ एवं स वीरप्रवरः संयोज्यात्मानमात्मनि ॥ ब्रह्मभूतो
दृढं काले तत्याज स्वं कलेवरम् ॥१३॥ संपीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयन् शनैः ॥ नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरःकंठशीर्षणि
॥१४॥ उत्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निस्पृहः ॥ वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत् ॥१५॥ खान्याकाशे द्रवं तोये यथास्थानं
विभागशः ॥ क्षितिमंभसि तत्तेजस्यदो वायौ नभस्यमुम् ॥१६॥ इंद्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवम् ॥ भूतादिनामून्युत्क्षिप्य
महत्यात्मनि संदधे ॥१७॥ तं सर्वगुणविन्यासं जीवे मायामये न्यधात् ॥ तं चानुशयमात्मस्थमसावनुशयी पुमान् ॥ ज्ञानवैराग्यवीर्येण
स्वरूपस्थोऽजहात्प्रभुः ॥१८॥ अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनम् ॥ सुकुमार्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः
॥१९॥ अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चारषदेहयात्रया ॥ नाविंदतार्तिं परिकर्शितापि सा प्रेयस्करस्पर्शनमाननिर्वृतिः ॥२०॥
देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः ॥आलक्ष्य किंचिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि॥२१॥

तथा कायं क्षितौ तेजस्तेजस्येकीकृतवान् ॥१५॥ तथेंद्रियच्छिद्राण्याकाशे रसांशं जले प्रविलाप्य । क्षितिं जले जलं तेजसि तेजो वायौ वायुमाकाशे तच्च तामसाहंकारे प्रविलाप्य ॥१६॥ देवताभिः सह मनस इंद्रियेषु लयं कृत्वेंद्रियाणां शब्दादिविषयेषु तेषामहंकारे तस्य च महत्तत्वे लयं कृत्वा ॥१७॥ तस्य जीवे तस्य च ब्रह्मणि लयं कृत्वा ब्रह्मरूपेण स्थितः सन् पृथुर्देहं जहौ ॥१८॥ हे विदुर, अर्चिर्नाम्नी सुकुमारी तत्पत्नी पत्युरनु पद्भ्यां वनं गत्वा ॥१९॥ भर्तुः शुश्रूषया तत्स्पर्शजानंदेन भूमिशयनकंदमूलादिभक्षणजं दुःखं नाविंदत् ॥ २० ॥ सा पतिदेहं मृत्युं प्राप्तं दृष्ट्वा किंचिद्विलप्य पर्वतशिखरे चितामारोपयत् ॥ २१ ॥

ततो नदीजले स्नात्वा भर्तुरुदकं दत्वा स्वर्गस्थान् देवान् नत्वा वह्निं त्रिः प्रदक्षिणीकृत्य भर्तृपादौ ध्यायंती वह्निं विवेश ॥२२॥ तदा तां सहस्रशो देवपत्न्यस्तुष्टुवुः ॥२३॥ मंदराचलसानुनि पुष्पवृष्टिं कुर्वन्त्यस्ता देवपत्न्यो देववाद्येषु नदत्सु परस्परं जगदुः॥२४॥ देव्य ऊचुः ॥ अहो इयं वधूर्धन्या । यतः सर्वात्मना पतिं सेवितवती ॥२५॥ किंच । यास्मानतीत्य पत्या सहोर्ध्वं व्रजति ॥२६॥ भुवि चंचलायुष्या अपि ये पुरुषा मोक्षपदं वैकुंठं साधयंति तेषामन्यद्दुर्लभं किम् ॥२७॥ यो मोक्षसाधकं मनुष्यदेहं प्राप्य विषयेषु सज्जते तं धिक् ॥२८॥ मैत्रेय उवाच ॥ एवं देवस्त्रीषु स्तुवतीषु सार्चिरात्मविदां श्रेष्ठः पृथुर्वी भगवद्रूपतां प्राप तां प्राप॥२९॥ हे विदुर, इत्थं पवित्रकीर्तेः पृथोश्चरितं ते कथितम् ॥३०॥ इदं पवित्रतममाख्यानं यः पठेत् श्रृणुयात् श्रावयेद्वा स पृथोः पदवीं प्राप्नुयात् ॥ ३१ ॥ ब्राह्मणः

विधाय कृत्यं ह्रदिनीजलाप्लुता दत्वोदकं भर्तुरुदारकर्मणः॥नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायती भर्तृपादौ ॥२२॥
विलोक्यानुगतां साध्वीं पृथुं वीरवरं पतिम् ॥ तुष्टुवुर्वरदा देवैर्देवपत्न्यः सहस्रशः ॥ २३ ॥ कुर्वत्यः कुसुमासारं तस्मिन्मंदरसानुनि ॥
नदत्स्वमरतूर्येषु गृणंति स्म परस्परम् ॥२४॥ देव्य ऊचुः॥ अहो इयं वधूर्धन्या या चैवं भूभुजां पतिम्॥सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव ॥२५॥ सैषा नूनं व्रजत्यूर्ध्वमनु वैन्यं पतिं सती॥ पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा॥२६॥ तेषां दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदम् ॥ भुवि लोलायुषो ये वै नैष्कर्म्यं साधयंत्युत ॥२७॥ स वंचितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ॥ लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥२८॥ मैत्रेय उवाच ॥ स्तुवतीष्वमरस्त्रीषु पतिलोकं गता वधूः ॥ यं वा आत्मविदां धुर्यो वैन्यः प्रापाच्युताशयः ॥२९॥ इत्थंभूतानुभावोऽसौ पृथुः स भगवत्तमः ॥ कीर्तितं तस्य चरितमुद्दामचरितस्य ते ॥३०॥ यं इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत् ॥ श्रावयेच्छृणुयाद्वापि स पृथोः पदवीमियात् ॥३१॥ ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः ॥ वैश्यः पठन्विट्पतिः स्याच्छूद्रः सत्तमतामियात् ॥३२॥ त्रिःकृत्व इदमाकर्ण्य नरो नार्यथवादृता ॥ अप्रजः सुप्रजतमो निर्धनो धनवत्तमः ॥३३॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पंडितः ॥ इदं स्वस्त्ययनं पुंसाममंगल्यनिवारणम् ॥३४॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहम् ॥ धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः ॥ श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परम् ॥३५॥ विजयाभिमुखो राजा श्रुत्वैतदभियाति यान् ॥ बलिं तस्मै हरंत्यग्रे राजानः पृथवे यथा ॥३६॥ मुक्तान्यसंगो भगवत्यमलां भक्तिमुद्वहन् ॥ वैन्यस्य चरितं पुण्यं श्रृणुयाच्छ्रावयेत्पठेत् ॥ ३७ ॥ वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकम् ॥ अस्मिन्कृतमतिर्मर्त्यः पार्थवीं गतिप्राप्नुयात् ॥३८॥

पठन् तेजस्वी भवेत्। क्षत्रियो जगतीपतिः स्यात्। वैश्यो विट्पतिः स्यात्। शूद्रः श्रेष्ठत्वं प्राप्नुयात्॥३२॥ नरो नारी वा इदं चरित्रं त्रिवारं श्रृण्वन् पुत्रं धनं च प्राप्नोति ॥३३॥ मूर्खः पंडितो भवेत् । इदं कल्याणकारकं सर्वाशुभनिवारणम् ॥३४॥ धनप्राप्तिकरं यशोवृद्धिकरं आयुष्यवृद्धिकरं धर्मार्थकाममोक्षप्रदं चास्ति ॥३५॥ विजयाभिमुखो राजेदं श्रुत्वा यान्प्रति याति ते शत्रवस्तस्मै करभारं समर्पयंति ॥३६॥ निष्कामोऽपि पुमान् हरौ भक्तिं कुर्वाणः सन् भगवन्माहात्म्यसूचकं पृथुचरित्रं श्रृण्वन् श्रावयन् पठन् वा पृथुगतिं प्राप्नुयात् ॥ ३७ ॥ ३८ ॥ ॥ ॥ ॥

इदं पृथुचरितं प्रतिदिनं भक्त्या शृण्वन् भगवति प्रीतिं लभते ॥३९॥ इति श्रीम० चतु० त्रयोविंशोऽध्यायः ॥२३॥ ॥ चतुर्विंशे प्रपौत्रात्तु पृथोः प्राचीनबर्हिषः । प्रचेतसां पुनस्तेभ्यो रुद्रगीतं च वर्ण्यते ॥१॥ मैत्रेय उवाच ॥ पृथुपुत्रो विजिताश्वो राज्ये स्थित्वा कनिष्ठेभ्यश्चतुर्भ्यो भ्रातृभ्यश्चतस्रो दिशो ददौ ॥१॥ हर्यक्षाय प्राचीं धूम्रकेशाय दक्षिणां वृकाय पश्चिमां द्रविणसे चोत्तरां दिशं ददौ ॥२॥ विजिताश्व इंद्रादंतर्धानविद्यां लब्ध्वा अंतर्धाननामा बभूव । ततः सः शिखंडिन्यां पावकः पावमानः शुचिरिति पुत्रत्रयं जनयामास । तेऽग्नय एव वसिष्ठशापादुत्पन्नाः । पुनस्तेऽग्नित्वं प्राप्ताः ॥३॥४॥ स एव विजिताश्वो नभस्वतीनाम्न्यामन्यस्यां भार्यायां हविर्धानं जनयामास ॥५॥ स हविर्धानो राजवृत्तिं परपीडात्मकां मत्वा दीर्घसत्रनिमित्तेन तां राजवृत्तिं त्यक्त्वा ॥६॥ हरिं यजन् तल्लोकं प्राप ॥७॥ हविर्धानाद्धविर्धान्यां षट्पुत्रा जाताः ।

अनुदिनमिदमादरेण शृण्वन्पृथुचरितं प्रथयन्विमुक्तसंगः ॥ भगवति भवसिंधुपोतपादे स च निपुणां लभते रतिं मनुष्यः ॥३९॥
इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ मैत्रेय उवाच ॥ विजिताश्वोऽधिराजासीत्पृथुपुत्रः
पृथुश्रवाः ॥ यवीयोभ्योऽददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः ॥ १ ॥ हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणाम् ॥ प्रतीचीं वृकसं-
ज्ञाय तुर्यां द्रविणसे विभुः ॥२॥ अंतर्धानगतिं शक्राल्लब्ध्वांतर्धानसंज्ञितः ॥ अपत्यत्रयमाधत्त शिखंडिन्यां सुसंमतम् ॥३॥ पाव-
कः पवमानश्च शुचिरित्यग्नयः पुरा ॥ वसिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ॥४॥ अंतर्धानो नभस्वत्यां हविर्धानमविंदत ॥
य इंद्रमश्वहर्तारं विद्वानपि न जघ्निवान् ॥ ५ ॥ राज्ञां वृत्तिं करादानदंडशुल्कादिदारुणाम् ॥ मन्यमानो दीर्घसत्रव्याजेन वि-
ससर्ज ह ॥ ६ ॥ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् ॥ यजंस्तल्लोकतामाप कुशलेन समाधिना ॥ ७ ॥ हविर्धानाद्धविर्धा-
नी विदुरासूत षट् सुतान् ॥ बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम् ॥ ८ ॥ बर्हिषत्सुमहाभागो हाविर्धानिः प्रजापतिः ॥
क्रियाकांडेषु निष्णातो योगेषु च कुरूद्वह ॥९॥ यस्येदं देवयजनमनुयज्ञं वितन्वतः ॥ प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्
॥ १० ॥ सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिम् ॥ यां वीक्ष्य चारुसर्वांगीं किशोरीं सुष्ठ्वलंकृताम् ॥ परिक्रमंतीमुद्वाहे चकमेऽग्निः
शुकीमिव ॥११॥ विबुधासुरगंधर्वमुनिसिद्धनरोरगाः ॥ विजिताः सूर्यया दिक्षु क्वणयंत्यैव नूपुरैः ॥ १२॥ प्राचीनबर्हिषः पुत्राः
शतद्रुत्यां दशाभवन् ॥ तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः ॥ १३ ॥ पित्राऽऽदिष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् ॥ दशव-
र्षसहस्राणि तपसाऽर्चंस्तपस्पतिम् ॥१४॥ यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता ॥ तद्ध्यायंतो जपंतश्च पूजयंतश्च संयताः ॥१५॥

तेच–बर्हिषत् गयः शुक्लः कृष्णः सत्यः जितव्रतः ॥८॥ तत्र बर्हिषत् कर्मकांडेषु योगेषु च कुशलो बभूव ॥ ९ ॥ यस्यैकयज्ञसमीपस्थले यज्ञांतरं कुर्वतः सतः प्राचीनाग्रैः कुशैर्भूमितलमास्तृतमासीत् । तेन कारणेन तस्य प्राचीनबर्हिरिति नाम जातम् ॥१०॥ स समुद्रस्य कन्यां ब्रह्मणा कथितां शतद्रुतिं नाम उपयेमे । विवाहेऽग्निप्रदक्षिणां कुर्वतीं यां दृष्ट्वाऽग्निरपि कामातुरोऽभूत् ॥११॥ किंच । तया नवोढया चरणनूपुरध्वनिमात्रेण देवासुरगंधर्वादयो मोहं प्रापिताः ॥१२॥ तस्यां शतद्रुत्यां प्राचीनबर्हिः प्रचेतःसंज्ञकान् समानाचारान् दश पुत्रान् जनयामास ॥१३॥ ते च दश प्रचेतसः पित्रा प्रजासर्गे आज्ञापिताः संतस्तपः कर्तुं समुद्रस-

मीपे गताः । ततः समुद्रस्य कटिपरिमिते जले स्थित्वा दशवर्षसहस्राणि पथि दृष्टेन शिवेन यदुक्तं तद्ध्यायंतो जपंतश्च संतो हरिमर्चयामासुः ॥१४॥ १५ ॥ विदुर उवाच ॥ हे मुने, प्रचेतसां शिवेन सह यथा संगम आसीत् शिवश्च तान् यदाह तन्नो वद ॥१६॥ मनुष्याणां शिवसमागमोऽत्यंतं दुर्लभः ॥ १७ ॥ यो भगवान् शिवः शक्त्या सह लोकपालनाय चरति ॥ १८ ॥ मैत्रेय उवाच ॥ ते प्रचेतसः पितुर्वाक्यं शिरसा गृहीत्वा तपः कर्तुं पश्चिमदिशि समुद्रसमीपं ययुः ॥१९॥ तत्र समुद्रवद्विस्तीर्णमेकं सरोवरं ददृशुः ॥२०॥ कथंभूतम् । नीलरक्तादिकमलैर्युक्तं हंससारसचक्रवाकादिभिः शब्दितम् ॥ २१ ॥ उन्मत्तभ्रमरशब्देन रोमांचितैर्वृक्षलतादिभिः शोभितम् ॥२२॥ तत्र दिव्यं गायनं श्रुत्वा ते विस्मयं प्रापुः ॥२३॥ तर्ह्येव तस्मात् सरसो बहिर्निर्गतं देवश्रेष्ठं देवैरनुगीयमानम् ॥२४॥

विदुर उवाच ॥ प्रचेतसां गिरित्रेण यथाऽऽसीत्पथि संगमः ॥ यदुताह हरः प्रीतस्तन्नो ब्रह्मन्वदार्थवत्॥१६॥संगमः खलु विप्रर्षे शिवेनेह शरीरिणाम् ॥ दुर्लभो मुनयो दध्युरसंगाद्यमभीप्सितम् ॥१७॥ आत्मारामोऽपि यस्त्वस्य लोककल्पस्य राधसे ॥ शक्त्या युक्तो विचरति घोरया भगवान्भवः ॥१८॥ मैत्रेय उवाच ॥ प्रचेतसः पितुर्वाक्यं शिरसाऽऽदाय साधवः ॥ दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः ॥१९॥ समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः ॥ महन्मन इव स्वच्छं प्रसन्नसलिलाशयम् ॥२०॥ नीलरक्तोत्पलांभोजकह्लारेंदीवराकरम् ॥ हंससारसचक्राह्वकारंडवनिकूजितम् ॥२१॥ मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपम् ॥ पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवम् ॥२२॥ तत्र गांधर्वमाकर्ण्य दिव्यमार्गमनोहरम् ॥ विसिस्म्यू राजपुत्रास्ते मृदंगपणवाद्यनु ॥२३॥ तर्ह्येव सरसस्तस्मान्निष्क्रामंतं सहानुगम् ॥ उपगीयमानममरप्रवरं विबुधानुगैः ॥२४॥ तप्तहेमनिकायाभं शितिकंठं त्रिलोचनम् ॥ प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ॥२५॥ स तान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः ॥ धर्मज्ञान् शीलसंपन्नान्प्रीतः प्रीतानुवाच ह ॥२६॥ श्रीरुद्र उवाच॥ यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम् ॥ अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम् ॥२७॥ यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे ॥२८॥ स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिंचतामेति ततः परं हि माम् ॥ अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥ २९ ॥ अथ भागवता यूयं प्रियाः स्थ भगवान्यथा ॥ न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥ ३० ॥ इदं विविक्तं जप्तव्यं पवित्रं मंगलं परम् ॥ निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः ॥ ३१ ॥ मैत्रेय उवाच ॥ इत्यनुक्रोशहृदयो भगवानाह तान् शिवः ॥ बद्धांजलीन्राजपुत्रान्नारायणपरो वचः ॥ ३२ ॥

प्रसादसुमुखं त्रिलोचनं शिवं वीक्ष्य जातानंदाः संतस्तं प्रणेमुः ॥२५॥ तदा प्रपन्नार्तिहरः शिवः प्रीतः सन् धर्मज्ञान् तान् जगाद ॥ २६ ॥ शिव उवाच ॥ हे प्रचेतसः, युष्माकं चिकीर्षितं मया विदितम् । युष्माकमनुग्रहायैव एवं मया दर्शनं वो दत्तम् ॥२७॥ यो वासुदेवं प्रपन्नः स मे प्रियोऽस्ति ॥२८॥ स्वधर्मनिष्ठः पुमान् शतजन्मभिर्ब्रह्माणं याति । ततो माम् । ततः परं वैष्णवं पदं याति ॥ २९ ॥ यूयं भगवत्प्रियाः अतो मे प्रियाः स्थ ॥ ३० ॥ तस्मादिदं स्तोत्रं मया वक्ष्यमाणं शृणुत ॥३१॥ मैत्रेय उवाच ॥ इत्युक्त्वा नारायणपरः शिवो बद्धांजलीन् तान् राजपुत्रानाह ॥ ३२ ॥ ॥ ॥

श्रीरुद्र उवाच ॥ हे भगवन्, आत्मविद्वरिष्ठानामानंदलाभाय त्वयोत्कर्षः प्रकटीकृतोऽस्ति । अतो ममापि स्वानंदलाभो भवतु । त्वं परमानंदरूपेण नित्यं स्थितोऽसि
॥३३॥ अत एवंभूताय कमलनाभाय शांताय चित्ताधिष्ठात्रे वासुदेवाय तुभ्यं नमः ॥३४॥ अहंकाराधिष्ठात्रे संकर्षणाय नमः । बुद्ध्यधिष्ठात्रे प्रद्युम्नाय
नमः । मनोऽधिष्ठात्रे अनिरुद्धाय नमः । पूर्णाय सूर्याय च ते नमः ॥ ३५ ॥ ३६ ॥ स्वर्गमोक्षद्वाराय हिरण्यवीर्यायाग्नये नमोऽस्तु ॥ ३७ ॥ पितृदेवानामन्नरूपाय
सोमाय नमः । जीवानां तृप्तिदाय जलरूपाय नमः ॥ ३८ ॥ सर्वप्राणिनां देहाय पृथ्वीरूपाय विराड्देहाय च ते नमः ॥ ३९ ॥ अंतर्बहिर्व्यवहाराश्रयायाकाशाय
नमः । पुण्यप्राप्याय स्वर्गवैकुंठादिलोकरूपिणे ते नमः ॥ ४० ॥ पितृलोकप्रापकाय प्रवृत्तकर्मरूपिणे देवलोकप्रापकाय निवृत्तकर्मरूपिणे

श्रीरुद्र उवाच ॥ जितं त आत्मविद्धुर्य स्वस्तये स्वस्तिरस्तु मे ॥भवता राधसा राद्धं सर्वस्मा आत्मने नमः ॥३३॥ नमः पंकजनाभाय
भूतसूक्ष्मेंद्रियात्मने ॥ वासुदेवाय शांताय कूटस्थाय स्वरोचिषे ॥ ३४ ॥ संकर्षणाय सूक्ष्माय दुरंतायांतकाय च ॥
नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने ॥ ३५ ॥ नमो नमोऽनिरुद्धाय हृषीकेशेंद्रियात्मने ॥ ३६ ॥ नमः परमहंसाय पूर्णाय
निभृतात्मने ॥ स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे ॥ ३७ ॥ नम ऊर्ज इषे त्रय्याः
पतये यज्ञरेतसे ॥ तृप्तिदाय च जीवानां नमः सर्वरसात्मने ॥ ३८ ॥ सर्वसत्वात्मदेहाय विशेषाय स्थवीयसे ॥ नमस्त्रैलोक्यपालाय
सहओजोबलाय च ॥३९॥ अर्थलिंगाय नभसे नमोंऽतर्बहिरात्मने ॥ नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे
॥४०॥ प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे ॥ नमो धर्मविपाकाय मृत्यवे दुःखदाय च ॥ ४१ ॥ नमस्त आशिषामीश मनवे
कारणात्मने ॥ नमो धर्माय बृहते कृष्णायाकुंठमेधसे ॥ पुरुषाय पुराणाय सांख्ययोगेश्वराय च ॥४२॥ शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने
॥ चेतआकूतिरूपाय नमो वाचो विभूतये ॥४३॥ दर्शनं नो दिदृक्षूणां देहि भागवतार्चितम् ॥ रूपं प्रियतमं स्वानां
सर्वेंद्रियगुणांजनम् ॥४४॥ स्निग्धप्रावृड्घनश्यामं सर्वसौंदर्यसंग्रहम् ॥ चार्वायतचतुर्बाहुं सुजातरुचिराननम् ॥४५॥ पद्मकोशपलाशाक्षं
सुंदरभ्रु सुनासिकम् ॥ सुद्विजं सुकपोलास्यं समकर्णविभूषणम् ॥ ४६ ॥ प्रीतिप्रहसितापांगमलकैरुपशोभितम् ॥
लसत्पंकजकिंजल्कदुकूलं मृष्टकुंडलम् ॥४७॥ स्फुरत्किरीटवलयहारनूपुरमेखलम् ॥ शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ॥४८॥
सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभम् ॥ श्रियानपायिन्या क्षिप्तनिकषाश्मोरसोल्लसत् ॥ ४९ ॥ ॥ ॥

अधर्मफलदाय मृत्युरूपिणे च ते नमः ॥४१॥ सर्वकर्मफलदात्रे सांख्ययोगेश्वराय कृष्णाय नमः ॥ ४२ ॥ शक्तित्रयसमेताय रुद्राय नमः । ज्ञानक्रियारूपाय
ब्रह्मणे नमः ॥ ४३ ॥ एवं नमस्कृत्य दर्शनं प्रार्थयते । हे ईश, त्वं दिदृक्षूणां भक्तानां नस्तव प्रियतमं रूपं दर्शय ॥ ४४ ॥ कथंभूतम् । घनश्यामं सुंदरदीर्घचतुर्बाहुं
रुचिराननम् ॥ ४५ ॥ कमलनेत्रं सुंदरभ्रूनासिकं सुकपोलम् ॥ ४६ ॥ चूर्णकुंतलैः शोभितं पीतांबरकुंडलयुतम् ॥ ४७ ॥ मुकुटकटकहारनूपुरादिभिः
शोभितं शंखचक्रगदापद्ममालाधरम् ॥ ४८ ॥ कौस्तुभग्रीवं श्रिया विराजमानवक्षस्स्थलम् ॥ ४९ ॥ ॥ ॥

अश्वत्थपत्रसदृशोदरं निम्ननाभिम् ॥५०॥ स्वर्णमयमेखलाधरं समानसुंदरोरुजानुजंघाचरणम् ॥ ५१ ॥ हे गुरो, अज्ञानं विधुन्वता चरणेनोपलक्षितं त्वद्रूपं नः प्रदर्शय ॥५२॥ एतद्रूपमात्मशुद्धिमिच्छता पुरुषेण केवलं ध्यातुं योग्यमस्ति ॥५३॥ सर्वदेहिनां दुर्लभोऽपि भवान् भक्तिमतां सुलभोऽस्ति ॥५४॥ अत एकांतभक्त्या त्वामाराध्य तुच्छं स्वर्गादिसुखं को वांछेत् ॥५५॥ यच्चरणमूले शरणं प्रविष्टंप्रति कालो ममायं वश इत्यभिमानं न करोति ॥५६॥ भगवद्भक्तसमागमस्य क्षणार्धेनापि समं स्वर्गं मोक्षं च वयं न मन्यामहे ॥ ५७ ॥ अतो हे भगवन्, तव भक्तानां संगमोऽस्माकं भवतु । एष एवास्मदुपरि तवानुग्रहः ॥ ५८ ॥

पूररेचकसंविग्नवलिवल्गुदलोदरम् ॥ प्रतिसंक्रामयद्विश्वं नाभ्याऽऽवर्तगभीरया ॥५०॥ श्यामश्रोण्यधिरोचिष्णुदुकूलस्वर्णमेखलम् ॥
समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्शनम् ॥ ५१ ॥ पदा शरत्पद्मपलाशरोचिषा नखद्युभिर्नोऽन्तरघं विधुन्वता ॥ प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजुषाम् ॥ ५२ ॥ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सताम् ॥ यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठताम् ॥ ५३ ॥ भवान्भक्तिमता लभ्यो दुर्लभः सर्वदेहिनाम् ॥ स्वाराज्यस्याप्यभिमत एकांतेनात्मविद्गतिः ॥ ५४ ॥
तं दुराराध्यमराध्य सतामपि दुरापया ॥ एकांतभक्त्या को वांछेत्पादमूलं विना बहिः ॥ ५५ ॥ यत्र निर्विष्टमरणं कृतांतो
नाभिमन्यते ॥ विश्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ॥ ५६ ॥ क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ ५७ ॥ अथानघांघ्रेस्तव कीर्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनाम् ॥ भूतेष्वनुक्रोशसुसत्वशीलिनां स्यात्संगमोऽनुग्रह एष नस्तव ॥ ५८ ॥ न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् ॥ यद्भक्तियोगानुगृहीतमंजसा मुनिर्विचष्टे ननु तत्र ते गतिम् ॥ ५९ ॥ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् ॥ तत्त्वं ब्रह्म
परं ज्योतिराकाशमिव विस्तृतम् ॥ ६० ॥ यो माययेदं पुरुरूपयासृजद्बिभर्ति भूयः क्षपयत्यविक्रियः ॥ यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतंत्रं भगवन्प्रतीमहि ॥ ६१ ॥ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजंति सिद्धये ॥ भूतेंद्रियांतःकरणोपलक्षितं वेदे च तंत्रे च त एव कोविदाः ॥ ६२ ॥ त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्वतमो विभिद्यते ॥ महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः ॥ ६३ ॥ सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन ॥ अथो विदुस्तं पुरुषं संतमंतर्भुंक्ते हृषीकैर्मधु सारघं यः ॥ ६४ ॥ ॥ ॥ ॥

यदा चित्तं भक्तियोगेन शुद्धं सद्बाह्यविषयेष्वासक्तं न भवति। अज्ञानरूपायां सुषुप्तौ च लीनं न भवति। तदैव मुनिस्तव ब्रह्मस्वरूपं पश्यति ॥५९॥ यस्मिन् ब्रह्मणि इदं विश्वं प्रकाशते। यच्च जगति सच्चिदानंदत्वेन भासते। तदाकाशवद्व्यापकं ब्रह्म तव स्वरूपम् ॥६०॥ यो माययेदं सृजति पालयति संहरति च। तं त्वां भेदरहितं वयं जानीमः ॥६१॥ ये योगिनो वेदोक्तकर्ममार्गैस्त्वां पूजयंति त एव ज्ञानिनो ज्ञातव्याः ॥ ६२ ॥ त्वमाद्य एक एव मायाशक्तियुक्तो भवसि । ततस्तया मायाशक्त्या रजःसत्वतमोगुणा महदहंकारादयश्चोत्पद्यंते ॥६३॥ हे ईश, त्वं शक्त्या सृष्टं चतुर्विधं शरीरं स्वांशेन प्रविष्टो भवसि । अतस्त्वां पुरीषु

शयनात्पुरुषं विदुः ॥६४॥ स त्वं भूतैरेव भूतानि संहरसि । मेघपंक्तीर्वायुरिव ॥६५॥ कालरूपी त्वं सावध एव विषयासक्तमसावधं जनं ग्रससि । सर्पो मूषकमिव ॥६६॥ अतस्तव चरणकमलं कस्त्यजेत् यत् ब्रह्मादयोऽपि पूजयंति स्म॥६७॥हे ब्रह्मन्, सर्वमपि जगद्रुद्रभयेन त्रस्तमस्ति। अतो नो भयरहिता गतिस्त्वमेवासि ॥६८॥ हे प्रचेतसः, यूयं भगवत्यर्पितचित्ताः संतः सर्वभूतेष्वात्मनि च स्थितं हरिं पूजयंतो ध्यायंतो वर्णयंतश्चेदं स्तोत्रं जपत ॥६९॥७०॥ इदमेव स्तोत्रं समाहितबुद्धयो यूयमभ्यसत ॥७१॥ पुरा भगवान् ब्रह्मा स्रष्टुमिच्छतां भृग्वादीनामस्माकं पुत्राणामिदमेव स्तोत्रं जगाद ॥७२॥ ततो ब्रह्मणा प्रजासर्गे प्रेरिता

स एष लोकानतिचंडवेगो विकर्षसि त्वं खलु कालयानः ॥ भूतानि भूतैरनुमेयतत्वो घनावलीर्वायुरिवाविषह्यः ॥६५॥ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसम् ॥ त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमंतकः ॥ ६६ ॥ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेऽवमानव्ययमानकेतनः ॥ विशंकयास्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश ॥ ६७ ॥ अथ त्वमसि नो ब्रह्मन्परमात्मन्विपश्चिताम् ॥ विश्वं रुद्रभयध्वस्तमकुतश्चिद्भया गतिः ॥ ६८ ॥ इदं जपत भद्रं वो विशुद्धा नृपनंदनाः ॥ स्वधर्ममनुतिष्ठंतो भगवत्यर्पिताशयाः ॥६९॥ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् ॥ पूजयध्वं गृणंतश्च ध्यायंतश्चासकृद्धरिम् ॥ ७० ॥ योगादेशमुपासाद्य धारयंतो मुनिव्रताः ॥ समाहितधियः सर्व एतदभ्यसतादृताः ॥ ७१ ॥ इदमाह पुरास्माकं भगवान्विश्वसृक्पतिः ॥ भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षताम् ॥ ७२ ॥ ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः ॥ अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ॥ ७३ ॥ अथेदं नित्यदा युक्तो जपन्नवहितः पुमान् ॥ अचिराच्छ्रेय आप्नोति वासुदेवपरायणः ॥ ७४ ॥ श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परम् ॥ सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवम् ॥ ७५ ॥ य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवम् ॥ अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥ ७६ ॥ विंदते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरन् ॥ मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥ ७७ ॥ इदं यः कल्य उत्थाय प्रांजलिः श्रद्धयान्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ॥७८॥ गीतं मयेदं नरदेवनंदनाः परस्य पुंसः परमात्मनः स्तवम् ॥ जपंत एकाग्रधियस्तपो महच्चरध्वमंते तत आप्स्यथेप्सितम्॥७९॥इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे रुद्रगीतं नाम चतुर्विंशोऽध्यायः॥२४॥

वयमनेन स्तोत्रेण सर्वान् प्रतिबंधान्निवार्य विविधाः प्रजाः सृष्टवंतः ॥ ७३ ॥ अथेदं स्तोत्रं नित्यं यो जपेत्सोऽचिरात्संपत्तिं प्राप्नुयात् ॥ ७४॥ सर्वश्रेयसां मध्ये श्रेष्ठं यज्ज्ञानं तदस्माल्लभ्यते ॥७५॥ य इदं मद्गीतं स्तोत्रं श्रद्धया पठति स हरिं सुखेनाराधयति ॥७६॥ पुरुषो यद्यदिच्छति तत्तत्सर्वं मद्गीतादस्मात्स्तोत्राद्विंदते ॥७७॥ यः प्रातरुत्थाय श्रद्धयैतच्छृणुयात् श्रावयेद्वा स कर्मबंधैर्मुच्यते ॥७८॥ हे राजपुत्राः प्रचेतसः, मद्गीतमिदं स्तोत्रं जपंतो यूयं महत्तपश्चरध्वम् । ततोंऽते ईप्सितं फलं प्राप्स्यथ ॥७९॥ इति श्रीमद्भागवतचूर्णिकायां० चतुर्थस्कंधे चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ॥ ॥

प्रचेतःसु तपस्यत्सु तत्पित्रे नारदो घृणी। प्राचीनबर्हिषेऽध्यात्मं पारोक्ष्येणाह पंचभिः ॥१॥ पुरंजनकथाव्याजात्पंचविंशे तु नारदः। आत्मनो बुद्धिसंगेन विविधामाह संसृतिम्॥२॥प्रचेतःसु तपस्तीव्रं तप्यमानेषु नारदः। पुरंजनकथाकूटं प्राह प्राचीनबर्हिषे॥३॥ मैत्रेय उवाच॥ हे विदुर, भगवान् शिव एवमुपदिश्य प्रचेतोभिः पूजितः सन् तत्रैवांतर्दधे॥१॥ ततः प्रचेतसो रुद्रगीतं जपंतः संतः समुद्रस्य कटिपरिमिते जले दशसहस्रवर्षाणि तपस्तेपुः ॥२॥ एतां प्रचेतसां कथामसमाप्यैव तत्पितुर्वृत्तांतमाह। हे विदुर, प्राचीनबर्हिषं कर्मस्वासक्तं दृष्ट्वा कृपालुर्नारदस्तं प्रत्येत्य तं प्रत्यबोधयत्॥३॥नारद उवाच॥ हे राजन्, इह त्वं कर्मणा श्रेयः किमिच्छसि॥ मोक्षरूपं श्रेयस्तु कर्मणा न भवति ॥४॥ प्राचीनबर्हिरुवाच॥ हे महाभाग, कर्मभिर्विक्षिप्तबुद्धिरहं श्रेयो न जानामि। अतो मे निर्मलं ज्ञानं ब्रूहि। येन कर्मफलेभ्यो मुक्तो भविष्यामि

॥ मैत्रेय उवाच ॥ इति संदिश्य भगवान्बार्हिषदैरभिपूजितः ॥ पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः ॥ १ ॥ रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः ॥ जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥ २ ॥ प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसम् ॥ नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥ ३ ॥ श्रेयस्त्वं कतमद्राजन्कर्मणात्मन ईहसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥ ४ ॥ राजोवाच ॥ न जानामि महाभाग परं कर्मापविद्धधीः ॥ ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥ ५ ॥ गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः ॥ न परं विंदते मूढो भ्राम्यन्संसारवर्त्मसु ॥ ६ ॥ नारद उवाच ॥ भो भो प्रजापते राजन्पशून्पश्य त्वयाध्वरे ॥ संज्ञापितान् जीवसंघान्निर्घृणेन सहस्रशः ॥ ७ ॥ एते त्वां संप्रतीक्षंते स्मरंतो वैशसं तव ॥ संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः ॥ ८ ॥ अत्र ते कथयिष्येऽमुमितिहासं पुरातनम् ॥ पुरंजनस्य चरितं निबोध गदतो मम ॥ ९ ॥ आसीत्पुरंजनो नाम राजा राजन्बृहच्छ्रवाः ॥ तस्याविज्ञातनामासीत्सखाऽविज्ञातचेष्टितः ॥ १० ॥ सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः ॥ नानुरूपं यदाविंदद‍भूत्स विमना इव ॥ ११ ॥ न साधु मेने ताः सर्वा भूतले यावतीः पुरः ॥ कामान्कामयमानोऽसौ तस्य तस्योपपत्तये ॥१२॥ स एकदा हिमवतो दक्षिणेष्वथ सानुषु ॥ ददर्श नवभिर्द्वार्भिः पुरं लक्षितलक्षणाम् ॥१३॥ प्राकारोपवनाट्टालपरिखैरक्षतोरणैः ॥ स्वर्णरौप्यायसैः शृंगैः संकुलां सर्वतो गृहैः ॥ १४ ॥ नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः ॥ क्लृप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥ १५ ॥ सभाचत्वररथ्याभिराक्रीडायतनापणैः ॥ चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥ १६ ॥

॥५॥गृहासक्तो मूढः पुरुषः संसारमार्गेषु भ्राम्यन् सन् परं श्रेयो न विंदते॥६॥नारद उवाच॥ हे राजन्, यज्ञादिषु यान् पशून् त्वं मारितवानसि तान् पश्य ॥७॥ एते त्वयि मृते सति परलोके लोहयंत्रमयैः स्वशृंगैस्त्वां छेत्स्यंति॥८॥एतद्विषये तव पुरंजनसंज्ञकराजचरितरूपमितिहासं कथयिष्यामि तं त्वं शृणु॥९॥ हे राजन्, कश्चित्पुरंजनो[१] नाम राजा आसीत्। तस्याविज्ञातनामा[२] सखा आसीत्॥१०॥ स राजा पुरं[३] मृगयन् भूतले[४] बभ्राम ॥११॥ भूतले यावंति पुराणि[५] तानि सर्वाणि साधु न मेने ॥१२॥ ततः स एकदा भूतलं भ्रमन् हिमवतो दक्षिणभागे[६] नवद्वारैर्युक्तां[७] पुरीं[८] ददर्श ॥१३॥ कथंभूताम्। प्राकारोपवनगवाक्षतोरणैः स्वर्णरौप्यलोहमयशिखरयुक्तैर्गृहैश्च व्याप्ताम् ॥ १४ ॥ नीलस्फटिकवैदूर्यादिभिर्विरचितगृहभूमिम् ॥ १५ ॥ सभांगणरथ्यादिमार्गैर्ध्वजपताकादिभिश्च युक्ताम् ॥ १६ ॥ ॥

---

१ जीवः। २ न विज्ञातं नाम यस्य स ईश्वरः। ३ भोगायतनं शरीरम्। ४ब्रह्मांडे। ५ शरीराणि। ६ कर्मक्षेत्रे भरतखंडे। ७ कर्णौ नेत्रे नासिके मुखं शिश्नं गुदं चेति नव द्वाराणि। ८ मनुष्यशरीरम्।

पुर्या बाह्योपवने[१] प्रमदोत्तमा[२] ददर्श । कथंभूते उपवने—दिव्यवृक्षलताव्याप्ते ॥१७॥ पुष्पसंबंधिवायुना चंचलवृक्षैः समृद्धियुक्ते ॥ १८ ॥ यत्र विद्यमानानामपि
अनेकमृगसिंहादीनां बाधा नास्ति ॥ १९ ॥ एवंभूते उपवने एकां स्त्रियं दशभिर्भृत्यैः[३] सहायांतीम् ॥२०॥ पंचशीर्षाहिना[४] रक्षितां भर्तारमिच्छंतीं[५] षोडशवार्षिकीम्
॥२१॥ सुनासां सुदतीं सुमुखां कुंडलधराम् ॥२२॥ सुश्रोणीं श्यामां नूपुरयुक्तपद्भ्यां चलंतीम् ॥ २३ ॥ समवर्तुलस्तनौ लज्जया वस्त्रेणाच्छादयंतीं
गजगामिनीम् ॥२४॥ एतादृशीं स्त्रियं[६] दृष्ट्वा पुरंजनः[७] संमुह्य तां जगाद॥२५॥हे कमलपत्राक्षि, त्वं कस्यासि । कुतः प्राप्तासि । इदमुपवनं दृष्ट्वा किं कर्तुमिच्छसि

पुर्यास्तु बाह्योपवने दिव्यद्रुमलताकुले ॥ नदद्विहंगालिकुलकोलाहलजलाशये ॥१७॥ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवालविटपनलिनीतटसंपदि
॥१८॥ नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ॥ आहूतं मन्यते पांथो यत्र कोकिलकूजितैः ॥१९॥ यदृच्छयागतां
तत्र ददर्श प्रमदोत्तमाम् ॥ भृत्यैर्दशभिरायांतीमेकैकशतनायकैः ॥२०॥ पंचशीर्षाहिना गुप्तां प्रतीहारेण सर्वतः ॥ अन्वेषमाणामृषभमप्रौढां
कामरूपिणीम् ॥२१॥ सुनासां सुदतीं बालां सुकपोलां वराननाम् ॥ समविन्यस्तकर्णाभ्यां बिभ्रतीं कुंडलश्रियम् ॥२२॥ पिशंगनीवीं
सुश्रोणीं श्यामां कनकमेखलाम् ॥ पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव ॥ २३ ॥ स्तनौ व्यंजितकैशोरौ समवृत्तौ निरंतरौ ॥
वस्त्रांतेन निगूहंतीं व्रीडया गजगामिनीम् ॥२४॥ तामाह ललितं वीरः सव्रीडस्मितशोभनाम् ॥ स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा
॥२५॥ का त्वं कंजपलाशाक्षि कस्यासीह कुतः सति ॥ इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे ॥ २६ ॥ क एतेऽनुपथा ये त एकादश
महाभटाः ॥ एता वा ललनाः सुभ्रूः कोऽयं तेऽहिः पुरःसरः ॥२७॥ त्वं ह्रीर्भवान्यस्यथ वाग्रमा पतिं विचिन्वती किं मुनिवद्रहो वने ॥
त्वदंघ्रिकामाप्तसमस्तकामं क्व पद्मकोशः पतितः कराग्रात् ॥ २८ ॥ नासां वरोर्वन्यतमा भुविस्पृक्पुरीमिमां वीरवरेण साकम् ॥
अर्हस्यलंकर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ॥२९॥ यदेष माऽपांगविखंडितेंद्रियं सव्रीडभावस्मितविभ्रमद्भ्रुवा ॥ त्वयोपसृष्टो
भगवान्मनोभवः प्रबाधतेऽथानुगृहाण शोभने ॥३०॥ तदाननं सुभ्रु सुतारलोचनं व्यालंबिनीलालकवृंदसंवृतम् ॥ उन्नीय मे दर्शय
वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ॥ ३१ ॥ नारद उवाच ॥ इत्थं पुरंजनं नारी याचमानमधीरवत् ॥ अभ्यनंदत तं
वीरं हसंती वीरमोहिता ॥३२॥ न विदाम वयं सम्यक्कर्तारं पुरुषर्षभ ॥ आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥ ३३ ॥

॥२६॥ एते अनुचरा एकादश[८] महावीराः के । एताः स्त्रियः[९] काः । अयं ते पुरोगामी सर्पः[१०] कः ॥ २७ ॥ त्वं भवानी रमा सरस्वती वासि किम् ॥ २८ ॥ हे
वरोरु, आसां मध्ये त्वं कापि न संभवसि । यतस्त्वं भुवं स्पृशसि । देवतास्तु भुवं न स्पृशंति ॥ २९ ॥ हे शोभने, त्वया प्रेरितः कामो मां बाधते । तस्मान्मा
पतित्वेनानुगृहाण ॥३०॥ हे स्त्रि, सुंदरभ्रुकुटिनेत्रयुक्तं तव मुखं मे दर्शय ॥ ३१ ॥ नारद उवाच ॥ इत्थं याचमानं पुरंजनं सा स्वीकृतवती । तं दृष्ट्वा
मोहिता च सती प्राह ॥३२॥ हे पुरुषश्रेष्ठ, मम तव चोत्पादकमहं न जानामि । तथैवावयोर्गोत्रं नाम च येन कृतं तं न वेद्मि ॥३३॥ ॥

---

[१] शब्दस्पर्शादिविषयसमूहे । [२] बुद्धिम् । [३] ज्ञानकर्मेंद्रियरूपैः । [४] प्राणोऽपानव्यानोदानसमानरूपपंचवृत्तिसहितेन प्राणेन । [५] भोक्तारं जीवम् । [६] बुद्धिम् । [७] जीवः । [८] मनःसहितानि दशेंद्रियाणि । [९] इंद्रियवृत्तयः । [१०] प्राणः ।

येन चेयं पुरी निर्मिता तं चापि वयं न विद्मः ॥३४॥ एते नरा नार्यश्च मम सखायः सख्यश्च संति । मयि सुप्तायामयं नागः पुरीं पालयन् जागर्ति ॥३५॥ हे नृप, त्वमत्रागतोऽसि एतद्दिष्ट्या । त्वं यान् विषयानिच्छसि तानहं ते स्वसेवकैः संपादयिष्यामि ॥३६॥ हे विभो, मया सह कामभोगान् शतं समा इमां पुरीमाश्रित्य भुंक्ष्व ॥ ३७ ॥ हे वीर, इह विषयसुखानभिज्ञं परलोकसाधनानुष्ठानरहितं त्वत्तोऽन्यं कं नु रमये ॥३८॥ अत्र गृहस्थाश्रमे स्थितान् धर्मार्थकाममोक्षान् पुत्रसुखादींश्च यतयो न विदुः ॥३९॥ अस्मिन् संसारे गृहस्थाश्रमः पितृदेवर्षिमनुष्यादीनामात्मनश्च सुखकर इति वेदविदो वदंति ॥४०॥ हे वीर, प्रियदर्शनं त्वादृशं प्राप्तं पतिं मादृशी स्त्री का न वृणीत ॥४१॥ हे महाभुज, तव भुजयोः कस्याः स्त्रिया मनो न सज्जेत् ॥४२॥ नारद उवाच ॥ हे प्राचीनबर्हिः, एवं तौ दंपती[1] परस्परं संभाष्य पुरीं[2] प्रविश्य वर्षशतं मुमुदाते ॥४३॥ तत्र[3]तत्र गायकैः[4] ललितं गीयमानः स्त्रीभिः[5] सह क्रीडन् ऊष्मणा तप्तः सन् नंदीं[6] प्राविशत् ॥४४॥ यस्याः पुर्या उपरि सप्त[7] द्वाराणि संति द्वे[8] अधः स्तः ॥४५॥ तत्र पंच पूर्वतः । द्वे दक्षिणोत्तरे[9] । द्वे पश्चिमे ॥ ४६ ॥ तत्र पुरंजनः खद्योताविर्मुखीति नामकेन द्वारद्वयेन[10] विभ्राजितं[11] नाम देशं याति ॥ ४७ ॥ नलिनीनालिनीति नामकेन द्वारद्वयेन[12] सौरभं[13] नाम जनपदं याति ॥ ४८ ॥ ॥

इहाद्य संतमात्मानं विदाम न ततः परम् ॥ येनेयं निर्मिता वीर पुरी शरणमात्मनः ॥३४॥ एते सखायः सख्यो मे नरा नार्यश्च मानद ॥ सुप्तायां मयि जागर्ति नागोऽयं पालयन्पुरीम् ॥ ३५ ॥ दिष्ट्यागतोऽसि भद्रं ते ग्राम्यान्कामानभीप्ससे ॥ उद्वहिष्यामि तांस्तेऽहं स्वबंधुभिररिंदम ॥ ३६ ॥ इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो ॥ मयोपनीतान्गृह्णानः कामभोगान् शतं समाः ॥ ३७ ॥ कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम् ॥ असंपरायाभिमुखमश्वस्तनविदं पशुम् ॥ ३८ ॥ धर्मो ह्यत्रार्थकामौ च प्रजानंदोऽमृतं यशः ॥ लोका विशोका विरजा यान्न केवलिनो विदुः ॥ ३९ ॥ पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह ॥ क्षेम्यं वदंति शरणं भवेऽस्मिन्यद्गृहाश्रमः ॥ ४० ॥ का नाम वीर विख्यातं वदान्यं प्रियदर्शनम् ॥ न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिम् ॥ ४१ ॥ कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज ॥ योऽनाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुम् ॥ ४२ ॥ नारद उवाच ॥ इति तौ दंपती तत्र समुद्य समयं मिथः ॥ तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः ॥ ४३ ॥ उपगीयमानो ललितं तत्र तत्र च गायकैः ॥ क्रीडन्परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ ॥ ४४ ॥ सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः ॥ पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ॥ ४५ ॥ पंच द्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा ॥ पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये॥४६॥ खद्योताऽविर्मुखी च प्राग् द्वारावेकत्र निर्मिते ॥ विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ॥४७॥ नलिनी नालिनी च प्राग् द्वारावेकत्र निर्मिते॥ अवधूतसखस्ताभ्यां विषयं याति सौरभम् ॥४८॥

---

१ जीवबुद्धी । २ मनुष्यशरीरम् । ३ जाग्रदवस्थायाम् । ४ स्रक्चंदनादिभिः । ५ विषयवासनाभिः सह । ६ सुषुप्त्यवस्थाम् । ७ कर्णनेत्रनासिकामुखच्छिद्राणि । ८ गुदशिश्नच्छिद्रे । ९ दक्षिणोत्तरकर्णच्छिद्रे । १० चक्षुर्भ्याम् । ११ रूपविषयम् । १२ नासिकाभ्याम् ॥ १३ गंधविषयम् ।

मुख्यानाम पुरस्ताद्द्वास्तयाऽपणबहूदनौ ॥ विषयौ याति पुरराड्रसज्ञविपणान्वितः ॥४९॥ पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरंजनः ॥
राष्ट्रं दक्षिणपंचालं याति श्रुतधरान्वितः ॥ ५० ॥ देवहूर्नाम पुर्या द्वा उत्तरेण पुरंजनः ॥ राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः
॥५१॥ आसुरी नाम पश्चाद्द्वास्तया याति पुरंजनः ॥ ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥५२॥ निर्ऋतिर्नाम पश्चाद्द्वास्तया
याति पुरंजनः ॥ वैशसं नाम विषयं लुब्धकेन समन्वितः ॥५३॥ अंधावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ ॥ अक्षण्वतामधिपतिस्ताभ्यां
याति करोति च ॥ ५४ ॥ स यर्ह्यंतःपुरगतो विषूचीनसमन्वितः ॥ मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम्
॥५५॥ एवं कर्मसु संसक्तः कामात्मा वंचितोऽबुधः ॥ महिषी यद्यदीहेत तत्तदेवान्ववर्तत ॥५६॥ क्वचित्पिबंत्यां पिबति मदिरां मदविह्वलः ॥
अश्नंत्यां क्वचिदश्नाति जक्षत्यां सह जक्षति ॥ ५७ ॥ क्वचिद्गायति गायंत्यां रुदंत्यां रुदति क्वचित् ॥ क्वचिद्धसंत्यां हसति
जल्पंत्यामनु जल्पति ॥५८॥ क्वचिद्धावति धावंत्यां तिष्ठंत्यामनु तिष्ठति ॥ अनु शेते शयानायामन्वास्ते क्वचिदासतीम् ॥५९॥
क्वचिच्छृणोति शृण्वंत्यां पश्यंत्यामनु पश्यति ॥ क्वचिज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृशति क्वचित् ॥ ६० ॥ क्वचिच्च शोचतीं जायामनु
शोचति दीनवत् ॥ अनु हृष्यति हृष्यंत्यां मुदितामनु मोदते ॥६१॥ विप्रलब्धो महिष्यैवं सर्वप्रकृतिवंचितः ॥ नेच्छन्ननुकरोत्यज्ञः
क्लैब्यात्क्रीडामृगो यथा ॥६२॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने पंचविंशोऽध्यायः ॥ २५॥
॥ नारद उवाच ॥ स एकदा महेष्वासो रथं पंचाश्वमाशुगम् ॥ द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबंधुरम् ॥ १ ॥ ॥

एकेन मुख्यानामकेन द्वारेणा[1]ऽऽपण[2]बहूदनौ नाम देशौ याति ॥४९॥ पितृहूर्नाम दक्षिणद्वारं तेन दक्षिणपंचालं[3] नाम देशं याति ॥ ५० ॥ देवहूर्नामोत्तरद्वारं तेनोत्तरपंचालं नाम देशं याति ॥५१॥ आसुरीनामकेनैकेनाधोद्वारेण ग्रामकं[4] नाम देशं याति ॥५२॥ अन्येन निर्ऋतिनाम्ना पश्चाद्द्वारेण वैशसं[5] नाम देशं याति ॥५३॥ तत्र पुर्यां पौराणां मध्ये निर्वाक्पेशस्कृन्नामकौ द्वावंधौ[6] सेवकौ तयोरेकेन[7] याति अपरेण[8] करोति ॥५४॥ ततः पुरंजनो विषूचीननामकेन[9] प्रधानेन सहांतःपुरं[10] गतः सन् स्त्रीपुत्रै[11]र्जनितं मोहं प्रसादं हर्षं वा प्राप्नोति ॥५५॥ एवं पुरंजनः कर्मासक्तः सन् स्त्री यथा करोति तथाऽऽनुवर्तते स्म ॥५६॥ क्वचित्तस्यां मदिरां पिबंत्यां सत्यां स्वयमपि पिबति ॥५७॥ क्वचित् गायंत्यां सत्यां स्वयं गायति । क्वचित् रुदंत्यां स्वयं रोदिति। क्वचिद्धसंत्यां हसति॥५८॥क्वचिद्धावंत्यां धावति । तिष्ठंत्यां तिष्ठति ॥५९॥ क्वचिच्छृण्वंत्यां श्टणोति। पश्यंत्यां पश्यति ॥६०॥ क्वचिच्छोचंत्यां शोचति । हृष्यंत्यां हृष्यति ॥६१॥ एवं स्त्रिया वंचितः सन् क्रीडामृग इवानुकरोति स्म ॥६२॥ इति श्रीमद्भागवतचू॰ चतु॰ पंचविंशोऽध्यायः॥२५॥ षड्विंशे मृगयाव्याजात्स्वप्नजागरणोक्तितः। सद्बुद्धित्यागयोगाभ्यां संसृतिः सा प्रपंच्यते ॥ १ ॥ नारद उवाच ॥ एकदा स राजा एकादश[12]चमूनाथो धनुर्बाणान् प्रगृह्य पंचाश्वं[13] द्वीषं[14] द्विचक्र[15]मेकाक्षं[16] त्रिध्वजं[17]

---

[1] मुखेन ।
[2] भाषणभोजने ।
[3] शब्दम् ।
[4] स्त्रीसंभोगम् ।
[5] मलविसर्गम् ।
[6] पादहस्तौ ।
[7] पादेन ।
[8] हस्तेन ।
[9] मनसा ।
[10] हृदयं गतः सन् ।
[11] बुद्धींद्रियपरिणामैः ।
[12] एकादशो मनोरूपश्चमूनाथः सेनापतिर्यस्य सः ।
[13] पंच ज्ञानेंद्रियाण्यश्वा यस्य ।
[14] द्वे अहंताममते ईषे दंडिके यस्य ।
[15] द्वे पुण्यपापे चक्रे यस्य ।
[16] एकं प्रधानमक्षो यस्य ।
[17] त्रयो गुणा ध्वजा यस्य ।

पंचबंधनम् ॥ १ ॥ एकरश्मिं[2] एकसूतं[3] पंचप्रहरणं[4] पंच गतिप्रकारम्[5] ॥२॥ सुवर्णोपस्करं रथमास्थाय पंचप्रस्थं[6] वनं प्रविश्य ॥ ३ ॥ विवेकवतीं स्त्रियं[7] गृहे विहाय मृगयां चचार ॥४॥ ततः स बाणैर्वनगोचरान्[8] पशून् जघान[9] ॥५॥ किं च । राजा प्रख्यातश्राद्धादिष्वेव वने पशून् हन्यात् न नित्यश्राद्धादिषु ॥६॥ य एवं नियतं कर्म करोति स तेन कर्मणा न लिप्यते ॥७॥ यो नियमोल्लंघनेन कर्म करोति स बद्ध्यते ॥८॥ अथ पुरंजनबाणैर्हतानां मृगाणां नाशो बभूव ॥९॥ ततो मृगयायां शशान् वराहान् महिषान् गवयादीनन्यांश्च मारयन् ॥१०॥ क्षुतृड्भ्यां श्रांतो वनान्निवृत्य गृहं[10] प्राप्य स्नानोपहारादिकं कृत्वा शय्यां श्रितः

एकरश्म्येकदमनमेकनीडं द्विकूबरम् ॥ पंचप्रहरणं सप्तवरूथं पंचविक्रमम् ॥ २ ॥ हैमोपस्करमारुह्य स्वर्णवर्माक्षयेषुधिः ॥ एकादशचमूनाथः पंचप्रस्थमगाद्वनम् ॥३॥ चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः ॥ विहाय जायामतदर्हां मृगव्यसनलालसः ॥ ४ ॥ आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ॥ न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥५॥ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान्पशून्वने ॥ यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥६॥ य एवं कर्म नियतं विद्वान्कुर्वीत मानवः ॥ कर्मणा तेन राजेंद्र ज्ञानेन न स लिप्यते ॥७॥ अन्यथा कर्म कुर्वाणो मानारूढो निबध्यते ॥ गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः ॥ ८ ॥ तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः ॥ विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनाम् ॥९॥ शशान्वराहान्महिषान्गवयान्रुरुशल्यकान् ॥ मेध्यानन्यांश्च विविधान्विनिघ्नन् श्रममध्यगात् ॥ १० ॥ ततः क्षुत्तृट्परिश्रांतो निवृत्तो गृहमेयिवान् ॥ कृतस्नानोचिताहारः संविवेश गतक्लमः ॥११॥ आत्मानमर्हयांचक्रे धूपालेपस्रगादिभिः ॥ साध्वलंकृतसर्वांगो महिष्यामादधे मनः ॥ १२ ॥ तृप्तो हृष्टः सुदृप्तश्च कंदर्पाकृष्टमानसः ॥ न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीम् ॥१३॥ अंतःपुरःस्त्रियोऽपृच्छद्विमना इव वेदिषत् ॥ अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा ॥१४॥ न तथैतर्हि रोचंते गृहेषु गृहसंपदः ॥ यदि न स्याद्गृहे माता पत्नी वा पतिदेवता ॥ व्यंगे रथ इव प्राज्ञः को नामासीत दीनवत् ॥ १५ ॥ क्व वर्तते सा ललना मज्जंतं व्यसनार्णवे ॥ या मामुद्धरते प्रज्ञां दीपयंती पदे पदे ॥१६॥ रामा ऊचुः ॥ नरनाथ न जानीमस्त्वत्प्रिया यद्व्यवस्यति ॥ भूतले निरवस्तारे शयानां पश्य शत्रुहन् ॥ १७ ॥ ॥

॥११॥ ततः स्रक्चंदनादिभिरात्मानं भूषयन् कामेन व्याप्तो गृहिणीं सस्मार ॥१२॥ तदा भोजनादिना तृप्तः आनंदयुक्तः स्त्रियं शोधयन् तां न दृष्टवान् ॥१३॥ ततः खिन्नः सन् पत्न्या दासीः पप्रच्छ । हे दास्यः, वः पूर्ववत् कुशलमस्ति किम् । अद्य मम गृहसंपदो न रोचंते ॥१४॥ यदि माता पत्नी वा गृहे न स्यात् तर्हि चक्रादिहीने रथ इव गृहे कस्तिष्ठेत् ॥१५॥ किंच । या दुःखसमुद्रान्मामुद्धरते सा ललना क्वास्ति ॥१६॥ एवं श्रुत्वा दास्य ऊचुः । हे नरनाथ, तव प्रिया मनसि यन्निश्चिनोति तद्वयं न जानीमः । भूतले शयानां तां पश्य ॥ १७ ॥ ॥ ॥

---

१ पंच प्राणा बंधनानि यस्य । २ एकं मनो रश्मिः प्रग्रहो यस्य । ३ एका बुद्धिः सूतो यस्य । ४ पंच शब्दादयो विषयाः प्रहरणानि गम्यस्थलानि यस्य । ५ पंच कर्मेंद्रियाणि गतिप्रकारा यस्य । ६ पंच शब्दादयो विषयाः प्रस्थाः सानवो यस्मिन् । ७ बुद्धिम् । ८ भजनीयविषयान् । ९ आत्मसात्कृतवान् । १० जागृतो भूत्वा ।

नारद उवाच ॥ तदा पुरंजनः स्वमहिषीं भुवि पतितां दृष्ट्वा तत्संगेन व्याकुलतां प्राप्य ॥१८॥ तां सांत्वयित्वा तस्याः पादौ स्पृष्ट्वा तामुत्संगे अरोप्योवाच॥१९॥
॥२०॥ पुरंजन उवाच ॥ हे सुभ्रूः, ते भृत्याः खलु अकृतपुण्याः । येषु कृतापराधेष्वपि प्रभवः दंडं न प्रयुंजते ॥२१॥ प्रभुणा भृत्येषु कृतो दंडः परमोऽनुग्रह
एव ॥२२॥ हे सुंदरदंतयुक्ते, त्वमात्मनो मधुरभाषणयुक्तं हास्यावलोकसंयुक्तं च मुखं मां दर्शय ॥२३॥ हे भार्ये, तव ये अपराधकर्तारस्ते ब्राह्मणहरिभक्तरहिताश्चेत्तर्हि
तेषु दंडं करोमि ॥२४॥ इतः पूर्वं त्वन्मुखं मया कुंकुमतिलकरहितं न दृष्टम् । इदानीमेवैवं कुतो जातम् ॥२५॥ तस्मात्कृतापराधस्य त्वामपृष्ट्वा
मृगयां गतस्य मे प्रसीद । अहो स्ववशगतं त्यक्तधैर्यं पुरुषं कामुका स्त्री कर्तुं योग्येऽर्थे का न भजेत ॥२६॥ इति श्रीमद्भागतचू० चतु० षड्विंशोऽध्यायः

नारद उवाच ॥ पुरंजनः स्वमहिषीं निरीक्ष्यावधुतां भुवि ॥ तत्संगोन्मथितज्ञानो वैक्लव्यं परमं ययौ ॥१८॥ सांत्वयन् श्लक्ष्णया
वाचा हृदयेन विदूयता ॥ प्रेयस्याः स्नेहसंरभलिंगमात्मनि नाभ्यगात् ॥१९॥ अनुनिन्येऽथ शनकैर्वीरोऽनुनयकोविदः ॥ पस्पर्श
पादयुगलमाह चोत्संगलालिताम् ॥२०॥ पुरंजन उवाच ॥ नूनं त्वकृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे ॥ कृतागस्स्वात्मसात्कृत्वा शिक्षादंडं
न युंजते ॥२१॥ परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः ॥बालो न वेद तत्तन्वि बंधुकृत्यममर्षणः ॥२२॥ सा त्वं मुखं सुदति सुभ्र्वनुरागभारव्रीडाविलंबविलसद्धसितावलोकम् ॥ नीलालकालिभिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यम् ॥ २३ ॥
तस्मिन्दधे दममहं तव वीरपत्नि योऽन्यत्र भूसुरकुलात्कृतकिल्बिषस्तम् ॥ पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र
दासात् ॥२४॥ वक्रं न ते वितिलकं मलिनं विहर्षं संरंभभीममविमृष्टमपेतरागम् ॥ पश्ये स्तनावपि शुचोपहतौ सुजातौ
बिंबाधरं विगतकुंकुमपंकरागम् ॥२५॥ तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य ॥ का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्नमुशती
न भजेत कृत्ये ॥२६॥ इति श्रीम०महा०चतु०पुरंजनोपाख्याने षड्विंशोऽध्यायः॥२६॥ ॥नारद उवाच॥
इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः ॥ पुरंजनी महाराज रेमे रमयती पतिम् ॥१॥ स राजा महिषीं राजन्सुस्नातां रुचिराननाम्
॥ कृतस्वस्त्ययनां तृप्तामभ्यनंददुपागताम् ॥२॥ तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः ॥ न कालरंहो बुबुधे दुरत्ययं
दिवा निशेति प्रमदापरिग्रहः ॥३॥ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः॥ तामेव वीरो मनुते परं यतस्तमोभिभूतो
न निजं परं च यत् ॥४॥ तयैवं रममाणस्य कामकश्मलचेतसः ॥ क्षणार्धमिव राजेंद्र व्यतिक्रांतं नवं वयः ॥ ५ ॥ ॥

॥२६॥ सप्तविंशे प्रियापुत्राद्यासक्त्या विस्मृतात्मनः । कालकन्याद्युपाख्यानैर्जरारोगाद्युदीर्यते ॥ १ ॥ नारद उवाच ॥ हे प्राचीनबर्हिः, इत्थं पुरंजनस्त्री पुरंजनं
विलासैर्वशमानीय पतिं रमयती सती स्वयं रेमे ॥१॥ स पुरंजनः सुस्नातां स्वलंकृतां सुंदरमुखीमागतां तां दृष्ट्वा आनंदं प्राप ॥२॥ स तया आलिंगित एकांते
तया सह गुह्यभाषणैर्गतविवेकः । पत्नी एव ज्ञानसाधनं यस्य तथाभूतः सन् दिवारात्रिगमनक्रमेण जातमायुष्यनाशं न बुबुधे ॥३॥ स तया संसारं प्रापितः सन्
स्वस्वरूपं ब्रह्म तत्साधनं ज्ञानं च न सस्मार ॥ ४ ॥ एवं तया सह रममाणस्य तस्य तारुण्यं वयः क्षणार्धमिव व्यतिक्रांतम् ॥ ५ ॥ ॥

स पुरंजनस्तस्यां पुरंजन्यामेकादशशतं पुत्रान्[1] जनयामास। तदा तस्यायुषोऽर्धं बभूव ॥६॥ तस्य दशोत्तरशतं कन्याः[2] मातृपितृयशस्कर्यो बभूवुः ॥७॥ स पुरंजनस्तेषां पुत्राणां स्नुषाभिस्तासां[3] कन्यानां च योग्यैर्वरैर्[4]विवाहान् विदधे ॥८॥ ततः पुत्राणामेकैकस्य शतं शतं पुत्रा अभवन्। यैः पुरंजनस्य वंशः पंचालदेशेषु[6] वृद्धिं गतः ॥९॥ एवं स पुत्रपौत्रादिषु वृद्धिं गतेन ममत्वेन बद्धो जातः॥१०॥ततः स पुरंजनो दीक्षां गृहीत्वा घोरैः पशुमारकैर्यज्ञैर्[5]देवादीनीजे। यथा भवान् ॥११॥ एवं कुटुंबासक्तस्य तस्य सतो जरारूपः काल आजगाम ॥१२॥ चंडवेगो[7] नाम गंधर्वाधिपतिरास। तस्य षष्ट्युत्तरशतत्रयं ३६० गंधर्वाः[8] सेवकाः ॥१३॥

तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः ॥ शतान्येकादश विराडायुषोऽर्धमथात्यगात् ॥६॥ दुहितृर्दशोत्तरशतं पितृमातृयशस्करीः ॥ शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ॥७॥ स पंचालपतिः पुत्रान्पितृवंशविवर्धनान् ॥ दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ॥८॥ पुत्राणां चाभवन्पुत्रा एकैकस्य शतं शतम् ॥ यैर्वै पौरंजनो वंशः पंचालेषु समेधितः ॥९॥ तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु ॥ निरूढेन ममत्वेन विषयेष्वन्वबध्यत ॥ १० ॥ ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः ॥ देवान्पितृन्भूतपतीन्नानाकामो यथा भवान् ॥११॥ युक्तेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः ॥ आससाद स वै कालो योऽप्रियः प्रिययोषिताम् ॥ १२ ॥ चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप ॥ गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम् ॥१३॥ गंधर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुंपंति सर्वकामविनिर्मिताम् ॥१४॥ ते चंडवेगानुचराः पुरंजनपुरं यदा ॥ हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः ॥१५॥ स सप्तभिः शतैरेको विंशत्या च शतं समाः ॥ पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे बली ॥१६॥ क्षीयमाणे स्वसंबंधे एकस्मिन्बहुभिर्युधा ॥ चिंतां परां जगामार्तः सराष्ट्रपुरबांधवः ॥ १७ ॥ स एव पुर्यां मधुभुक्पंचालेषु स्वपार्षदैः ॥ उपनीतं बलिं गृह्णन्स्त्रीजितो नाविदद्भयम् ॥ १८ ॥ कालस्य दुहिता काचित्त्रिलोकीं वरमिच्छती ॥ पर्यटंती न बर्हिष्मन्प्रत्यनंदत कश्चन ॥ १९ ॥ दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा ॥ या तुष्टा राजर्षये तु वृतादात्पूरवे वरम् ॥२०॥ कदाचिदटमाना सा ब्रह्मलोकान्महीं गतम् ॥ वव्रे बृहद्व्रतं मां तु जानती काममोहिता ॥२१॥ मयि संरभ्य विपुलमदाच्छापं सुदुःसहम् ॥ स्थातुमर्हसि नैकत्र मद्याच्ञाविमुखो मुने ॥२२॥ ॥

तावत्यः श्वेताः कृष्णाश्च गंधर्व्यो दास्यः[9] संति ॥१४॥ एवं स चंडवेगो[10] विंशत्यधिकैः सप्तशतैः ७२० सैन्यरूपैरनुचरैर्युक्तः सन् पुरंजनपुरं हर्तुं प्रारेभे ॥१५॥ तदा तैर्गंधर्वादिभिः साकं पंचशीर्षा[11] नगररक्षकः[12] शतं समा युयुधे ॥१६॥ ततः स पुरपालः स्वबले क्षीणे सति परां चिंतां प्राप ॥१७॥ स पुरंजनः पुर्यां स्वपार्षदैरानीतं बलिं गृह्णन् स्त्रीजितो भयं नालोचितवान् ॥१८॥ हे राजन्, एतस्मिन् काले कालस्य काचित्कन्या[13] पतिमिच्छंती त्रिलोकीं बभ्राम। तां कश्चन नैच्छत् ॥१९॥ सा आत्मनो दुर्भगत्वेन लोके दुर्भगेति प्रख्याता जाता॥२०॥ एवं संचारं कुर्वती सा पथि मां[14] दृष्ट्वा वरीतुमैच्छत् ॥२१॥ तदा मया प्रत्याख्याता सा मे शापं

---

१ इंद्रियपरिणामान् । २ बुद्धिवृत्तीः । ३ हिताहितचिंताभिः । ४ विषयभोगैः । ५ कर्माणि । ६ शब्दादिविषयेषु । ७ संवत्सरः । ८ दिवसाः । ९ रात्रयः । १० संवत्सरः । ११ पंचवृत्तिः । १२ प्राणः । १३ जरा । १४ नारदम् ।

ददौ । हे मुने । त्वमेकत्र स्थातुं नार्हसि ॥२२॥ तदा मया प्रेरिता सा यवना[1]नामधिपतिं भयं[2] नाम पतिं वव्रे ॥२३॥ तदेवाह । हे वीर, त्वामीप्सितं पतिमहं वृणे । भूतैस्त्वत्प्राप्त्यर्थं कृतः संकल्पो न नश्यति । त्वं सर्वेषां प्राप्तो भवसि ॥२४॥ किंच । यो याच्यमानं न ददाति । यश्च दीयमानं न गृह्णाति तौ द्वौ प्रति दृष्ट्वा सतः शोचंति ॥२५॥ अतो हे भद्र, भजंतीं मां भजस्व ॥२६॥ तदा स यवनेश्वरो भयनामा कालकन्याया वचः श्रुत्वा देव[3]गुह्यं कर्तुमिच्छुः सन् हास्यपूर्वकं तां बभाषे ॥२७॥ हे कालकन्ये, मया ज्ञानदृष्ट्या तुभ्यमयं लोकः पतिर्निरूपितः । अभद्रामिति मत्वा कोऽपि जनस्त्वां नाभिनंदति ॥ २८ ॥ अतस्त्वं मे सेनया[4] सह संचर । कर्मनिर्मितं लोकं बलात्कारेण भुंक्ष्व च । त्वमेव मत्सैन्यसहायेन आत्मानं न वृणानानां जनानां नाशं करिष्यसि ॥२९॥ अयं प्रज्वारो[5] मम भ्रा-

ततो विहतसंकल्पा कन्यका यवनेश्वरम् ॥ मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥ २३ ॥ ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिम् ॥ संकल्पस्त्वयि भूतानां कृतः किल न रिष्यति ॥२४॥ द्वाविमावनुशोचंति बालावसदवग्रहौ ॥ यल्लोकशास्त्रोपनतं न राति न तदिच्छति ॥२५॥ अथो भजस्व मां भद्र भजतीं मे दयां कुरु ॥ एतावान्पौरुषो धर्मो यदार्ताननुकंपते ॥२६॥ कालकन्योदितवचो निशम्य यवनेश्वरः ॥ चिकीर्षुर्देवगुह्यं स सस्मितं तामभाषत ॥२७॥ मया निरूपितस्तुभ्यं पतिरात्मसमाधिना ॥ नाभिनंदति लोकोऽयं त्वामभद्रामसंमताम् ॥२८॥ त्वमव्यक्तगतिर्भुंक्ष्व लोकं कर्मविनिर्मितम् ॥ याहि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि ॥ २९ ॥ प्रज्वारोऽयं मम भ्राता त्वं च मे भगिनी भव ॥ चराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः ॥३०॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने सप्तविंशोऽध्यायः ॥२७॥ ॥ नारद उवाच ॥ सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः ॥ प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ॥१॥ त एकदा तु रभसा पुरंजनपुरीं नृप ॥ रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालिताम् ॥२॥ कालकन्यापि बुभुजे पुरंजनपुरं बलात् ॥ ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ॥३॥ तयोपभुज्यमानां वै यवनाः सर्वतोदिशम् ॥ द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीम् ॥४॥ तस्यां प्रपीड्यमानायामभिमानी पुरंजनः ॥ अवापोरुविधांस्तापान्कुटुंबी ममताकुलः ॥५॥ कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः ॥ नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ॥ ६ ॥ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् ॥ पुत्रान्पौत्रानुगामात्यान् जायां च गतसौहृदाम् ॥७॥

ताऽस्ति । त्वं च मे भगिनी भव । उभाभ्यां सहाहं[6] लोके गुप्तरूपेण विचरामि ॥३०॥ इति श्रीमद्भागवत चू० चतु० सप्तविंशोऽध्यायः ॥२७॥ अष्टाविंशे तु वैदर्भ्याख्यानेन स्त्रीविचिंतया । स्त्रीत्वं प्राप्तस्य दैवेन कदाचिन्मुक्तिरुच्यते ॥१॥ नारद उवाच ॥ हे बर्हिष्मन्, यवनेश्वरस्य भयनाम्नः[7] सैनिकाः[8] प्रज्वार[9]काल[10]कन्याभ्यां सह भूमिं विचरंतः संतः ॥१॥ एकदा जरत्[11]पन्नगपालितां पुरंजन[12]पुरीं रुरुधुः ॥२॥ तत्र कालकन्या तस्य पुरं बुभुजे ॥३॥ यवना द्वारैः प्रविश्य तां पुरीं पीडयामासुः ॥४॥ ततोऽभिमानी पुरंजनो बहुविधान् तापान् प्राप ॥५॥ स काल[13]कन्ययाऽलिंगितो नष्टशोभो गंधर्वयवनैर्हृतैश्वर्यः ॥६॥ विध्वंसितां स्वपुरीं आद-

---

[1] आधिव्याधिरूपाणाम् । [2] मृत्युम् । [3] मरणम् । [4] रोगादिसमुदायेन । [5] मारको वैष्णवो ज्वरः । [6] मृत्युः । [7] मृत्योः । [8] रोगव्याध्यादयः । [9] वैष्णवज्वरः । [10] जरा । [11] प्राणसंरक्षिताम् । [12] शरीरम् । [13] जरया ।

रमकुर्वाणान् पुत्रपौत्रसेवकप्रधानादीन् प्रीतिरहितां भार्यां च दृष्ट्वा ॥७॥ कालकन्यया ग्रस्तमात्मानं च दृष्ट्वा तत्प्रतीकारं[1] न लेभे ॥८॥ ततः पुरंजनो निःसारान् विषयान् सेवमानः पुत्रादींश्च लालयन् ॥९॥ गंधर्वयवनैर्वेष्टितां कालकन्योपमर्दितां पुरीं त्यक्तुमुपचक्रमे ॥१०॥ तदा प्रज्वारो भयनाम्नः स्वभ्रातुः प्रियचिकीर्षया तां पुरीं ददाह ॥११॥ पुर्यां दह्यमानायां सत्यां पौरसहितः पुत्रादिसहितश्च पुरंजनो दुःखं प्राप ॥१२॥ तदा यवनोपरुद्धायतनः[2] पुरपालस्त्रासं[3] प्राप्तः सन् ॥१३॥ कालकन्यया ग्रस्तां पुरीं रक्षितुं न शेके । ततस्तां त्यक्त्वा गंतुमैच्छत् ॥१४॥ शिथिलावयवो[4] राजा यवनै रुद्धः सन् घुरघुरध्वनिं चकार ॥१५॥ स देहस्त्रीपु-

आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान् ॥ दुरंतचिंतामापन्नो न लेभे तत्प्रतिक्रियाम् ॥८॥ कामानभिलषन्दीनो यातयामांश्च कन्यया ॥ विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ॥९॥ गंधर्वयवनाक्रांतां कालकन्योपमर्दिताम् ॥ हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥१०॥ भयनाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः ॥ ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥११॥ तस्यां संदह्यमानायां सपौरः सपरिच्छदः ॥ कौटुंबिकः कुटुंबिन्या उपातप्यत सान्वयः ॥१२॥ यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया ॥ पुर्यां प्रज्वारसंसृष्टः पुरपालोऽन्वतप्यत ॥१३॥ न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः ॥ गंतुमैच्छत्ततो वृक्षकोटरादिव सानलात् ॥१४॥ शिथिलावयवो यर्हि गंधर्वैर्हृतपौरुषः ॥ यवनैररिभी राजन्नुपरुद्धो रुरोदह ॥१५॥ दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् ॥ स्वत्वावशिष्टं यत्किंचिद्गृहकोशपरिच्छदम् ॥१६॥ अहंममेति स्वीकृत्य गृहेषु कुमतिर्गृही ॥ दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥१७॥ लोकांतरं गतवति मय्यनाथा कुटुंबिनी ॥ वर्तिष्यते कथं त्वेषा बालकाननुशोचती ॥१८॥ न मय्यनाशिते भुंक्ते नास्नाते स्नाति मत्परा ॥ मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भयात् ॥१९॥ प्रबोधयति माऽविज्ञं व्युषिते शोककर्शिता ॥ वर्त्मैतद्गृहमेधीयं वीरसूरपि नेष्यति ॥२०॥ कथं नु दारका दीना दारकीर्वा परायणाः ॥ वर्तिष्यंते मयि गते भिन्ननाव इवोदधौ ॥२१॥ एवं कृपणया बुद्ध्या शोचंतमतदर्हणम् ॥ ग्रहीतुं कृतधीरेनं भयनामाभ्यपद्यत ॥२२॥ पशुवद्यवनैरेष नीयमानः स्वकं क्षयम् ॥ अन्वद्रवन्ननुपथाः शोचंतो भृशमातुराः ॥२३॥ पुरीं विहायोपगत उपरुद्धो भुजंगमः ॥ यदा तमेवानुपुरी विशीर्णा प्रकृतिं गता ॥ २४ ॥

त्रपौत्रादि सर्वं ममेति स्वीकृत्य ॥१६॥ नगरीवियोगकाले स्त्रीपुत्रकन्यादीन् दध्यौ ॥१७॥ तत्र स्त्रीध्यानमाह । अहो मयि लोकांतरं गते सति बालकानां चिंतां कुर्वाणा गतनाथैषा स्त्री कथं वर्तिष्यते ॥१८॥ एषा मय्यभुक्ते सति न भुंक्ते । मयि रुष्टे सति अतिभीता भवति ॥१९॥ एषा मयि लोकांतरं गते सति मद्वियोगातुरा भूत्वा गृहस्थधर्मं पालयिष्यति मरिष्यति वा किम् ॥२०॥ किंच । एते दीनाः पुत्राः कन्याश्च मयि गते सति कथं वर्तिष्यंते ॥२१॥ हे बर्हिष्मन्, एवं बुद्ध्या शोचंतं पुरंजनं ग्रहीतुं भयनामा[5] प्राप ॥२२॥ ततो यदा एष यवनैः[6] स्वस्थानं[7] नीयमानस्तदा तस्य सेवकाः[8] शोचंतः संतस्तमनु जग्मुः ॥२३॥ यदा भुजंगमः[9] पुरीं विहाय गतस्तदा

---

[1] जरानिवृत्त्युपायम् । [2] यवनै रोगैरुपरुद्धानि आयतनानि हृदयनाभिकंठादीनि निवासस्थ नानि यस्य सः । [3] प्राणः । [4] शिथिलाः स्वाधीनतारहिता अवयवाः करचरणादयो यस्य सः । [5] मृत्युः । [6] रोगैः । [7] मृत्युम् । [8] प्राणादयः । [9] सर्पः प्राणः ।

पुरी छिन्नभिन्ना सती स्वस्वरूपं[1] प्राप ॥२४॥ स पुरंजनो बलीयसा यवनेन[2] कृष्यमाणोऽज्ञानाविष्टः सन् पूर्वसखं[3] न सस्मार ॥२५॥ तेन यज्ञे ये हताः पशवस्ते कुठारमयैः शृंगैस्तं चिच्छिदुः॥२६॥ स स्त्रीसंगदूषितः सन् शाश्वतीः समा अनंतपारे तमसि[4] मग्नो दुःखमनुभूय ॥ २७ ॥ तामेव स्त्रीमंतकाले मनसा ध्यायन् द्वितीयजन्मनि विदर्भ[5]राजस्य कन्या बभूव ॥२८॥ तां मलयध्वजः[6] पांड्यो[7] युधि राजन्यान् विनिर्जित्योपयेमे ॥ २९ ॥ स तस्यां सप्त[8] पुत्रान् ऐकां[9] कन्यां च जनयामास ॥३०॥ तेषां सप्तानामपि एकैकं[10]स्यार्बुदमर्बुदं पुत्रा अभवन् ॥३१॥ तां मलयध्वजकन्यामगस्त्य[11] उपयेमे । तस्यां दृढच्युतो[12] मुनिर्जातः । तस्येध्मवाहः[13]

विकृष्यमाणः प्रसभं यवनेन बलीयसा ॥ नाविंदत्तमसाऽऽविष्टः सखायं सुहृदं पुरः ॥२५॥ तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना ॥ कुठारैश्चिच्छिदुः क्रुद्धाः स्मरंतोऽमीवमस्य तत् ॥२६॥ अनंतपारे तमसि मग्नो नष्टस्मृतिः समाः ॥ शाश्वतीरनुभूयार्तिं प्रमदासंगदूषितः ॥२७॥ तामेव मनसा गृह्णन्बभूव प्रमदोत्तमा ॥ अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि ॥ २८ ॥ उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ॥ युधि निर्जित्य राजन्यान्पांड्यः परपुरंजयः ॥ २९ ॥ तस्यां स जनयांचक्र आत्मजामसितेक्षणाम् ॥ यवीयसः सप्त सुतान्सप्तद्रविडभूभृतः ॥३०॥ एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदम् ॥ भोक्ष्यते यद्वंशधरैर्महीमन्वंतरं परम् ॥३१॥ अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् ॥ यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः ॥ ३२ ॥ विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः ॥ आरिराधयिषुः कृष्णं स जगाम कुलाचलम् ॥३३॥ हित्वा गृहान्सुतान्भोगान्वैदर्भी मदिरेक्षणा ॥ अन्वधावत पांड्येशं ज्योत्स्नेव रजनीकरम् ॥३४॥ तत्र चंद्रवसा नाम ताम्रपर्णी वटोदका ॥ तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ॥३५॥ कंदाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः ॥ वर्तमानः शनैर्गात्रकर्षणं तप आस्थितः ॥३६॥ शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये ॥ सुखदुःखे इति द्वंद्वान्यजयत्समदर्शनः ॥३७॥ तपसा विद्यया पक्वकषायो नियमैर्यमैः ॥ युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः॥३८॥ आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः॥ वासुदेवे भगवति नान्यद्वेदोद्वहन्रतिम् ॥३९॥ स व्यापकतयाऽऽत्मानं व्यतिरिक्ततयाऽऽत्मनि॥ विद्वान्स्वप्न इवामर्शसाक्षिणं विरराम ह॥४०॥ साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप ॥ विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखम्॥४१॥

पुत्रोऽभूत् ॥३२॥ स मलयध्वजः पुत्रेभ्यो भूमिं विभज्य कृष्णमाराधयितुं कुलाचलं जगाम॥३३॥ तदा वैदर्भी[14] गृहपुत्रादीन् हित्वा पतिमनु जगाम ॥३४॥ ततो मलयध्वजस्तत्र कुलाचले ताम्रपर्ण्यादि[15]नदीजलैर्मनोमलं क्षालयन् ॥३५॥ कंदमूलफलपुष्पादिभिः कृताहारः सन् तपश्चचार ॥ ३६ ॥ स शीतोष्णक्षुधातृषासुखदुःखादिद्वंद्वानि जितवान् ॥३७॥ तपसा दग्धकामादिवासनो ब्रह्मण्यात्मानं युयुजे ॥३८॥ स भगवति रतिं कुर्वन् दिव्यवर्षशतमेकत्र वृक्ष इव स्थिर आस्ते स्म ॥३९॥ एवं वर्तमानः स परमात्मरूपं जीवात्मानं ज्ञात्वा प्रपंचाद्विरराम ॥ ४० ॥ तदेवाह । स हरिरूपेण गुरुणोक्तेन ज्ञानेन ॥ ४१ ॥ ॥

---

[1] पंचमहाभूतरूपत्वम् । [2] मृत्युना । [3] ईश्वरम् । [4] नरकमध्ये । [5] कर्मठस्य धार्मिकस्य । [6] भगवद्भक्तः । [7] बुद्धिमान् । [8] श्रवणं कीर्तनं स्मरणं पादसेवनं अर्चनं वंदनं दास्यमिति सप्त । [9] श्रीकृष्णसेवारुचिम् । [10] भक्तीनामवांतरभेदाः । [11] मनः । [12] वैराग्यम् । [13] गुरूपसत्तिः । [14] पुरंजनी । [15] इडादिना वायुपूरणादिप्रकारेण ।

ब्रह्मण्यात्मानमात्मनि ब्रह्म चेक्षमाणः सन् ततो व्यवधायकमीक्षणमपि विहाय संसारादुपरराम ॥४२॥ अथ वैदर्भी भोगान् हित्वा प्रेम्णा धर्मज्ञं पतिं[1] पर्यचरत् ॥४३॥ सा चीरवासा व्रतेन कृशा पत्युः समीपे बभौ ॥४४॥ सा यदा सुस्थिरासनं पतिं ब्रह्मण्युपरतमजानती तदा यथापूर्वं सिषेवे ॥४५॥ ततः सा पत्युः पादं सेवमाना सती यदा पादे ऊष्माणं नापश्यत्तदोद्विग्नहृदयाऽऽसीत् ॥४६॥ ततो वैदर्भी शोचंती सती वने सुस्वरं रुरोद जगाद च ॥४७॥ हे राजर्षे, उत्तिष्ठोत्तिष्ठ । चौरेभ्यो बिभ्यतीमिमां महीं पातुर्हमसि ॥४८॥ एवं विलप्य भर्तुः पादयोः पतिता सती दुःखाश्रूणि प्रवर्तयामास ॥४९॥ ततः काष्ठमयीं चितिं रचयित्वा तस्योपरि पतिदेहं निधायाग्निं प्रदीप्य तस्मिन्प्रवेष्टुं मनो दधे ॥५०॥ तदा पूर्वतरः कश्चित्सखा ब्राह्मणरूपेण तत्रागत्य तां बोधयामास ॥५१॥ ब्राह्मण

परे ब्रह्मणि चात्मानं परं ब्रह्म तथाऽऽत्मनि ॥ वीक्षमाणो विहायेक्षामस्मादुपरराम ह ॥४२॥ पतिं परमधर्मज्ञं वैदर्भी मलयध्वजम् ॥ प्रेम्णा पर्यचरद्धित्वा भोगान्सा पतिदेवता ॥४३॥ चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा ॥ बभावुपपतिं शांता शिखा शांतमिवानलम् ॥४४॥ अजानती प्रियतमं यदोपरतमंगना ॥ सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ॥४५॥ यदा नोपालभेतांघ्रावूष्माणं पत्युरर्चती ॥ आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा ॥४६॥ आत्मानं शोचती दीनमबंधुं विक्लवाश्रुभिः ॥ स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ॥४७॥ उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलाम् ॥ दस्युभ्यः क्षत्रबंधुभ्यो बिभ्यतीं पातुमर्हसि ॥ ४८ ॥ एवं विलपती बाला विपिनेऽनुगता पतिम् ॥ पतिता पादयोर्भर्तू रुदत्यश्रूण्यवर्तयत् ॥४९॥ चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥ आदीप्य चानुमरणे विलपंती मनो दधे ॥ ५० ॥ तत्र पूर्वतरः कश्चित्सखा ब्राह्मण आत्मवान् ॥ सांत्वयन्वल्गुना साम्ना तामाह रुदतीं प्रभो ॥५१॥ ब्राह्मण उवाच ॥ का त्वं कस्यासि को वायं शयानो यस्य शोचसि ॥ जानासि किं सखायं मां येनाग्रे विचचर्थ ह ॥५२॥ अपि स्मरसि चात्मानमविज्ञातसखं सखे ॥ हित्वा मां पदमन्विच्छन्भौमभोगरतो गतः ॥ ५३ ॥ हंसावहं च त्वं चार्य सखायौ मानसायनौ ॥ अभूतामंतरा वौकः सहस्रपरिवत्सरान् ॥५४॥ स त्वं विहाय मां बंधो गतो ग्राम्यमतिर्महीम् ॥ विचरन्पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ॥५५॥ पंचारामं नवद्वारमेकपालं त्रिकोष्ठकम् ॥ षट्कुलं पंचविपणं पंचप्रकृति स्त्रीधवम् ॥५६॥ पंचेंद्रियार्था आरामा द्वारः प्राणा नव प्रभो ॥ तेजोऽब्नानि कोष्ठानि कुलमिंद्रियसंग्रहः ॥ ५७ ॥ ॥

उवाच ॥ त्वं का । अयं तव कोऽस्ति । यं त्वं शोचसि । मां सखायं त्वं जानासि किम् ॥५२॥ हे सखे, मां हित्वा विषयसुखं भोक्तुं त्वं भूमौ गतः । स त्वं मां स्मरसि किम् ॥५३॥ हे आर्य, त्वमहं च मानस[3]सरोवरे स्थितौ द्वौ हंसौ स्वः ॥५४॥ हे बंधो, स त्वं मां विहाय ग्राम्यसुखं भोक्तुं महीं विचरन् कयाचित्स्त्रिया निर्मितं नगरमद्राक्षीः ॥५५॥ कथंभूतं तत् । पंच[4] उपवनानि यस्य, नव द्वाराणि यस्य, एकः पालो यस्य, त्रीणि कोष्ठानि यस्य, षट् वणिजो यस्मिन्, पंच हट्टा यस्मिन्, स्त्री स्वामिनी यस्मिन् ॥ ५६ ॥ एषामर्थमाह । पंच शब्दादिविषया उपवानि । नवेंद्रियच्छिद्राणि द्वाराणि । एकः प्राणो रक्षकः । त्रीणि पृथिव्य-

---

[1] भगवद्भक्तम् । [2] ईश्वरः । [3] अंतःकरणसरोवरे । [4] पंचोपवनादीनामर्थोऽग्रेतनश्लोकद्वये मूल एव व्याख्यातोऽस्ति ।

सेजांसि कोष्ठानि । षट् ज्ञानेंद्रियमनांसि वणिजः । पंच कर्मेंद्रियाणि हट्टाः । स्त्री बुद्धिः स्वामिनी । यत्र नगरे प्रविष्टः पुमान् स्त्रीवशः सन्नात्मानं नावबुध्यते ॥५७॥५८॥ तस्मिन् पुरे स्त्रिया रममाणस्त्वं तत्संगादीदृशीं पापीयसीं दशां प्राप्तः ॥५९॥ न त्वं विदर्भकन्या । नायं ते पतिः । यः पुरंजन्या[1] नवमुखे पुरे रुद्धः स त्वं पुरंजनो[2]ऽपि न ॥६०॥ इयं सर्वा माया मया सृष्टा । आवां हंसौ स्वः । आवयोर्गतिं[3] पश्य ॥६१॥ अहं भवान् त्वं चाहम् । एवं जानीहि ॥६२॥ यथा आदर्शे पुरुष आत्मानं द्विविधमीक्षते तथैव आवयोरंतरम् ॥६३॥ एवं मानसो[4] हंसो[5] हंसेन[6] प्रतिबोधितः सन् पूर्वनष्टां स्मृतिं प्राप ॥ ६४ ॥ नारद उवाच ॥ हे बर्हिष्मन्, एतदध्यात्मं तव पारोक्ष्येण[7] मया कथितम् । यस्मादीश्वरः परोक्षप्रियोऽस्ति ॥६५॥ इति श्रीमद्भागवतचू० चतुर्थस्कंधे अष्टाविंशोऽध्यायः ॥ २८ ॥ ॥

विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया ॥ शक्त्यधीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते ॥५८॥ तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः ॥ तत्संगादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ॥५९॥ न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव ॥ न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया ॥६०॥ माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् ॥ मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिम् ॥६१॥ अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भो ॥ न नौ पश्यंति कवयश्छिद्रं जातु मनागपि ॥६२॥ यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ॥ द्विधाभूतमवेक्षेत तथैवांतरमावयोः ॥ ६३॥ एवं स मानसो हंसो हंसेन प्रतिबोधितः ॥ स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ॥६४॥ बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम् ॥ यत्परोक्षप्रियो देवो भगवान्विश्वभावनः ॥६५॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्यानेऽष्टाविंशतितमोऽध्यायः ॥२८॥ ॥ प्राचीनबर्हिरुवाच ॥ भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते ॥ कवयस्तद्विजानंति न वयं कर्ममोहिताः ॥१॥ नारद उवाच ॥ पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरम् ॥ एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥२॥ योऽविज्ञाताऽऽहृतस्तस्य पुरुषस्य सखेश्वरः ॥ यन्न विज्ञायते पुंभिर्नामभिर्वा क्रियागुणैः ॥३॥ यदा जिघृक्षन्पुरुषः कात्स्न्र्येन प्रकृतेर्गुणान् ॥ नवद्वारं द्विहस्तांघ्रिं तत्रामनुत साध्विति ॥४॥ बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतम् ॥ यामधिष्ठाय देहेऽस्मिन्पुमान्भुंक्तेऽक्षभिर्गुणान् ॥५॥ सखाय इंद्रियगणा ज्ञानं कर्म च यत्कृतम् ॥ सख्यस्तद्वृत्तयः प्राणः पंचवृत्तिर्यथोरगः ॥६॥ बृहद्बलं मनो विद्यादुभयेंद्रियनायकम् ॥ पंचालाः पंच विषया यन्मध्ये नवखं पुरम् ॥ ७ ॥ ॥

ऊनत्रिंशे परोक्षार्थव्याख्यानेनोपसंहृतम् । स्त्रीसंगतो भवस्त्वीशसंगान्मुक्तिरिति स्फुटम् ॥१॥ प्राचीनबर्हिरुवाच ॥ हे भगवन्, वयं कर्ममोहितास्तव वचः सम्यङ्न विद्मः । तत् ज्ञानिनो जानंति । अतः स्पष्टतया वद ॥१॥ नारद उवाच । पुरंजनं नाम जीवं विद्यात् स एकद्वित्रिचतुष्पादं बहुपादमपादकं च शरीरं जनयति ॥२॥ तस्याविज्ञातनामकं सखायमीश्वरं जानीयात् ॥३॥ पुरं नाम भोगायतनं मनुष्यशरीरं द्विहस्तांघ्रिं विद्यात् ॥४॥ विवेकवतीं बुद्धिं प्रमदां जानीहि ॥५॥ तस्याः सखायो ज्ञानकर्मेंद्रियाणि । तस्या याः सख्यस्ता इंद्रियवृत्तयः ॥६॥ बृहद्बलं मनः । पंचालाः पंच विषयाः । यन्नवद्वारयुक्तं नगरं तन्मनुष्यशरीरं विद्धि ॥७॥

---

१ बुध्या । २ जीवः । ३ स्वरूपम् । ४ अंतःकरणे स्थितः । ५ जीवः । ६ ईश्वरेण । ७ साक्षादात्मज्ञानकथने तव चेतसि कथा नायाति अत एवमुक्तमिति भावः ।

अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति ॥ द्वे द्वे द्वारौ बहिर्याति यस्तदिंद्रियसंयुतः ॥ ८ ॥ अक्षिणी नासिके आस्यमिति
पंच पुरः कृताः ॥ दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ॥९॥ पश्चिमे इत्यधो द्वारौ गुदं शिश्नमिहोच्यते ॥ खद्योताऽविर्मु-
खी चात्र नेत्रे एकत्र निर्मिते ॥ रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥१०॥ नलिनी नालिनी नासे गंधः सौरभ उच्यते॥
घ्राणोऽवधूतो मुख्याऽऽस्यं विपणो वाग्रसविद्रसः ॥११॥ आपणो व्यवहारोऽत्र चित्रमंधो बहूदनम् ॥ पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः
स्मृतः ॥१२॥ प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञितम् ॥ पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् ॥१३॥ आसुरी मेढ्रमर्वाग्द्वा-
र्व्यवायो ग्रामिणां रतिः ॥ उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते ॥१४॥ वैशसं नरकं पायुर्लुब्धकोंऽधौ तु मे शृणु ॥ हस्तपादौ
पुमांस्ताभ्यां युक्तो याति करोति च ॥१५॥ अंतःपुरं च हृदयं विषूचिर्मन उच्यते ॥ तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः॥१६॥
यथा यथा विक्रियते गुणाक्तो विकरोति वा ॥ तथा तथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते ॥१७॥ देहो रथस्त्विंद्रियाश्वः संवत्सररयोऽग-
तिः ॥ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः ॥१८॥ मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूबरः ॥ पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः
॥१९॥ आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति ॥ एकादशेंद्रियचमूः पंचसूनाविनोदकृत् ॥ संवत्सरश्चंडवेगः कालो येनोप-
लक्षितः ॥२०॥ तस्याहानीह गंधर्वा गंधर्व्यो रात्रयः स्मृताः ॥ हरंत्यायुः परिक्रांत्या षष्ट्युत्तरशतत्रयम् ॥ २१ ॥ कालकन्या जरा
साक्षाल्लोकस्तां नाभिनंदति ॥ स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥२२॥ आधयो व्याधयस्तस्य सैनिका यवनाश्चराः ॥ भूतो-
पसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः ॥२३॥ एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः ॥ क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः॥२४॥

अक्षिणी नासिके कर्णौ मुखमिति सप्तोर्ध्वद्वाराणि । शिश्नगुदे अधोद्वारे विद्धि ॥८॥ तत्राक्षिणी नासिके मुखमिति पंच पूर्वद्वाराणि। दक्षिणद्वारं दक्षिणकर्णः। उत्तरद्वारमुत्तरकर्णं विद्धि ॥९॥ पश्चिमद्वारौ गुदशिश्ने । खद्योताविर्मुखी द्वे नेत्रे । ताभ्यां पुरंजनः पश्यति ॥१०॥ नलिनीनालिनीति द्वे नासिकाद्वारे । मुख्येति मुखम्। विपणो वागिंद्रियम् ॥११॥ अत्रापणो नाम भाषणम्। पितृहूर्दक्षिणः कर्णः । देवहूरुत्तरः कर्णः ।प्रवृत्तं निवृत्तं च शास्त्रं पंचालसंज्ञितं जानीहि ॥१२॥१३॥ आसुरीद्वारमुपस्थः।निर्ऋतिद्वारं गुदं विद्धि ॥१४॥ अंधद्वयं पादहस्तौ ताभ्यां याति करोति च ॥१५॥ अंतःपुरं हृदयम् । विषूचिर्मनः । तत्र मोहादिकं प्राप्नोति ॥१६॥ यथा बुद्धिः स्वप्नादिषु विक्रियते तथा जीवो देहेंद्रियादौ विक्रियते ॥१७॥ उक्तो यो रथस्तं स्वप्नदेहं विद्धि । पंचाश्वान् ज्ञानेंद्रियाणि । पुण्यपापे चक्रे विद्धि ॥१८॥ मनो रश्मिः । बुद्धिः सारथिः। हृदयं रथिन उपवेशस्थानम् ॥१९॥ एवंभूते रथे स्थितो जीवो मृगतृष्णारूपां स्वप्नावस्थां प्राप्नोति । एकादशेंद्रियाणि चमूः । चंडवेगः संवत्सरात्मकः कालः ॥२०॥ तस्य सेवका गंधर्वास्ते दिवसाः ३६० । तेषां पत्न्यो गंधर्व्यस्ताः शुक्लकृष्णा रात्रयः । ३६० । एते सर्वे मिलित्वा आयुर्हरंति ॥२१॥ कालकन्या जरा । मृत्युः क्षयाय तां साहाय्यार्थं जगृहे ॥२२॥ तस्य सेना आधयो व्याधयः । प्रज्वारो विविधज्वरः ॥२३॥ इत्यादि सर्वं ज्ञातव्यम् । एवं बहुविधैर्देवभूतात्मसंभवैर्दुखैर्जीवोऽज्ञानावृतो देहे शतवर्षाणि क्लिश्यमानः ॥२४॥ ॥ ॥

ममाहमिति कर्मकृत् कामलेशान् ध्यायन् शेते ॥२५॥यदा स्वप्रकाशस्वभावोऽपि जीव आत्मानं प्रकृतेः परं न जानाति तदा प्रकृतेर्गुणेषु सज्जते ॥ २६ ॥ ततो
गुणाभिमानी स सत्वरजस्तमोमयानि कर्माणि कुर्वन् ॥२७॥ तत्तत्सदृशान् स्वर्गादिलोकान् प्राप्नोति ॥ २८ ॥ क्वचित्पुमान् क्वचित्स्त्री क्वचिन्नपुंसको देवमनुष्यादिरूपो
वा भवति ॥२९॥ यथा क्षुधया पीडितः श्वानः गृहं गृहं चरन् दैवानुरूपं ताडणं भक्ष्यलाभं वा प्राप्नोति ॥३०॥ तथा विषयवासनाव्याप्तो जीवो
देवमनुष्यादियोनीर्गच्छन् दैवानुरूपं फलं प्राप्नोति ॥३१॥ आधिदैविकाधिभौतिकाध्यात्मिकेषु दुःखेषु जीवस्यैकतरेणापि वियोगो नास्ति । तत्तद्दुःखप्रतीकारः
स्याच्चेत्तर्हि सोऽपि दुःखरूप एव ॥३२॥ अत्र दृष्टांतः । यथा पुरुषोऽतिभारं शिरसा वहन् तं स्कंधेन धत्ते तद्वत् ॥३३॥ कर्मणां प्रतीकारः केवलं कर्म न भ-

प्राणेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः॥ शेते कामलवान्ध्यायन्ममाहमिति कर्मकृत्॥२५॥यदात्मानमविज्ञाय भगवंतं परं गुरुम्॥
पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक्॥२६॥ गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः॥ शुक्लं कृष्णं लोहितं वा यथा कर्माभिजायते
॥२७॥ शुक्लात्प्रकाशभूयिष्ठाँल्लोकानाप्नोति कर्हिचित्॥ दुःखोदर्कान् क्रियायासांस्तमःशोकोत्कटान्क्वचित्॥२८॥ क्वचित्पुमान्क्वचिच्च
स्त्री क्वचिन्नोभयमंधधीः॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः॥ २९॥ क्षुत्परीतो यथा दीनः सारमेयो गृहं गृहम्॥ चरन्विंदति
यद्दिष्टं दंडं मोदनमेव वा॥३०॥ तथा कामाशयो जीव उच्चावचपथा भ्रमन्॥ उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम्॥३१॥ दुःखेष्वेकतरेणापि
दैवभूतात्महेतुषु॥ जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया॥३२॥ यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन्॥ तं स्कंधेन
स आधत्ते तथा सर्वाः प्रतिक्रियाः॥३३॥ नैकांततः प्रतीकारः कर्मणां कर्म केवलम्॥ द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ
॥३४॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते॥ मनसा लिंगरूपेण स्वप्ने विचरतो यथा॥३५॥अथात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा॥
संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ॥ ३६॥ वासुदेवे भगवति भक्तियोगः समाहितः॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति
॥३७॥ सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः॥ शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः॥३८॥ यत्र भागवता राजन्साधवो विशदाशयाः
॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः॥३९॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति॥ ता
ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः॥४०॥ एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः॥न करोति हरेर्नूनं
कथामृतनिधौ रतिम्॥४१॥प्रजापतिपतिः साक्षाद्भगवान्गिरिशो मनुः॥ दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः॥ ४२॥ ॥

वति । यतो द्विविधमपि कर्म स्वप्ने स्वप्न इवाज्ञानेन प्राप्तम्॥३४॥ अर्थेऽविद्यमानेऽपि संसारो न निवर्तते॥३५॥तस्मादात्मनोऽज्ञानात् संसारो भवति । तन्नाशस्तु
गुरुरूपवासुदेवभक्त्यैव भवति ॥३६॥ स भक्तियोगो भगवत्कथाः शृण्वतः श्रद्दधानस्य च शीघ्रं स्यात् स च वैराग्यं ज्ञानं च जनयिष्यति ॥३७॥ ॥३८॥
यत्र स्वच्छांतःकरणा भगवद्गुणकथनश्रवणतत्पराः साधवः संति ॥३९॥ तत्र साधूनां मुखान्निर्गतं कथामृतं ये कर्णैः पिबंति तेषां क्षुधातृषाभयशोकमोहा न
बाधंते ॥ ४० ॥ एतैः क्षुधादिभिः पीडितो यः स हरिकथामृतनिधौ प्रीतिं न करोति ॥ ४१ ॥ किंच ब्रह्मा शिवो मनुर्दक्षादयः ॥ ४२ ॥ ॥

मरीचिः अत्रिः अंगिराः पुलस्त्यः पुलहः क्रतुः अहं भृगुः वसिष्ठः एते ॥४३॥ अद्यापि तपोविद्यासमाधिभिर्ये पश्यंतोऽपि न पश्यंति ॥ ४४ ॥ अतिविस्तरयुक्त वेदे वर्तमानाः पुमांसः तदुक्तं कर्म भजंतोऽपि ईश्वरं न विदुः ॥४५॥ यदा हरिर्यमनुगृह्णाति तदा स लोके कर्ममार्गे चासक्तां मतिं त्यजति ॥४६॥ तस्मात् हे बर्हिष्मन्, त्वं कर्मस्वर्थदृष्टिं मा कृथाः ॥४७॥ ये कर्मपरं वेदमाहुस्ते वेदतात्पर्यरूपमात्मतत्त्वं न विदुः ॥४८॥ हे राजन्, त्वं तु पूर्वाग्रैर्दर्भैः सर्वं भूमंडलमास्तीर्य पशुवधादहं यज्ञकर्तेत्यभिमानी सन् कर्मतत्त्वं विद्यास्वरूपं च न वेत्सि । यत् हरिं तोषयति तदेव कर्म । यया हरौ मतिर्भवति सैव विद्या ॥४९॥ स हरिः सर्वदेहधारिणामात्मेश्वरः प्रियतमश्च ॥५०॥ यस्मादणुमात्रमपि भयं न भवति सोऽतिप्रिय आत्मेति यो वेद स विद्वान् । स एव गुरुर्हरिश्च ॥५१॥ नारद

मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः ॥४३॥ अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः ॥ पश्यंतोऽपि न पश्यंति पश्यंतं परमेश्वरम् ॥ ४४ ॥ शब्दब्रह्मणि दुष्पारे चरंत उरुविस्तरे ॥ मंत्रलिंगैर्व्यवच्छिन्नं भजंतो न विदुः परम् ॥४५॥ यदायमनुगृह्णाति भगवानात्मभावितः ॥ स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥ ४६ ॥ तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु ॥ माऽर्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४७ ॥ स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः ॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥४८॥ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलम् ॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परम् ॥ तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥४९॥ हरिर्देहभृतामात्मा स्वयंप्रकृतिरीश्वरः ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥५०॥ स वै प्रियतमश्चात्मा यतो न भयमण्वपि ॥ इति वेद स वै विद्वान्यो विद्वान्स गुरुर्हरिः ॥ ५१ ॥ नारद उवाच ॥ प्रश्न एवं हि संछिन्नो भवतः पुरुषर्षभ ॥ अत्र मे वदतो गुह्यं निशामय सुनिश्चितम् ॥ ५२ ॥ क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षडंघ्रिगणसामसु लुब्धकर्णम् ॥ अग्रे वृकानसुतृपोऽविगणय्य यांतं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नम् ॥५३॥ सुमनःसमधर्मणां स्त्रीणां शरण आश्रमे पुष्पमधुगंधवत्क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैह्व्यौपस्थ्यादि विचिन्वंतं मिथुनीभूय तदभिनिवेशितमनसं षडंघ्रिगणसामगीतवदतिमनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रान्तान्काललवविशेषानविगणय्य गृहेषु विहरंतं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतांतोऽतःशरेण यमिह पराविध्यति तमिममात्मानमहो राजन्भिन्नहृदयं द्रष्टुमर्हसीति ॥ ५४ ॥ ॥ ॥

उवाच ॥ हे नृप, एवं भवतः प्रश्नस्योत्तरं कथितम् । अन्यच्च गुह्यं वदामि तच्छृणु ॥ ५२ ॥ हे राजन्, स्त्रिया सह मिलित्वा पुष्पवाटिकायामासक्तं, भ्रमरगायनश्रवणे लंपटं, अग्रे प्राणतर्पकान् स्थितान् वृकानविगणय्य यांतं, पृष्ठतश्च लुब्धकबाणेन भिन्नमेकं मृगं त्वं शोधय ॥ ५३ ॥ मृगोपमं जीवं वर्णयति । हे राजन्, स्त्रीणामाश्रमे स्त्रीभिः सह काम्यकर्मपरिपाकजं जिह्वाशिश्नतृप्तिकरं सुखलेशं विचिन्वंतं, स्त्रीपुत्रादिजनालापेष्वतिप्रलोभितकर्णं, अग्रे आयुर्हरतोऽहोरात्रानविगणय्य विहरंतं, पृष्ठतः प्राप्य मृत्युरूपो लुब्धको यं विध्यति तमात्मानं जीवं मृगवद्भिन्नहृदयं द्रष्टुमर्हसि ॥ ५४ ॥ ॥ ॥

एवं त्वमात्मनो मृगचेष्टितं विचार्य अंतर्हृदये चित्तमाकृष्य तस्मिन् चित्ते बहिर्वृत्तिं नियच्छ । गृहाश्रमं त्यक्त्वेश्वरं शरणं गत्वा सर्वसंसारान्निवृत्तो भव ॥५५॥ प्राचीनबर्हिरुवाच । हे नारद, भवान् यदभाषत तन्मया श्रुतम् । त्वयोक्तमेतत् तत्त्वमुपाध्याया न जानंति । यदि विदुस्तर्हि कुतो न ब्रूयुः ॥५६॥ अत उपाध्यायगतः संशयस्त्वया छिन्नः । अत्र त्वन्यः कश्चित्संशयो वर्तते ॥५७॥ हे नारद, नरो येन देहेनात्र कर्माण्यारभते तं देहमत्रैव त्यक्त्वा परलोके कर्मोपस्थापितेनान्येन देहेन इह कृतकर्मणां सुखदुःखादिफलानि प्राप्नोति ॥५८॥ इति ज्ञानिनां वादस्तत्र तत्र श्रूयते स कथं घटते ? । अन्यच्च । इह कृतं कर्मानंतरक्षण एव नश्यति तद्भोगः परलोके कथं घटते ? ॥५९॥ नारद उवाच ॥ हे नृप, येनैव मनःप्रधानेन लिंगदेहेन कर्मारभते तेनैव देहेनामुत्र कर्मफलं भुंक्ते ॥६०॥यथा स्वप्ने पुरुषः शयानमिमं जीवंतं जाग्रद्देहं त्यक्त्वा मनसि संस्काररूपेण प्रापितं कर्म जाग्रद्देहसदृशेनान्येन देहेन भुंक्ते तथा लोकांतरेऽपि कर्मफलं

स त्वं विचक्ष्व मृगचेष्टितमात्मनोंऽतश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते ॥ जह्यंगनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण ॥५५॥ राजोवाच ॥ श्रुतमन्वीक्षितं ब्रह्मन्भगवान्यदभाषत ॥ नैतज्जानंत्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ॥५६॥ संशयोऽत्र तु मे विप्र संछिन्नस्तत्कृतो महान् ॥ ऋषयोऽपि हि मुह्यंति यत्र नेंद्रियवृत्तयः ॥ ५७ ॥ कर्माण्यारभते येन पुमानिह विहाय तम् ॥ अमुत्रान्येन देहेन जुष्टानि स यदश्नुते ॥५८॥ इति वेदविदां वादः श्रूयते तत्र तत्र ह ॥ कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ॥ ५९ ॥ नारद उवाच ॥ येनैवारभते कर्म तेनैवामुत्र तत्पुमान् ॥ भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयम् ॥ ६० ॥ शयानमिममुत्सृज्य श्वसंतं पुरुषो यथा ॥ कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा ॥६१॥ ममैते मनसा यद्यदसावहमिति ब्रुवन् ॥ गृह्णीयात्तत्पुमान्राद्धं कर्म येन पुनर्भवः ॥ ६२ ॥ यथानुमीयते चित्तमुभयैरिंद्रियेहितैः ॥ एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ॥६३॥ नानुभूतं क्वचानेन देहेनादृष्टमश्रुतम् ॥ कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥६४॥ तेनास्य तादृशं राजँल्लिंगिनो देहसंभवम् ॥ श्रद्धत्स्वाननुभूतोर्थो न मनः स्प्रष्टुमर्हति ॥ ६५ ॥ मन एव मनुष्यस्य पूर्वरूपाणि शंसति ॥ भविष्यतश्च भद्रं ते तथैव न भविष्यतः ॥ ६६ ॥ अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते ॥ यथा तथानुमंतव्यं देशकालक्रियाश्रयम् ॥ ६७ ॥ ॥

भुंक्ते ॥६१॥ ममैते पुत्रादयः असावहमिति ब्रुवन् पुमान् मनसा यं यं देहं गृह्णाति तेन तेन कृतं कर्म गृह्णीयात् । तेनाहंकारगृहीतेन कर्मणा पुनर्भवो भवति ॥६२॥ द्वितीयप्रश्नस्योत्तरमाह । ज्ञानकर्मेंद्रियचेष्टितैर्यथा तत्प्रवर्तकं चित्तमनुमीयते तथा चित्तवृत्तिभिः प्राग्देहजं पुण्यपापरूपं कर्माप्यनुमीयते ॥६३॥ किंच । अनेन वर्तमानेन देहेन कुत्रचिदपि अनुभवरहितं अदृष्टमश्रुतं च यत्स्वरूपं तत्कदाचित्स्वप्नमनोराज्यादिषु मनसि स्फुरति ॥ ६४ ॥ तेन प्रकारेणास्य वासनाश्रयस्य जीवस्य तदनुभवादियुक्तं पूर्वदेहसंभवं निश्चयेन मन्यस्व । यतोऽननुभूतोऽर्थो मनसि स्फुरितुं नार्हति॥६५॥ किंच । मन एव मनुष्यस्य औदार्यकार्पण्यादिवृत्तिभिः भूतभाविस्वरूपाणि ज्ञापयति ॥६६॥ यच्चाऽत्रा[1]दृष्टम[2]श्रुतं च क्वचिन्मनसि स्वप्नादौ दृश्यते तद्दर्शनमपि दे[3]शकालक्रियाश्रयमनुमंतव्यम् ॥ ६७ ॥ ॥

---

१ पर्वते समुद्रः । २ दिवा नक्षत्रदर्शनं स्वशिरश्छेदनादि च । ३ अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे । निशाश्रयं नक्षत्रादिकं दिवा । अभ्यंगादिक्रियायोग्यं स्वशिरः छेदनाश्रयं यद्दृश्यते । निद्रादिदोषेण हि तथा प्रतीयत इत्यनुमंतव्यम् ।

सर्वेऽपि विषया अनियतक्रमपरंपरया मनसि भोग्यत्वेन प्राप्नुवंति भोगांतरं गच्छंति च ॥ ६८ ॥ सत्वैकनिष्ठे भगवद्ध्यानतत्परे मनसि इदं विश्वं संयोगमिव प्राप्य भासते । चंद्रे संयोगं प्राप्य राहुरिव ॥ ६९ ॥ अतो यावन्मनोबुद्धींद्रियसमुदायरूपोऽनादिर्लिंगदेहस्तावदहंममेति भावो जीवे न व्यवधीयते ॥ ७० ॥ निद्रामूर्छामहाज्वरादिषु इंद्रियाणामतिव्याकुलतया सूक्ष्मत्वेन विद्यमानमप्यहमिति ज्ञानं स्पष्टं न प्रकाशते ॥७१॥ तरुणस्यैकादशेंद्रियैः स्पष्टं यदहंकरणं दृश्यते तद्गर्भे बाल्ये चेंद्रियाणामसंपूर्णत्वान्न दृश्यते । यथामावास्यायां चंद्रमसो रूपं विद्यमानमपि कलानामपुष्टत्वात् स्पष्टं न भासते तद्वत् ॥ ७२ ॥ तस्मादहंकारास्पदस्य स्थूलदेहस्याविच्छेदाद्वस्तुभूतार्थाभावेऽपि आत्मज्ञानं विना जन्ममरणरूपः संसारो न निवर्तते । यथा स्वप्ने मिथ्याभूतोऽपि स्वशिरच्छेदाद्यनर्थानुभवो जाग्रदवस्थां विना न निवर्तते तद्वत् ॥७३॥ एवं पंचतन्मात्रात्मकं षोडशविकारात्मना विस्तृतं त्रिगुणं यल्लिंगशरीरं तदेव चेतनया युक्तं सत् जीव इति

सर्वे क्रमानुरोधेन मनसींद्रियगोचराः ॥ आयांति वर्गशो यांति सर्वे समनसो जनाः ॥ ६८॥ सत्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि ॥ तमश्चंद्रमसीवेदमुपरज्यावभासते ॥६९॥ नाहं ममेति भावोऽयं पुरुषे व्यवधीयते ॥ यावद्बुद्धिमनोक्षार्थगुणव्यूहो ह्यनादिमान् ॥७०॥ सुप्तिमूर्छोपतापेषु प्राणायनविघाततः ॥ नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥ ७१ ॥ गर्भे बाल्येऽप्यपौष्कल्यादेकादशविधं तदा ॥ लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो यथा ॥७२॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥७३॥ एवं पंचविधं लिंगं त्रिवृत्षोडशविस्तृतम् ॥ एष चेतनया युक्तो जीव इत्यभिधीयते ॥७४॥ अनेन पुरुषो देहानुपादत्ते विमुंचति ॥ हर्षं शोकं भयं दुःखं सुखं चानेन विंदति ॥ ७५॥ यथा तृणजलूकेयं नापयात्यपयाति च ॥ न त्यजेन्म्रियमाणोऽपि प्राग्देहाभिमतिं जनः ॥७६॥ यावदन्यं न विंदेत व्यवधानेन कर्मणाम् ॥ मन एव मनुष्येंद्र भूतानां भवभावनम् ॥७७॥ यदाक्षैश्चरितान्ध्यायन्कर्माण्याचिनुते सकृत् ॥ सति कर्मण्यविद्यायां बंधः कर्मण्यनात्मनः॥७८॥ अतस्तदपवादार्थं भज सर्वात्मना हरिम् ॥ पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ॥७९॥ मैत्रेय उवाच ॥ भागवतमुख्यो भगवान्नारदो हंसयोर्गतिम् ॥ प्रदर्श्य ह्यमुमामन्त्र्य सिद्धलोकं ततोऽगमत् ॥ ८०॥ प्राचीनबर्ही राजर्षिः प्रजासर्गाभिरक्षणे ॥ आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ॥८१॥ तत्रैकाग्रमना वीरो गोविंदचरणांबुजम् ॥ विमुक्तसंगोऽनुभजन्भक्त्या तत्साम्यतामगात् ॥८२॥

कथ्यते॥७४॥स जीवोऽनेन लिंगशरीरेण देहान् गृह्णाति मुंचति च । हर्षशोकसुखदुःखादिकं चानेन विंदति॥७५॥यथा तृणजलूका पूर्वतृणमत्यक्त्वा परं तृणं याति । तथा म्रियमाणोऽपि जीवोऽन्यदेहस्वीकारपर्यंतं प्राग्देहाभिमानं न त्यजति॥७६॥ हे राजन्, भूतानां मन एव बंधमोक्षयोः कारणम्॥७७॥ यदा जीव इंद्रियैर्भुक्तान् विषयान् ध्यायति तदा वारंवारं कमार्णि करोति । तदा चाविद्यायां सत्यां जीवस्य कर्मासक्त्या बंधो भवति ॥ ७८ ॥ अतः कर्मनिवृत्त्यर्थं इदं विश्वमीश्वरात्मकं पश्यन् सर्वात्मना हरिं भज ॥ ७९ ॥ मैत्रेय उवाच ॥ हे मैत्रेय, भगवान् नारदः प्राचीनबर्हिषे जीवेश्वरयोर्गतिं प्रदर्श्य तमामंत्र्य सिद्धलोकं जगाम ॥८०॥ राजा प्रजारक्षणे पुत्रानाज्ञाप्य तपः कर्तुं कपिलाश्रमं जगाम ॥ ८१ ॥ तत्र भक्त्या गोविंदचरणांबुजं भजन् तत्साम्यतामगात् ॥ ८२ ॥ ॥

एतन्नारदगीतमध्यात्मपारोक्ष्यं यः शृणुयाच्छ्रावयेद्वा स लिंगशरीरेण मुच्यते ॥ ८३ ॥ किंच । एतन्नारदमुखनिःसृतं भगवद्यशोयुक्तमाख्यानं यः पठेत्स मुक्तबंधः
सन् संसारे पुनर्न भ्रमति ॥८४॥ हे विदुर, मयेदमध्यात्मपारोक्ष्यं प्राप्तम् । एवं पुंसः परलोके कर्मफलभोगः कथमिति संशयश्छिन्नः ॥८५॥ इति श्रीमद्भागवतचूर्णिकायां चतुर्थस्कंधे एकोनत्रिंशोऽध्यायः ॥२९॥ ॥ प्रसंगात्पंचभिः प्रोक्तं वृत्तं प्राचीनबर्हिषः । वर्ण्यते च पुनर्द्वाभ्यां प्रस्तुतं तत्प्रचेतसाम् ॥१॥
तत्र त्रिंशे तपस्तुष्टादीशाल्लब्धवरास्ततः । आगत्य वार्क्षीमुद्वाह्य राज्यं चक्रुरितीर्यते ॥२॥ विदुर उवाच ॥ हे ब्रह्मन्, प्राचीनबर्हिषः पुत्रा दश प्रचेतसस्त्वया
ये पूर्वं कथितास्ते रुद्रगीतेन हरिं संतोष्य कां सिद्धिं प्रापुः ॥१॥ ते यदृच्छया शिवं प्राप्य शिवेनानुगृहीताः संतो नूनं मोक्षं प्रापुरेव । तत्पूर्वं किं प्रापुः ॥२॥

एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ ॥ यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते ॥ ८३ ॥ एतन्मुकुंदयशसा भुवनं पुनानं
देवर्षिवर्यमुखनिःसृतमात्मशौचम् ॥ यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबंधः ॥ ८४ ॥
अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतम् ॥ एवं स्त्रियाऽऽश्रमः पुंसश्छिन्नोऽमुत्र च संशयः ॥ ८५ ॥ इति श्रीमद्भागवते महापुराणे
चतुर्थस्कंधे विदुरमैत्रेयसंवादे प्राचीनबर्हिर्नारदसंवादो नाम एकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ विदुर उवाच ॥ ॥
ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ॥ १ ॥ किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥२॥ मैत्रेय उवाच ॥ प्रचेतसोंऽतरुदधौ
पितुरादेशकारिणः ॥ जपयज्ञेन तपसा पुरंजनमतोषयन् ॥३॥ दशवर्षसहस्रांते पुरुषस्तु सनातनः ॥ तेषामाविरभूत्कृच्छ्रं शांतेन
शमयन्रुचा ॥४॥ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः ॥ पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः ॥५॥ काशिष्णुना कनकवर्णविभूषणेन
भ्राजत्कपोलवदनो विलसत्किरीटः ॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितो गरुडकिंनरगीतकीर्तिः ॥६॥ पीनायताष्टभुजमंडलमध्यलक्ष्म्या
स्पर्धच्छ्रिया परिवृतो वनमालयाऽऽद्यः ॥ बर्हिष्मतः पुरुष आह सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः ॥७॥
श्रीभगवानुवाच॥वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः॥ सौहार्देनापृथग्धर्मास्तुष्टोऽहं सौहृदेन वः॥८॥ योऽनुस्मरति संध्यायां
युष्माननुदिनं नरः ॥ तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम् ॥ ९ ॥ ये तु मां रुद्रगीतेन सायंप्रातः समाहिताः ॥ स्तुवंत्यहं
कामवरान्दास्ये प्रज्ञां च शोभनाम्॥१०॥यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः॥ अथो व उशती कीर्तिर्लोकाननु भविष्यति॥११॥

मैत्रेय उवाच ॥ ते प्रचेतसः समुद्रे स्थित्वा जपयज्ञेन परमात्मानं तोषयामासुः॥३॥ततो दशवर्षसहस्रांते भगवान् स्वतेजसा तेषां क्लेशं शमयन् ॥४॥ गरुडारूढः
पीतवासा मणिग्रीवः ॥५॥ विलसत्किरीटोऽष्टायुधैर्मुनिभिश्च सेवितः ॥६॥ अष्टभुजो वनमालया परिवृत आद्यः पुरुष आविर्भूय प्रचेतसः प्राह ॥७॥ श्रीभगवानुवाच
॥ हे नृपनंदनाः, युष्माकं भद्रमस्तु । यूयं मत्तो वरं वृणीध्वम् । युष्माकं बंधूनां सौहृदं दृष्ट्वा तुष्टोऽस्मि ॥८॥ यः संध्यायां नित्यं युष्मान् स्मरति तस्य
भ्रातृष्वात्मसाम्यं भविष्यति ॥९॥ ये तु मां सायंप्रातः रुद्रगीतेन स्तुवंति तेभ्य इच्छितान् वरानहं दास्ये सद्बुद्धिं च दास्ये॥१०॥ यस्माद्यूयं पितुराज्ञां कृतवंतः।

अतो वः कीर्तिर्लोकान् व्याप्स्यति ॥११॥ युष्माकमेकः प्रख्यातः पुत्रो भविता । य आत्मसंतानेन त्रिलोकीं पूरयिष्यति ॥ १२ ॥ किंच । कंडोः ऋषेः सकाशात्प्रम्लोचायामप्सरसि जातां तया च वृक्षसमूहे त्यक्तां कन्यां वृक्षा जगृहुः ॥१३॥ ततः सोमो रुदत्यास्तस्या मुखेऽमृतवर्षिणीं तर्जनीं निदधे ॥१४॥ तां यूयं शीघ्रमुद्वहत । अन्यथान्यः कश्चिद्वरिष्यति ॥१५॥ किंच । समानधर्मस्वभावानां सर्वेषां वः समानधर्मस्वभावेयमेका पत्नी भूयात् ॥१६॥ तया सह [1]दिव्यवर्षसहस्राणां सहस्रं भौमान् दिव्यांश्च भोगान् मदनुग्रहाद्भोक्ष्यथ ॥१७॥ ततः संसारान्निर्विद्य मयि भक्तिं कृत्वा मां यास्यथ ॥१८॥ गृहेष्वपि स्थितानां मद्वार्त-

भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः ॥ य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥ १२ ॥ कंडोः प्रम्लोचया लब्धा कन्या कमललोचना ॥ तां चापविद्धां जगृहुर्भूरुहा नृपनंदनाः ॥१३॥ क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम् ॥ देशिनीं रोदमानाया निदधे स दयान्वितः ॥ १४ ॥ प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता ॥ तत्र कन्यां वरारोहां तामुद्वहत मा चिरम् ॥१५॥ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा ॥ अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया ॥१६॥ दिव्यवर्षसहस्राणां सहस्रमहतौजसः ॥ भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम ॥१७॥ अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः ॥ उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥१८॥ गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् ॥ मद्वार्तायातयामानां न बंधाय गृहा मताः॥१९॥ नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः ॥ न मुह्यंति न शोचंति न हृष्यंति यतो गताः ॥ २० ॥ मैत्रेय उवाच ॥ एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्रांजलयः प्रचेतसः ॥ तद्दर्शनध्वस्ततमोरजोमला गिराऽगृणन्गद्गदया सुहृत्तमम् ॥२१॥ प्रचेतस ऊचुः ॥ नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय ॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥ २२ ॥ शुद्धाय शांताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ॥ नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥२३॥ नमो विशुद्धसत्वाय हरये हरिमेधसे ॥ वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ॥ २४ ॥ नमः कमलनाभाय नमः कमलमालिने ॥ नमः कमलपादाय नमस्ते कमलेक्षण ॥ २५ ॥ नमः कमलकिंजल्कपिशंगामलवाससे ॥ सर्वभूतनिवासाय नमोऽयुङ्क्ष्महि साक्षिणे ॥२६॥ रूपं भगवता त्वेतदशेषक्लेशसंक्षयम् ॥ आविष्कृतं नः क्लिष्टानां किमन्यदनुकंपितम् ॥ २७ ॥ ॥

या गतकालानां पुंसां गृहधर्मा बंधाय न भवंति ॥१९॥ ये मत्कथाश्रवणादिना मां प्राप्तास्ते मोहहर्षशोकान्न प्राप्नुवंति ॥ २० ॥ मैत्रेय उवाच ॥ एवं भगवद्वाक्यं श्रुत्वा प्रचेतसः प्रांजलयो हरिं तुष्टुवुः ॥२१॥ प्रचेतस ऊचुः ॥ क्लेशविनाशनाय मनोवचसोरगोचराय तुभ्यं नमः ॥ २२ ॥ शुद्धाय शांताय ब्रह्मविष्णुरुद्रमूर्तये तुभ्यं नमः ॥२३॥ विशुद्धसत्वरूपाय हरये वासुदेवाय कृष्णाय तुभ्यं नमः ॥ २४ ॥ हे कमलनेत्र, कमलनाभाय कमलमालिने कमलपादाय तुभ्यं नमः ॥२५॥ पीतांबरधराय सर्वभूतनिवासाय तुभ्यं नमः ॥२६॥ हे जगत्पते, भवता सर्वक्लेशनाशकरं रूपं प्रकटितं अतोऽस्माकमयमेवानुग्रहः ॥ २७ ॥ ॥

---

[1] दिव्यसहस्रवर्षाणि सहस्रगुणितानि—दशलक्षाणि दिव्यानि वर्षाणीत्यर्थः ।

हे अमंगलनाशन, दीनवत्सलैः समर्थैः प्रभुभिर्दीनेषु अस्मदीया एते इत्यनुस्मरणमात्रं कार्यम् । त्वया तु रूपमपि दर्शितम् ॥२८॥ हे ईश, सर्वभूतानां हृदये स्थितो भवानस्माकमभिप्रायं जानात्येव॥२९॥ हे जगत्पते, त्वत्प्रसादो यो जातः । अयमेवास्माकमीप्सितो वरः ॥३०॥ यद्यप्येवं तथापि हे नाथ, त्वत्तो वरमेकं वृणीमहे ॥३१॥ यथा भ्रमरः कल्पवृक्षे सुखेन प्राप्तेऽन्यवृक्षं न सेवते तथा वयं साक्षात्त्वच्चरणं प्राप्यान्यं त्वत्तः किं किं वृणीमहि न किमपि ॥३२॥ तथापीह कर्मभिर्यावद्भ्रमामस्तावत्त्वद्भक्तानां संगः जन्मनिजन्मन्यस्तु॥३३॥भगवत्संगिसंगस्य लवेन समं स्वर्गं मोक्षमपि वयं न तुलयाम॥३४॥यत्र सत्संगे विषयभोगवास-

एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः ॥ यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररंधन ॥ २८ ॥ येनोपशांतिर्भूतानां क्षुल्लकानामपीहताम् ॥ अंतर्हितोंऽतर्हृदये कस्मान्नो वेद नाशिषः ॥ २९ ॥ असावेव वरोऽस्माकमीप्सितो जगतः पते ॥ प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः ॥ ३० ॥ वरं वृणीमहेऽथापि नाथ त्वत्परतः परात् ॥ न ह्यंतस्त्वद्विभूतीनां सोऽनंत इति गीयसे ॥ ३१ ॥ पारिजातेंऽजसा लब्धे सारंगोऽन्यन्न सेवते ॥ त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ॥ ३२ ॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः ॥ तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे ॥ ३३ ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ ३४ ॥ यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः ॥ निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥ ३५ ॥ यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः ॥ संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ॥ ३६ ॥ तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ॥ भीतस्य किं न रोचेत तावकानां समागमः ॥ ३७ ॥ वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन ॥ सुदुश्चिकित्सस्य भवस्य मृत्योर्भिषक्तमं त्वाऽद्य गतिं गताः स्म ॥३८॥ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ॥ आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ॥ ३९ ॥ यन्नः सुतप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु ॥ सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ॥ ४० ॥ मनुः स्वयंभूर्भगवान्भवश्च येऽन्ये तपोज्ञानविशुद्धसत्वाः ॥ अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः ॥ ४१ ॥ नमः समाय शुद्धाय पुरुषाय पराय च ॥ वासुदेवाय सत्वाय तुभ्यं भगवते नमः ॥४२॥ मैत्रेय उवाच ॥ इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः ॥ अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ॥ ४३ ॥ ॥ ॥

नाशांतिकराः कथाः संति । याभ्यः कथाभ्यो भूतेषु वैराभावो भवति ॥३५॥ सत्कथासु साक्षान्नारायणो मुनिभिः स्तूयते॥३६॥ तेषां समागमः संसाराद्भीतस्य किं न रोचते ॥३७॥ अहो वयं शिवस्य क्षणसंगेन मृत्युरोगघ्नं त्वां वैद्यं प्राप्ताः स्मः ॥३८॥ किंच । यद्यन्नः स्वधीतं गुरुविप्रवृद्धाः प्रसादिताः ॥ ३९ ॥ तपः सुतप्तं तत्सर्वं तव संतोषाय भवतु । इत्यप्येकं वरं वृणीमहे॥४०॥ मनुः ब्रह्मा शिवोऽन्ये च शुद्धचित्ता ऋषयस्तव महिम्नः पारमजानाना अपि त्वां स्तुवंति । अतो वयमपि यथामति स्तुमः ॥४१॥ अतः शुद्धाय समाय श्रीवासुदेवाय भगवते तुभ्यं नमः ॥४२॥ मैत्रेय उवाच ॥ इति प्रचेतोभिरभिष्टुतो हरिस्तथास्त्वि-

त्युक्त्वा स्वधाम ययौ ॥४३॥ ततः प्रचेतसः समुद्रजलाद्बहिर्निर्गत्य वृक्षैर्व्याप्तां महीं वीक्ष्य वृक्षेभ्योऽकुप्यन् ॥ ४४ ॥ ततो मुखतोऽग्निं वायुं चोत्पाद्य वृक्षान् दग्धुमारेभिरे ॥४५॥ तदा ब्रह्मा दह्यमानान् वृक्षान् वीक्ष्य तत्रैत्य युक्तिभिस्तान् राजपुत्रान् सांत्वयामास ॥ ४६ ॥ तत्र येऽवशिष्टा वृक्षास्ते ब्रह्माज्ञया प्रचेतोभ्यः कन्यां समर्पयामासुः ॥ ४७ ॥ ते प्रचेतसोऽपि ब्रह्माज्ञया तां वृक्षैः पालितां मारिषां नाम पत्नीमुपयेमिरे । तस्यां तक्षो ब्रह्मपुत्रः शिवापमानात् क्षत्रियवंशे पुनर्जातः ॥४८॥ यस्य ब्रह्मपुत्ररूपो देहः कालेन नष्टः । यश्च चाक्षुषे मन्वंतरे प्राप्ते भगवता प्रेरितः सन् प्रजाः ससर्ज स दक्षोऽयमेव ॥४९ ॥ किंच । यो जायमानः सन् सर्वतेजस्विनां तेजः स्वतेजसा च्छादितवान् । यं च कर्मदाक्ष्याद्दक्षं जगदुः॥५०॥ तं दक्षं ब्रह्मा प्रजापतीनामाधिपत्येऽभिषिच्य प्रजासर्गरक्षा-

अथ निर्याय सलिलात्प्रचेतस उदन्वतः ॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः ॥४४॥ ततोऽग्निमारुतौ राजन्नमुंचन्मुखतो रुषा ॥ महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये ॥४५॥ भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्य पितामहः ॥ आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः ॥४६॥ तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा ॥ उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा ॥ ४७ ॥ ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे ॥ यस्यां महदवज्ञानादजन्यजनयोनिजः ॥ ४८ ॥ चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गे कालविद्रुते ॥ यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥४९॥ यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा ॥ स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ॥५०॥ तं प्रजासर्गरक्षायामनादिरभिषिच्य च ॥ युयोज युयुजेऽन्यांश्च स वै सर्वप्रजापतीन् ॥ ५१ ॥ इति श्रीमद्भाग० महा० चतुर्थस्कंधे त्रिंशोऽध्यायः ॥३०॥ मैत्रेय उवाच ॥ तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम् ॥ स्मरंत आत्मजे भार्यां विसृज्य प्राव्रजन्गृहात् ॥१॥ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ॥ प्रतीच्यां दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः ॥२॥ तान्निर्जितप्राणमनोवचोदृशो जितासनान् शांतसमानविग्रहान् ॥ परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः ॥३॥ तमागतं त उत्थाय प्रणिपत्याभिनंद्य च ॥ पूजयित्वा यथादेशं सुखासीनमथाब्रुवन् ॥ ४ ॥ प्रचेतस ऊचुः ॥ स्वागतं ते सुरर्षेऽद्य दिष्ट्या नो दर्शनं गतः ॥ तव चंक्रमणं ब्रह्मन्नभयाय यथा रवेः ॥५॥ यदादिष्टं भगवता शिवेनाधोक्षजेन च ॥ तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥ ६ ॥ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनम् ॥ येनांजसा तरिष्यामो दुस्तरं भवसागरम् ॥ ७ ॥

यां युयोज । स चान्यान् मरीच्यादीन् तत्तद्व्यापारेषु नियुक्तवान् ॥५१॥ इति श्रीमद्भागवतचू० चतु० त्रिंशोऽध्यायः ॥ ३० ॥ ॥ एकत्रिंशे सुते दक्षे धुरं न्यस्य वने सताम् । नारदोक्तेन मार्गेण मुक्तिरुक्ता प्रचेतसाम् ॥१॥ मैत्रेय उवाच ॥ दिव्यमानेन दशलक्षवर्षाणामंते उत्पन्नविज्ञानास्ते प्रचेतसो विष्णुभाषितं स्मरंतः पुत्रे भार्यां संस्थाप्य गृहान्निर्गम्य॥१॥पश्चिमदिशि समुद्रतटे यत्र जाजलिर्नाम ऋषिः सिद्धो बभूव तत्र गत्वा आत्मविचारे कृतसंकल्पा बभूवुः॥२॥ तान् परब्रह्मणि योजितात्मनो नारदोऽवलोकितवान्॥३॥ ते प्रचेतस आगतं नारदं दृष्ट्वोत्थाय प्रणम्य पूजयित्वोचुः ॥ ४ ॥ प्रचेतस ऊचुः ॥ हे सुरर्षे, तुभ्यं स्वागतम् । तव संचारः सर्वेषामभयाय भवति ॥५॥ हे मुने, पूर्वं भगवता विष्णुना शिवेन च यदात्मतत्वं नः कथितं तद्गृहेषु सक्तानां प्रायो विस्मृतम्॥ ६ ॥अतस्तदध्यात्मज्ञानं नः

प्रकाशय । येन वयं भवाब्धिं तरिष्यामः ॥७॥ मैत्रेय उवाच ॥ एवं प्रचेतोभिः पृष्टो नारदो भगवत्यर्पितचित्तः सन् तानाह ॥८॥ नारद उवाच ॥ हे प्रचेतसः, येन हरिः सेव्यते तज्जन्म तानि कर्माणि तदेव मनस्तदेवायुष्यम् ॥ ९ ॥ इह शौक्लं[1]सावित्रयाज्ञिकैः त्रिभिर्जन्मभिः किम् ॥ १० ॥ अहो शास्त्राध्ययनेन तपसा निपुणबुद्ध्या ॥११॥ योगेन सांख्येन त्यागेनान्यैः श्रेयोभिश्च किम् । यैः संतुष्टः सन् हरिर्भक्तानामात्मस्वरूपप्रदो न भवति ॥ १२ ॥ अहो सर्वेषामपि भूतानां हरिरात्मा आत्मदः प्रियश्च ॥१३॥ यथा तरोर्मूलनिषेचनेन स्कंधशाखाद्यास्तृप्यंति तथा भगवत्पूजया सर्वदेवतानामर्चनं भवति ॥१४॥ यथा जलानि

मैत्रेय उवाच ॥ इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः ॥ भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् ॥ ८ ॥ नारद उवाच ॥
तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः ॥ नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥ ९ ॥ किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः ॥
कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥ १० ॥ श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या
वा किं निपुणया बलेनेंद्रियराधसा ॥ ११ ॥ किंवा योगेन सांख्येन न्यासस्वाध्याययोरपि ॥ किंवा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥ १२ ॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ॥ सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥१३॥ यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥ १४ ॥ यथैव सूर्यात्प्रभवंति
वारः पुनश्च तस्मिन्प्रविशंति काले ॥ भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः ॥१५॥ एतत्पदं तज्जगदात्मनः परं
सकृद्विभातं सवितुर्यथा प्रभा ॥ यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदा भ्रमात्ययः ॥ १६ ॥ यथा नभस्यभ्रतमःप्रकाशा भवंति भूपा न भवन्त्यनुक्रमात् ॥ एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमःसत्वमिति प्रवाहः ॥ १७ ॥ तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ १८ ॥ दयया सर्वभूतेषु संतुष्ट्या येन केन वा ॥ सर्वेंद्रियोपशांत्या च तुष्यत्याशु जनार्दनः ॥१९॥ अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ॥
निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि ॥ २० ॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो
रसज्ञः ॥ श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु ॥ २१ ॥ ॥ ॥

सूर्याद्वर्षाकाले उद्भवंति ग्रीष्मे तस्मिन्नेव प्रविशंति । तथा हरेश्चेतनाचेतनात्मकः प्रपंचः ॥१५॥ किंच । एतद्विश्वं विष्णोः परं स्वरूपम् । तत उत्पन्नत्वात्ततः पृथङ् न भवति ॥ १६ ॥ यथा नभसि मेघतमःप्रकाशा भवंति विनश्यंति च एवं ब्रह्मणि शक्तय उद्भवंति लीयंते च ॥१७॥ अतः सर्वात्मानमीश्वरमात्मैकभावेन यूयं भजध्वम् ॥ १८॥ सर्वभूतेषु दयया येन केन वा संतुष्ट्या सर्वेंद्रियोपशांत्या च हरिस्तुष्यति ॥ १९॥ हरिरात्मनो भक्ताधीनत्वं जानन् सतां मनसि सदैव तिष्ठति ततो नापयाति ॥ २० ॥ ये विद्याधनादिमदैः साधुषु तिरस्कारं कुर्वंति तेषां पूजामपि हरिर्न गृह्णाति ॥ २१ ॥ ॥

---

[1] शौक्लं जन्म मातापितृभ्यामुत्पत्तिः, सावित्रं जन्मोपनयनेन, याज्ञिकं जन्म दीक्षया ।

सेवमानां लक्ष्मीं सकामान् नरेंद्रान् देवानपि यो नानुवर्तते । यतः स्वेनैव पूर्णः स्वभक्तानुरक्त एव वर्तते । एवंभूतं हरिं कृतज्ञः कस्त्यजेत् न कोऽपि ॥२२॥ मैत्रेय उवाच ॥ इति प्रचेतसः श्रावयित्वा अन्याश्च ध्रुवचरित्राद्याः कथाः श्रावयित्वा नारदो ब्रह्मलोकं ययौ ॥२३॥ तेऽपि प्रचेतसो नारदवचः श्रुत्वा हरिपदं ध्यायंतस्तद्गतिं ययुः ॥२४॥ हे विदुर, यत्त्वं मां पृष्टवान् तत् प्रचेतसां नारदस्य संवादं हरिकीर्तनरूपमाख्यानं मया ते कथितम् ॥२५॥ श्रीशुक उवाच ॥ हे परीक्षित् राजन्, एवं तुभ्यं मनुपुत्रस्योत्तानपदो वंशो वर्णितः। इतः परं प्रियव्रतवंशं श्रृणु॥२६॥यः प्रियव्रतो नारदादात्मविद्यां प्राप्य राज्यं कृत्वाऽपि मोक्षं प्राप

श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यत्स्वपूर्णः ॥ न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमान्कृतज्ञः ॥२२॥ ॥ मैत्रेय उवाच ॥ इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः ॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः ॥ २३ ॥ तेऽपि तन्मुखनिर्यातं यशो लोकमलापहम् ॥ हरेर्निशम्य तत्पादं ध्यायंतस्तद्गतिं ययुः ॥२४॥ एतत्तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् ॥ प्रचेतसां नारदस्य संवादं हरिकीर्तनम् ॥२५॥ श्रीशुक उवाच ॥ य एष उत्तानपदो मानवस्यानुवर्णितः ॥ वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥२६॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥२७॥ इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याजितवादसत्कथाम् ॥ प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः ॥२८॥ विदुर उवाच ॥ सोऽयमद्य महायोगिन्भवता करुणात्मना ॥ दर्शितस्तमसः पारो यत्राकिंचनगो हरिः ॥२९॥ श्रीशुक उवाच ॥ इत्यानम्य तमामंत्र्य विदुरो गजसाह्वयम् ॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥३०॥ एतद्यः शृणुयाद्राजन्राज्ञां हर्यर्पितात्मनाम् ॥ आयुर्धनं यशः स्वस्तिगतिमैश्वर्यमाप्नुयात् ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां चतुर्थस्कंधे प्राचेतउपाख्यानं नाम एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॐनमो भगवते वासुदेवाय ॥ ॥

॥२७॥ विदुरः इमां मैत्रेयवर्णितां हरिसत्कथां श्रुत्वा हरेश्चरणं हृदा दधार । मुनेश्चरणं च मूर्ध्ना धृत्वा पुनरपि जगाद ॥२८॥ विदुर उवाच ॥ हे महायोगिन्, करुणात्मना भवता अद्य मे तमसः पारो दर्शितः ॥२९॥ श्रीशुक उवाच ॥ इत्युक्त्वा विदुरो मैत्रेयमामंत्र्य स्वज्ञातीनां दिदृक्षया हस्तिनापुरं ययौ॥३०॥ हे राजन्, एतदाख्यानं यः श्रृणुयात् स आयुर्धनं यश ऐश्वर्यं च प्राप्नुयात् ॥३१॥ इति श्रीमद्भागवतचू० चतुर्थस्कंधे एकत्रिंशोऽध्यायः॥३१॥श्रीकृष्णार्प०॥

इति सचूर्णिकश्रीमद्भागवते चतुर्थस्कंधः समाप्तः

अथ सचूर्णिकश्रीमद्भागवते पंचमस्कंधारंभः

॥ श्रीगणेशाय नमः ॥ अथ पंचमस्कंधचूर्णिका प्रारभ्यते ॥ षड्विंशत्याधुनाऽध्यायैः पंचमे स्थानमीर्यते ॥ लोकद्वीपादिमर्यादापालनाख्यमनेकधा ॥ १ ॥ तत्र तु प्रथमेऽध्याये ज्ञानिनो राज्यनिर्वृतिः ॥ पुनश्च ज्ञाननिष्ठेति प्रियव्रतकथाद्भुता ॥ २ ॥ राजोवाच ॥ हे मुने, भागवत आत्मारामः प्रियव्रतो गृहे कथं रेमे । यतो गृहमूलः कर्मबंधो भवति ॥१॥ मुक्तसंगानां प्रियव्रतसदृशानां पुरुषाणां गृहेषु प्रवेशो भवितुं नार्हति ॥२॥ महतां कुटुंबे स्पृहायुक्ता मतिश्च न भवति ॥३॥ किंच । स्त्रीपुत्रादिषु सक्तस्य प्रियव्रतस्य श्रीकृष्णे मतिर्मोक्षश्च कथं जातः ॥ ४ ॥ श्रीशुक उवाच ॥ भगवच्चरणे प्रवेशितचेतसो ये ते किंचिद्विघ्नेन विहतमापि

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ प्रियव्रतो भागवत आत्मारामः कथं मुने ॥ गृहेऽरमत यन्मूलः कर्मबंधः पराभवः ॥१॥ न नूनं मुक्तसंगानां तादृशानां द्विजर्षभ ॥ गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति ॥२॥ महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ॥ छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः ॥३॥ संशयोऽयं महान्ब्रह्मन्दारागारसुतादिषु ॥ सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥४॥ श्रीशुक उवाच ॥ बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंदमकरंदरस आवेशितचेतसो भागवतपरमहंसदयितकथां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वंति ॥५॥ यर्हि वाव ह राजन्स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसावगतपरमार्थसतत्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रोपामंत्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनंदद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ ६ ॥ अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ॥७॥ स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगंधर्वसाध्यचारणमुनिगणैरुपगीयमानो गंधमादनद्रोणीमवभासयन्नुपससर्प ॥८॥ तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवंतं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहितांजलिरुपतस्थे ॥ ९ ॥ भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥ १० ॥ श्रीभगवानुवाच ॥ निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयम् ॥ वयं भवस्ते तप एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥ ११ ॥ ॥

भगवत्कथारूपं स्वमार्गं न त्यजंति ॥५॥ हे राजन्, स प्रियव्रतो मंदराचलद्रोण्यां नारदस्य चरणोपसेवयाऽनायासेन प्राप्तज्ञानः सन् स्वपित्रा मनुना राज्यं कुर्विति बोधितोऽपि राज्यकरणे मिथ्याभूतादपि प्रपंचादात्मनः पराभवं मन्यमानो राज्यं नैच्छत् ॥६॥ तदा भगवान् ब्रह्मदेवो मरीच्यादिभिः सह सत्यलोकादवतीर्य ॥७॥ चंद्र इव प्रकाशमानः पथि सिद्धगंधर्वादिभिः स्तूयमानो गंधमादनदरीं प्रकाशयन्नाजगाम॥८॥तदा हंसस्थं पितरं ब्रह्माणं दृष्ट्वा नारदो मनुप्रियव्रताभ्यां सह सहसैवोत्थाय कृतांजलिः सन् स्तुत्या तं तुष्टाव ॥ ९ ॥ ब्रह्मापि सदयहास्यावलोकनः सन् प्रियव्रतं जगाद ॥ १० ॥ ब्रह्मोवाच ॥ हे तात,

अहं सत्यं ब्रवीमि । अप्रमेयं देवं दोषारोपेण द्रष्टुं त्वं नार्हसि । तव तातोऽहं शिव एष नारदश्च एते सर्वे पराधीनाः संतो यस्य भगवत आज्ञां वहामः॥११॥ तेन निर्मितमन्यथा कर्तुं कश्चिदपि जीवस्तपोयोगबुद्धिबलादिभिर्न समर्थः ॥१२॥ हे प्रियव्रत, जीवसमूहो जन्ममरणाद्यर्थं सुखदुःखाय चेश्वरेण दत्तं देहयोगं सदा धत्ते ॥१३॥ किंच । सर्वे वयं यस्य वेदलक्षणायां तंत्यां गुणकर्मदामभिर्बद्धाः संतस्तदिच्छया कर्म कुर्मः ॥१४॥ गुणकर्मसंगाद्भगवता दत्तं सुखाय दुःखं वा स्वीकुर्मः ॥१५॥ अभिमानशून्यो मुक्तोऽपि यावत्प्रारब्धं कर्म तावत्स्वदेहं बिभर्ति ॥१६॥ अजितेंद्रियस्य वनेष्वपि संसारः स्यात् । यतः स तत्र कामक्रोधादिषट्शत्रुसहित एवास्ते । जितेंद्रियस्यात्मारामस्य गृहाश्रमः किमनिष्टं करोति न किमपि ॥१७॥ यथा लोके नरो दुर्गाश्रयेण शत्रून् जित्वा पश्चात् क्षीणेषु शत्रुषु

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ॥ नैवार्थधर्मैः परतः स्वतो वा कृतं विहंतुं तनुभृद्विभूयात् ॥१२॥ भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय ॥ सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनतांग धत्ते ॥१३॥ यद्वाचि तंत्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः ॥ सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ १४॥ ईशाभिसृष्टं ह्यवरुंध्महेंऽग दुःखं सुखं वा गुणकर्मसंगात् ॥ आस्थाय तत्तद्यदयुंक्त नाथश्चक्षुष्मतांधा इव नीयमानाः ॥१५॥ मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ॥ यथानुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृंक्ते ॥१६॥ भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सह षट्सपत्नः ॥ जितेंद्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् ॥१७॥ यः षट्सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ॥ अत्येति दुर्गाश्रित ऊर्जितारीन्क्षीणेषु कामं विचरेद्विपश्चित् ॥१८॥ त्वं त्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ॥ भुङ्क्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्तसंगः प्रकृतिं भजस्व ॥ १९॥ श्रीशुक उवाच ॥ इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयाऽवनतशिरोधरो बाढमिति सबहुमानमुवाह ॥२०॥ भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥२१॥ मनुरपि परेणैवं प्रतिसंधितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितिगुप्तय आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥२२॥ इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोऽखिलजगद्बंधध्वंसनपरानुभावस्य भगवत आदिपुरुषस्यांघ्रियुगलानवरतध्यानानुभावेन परिरंधितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥२३॥

दुर्गे वान्यत्र वा वर्तते । तथा गृहेषु स्थित्वा षडिंद्रियाणि जित्वा पश्चाद्गृहे वने वा विचरेत् ॥ १८ ॥ हे प्रियव्रत, त्वं तु कृष्णचरणारविंदरूपं दुर्गं श्रितो मन आदीन् जित्वेह भोगान् भुंक्ष्व पश्चान्मुक्तसंगः सन् स्वस्वरूपं भज ॥ १९ ॥ श्रीशुक उवाच ॥ प्रियव्रत एवंविधं ब्रह्मणः शिक्षितं स्वीचकार ॥२०॥ ब्रह्मापि संतोषेण प्रियव्रतनारदयोः पश्यतोः सतोर्ब्रह्मस्वरूपं चिंतयन् हंसेन सत्यलोकं जगाम ॥२१॥ मनुश्च नारदाज्ञया तं प्रियव्रतं राज्येऽभिषिच्य स्वयं विषयभोगेच्छाया उपरतोऽभूत् ॥ २२ ॥ प्रियव्रतो भगवच्चरणे मनो निवेश्य भूमिं पालयामास ॥ २३ ॥ ॥ ॥

---

१ संगभिया वनाद्वनांतरं गच्छतोऽपीत्यर्थः ।

अथ विश्वकर्मणः प्रजापतेर्बर्हिष्मतीं नाम कन्यामुपयेमे । तस्यां स्वसमानशीलगुणकर्मरूपान् दश पुत्रानूर्जस्वतीं नाम कन्यां च जनयामास॥२४॥तेच पुत्राः– आग्नीध्रः इध्मजिह्वः यज्ञबाहुः महावीरः हिरण्यरेताः घृतपृष्ठः सवनः मेधातिथिः वीतिहोत्रः कविश्चेत्येते १० सर्व एवाग्निनामानः ॥ २५ ॥ एषां मध्ये कविः महावीरः सवन इति त्रयो ब्रह्मचारिणः संतो बाल्यादारभ्यात्मविद्यायां कृताभ्यासाः संतः परमहंसमुनीनामाश्रमं सेवितवंतः ॥२६॥ ते तस्मिन्नेवाश्रमे भगवतो वासुदेवस्य चरणस्मरणादखंडितभक्तियोगेन तस्मिन्नात्मनस्तादात्म्यं प्रापुः ॥ २७ ॥ अन्यस्यां भार्यायां प्रियव्रतात् उत्तमः तामसः रैवत इति त्रयः पुत्रा

अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामु ह वाव आत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान्दश भावयांबभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ॥ २४ ॥ आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥ २५ ॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥ २६ ॥ तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविंदाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितांतर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ २७ ॥ अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वंतराधिपतयः ॥ २८ ॥ एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥ २९ ॥ यावदवभासयति सुरगिरिमनुपरिक्रमन्भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदन्समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतंगः ॥ ३० ॥ ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिंधव आसन्यत एव कृताः सप्त भुवो द्वीपाः ॥३१॥ जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो यथासंख्यं द्विगुणमानेन बहिः समंतत उपक्लृप्ताः ॥ ३२ ॥ ॥ ॥

जातास्ते मन्वंतराधिपतय आसन् ॥२८॥ एवं पुत्रानुत्पाद्य भार्यया सह धर्मेण राज्यभोगान् सेवमान एकादशार्बुदानि ११०००००००० वर्षाणि महीं बुभुजे ॥२९॥ भगवान्सूर्यो मेरुं प्रदक्षिणीकुर्वन् लोकालोकाचलपर्यंतं वसुधातलमर्धं प्रकाशयत्यर्धमाच्छादयति । एवं दिनरात्रिविभागं करोति । तदप्रशस्तं मन्यमानः प्रियव्रतो रात्रिमपि दिनं करिष्यामीति निश्चित्य समवेगेन तेजोमयेन रथेन सप्तवारं सूर्यमन्वधावत् द्वितीयः सूर्य इव ॥ ३० ॥ तस्य रथचक्राग्रेण कृता गर्तास्ते सप्त समुद्रा आसन् । तन्मध्यस्था भुवः सप्त द्वीपा जाताः॥३१॥ते च–जंबुः प्लक्षः शाल्मलिः कुशः क्रौंचः शाकः पुष्करश्चेति। ते सर्वे पूर्वपूर्वद्वीपा-

दुत्तर उत्तरो यथासंख्यं द्विगुणप्रमाणेन बहिः समंततः कल्पिताः ॥३२॥ ते च– क्षारोदः इक्षुरसोदः सुरोदः घृतोदः क्षीरोदः दधिमंडोदः शुद्धोदश्चैते सप्त समुद्राः प्रतिद्वीपं द्वीपसममानेन परिखा इवासन् । स प्रियव्रतः सप्तद्वीपेष्वाग्नीध्रादीन् सप्त पुत्रानधिपतींश्चक्रे ॥ ३३ ॥ ऊर्जस्वतीं कन्यां शुक्राय ददौ । यस्यां देवयानी नाम कन्या जाता ॥३४॥ श्रीकृष्णचरणरजसा जितषडिंद्रियाणां पुरुषाणां एवंविधः पुरुषार्थो नाश्चर्यम् । यतोंऽत्यजोऽपि यन्नाम सकृदुच्चारयन् सन् सद्यः संसारं जहाति ॥ ३५ ॥ एवमपरिमितबलपराक्रमः प्रियव्रतो विरक्तः सन् जगाद ॥ ३६ ॥ अहो मयाऽसाधु चरितम् । वनितायाः क्रीडामृगं मां धिग्धिगित्यात्मानं गर्हयांचकार ॥३७॥ एवं विरक्तो भूत्वा पुत्रेभ्यो राज्यं विभज्य भुक्तभोगां स्त्रियं च त्यक्त्वा नारदोपदिष्टं मार्गं पुनरपि स्वीचकार ॥३८॥

क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमंडोदशुद्धोदाः सप्त जलधयः सप्त द्वीपपरिखा इवाभ्यंतरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक्क् परित उपकल्पितास्तेषु जंब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥३३॥ दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानीनाम काव्यसुता ॥३४॥ नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानाम् ॥ चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बंधम् ॥३५॥ स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥ ३६॥ अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिंद्रियैरविद्यारचितविषमविषयांधकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयांचकार ॥३७॥ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सहमहाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥३८॥ तस्य ह वा एते श्लोकाः ॥ प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् ॥ यो नेमिनिम्नैरकरोच्छायां घ्नन्सप्त वारिधीन् ॥३९॥ भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः ॥ सीमा च भूतनिर्वृत्त्यै द्वीपे द्वीपे विभागशः ॥ ४० ॥ भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम् ॥ यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥४१॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे प्रियव्रतविजये प्रथमोऽध्यायः ॥१॥ ॥ श्रीशुक उवाच ॥ एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जंबूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् ॥ १ ॥ ॥

हे राजन्, प्रियव्रतकृतं कर्मेश्वरं विनान्यः कः कुर्यात् । यो रथचरणखातैः सप्त समुद्रान् कृतवान् ॥ ३९ ॥ येन भूतानां सुखाय पृथिव्या द्वीपविभागः कृतः नदीपर्वतादिभिः सीमाविभागश्च कृतः ॥ ४० ॥ यः पातालस्वर्गमनुष्यलोकानां वैभवं नरकतुल्यं मत्वा साधुप्रियः सन् पुनर्भगवतो भक्तिं चकार ॥ ४१ ॥ इति श्रीमद्भागवतचूर्णिकायां पंचमस्कंधे भुवनकोशे प्रियव्रतविजये प्रथमोऽध्यायः ॥१॥ ॥ द्वितीये प्रोक्तमाग्नीध्रचरित्रं स्त्रैणसंमतम् । पत्न्यां हि पूर्वचित्त्यां यो नाभिमुख्यानजीजनत् ॥ १ ॥ अस्मिन् वंशे प्रसिद्धोऽयमाग्नीध्रस्त्रैणपुंगवः ॥ विहसन्निव तस्येदं चरितं मुनिरब्रवीत् ॥ २ ॥ श्रीशुक उवाच ॥ एवं पितरि

प्रियव्रते भगवद्भजनतत्परे सति आग्नीध्रो राजा जंबुद्वीपस्थाः प्रजाः पुत्रवत्पालयामास ॥१॥ स कदाचित्पुत्रकामो मंदराचलगुहायां ब्रह्माणमाराधयामास ॥२॥ ब्रह्मा तज्ज्ञात्वा स्वसभायां गायंतीं पूर्वचित्तिं नामाप्सरसं तत्संभोगार्थं प्रेषयामास ॥ ३ ॥ सा चानेकवृक्षशाखासु प्रसृतस्वर्णवल्लीष्वारूढानां मयूरादिपक्षिणां शब्दैः प्रतिबोध्यमानजलकुक्कुटकारंडवादिभिर्विचित्रं नादितैः सकमलजलाशयै रमणीयं तदाश्रमोपवनं प्राप्येतस्ततः संचचार ॥४॥ तदा तस्या अनुपदं खणखणायमानचरणाभरणस्वनं श्रुत्वा राजा नेत्रे किंचिदुन्मील्य तां ददर्श ॥५॥ कथंभूतां ताम् । भ्रमरीमिव पुष्पाण्युपजिघ्रंतीं स्वगतिविहारविनयावलोकनादिभि-

स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवंतं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्याराधयांबभूव ॥ २ ॥ तदुपलभ्य भगवानादिपुरुषः सदसि गायंतीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥ ३ ॥ सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहंगममिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारंडवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ॥४॥ तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥५॥ तामेवाविदूरे मधुकरीमिव सुमनस उपजिघ्रंतीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडाविनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं निजमुखविगलितामृतासवसहासभाषणामोदमदांधमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पंदनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन विवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच ॥ ६ ॥ का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायाऽसि कापि भगवत्परदेवतायाः ॥ विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किंवा मृगान्मृगयसे विपिने प्रमत्तान् ॥७॥ बाणाविमौ भगवतः शतपत्रपत्रौ शांतावपुंखरुचिरावतितिग्मदंतौ ॥ कस्मै युयुंक्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥८॥ शिष्या इमे भगवतः परितः पठंति गायंति साम सरहस्यमजस्रमीशम् ॥ युष्मच्छिखाविलुलिताः सुमनोऽभिवृष्टीः सर्वे भजंत्यृषिगणा इव वेदशाखाः ॥ ९ ॥ वाचं परं चरणपंजरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ॥ लब्धा कदंबरुचिरंकविटंकबिंबे यस्यामलातपरिधिः क्व च वल्कलं ते ॥ १० ॥ ॥ ॥

नृणां मनसि कामस्य प्रवेशद्वारं कुर्वतीम् ।तदवलोकनेन राजा कामवशं गतः सन् जडवदुवाच॥६॥ हे मुनिवर्य[1], त्वं काऽसि । अस्मिन् गिरौ किं चिकीर्षसि । किं देवमायासि । मृगतुल्यान् मादृशान् विषयिणो वशीकर्तुं त्वं मौर्वीरहिते द्वे धनुषी[2] धारयसि किम् ॥ ७ ॥ वने विचरन् त्वं तीक्ष्णौ[3] बाणौ कस्मै प्रयोक्तुमिच्छसीति न विद्मः । तव पराक्रमोऽस्माकं कल्याणायास्तु ॥८॥ ते समंताद्भागे इमे शिष्याः[4] पठंति[5] तव शिखा[6]गलितानि पुष्पाणि सेवंते च ॥ ९ ॥ हे ब्रह्मन्,

---

१ मुनिवर्येत्यादि पुंस्त्वेन संबोधनादि जाड्यानुकरणार्थम् । २ भ्रुकुटी । ३ कटाक्षबाणौ । ४ भ्रमराः । ५ गुंजारवं कुर्वंति । ६ केशसमूहात्.

तव चरणपंजरस्थितानां पक्षिणां केवलं शब्दं श्रृणुमः । हे सखे, त्वया स्वनितंबस्य सुंदरमंडले कदंबपुष्पकांतिः क्व लब्धा ॥ १० ॥ हे द्विज, तव सुंदरयोः श्रृंगयोः किं पूर्णमस्ति । यत्र मे दृष्टिः संलग्नास्ति । तव श्रृंगयोररुणः पंकः कुतः। येन पंकेन ममाश्रमं सुगंधयुक्तं करोषि ॥११॥ हे सुहृत्तम, मम तावकं लोकं दर्शय। यत्रस्थो जन उरसैवंभूतौ मनःक्षोभकावपूर्वावयवौ बिभर्ति॥१२॥हे सखे, तव देहस्याहारः को वाऽस्ति । येनाहारेण सुगंध आयाति ॥१३॥ किंच। त्वद्धस्तताडितः कंदुको दिक्षु भ्रमन् भ्रमच्चित्तस्य मेऽक्षिणी चंचलतां नयति । वायुस्तव जटासमूहं हरंति तन्न स्मरसि किम्॥१४॥ तपश्चरतां तपोघ्नमिदं रूपं

किं संभृतं रुचिरयोर्द्विज श्रृंगयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ॥ पंकोऽरुणः सुरभिरात्मविषाण ईदृग्येनाश्रमं सुभग मे सुरभीकरोषि ॥ ११ ॥ लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ॥ अस्मद्विधस्य मन उन्नयनौ बिभर्ति बह्वद्भुतं सरसराससुधादिवक्त्रे ॥ १२ ॥ का वात्मवृत्तिरदनाद्धविरंग वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ॥ उद्विग्नमीनयुगलं द्विजपंक्तिशोचिरासन्नभृंगनिकरं सर इन्मुखं ते ॥ १३ ॥ योऽसौ त्वया करसरोजहतः पतंगो दिक्षु भ्रमन्भ्रमत एजयतेऽक्षिणी मे ॥ मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लंपट एष नीवीम् ॥ १४ ॥ रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ॥ चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किंवा प्रसीदति स वै भवभावनो मे ॥ १५ ॥ न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नम् ॥ मां चारुश्रृंग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरंतु शिवाः सचिव्यः ॥ १६ ॥ श्रीशुक उवाच ॥ इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ॥ १७ ॥ सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जंबूद्वीपपतिना भौमस्वर्गभोगान्बुभुजे ॥ १८ ॥ तस्यामु ह वा आत्मजान्स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् ॥ १९ ॥ सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥ २० ॥ आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जंबूद्वीपवर्षाणि बुभुजुः ॥ २१ ॥ ॥ ॥

केन तपसा त्वया लब्धम्। हे मित्र,मया सह तपश्चरितुं त्वमर्हसि ॥१५॥ हे द्विज, ब्रह्मणा दत्तं त्वामहं न त्यजामि। हे सुंदरवस्त्रयुक्ते कांते, यत्र ते मनस्तत्र मां नेतुमर्हसि॥१६॥ श्रीशुक उवाच ॥ एवं स्त्रीप्रार्थनायां कुशलः स आग्नीध्रस्तस्याः संमानं चक्रे ॥१७॥ अप्सराश्च तस्याग्नीध्रस्य बुद्धिशीलरूपवयःश्रियौदार्येण च मोहिता सती तेन जंबूद्वीपपतिना सह दशकोटिवर्षाणि भौमस्वर्गभोगान् बुभुजे ॥१८॥ तस्यामाग्नीध्रो–नाभिं किंपुरुषं हरिवर्षं इलावृतं रम्यकं हिरण्मयं कुरुं भद्राश्वं केतुमालं चेति नव पुत्रान् जनयामास॥१९॥साप्सरा नवसु वर्षेषु नव पुत्रान् प्रसूय राजानं त्यक्त्वा पुनर्ब्रह्माणं ययौ॥२०॥ते पुत्राः पित्रा यथाविभागं दत्तानि स्वनामभिः

---

१ नूपुराणाम् । २ पीतवस्त्रपरिधानम् । ३ स्तनयोः । ४ केशरकर्दमः । ५ स्तनौ । ६ तांबूलादिः । ७ वस्त्रम् ।

ख्यातानि जंबूद्वीपस्य नव खंडानि बुभुजः ॥२१॥ आग्नीध्रोऽपि तस्यामतृप्तः सन् तामेव ध्यायन् मृतः सन् तल्लोकं प्राप ॥ २२ ॥ एवं पितरि संपरेते सति तत्पुत्रा नाभिकिंपुरुषादयो नव भ्रातरो मेरुकंन्याः—मेरुदेवीं प्रतिरूपां उग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिं चेति नव परिणीतवंतः ॥२३॥ इति श्रीमद्भागवतचू॰पंच॰ द्वितीयोऽध्यायः ॥२॥ ॥ तृतीये चरितं नाभेः परं मंगलमीर्यते । यस्य यज्ञे प्रतीतः सन् पुत्रोऽभूदृषभो हरिः ॥१॥ श्रीशुक उवाच॥ आग्नीध्रपुत्रो नाभिः पुत्रकामः सन् मेरुदेव्या पत्न्या सह यज्ञपुरुषं भगवंतं यज्ञेनायजत॥१॥तत्र यज्ञे श्रद्धया शुद्धभावेन सम्यग्रीत्या यजनं कुर्वतस्तस्य सतो

आग्नीध्रो राजाऽतृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुंध यत्र पितरो मादयंते ॥ २२ ॥ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमिति संज्ञा नवोदवहन् ॥ २३ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे आग्नीध्रवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीशुक उवाच ॥ नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवंतं यज्ञपुरुषमवहितात्माऽयजत ॥ १ ॥ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमो हि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानंदनावयवाभिराममाविश्चकार ॥ २ ॥ अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयांबरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रवरमुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुराद्यंगभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ॥ ३ ॥ ऋत्विज ऊचुः ॥ अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो नम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान्प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥ ४ ॥ सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥ ५ ॥ परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वांकुरैरपि संभृतया सपर्यया किल परम परितुष्यसि ॥ ६ ॥ अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥ ७ ॥ आत्मन एवानुसवनमंजसा व्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किंतु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥ ८ ॥ ॥ ॥

दयया सर्वालंकारयुक्तो भगवान् प्रादुर्बभूव ॥ २ ॥ तदा चतुर्भुजं तेजोमयं पीतांबरधरं वक्षस्थले विलसच्छ्रीवत्सचिह्नं शंखचक्रगदादिभिः शोभितं मुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुराद्यंगभूषणैर्भूषितं हरिं दृष्ट्वा सर्वे ऋत्विगादयो नम्राः संतस्तं पूजयित्वा तुष्टुवुः ॥३॥ ऋत्विज ऊचुः ॥ हे पूर्ण, त्वत्सेवकानामस्माकं तव पूजनं नमो नम इत्येव सद्भिः शिक्षितम् । हे ईश, तवानंतगुणस्य गुणैकदेशवर्णनं विना स्वरूपवर्णनं कर्तुं को नाम पुमान् समर्थो भविष्यति न कोऽपि ॥ ४ ॥ ५ ॥ हे परम, भक्तैर्जलपल्लवतुलसीदूर्वांकुरैरपि संपादितया पूजया त्वं तुष्यसि॥६॥अन्यथा सर्वांगसंपन्नेन यागेनापि तवापेक्षितमर्थं नैव पश्यामः॥७॥हे नाथ, साक्षात्सकल-

पुरुषार्थस्वरूपस्य तवास्मिन् यज्ञे प्राकट्यप्रयोजनं न जानीमः । अथापि सकामानामस्माकं तवाराधनकरणमेव योग्यम् ॥८॥ हे ईश, स्वकल्याणमविदुषामज्ञानामस्माकं करुणया मोक्षाख्यं स्वस्थानं संपादयिष्यन् स्वयं पूजाद्यपेक्षारहितोऽपि सापेक्ष इव त्वमस्माभिर्दृष्टोऽसि ॥९॥ हे अर्हत्तम, यद्यपि त्वं वरान् दातुमाविर्भूतोऽसि तथापि त्वद्दर्शनमेवास्माकं वरोऽस्ति ॥१०॥ हे भगवन्, वैराग्यसंपन्नानामात्मारामाणां मुनीनामपि तव गुणवर्णनमेवानंदकरमस्ति एतादृशस्त्वमसि ॥११॥ अतो हे हरे, स्खलनक्षुधापतनजृंभणज्वरमरणदुःखस्थानादिषु पराधीनानां त्वां स्मर्तुमशक्तानां नः सकलदुःखनाशकानि तव नामान्यस्मद्वाण्यां प्रकटानि भवंतु ॥१२॥ अन्यच्च प्रार्थयामहे। अयं राजर्षिर्नाभिर्भवादृशीं प्रजामिच्छति तामिच्छां त्वं संपादय ॥१३॥ अपराजितया तव मायया को वा पुमान् न पराजितः । विषयविषलहरीभिरमोहितस्वभावश्च को वा न कोऽपि ॥१४॥ हे बहुकार्यकारिन्, अल्पकार्याय त्वं यदस्माभिरिह समाहूतोऽसि । तत्र मंदानां नो योऽपराधस्तं सोढुमर्हसि॥१५॥ एवं स्तोत्रेण स्तुतो हरिराह॥१६॥ श्रीभगवानुवाच॥ हे ऋषयः, अहं भवद्भिर्दुर्लभं वरं याचितोऽस्मि तथापि ब्रह्मवाक्यं मिथ्या भवितुं नार्हति॥१७॥ अतोऽहं कलया नाभिराजस्य पुत्रत्वेनावतरिष्यामि॥१८॥ इति शृण्वंत्यां मेरुदेव्यां भगवानुक्त्वांऽतर्दधे॥१९॥ हे राजन्, ततो नाभेः प्रियचिकीर्षया

तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परम परमपुरुषप्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन्स्वयं नापचित एवेतरवदिहोपलक्षितः ॥ ९ ॥ अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥ १० ॥ असंगनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणपरममंगलायनगुणगणकथनोऽसि ॥ ११ ॥ अथ कथंचित्स्खलनक्षुत्पतनजृंभणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवंतु ॥ १२ ॥ किंचायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवंतमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥ १३ ॥ को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्याऽनावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥ १४ ॥ यदुह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मंदानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान्प्रतिवोढुमविदुषाम् ॥ १५ ॥

॥ श्रीशुक उवाच ॥ इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवंदितचरणः सदयमिदमाह ॥ १६ ॥

॥ श्रीभगवानुवाच ॥ अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम् ॥ १७ ॥ तत आग्नीध्रीयेंऽशकलयाऽवतरिष्याम्यात्मतुल्यमनुपलभमानः ॥ १८ ॥ श्रीशुक उवाच ॥ इति निशामयंत्या मेरुदेव्याः पतिमभिधायांतर्दधे भगवान् ॥ १९ ॥ बर्हिषि तस्मिन्नेव विष्णुदत्तभगवान्परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान्दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमंथिनां शुक्लया तनुवावततार ॥ २० ॥ ॥ ॥

तत्पत्न्यां मेरुदेव्यां दिगंबराणां तपस्विनां ज्ञानिनां नैष्ठिकब्रह्मचारिणां च धर्मान् दर्शयितुकामो भगवान् सत्वमूर्त्याऽवततार ॥२०॥ इति श्रीमद्भागवतचू॰ पंचम॰ तृतीयोऽध्यायः ॥३॥ ॥ चतुर्थादित्रिभिः प्रोक्तमृषभस्येहितं महत् । लोकार्थं येन सत्कर्म नैष्कर्म्यं च निदर्शितम् ॥ १ ॥ चतुर्थे शतपुत्रस्य राज्यं तस्योपवर्ण्यते । यस्य राज्ये जनः सर्वः संतोषामृतनिर्वृतः ॥ २ ॥ श्रीशुक उवाच ॥ अथोत्पत्त्यैव तं भगवल्लक्षणयुक्तं ज्ञात्वा प्रधानाः प्रजा ब्राह्मणाश्चायं नो राजाऽस्त्वितीच्छां चक्रुः ॥१॥ तदा पिता नाभिः सुयशसा वीर्यशौर्यादिगुणैश्च श्रेष्ठत्वात्तस्य ऋषभ इति नाम चक्रे ॥ २॥ तस्यैश्वर्यादिगुणान् दृष्ट्वा स्पर्धमान इंद्रस्तस्य खंडे न ववर्ष । तदा ऋषभदेवः प्रहस्य स्वयोगबलेनाजनाभनामके स्वखंडे वृष्टिं चकार ॥३॥ नाभिः स्वेच्छया गृहीतमनुष्यदेहं हरिं सुपुत्रं प्राप्य

इति श्रीमद्भागवते महापुराणे पंचमस्कंधे नाभिचरिते ऋषभावतारो नाम तृतीयोऽध्यायः ॥३॥ ॥ श्रीशुक उवाच ॥ अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥ १ ॥ तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ २ ॥ तस्य हींद्रः स्पर्धमानो भगवान्वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ॥ ३ ॥ नाभिस्तु यथाभिलषितं सुप्रजास्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवंतं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन्परां निर्वृतिमुपगतः ॥ ४ ॥ विदितानुरागमापौरप्रकृतिजनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवंतं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥ ५ ॥ यस्य ह पांडवेय श्लोकावुदाहरंति ॥ को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥६॥ ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मंगलपूजिताः ॥ यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥७॥ अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयंत्यामिंद्रदत्तायामुभयलक्षणं कर्मसमाम्नायाम्नातमभियुंजन्नात्मजानामात्मसमानानां शतं जनयामास ॥ ८ ॥ ॥

प्रेमविह्वलो गद्गदवाण्या हे वत्स हे तातेति लालयन् परं हर्षं प्राप ॥४॥ ततः स्वपुत्रे सर्वेषां प्रीतिं दृष्ट्वा धर्मरक्षणार्थं तमृषभदेवं राज्येऽभिषिच्य ब्राह्मणानामुत्संगे निधाय स्वयं पत्न्या सह बदरिकाश्रमं गत्वा नरनारायणं सेवमानः कालेन मुक्तिं प्राप ॥५॥ एवं नाभेः प्रसिद्धं कर्म कः पुमानाचरेत् । यस्य शुद्धकर्मणा हरिः पुत्रत्वं प्राप्तः ॥६॥ यस्य च यज्ञे यथेच्छदक्षिणाभिः पूजिता विप्रा मंत्रबलेनेश्वरं दर्शयामासुः । तं नाभिं विना ब्राह्मणभक्तोऽन्यः कुत्रास्ति न कुत्रापि ॥ ७ ॥ अथ भगवान् ऋषभदेवः स्ववर्षं कर्मक्षेत्रं मन्यमानो लोकशिक्षार्थं गुरुगृहे ब्रह्मचर्यादिधर्मं चरित्वा गुर्वनुज्ञया गृहधर्मान् शिक्षयन् इंद्रदत्तायां जयंत्यां कन्यायां (स्वभार्यायां) शतं पुत्रान् जनयामास ॥ ८ ॥ ॥ ॥ ॥

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद्येनेदं वर्षं भारतमिति व्यपदिशंति ॥ ९ ॥ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इंद्रस्पृग्विदर्भः कीकट इति नव नवतिप्रधानाः ॥ १० ॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥ ११ ॥ इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥ १२ ॥ यवीयांस एकाशीतिर्जायंतेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥ १३ ॥ भगवानृषभसंज्ञ आत्मतंत्रः स्वयं नित्यनिवृत्तानर्थपरंपरः केवलानंदानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशांतो मैत्रः कारुणिको धर्मार्थयशःप्रजानंदामृतावरोधेन गृहेषु लोकं नियमयत् ॥ १४ ॥ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥ १५ ॥ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ॥ १६ ॥ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ॥ १७ ॥ भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वांछत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृंभितस्नेहातिशयमंतरेण ॥ १८ ॥ स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयंतीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयंत्रितानप्युपशिक्षयन्निति होवाच ॥ १९ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे चतुर्थोऽध्यायः ॥४॥ ॥ ऋषभ उवाच ॥ नायं देहो देहभाजां नृलोके कष्टान्कामानर्हते विड्भुजां ये ॥ तपो दिव्यं पुत्रका येन सत्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनंतम् ॥१॥

येषां मध्ये महायोगी ज्येष्ठो भरत आसीत् । येनेदं वर्षं भारतमिति कथयंति ॥९॥ तदनुजाः—कुशावर्तः इलावर्तः ब्रह्मावर्तः मलयः केतुः भद्रसेनः इंद्रस्पृक् विदर्भः कीकट इति नव पुत्रा नवति९०पुत्राणां ज्येष्ठाः ॥१०॥ कविः हरिः अंतरिक्षः प्रबुद्धः पिप्पलायनः आविर्होत्रः द्रुमिलः चमसः करभाजनः एते नव महाभागवताः । एतेषां चरितं वसुदेवनारदसंवादरूपेणैकादशे वक्ष्यते ॥११॥१२॥ एकाशीतिमिताः ८१ पितुराज्ञाकराः कनिष्ठाः पुत्राः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥१३॥ अथ भगवानृषभो गृहस्थधर्मं शिक्षयन् स्वयं गृहस्थाश्रमं चकार ॥ १४ ॥ यद्यच्छ्रेष्ठ आचरति तत्तल्लोकोऽनुवर्तते ॥ १५ ॥ सकलधर्मयुक्तं वेदोक्तं धर्मरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैः सर्वलोकान् शिक्षयामास ॥ १६ ॥ द्रव्यदेशकालादिसमृद्धैः सर्वैरपि यज्ञैर्यज्ञेश्वरं भगवंतं यथाशास्त्रं शतवारमीजे॥१७॥ यस्य राज्ये कश्चन पुरुषो राजनि स्नेहातिशयं विनाऽत्मनः कंचन पदार्थं केनापि कारणेनान्यस्मात्पुरुषान्न वांछति ॥१८॥ स ऋषभः कदाचित्पृथिव्यां संचरन् ब्रह्मावर्तं गतः सन् ब्रह्मर्षिश्रेष्ठसभायां प्रजानां शृण्वतीनां सतीनां ज्ञानिनोऽपि पुत्रान् लोकानामनुशासनार्थं शिक्षयन् जगाद ॥१९॥ इति श्रीमद्भागवतचू॰ पंचम॰ चतुर्थोऽध्यायः ॥ ४ ॥ ॥ पंचमे मोक्षधर्मोपदेशैः पुत्रानुशासनम् । उक्तं पारमहंस्यं च तस्य द्वंद्वतितिक्षया ॥ १ ॥ ऋषभ उवाच ॥ हे पुत्रकाः, मनुष्यलोके देहधारिणामयं देहो विष्ठाभोजिनां सूकराणामिव विषयभोगयोग्यो न भवति । किंतु दिव्यं

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगम् ॥ महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये ॥ २ ॥ ये
वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्तिकेषु ॥ गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ ३ ॥ नूनं
प्रमत्तः कुरुते विकर्म यदिंद्रियप्रीतय आपृणोति ॥ न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः ॥ ४ ॥ पराभवस्तावद्बोधजातो
यावन्न जिज्ञासत आत्मतत्त्वम् ॥ यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबंधः ॥ ५ ॥ एवं मनः कर्मवशं
प्रयुंक्ते अविद्ययात्मन्युपधीयमाने ॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ ६ ॥ यदा न पश्यत्ययथा
गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ॥ गतस्मृतिर्विंदति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ॥ ७ ॥ पुंसः स्त्रिया मिथुनीभावमेतं
तयोर्मिथो हृदयग्रंथिमाहुः ॥ अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहंममेति ॥ ८ ॥ यदा मनोहृदयग्रंथिरस्य
कर्मानुबद्धो दृढ आश्लथेत ॥ तदा जनः संपरिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुम् ॥ ९ ॥ हंसे गुरौ मयि भक्त्यानुवृत्त्या
वितृष्णया द्वंद्वतितिक्षया च ॥ सर्वत्र जंतोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ १० ॥ मत्कर्मभिर्मत्कथया च नित्यं
मद्देवसंगाद्गुणकीर्तनान्मे ॥ निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ॥ ११ ॥ अध्यात्मयोगेन विविक्तसेवया
प्राणेंद्रियात्माभिजयेन सध्र्यक् ॥ सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचाम् ॥ १२ ॥ सर्वत्र मद्भावविचक्षणेन ज्ञानेन
विज्ञानविराजितेन ॥ योगेन धृत्युद्यमसत्वयुक्तो लिंगं व्यपोहेत्कुशलोऽहमाख्यम् ॥ १३ ॥ ॥ ॥

तपः कर्तुं योग्योऽस्ति । येन तपसा शुद्धांतःकरणद्वाराऽनंतं ब्रह्मसुखं प्राप्यते ॥१॥ किंच । महत्सेवां मुक्तेर्द्वारमाहुः । स्त्रीसंगिनां संगं संसारस्य द्वारमाहुः ।
महतां लक्षणमाह । ये समचित्ताः शांताः सर्वसुहृदः गतक्रोधाः सदाचाराः विषयिजनेषु स्त्रीपुत्रादियुक्तगृहेषु च प्रीतिरहितास्ते महांतः ॥२॥३॥ अयं लोको
यदेंद्रियप्रीत्यर्थं विषयसंपादको भवति । तदा प्रमत्तः सन् पापं करोति । यतः प्राचीनकर्मणः सकाशादयं देहो जातः । अतस्तस्यैव कर्मणः पुनराचरणमहं
साधु न मन्ये ॥४॥ यावदात्मतत्त्वं न ज्ञायते तावदज्ञानकृतः संसारो भवति । तत्र हेतुः । यावत्कालं कर्माणि प्रवर्तंते तावत्कर्मस्वभावमेव मनः स्यात् । येन
मनसा शरीरबंधो भवति ॥५॥ एवमविद्ययात्मन्याच्छाद्यमाने सति मनः कर्तृ भूत्वा पुरुषं कर्मवशं प्रयुंक्ते । यावद्वासुदेवे पुरुषः प्रीतिं न करोति तावद्देहयोगेन न मुच्यते ॥६॥ यदा च स्वार्थेऽसावधः पुमान् विषयासक्तिं मिथ्याभूतां न पश्यति तदा स्वरूपस्मृतिशून्यः सन् मैथुनसुखं गृहं प्राप्य तत्र तापान्
विंदति ॥ ७ ॥ स्त्रीपुंसोर्मिथुनीभावमेव तयोर्मिथो हृदयग्रंथिमाहुः ॥८॥ यदा चास्य पुंसः कर्मभिरनुबद्धो मनोरूपो हृदयग्रंथिर्ज्ञानेन शिथिलो भवति । तदायं
मिथुनीभावादिरूपात्संसारान्निवृत्त्याहंकारं त्यक्त्वा मुक्तसंगः सन् परं पदं याति ॥९॥ तत्र साधनान्याह । गुरुरूपे मयि भक्त्या शीतोष्णादिद्वंद्वसहनेन परलोकेऽपि
दुःखानुसंधानेनात्मज्ञानेच्छया तपसा काम्यकर्मत्यागेन ॥ १० ॥ मदर्पणकर्मभिर्मत्कथया साधुसंगेन मद्गुणकीर्तनेन ॥ ११ ॥ प्राणेंद्रियमनोजयेन
अध्यात्मशास्त्राभ्यासेन ब्रह्मचर्येण ॥ १२ ॥.सर्वत्र मद्भावनया समाधियोगेन अन्यैश्च साधनैरहंकारं निरस्य ॥ १३ ॥ ॥ ॥

आत्मचिंतने सावधानः सन् हृदयग्रंथिं दूरीकृत्य साधनादुपरमेत् ॥१४॥ मदनुग्रहेच्छुः पिता–पुत्रान्, गुरुः–शिष्यान्, नृपः–प्रजाश्च कर्मसु न योजयेत् । मनुष्यः काम्यकर्मसु पुरुषं योजयन् संसारकूपे पातयति ॥१५॥ स्वकल्याणे ज्ञानशून्यो लोकोऽतिशयेन विषयवासनायुक्तः सन् द्रोहेण परद्रव्यादीन् पदार्थानिच्छति । परंतु द्रोहाद्भविष्यं नरकपाताद्यनंतदुःखं न जानाति ॥ १६ ॥ तं तादृशं कुबुद्धिं नरं दयालुः कः पुमान् पुनस्तस्मिन्नेव मार्गे प्रवर्तयेन्न कोऽपि ॥१७॥ यो भक्तिमार्गोपदेशेन संसारान्नरं न मोचयेत् स गुरुर्न स्यात् । स स्वजनः पिता माता पतिश्च न स्यात् ॥१८॥ इदं मनुष्याकारं मत्स्वरूपं मदिच्छाविलसितमस्ति न त्वहं प्राकृतो मनुष्यः । यत्र धर्मस्तिष्ठति तच्छुद्धसत्वरूपं मे हृदयमस्ति । यस्मान्मयाऽधर्मो दूरतस्त्यक्तस्तस्मान्मामार्या ऋषभमित्याहुः

कर्माशयं हृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः ॥ अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ॥ १४ ॥ पुत्रांश्च
शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः ॥ इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान् ॥ कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥ १५ ॥ लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः ॥ अन्योऽन्यवैरः सुखलेशहेतोरनंतदुःखं च न वेद मूढः ॥ १६ ॥ कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामंतरे वर्तमानम् ॥ दृष्ट्वा पुनस्तं
सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथांधम् ॥ १७ ॥ गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ॥
दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥ १८ ॥ इदं शरीरं मम दुर्विभाव्यं सत्वं हि मे हृदयं यत्र धर्मः ॥
पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्याः ॥ १९ ॥ तस्माद्भवंतो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् ॥
अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥ २० ॥ भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ॥ ततो
मनुष्याः प्रमथास्ततोऽपि गंधर्वसिद्धा विबुधानुगा ये ॥ २१ ॥ देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम् ॥ भवः
परः सोऽथ विरिंचवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥ २२ ॥ न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः किमतः परं तु ॥
यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे ॥ २३ ॥ धृता तनूरुशती मे पुराणी येनेह सत्वं परमं पवित्रम् ॥
शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ॥ २४ ॥ ॥ ॥ ॥ ॥

॥१९॥ तस्मान्मद्धृदयाज्जाताः हे पुत्राः, सर्वे यूयं ईर्ष्यां हित्वामुं ज्येष्ठं भरतं भजध्वम् । तद्भजनेनैव मे शुश्रूषा प्रजापालनं च स्यात् ॥ २० ॥ इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह । स्थावरजंगमप्राणिषु मध्ये पश्वादयः श्रेष्ठाः । तेभ्योऽपि मनुष्याः श्रेष्ठाः । तेभ्योऽपि देवयोनयो गंधर्वादयः श्रेष्ठाः । तेभ्यः सिद्धास्तेभ्यः किंनरादयः श्रेष्ठाः ॥२१॥ तेभ्योऽसुरास्तेभ्यो देवास्तेभ्य इंद्रस्तस्माद्दक्षादयो ब्रह्मपुत्रास्तेषां मध्ये शिवस्तस्माद्ब्रह्मा तस्मादहं विष्णुः । मत्तोऽपि ब्राह्मणाः श्रेष्ठाः ॥२२॥ ब्राह्मणैस्तुल्यमन्यं कमपि न पश्ये । यस्य ब्राह्मणस्य मुखे हुतं यथाहमश्नामि तथाग्निहोत्रे नाश्नामि ॥ २३ ॥ येन ब्राह्मणेनेह लोके वेदाख्या मे मूर्तिर्धृता । यस्मिंश्च ब्राह्मणे सत्वं शमः दमः सत्यं अनुग्रहः तपः सहनशक्तिः अनुभवश्चैतेऽष्टौ गुणाः संति तस्माद्ब्राह्मणाच्छ्रेष्ठं किम-

स्ति न किमपि ॥२४॥ निःस्पृहत्वमाह । येषां मद्भक्तानां मत्तोऽपि किंचित्प्रार्थनीयं नास्ति। तेषां राज्यादिना किं कर्तव्यं स्यान्न किमपि॥२५॥ किंच । हे पुत्राः, भवद्भिः सर्वभूतेषु मद्भावना कार्या। तदेव मम पूजनं स्यात् ॥२६॥ मनोवचोदृष्टीनामितरेषामिंद्रियाणां च व्यापारस्य मदाराधनमेव साक्षात्फलं स्यात् । तेन विना कालपाशादात्मानं मोचयितुं कोऽपि समर्थो न भवेत् ॥२७॥ श्रीशुक उवाच ॥ एवं ऋषभाख्यो भगवान् पुत्राननुशास्य मुनीनां पारमहंस्यधर्मं शिक्षयन् भरतं राज्येऽभिषिच्यात्मन्यग्निं समारोप्य देहमात्रावशेषितः सन् उन्मत्त इव नग्नो भूत्वा ब्रह्मावर्ताद्देशात्प्रवव्राज ॥ २८॥ जडांधमूकबधिरपिशाचवदव-

मत्तोऽप्यनंतात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित्॥ येषां किमु स्यादितरेण तेषामकिंचनानां मयि भक्तिभाजाम् ॥ २५॥
सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि ॥ संभावितव्यानि पदे पदे वो विविक्तदृग्भिस्तदुहार्हणं मे ॥ २६॥
मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि ॥ विना पुमान्येन महाविमोहात्कृतांतपाशान्न विमोक्तुमीशेत् ॥ २७ ॥

॥ श्रीशुक उवाच ॥ एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥ २८ ॥ जडांधमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥ २९ ॥ तत्र तत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखंडितमनाः पृथिवीमेकचरः परिबभ्राम ॥ ३० ॥ अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुंदरस्वभावहाससुमुखो नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः सदृशसुभगकपोलकर्णकंठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुपदधानः परागवलंबमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ॥३१॥ यर्हि वाव स भगवान्लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः ॥ ३२ ॥ ॥

धूतवेषो जनैरभिभाष्यमाणोऽपि तूष्णीं बभूव ॥२९॥ तत्र तत्र पुरग्रामखेटादिषु दुर्जनैः– भयजननं ताडनं उपरि मूत्रणं श्लेष्मप्रक्षेपः पाषाणविष्ठाधूलिप्रक्षेपः अधोवायुमुंचनं शापश्चेत्यादिभिः पीडितोऽपि देहे ममतां हित्वा स्थिरमनाः सन् पृथ्वीं बभ्राम ॥ ३० ॥ किंच । अतिसुकुमारैः सुंदरैर्हस्तपादवक्षस्थलमुखाद्यवयवैर्गूढहास्ययुक्तमुखविलासेन च पुरस्त्रीणां मनसि कामं समुद्दीपयन् लोकानां पिशाचादिभिराक्रांत इवादृश्यत ॥ ३१ ॥ तत आजगरीं वृत्तिं श्रितः

सन् शयान एवाश्नाति खादति पिबति मूत्रयति पुरीषमुत्सृजति पुरीषे विलुठन् तेनैव लिप्तदेह आस्ते स्म॥३२॥ तस्य पुरीषसुगंधो दशयोजनं समंतात्प्रदेशमनुवासयति ॥३३॥ एवं गोमृगकाकचर्यया व्रजन् तिष्ठन्नासीनः शयानः पिबति खादति मूत्रयति स्म॥३४॥ एवं नानायोगचर्याचरणो भगवान् ऋषभ आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽभेदेन स्थितः सन् संकल्पं विनैव मध्ये प्राप्तानि–आकाशसंचारित्वं मनोवेगः अंतर्धानं परकायप्रवेशः दूरदर्शनं दूरश्रवणमित्यादीनि योगैश्वर्याणि मनसापि नैच्छत् ॥३५॥ इति श्रीमद्भागवतचूर्णिकायां पंचम० पंचमोऽध्यायः ॥ ५ ॥ ॥ षष्ठे लीनाभिमानस्य देहत्यागक्रमाभिधा । प्रदहंतं दवाग्निं यः पश्यन्नपि न पश्यति ॥१॥ राजोवाच ॥ हे भगवन्, आत्मारामाणां योगिनां यदृच्छया प्राप्तानि योगै-

तस्य ह यः पुरीषसुरभिसौगंध्यवायुस्तं देशं दशयोजनं समंतात्सुरभिं चकार ॥ ३३ ॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म ॥ ३४ ॥ इति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽविरतपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानंतरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवांतर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृदयेनाभ्यनंदत् ॥ ३५ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते पंचमोऽध्यायः ॥ ५ ॥ ॥ राजोवाच ॥ न नूनं भगव आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हंति यदृच्छयोपगतानि ॥ १ ॥ ऋषिरुवाच ॥ सत्यमुक्तं किंत्विह वा एकेन मनसोऽद्धा विश्रंभमनवस्थानस्य शठकिरात इव संगच्छंते ॥ २ ॥ ॥ तथा चोक्तम् ॥ न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते ॥ यद्विश्रंभाच्चिराचीर्णं चस्कंद तप ऐश्वरम् ॥ ३ ॥ नित्यं ददाति कामस्य छिद्रं तमनु येऽरयः ॥ योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ ४ ॥ कामो मन्युर्मदो लोभः शोकमोहभयादयः ॥ कर्मबंधश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ॥ ५ ॥ अथैवमखिललोकपालललामोऽपि विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन्स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥ ॥ ॥ ॥

श्वर्याणि क्लेशदानि न भवंति । एवं सति ऋषभः कुतो नागृह्णात्तद्वद ॥ १ ॥ श्रीशुक उवाच ॥ हे राजन्, भवता सत्यमुक्तम् । तथापि ज्ञानिनश्चंचलस्य मनसो विश्वासं न कुर्वंति ॥२॥ तथा चोक्तम् । मनसो विश्वासेन शंकरस्यापि चिरसंचितं तपो विष्णोर्मोहिनीरूपदर्शनेन सुस्राव । अतोऽस्थिरेण मनसा सह कर्हिंचिदपि सख्यं न कुर्यात् ॥३॥ मनसा सह कृतविश्वासस्य योगिनो मनः कामादीनामवकाशं दत्वा योगिनं भ्रंशयति । यथा कृतविश्वासस्य पत्युर्जारिणी स्त्री जाराणामवकाशं दत्वा पतिं घातयति तद्वत् ॥४॥ तथाहि । कामक्रोधमदलोभादयो मनसो निमित्ताद्भवंति । एवंभूतं मनः स्वाधीनं जातमिति को मन्येत न कोऽपि ॥५॥ अथ सर्वलोकपालश्रेष्ठो भगवानृषभदेवो योगिनां देहत्यागप्रकारं दर्शयन् स्वकलेवरं त्यक्तुमिच्छुः शांतो बभूव ॥ ६ ॥ ॥

तस्य ह वा एवं मुक्तलिंगस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः कोंकवेंककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्मकवल उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥ ७ ॥ अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥ ८ ॥ यस्य किलानुचरितमुपाकर्ण्य कोंकवेंककुटकानां राजाऽर्हन्नामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाषंडमसमंजसं निजमनीषया मंदः संप्रवर्तयिष्यते ॥ ९ ॥ येन ह वाव कलौ मनुजापसदा देवमायामोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजनिजेच्छया गृह्णाना अस्नानानाचमनाशौचकेशोल्लुंचनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यंति ॥ १० ॥ ते च ह्यर्वाक्तनया निजलोकयात्रयांधपरंपरयाश्वस्तास्तमस्यंधे स्वयमेव प्रपतिष्यंति ॥ ११ ॥ अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः ॥ तस्यानुगुणान् श्लोकान्गायंति ॥ १२ ॥ अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ॥ गायंति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवंति ॥ १३ ॥ अहो नु वंशो यशसाऽवदातः प्रैयव्रतो यत्र पुमान्पुराणः ॥ कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥ १४ ॥ कोऽन्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेनाप्यभवस्य योगी ॥ यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ॥ १५ ॥ इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणम् ॥ परममहामंगलायनमिदमनुश्रद्धयोपचितयानुशृणोत्याश्रावयति वाऽवहितो भगवति तस्मिन्वासुदेव एकांततो भक्तिरनयोरपि समनुवर्तते ॥ १६ ॥ ॥ ॥ ॥

त्यक्तेऽप्यभिमाने किंचिदभिमानाभासेन तस्य देहः प्रावर्तत । स च देहः कोंकवेंककुटकान् दक्षिणकर्णाटकान् देशान् गतः सन् कुटकपर्वतस्योपवने मुखे कृतपाषाणकवल उन्मत्त इव मुक्तकेशो नग्न एव विचचार ॥ ७ ॥ अथ वायुवेगेन कंपितवेणूनां संघर्षणेनोत्पन्नः प्रचंडो दावानलस्तद्वनं सर्वतो ग्रसन् ऋषभेण सह वनं ददाह ॥८॥ अथ ऋषभाचरितं श्रुत्वा कोंकवेंककुटकानामर्हन्नाम राजा भवितव्येन विमोहितः सन् स्वधर्मं त्यक्त्वा कुपथपाखंडं स्वबुद्ध्या कलौ प्रवर्तयिष्यति ॥९॥ येन पाखंडेन देवमायामोहिता जना विहितस्नानाचमनशौचाचारविहीनाः संतो निजेच्छया देवावज्ञानरूपाण्यस्नानानाचमनकेशोत्पाटनादीनि कुव्रतानि गृह्णाना अधर्मेण वेदब्राह्मणयज्ञपुरुषादिविदूषका भविष्यंति ॥ १० ॥ ते जना अवेदमूलयांधपरंपरया स्वेच्छाप्रवृत्त्या नरके पतिष्यंति ॥११॥ अयमवतारो रजोगुणव्याप्तजनानां मोक्षमार्गशिक्षणार्थः । तस्य गुणान् गायंति ॥१२॥ अहो सप्तसमुद्रवत्या भुवो द्वीपेषु सर्वखंडेषु च मध्ये भारतं खंडमधिकं पुण्यस्थानम् । यत्र स्थिता जना हरेर्ऋषभावतारस्य मंगलकारकाणि कर्माणि गायंति ॥१३॥ अहो प्रियव्रतस्य वंशो यशसा शुद्धः । यस्मिन् वंशे धृतावतारः पुराणपुरुषो ऋषभो मोक्षधर्मं चचार ॥१४॥ अपरो योगी मनोरथेनाप्यस्य ऋषभस्य मार्गं को गच्छेत् न कोऽपि ॥ १५ ॥ एवं परमगुरोर्ऋषभा-

ख्यस्य चरितं सर्वपातकहरं परममंगलायनं ते कथितम् । य इदं श्रृणोति श्रावयति वा तयोर्भगवति वासुदेवे एकांतभक्तिर्भवति ॥१६॥ यस्यां भक्त्यां कवयः स्वात्मानं रात्रंदिनं स्नापयंतो मोक्षसुखं नैवाद्रियंते ॥१७॥ हे राजन्, मुक्तिदाता भगवान् युष्माकं पांडवानां यादवानां च रक्षको धर्मोपदेष्टा उपास्यो मित्रः कदाचित्किंकरोऽपि जात इति निःसीमभक्तानां वार्ता अस्तां तथापि अन्येषां नित्यं भजतामपि मुकुंदो मुक्तिं ददाति न तु कदाचित्सप्रेमभक्तियोगम् ॥१८॥ यः स्वरूपलाभेन निवृत्ततृष्णोऽपि करुणया लोकस्यात्मरूपं कथितवांस्तस्मै ऋषभाय नमोऽस्तु ॥१९॥ इति श्रीम०पंच०ऋषभाख्यानं नाम षष्ठोऽध्यायः ॥६॥ अध्यायानां त्रयेणैवमृषभाख्यानमीरितम् । अष्टभिर्भरताख्यानमतः प्रस्तूयतेऽमृतम् ॥ १ ॥ सप्तमे भरतो राज्ये चिरं यज्ञैर्हरिं यजन् । आरब्धकर्मनिर्वाणे

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयंतस्तयैव परया निर्वृत्या ह्यपवर्गमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियंते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥ १७ ॥ राजन्पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः ॥ अस्त्वेवमंग भगवान्भजतां मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ १८ ॥ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ॥ लोकस्य यः करुणयाभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ १९ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते षष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीशुक उवाच ॥ भरतस्तु महाभागवतो यदा भगवतावनितलपरिपालनाय संचिंतितस्तदनुशासनपरः पंचजनीं विश्वरूपदुहितरमुपयेमे ॥ १ ॥ तस्यामु ह वा आत्मजान्कात्स्न्र्येनानुरूपानात्मनः पंच जनयामास भूतादिरिव भूतसूक्ष्माणि ॥ २ ॥ सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशंति ॥ ३ ॥ स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः पर्यपालयत् ॥ ४ ॥ ईजे च भगवंतं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ॥ ५ ॥ संप्रचरत्सु नानायागेषु विरचितांगक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिंगानां मंत्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान्पुरुषावयवेष्वभ्यध्यायत् ॥ ६ ॥ ॥ ॥

हरिक्षेत्रेऽभजद्धरिम् ॥ २ ॥ श्रीशुक उवाच ॥ भरतस्तु महाभागवतो यदा स्वपित्रा ऋषभेण पृथ्वीपालनाय योजितस्तदा तस्याज्ञापरो भूत्वा विश्वरूपकन्यां पंचजनीं नामोपयेमे ॥१॥ स तस्यां स्वसदृशान् पंच पुत्रान् जनयामास ॥२॥ सुमतिं राष्ट्रभृतं सुदर्शनं आवरणं धूम्रकेतुमिति । किंच । पूर्वमजनाभं नामैतद्वर्षं यस्य नाम्ना भारतमिति कथयंति ॥३॥ एवंभूतो राजा भरतः स्वकर्मनिष्ठाः प्रजाः पितृवत्पालयामास ॥४॥ स यज्ञेश्वरं हरिमग्निहोत्रादिभिः सर्वैर्यज्ञैर्निष्कामत्वेनेजे ॥५॥ प्रवर्तमानेषु नानायागेषु अपूर्वं धर्मनामकं यत् क्रियाफलं तद्भगवति वासुदेवे चिंतयन् यज्ञभाजः सूर्यादिदेवान् भगवतश्चक्षुराद्यवयवेषु

दध्यौ ॥६॥ एवंवर्तमानस्य भरतस्य वासुदेवे भगवति भक्तिः प्रतिदिनं वृद्धिं जगाम ॥७॥ एवं कोटिवर्षपर्यंतं राज्यं भुक्त्वा पुत्रेभ्यो यथाविभागं धनं विभज्य स्वयं सर्वसंपत्तिं विहाय स्वगृहात्पुलहाश्रमं हरिक्षेत्रं जगाम ॥८॥ यत्र क्षेत्रे विद्याधरकुंडे हरिरद्यापि तत्रत्यानां भक्तानां सांनिध्यं ददाति॥९॥ऊर्ध्वमधश्च नाभिसहितैर्मध्यगतचक्रैर्युक्ताभिः शालग्रामशिलाभिः पूर्णा नदीश्रेष्ठा गंडकी यत्राश्रमस्थानानि पवित्रीकरोति ॥१०॥ तत्राश्रमेऽनेकपुष्पतुलसीजलैः कंदमूलफलोपहारैश्च भगवत्पूजां कुर्वन् परां निर्वृतिं प्राप ॥११॥ एवं पूजाभक्तियोगेन भगवति प्रेम्णा शिथिलहृदयो रोमांचिततनुः प्रेमाश्रुपूर्णनयनो भगवच्चरणध्यानादिभक्तियोगेन परमानंदे निमग्नः सन् क्रियमाणां तां पूजामपि न सस्मार ॥१२॥ एवं भगवदाराधननियमधरः कृष्णमृगचर्मवासास्त्रिकालस्नानेनार्द्रा धूम्राश्च या वक्रजटास्तासां समुदायेन रोचमानो भरतः सूर्य उदिते सति हिरण्मयं पुरुषं ध्यायन् जगाद ॥ १३ ॥ सूर्यस्य सर्वकर्मफलप्रदं जगदुत्पत्तिस्थितिसंहारकरं तेजःप्रति वयं शरणं व्रजामः ॥१४॥ इति श्रीमद्भागवतचू० पंचमस्कंधे भरतचरिते सप्तमोऽध्यायः ॥७॥ ॥ अष्टमे भजतो विष्णुं तस्य कर्मांतरायतः । एणरक्षाप्रसक्तस्य जातमेणत्वमीर्यते ॥१॥ कृपयापि कृतः संगः पतनायैव योगिनः । इति प्रदर्शयन्नाह भरतस्यैणपोषणम् ॥२॥ श्रीशुक उवाच ॥ हे राजन्, एकदा भरतो गंडक्यां नद्यां स्नानादिनित्यनैमित्तिकविधिं कृत्वा प्रणवं जपन् मुहूर्तत्रयं नद्यास्तीर उपविवेश ॥ १ ॥ ॥ ॥

एवं कर्मविशुद्ध्या विशुद्धसत्वस्यांतर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालारिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽजायत ॥ ७ ॥ एवं वर्षायुतसहस्रपर्यंतावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसंपन्निकेतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥८॥ यत्र ह वाव भगवान्हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन संनिधाप्यत इच्छारूपेण ॥९॥ यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदीनाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥१०॥ तस्मिन्वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकांबुभिः कंदमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ॥११॥ तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविंदानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगंभीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार ॥१२॥ इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवंतं हिरण्मयं पुरुषमुज्जिहाने सूर्यमंडलेऽभ्युपतिष्ठन्नेतदुहोवाच ॥ १३ ॥ परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ॥ सुरेतसाऽदः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिंगिरामिमः ॥ १४ ॥ इति श्री० म० पं० भरतचरिते भगवत्परिचर्यायां सप्तमोऽध्यायः ॥७॥ श्रीशुक उवाच ॥ एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकांत उपविवेश ॥ १ ॥

तदा तत्रैका गर्भिणी हरिणी पियासया जलसमीपे आजगाम ॥२॥ तया अत्यासक्त्या उदके पीयमाने सति तदैव समीपे सिंहस्य भयंकरः शब्दो बभूव ॥३॥ तं श्रुत्वा सा हरिणी सिंहभयेन परिभ्रांतनेत्रा अगततृषा सहसैव नदीमुल्लंघितवती ॥ ४ ॥ तदा गर्भवत्यास्तस्या उड्डानसमये योनिद्वारा बहिर्निर्गतो गर्भः प्रवाहे निपपात ॥५॥ तद्दुःखेनातुरा सा मृगी कस्यांचित्पर्वतगुहायां गत्वा निपपात ममार च ॥ ६ ॥ ततस्तं हरिणबालं प्रवाहेनोह्यमानं वीक्ष्य राजर्षिर्भरतो मृतमातरमिति मत्वा कृपया स्वाश्रमं निनाय ॥७॥ तस्मिन् बालके स्वीय इत्यभिमानेनानुदिनं तत्पालनपोषणचुंबनादिना हरिपूजादिनियमाः सर्वे शनैरुत्स-

तत्र तदा राजन्हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम ॥२॥ तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयंकर उदपतत् ॥३॥ तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम ॥४॥ तस्या उत्पतंत्या अंतर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात ॥५॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती निपपाताथ च ममार ॥६॥ तं त्वेणकुणकं कृपणं स्रोतसानूह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत् ॥७॥ तस्य ह वा एणकुणक उच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥८॥ अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बंधुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुनानुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ९ ॥ नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षंते ॥१०॥ इति कृतानुषंग आसनशयनाटनस्थानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ ११ ॥ कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकसालावृकादिभ्यो भयमाशंसमानो यदा सह हरिणकुणकेन वनं समाविशति ॥ १२ ॥ पथिषु च मुग्धभावेन तत्रतत्र विषक्तमतिप्रणयभरहृदयः कार्पण्यात्स्कंधेनोद्वहति एवमुत्संग उरसि चाधायोपलालयन्मुदं परमामवाप ॥१३॥ क्रियायां निर्वर्त्यमानायामंतरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ते सर्वत इति १४

न्ना बभूवुः ॥८॥ अयं हरिणबालकः स्वबंधुवर्जितो मामेव मातापित्रादिबुद्ध्या प्राप्तः । अतोऽवश्यं मयास्य पोषणपालनादिकं कार्यम् ॥९॥ नूनमार्याः कृपणसुहृद एवंविधेऽर्थे गुरुतरानपि स्वार्थानुपेक्षंते ॥१०॥ एवमासनशयनसंचारभोजनादिषु मृगबालेन सह स्नेहासक्तचित्त आसीत् ॥ ११ ॥ यदा कुशपुष्पफलमूलादीनानेतुमिच्छति तदापि वृकादिभ्यो भयं शंकमानो मृगेण सह वनं प्रविशति ॥१२॥ तदा च मार्गे मुग्धभावेन सक्तं स्कंधेनोद्वहति । एवमुत्संगे उरसि च निधाय लालयन् परमं हर्षं प्राप ॥१३॥ कदाचिद्देवपूजादिकर्मणि प्रवृत्ते सति मध्ये वारंवारमुत्थाय यदा बालं पश्यति तदा हे वत्स, ते स्वस्ति भूयादेव-

अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन्किल कश्मलं महदभिरंभित इति होवाच ॥ १५ ॥ अपि बत स वै कृपण एणबालको मृतहरिणीसुतोऽहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रंभ आत्मप्रत्ययेन तदविगणयन्सुजन इवागमिष्यति ॥ १६ ॥ अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरंतं देवगुप्तं द्रक्ष्यामि ॥ १७ ॥ अपि च न वृकः सालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति ॥ १८ ॥ निम्लोचति ह भगवान्सकलजगत्क्षेमोदयस्त्रय्यात्माऽद्यापि मम न मृगवधून्यास आगच्छति ॥ १९ ॥ अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसंतोषं स्वानामपनुदन् ॥ २० ॥ क्ष्वेलिकायां मां मृषासमाधिनाऽऽमीलितदृशं प्रेमसंरंभेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति ॥ २१ ॥ आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितकरणकलाप आस्ते ॥ २२ ॥ किंवा अरे आचरितं तपस्तपस्विन्याऽनया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुरपदपंकिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयंत्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ॥ २३ ॥ अपिस्विदसौ भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकंपया कृपणजनवत्सलः परिपाति ॥ २४ ॥ किंवात्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशांतानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयतीति च ॥ २५ ॥ ॥ ॥

माशिषं ददाति ॥१४॥ एकदा स हरिणबालकः किंचित्प्रौढः सन् पलाय्य दूरं गतः। तदा हरिणवियोगेन विह्वलचित्तः स राजा मोहं प्राप्तः सन् जगाद ॥१५॥ अयं मृगबालको निर्भाग्यस्य ममापराधान् न गणयन् आगमिष्यति किम् ॥ १६ ॥ किंच। अस्मिन्नाश्रमे कोमलतृणानि भक्षयंतं देवरक्षितं द्रक्ष्यामि किम् ॥१७॥ अपि च। एनं वृकादयो न भक्षयिष्यंति किम् ॥१८॥ अस्मिन्सूर्येऽस्तं गच्छति सत्यप्यद्यापि मे मृगबालको नागच्छति ॥ १९ ॥ किंच। हरिणराजकुमारोऽत्रागत्य स्वबालचेष्टितैर्मां सुखयिष्यति किम्॥२०॥तेन सह क्रीडायां मिथ्यासमाधिना मीलितदृशं मांप्रति प्रेम्णा भीतभीत इवागत्य यो मृदुना श्रृंगाग्रेण घर्षयति ॥२१॥ कदाचित् स्थापितानि होमद्रव्याणि येषु तेषु दर्भेषु दंताकर्षणादिना दूषितेषु सत्सु मया हुंकृतः सन् स्तब्ध इवास्ते ॥२२॥एवं बहुधा विलप्योत्थाय पर्णकुट्या बहिर्निर्गत्य तत्खुरचिह्नितां महीं वीक्ष्य जगाद। अहो अनया पृथ्व्या किं तप आचरितम्। यस्मादियं तद्वियोगेन दुःखितस्य मम तत्पादन्यासैस्तन्मार्गं दर्शयंती आत्मानं स्वर्गमोक्षादिकामानां द्विजानां यज्ञस्थानं करोति ॥ २३ ॥ तावदुदिते चंद्रे मृगचिह्नं दृष्ट्वा स्वमृगत्वं संभावयन् जगाद। अहो असौ चंद्र एनं हरिणबालकं कृपणजनवत्सलः सन् पालयति किम् ॥ २४ ॥ किंच। तद्वियोगेन दह्यमानहृदयं मांप्रत्ययं चंद्रोऽधुना प्राप्तहरिणं संतं स्वशीतलकिरणैः शांतिं गमयति किम् ॥ २५ ॥ ॥ ॥ ॥

एवमघटमानमनोरथो व्याकुलहृदयः प्रारब्धकर्मणा भगवदाराधनधमाद्भ्रंशितो जातः । अन्यथा जातिभिन्ने हरिणे कथं संगः स्यात् । एवं तस्य पालनपोषणादिनात्मचिंतामकुर्वतोऽतकालः प्राप्तः ॥२६॥ तत्समयेऽपि स्वपुत्रमिव पार्श्ववर्तिनं शोचंतं मृगं वीक्ष्य मृग आवेशितमना मनुष्यदेहं हित्वा मृगशरीरं प्राप। तस्य पूर्वजन्मस्मृतिर्भगवदाराधनान्न नष्टा ॥२७॥ एवमात्मनो मृगरूपप्राप्तिकारणं मत्वा तप्यमानः सन् भरत आह ॥२८॥ अहो कष्टम् । मृगसंगेन भगवदाराधनाद्भ्रष्टोऽहम् ॥२९॥ इत्यादिविचारेण गुप्तवैराग्यो मृगीं मातरं विसृज्य पुनः कालंजरपर्वतात् पुलहाश्रमं जगाम ॥ ३० ॥ तस्मिन्नपि कालं प्रतीक्षमाणः

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशितः स योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यंतर एणकुणक आसंगः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमंतरायविहतयोगारंभणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥२६॥ तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचंतमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनु न मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥२७॥ तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ॥२८॥ अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसंगस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनु परिसुस्राव ॥२९॥ इत्येवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालंजरात्प्रत्याजगाम ॥३०॥ तस्मिन्नपि कालं प्रतीक्षमाणः संगाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥३१॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भरतचरितेऽष्टमोऽध्यायः ॥८॥ ॥ श्रीशुक उवाच ॥ अथ कस्यचिद्द्विजवरस्यांगिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अंगजा बभूवुर्मिथुनं च यवीयस्यां भार्यायाम् ॥१॥ यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥ २ ॥ ॥

संगाद्भीत एक एव शुष्कपर्णादि भक्षयन् कालेन स्वांतकालसमयं ज्ञात्वा गंडकीतीर्थे स्नातं तीर्थोदकस्थं स्वशरीरमुत्ससर्ज ॥३१॥ इति श्रीमद्भागवतचू० पंच० अष्टमोऽध्यायः ॥८॥ ॥ नवमे जडविप्रत्वे तस्य रागाद्यभावतः । भद्रकालीपशुत्वेऽपि निर्विकारत्वमीर्यते ॥१॥ पितुः प्राप्तात्मविज्ञानो भरतो मृगतां गतः । प्रारब्धकर्मयोगेन तदंते जडविप्रताम् ॥ २ ॥ श्रीशुक उवाच ॥ अथ कस्यचिदंगिरोगोत्रोत्पन्नस्यात्मज्ञानानंदयुक्तस्य द्विजस्य ज्येष्ठपत्न्यां नव पुत्रा बभूवुः । कनिष्ठभार्यायां कन्यापुत्रौ जातौ ॥१॥ यस्तत्र पुरुषस्तं परमभागवतं त्यक्तमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥ २ ॥ ॥ ॥

तत्र विप्रजन्मन्यपि स्वजनसंगाद्भीतः सन् भगवदनुग्रहेणानुस्मृता स्वकीया पूर्वजन्मपरंपरा येन स भगवच्चरणांबुजं ध्यायन् जडांधबधिर इवात्मानं दर्शयामास लोकस्य ॥३॥ पिता तस्योपनयनांतान् संस्कारान् कृत्वा शौचाचमनादिनियमान् शिक्षयामास ॥४॥ भरतोऽपि पितुः शिक्षाऽऽग्रहनिवृत्तये शिक्षितविपरीतान् आचरति स्म । पिता पुनर्वेदादीनध्यापयिष्यन् चैत्रादिचतुरो मासान् प्रणवव्याहृतिशिरःसहितां गायत्रीमधीयमानमपि पुत्रमप्राप्तमिव ददर्श ॥ ५ ॥ एवं पुत्रमनुशास्य स्वयमप्राप्तमनोरथो भरतस्य पिता कालेन मरणं प्राप्तः ॥६॥ तदा कनिष्ठपत्नी स्वकन्यापुत्रौ सपत्न्यै समर्प्य सहगमनविधिना पतिलोकं

तत्रापि स्वजनसंगाच्च भृशमुद्विजमानो भगवतः कर्मबंधविध्वंसनश्रवणस्मरणगुणविवरणचरणारविंदयुगलं मनसा विदधदात्मनः प्रतिघातमाशंकमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधबधिरस्वरूपेण दर्शयामास लोकस्य ॥ ३ ॥ तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान्यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन्कर्मनियमाननभिप्रेतानपि समशिक्षयदनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति ॥४॥ स चापि तदुह पितृसंनिधावेवासध्रीचीनमिव स्म करोति छंदांस्यध्यापयिष्यन्सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥५॥ एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः ॥६॥ अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् ॥७॥ पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बंधान्न्यवृत्संत ॥८॥ स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि च स कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहु मिष्टं कदन्नं वाभ्यवहरति परं नेंद्रियप्रीतिनिमित्तम् ॥ नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमः सुखदुःखयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः ॥९॥ शीतोष्णवातवर्षेषु वृष इवानावृतांगः पीनः संहननांगः स्थंडिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबंधुरिति संज्ञयाऽतज्ज्ञजनावमतो विचचार ॥ १० ॥ ॥

गता ॥७॥ एवं पितरि मृते सति नव भ्रातरो भरतप्रभावमजानंतोऽयं जड इति निश्चयं कृत्वा तस्य शिक्षणाद्विरेमुः ॥८॥ स च प्राकृतैर्द्विपदपशुभिर्यदोन्मत्तबधिरेत्यभिभाष्यमाणस्तदा तदनुरूपाणि भाषते कर्माणि कार्यमाणश्च करोति । विष्टितो याचनेन यदृच्छया वा प्राप्तमल्पं बहु मिष्टं कदन्नं वा भुंक्ते । यतो मानापमानादिनिमित्तयोः सुखदुःखयोरकृतदेहाभिमानः ॥९॥ शीतोष्णवातवृष्टिषु वृषभ इवावेष्टितशरीरः पुष्टः कठिनावयवः स्नानादिरहितः कुवस्त्रावेष्टितकटिः स मलिनेनोपवीतेन ब्रह्मबंधुरिति संज्ञयाऽज्ञजनैरवमतः सन् विचचार ॥ १० ॥ ॥ ॥ ॥

यदा भ्रातृभिः शालिक्षेत्रकर्दमविलोडनादौ आहारप्रलोभेन योजितस्तदा तदपि करोति, तथाप्यत्र कर्दमस्य प्रक्षेपे इदं क्षेत्रं समं भवेदित उद्धरणे विषमं स्यादिति न वेद । किंच । भ्रातृभिर्दत्तं तंडुलकणतिलकिट्टकीटदष्टमाषस्थालीलग्नदग्धान्नादिकमप्यमृतवद्भक्षयति ॥ ११॥ अथ कदाचित् कश्चिच्चोरराजः पुत्रकामः सन् भद्रकाल्यै देव्यै पुरुषपशुमर्पयितुं प्रवृत्तः॥१२॥ तदा बलिदानकाले पलायितस्य पशोः पदवीं मृगयंतस्तद्दूता अर्धरात्रसमये पलायितं तं न प्राप्य क्षेत्ररक्षणे स्थितं जडभरतं दृष्ट्वा ॥१३॥ रशनया बद्ध्वा हर्षेण चंडिकागृहं निन्युः ॥१४॥ अथ चोरास्तं स्वविधिना स्नापयित्वा वस्त्रभूषणचंदनलेपनमालाति-

यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किंतु न समविषमन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ॥११॥ अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥ १२ ॥ तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावंतो निशि निशीथसमये तमसाऽऽवृतायामनधिगतपशव आकस्मिकेन विधिना केदारान्वीरासनेन मृगवराहादिभ्यः संरक्षमाणमंगिरःप्रवरसुतमपश्यन् ॥ १३ ॥ अथ त एनमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चंडिकागृहमुपनिन्युर्मुदा विकसितवदनाः ॥ १४ ॥ अथ पणयस्तं स्वविधिनाभिषिच्याहतेन वाससाच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवंतं धूपदीपमाल्यलाजकिसलयांकुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदंगपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥ १५ ॥ अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमंत्रितमसिमतिकरालनिशितमुपाददे ॥ १६ ॥ इति तेषां वृषलानां रजस्तमःप्रकृतीनां घनमदरजउत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमालंभनं तदुपलभ्य ब्रह्मतेजसातिदुर्विषहेण दंदह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली ॥ १७ ॥ भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हंतुकामेवेदं महाट्टहासमतिसंरंभेण विमुंचंती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात्स्रवंतमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त च विजहार च शिरःकंदुकलीलया ॥ १८ ॥ ॥ ॥

लकादिभिरलंकृतं भुक्तवंतं पुरुषपशुं महापूजया पूजिताया भद्रकाल्याः पुरतो मृदंगादिवाद्यघोषेण सहोपवेशयामासुः॥१५॥ अथ चोरराजपुरोहितः पुरुषपशो रक्तेन भद्रकालीं यक्ष्यमाणः शिरश्छेत्तुं भद्रकालीमंत्राभिमंत्रितं तीक्ष्णं खड्गमाददे ॥ १६ ॥ इति तेषां दुष्टानां दारुणं कर्म दृष्ट्वा ब्रह्मभूतस्य ब्राह्मणस्य वधमयोग्यं मन्यमाना भद्रकाली अतिदुःसहेन ब्रह्मतेजसा दह्यमानेन शरीरेण सहसैव प्रतिमां हित्वा बहिर्निर्गत्य ॥ १७ ॥ क्रोधेन रक्तनेत्रा भयानकमुखी सती तद्धस्तात्खड्गं प्रगृह्यात्यावेशेन महाट्टहासं विमुंचंती तेनैव खड्गेन पापिष्ठानां सर्वचोराणां शिरांसि छित्वा तेषामत्युष्णं रक्तं स्वगणैः सह पीत्वा तेषां मस्तकैः

स्वपार्षदगणैः सह कंदुकलीलया ननर्त विजहार च ॥१८॥ एवं महत्सु कृतोऽपराधः पूर्णत्वेनात्मने फलति ॥१९॥ हे विष्णुदत्त राजन्, विमुक्तदेहाभिमानानां निर्वैराणां साक्षाद्भगवता तैस्तैर्भद्रकाल्यादिस्वरूपैः परिरक्ष्यमाणानां तत्पादमूलं शरणं गतानां भगवदुपासकानां स्वशिरश्छेदने प्राप्तेऽपि यदव्याकुलत्वं मारकेषु च क्रोधाभावस्तन्महदाश्चर्यं न भवति ॥२०॥ इति श्रीमद्भाग० पंच० जडभरतचरिते नवमोऽध्यायः ॥९॥ ॥ दशमे क्षिपता राज्ञा शिबिकां स्वां वहन् मुनिः । स्वदुर्वादानुवादेन विज्ञायाशु प्रसादितः ॥१॥ एवं भूताविकारित्वमज्ञसर्वज्ञयोः समम् । इति सर्वज्ञतासिद्ध्यै रहूगणकथेरणम् ॥ २ ॥ श्रीशुक उवाच ॥ अथ सिंधुसौवीरदेशयो राज्ञो रहूगणस्य तत्त्वजिज्ञासया कपिलाश्रमं गच्छतः सत इक्षुमतीनद्यास्तटे शिबिकावाहपुरुषान्वेषणसमये दैवयोगेन प्राप्तः स द्विजवर एष पीवा वृषभखरवद्भारं वोढुं समर्थ इति पूर्वविष्टिगृहीतैः सह धृतः सन् शिबिकामुवाह ॥१॥ तदा द्विजस्येतस्ततः शुद्धभूम्यवलोकनेन गच्छतः सतः किंचिद्विषमगतां शिबिकां ज्ञात्वा रहूगण आह । हे वोढारः, साधु गच्छत। यानं विषमं किं नीयते ॥२॥ अथ राज्ञो वचः श्रुत्वा इतरे वाहका ऊचुः ॥ ३ ॥ हे नरदेव, वयं साध्वेव वहामः । अयमधुना नियुक्तोऽपि द्रुतं न व्रजति । अनेन सह यानं वोढुं वयं न शक्नुमः ॥ ४ ॥ इति श्रुत्वा राजा एकस्य दोषः सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य किंचिदुत्थितमन्युः सन् अस्पष्टब्रह्मतेजसं तं जगाद ॥५॥ अहो कष्टम् । हे भ्रातस्त्वं निश्चितं श्रांतोऽसि । यतो दीर्घं

एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति ॥१९॥ न वा एतद्विष्णुदत्त महदद्भुतं यदसंभ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रंथीनां सर्वसत्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवतानिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम्॥२०॥ इति श्रीम०म०पं०जडभरतचरिते नवमोऽध्यायः॥९॥ ॥ श्रीशुक उवाच॥ अथ सिंधुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननांगो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स महानुभावः ॥१॥ यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह ॥ हे वोढारः साध्वतिक्रमत किमिति विषममुह्यते यानमिति ॥२॥ अथ त ईश्वरवचः सोपालंभमुपाकर्ण्योपायतुरीयाच्छंकितमनसस्तं विज्ञापयांबभूवुः ॥ ३ ॥ न वयं नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमुह वयं पारयाम इति॥४॥ सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह ॥ ५ ॥ अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रांतो दीर्घमध्वानमेक एव ऊहिवान्सुचिरं नातिपीवा न संहननांगो जरसा चोपद्रुतो भवान्सखे नो एवापर एते संघट्टिन इति बहुविप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥ ६ ॥ ॥ ॥

मार्गं त्वमेक एव यानं प्रापितवान् । त्वं नातिपीवा वृद्धत्वेन चोपद्रुतोऽसि । एवं वक्रोक्त्योपहसितोऽपि शरीरादावहंममेत्यभिमानरहितः स ब्राह्मणः पूर्ववत् शिबिकामुवाह ॥६॥ अथ पुनर्विषमगतायां शिबिकायां सत्यां कुपितो रहूगण उवाच । अरे किमिदं त्वं जीवन्मृतो मां कदर्थीकृत्य चरसि । अतो यम इव ते शासनं करोमि । यथा त्वं स्वामप्रमत्ततां सेविष्यसे ॥ ७ ॥ एवमबद्धं भाषमाणं पंडितमानिनं तं रहूगणं तेन तिरस्कृतोऽपि स ब्राह्मणो योगेश्वरचर्यायां निपुणो गतगर्वः सन् तं प्रत्याह ॥८॥ जडभरत उवाच ॥ हे राजन्, त्वया यदुक्तं श्रमादि नास्तीति तत्सर्वं सत्यम् । हे वीर, यदि भारो नाम कश्चित् स्यात् तर्हि स वोढुर्देहस्य स्यात् नं मम । यतो देहाभिमानशून्योऽहम् ॥९॥ एतदेव प्रपंचयति । स्थूलत्वं कृशत्वं व्याधयः रोगाः क्षुधा तृषा भयं कलहः अहंकारः

अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां दंडपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति ॥ ७ ॥ एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पंडितमानिनं स भगवान्ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह ॥ ८ ॥ ॥ ब्राह्मण उवाच ॥ त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर भारः ॥ गंतुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः ॥ ९ ॥ स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड् भयं कलिरिच्छा जरा च ॥ निद्रा रतिर्मन्युरहंमदः शुचो देहेन जातस्य हि मे न संति ॥ १० ॥ जीवन्मृतत्वं नियमेन राजन्नाद्यंतवद्यद्विकृतस्य दृष्टम् ॥ स्वस्वाम्यभावो ध्रुव ईड्य यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ॥ ११ ॥ विशेषबुद्धेर्विवरं मनाक् च पश्याम यन्न व्यवहारतोऽन्यत् ॥ क ईश्वरस्तत्र किमीशितव्यं तथापि राजन्करवाम किं ते ॥ १२ ॥ उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन ॥ अर्थः कियान्भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः ॥ १३ ॥ श्रीशुक उवाच ॥ एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन् राजयानमपि तथोवाह ॥ १४ ॥ ॥ ॥

गर्वः जीवन्मृतत्वादि च देहाभिमानेन सह जातस्य पुरुषस्यैव भवंति । मम तु निरभिमानस्य न संति ॥१०॥ यच्चोक्तं जीवन्मृतोऽसीति तत्राह । हे राजन्, जीवन्मृतत्वं केवलं मम नास्ति । तर्हि उत्पत्तिनाशवतः सर्वस्यापि पदार्थमात्रस्य तद् दृश्यते । यदुक्तं भर्तृशासनमुल्लंघयसि तत्राह । हे राजन्, स्वामित्वसेवकत्वभावो यदि सत्यः स्यात्तर्हि तव शासनं सत्यम् । यदि तु तव राज्यभ्रंशो मम च राज्यं स्यात्तदा सर्वमेतद्विपरीतं स्यात् ॥११॥ राजभृत्यादिभेदबुद्धेः स्थानं व्यवहारं विनान्यत् न पश्यामि । अथापि तवायमभिमानश्चेत्तर्ह्याज्ञां कुरु । ते किं करोमि ॥१२॥ उन्मत्तमत्तजडवत् स्वस्वरूपं प्राप्तस्य मे भवता शिक्षितेन पिष्टपेषणवद्व्यर्थेन किं स्यान्न किमपि ॥१३॥ श्रीशुक उवाच ॥ हे नृप, एवं प्रत्युत्तरं दत्वा स मुनिः प्रारब्धकर्मक्षयं कुर्वन् राजशिबिकामपि पूर्ववद्वहतिस्म ॥१४॥

---

[१] भारस्य वोढुश्चानिरूप्यत्वात् मम च तत्संबंधाभावात् ।

स चापि पांडवेय सिंधुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक् श्रद्धयाधिकृताधिकारस्तद्धृदयग्रंथिमोचनं द्विजवच आश्रुत्य बहुयोगग्रंथसंमतं त्वरयावरुह्य शिरसा पादमूलमुपसृतः क्षमापयन्विगतनृपदेवस्मय उवाच ॥ १५ ॥ कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः ॥ कस्यासि कुत्रत्य इहापि कस्मात्क्षेमाय नश्चेदसि नोत शुक्लः ॥ १६ ॥ नाहं विशंके सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दंडात् ॥ नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंके भृशं ब्रह्मकुलावमानात् ॥ १७ ॥ तद्ब्रूह्यसंगो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः ॥ वचांसि योगग्रथितानि साधो न नः क्षमं ते मनसापि भेत्तुम् ॥ १८ ॥ अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै ॥ प्रष्टुं प्रवृत्तः किमिहारणं तत्साक्षाद्धरिं ज्ञानकलावतीर्णम् ॥ १९ ॥ स वै भवाँल्लोकनिरीक्षणार्थमव्यक्तलिंगो विचरत्यपि स्वित् ॥ योगेश्वराणां गतिमंधबुद्धिः कथं विचक्षीत गृहानुबंधः ॥ २० ॥ दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गंतुर्भवतश्चानुमन्ये ॥ यथासतोदानयनाद्यभावात्समूल इष्टो व्यवहारमार्गः ॥ २१ ॥ स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तंडुलगर्भरंधिः ॥ देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥ २२ ॥ शास्ताभिगोप्ता नृपतिः प्रजानां यः किंकरो वै न पिनष्टि पिष्टम् ॥ स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ॥ २३ ॥ तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य ॥ कृषीष्ट मैत्रीदृशमार्तबंधो यथा तरे सदवध्यानमंहः ॥ २४ ॥ न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ॥ महद्विमानात्स्वकृताद्धि मादृङ्नंक्ष्यत्यदूरादपि शूलपाणिः ॥ २५ ॥ ॥

तदा स रहूगणस्तद्धृदयग्रंथिभेदकं बहुयोगग्रंथसंमतं द्विजवचः श्रुत्वा त्वरया शिबिकाया उत्तीर्य शिरसा पादमूलं प्राप्य क्षमापयन् विगतगर्व उवाच ॥ १५ ॥ हे ब्रह्मन्, दत्तात्रेयशुकसनत्कुमारकपिलादीनामवधूतानां मध्ये त्वं कतमोऽवधूतोऽसि । इह च कस्माद्धेतोः प्राप्तोऽसि ॥ १६ ॥ अहमिंद्रस्य वज्रात् शिवस्य शूलाद्यमस्य दंडात् तथा अग्निसूर्यचंद्रवायुकुबेराणां शस्त्रेभ्योऽपि न बिभेमि । यथा ब्रह्मकुलस्यापमानाद्बिभेमि ॥१७॥ तस्मात्त्वं कः । यतो गुप्तविज्ञानरूपप्रभावोऽसंगो जडवद्विचरसि ॥१८॥ अहं चेह संसारे यच्छरणं तत्किमिति प्रष्टुं कपिलंप्रति गंतुं प्रवृत्तोऽस्मि ॥१९॥ स एव भवान् लोकनिरीक्षणार्थं ।किंस्विदेवं विचरति । अंधबुद्धिर्योगेश्वराणां गतिं कथं पश्येत् ॥ २० ॥ यदुक्तं मम श्रमो नास्तीति तत्राह । हे द्विज, भवान् भारवहनादिना श्रांत इति मिथ्यापि सत्यं मन्ये । यदा मिथ्याघटादिनोदकानयनादि मिथ्याप्यर्थकारित्वात्सत्यं तथा ॥ २१ ॥ उपाधिधर्मा मे वस्तुतो न संतीत्युक्तं तत्राह । स्थाल्या अग्निना तापात् तन्मध्यवर्तिनो जलस्य तापः । तस्य तापात्तंदुलानां बहिर्भागस्य ततस्तद्गर्भस्य च पाको भवति । एवं निदाघादिना देहे तप्त इंद्रियाणां तापः । ततः प्राणस्य ततो मनसः ततस्तन्निमित्ता संसृतिः पुरुषस्य भवति ॥२२॥ यदुक्तं स्तब्धादेः शिक्षणं पिष्टपेष इति तत्राह । योऽच्युतस्य सेवकः स पिष्टपेषणवन्निष्फलं कर्म न करोति । यतस्तब्धत्वाद्यनपगमेऽपि स्वधर्मरूपभगवदाराधनकरणात्तस्य पापक्षयो भवति ॥२३॥ अतो हे द्विज, राजाहमित्यभिमानेन तिरस्कृतभवादृशस्य मे भवान् कृपां करोतु । यथाहं सतामपराधरूपपापात् तरिष्यामि ॥ २४ ॥ यद्यपि तव मानापमानविक्रिया नास्ति तथापि महतामपमानान्मादृशो

विनंक्ष्यति ॥२५॥ इति श्रीमद्भागवतचूर्णिकायां पंचमस्कंधे दशमोऽध्यायः ॥१०॥ ॥ एकादशे तु संपृष्टो रहूगणमहीभृता । उपादिशत्परं ज्ञानं स योगीति निगद्यते ॥१॥ ब्राह्मण उवाच ॥ हे राजन्, त्वमविद्वानपि विदुषां भाषणानि वदसि । अनेन त्वं ज्ञानिनां मध्ये श्रेष्ठो न भवसि । यतो लौकिकव्यवहारं त्वं सत्यं जानासि । ज्ञानिनस्तु मिथ्यात्वेन जानंति ॥१॥ हे राजन्, गृहस्थाश्रमसंबंधिषु यज्ञविस्ताररूपेषु वेदवादेषु निष्कामस्तत्त्ववादो नैव प्रकाशते ॥२॥ यस्य पुंसो गृहस्थाश्रमसौख्यं स्वप्नदृष्टांतेन मिथ्येति ज्ञातं न भवति । तस्य नरस्य तत्त्वबोधकान्यपि वेदांतवाक्यानि तत्त्वज्ञानाय समर्थानि न भवंति ॥३॥ यावत्पुरुषस्य मनः सुखदुःखात्मकं कर्म दशेंद्रियैर्विस्तारयति ॥४॥ तावत्तन्मनो विषयासक्तं सद्गुणप्रवाहेण देहानुत्पादयति ॥५॥ ततः संसृतिचक्रप्रवर्तकं तन्मन एव देहस्थितेन जीवेनैक्यं प्राप्य जीवस्य कालोपपन्नं सुखं दुःखं च सृजति ॥६॥ मनो यावन्मायां श्रयते तावद्व्यवहारः सदा प्रकाशते ॥ ७ ॥ तस्मात्प्राणिनो मन एव विषयासक्तं सत्संसाराय भवति । निर्गुणं सत् जीवस्य मोक्षाय भवति । यथा दीपो घृतवर्तिमश्नन् सधूमाः शिखा भजति । घृतक्षये स्वकीयं महाभूतरूपत्वं भजति तद्वत् ॥८॥ पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाण्यभिमानश्चेति मनस एकादश वृत्तय आसन् ॥९॥ गंधादयः पंचज्ञानेंद्रियविषयाः गमनसंभोगादयः पंचकर्मेंद्रियविषयाः तेषां मन आश्रयः ॥१०॥ किंच । विषयस्वभावसंस्कारादिभिर्मनसो विकाराः सहस्रशो भवंति । एते च क्षेत्रज्ञसत्तयैव सत्तां

इति श्रीमद्भागवते महापुराणे पंचमस्कंधे दशमोऽध्यायः ॥ १० ॥ ॥ ब्राह्मण उवाच ॥ अकोविदः कोविदवादवादान्वदस्यथो
नातिविदां वरिष्ठः॥ न सूरयो हि व्यवहारमेनं तत्त्वावमर्शेन सहामनंति ॥१॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृंभितेषु ॥
न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ॥ २ ॥ न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समा-
सन् ॥ स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥ ३ ॥ यावन्मनो रजसा पुरुषस्य सत्वेन वा तमसा
वानुरुद्धम् ॥ चेतोभिराकूतिभिरातनोति निरंकुशं कुशलं चेतरं वा ॥ ४ ॥ स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः
षोडशात्मा ॥ बिभ्रत्पृथङ्नामभि रूपभेदमंतर्बहिष्ट्वं च पुरैस्तनोति ॥ ५ ॥ दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फल-
माव्यनक्ति ॥ आलिंग्य मायारचितांतरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥ ६ ॥ तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो
भवति स्थूलसूक्ष्मः ॥ तस्मान्मनोलिंगमदो वदंति गुणागुणत्वस्य परावरस्य ॥ ७ ॥ गुणानुरक्तं व्यसनाय जंतोः क्षेमाय
नैर्गुण्यमथो मनः स्यात् ॥ यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वम् ॥ पदं तथा गुणकर्मानुबद्धं
वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम् ॥ ८ ॥ एकादशासन्मनसो हि वृत्तय आकूतयः पंच धियोऽभिमानः ॥ मात्राणि कर्माणि पुरं
च तासां वदंति हैकादश वीर भूमीः ॥ ९ ॥ गंधाकृतिस्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः ॥ एकादशं स्वीकरणं
ममेति शय्यामहं द्वादशमेक आहुः ॥ १० ॥ द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः ॥ सहस्रशः शतशः
कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ ११ ॥ ॥ ॥ ॥

क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः॥ आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥१२॥
क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः॥ नारायणो भगवान्वासुदेवः स्वमाययाऽऽत्मन्यवधीयमानः॥१३॥ यथानिलः
स्थावरजंगमानामात्मस्वरूपेण निविष्ट ईशेत् ॥ एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ १४ ॥ न यावदेतां
मनुभृन्नरेंद्र विधूय मायां वयुनोदयेन ॥ विमुक्तसंगो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥ १५ ॥ न यावदेतन्मन
आत्मलिंगं संसारतापावपनं जनस्य ॥ यच्छोकमोहामयरागलोभवैरानुबंधं ममतां विधत्ते ॥ १६ ॥ भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः ॥ गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥ १७ ॥ इति श्रीमद्भागवते महापुराणे
पंचमस्कंधे रहूगणसंवादे एकादशोऽध्यायः ॥ ११ ॥ ॥ रहूगण उवाच ॥ नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय॥
नमोऽवधूतद्विजबंधुलिंगनिगूढनित्यानुभवाय तुभ्यम् ॥ १ ॥ ज्वरामयार्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमांभः ॥ कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेऽमृतमौषधं मे ॥ २ ॥ तस्माद्भवंतं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधम् ॥ अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥ ३ ॥ यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहारमूलम् ॥ न ह्यंजसा तत्त्वविमर्शनाय भवानमुष्मिन्भ्रमते मनो मे ॥ ४ ॥ ॥ ब्राह्मण उवाच ॥ अयं जनो नाम चलन्पृथिव्यां यः पार्थिवः पार्थिव
कस्य हेतोः ॥ तस्यापि चांघ्र्योरधिगुल्फजंघाजानूरुमध्योरशिरोधरांसाः ॥ ५ ॥ ॥ ॥

प्राप्नुवंति ॥११॥ अवस्थात्रयसाक्षी क्षेत्रज्ञो जाग्रत्स्वप्नयोः प्रादुर्भूताः सुषुप्तावंतर्हिताश्च मनसो वृत्तीः पश्यति॥१२॥ क्षेत्रज्ञो द्विविधः। त्वंपदार्थो जीवस्तत्पदार्थ ईश्वरश्च। ईश्वरस्तु व्यापकः स्वप्रकाशः सर्वजीवनियंता भगवान् वासुदेवोऽस्ति ॥ १३ ॥ यथा वायुः स्थावरजंगमानामात्मस्वरूपेण प्रविष्टोऽस्ति तथा क्षेत्रज्ञो भगवान् विश्वं प्रविष्टः॥१४॥ हे नरेंद्र, देही यावदेतां मायां त्यक्त्वाऽऽत्मतत्त्वं न वेद तावदिह भ्रमति ॥१५॥ किंच। आत्मन उपाधिभूतं संसारतापानां क्षेत्रमिदं मन एवेति यावज्जीवो न वेद तावद्भ्रमति। उत च। तन्मनस्तावदेवास्य शोकमोहादिसंबंधं ममतां च विधत्ते॥१६॥ तस्माद्धे रहूगण, एनमात्मघातकरं मनोरूपं शत्रुं गुरोर्हरेश्चरणोपासनाशस्त्रेण घातय ॥१७॥ इति श्रीमद्भागवतचू० पंच० एकादशोऽध्यायः ॥११॥ ॥ द्वादशे पुनरापृष्टः संदेहेन महीभृता। स योगी सर्वसंदेहानपानुददितीर्यते ॥१॥ रहूगण उवाच ॥ हे भगवन्, लोकसंरक्षणार्थं देहधारकाय वस्तुत ईश्वररूपाय तुभ्यं नमः। हे अवधूत, मलिनब्राह्मणवेषेण गुप्तपरमानंदानुभवाय च ते नमः॥ १ ॥ अहो रोगार्तस्य यथा मधुरमौषधं उष्णतप्तस्य यथा शीतोदकं तथा देहाभिमान एव सर्पस्तेन दष्टस्य मे ते वचोऽमृततुल्यमौषधं भवति॥२॥ तस्माद्भवंतं मम संशयं पश्चात्पृच्छामि। अधुना अध्यात्मयोगग्रथितं दुर्बोधं तव भाषणं मम यथा सुबोधं स्यात्तथा कथय ॥ ३ ॥ हे योगेश, भारवहनादिकं कर्म तत्फलं च श्रमादि प्रत्यक्षं दृश्यमानमपि तत्सत्यं नहि। तत्केवलं व्यवहारमात्रं तच्च तत्त्वज्ञानाय योग्यं न भवति इति यद्भगवान् वदति तस्मिन् मे मनो भ्राम्यति॥ ४ ॥ ब्राह्मण उवाच ॥ हे पार्थिव, पृथ्वीविकारोऽयं देहः पृथिव्यां गच्छन् मनुष्य इत्याद्युच्यते।

न गच्छन् पाषाण इत्याद्युच्यते । उभयविधोऽपि जड एव । तस्य भारः श्रमो वा नास्ति । तस्य च देहस्यावयवा नामभेदेन—चरणगुल्फजंघाजानूरूरःस्थलस्कंधाः ॥५॥ स्कंधे काष्ठमयी शिबिका । तस्यामहं राजा जनस्य रक्षितास्मीति दुष्टमदेनांधः ॥ ६ ॥ दीनान् विष्ट्या निगृह्णन् त्वं निर्दयो धृष्टश्चासि । स त्वं ज्ञानवृद्धानां सभासु न शोभसे ॥७॥ कुतः चराचरस्योत्पत्तिर्नाशश्च पृथिव्यामेव भवतः ॥८॥ सा पृथ्वी परमाणुरूपा । ते परमाणवो भगवन्मायया कल्पिताः ॥९॥ एवं कृशस्थूलादि सर्वं प्रपंचजातं विषयस्वभावकालकर्मादिभिरुपलक्षितया भगवन्मायया कृतमस्तीति जानीहि ॥१०॥ तस्माद्व्यवहाररूपं सर्वं मिथ्या । सत्यं तु ज्ञानं यद्वासुदेवमिति पंडिता वदंति ॥११॥ हे रहूगण, एतज्ज्ञानं पुरुषस्तपश्चर्यया यागेन वेदाभ्यासादिना च न प्राप्नोति । तत्तु साधुसमागमेन प्रा-प्यते ॥१२॥

अंसेऽधिदार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते ॥ यस्मिन्भवान्रूढनिजाभिमानो राजास्मि सिंधुष्विति दुर्मदांधः
॥ ६ ॥ शोच्यानिमांस्त्वमधिकष्टदीनान्विष्ट्या निगृह्णन्निरनुग्रहोऽसि ॥ जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु
धृष्टः ॥ ७ ॥ यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम् ॥ तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिययानुमेयम्
॥ ८ ॥ एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये ॥ अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः
॥ ९ ॥ एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ॥ द्रव्यस्वभावाशयकालकर्मनाम्नाऽजयावेहि कृतं द्वितीयम् ॥ १० ॥
ज्ञानं विशुद्धं परमार्थमेकमनंतरं त्वबहिर्ब्रह्म सत्यम् ॥ प्रत्यक् प्रशांतं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदंति ॥ ११ ॥ रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ॥ न छंदसा नैव जलाग्निसूर्यैर्विना महत्पादरजोभिषेकम् ॥ १२ ॥ यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ॥ निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ १३ ॥ अहं
पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसंगबंधः ॥ आराधनं भगवत ईहमानो मृगोऽभवं मृगसंगाद्धतार्थः ॥ १४ ॥ सा मां
स्मृतिर्मृगदेहेऽपि वीर कृष्णार्चनप्रभवा नो जहाति ॥ अथो अहं जनसंगादसंगो विशंकमानोऽविवृतश्चरामि ॥ १५ ॥ तस्मान्नरोऽसंगसुसंगजातज्ञानासिनेहैव विवृक्णमोहः ॥ हरिं तदीहाकथनस्मृतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥ १६ ॥ इति
श्रीमद्भागवते महापुराणे पंचमस्कंधे ब्राह्मणरहूगणसंवादे द्वादशोऽध्यायः ॥ १२ ॥ ॥ ब्राह्मण उवाच ॥ दुरत्ययेऽध्वन्यजया
निवेशितो रजस्तमःसत्वविभक्तकर्मदृक् ॥ स एष सार्थोऽर्थपरः परिभ्रमन्भवाटवीं याति न शर्म विंदति ॥ १ ॥ ॥

यत्र साधुषु ग्राम्यकथानाशको भगवद्गुणानुवादो वर्ण्यते । स च श्रुतः सन् मुमुक्षोर्मतिं निर्मलां कृत्वा वासुदेवे योजयति ॥१३॥ हे राजन्, अहं पुरा भरतो नाम राजा आसम् । सोऽहमीश्वराराधनं कुर्वाणः सन् मृगसंगान्मृगोऽभवम् ॥१४॥ मृगशरीरेऽपि श्रीकृष्णपूजासामर्थ्यान्मम स्मृतिर्न नष्टा । अतोऽहं जनसंगाच्छंकितः सन् अप्रकटश्चरामि ॥ १५ ॥ तस्मान्नरः सत्संगलब्धेन ज्ञानखड्गेन छिन्नमोहः सन् जन्ममरणादिरूपसंसारमार्गस्य पारं याति ॥१६॥ इति श्रीमद्भागवत० पंच० द्वादशोऽध्यायः ॥१२॥ ॥ त्रयोदशेऽविरक्ताय वृथा तत्त्वनिरूपणम् । इति वैराग्यदार्ढ्याय भवाटव्युपवर्ण्यते ॥१॥ ब्राह्मण उवाच॥ हे रहूगण, अयं जीवसमूहो

मायया दुस्तरे मार्गे[1] प्रवेशितः सन् सुखेच्छया परिभ्रमन् भवाटवीं[2] याति । तत्र च सुखं न प्राप्नोति ॥ १ ॥ यस्यां भवाटव्यां षड् दस्यवो[3] बलादिमं जीवसमूहं [4]लुंपंति । किंच । यस्यां सृगालाः[5] प्रमत्तं तं हरंति[6] । यथा वृका मेषम् ॥ २ ॥ अत्र मार्गे[7] मक्षिका[8]भिर्मशकैश्चोपद्रुतः सन् क्वचिद्गंधर्वपुरं[9] पश्यति । क्वचित्पिशाचं[10] च पश्यति ॥ ३ ॥ कदाचिद्भयादटव्यां धावति । क्वचिद्धूल्या[11] व्याप्तनेत्रो[12] दिशो न जानाति ॥ ४ ॥ क्वचिदुलूक[13]शब्दैर्व्यथितमना भवति । क्वचित् क्षुधार्दितः सन् अपुण्य[14]वृक्षान् सेवते मृग[15]जलानि च धावति ॥५॥ क्वचिज्जलहीनाः सरितः[16]प्रति गच्छति । क्वचिद्दावानलं[17] प्राप्याग्निना[18] तप्तः

यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुंपंति कुनायकं बलात् ॥ गोमायवो यत्र हरंति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः॥२॥
प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ॥ क्वचित्तु गंधर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ॥ ३ ॥ निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो अटव्याम् ॥ क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥ ४॥ अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितांतरात्मा ॥ अपुण्यवृक्षान् श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५॥ क्वचिद्वितोयाः सरितोऽभियाति परस्परं चालषते निरंधः ॥ आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥६॥ शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलम् ॥ क्वचिच्च गंधर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तम् ॥ ७॥ चलन्क्वचित्कंटकशर्करांघ्रिर्नगारुरुक्षुर्विमना इवास्ते ॥ पदेपदेऽभ्यंतरवह्निनार्दितः कौटुंबिकः क्रुध्यति वै जनाय ॥ ८॥ क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिनेऽपविद्धः ॥ दष्टः स्म शेते क्व च दंदशूकैरंधोंऽधकूपे पतितस्तमिस्रे ॥९॥ कर्हि स्मचित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः ॥ तत्रातिकृच्छ्रात्प्रतिलब्धमानो बलाद्विलुंपंत्यथ तं ततोऽन्ये ॥ १० ॥ क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते ॥ क्वचिन्मिथो विपणन्यच्च किंचिद्विद्वेषमृच्छत्युत वित्तशाठ्यात् ॥ ११ ॥ क्वचित्क्वचित्क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः ॥ याचन्परादप्रतिलब्धकामः पारक्यदृष्टिर्लभतेऽवमानम् ॥ १२ ॥ ॥

सन् खेदं प्राप्नोति ॥६॥ क्वचि[19]च्छूरैर्हृतधनः शोचन् सन् मूर्छां प्राप्नोति । क्वचिद्गंधर्वपुरं[20] प्रविश्य मुहूर्तमात्रं मोदते ॥७॥ क्वचित्कंटका[21]दिभिर्विद्धांघ्रिः सन् पर्वत[22]मारोढुमिच्छुर्विमना इवास्ते ॥ ८ ॥ क्वचिदजगरेण[23] गिलितः सन् किंचिन्न विजानाति । क्वचित्सर्पै[24]र्दष्टः सन् कूपे[25] पतति ॥ ९ ॥ क्वचित् क्षुद्ररसान्[26] विचिन्वन् मक्षिका[27]भिस्ताडितो व्यथितो भवति ॥१०॥ क्वचिच्छीतोष्णवातवर्षाणां निवारणं कर्तुमसमर्थ आस्ते । क्वचिन्मिथः क्रयविक्रयादिना अत्यल्पमपि गृह्णन् धनवंचनाद्द्वेषमिच्छति ॥११॥ क्वचित् क्षीणधनः शय्यासनादिविहीनः सन् परंप्रति याच्ञां कृत्वा तस्मात्तदप्राप्यापमानं प्राप्नोति ॥ १२ ॥ ॥

---

[1] प्रवृत्तिमार्गे । [2] संसाररूपमरण्यम् । [3] इंद्रियनामानः षट् चौराः । [4] तस्य धर्म्यं धनमुपभोगेन मुष्णंतीत्यर्थः । [5] स्त्रीपुत्रादयः । [6] इतस्तत आकर्षंति । [7] गृहाश्रमे वर्तमानः । [8] दुर्जनैः । [9] गंधर्वनगरसदृशं शरीरम् । [10] सुवर्णम् । [11] स्त्रीसमागमेन । [12] कर्मसाक्षिभूता दिग्देवताः । [13] शत्रुपक्षपातिजनानां भयसूचकैर्भाषणैः । [14] अधार्मिकान् । [15] निष्फलान् विषयान् । [16] इहपरत्र च दुःखदान् पाखंडान् । [17] दावाग्नितुल्यं दुःखदं गृहम् । [18] शोकेन । [19] प्रतिवादिभिः । [20] स्वपितृपुत्रादिसमाजम् । [21] विघ्नादिभिः । [22] यज्ञादिकं महत्कर्म कर्तुम् । [23] सुषुप्त्या । [24] दुर्जनैर्दुःखितः । [25] मोहे । [26] परस्त्र्यादीन् । [27] तत्पत्न्यादिभिः ।

अन्योऽन्यवित्तव्यतिषंगवृद्धवैरानुबंधो विवहन्मिथश्च ॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन्विपन्नः ॥ १३ ॥ तांस्तान्विपन्नान्स हि तत्र तत्र विहाय जातं परिगृह्य सार्थः ॥ आवर्ततेऽद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ॥ १४ ॥ मनस्विनो निर्जितदिग्गजेंद्रा ममेति सर्वे भुवि बद्धवैराः ॥ मृधे शयीरन्न तु तद्व्रजंति यन्न्यस्तदंडो गतवैरोऽभियाति ॥ १५ ॥ प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाऽव्यक्तपदद्विजस्पृहः ॥ क्वचित्कदाचिद्धरिचक्रतस्त्रसन्सख्यं विधत्ते बककंकगृध्रैः ॥ १६ ॥ तैर्वंचितो हंसकुलं समाविशन्नरोचयन् शीलमुपैति वानरान् ॥ तज्जातिरासेन सुनिर्वृतेंद्रियः परस्परोद्वीक्षणविस्मृतावधिः ॥ १७ ॥ द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशः स्वबंधने ॥ क्वचित्प्रमादाद्गिरिकंदरे पतन्वल्लीं गृहीत्वा गजभीत आस्थितः ॥ १८ ॥ अतः कथंचित्स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिंदम ॥ अध्वन्यमुष्मिन्नजया निवेशितो भ्रमन् जनोऽद्यापि न वेद कश्चन ॥ १९ ॥ रहूगण त्वमपि ह्यध्वनोऽस्य संन्यस्तदंडः कृतभूतमैत्रः ॥ असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारम् ॥ २० ॥ ॥ राजोवाच ॥ अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ॥ न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥ २१ ॥ न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ॥ मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥ २२ ॥ नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ॥ ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः शिवमस्तु राज्ञाम् ॥ २३ ॥ ॥ ॥ ॥

एवं परस्परं द्रव्यव्यवहारप्रसंगेन परस्परं विवाहादि कुर्वन् बहुभिर्धननाशद्वेषादिभिर्मृतप्रायो भवति ॥१३॥ किंच । स प्रवासी तान् तान् मृतान् तत्र तत्र हित्वा जातं जातं प्रगृह्य संचरन् सन्नद्यापि नावर्तते । उत च । अस्याध्वनः पारं[1] च न प्राप्नोति ॥१४॥ महाशूरा अपि ममेयं भूमिरिति बद्धवैराः संतो युद्धे म्रियंते न तु विष्णुपदं व्रजंति ॥१५॥ अथ पुनर्भवाटवीं वर्णयति । अयं जनसमूहः क्वचित्सिंहसमूहाद्भीतः[2] सन् बककंकगृध्रैः[3] सह सख्यं करोति ॥ १६ ॥ ततस्तैर्वंचितः सन् हंसकुलं[4] प्रविशति । तत्रापि तस्य कुलस्य स्वभावमप्रियं पश्यन् वानरान्[5]प्रति गच्छति । ततस्तज्जातिक्रीडया विस्मृतावधिर्[6]भवति ॥ १७ ॥ क्वचिद्वने चरन् गिरिगुहायां[7] पतन् तत्रस्थगर्जभयाद्[8]वल्लीं[9] गृहीत्वा स्थितो भवति ॥१८॥ ततः[10] कदाचिन्मुक्तोऽपि पुनः सार्थं[11] प्रविशति । एवं मायया भवाटव्यां प्रवेशितो जनोऽद्यापि परमपुरुषार्थं न वेद ॥ १९ ॥ हे रहूगण, त्वमपि प्राणिनां शिक्षाकरणं त्यक्त्वा सर्वप्राणिमित्रः सन् हरिसेवया तीक्ष्णं ज्ञानखड्गं गृहीत्वाऽस्य मार्गस्य पारं याहि ॥२०॥ रहूगण उवाच ॥ अहो अखिलजन्मसु मध्ये मनुष्यजन्मैव श्रेष्ठम् । देवादिजन्मना किं फलम् । मनुष्यजन्मनि तु भवादृशानां साधूनां समागमो भवति ॥ २१ ॥ तेन समागमेन भगवच्चरणेऽमला भक्तिरुत्पद्यते । अहो तव मुहूर्तमात्रसमागमान्ममाविवेको नष्टः ॥ २२ ॥ किंच । ब्रह्मविदः केन रूपेण विचरंति तन्न ज्ञायते अतस्तान् सर्वान् नमस्यति । वृद्धेभ्यः बालेभ्यः तरुणेभ्यो बटुभ्यश्च नमोऽस्तु । येऽवधूतवेषा ब्रह्मविदः पृथिवीं

---

[1] अध्यात्मयोगम् । [2] कालचक्रात् । [3] पाखंडिभिर्जनैः । [4] ब्राह्मणकुलम् । [5] भ्रष्टाचारान् शूद्रप्रायान् । [6] विस्मृतमरणकालः । [7] रोगादिदुःखे । [8] मृत्युभयात् । [9] प्राचीनकर्मालंब्य । [10] रोगादेः । [11] प्रवृत्तिमार्गम् ।

संचरंति तेभ्यो नमः । तेभ्यः सकाशाद्राज्ञां कल्याणमस्तु ॥ २३ ॥ श्रीशुक उवाच ॥ हे परीक्षित्, एवं जडभरतः करुणया रहूगणाय तत्त्वमुपदिश्य तेन वंदितचरणः सन् पृथिवीं विचचार ॥२४॥ रहूगणोऽपि साधुसंगाल्लब्धतत्त्वज्ञानोऽज्ञानेनात्मन्यारोपितां देहात्मबुद्धिं विससर्ज । एवं हे नृप, जडभरताश्रयं कुर्वाणस्य तस्य रहूगणस्य सद्यो देहाहंकारत्यागलक्षणं सामर्थ्यं जानीहि ॥ २५ ॥ परीक्षिदुवाच ॥ हे शुक, त्वया लोकस्य संसारमार्गो वनवासदृष्टांतेन यः कथितः तस्य सर्वेषां बोधो यथा भवेत्तथा वर्ण्यतामिति ॥२६॥ इति श्रीमद्भाग० पंच० त्रयोदशोऽध्यायः ॥१३॥ ॥ चतुर्दशे भवारण्यरूपकव्याकृतिः कृता।

॥ श्रीशुक उवाच ॥ इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिंधुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवंदितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥ २४ ॥ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याध्यारोपितां च देहात्ममतिं विससर्ज ॥ एवं हि नृप भगवदाश्रिताश्रितानुभावः ॥ २५ ॥ ॥ राजोवाच ॥ यो ह वा इह बहुविदा महाभागवत त्वयाभिहितः परोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नांजसाऽव्युत्पन्नलोकसमधिगमः ॥ अथ तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥ २६ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ स होवाच ॥ य एष देहात्ममानिनां सत्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिंद्रियवर्गेण तस्मिन्दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे यस्यामु ह वा एते षडिंद्रियनामानः कर्मणा दस्यव एव ते ॥ १ ॥ तद्यथा पुरुषस्य धनं यत्किंचिद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु सांपराय उदाहरंति ॥ तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्याजितात्मनो यथा सार्थस्य तथाऽजितात्मनो विलुंपंति ॥ २ ॥ अथ च यत्र कौटुंबिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एवानिच्छतोऽपि कदर्यस्य कुटुंबिन उरणकवत्संरक्ष्यमाणं मिषतोऽपि हरंति ॥ ३ ॥ ॥ ॥ ॥

प्रस्तुते तस्य गोमायुमशकाद्यर्थकल्पनम् ॥ १ ॥ श्रीशुक उवाच ॥ य एव देहाभिमानिनामनादिसंसारानुभवस्य द्वारभूतेन षडिंद्रियगणेन तस्मिन् दुर्गमे संसारमार्गे प्रवृत्तोऽयं जीवलोको विष्णोर्मायया भवाटवीं गतः सन् संसारतापोपशमनं भक्तिमार्गं न प्राप्नोति । यस्यां भवाटव्यां षडिंद्रियनामानः कर्मणा चौरा एव संति ॥१॥ तद्यथा–पुरुषस्य यत्किंचित् भगवदाराधनधर्महेतुभूतं धनं तद्दर्शनस्पर्शनश्रवणभक्षणावघ्राणैः संकल्पेन चैते षट् चौरा हरंति ॥ २ ॥ अथ च स्त्रीपुत्रादयः कर्मणा श्वानः सृगाला एव । लोभिनः कुटुंबिनो रक्ष्यमाणमपि धनं मिषतोऽपि हरंति ॥ ३ ॥ ॥ ॥

यथा प्रतिसंवत्सरं कृष्यमाणमपि क्षेत्रं गुल्मतृणादिभिरगम्यं भवति। एवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन् कर्माणि न क्षीयंते ॥ ४ ॥ अत्र वासनानामक्षीणत्वात्संसारे गतः सन् मक्षिकामशकतुल्यैर्नीचमनुष्यैः पीड्यमानो भूत्वा मनसा गंधर्वनगरतुल्यं नरलोकं सत्यतया पश्यति ॥ ५ ॥ क्वचित् भक्षणपानादिषु लुब्धः सन् मृगजलतुल्यान् विषयान्प्रति धावति ॥ ६ ॥ क्वचित्सर्वदोषाणां स्थानं सुवर्णं गृहीतुमिच्छति। यथा शीतातुरो वनेऽग्निवज्ज्वाल्यमानं पिशाचमग्निबुद्ध्या गृहीतुं धावन्नपि तं न प्राप्नोति। कथंचित्प्राप्तश्चेत्तर्हि तेन भक्षितः सन् म्रियते। एवं सुवर्णमनुधावन्नपि ॥ ७ ॥ कदाचिदात्मन उपजीव्येषु गृहजलद्रव्यादिषु प्रविष्टचित्तः सन्नेतस्यां संसाराटव्यां धावति ॥ ८ ॥ कदाचित् स्त्रिया स्वोत्संगे आरोपितः पतिस्तद्वशो भूत्वा मर्यादातिक्रमसाक्षिभूता

यथा ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन्न हि कर्माण्युत्सीदंति यदयं कामकरंड एष आवसथः ॥ ४ ॥ तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभशकुंततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणः क्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसाऽनुपपन्नार्थं नरलोकं गंधर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥५॥ तत्र च क्वचिदातपोदकनिभान्विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ॥६॥ क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचम् ॥७॥ अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति ॥ ८ ॥ क्वचिच्च वात्यौपम्यया प्रमदयाऽऽरोहमारोपितस्तत्कालरजसा रजनीभूता इवासाधुमर्यादो रजस्वलाक्षोऽपि दिग्देवता अतिरजस्वलमतिर्न विजानाति ॥ ९ ॥ क्वचित्सकृदवगतविषयवैतथ्यः स्वयं पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्तानेवाभिधावति ॥ १० ॥ क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षं परोक्षं वा रिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥ ११ ॥ स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुंडाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान् जीवन्मृतान्स्वयं जीवन्म्रियमाण उपधावति ॥ १२ ॥ एकदाऽसत्प्रसंगान्निकृतमतिर्व्युदकस्रोतःस्खलनवदुभयतोऽपि दुःखदं पाखंडमभियाति ॥ १३ ॥ यदा तु परबाधयाध आत्मने नोपनमति तदा हि पितृपुत्रबर्हिष्मतः पितृपुत्रान्वा स खलु भक्षयति ॥ १४ ॥ क्वचिदासाद्य गृहं दाववत्प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ॥ १५ ॥ ॥ ॥

दिग्देवता न जानाति ॥ ९ ॥ क्वचिद्देहाभिमानेन भ्रंशितमतिर्मृगजलतुल्यान् विषयान् धावति ॥ १० ॥ क्वचिच्छत्रूणां राजकुलस्य च निर्भर्त्सनेन व्यथितकर्णमूलहृदयो भवति ॥ ११ ॥ क्वचित् पापवृक्षपापवल्लीविषकूपतुल्यान् दृष्टादृष्टोपयोगशून्यधनान् नरान्प्रति धावति ॥ १२ ॥ क्वचिदसतां संगत्या वंचितबुद्धिर्जलहीननदीगर्तपाततुल्यमिह परत्र च दुःखदं पाखंडं याति ॥ १३ ॥ यदात्मनेऽन्नं न प्राप्नोति तदा पितृपुत्रान् बाधते ॥ १४ ॥ क्वचिद्दावानलतुल्यं गृहं प्राप्य शोकाग्निना दह्यमानो वैराग्यं प्राप्नोति ॥ १५ ॥ ॥ ॥ ॥ ॥

क्वचित्कालेन कोपितं यद्राजकुलं तेन गृहीतधनरूपप्राणो मृतक इवास्ते ॥१६॥ क्वचिन्मनोरथेन प्राप्तं पितृधनादिकं मिथ्याभूतमपि सत्यत्वेन गृह्णाति ॥ १७॥ क्वचित् गृहाश्रमे कर्मप्रेरणारूपं महापर्वतमारोढुमिच्छन् कंटकशर्कराक्षेत्रं प्रविष्ट इव दुःखं प्राप्नोति ॥१८॥ क्वचिच्च दुःसहेन जठराग्निना क्षीणबलः सन् स्वकुटुंबाय क्रुध्यति ॥१९॥ स एव नरो निद्रारूपेणाजगरेण गृहीतः सन् शून्यारण्य इव शेते नान्यत् किंचन वेद॥२०॥ कदाचिद्दुर्जनैर्भग्नगर्वोंऽधकूपेंऽधवत्पतति ॥२१॥ क्वचित् विषयान् विचिन्वन् यदा परदारपरद्रव्याणि वांछति तदा राज्ञा तत्स्वामिभिर्वा मारितः सन्नरके पतति ॥ २२ ॥ तस्मात्प्रवृत्तिमार्गे जीवस्येह परत्र च जन्मप्राप्तिकारणं कर्मोदाहरंति ॥ २३ ॥ यदि कदाचिद्राजबंधाविमुक्तो भवति तर्हि बंधनिमित्तं तद्वस्तु तस्माद्देवदत्तोऽपहरति तस्मादपि विष्णु-

क्वचित्कालविषमितराजकुलरक्षसापहृतप्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते ॥१६॥ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृतिलक्षणमनुभवति ॥ १७ ॥ क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्शितमनाः कंटकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ १८ ॥ क्वचिच्च दुःसहेन कायाभ्यंतरवह्निना गृहीतसारः स्वकुटुंबाय क्रुध्यति ॥ १९ ॥ स एव पुनर्निद्राजगरगृहीतोंऽधे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किंचन वेद शव इवापविद्धः ॥ २० ॥ कदाचिद्भग्नमानदंष्ट्रो दुर्जनदंदशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोंऽधकूपेंऽधवत्पतति ॥ २१ ॥ कर्हिस्मचित्काममधुलवान्विचिन्वन्यदा परदारपरद्रव्याण्यवरुंधानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २२ ॥ अथ च तस्मादुभयथापि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरंति ॥ २३ ॥ मुक्तस्ततो यदि बंधाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः ॥ २४ ॥ क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणेऽकल्पो दुरंतचिंतया विषण्ण आस्ते ॥ २५ ॥ क्वचिन्मिथो व्यवहरन्यत्किंचिद्धनमन्येभ्यो वा काकिणिकामात्रमप्यपहरन्यत्किंचिद्वा विद्वेषमेति वित्तशाठ्यात् ॥ २६ ॥ अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्याऽवमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥ २७ ॥ क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारंभाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्मापारेंऽधे तमसि प्रहिणोति ॥ २८ ॥ ॥ ॥ ॥

मित्र इत्यनवस्थितिः ॥ २४ ॥ क्वचिच्छीतवाताद्यनेकाधिदैविकभौतिकादिदुःखानां निवारणेऽसमर्थो दुरंतचिंतया खेदातुर आस्ते ॥ २५ ॥ क्वचिन्मिथः क्रयविक्रयादि कुर्वन् यत्किंचिद्धनमन्येभ्यः काकिणिकामात्रं ततो न्यूनं वाऽपहरन् विद्वेषं प्राप्नोति ॥ २६ ॥ अस्मिन् संसारमार्गे इमे सुखदुःखद्वेषभयाभिमानशोकमोहलोभापमानक्षुधातृषाधिव्याधिजन्मजरामरणादयः क्लेशाः संति ॥ २७ ॥ कदाचिद्देवमायया स्त्रियाऽऽलिंगितो गतविवेकज्ञानः स्त्रीपुत्रादीनां भाषणावलोकनादिना मोहितचित्तः सन्नात्मानं तमसि प्रक्षिपति ॥ २८ ॥ ॥ ॥

क्वचिद्भगवतो विष्णोः कालचक्राद्भीतहृदयस्तमेव यज्ञपुरुषमनादृत्य कंकगृध्रबकतुल्याः पाखंडदेवताः सेवते ॥ २९ ॥ यदा पाखंडिभिर्वंचितस्तदा ब्राह्मणकुलं प्रविशति । तेषां श्रौतस्मार्तादिकर्मानुष्ठानेन यद्भगवदाराधनं तदप्रियं मन्यमानः सन् शूद्रकुलं सेवते । यस्य शूद्रस्य स्त्रीसंभोग उदरभरणं च व्यापारः ॥३०॥ ततः शूद्रकुलेऽपि प्रतिबंधरहितः स्वेच्छया क्रीडन् विस्मृतमृत्युकालावधिर्भूत्वा ॥३१॥ द्रुमेषु वानरवद्गृहेषु रंस्यन् स्त्रीपुत्राद्यनुरक्तो भवति ॥३२॥ एवं संसारमार्गे सुखदुःखानुभवं गृह्णन् मृत्युगजभयाद्गिरिगुहाप्राये रोगादिसंकटे पतति ॥ ३३ ॥ क्वचिच्छीतवाताद्यनेकदुःखानां निवारणेऽसमर्थः सन् चिंतातत्पर

कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्धापवर्गकालोपलक्षणात्परिवर्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तंबादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रनिजायुधं साक्षाद्भगवंतं यज्ञपुरुषमनादृत्य पाखंडदेवताः कंकगृध्रबककवटप्राया आर्यसमयपरिहृताः सांकेत्येनाभिधत्ते ॥२९॥ यदा पाखंडिभिरात्मवंचितैस्तैरुरुवंचितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्याराधनमेव तदरोचयन् शूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथुनीभावः कुटुंबभरणं यथा वानरजातेः ॥ ३० ॥ तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योऽन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः ॥३१॥ क्वचिद्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन्यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥ ३२ ॥ एवमध्वन्यवरुंधानो मृत्युगजभयात्तमसि गिरिकंदरप्राये ॥३३॥ क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणेऽकल्पो दुरंतविषयविषण्ण आस्ते ॥३४॥ क्वचिन्मिथो व्यवहरन्यत्किंचिद्धनमुपयाति वित्तशाठ्येन ॥३५॥ क्वचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादभिलभते ॥३६॥ एवं वित्तव्यतिषंगविवृद्धवैरानुबंधोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥ ३७ ॥ एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्र यस्तमु ह वावेतरस्तत्र विसृज्य जातं जातमुपादाय शोचन्मुह्यन्बिभ्यद्विवदन्क्रंदन्संहृष्यन्गायन्नह्यमानः साधुवर्जितो नैवावर्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थो यमध्वनः पारमुपदिशंति ॥ ३८ ॥ यदिदं योगानुशासनं न वा एतदवरुंधते यन्न्यस्तदंडा मुनय उपशमशीला उपरतात्मानः समवगच्छंति॥३९॥यदपि दिगिभजयिनो यज्विनो ये वै राजर्षयः किं तु परं मृधे शयीरन्नस्यामेव ममेयमिति कृतवैरानुबंधा यां विसृज्य स्वयमुपसंहृताः ॥ ४० ॥ ॥ ॥

आस्ते ॥३४॥ क्वचिन्मिथः क्रयविक्रयादि कुर्वन् वित्तशाठ्येन किंचिद्धनं प्राप्नोति ॥३५॥ क्वचित्क्षीणधनः शय्यासनाद्युपभोगविहीनो वांछितार्थग्रहणे निश्चितमतिः सन् ततस्ततो जनादपमानादि लभते ॥३६॥ एवं वित्तव्यवहारेण विवृद्धवैरानुबंधोऽपि पूर्ववासनया पुनर्विवाहादिसंबंधं करोति ॥ ३७ ॥ एतस्मिन् संसारमार्गे य आपदं प्राप्तो मृतो वा तं विसृज्य जातं जातं स्वीकृत्य शोचन् मुह्यन् क्रंदन् संहृष्यन्नद्यापि नावर्तते न च परं पारं याति ॥३८॥ यतः परपारहेतुभूतं यत्तत्त्वज्ञानं तदज्ञानिनो न जानंति । मुनयस्तु तज्जानंति ॥३९॥ ये राजर्षयस्ते भूम्यर्थे विरोधं कृत्वांते तां विसृज्य स्वयं मृताः संतो नरकदुःखम-

भूय पुनरिहायांति। एवं स्वर्गं गतोऽपि जनः पुनः सार्थं नरलोकमेवायाति ॥ ४० ॥ ४१ ॥ हे राजन्, ऋषभदेवपुत्रस्य भरतस्य मार्गमन्यः कोऽपि नृपो गंतुं न शक्नोति । गरुडस्य मार्गं मक्षिकेव ॥४२॥ यस्तरुणोऽपि स्त्रीपुत्रसुहृद्राज्यादि सर्वं जहौ ॥४३॥ किंच । यो राज्यपुत्रस्वंजनधनदारादीन् नैच्छत् तत्तस्य योग्यमेव । यतो हरिसेवातत्परमनसां महता मोक्षोऽपि तुच्छ एव किं पुनरेते राज्यादयो विषयाः ॥४४॥ यो भरतो मृगदेहमपि त्यक्ष्यन् यज्ञाय नारायणाय हरये नम इति सम्यगुच्चारितवान् ॥४५॥ इदं राजर्षेर्भरतस्य चरितं कल्याणकरमायुष्यवृद्धिकरं धनवृद्धिकरं यशोवृद्धिकरं स्वर्गप्राप्तिकरं मोक्षसाधकं च यः शृणोति श्रावयति वा तस्य सर्वे मनोरथाः पूर्णा भवंति ॥४६॥ इति श्रीमद्भागवतचू० पंचम० चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ एवमष्टभिरध्यायैर्भरतस्योक्तमीरितम् ।

कर्मवल्लीमवलंब्य तत आपदः कथंचिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थमुपयाति एवमुपरि गतोऽपि ॥ ४१ ॥ तस्येदमुपगायंति ॥ आर्षभस्येह राजर्षेर्मनसापि महात्मनः ॥ नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥ ४२ ॥ यो दुस्त्यजान्दारसुतान्सुहृद्राज्यं हृदिस्पृशः ॥ जहौ युवैव मलवदुत्तमश्लोकलालसः ॥ ४३ ॥ यो दुस्त्यजान्क्षितिसुतस्वजनार्थदारान्प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् ॥ नैच्छन्नृपस्तदुचितं महतां मधुद्विदसेवानुरक्तमनसामभवोऽपि फल्गुः ॥ ४४ ॥ यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय ॥ नारायणाय हरये नम इत्युदारं हास्यन्मृगत्वमपि यः समुदाजहार ॥ ४५ ॥ य इदं भागवत सभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनंदति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ॥ ४६ ॥ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भरतोपाख्याने पारोक्ष्यविवरणं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव केचित्पाखंडिन ऋषभपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यंति ॥ १ ॥ तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥ २ ॥ अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः ॥ ३ ॥ य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ॥ ४ ॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानावजनिषाताम् ॥ ५ ॥

ततः पंचदशे तस्य कीर्त्यंते वंशजा नृपाः ॥ १ ॥ श्रीशुक उवाच ॥ भरतस्य सुमतिर्नाम पुत्रः । यं सुमतिमृषभपदवीमनुवर्तमानं दृष्ट्वा केचित्पाखंडिनोऽयं साक्षाद्बुद्धोऽवतीर्ण इति मंस्यंते । पाखंडमार्गं च कलौ कल्पयिष्यंति ॥ १ ॥ तस्मात्सुमतेर्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥ २ ॥ तत आसुर्यां देवद्युम्नः । तस्माद्धेनुमत्यां परमेष्ठी । ततः सुवर्चलायां प्रतीहो जातः ॥ ३ ॥ यः प्रतीहो लोकानामात्मज्ञानं कथयित्वा स्वयं भगवता सहैक्यं प्राप्तः ॥ ४ ॥ प्रतीहात्सुवर्चलायां प्रतिहर्ता प्रस्तोता उद्गाता चेति त्रयः पुत्रा आसन् । प्रतिहर्तुः स्तुत्यामजभूमानौ जातौ ॥ ५ ॥ ॥ ॥

---

१ जीवन्मुक्तताम् ।

भूम्न ऋषिकुल्यायामुद्गीथः। उद्गीथाद्देवकुल्यायां प्रस्तावः प्रस्तावान्नियुत्सायां विभुः। विभो रत्यां पृथुषेणः। पृथुषेणादाकूत्यां नक्तः। नक्ताद्द्रुत्यां गयो नाम भगवदंशो जातः। स ज्ञानित्वादिगुणैः श्रेष्ठपुरुषत्वं प्राप्तः ॥६॥ स गयो भगवति समर्पितेन प्रजापालनपोषणलक्षणेन धर्मेण यज्ञादिस्वधर्मेण निष्कामभक्तियोगेन च शुद्धमतिर्निरभिमान एव पृथ्वीं पालयामास ॥७॥ हे राजन्, पूर्वे ज्ञातारस्तस्येमां गाथां गायंति ॥८॥ अन्यः को राजा कर्मभिर्गयमनुकरोति न कोऽपि। तथा सज्जनसेवकश्च तं विना कोऽस्ति न कोऽपि ॥९॥ यं दक्षकन्या अभ्यषिंचन् पृथ्वी यत्प्रजानां कामान् दुदुहे ॥१०॥ युद्धे बाणैः पूजिता नृपा यस्य बलिं

भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुर्विभो रत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्वस्य कलात्मवत्वादिलक्षणेन महापुरुषतां प्राप्तः ॥ ६ ॥ स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत् ॥ ७ ॥ तस्येमां गाथां पांडवेय पुराविद उपगायंति ॥ ८ ॥ गयं नृपः कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता ॥ समागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥ ९ ॥ यमभ्यषिंचन्परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ॥ यस्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ॥ १० ॥ छंदांस्यकामस्य च यस्य कामान्दुदूहुराजह्रुरथो बलिं नृपाः ॥ प्रत्यंचिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य ॥ ११ ॥ यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ॥ श्रद्धा विशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥१२॥ यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्यात् ॥ प्रीयेत सद्यः सह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ १३ ॥ गयाद्गयंत्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुश्चित्ररथादूर्णायां सम्राडजनिष्ट ॥ १४ ॥ तत उत्कलायां मरीचिर्मरीचेर्बिंदुमत्यां बिंदुमानुदपद्यत तस्मात्सरघायां मधुनामाभवन्मधोः सुमनसि वीरव्रतस्ततो भोजायां मंथुप्रमंथू जज्ञाते मंथोः सत्यायां भौवनस्ततो दूषणायां त्वष्टाजनिष्ट त्वष्टुर्विरोचनायां विरजो विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्यां किल जातम् ॥ १५ ॥ ॥

ददुः। ब्राह्मणा आचरितानां धर्माणां फलस्य षष्ठांशं लोकांतरे यमर्पयामासुः ॥११॥ यस्य यज्ञे यज्ञेशो भगवान् भक्तियोगेन समर्पितं यज्ञफलं पूजाग्रहणवत्प्रत्यक्षं स्वीकृतवान् ॥१२॥ यस्य हरेः प्रीणनाद्देवमनुष्यादयः प्रीयेरन् स हरिर्गयस्य यज्ञे तृप्तोऽस्मीति प्रत्यक्षं दर्शितवान् ॥ १३ ॥ गयाद्गयंत्यां चित्ररथः सुगतिः अवरोधनश्चेति त्रयः पुत्राः। चित्ररथादूर्णायां सम्राड् बभूव ॥१४॥ तस्मादुत्कलायां मरीचिः। मरीचेर्बिंदुमत्यां बिंदुमान्। तस्मात्सरघायां मधुः। मधोः सुमनसि वीरव्रतः। वीरव्रताद्भोजायां मंथुप्रमंथू जज्ञाते। मंथोः सत्यायां भौवनः। तस्माद्दूषणायां त्वष्टा। त्वष्टुर्विरोचनायां विरजः। विरजस्य विषू-

च्यां शतजित्प्रमुखं पुत्रशतं एका कन्या च जाता ॥१५॥ अस्मिन्वंशे विरजनामकश्चरमः पुरुषः । स इमं प्रियव्रतवंशं कीर्त्या भूषितवान् ॥१६॥ इति श्रीम॰ पंचमस्कंधे पंचदशोऽध्यायः ॥१५॥ ॥ पूर्वोक्तद्वीपसिंध्वादिमानचिह्नस्वरूपतः । स्पष्टं प्रवक्तुमारब्धा पंचाध्यायी ततः परम् ॥ १ ॥ षोडशेऽधस्तथा चोर्ध्वं परितः सन्निवेशतः । मेरोः स्थितिर्महीकंजकर्णिका चोपवर्ण्यते ॥२॥ प्रियव्रतचरित्रोक्तावुक्ता द्वीपादिकल्पना । तद्विशेषविजिज्ञासुः कथांते परिपृच्छति ॥ ३ ॥ ॥ राजोवाच ॥ हे शुक, त्वया पूर्वं प्रियव्रतचरित्रे भूमंडलस्यायामविस्तारप्रकार उक्तः । कियत्पर्यंतं तदाह । यावत्सूर्यस्तपति तथा नक्षत्रगणैः सह चंद्रमा वा दृश्यते तावत् ॥ १ ॥ तत्रापि हे भगवन्, प्रियव्रतस्य रथचरणपरिखातैः सप्त समुद्राः कल्पिताः । येभ्यः समुद्रेभ्य एतस्या भुवः सप्तद्वीपविशेषस्त्वया

तत्रायं श्लोकः ॥ प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ॥ अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥१६॥ इति श्रीमद्भा॰ महा॰ पंचमस्कंधे प्रियव्रतवंशानुकीर्तनं नाम पंचदशोऽध्यायः ॥१५॥ राजोवाच ॥ उक्तस्त्वया भूमंडलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चंद्रमा वा सह दृश्यते ॥१॥ तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिंधव उपक्लृप्ता यत एतस्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन्खलु सूचित एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥ २॥ भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥३॥ ऋषिरुवाच ॥ न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाधिगंतुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥ ४ ॥ यो वायं द्वीपः कुवलयकमलकोशाभ्यंतरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम् ॥ ५॥ यस्मिन्नव वर्षाणि नव योजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवंति ॥६॥ एषां मध्ये इलावृतं नामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रं तावतांतर्भूम्यां प्रविष्टः ॥ ७ ॥ उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसंति ॥ ८ ॥

संक्षेपतः कथितः । एतत्सर्वं प्रमाणतो लक्षणतश्चाहं ज्ञातुमिच्छामि ॥२॥ यतो भगवतः स्थूलरूपे स्थापितं मनः सूक्ष्मे रूपे स्थापयितुं योग्यं भवति । तस्माद्धेगुरो, एतद्वर्णयितुमर्हसि ॥ ३ ॥ श्रीशुक उवाच ॥ हे महाराज, भगवतो मायाया गुणविस्तारस्यांतं पुरुषो देवायुष्येणापि ज्ञातुं न समर्थः । अतो मुख्यत्वेन भूगोलविशेषं नामतो लक्षणतश्च वयं कथयिष्यामः ॥४॥ योऽयं जंबुद्वीपो लक्षयोजनविस्तीर्णः समो वर्तुलः कंकणाकारः । एष एतत्सदृशेन लक्षयोजनविस्तीर्णेन क्षारसमुद्रेण वेष्टितः॥५॥ यस्मिन् द्वीपे नव खंडानि नवसहस्रयोजनविस्तृतानि अष्टभिर्मर्यादागिरिभिः पृथक् पृथक् कृतानि संति॥६॥ एषां मध्ये इलावृतं नाम मध्यमं खंडं तस्य मध्ये लक्षयोजनोच्चः कमलकर्णिकासदृशः सौवर्णः पर्वतराजो मेरुः स्थितः । स मेरुर्मस्तके द्वात्रिंशत्सहस्रयोजनविस्तृतो मूले

षोडशसहस्रयोजनविततः। अंतर्भूम्यां षोडशसहस्रयोजनानि प्रविष्टः। भूमेरुपरि चतुरशीतिसहस्रयोजनप्रमाणो दृश्यते। एवं लक्षयोजनोच्चोऽस्ति। इलावृतस्योत्तरोत्तरतो नीलः श्वेतः श्रृंगवानिति त्रयः पर्वताः पूर्वपश्चिमायताः। एते रम्यकहिरण्मयकुरुनामकानां खंडानां मर्यादापर्वताः। ते दशसहस्रयोजनोच्चा द्विसहस्रयोजनविस्तृताः ॥७॥८॥ एवमिलावृतस्य दक्षिणतो निषधो हेमकूटो हिमालयश्चेति त्रयः पर्वताः पूर्वपश्चिमायता हरिवर्षकिंपुरुषभारतखंडानां मर्यादापर्वताः। एते गिरयः समुद्रावधयोऽयुतयोजनोच्चा द्विसहस्रयोजनविततताः ॥ ९ ॥ इलावृतस्य पूर्वे गंधमादनो भद्राश्वखंडस्य मर्यादागिरिः। पश्चिमे माल्यवान् केतुमालखंडस्य सीमाचलः ॥१०॥ मेरोश्चतुर्दिक्षु मंदरो मेरुमंदरः सुपार्श्वः कुमुदश्चेति चत्वारो विस्तीर्णमस्तकस्य मेरोराधारभूताः पर्वता दशसहस्रयोजनविस्तारा उच्चाश्च संति ॥११ ॥ एषु चतुर्षु पर्वतेषु आम्रजंबूकदंबवटाश्चत्वारो वृक्षा एकादशशतयोजनोच्चाः शतयोजनविस्ताराः संति ॥ १२ ॥ तेषु

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् ॥९॥ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गंधमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ॥१०॥ मंदरो मेरुमंदरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टंभगिरय उपक्लृप्ताः ॥११॥ चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १२ ॥ ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयंति ॥ १३ ॥ देवोद्यानानि च भवंति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥ १४ ॥ येष्वमरपरिवृढाः सहसुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति ॥ १५ ॥ मंदरोत्संग एकादशशतयोजनोत्तुंगदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतंति ॥ १६ ॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबहुलारुणरसोदेनारुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती पूर्वेणेलावृतमुपप्लावयति ॥ १७ ॥ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासयति ॥ १८ ॥ एवं जंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबूनाम नदी मेरुमंदरशिखरादयुतयोजनादवनितले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्यंदयति ॥ १९ ॥ ॥

च पर्वतेषु चत्वारो ह्रदा दुग्धमध्विक्षुरसस्वच्छजलाः संति। यत्सेविनः सिद्धकिंनरप्रभृतय उपदेवाः स्वाभाविकानि योगैश्वर्याणि धारयंति ॥१३॥ तेषु पर्वतेषु च नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति चत्वारि देवोद्यानानि संति ॥ १४ ॥ येषु देवादयः स्त्रीभिः सह क्रीडंति ॥ १५ ॥ मंदरपर्वतोत्संगे स्थितस्याम्रवृक्षस्य शिरसो गिरिशिखरवत् स्थूलान्यमृततुल्यानि फलानि पतंति ॥ १६ ॥ तेषां फलानां निःसृतरसेन अरुणोदा नाम नदी पूर्वेणेलावृतं स्नपयति ॥ १७॥ यस्या जलपानतः पार्वतीदासीनां देहसुगंधवातो दशयोजनं समंताद्वासयति ॥ १८ ॥ एवं मेरुमंदरपर्वतोत्संगे स्थितस्य जंबूवृक्षस्य फलानि हस्तिदेहसदृशानि पतंति तद्रसेन जंबूनाम नदी दक्षिणेनेलावृतं व्याप्य वहति ॥ १९ ॥ ॥ ॥ ॥

तस्या रसेन क्लिन्ना उभयोस्तटयोर्मृत्तिका वायुसूर्यकिरणसंयोगेन शुष्का सती जांबूनदं नाम सुवर्णं भवति ॥२०॥ तत्सुवर्णं देवादयः स्त्रीभिः सह मुकुटवलयाद्यलंकारैर्धारयंति ॥ २१ ॥ एवं पश्चिमे सुपार्श्वपर्वते स्थितस्य कदंबवृक्षस्य कोटरेभ्यो निःसृताः पंच मधुधाराः पश्चिमेनेलावृतखंडं यांति ॥ २२ ॥ यद्रससेविनां मुखवायुः समंताच्छतयोजनं सुवासयति ॥ २३ ॥ एवमुत्तरे कुमुदपर्वतोत्संगे स्थितस्य वटवृक्षस्य स्कंधेभ्यो निःसृताः पयोदधिमधुघृतगुडान्नवस्त्रशय्यासनाभरणादयः सर्व एव कामदुघा नदाः पर्वताग्रात्पतंतः संत उत्तरेणेलावृतं वहंति ॥ २४ ॥ तेषां सेविनां प्रजानां वलीपलितश्रमघर्मदौर्गंध्यजरामृत्युशीतोष्णादयो न भवंति ॥२५॥ एवं कुरंगः कुररः कुसुंभो वैकंकस्त्रिकूटः शिशिरः पतंगो रुचको निषधः शिनीवासः कपिलः शंखो वैदूर्यो जारुधिर्हंस ऋष-

तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जांबूनदं नाम सुवर्णं भवति ॥ २० ॥ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयंति ॥ २१ ॥ यस्तु महाकदंबः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पंचायामपरिणाहाः पंच मधुधाराः सुपार्श्वशिखरात्पतंत्योऽपरेणात्मानमिलावृतमनुमोदयंति ॥ २२ ॥ या ह्युपयुंजानानां मुखनिर्वासितो वायुः समंताच्छतयोजनमनुवासयति ॥ २३ ॥ एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कंधेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति ॥ २४ ॥ यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवंति यावज्जीवं सुखं निरतिशयमेव ॥ २५ ॥ कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनीवासकपिलशंखवैदूर्यजारुधिहंसर्षभनागकालंजरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥ २६ ॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुंगौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतावेवमुत्तरतस्त्रिशृंगमकरावष्टभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति कांचनगिरिः ॥ २७ ॥ मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौंभीं वदंति ॥ २८ ॥ तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥ २९ ॥ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ ॥

भो नागः कालंजरो नारद आदिश्चेति विंशतिः पर्वता मेरोर्मूलदेशे परितः संति ॥ २६ ॥ मेरोः पूर्वतो जठरदेवकूटौ, दक्षिणतः कैलासकरवीरौ, पश्चिमतः पवनपारियात्रौ, उत्तरतस्त्रिशृंगमकरौ पर्वतौ स्तः । एतैः परिवृतो मेरुः परिस्तृतोऽग्निरिव शोभते ॥२७॥ मरोर्मूर्धनि मध्यभागे निर्मिता सौवर्णी दशसहस्रयोजना चतुरस्रा ब्रह्मपुरी अस्तीति वदंति ॥२८॥ तस्या आसमंताद्भागे रचिता इंद्रादीनां लोकपालानामष्टौ पुर्यः सार्धद्विसहस्रयोजनपरिमिताः संति ॥ २९ ॥

इति श्रीमद्भागवतचूर्णिकायां पंचमस्कंधे षोडशोऽध्यायः ॥ १६ ॥ ॥ ॥ ॥

ततः सप्तदशे गंगागमनं तच्चतुर्दिशम् । इलावृते च रुद्रेण संकर्षणनिषेवणम् ॥१॥ श्रीशुक उवाच ॥ हे राजन्, श्रीवामनावतारस्य विष्णोर्वामपादांगुष्ठनखेन निर्भिन्नोर्ध्वभागस्यांडकटाहस्य विवरेणांतः प्रविष्टा या बाह्यजलधारा भगवच्चरणस्पर्शात्सर्वजनपापहरा सा विष्णुपदीति नाम्ना कथिता सती बहुना कालेन ध्रुवमंडलेऽवततार ॥१॥ तत्र परमभागवतो ध्रुवोऽपि भगवद्भक्तियोगेन द्रवीभूतांतःकरणः सन् यां गंगामद्यापि शिरसा बिभर्ति ॥२॥ ततः सप्त ऋषयस्तस्या गंगायाः प्रभावज्ञाः स्वतपसः सर्वोत्कृष्टा सिद्धिरियमेवेति निश्चित्य भगवति वासुदेवे निरंतरभक्तियोगलाभेन त्यक्तान्यपुरुषार्थाः संतो मुक्तिमिव प्राप्तां यां

श्रीशुक उवाच॥ तत्र भगवतः साक्षाद्यज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टा या बाह्यजलधारा तच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार यत्तद्विष्णुपदमाहुः ॥१॥ यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविंदोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानांतर्हृदय औत्कंठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा बिभर्ति ॥२॥ ततः सप्त ऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस आत्यंतिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहंति ॥ ३ ॥ ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलमावार्य ब्रह्मसदने निपतति ॥ ४ ॥ तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्पंदंती नदनदीपतिमेवाभिनिविशति सीतालकनंदा चक्षुर्भद्रेति ॥ ५ ॥ सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवंती गंधमादनमूर्धसु पतित्वांतरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥६॥ एवं माल्यवच्छिखरान्निष्पतंती ततोऽनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७॥ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृंगवतः शृंगादवस्यंदमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ॥८॥ तथैवालकनंदा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटाद्धैमकूटान्यतिरभसतररंहसा लुठयंती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति यस्यां स्नानार्थं चागच्छतः पुंसः पदेपदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति॥९॥

गंगामद्यापि जटाजूटैर्धारयंति ॥ ३ ॥ ततोऽनेकविमानव्याप्तेनाकाशमार्गेणाधोऽवतरंती सा गंगा चंद्रमंडलं व्याप्य ब्रह्मसदने पतति ॥ ४ ॥ तत्र चतुर्धा भिन्ना सती सीताऽलकनंदा चक्षुर्भद्रेति नामभिश्चतुर्दिक्षु समुद्रं प्रविशति ॥ ५ ॥ तत्र सीता ब्रह्मसदनात्केसराचलादिपर्वतेभ्यः पतंती गंधमादनमूर्धनि पतित्वा भद्राश्ववर्षं गत्वा पूर्वसमुद्रं प्रविशति ॥६॥ एवं चक्षुर्माल्यवतः शिखरात्पतंती केतुमालखंडं गत्वा पश्चिमसमुद्रं प्रविशति ॥ ७॥ भद्रा च ब्रह्मसदनात्पतिता कुमुदनीलश्वेतादिपर्वतानां शिखराण्यतिक्रम्योत्तरकुरून् गत्वोत्तरसमुद्रं प्रविशति ॥८॥ एवमलकनंदा ब्रह्मसदनात्पतंती बहूनि गिरिशिखराण्यतिक्रम्य भरतखंडं

गत्वा दक्षिणसमुद्रं प्रविशति यस्यां स्नानार्थं गच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ ९ ॥ अन्ये च नदा नद्यश्च खंडे खंडे बहुशः संति ॥१०॥ तत्रापि भारतमेव खंडं कर्मक्षेत्रं अन्यान्यष्ट खंडानि स्वर्गिणां पुण्यशेषस्योपभोगस्थानानि भौमस्वर्गपदानि कथयंति ॥ ११ ॥ तत्रापि भारतखंडं विनान्यखंडेषु स्थितानां दशसहस्रगजबलानां पुरुषाणां परमायुर्दशसहस्रवर्षाणि । तत्र तु त्रेतायुगसमः कालो वर्तते ॥१२॥ यत्र देवपतयः स्वैः स्वैः सेवकगणैः कृतसत्काराः संतः पुष्पगुच्छफलादीनां समृद्ध्या नम्रशाखैर्वृक्षैः शोभमानवनेषु पर्वतद्रोणीष्वाश्रमस्थानेषु च तथा राजहंसजलकुक्कुटकारंडवसारसचक्रवाकादिभिरुपकूजितेषु निर्मलजलाशयेषु च अतिसुंदरीणां कामक्षुभितैर्विलासहासादिभिः क्षोभितचित्ता जलक्रीडादिभिर्यथेच्छं क्रीडंति ॥१३॥ नवस्वपि

अन्ये च नदा नद्यश्च वर्षे वर्षे संति बहुशो मेर्वादिगिरिदुहितरः शतशः ॥ १० ॥ तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशंति ॥११॥ एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः कालो वर्तते ॥१२॥ यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफलकिसलयश्रिया नम्यमानविटपलताविटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारंडवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुंदरीणां कामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरंति ॥ १३ ॥ नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि संनिधीयते ॥१४॥ इलावृते तु भगवान्भव एक एव पुमान्नह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञो यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥ १५ ॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण संनिधाप्यैतदभिगृणन्भव उपधावति ॥ १६ ॥ श्रीभगवानुवाच ॥ ॐनमो भगवते महापुरुषाय सर्वगुणसंख्यानायानंतायाव्यक्ताय नम इति ॥ १७ ॥ भजे भजन्यारणपादपंकजं भगस्य कृत्स्नस्य परं परायणम् ॥ भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥ १८ ॥ न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ॥ ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥ १९ ॥ ॥

खंडेषु भगवान् नारायणः पुरुषाणामनुग्रहाय स्वमूर्तिसमूहेन सांनिध्यं प्राप्नोति ॥ १४ ॥ इलावृतखंडे त्वेक एव पुमान् शिवो भवान्या सह विहरति । यत्र प्रविशतोऽन्यस्य पुरुषस्य स्त्रीत्वं जायते तत्पश्चान्नवमस्कंधे वक्ष्यामि ॥१५॥ भवान्या दास्यो दशकोटिसहस्राः संति । ताभिर्युक्तः शिवो विष्णोश्चतुर्थीं संकर्षणसंज्ञां मूर्तिं समाधियोगेन संचिंत्य वक्ष्यमाणं मंत्रं जपति ॥ १६ ॥ श्रीभगवानुवाच ॥ ॐनमो भगवते महापुरुषायेत्यादि मंत्रं जपति ॥ १७ ॥ स्तौति च—हे भजनीय, भक्तानां भवापहं भक्तेषु प्रकटितस्वरूपं त्वां भजे ॥ १८ ॥ जगतो नियमनार्थं पश्यतोऽपि यस्य दृष्टिर्विषयैरणुमात्रमपि न लिप्यते । तं

को नाद्रियेत ॥१९॥ हे ईश, लौकिकदृष्टेर्नरस्य त्वं मायया मत्त इव भयंकरः प्रतिभासि ॥२०॥ मुनयो यमनंतं वदंति । यो भवान् स्वफणासहस्रमध्ये एकफणायां क्वचित्सर्षपमिव स्थितं भूमंडलं न वेद तस्मै नमोऽस्तु ॥ २१ ॥ यस्मात्प्रथमं हृत्तत्वं जातम् । तस्मात्संभूतोऽहं रुद्रः सात्विकतामसराजसाहंकारेण देवता महाभूतानींद्रियाणि च सृजामि ॥२२॥ वयं महदादयः सर्वे यस्यानुग्रहाद्ब्रह्मांडं सृजामः ॥२३॥ जनो यन्निर्मितां मायां न वेद । तस्मै विलयोदयस्वरूपाय नमः ॥२४॥ इति श्रीमद्भागवतचू० पंच० सप्तदशोऽध्यायः ॥१७॥ ॥ अष्टादशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु । त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनम् ॥१॥ श्रीशुक उवाच ॥ तथा च भद्राश्वखंडे भद्रश्रवानाम धर्मसुतः तत्सेवकमुख्याश्च भद्रश्रवसस्ते सर्वे भगवतो हयग्रीवमूर्तिं समाधिना चिंतयंतो वक्ष्यमा-

असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ॥ न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेंद्रियाः ॥ २० ॥ यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनंतमृषयः ॥ न वेदसिद्धार्थमिव क्वचित्स्थितं भूमंडलं मूर्धसहस्रधामसु ॥२१॥ यस्याद्य आसीद्गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः किल ॥ यत्संभवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमेंद्रियं सृजे ॥ २२ ॥ एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः ॥ महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदम् ॥२३॥ यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः ॥ न वेद निस्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने ॥२४॥ इति श्रीमद्भा० महा० पंचम० सप्तदशोऽध्यायः ॥ १७॥ ॥ श्रीशुक उवाच ॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनूं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना संनिधाप्येदमभिगृणंत उपधावंति ॥१॥ भद्रश्रवस ऊचुः ॥ ॐनमो भगवते धर्मायात्मविशोधनाय नम इति ॥२॥ अहो विचित्रं भगवद्विचेष्टितं घ्नंतं जनोऽयं हि मिषन्न पश्यति ॥ ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषति ॥ ३ ॥ वदंति विश्वं कवयः स्म नश्वरं पश्यंति चाध्यात्मविदो विपश्चितः ॥ तथापि मुह्यंति तवाज मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥४॥ विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरंगीकृतमप्यपावृतः ॥ युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥५॥ वेदान्युगांते तमसा तिरस्कृतान्रसातलाद्यो नृतुरंगविग्रहः ॥ प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथेहिताय इति ॥६॥

णं मंत्रं जपंति ॥१॥ भद्रश्रवस ऊचुः । ॐनमो भगवते धर्मायात्मविशोधनाय नम इति ॥२॥ स्तुवंति च । अहो विषयसुखार्थं पापं कुर्वन्नयं जनो मृतं पितरं पुत्रं वा दग्ध्वा स्वयं तदुभयधनैर्जीवितुमिच्छति । अपि च । स्वस्यापि मारकं कालं पश्यन्नपि न पश्यति । तस्माद्भवतस्तव लीला अतर्क्यास्ति ॥ ३ ॥ कवय इदं विश्वं नश्वरं वदंति । तथापि हे अज । तव मायया मुह्यंति । तं मायाप्रवर्तकमहं नतोऽस्मि ॥४॥ हे प्रभो, अकर्तुरपि तव सृष्ट्यादिकं कर्म वेदेन स्वीकृतं तद्योग्यमस्ति । यतस्त्वं वस्तुत उपाधिरहितोऽपि मायया सर्वेषामुत्पादकोऽसि ॥५॥ यो भवान् युगांते दैत्येन रसातले नीतान् वेदान् रसातलादानीय याचते

---

१ प्रलयकाले निद्रितस्य ब्रह्मणो मुखाद्गलितान् ।

हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ॥७॥ ॐनमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान्रंधय रंधय तमो ग्रस ग्रस ॐ स्वाहा ॥ अभयमभयमात्मनि भूयिष्ठा ॐ क्ष्रौम् ॥८॥ स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि शिवं मिथो धिया ॥ मनश्च भद्रं भजतादधोक्षज आवेश्यतां नो मतिरप्यहैतुकी ॥९॥ मागारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः ॥ यः प्राणवृत्त्या परितुष्टआत्मवान्सिद्ध्यत्यदूरान्न तथेंद्रियप्रियः ॥१०॥ यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम् ॥ हरत्यजोंऽतःश्रुतिभिर्गतोंऽगजं को वै न सेवेत मुकुंदविक्रमम् ॥ ११ ॥ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥१२॥ हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोयमीप्सितम् ॥ हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनाम् ॥ १३ ॥ तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ॥ हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयमिति ॥ १४ ॥ केतुमालेऽपि भगवान्कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितृणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरांते विनिपतंति ॥१५॥ अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रिया रमां रमयन्निंद्रियाणि रमयते ॥ १६ ॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥ १७ ॥ ॥ ॥

ब्रह्मणे ददौ। तस्मै सत्यसंकल्पाय ते नमोऽस्तु ॥६॥ हरिवर्षे खंडे भगवान् नरहरिरूपेणास्ते। तं प्रह्लादस्तद्वर्षपुरुषैः सह भक्तियोगेनोपास्ते ॥७॥ ॐनमो भगवते नृसिंहायेत्यादिमंत्रं जपति ॥८॥ स्तौति च । हे नृसिंह, जगतः कल्याणमस्तु । दुष्टः स्वस्य क्रूरत्वं त्यजतु । भूतानि मिथः कल्याणं चिंतयंतु । अस्माकं बुद्धिर्निष्कामा सती त्वयि प्रविशताम् ॥९॥ नः संगो गृहदारादिषु मा भवतु। भगवद्भक्तेषु भवतु ॥१०॥ यद्भक्तसंगात्प्राप्तं हरिलीलामृतं पुंसां मनोमलं हरति। तद्धरिलीलामृतं को न सेवेत ॥११॥ यस्य भगवति भक्तिर्भवति तस्य गृहे सर्वे देवा धर्मज्ञानादिभिः सह नित्यं वसंति ॥१२॥ मत्स्यानां जलमिव सर्वप्राणिनामात्मा हरिरेवेष्टः। तं हरिं हित्वा यदि पुरुषा गृहेष्वासक्ता भवंति तर्हि तेषां महत्त्वं देहवृद्धत्वेनैव ज्ञातव्यं न तु ज्ञानादिगुणैः ॥ १३ ॥ तस्मात् हे जनाः, यूयं गृहं हित्वा नृसिंहपादं भजतेति ॥१४॥ केतुमालखंडे भगवान् कामदेवरूपेणास्ते । स कामदेवस्तत्र खंडे स्थितानां षट्त्रिंशत्सहस्रसंख्याकानां रात्र्यभिमानिदेवतानां तथा तत्पतीनां दिवसाभिमानिदेवतानां लक्ष्म्याश्च प्रियचिकीर्षया स्वस्य सुंदरहास्यावलोकनादिभी रमां रमयन् स्वस्येंद्रियाणि रमयते ॥ १५ ॥ १६ ॥ तं कामदेवं रमा देवी रात्रिषु षट्त्रिंशत्सहस्रसंख्याकाभिः स्त्रीभिः सह दिवा च तत्पतिभिः सहोपास्ते ॥ १७ ॥ ॥ ॥

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कांताय कामाय नमस्ते उभयत्र भूयात्॥ १८ ॥ स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् ॥ तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽस्वतंत्राः ॥ १९ ॥ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनम् ॥ स एक एवेतरथा मिथो भयं नैवात्मलाभादधि मन्यते परम् ॥ २० ॥ या तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा ॥ तदेव रासीप्सितमीप्सितोऽर्चितो यद्भयाच्छा भगवन्प्रतप्यते ॥ २१ ॥ मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यंत उग्रं तप ऐंद्रियेधियः ॥ ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृदया यतोऽजित ॥ २२ ॥ स त्वं ममाप्यच्युत शीर्ष्णि वंदितं करांबुजं यत्त्वदधायि सात्वताम् ॥ बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति ॥ २३ ॥ रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक् प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ॥ २४ ॥ ॐ नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे सहसे बलाय महामात्स्याय नम इति ॥ २५ ॥ अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः ॥ स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥२६॥ यं लोकपालाः किल मत्सरज्वरा हित्वा यतंतोऽपि पृथक् समेत्य च ॥ पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥ २७ ॥ भवान्युगांतार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिम् ॥ मया सहोरुक्रमतेज ओजसा तस्मै जगत्प्राणगणात्मने नम इति ॥२८॥ हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मंत्रमिमं चानुजपति ॥ २९ ॥ ॥

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशायेत्यादिमंत्रं जपति ॥ १८ ॥ स्तौति च । हे हृषीकेश, स्त्रियस्त्वां व्रतैराराध्यान्यं पतिमिच्छंति तद्व्यर्थम् । तस्य पतेः परतंत्रत्वात् ॥१९॥ यः स्वतो भयरहितः सन् भयव्याकुलं जनं सर्वतः परिपाति स एव पतिः प्रार्थ्यः । एवंभूतः पतिस्त्वमेवासि ॥ २० ॥ या स्त्री निष्कामा सती तव चरणकमलपूजनमेव कामयेत् सा सर्वान् कामान् प्राप्नोति । या तु एकं फलं संकल्प्य त्वां पूजयति सैकमेव फलं प्राप्नोति ॥२१॥ ब्रह्मेंद्रादयो देवा मम लक्ष्म्याः प्राप्तये तपः कुर्वंति तथापि त्वद्भक्तान्विना ते मां न विदंति ॥ २२ ॥ हे ईश्वर, तवेच्छां ज्ञातुं कः समर्थः । स त्वं मम शीर्ष्णि स्वकरांबुजं स्थापय ॥२३॥ रम्यके खंडे मत्स्यरूपेण भगवानास्ते तं वैवस्वतमनुराराधयति ॥२४॥ ॐनमो भगवते मुख्यतमाय नम इत्यादिमंत्रं जपति ॥ २५ ॥ स्तौति च । हे भगवन्, यथा कश्चित् पुमान् काष्ठमयीं स्त्रियं सूत्रेण नर्तयित्वा स्वाधीनां रक्षति तथा भवानिदं विश्वं वेदरूपदामन्या ब्राह्मणादिदामभिस्तत्तत्कर्मसु संयोज्य स्वाधीनं रक्षसि ॥२६॥ इंद्रादयो देवास्त्वां हित्वा यत्नं कुर्वंतोऽपि स्थावरजंगमात्मकं जगत्पातुं न समर्थाः । त्वं तु समर्थोऽसि ॥२७॥ भवान् प्रलयकालीनसमुद्रे इमां पृथ्वीं मया सह रक्षितवान् तस्मै महामत्स्याय नम इति॥२८॥तथा हिरण्मयखंडे भगवान् कूर्मरूपेणास्ते । तं पितृगणाधिपतिरर्यमोपास्ते॥२९॥

ॐ नमो भगवते अकूपाराय सर्वसत्वगुणविशेषणाय नोपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते॥३०॥ यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपं बहुरूपरूपितम् ॥ संख्या न यस्यास्त्ययथोपलंभनात्तस्मै नमस्तेऽव्यपदेशरूपिणे ॥ ३१ ॥ जरायुजं स्वेदजमंडजोद्भिदं चराचरं देवर्षिपितृभूतमैंद्रियम् ॥ द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३२ ॥ यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ॥ संख्या यया तत्त्वदृशापनीयते. तस्मै नमः सांख्यनिदर्शनाय त इति ॥ ३३ ॥ उत्तरेषु च कुरुषु भगवान्यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्तयति ॥ ३४ ॥ ॐ नमो भगवते मंत्रतत्त्वलिंगाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ ३५ ॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् ॥ मथ्नंति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ३६ ॥ द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ॥ अन्वीक्षयांगातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥ करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ॥ माया यथाऽयो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥ ३८ ॥ प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः ॥ कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुमिति ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ श्रीशुक उवाच ॥ किंपुरुषे वर्षे भगवंतमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसंनिकर्षाभिरतः परमभागवतो हनुमान्सह किंपुरुषैरविरतभक्तिरुपास्ते ॥ १ ॥ ॥ ॥

ॐनमो भगवतेऽकूपाराय सर्वसत्वगुणविशेषणायेत्यादि मंत्रं जपति ॥ ३० ॥ स्तौति च । हे ईश, यस्य तव स्वरूपभूतमेतद्बहुरूपं विश्वं त्वया निजमायया प्रकाशितमस्ति तस्मै ते नमः ॥३१॥ इदं सर्वं चराचरं जगत्त्वद्व्यतिरिक्तं नास्ति ॥३२॥ यस्मिन् त्वयि कविभिरिदं नामरूपभेदेन बहुधा कल्पितमस्ति । तत्त्वदृष्ट्या तु त्वत्स्वरूपमेव भाति । एवंभूताय सांख्यसिद्धांतरूपाय तुभ्यं नम इति ॥ ३३ ॥ तथा उत्तरेषु कुरुषु भगवान् वराहरूपेणास्ते । तं तु देवी पृथिवी तद्वर्षपुरुषैः सह भक्त्योपास्ते इदं च जपति ॥३४॥ ॐनमो भगवते मंत्रतत्त्वलिंगाय यज्ञक्रतुरूपाय नम इत्यादिमंत्रं जपति ॥३५॥ स्तौति च । हे हरे, अग्निहोत्रिणः काष्ठे मंथनदंडेनाग्निमिव कवय इंद्रियेषु यस्य तव स्वरूपं ज्ञातुमिच्छंति तस्मै ते नमः ॥३६॥ विषयेंद्रियादीनि मायाकार्याणि दृश्यत्वादित्यादिलक्षणरूपैः साधनैर्यस्य तव स्वरूपं ज्ञानिभिर्वस्तुत्वेन ज्ञायते तस्मै तुभ्यं नमः ॥३७॥ यथा लोहचुंबकसांनिध्येन लोहं भ्रमते तथा यस्य तव सांनिध्येन माया जगदुत्पत्तिस्थितिसंहारान् करोति तस्मै गुणकर्मसाक्षिणे तुभ्यं नमः ॥ ३८ ॥ किंच । युद्धे हिरण्याक्षं हत्वा मां च दंष्ट्राग्रे धृत्वा यो रसातलादूर्ध्वं निरगात्तं वराहमहं प्रणमामि ॥३९॥ इति श्रीमद्भागवतचूर्णिकायां पंचमस्कंधे अष्टादशोऽध्यायः ॥१८॥ ॥ ऊनविंशे किंपुरुषे भारते चोपवर्ण्यते । सेव्यसेवकभावश्च भारतश्रैष्ठ्यमेव च ॥ १ ॥ श्रीशुक उवाच ॥ किंपुरुषे वर्षे भगवान् रामचंद्ररूपेणास्ते तं परमभागवतो हनुमान् किंपुरुषैः सहैकांतभक्त्योपास्ते ॥ १ ॥ ॥

किंच । गंधर्वैर्गीयमानां श्रीरामकथां श्रृणोति स्वयं चेदं गायति ॥२॥ ॐनमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम इत्यादिमंत्रं जपति॥३॥स्तौति च ॥ हे राम, एकं वेदांतेषु प्रसिद्धं परमं शुद्धं अनुभवरूपं शांतं निरहंकारं त्वामहं शरणागतोऽस्मि ॥४॥ भगवतो मनुष्यावतारस्तु केवलं रावणवधायैव न जातः । किं तु इह संसारे स्त्रीसंगादिकृतं दुःखं दुर्वारमिति मनुष्याणां शिक्षणार्थं च जातः ॥५॥ स भगवान् रामस्त्रिलोक्यां क्वापि न सक्तः। यतो ज्ञानिनामात्मा सुहृत्तमश्च । अतः स्त्रीकृतं मोहं न प्राप्नुयात् लक्ष्मणं च त्यक्तुं नार्हति ॥६ ॥ सत्कुले जन्म सौंदर्यं वक्तृत्वं बुद्धिश्च तस्य श्रीरामस्य संतोषाय न भवति । यतस्तैर्हीनानपि नो वनचरान् लक्ष्मणे बंधौ सत्यपि स रामः सखित्वे कृतवान् ॥७॥ यः अयोध्यावासिनो जनान् स्वर्गं निनाय । तं मनुष्याकृतिं रामं

आर्ष्टिषेणेन सह गंधर्वैरनुनीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपश्रृणोति स्वयं चेदं गायति॥२॥ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥३॥ यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थम् ॥ प्रत्यक् प्रशांतं सुधियोपलंभनं ह्यनामरूपं निरहं प्रपद्ये ॥४॥ मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ॥ कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य ॥५॥ न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान्वासुदेवः ॥ न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ॥६॥ न जन्म नूनं महतो न सौभगं न वाङ्न बुद्धिर्नाकृतिस्तोषहेतुः ॥ तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥७॥ सुरोऽसुरो वाप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ॥ भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोशलान्दिवमिति ॥८॥ भारतेऽपि वर्षे भगवान्नरनारायणाख्य आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपया तपोऽव्यक्तगतिश्चरति ॥९॥ तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति॥१०॥ ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इति ॥११॥ गायति चेदम् ॥ कर्ताऽस्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः ॥ द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥ इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ॥ यदंतकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः ॥ १३ ॥

देवो दैत्यः मनुष्यः पक्ष्यादिश्चापि सर्वात्मना भजेतेति ॥ ८ ॥ तथा भारतेऽपि खंडे नरनारायणाख्यो भगवान् कल्पपर्यंतमात्मवतामनुग्रहायात्मानुभवसाधकं तपश्चरन्नास्ते ॥९॥ तं भगवान्नारदो वर्णाश्रमवतीभिर्भरतखडे स्थिताभिः प्रजाभिः सह परमभक्तिभावेन सेवते॥१०॥ ॐ नमो भगवते उपशमशीलाय निरहंकाराय नम इत्यादिमंत्रं जपति ॥११॥ स्तौति च ॥ यो विश्वस्य सर्गादिकर्तापि कर्ताहमिति न मन्यते । यो देहगतोऽपि देहधर्मैः क्षुधादिभिर्न पीड्यते तस्मै नमः ॥१२॥ हे योगेश्वर, जन्मप्रभृति भक्त्या पुमानंतकाले त्वयि देहाभिमानं त्यक्त्वा मनो धारयेत् । इति यत्तदेव ब्रह्मा योगसाधनस्य नैपुण्यं जगाद॥१३॥

यथा मूर्खोंऽतकाले स्त्रीपुत्रादिप्रपंचनिर्वाहं चिंतयन् दुःखस्थानस्य शरीरस्य नाशशंकां प्राप्नोति तथैव विद्वानपि यदि शंकां प्राप्नुयात्तर्हिं तस्य शास्त्राभ्यासादिना ज्ञानसंपादनयत्नः केवलं श्रम एव स्यात् ॥१४॥ हे प्रभो, त्वयि नः स्वाभाविकं योगं विधेहि । येन योगेन ममतां वयं शीघ्रं त्यजेमेति ॥१५॥ अस्मिन् भारतखंडे बहवः सरिच्छैलाः संति । ते च—मलयः मंगलप्रस्थः मैनाकः त्रिकूटः ऋषभः कूटकः कोल्लकः सह्यः देवगिरिः ऋष्यमूकः श्रीशैलः वेंकटः महेंद्रः वारिधारः विंध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रः द्रोणः चित्रकूटः गोवर्धनः रैवतकः ककुभः नीलः गोकामुखः इंद्रकीलः कामगिरिश्चेति । अन्ये च शतशः सहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्चासंख्याताः संति ॥१६॥ नामभिरेव पुनंतीनां यासां नदीनां जलं भारत्यः प्रजाः स्नानादिना सेवंते ॥१७॥

यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन् ॥ शंकेत विद्वान्कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥ तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहंममतामधोक्षज ॥ भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावमिति ॥१५॥ भारतेऽप्यस्मिन्वर्षे सरिच्छैलाः संति बहवो मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्याताः ॥ १६ ॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चोपस्पृशंति ॥ १७ ॥ चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिंधुरंधः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥ १८ ॥ अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयंते यथावर्णविधानमपवर्गश्चापि भवति ॥ १९ ॥ योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताऽविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषप्रसंगः ॥ २० ॥ ॥

तत्र महानद्यः—चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिंधुः अंधशोणौ नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूः रोधस्वती सप्तवती सुषोमा शतद्रूः चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति ४२ महानद्यः ॥ १८ ॥ अस्मिन् वर्षे जनैः सात्विकराजसतामसर्कमतारतम्येन स्वर्गमानुषनारकगतयोऽनुभूयंते । ब्राह्मणादिवर्णानां संन्यासादिविधानानुसारेण मोक्षश्च भवति ॥ १९ ॥ स मोक्षो यदाऽविद्याग्रंथिच्छेदनद्वारेण भगवद्भक्तसमागमो भवति तदा भवति ॥ २० ॥ ॥ ॥ ॥

स्वर्गे देवा एतद्गायंति । अहो यैर्जनैर्भरतखंडे मनुष्यजन्म लब्धं तैर्जन्मांतरे किं सुकृतं कृतं एषां हरिः स्वयं प्रसन्नो वा जातः॥२१॥ अस्माकं जन्मांतरे कृतैर्यज्ञतपोदानव्रतादिभिस्तुच्छस्वर्गप्राप्त्या च किं फलं न किमपि । यतोऽस्मिन् स्वर्गे विषयासक्त्या नारायणपादस्मृतिर्नास्ति ॥२२॥ कल्पपर्यंतमायुष्यवतां पुनर्भवयुक्तस्वर्गादिस्थानप्राप्तेरपि क्षणायुषां भरतखंडभूमिप्राप्तिः श्रेष्ठा । यतस्ते क्षणात्सर्वं त्यक्त्वा हरेः पदं यांति ॥२३॥ अतो हे सत्पुरुषाः, यत्र विष्णुकथास्तद्भक्ताश्च न संति तादृशोऽयं स्वर्गलोकोऽपि न सेव्यताम् ॥ २४ ॥ भारते मनुष्यजन्म प्राप्य ये मोक्षाय न यतेरन् ते बंधनं यांति ॥२५॥ अहो भारतवासिनां भाग्यम् । यैर्यज्ञे इंद्रादिपृथङ्नामभिराहूतो हरिः स्वयं पूर्णोऽपि भागं गृह्णाति ॥२६॥ किंच । निष्कामभक्तानां तु इच्छानिवर्तकं कामपरिपूरकं च स्वपादपद्मं

एतदेव हि देवा गायंति ॥ अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ॥ यैर्जन्म लब्धं नृषु भारताजिरे मुकुंदसेवौपयिकं स्पृहा हि नः ॥ २१ ॥ किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ॥ न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टाऽतिशयेंद्रियोत्सवात् ॥ २२ ॥ कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरम् ॥ क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयांत्यभयं पदं हरेः ॥ २३ ॥ न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ॥ न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ २४ ॥ प्राप्ता नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृताम् ॥ न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनम् ॥ २५ ॥ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमंत्रवस्तुतः ॥ एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः ॥ स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥ २७ ॥ यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ॥ तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥ श्रीशुक उवाच ॥ जंबूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशंति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥ तद्यथा स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो रमणको मंदरहरिणः पांचजन्यः सिंहलो लंकेति ॥ ३० ॥ एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ ३१ ॥ इति श्रीम० महापुराणे जंबूद्वीपवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

॥ श्रीशुक उवाच ॥ अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ॥ १ ॥ ॥

स्वयमेव ददाति ॥२७॥ अतोऽस्माकं स्वर्गसुखावशेषितं पुण्यं चेत्तर्हि तेन नो भारतखंडे हरिरेव सेव्य इत्यनुसंधानयुक्तं जन्मास्तु । यत्र हरिर्भजतां सुखं तनोति ॥२८॥ श्रीशुक उवाच ॥ हे राजन् । जंबुद्वीपस्याष्टावुपद्वीपाः सगरपुत्रैरश्वान्वेषण इमां पृथ्वीं परितः खनद्भिः परिकल्पिताः संति ॥ २९ ॥ ते यथा—स्वर्णप्रस्थः चंद्रशुक्लः आवर्तनः रमणकः मंदरहरिणः पांचजन्यः सिंहलः लंका चेति ॥३०॥ हे नृप, एवं तव जंबूद्वीपवर्षविभागो यथोपदेशं वर्णितः ॥ ३१ ॥ इति श्रीमद्भागवतचूर्णिकायां पंचमस्कंधे एकोनविंशोऽध्यायः ॥ १९ ॥ विंशे प्लक्षादिषड्द्वीपस्थितिमाह सहार्णवैः । लोकालोकस्थितिश्चांतर्बहिर्भागा-

दिमानतः ॥१॥ श्रीशुक उवाच ॥ अतः परं प्लक्षादिद्वीपानां प्रमाणलक्षणरचनाभिर्वर्षविभागो वर्ण्यते ॥१॥ अयं जंबुद्वीपो लक्षयोजनपरिमाणः तावता क्षारसमुद्रेण वेष्टितः। एवं पूर्वस्मात्पूर्वस्मादुत्तरोत्तरा द्वीपाः समुद्राश्च द्विगुणा ज्ञेयाः। अतः परं द्विलक्षयोजनपरिमितः प्लक्षद्वीपः तावन्मानेनेक्षुरससमुद्रेण वेष्टितः। तत्रापि द्वीपनामकरो जंबूवृक्षप्रमाणः प्लक्षवृक्षोऽस्ति तत्र सप्तजिह्वोऽग्निस्तिष्ठति। तद्वीपाधिपतिः प्रियव्रतपुत्र इध्मजिह्वः। स स्वद्वीपखंडानि सप्तधा विभज्य खंडनामभ्यः पुत्रेभ्यो ददौ। स्वयं चात्मयोगेनोपरराम ॥२॥ खंडपुत्रनामानि—शिवं यवयसं सुभद्रं शांतं क्षेमं अमृतं अभयं चेति सप्त खंडानि। तेषु गिरयो नद्यश्च सप्तैव ॥ ३ ॥ मणिकूटो वज्रकूट इंद्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमालश्चेति सप्त गिरयः। अरुणा नृम्णा आंगिरसी सावित्री सुप्रभाता

जंबूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जंब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जंबूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राऽग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥२॥ शिवं यवयसं सुभद्रं शांतं क्षेमममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ॥३॥ मणिकूटो वज्रकूट इंद्रसेनो ज्योतिष्मान्सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः ॥ अरुणा नृम्णांगिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरा इति महानद्यः ॥ यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते ॥४॥ प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः ॥ अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥५॥ प्लक्षादिषु पंचसु पुरुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते ॥६॥ प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृंक्ते ॥७॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छंदःस्तुतः पतत्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥८॥ तद्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत्सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥ ९ ॥ तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शतशृंगो वामदेवः कुंदो मुकुंदः पुष्पवर्षः सहस्रश्रुतिरिति अनुमतिः सिनीवाली सरस्वती कुहू रजनी नंदा राकेति ॥ १० ॥ ॥

ऋतंभरा सत्यंभरा चेति सप्त नद्यः। यासां जलस्पर्शेन क्षालितरजस्तमसो हंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रवर्षायुषस्ते वेदत्रयीरूपया विद्यया सूर्यरूपं हरिं भजंते ॥४॥ प्रत्नस्य विष्णो रूपं च सत्यस्येत्यादिमंत्रं जपंति ॥५॥ प्लक्षादिपंचद्वीपेषु पुरुषाणां सर्वेषामौत्पत्तिकी सिद्धिर्वर्तते ॥६॥ अतः परं शाल्मलो द्वीपश्चतुर्लक्षयोजनविशालः तावन्मानेन सुरोदेन वेष्टितः ॥७॥ यत्र शाल्मलीवृक्षोऽस्ति स द्वीपनामकरः। यस्मिन् वृक्षे गरुडस्य गृहमाहुः ॥८॥ तद्वीपपतिः प्रियव्रतपुत्रो यज्ञबाहुः स्वं द्वीपं सप्तधा कृत्वा पुत्रेभ्यो ददौ। खंडपुत्रनामानि—सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रं आप्यायनं अविज्ञातमिति ॥९॥ तत्र सप्त पर्वताः—स्वरसः

शतश्रृंगः वामदेवः कुंदः कुमुदः पुष्पवर्णः सहस्रश्रुतिरिति । नद्यश्च सप्त— अनुमतिः सिनीवाली सरस्वती कुहू रजनी नंदा राका चेति ॥ १० ॥ तद्वर्षपुरुषाः—श्रुतधरवीर्यधरवसुंधरेषंधरसंज्ञा भगवंतं सोमं वेदेन यजंते ॥ ११ ॥ इदं जपंति ॥ स्वकिरणैः कृष्णशुक्लपक्षयोः पितृदेवेभ्योऽन्नसंपादकः सोमो नो राजास्तु ॥१२॥ ततः सुरोदाद्बहिः कुशद्वीपोऽष्टलक्षयोजनस्तावता घृतसमुद्रेण वेष्टितः । तत्र द्वीपनामकरः कुशस्तंबोऽस्ति ॥१३॥ तत्र द्वीपपतिः प्रियव्रतपुत्रो हिरण्यरेताः स्वं द्वीपं सप्तधा कृत्वा पुत्रेभ्यो दत्वा स्वयं तप आतिष्ठत् । खंडपुत्रनामानि—वसुः वसुदानः दृढरुचिः नाभिगुप्तः स्तुत्यव्रतः विविक्तः वामदेव इति ॥१४॥ तत्र सीमागिरयः सप्त—चक्रः चतुःश्रृंगः कपिलः चित्रकूटः देवानीकः ऊर्ध्वरोमा द्रविणश्चेति । सप्त महानद्यश्च— रसकुल्या मधुकुल्या मित्रविंदा

तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरेषंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते॥११॥ स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः ॥ प्रजानां सर्वासां राजांधः सोमो न अस्त्विति ॥ १२ ॥ एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीपो यस्मिन्कुशस्तंबो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति॥१३॥तद्द्वीपपतिः प्रैयव्रतो राजन्हिरण्यरेतो नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः ॥१४॥ तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव चक्रश्चतुःश्रृंगः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मित्रविंदा श्रुतविंदा देवगर्भा घृतच्युता मंत्रमालेति ॥१५॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवंतं जातवेदसरूपिणं कर्मकौशलेन यजंते ॥१६॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् ॥ देवानां पुरुषांगानां यज्ञेन पुरुषं यजेति॥१७॥तथा घृतोदाद्बहिः क्रौंचद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौंचो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते॥ १८ ॥ योऽसौ गुहप्रहरणोन्मथितनितंबकुंजोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥१९॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान्वर्षपान्निवेश्य स्वयं भगवान्भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥२०॥ आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्धमानो भोजन उपबर्हिणो नंदो नंदनः सर्वतोभद्र इति अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति ॥ २१ ॥ ॥

श्रुतविंदा देवगर्भा घृतच्युता मंत्रमालेति ॥१५॥ तत्र कुशलकोविदाभियुक्त कुलकसंज्ञाश्चत्वारो वर्णास्तेऽग्निरूपं देवं यजंते ॥१६॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसीति मंत्रं जपंति ॥१७॥ ततो घृतोदाद्बहिः षोडशलक्षयोजनः क्रौंचद्वीपस्तावता क्षीरसमुद्रेण वेष्टितः । यत्र द्वीपनामकरः क्रौंचपर्वतोऽस्ति ॥१८॥ यः क्रौंचः स्कंदस्यायुधेन पीडितोऽपि क्षीरसमुद्रेण सिच्यमानो वरुणेन रक्षितो निर्भयो बभूव॥१९॥तद्द्वीपेऽपि प्रियव्रतपुत्रो घृतपृष्ठः स्वं द्वीपं सप्तधा विभज्य पुत्रेभ्यो दत्वा स्वयं हरेश्चरणारविंदं शरणं जगाम॥२०॥तत्खंडपुत्रनामानि— आमः मधुरुहः मेघपृष्ठः सुधामा भ्राजिष्ठः वनस्पतिः लोहितार्ण इति । तत्र सीमागिरयः सप्त— शुक्लः

वर्धमानः भोजनः उपबर्हिणः नंदः नंदनः सर्वतोभद्र इति । तत्र सप्त नद्यः— अभया अमृतौघा आर्यका तीर्थवती रूपवती पवित्रवती शुक्लेति ॥२१॥ तत्र पुरुषऋषभद्रविणदेवकसंज्ञाश्चत्वारो वर्णास्ते च सदा वरुणं देवमद्भिः पूर्णेनांजलिना यजंते ॥२२॥ आपः पुरुषवीर्याः स्थेत्यादिमंत्रं जपंति ॥ २३ ॥ ततः क्षीरोदाद्बहिः शाकद्वीपः स द्वात्रिंशल्लक्षयोजनः तावन्मानेन दधिसमुद्रेण वेष्टितः । यत्र द्वीपनामकरः शाकवृक्षोऽस्ति ॥ २४ ॥ तत्रापि प्रियव्रतपुत्रो मेधातिथिः स्वं द्वीपं सप्तधा कृत्वा द्वीपनामभ्यः पुत्रेभ्यो ददौ । ते च—पुरोजवः मनोजवः पवमानः धूम्रानीकः चित्ररेफः बहुरूपः विश्वधार इति॥२५॥ तत्र सप्त सीमा-

यासामंभः पवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते ॥ २२ ॥ आपः पुरुषवीर्याः स्थ पुनंतीर्भूर्भुवःसुवः ॥ ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥ २३ ॥ एवं पुरस्तात्क्षीरोदात्परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमंडोदेन परीतो यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगंधस्तं द्वीपमनुवासयति ॥ २४ ॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान्पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाय्याधिपतीन्स्वयं भगवत्यनंत आवेशितमतिस्तपोवनं प्रविवेश ॥ २५ ॥ एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृंगो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति अनघायुर्दा उभयसृष्टिरपराजिता पंचपदी सहस्रस्रुतिर्निजधृतिरिति ॥ २६ ॥ तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणायामविधुतरजस्तमसः परमसमाधिना यजंते ॥ २७ ॥ अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ॥ अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटम् ॥ २८ ॥ एवमेव दधिमंडोदात्परतः पुष्करद्वीपस्ततो द्विगुणायामः समंतत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम् ॥ २९ ॥ तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिंद्रादीनां यदुपरिष्टात्सूर्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ३० ॥ तद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते ॥ ३१ ॥ ॥ ॥

पर्वताः— ईशानः उरुशृंगः बलभद्रः शतकेसरः सहस्रस्रोतः देवपालः महानस इति । तथा सप्त नद्यः—अनघा आयुर्दा उभयसृष्टिः अपराजिता पंचपदी सहस्रस्रुतिः निजधृतिरिति ॥२६॥ तद्वर्षे ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानश्चत्वारो वर्णास्ते वाय्वात्मकं भगवंतं समाधिना यजंते ॥२७॥ अंतः प्रविश्य भूतानीत्यादिमंत्रं जपंति॥२८॥ ततो दधिसमुद्राद्बहिःपुष्करद्वीपश्चतुःषष्टिलक्षयोजनः तावता स्वादुसमुद्रेण परिवृतः । तत्रैकं महत्कमलं ब्रह्मण आसनं कल्पितम् ॥२९॥ तद्द्वीपमध्ये मानसोत्तरनामैकः पर्वतो दशसहस्रयोजनोच्चः । यत्र चतसृषु दिक्ष्विंद्रादीनां चतस्रः पुर्यः संति । तदुपरि सूर्यरथचक्रं भ्रमति ॥३०॥ तद्द्वीपपतिः प्रियव्रतपुत्रो वी-

तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेन कर्मणाऽऽराधयंतीदं चोदाहरंति ॥ ३२ ॥ यत्तत्कर्ममयं लिंगं ब्रह्मलिंगं जनोऽर्चयेत् ॥ एकांतमद्वयं शांतं तस्मै भगवते नम इति ॥ ३३ ॥ ऋषिरुवाच ॥ ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरंतराले परित उपक्षिप्तः ॥ ३४ ॥ यावन्मानसोत्तरमेर्वोरंतरं तावती भूमिः कांचन्यन्याऽऽदर्शतलोपमा यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते तस्मात्सर्वसत्वपरिहृताऽऽसीत् ॥ ३५ ॥ लोकालोक इति समाख्या यदनेनाचलेन लोकालोकस्यांतर्वर्तिनावस्थाप्यते ॥ ३६ ॥ स लोकत्रयांते परित ईश्वरेण विहितो यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनास्त्रींल्लोँकानावितन्वाना न कदाचित्पराचीना भवितुमुत्सहंते तावदुन्नहनायामः ॥ ३७ ॥ एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिंतितः कविभिः स तु पंचाशत्कोटिश्च गणितस्य भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ॥ ३८ ॥ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥३९॥ तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान्परममहापुरुषो महाविभूतिपतिरंतर्याम्यात्मनो विशुद्धसत्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदंडैः संधारयमाणस्तस्मिन्गिरिवरे समंतात्सकललोकस्वस्तय आस्ते ॥ ४० ॥ आकल्पमेवं वेषं गत एष भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीथायेत्यर्थः ॥ ४१ ॥ योंऽतर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरंति ॥ ४२ ॥ ॥ ॥ ॥

तिहोत्रः स्वद्वीपं द्विधा विभज्य रमणकधातकिनामभ्यां पुत्राभ्यां ददौ । स्वयं च भगवत्कर्मशील आस्ते स्म ॥ ३१ ॥ तद्वर्षपुरुषाः कमलासनमूर्तिं देवं यजंते ॥ ३२ ॥ यत्तत्कर्ममयं लिंगमित्यादिमंत्र जपंति ॥ ३३ ॥ श्रीशुक उवाच ॥ ततः शुद्धसमुद्राद्बहिर्लोकालोकनामा पर्वतोऽस्ति ॥३४॥ यावन्मानसमेर्वोरंतरं १५७५०००० सार्धसप्तलक्षोत्तरं सार्धकोटिपरिमितं तावती भूमिः शुद्धोदात्परास्ति तत्र प्राणिनोऽपि संति । तत आदर्शतलोपमा कांचनी भूः ८३९००००० एकोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमिता प्राणिवर्जिताऽस्ति । तस्यां निक्षिप्तः पदार्थः पुनर्न प्राप्यते ॥ ३५ ॥ एकत्र लोकमयः प्रदेशः एकत्रालोकमयः प्रदेशः तयोर्मध्यवर्ती पर्वतो लोकालोकपर्वतः ॥३६॥ स लोकत्रयस्य मर्यादारूप ईश्वरेण निर्मितः । तेन प्रतिबंधकेन सूर्यादिज्योतिर्गणानां किरणाः परतो गंतुं न शक्नुवंति तावान् ध्रुवपदादप्युच्छ्रितोऽस्ति ॥३७॥ स च मेरोरेकतः सार्धद्वादशकोटियोजनमितोऽन्यतश्च तावान् ॥ ३८ ॥ तदुपरि चतसृषु दिक्षु दिग्गजा—ऋषभः पुष्करचूडो वामनोऽपराजित इति । एते लोकस्थितिहेतवः संति ॥ ३९ ॥ तस्मिन् लोकालोकपर्वते तेषां दिग्गाजानामिंद्रादीनां च विविधसामर्थ्यवृद्धये लोककल्याणार्थं च भगवान् धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्धियुक्तो विष्वक्सेनादिपार्षदैः सह शंखचक्राद्यायुधधरः ॥ ४० ॥ कल्पपर्यंतमेवं वेषं धृत्वा लोकरक्षणार्थं तिष्ठति ॥ ४१ ॥ एतेन लोकालोकपर्वतादंतर्मेरुपर्यंतं सार्धद्वादशकोटियोजनकथनेन लोकालोकाद्बहिर्बृहत्कटाहपर्यंतमलोकपरिमाणं च कथि

तं स्यात् । ततः परतो योगेश्वराणां विशुद्धां गतिं द्विजपुत्रानयनेऽर्जुनस्य श्रीकृष्णेन दर्शितां कथयंति ॥४२॥ अंडमध्यगतः सूर्योऽस्ति । स द्यावाभूम्योर्मध्यस्थानम् । सूर्यांडगोलयोर्मध्ये सर्वतः पंचविंशतिकोटियोजनानि संति ॥ ४३॥ एष सूर्योंऽडेऽचेतने सति वैराजरूपेणांतःप्रविष्टः । अतोऽस्य मार्तंड इति नाम पतितम् ॥४४॥ सूर्येणैव दिशः आकाशं द्यौर्मही भोगमोक्षौ नरकाः पातालादयश्च विभज्यंते ॥ ४५ ॥ देवतिर्यङ्मनुष्याणां सर्वजीवानां सूर्य आत्मा नेत्राधिष्ठाता च ॥४६॥ इति श्रीमद्भागवतचू० पंच० भुवनकोशे विंशोऽध्यायः ॥ २० ॥ एवमध्यायविंशत्या भूमर्यादा निरूपिता । अतः परं द्युमर्यादापालनं त्रिभिरुच्यते ॥१॥ एकविंशे रवेः कालचक्रेण भ्रमतोऽन्वहम् । स्वगत्या राशिसंचारैर्लोकयात्रा निरूप्यते ॥२॥ श्रीशुक उवाच ॥ हे नृप, तव भूगोलप्रमाणं क-

अंडमध्यगतः सूर्यो द्यावाभूम्योर्यदंतरम् ॥ सूर्यांडगोलयोर्मध्ये कोट्यः स्युः पंचविंशतिः॥४३॥मृतेंऽड एष एतस्मिन्यदभूत्ततो मार्तंड इति व्यपदेशः ॥ हिरण्यगर्भ इति यद्धिरण्यांडसमुद्भवः ॥४४॥सूर्येण हि विभज्यंते दिशः खं द्यौर्मही भिदा॥ स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥४५॥ देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधाम् ॥ सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥४६॥ इति श्रीम० म० पंचम० भुवनकोशवर्णने समुद्रवर्षसंनिवेशपरिमाणलक्षणो विंशतितमोऽध्यायः॥२०॥ ॥ श्रीशुक उवाच ॥ एतावानेव भूवलयस्य संनिवेशः प्रमाणलक्षणतो व्याख्यातः ॥१॥ एतेन हि दिवो मंडलमानं तद्विद उपदिशंति यथा द्विदलयोर्निष्पावादीनां ते अंतरेणांतरिक्षं तदुभयसंधितम् ॥२॥ यन्मध्यगतो भगवांस्तपतांपतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥३॥ यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवंति यदा वृषभादिषु पंचसु च राशिषु चरति तदाहान्येव वर्धंते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ॥४॥ यदा वृश्चिकादिषु पंचसु वर्तते तदाहोरात्राणि विपर्ययाणि भवंति॥५॥ यावद्दक्षिणायनमहानि वर्धंते यावदुदगयनं रात्रयः ॥६॥ एवं नवकोटय एकपंचाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्तनस्योपदिशंति तस्मिन्नैंद्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥ ७ ॥

थितम् ॥ १ ॥ एतेनैव दिवो मंडलप्रमाणं ज्ञानिनः कथयंति । यथा निष्पावादीनां द्वयोर्दलयोर्मध्य एकस्य मानकथनेनापरस्य मानं कथितं भवति तद्वत् । द्यावाभूम्योर्मध्यतोंऽतरिक्षमस्ति ॥२॥ ब्रह्मांडमध्यगतः सूर्यस्त्रिलोकीं प्रकाशयति तपति च । स चोदगयनदक्षिणायनविषुवसंज्ञाभिर्मांद्यशैघ्र्यसमगतिभिरुच्चनीचसमस्थानेषु प्राप्तः सन् मकरादिराशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥३॥ यदा मेषतुलयोर्वर्तते तदा दिनरात्रयः समाना भवंति । यदा वृषभादिषु पंचराशिषु चरति तदा दिनानि वर्धंते मासि मासि रात्रिष्वेकैका घटिका ह्रसति च ॥ ४ ॥ यदा वृश्चिकादिषु पंचराशिषु भ्रमति तदा दिनानि न्यूनानि रात्रयोऽधिकाश्च भवंति ॥५॥ उत्तरायणे दिनानि वर्धंते दक्षिणायने रात्रयः ॥ ६ ॥ एवं मेरोः परितो मानसोत्तरपर्वते सूर्यप्रदक्षिणाप्रमाणं नवकोटय

एकपंचाशल्लक्षयोजनानि ज्ञानिनः कथयंति। किंच। मेरोः पूर्वतो मानसोत्तरपर्वते देवधानी नामेंद्रस्य पुरी वर्तते। दक्षिणतः संयमनी नाम यमपुरी। पश्चिमे निम्लोचनी नाम वरुणपुरी। उत्तरे विभावरीनाम कुबेरपुरी। तासु पुरीषु क्रमेणोदयमध्याह्नास्तमयनिशीथानि कथयंति ॥७॥ मेरुस्थितजनानां तु सदैव मध्याह्नः। किंच। नक्षत्राभिमुखतया सूर्यः स्वगत्या मेरुं वामतः कुर्वन्नपि चक्रगतिवशात्प्रत्यहं दक्षिणतः करोति ॥८॥ यत्रोदेति तस्य समसूत्रनिपातेऽस्तं याति। यत्र मध्याह्नः करोति तत्समानसूत्रनिपातेऽर्धरात्रं करोति ॥९॥ यदेंद्रपुर्याः प्रचलति सूर्यः तदा पंचदशघटिकाभिः संयमनीं २३७७५००० कोटिद्वयं सप्तत्रिंशल्लक्षाणि पंचसप्ततिसहस्राणि च योजनानि याति ॥१०॥ एवं वारुणीं सौम्यां पुनरैंद्रीं च। तथान्ये च चंद्रादिग्रहा नक्षत्रैः सह ज्योतिश्चक्रे उद्यंत्यस्तं यांति

तत्रत्यानां दिवसमध्यंगत एव सदादित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥८॥ यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्यंदेनाभितपति तस्य हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यंति ये तं समनुपश्येरन् ॥९॥ यदा चैंद्र्याः पुर्याः प्रचलते पंचदशघटिकाभिर्याभ्यां सपादकोटिद्वयं योजनानां सार्धद्वादश लक्षाणि साधिकानि चोपयाति ॥ १० ॥ एवं ततो वारुणीं सौम्यामैंद्रीं च पुनस्तथान्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यंति सह वा निम्लोचंति॥११॥ एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु ॥ १२ ॥ यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि संवत्सरात्मकं समामनंति तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयंत्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति ॥१३॥ तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन संमितस्तैलयंत्राक्षवद्ध्रुवे कृतोपरिभागः ॥१४॥ रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान्रविरथयुगो यत्र हयाश्छंदोनामानः सप्तारुणयोजिता वहंति देवमादित्यम् ॥१५॥ पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते ॥१६॥ तथा वालखिल्या ऋषयोंऽगुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवंति॥१७॥ तथान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवंतं सूर्यमात्मानं नानानामानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वंद्वश उपासते ॥१८॥

च॥११॥एवं सूर्यरथो मुहूर्तेन ३४००८०० अष्टशताधिकचतुस्त्रिंशल्लक्षयोजनानि चतसृषु पुरीषु भ्रमते॥१२॥ यस्यैकं चक्रं संवत्सरात्मकं कथयंति। तस्य रथस्याक्षो मेरोर्मूर्धनि कृतोत्तरभागो मानसोत्तरे कृतेतरभागः। यत्र प्रोतं रविरथचक्रं तैलयंत्रवन्मानसोत्तरगिरौ परिभ्रमति॥१३॥ तस्मिन्नक्षे कृतमूलो द्वितीयोक्षः स ३९३७५०० सार्धसप्तत्रिंशत्सहस्राधिकोनचत्वारिंशल्लक्षयोजनसंमितस्तैलयंत्राक्षवत् ध्रुवे कृतोपरिभागोऽस्ति ॥१४॥ रथोपवेशस्थानं तु षट्त्रिंशल्लक्षयोजनदीर्घं नवलक्षयोजनविशालं चास्ति। सूर्यरथयुगश्च नवलक्षयोजनविशालोऽस्ति। यत्रारुणयोजिताश्छंदोनामानः सप्त हयाः सूर्यं वहंति ॥१५॥ यत्र रथे सूर्यपुरतोऽरुणः सारथिः सूर्याभिमुख आस्ते ॥१६॥ तथांगुष्ठपर्वमात्रा वालखिल्या ऋषयः षष्टिसहस्राणि पुरतः सूर्यं स्तुवंति॥ १७॥ तथान्ये मुनिगंधर्वाप्सरसो नागा यक्षरा-

---

१ एतत्संख्याकथनं केनाभिप्रायेण तन्न ज्ञायते। वस्तुतस्तु मुहूर्ते ३१७०००० सप्ततिसहस्राधिकैकत्रिंशल्लक्षयोजनानि संगच्छंते।

क्षसदेवाः सप्त गणा मासि मासि सूर्यमुपासते ॥१८॥ एवं ९५१०००००० एकपंचाशल्लक्षाधिकनवकोटियोजनभूमंडलस्य क्षणेन[1] स सूर्यो २०००$\frac{१}{२}$ द्विक्रोशाधिकद्विसहस्रयोजनानि भुंक्ते ॥१९॥ इति श्रीमद्भागवतचूर्णिकायां पंच०एकविंशोऽध्यायः॥२१॥द्वाविंशे सोमशुक्रादेः स्थानमाहोत्तरोत्तरम् । तत्तद्गत्यनुसारेण इष्टानिष्टे तथा नृणाम् ॥१॥ राजोवाच ॥ हे ब्रह्मन्, यदेतद्भगवतः सूर्यस्य मेरुं ध्रुवं च प्रदक्षिणं परिगच्छतो राशीनां संमुखमप्रदक्षिणं गमनं च वर्णितं तद्द्वयं कथं जानीमः ॥ १ ॥ श्रीशुक उवाच ॥ यथा कुलालचक्रेण भ्रमता सह भ्रमतां पिपीलिकादीनां गतिरन्यैव । एवं कालचक्रेण भ्रमतां तदाश्रयाणां सूर्यादिग्रहाणां

लक्षोत्तरं सार्धनवकोटियोजनपरिमंडलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुंक्ते ॥ १९ ॥ इति श्रीमद्भागवते पंचमस्कंधे ज्योतिश्चक्रसूर्यरथमंडलवर्णनं नामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ राजोवाच ॥ यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहीति ॥ १ ॥ सहोवाच ॥ यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशांतरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रांतरे राश्यंतरे चोपलभ्यमानत्वात् ॥ २ ॥ स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसंतादिषु ऋतुषु यथोपजोषमृतुगुणान्विदधाति ॥ ३ ॥ तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजंतोऽञ्जसा श्रेयः समधिगच्छंति ॥ ४ ॥ अथ स एष आत्मा लोकानां द्यावापृथिव्योरंतरेण नभोवलयस्य कालचक्रगतो द्वादशमासान्भुंक्ते राशिसंज्ञान्संवत्सरावयवान्मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशंति यावता षष्ठमंशं भुंजीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ॥ ५ ॥ अथ च यावतार्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते ॥ ६ ॥ अथ च यावन्नभोमंडलं सह द्यावापृथिव्योर्मंडलाभ्यां कार्त्स्न्येन सह भुंजीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मांद्यशैघ्र्यसमगतिभिः समामनंति ॥ ७ ॥ ॥ ॥

गतिरन्यैव दृश्यते । नक्षत्रांतरे राश्यंतरे च दृष्टत्वात् ॥२॥ स एव भगवान् सूर्यनारायणो वेदरूपो द्वादशधा भूत्वा लोकानां स्वस्तये शीतोष्णादीन् ऋतुगुणान् विदधाति ॥३॥ तं सूर्यं वर्णाश्रमाचारपरा जना वेदोक्तैः कर्मभिः श्रद्धया यजंतः श्रेयांसि प्राप्नुवंति ॥४॥ स च सूर्यो द्यावापृथिवीमध्यस्थकालचक्रगतः सन् मेषादिराशिरूपान् द्वादश मासान् भुंक्ते । तत्र पक्षद्वयं मासश्चांद्रमानेन । सपादमहानक्षत्रद्वयं मासः सौरमानेन । अहोरात्रं मासः पितृमानेनेति कथयंति । यावता राशिद्वयं भुंजीत स ऋतुः ॥५॥ यावतार्धं नभोमंडलं भुंक्ते तदयनं कथ्यते । अयनद्वयं संवत्सरः॥६॥ यावता नभोमंडलं संपूर्णत्वेन भुंजीत तं

---

[1] अयं क्षणः— घटिकाषष्ठांशस्य क्षणस्य १३२$\frac{३}{५}$ न्यूनो भागः कल्प्यः । अन्यथा घटिकाषष्ठांशक्षणेन २६४१६६$\frac{२}{३}$ योजनानि सूर्यस्य गतिः स्यात् ।

कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति वदंति॥७॥ततः सूर्योपरि चंद्रो लक्षयोजनांतरेऽस्ति। स सूर्यस्य संवत्सरभोगं पक्षाभ्यां मासभुक्तिं सपादनक्षत्राभ्यां पक्षभुक्तिं दिनैनेव शीघ्रगमनो भुंक्ते ॥८॥ अथवा पूर्यमाणकलाभिः शुक्लपक्षे देवानां क्षीयमाणाभिः कलाभिः कृष्णपक्षे पितृणां अहोरात्राणि कुर्वन् प्रतिनक्षत्रं षष्टिघटिकाभिर्भुंक्ते ॥९॥ य एष भगवान् चंद्रोऽन्नमयोऽमृतयो देवपितृमनुष्यादीनां रक्षणशीलत्वात्सर्वमय इति वर्णयंति ॥१०॥ तदुपरि त्रिलक्षयोजनांतरे नक्षत्राणि अभिजिता सहाष्टाविंशतिः ॥११॥ तत ऊर्ध्वं द्विलक्षयोजनांतरे शुक्रोऽस्ति सोऽर्कस्याग्रे पश्चात्सहैव वा चरति लोकानां नित्यदानुकूलः।

एवं चंद्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुंक्ते ॥८॥ अथ चापूर्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुंक्ते ॥ ९ ॥ य एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयंति॥१०॥ तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥ ११ ॥ तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदानुकूल एव प्रायेण वर्षयंश्चारेणानुमीयते स वृष्टिविष्टंभग्रहोपशमनः ॥ १२ ॥ उशनसा बुधो व्याख्यातस्तत उपरिष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदार्काद्व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादि भयमाशंसते ॥ १३ ॥ अत ऊर्ध्वमंगारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन्द्वादशानुभुंक्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः ॥ १४ ॥ तत उपरिष्टाद्द्विलक्षयोजनांतरगतो भगवान्बृहस्पतिरेकैकस्मिन्राशौ परिवत्सरं परिवत्सरं चरति यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ १५ ॥ तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशन्मासान्विलंबमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशांतिकरः ॥ १६ ॥ तत उत्तरस्मादृषय एकादशलक्षयोजनांतर उपलभ्यंते य एव लोकानां शमनुभावयंतो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमंति ॥ १७ ॥

स वृष्टिस्तंभनकर्तारं ग्रहं शमयति ॥१२॥ तत ऊर्ध्वं द्विलक्षयोजनांतरे बुधोऽस्ति। स बहुधा लोकानां शुभकृत् सूर्यस्याग्रे पश्चात्सहैव वा चरति। यदा सूर्याद्वियुज्येत तदानावृष्ट्यादिभयं सूचयते ॥१३॥ तत उपरिष्टाद्द्विलक्षयोजनांतरे भौमोऽस्ति स बहुधा लोकानां दुःखदः ॥१४॥ तत ऊर्ध्वं द्विलक्षयोजनांतरे भगवान् बृहस्पतिर्बहुधा ब्राह्मणकुलस्यानुकूलः। स एकस्मिन् राशौ यदि न वक्रस्तर्हि संवत्सरं चरति॥१५॥ ततो द्विलक्षयोजनांतरे शनैश्चरः प्रतिराशौ त्रिंशन्मासान् भुंक्ते। स प्रायः सर्वेषामशांतिकरः ॥१६॥ तत उपर्येकादशलक्षयोजनांतरे सप्तर्षयस्ते लोकानां सुखमिच्छंतो भगवतो विष्णोः श्रेष्ठं ध्रुवाख्यं स्थानं

प्रदक्षिणं गच्छंति ॥ १७ ॥ इति श्रीमद्भागवतचू० पंचमस्कंधे द्वाविंशोऽध्यायः ॥ २२ ॥ त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं ततः । शिशुमारस्वरूपेण हरेश्च स्थितिरुच्यते ॥ १ ॥ श्रीशुक उवाच ॥ अथ ऋषिमंडलादुपरि त्रयोदशलक्षयोजनांतरे विष्णोः श्रेष्ठं ध्रुवस्थानंव दंति । यत्राग्नींद्रादिभः प्रदक्षिणतः क्रियमाणो महाभागवतो ध्रुवोऽस्ति । तत्प्रभावः पूर्वं कथितः । स ॥१॥ चक्रेण भ्राम्यमाणानां ग्रहनक्षत्रादीनामाधारस्तंभ इवाश्रयः ॥२॥ यत्रैते ग्रहनक्षत्रादयः कालचक्रयोजिता वायुना प्रेर्यमाणास्तत्पदं परितो भ्रमंति । यथा नभसि वायुवशा मेघाः पक्षिणश्च भ्रमंति अधो न पतंति । एवं प्रकृतिपुरुषसंयोगरूपेणानुग्रहेण ज्योतिर्गणाः कर्मनिर्मितगतयो भुवि न पतंति ॥३॥ एतज्ज्योतिश्चक्रं शिशुमाराकारस्थित्या भगवतो वासुदेवस्य योगधारणायां स्थितमिति केचिद्वर्णयंति ॥४॥ यस्य शिशुमारस्याधःशिरसः कुंडलीभूतदेहस्य पुच्छाग्रे ध्रुवः । पुच्छाग्रस्याधोभागे प्रजापत्यग्नींद्रधर्माः । पुच्छमूले धाता विधाता च । कट्यां सप्तर्षयः । दक्षिणपार्श्वेऽभिजिदादि चतुर्दश नक्षत्राणि । वामपार्श्वे पुष्यादि चतुर्दश नक्षत्राणि । पृष्ठे त्वंजवीथी उदरे चाकाशगंगा ॥ ५ ॥ पुनर्वसुपुष्यौ दक्षिणवामयोः

इति श्रीम० म० पंच० ज्योतिश्चक्रवर्णने द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ अथ तस्मात्परतस्त्रयोदशलक्षयोजनांतरतो यत्तद्विष्णोः परमं पदमभिवदंति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ॥ १ ॥ स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टंभ ईश्वरेण विहितः शश्वदवभासते ॥२॥ यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मंडलानि चरंत्येवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलंब्य वायुनोदीर्यमाणा आकल्पांतं परिचंक्रमंति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तंते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतंति ॥ ३ ॥ केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति ॥ ४॥ यस्य पुच्छाग्रेऽवाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयंति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुंडलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति पृष्ठे त्वजवीथी आकाशगंगा चोदरतः ॥५॥ पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोर्धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववंक्रिषु युंजीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववंक्रिषु प्रातिलोम्येन प्रयुंजीत शतभिषाज्येष्ठे स्कंधयोर्दक्षिणवामयोर्न्यसेत् ॥ ६ ॥

---

[१] अश्विन्यादिनक्षत्रत्रयेणानुक्रमात्—नागवीथी गजवीथी ऐरावती आर्षभी गोवीथी जरद्गवी अजवीथी मृगवीथी वैश्वानरीति नव वीथय उक्तास्तासु मध्ये सप्तमी अजवीथी ।

कटिप्रदेशयोः । आर्द्राश्लेषे दक्षिणवामयोः पादयोः । अभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोः । श्रवणपूर्वाषाढे दक्षिणवामयोर्नेत्रयोः । धनिष्ठामूले दक्षिणवामयोः कर्णयोः । मघादीन्यष्ट नक्षत्राणि वामपार्श्वास्थिषु । तथैव मृगशीर्षात्पूर्वाणि पूर्वाभाद्रपदापर्यंतानि अष्ट नक्षत्राणि दक्षिणपार्श्वास्थिषु प्रातिलोम्येन प्रयुंजीत । शतभिषाज्येष्ठे दक्षिणवामयोः स्कंधयोः ॥६॥ उत्तराहनावगस्तिः अधराहनौ नक्षत्ररूपो यमः । मुखे मंगलः । उपस्थे शनिः । ककुदि बृहस्पतिः । वक्षसि सूर्यः । हृदये नारायणः । मनसि चंद्रः । नाभ्यां शुक्रः । स्तनयोरश्विनौ । प्राणापानयोर्बुधः । गले राहुः । सर्वांगेषु केतवः । रोमसु सर्वे तारागणाः ॥७॥ एतद्भगवतः सर्वदेवतामयं रूपं प्रतिदिनं संध्यायां मौनयुक्तो निरीक्षन्नुपतिष्ठेत । नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषाय धीमहीति ॥ ८ ॥ एतं शिशुमारस्वरूपं भगवंतं नमस्कारं कुर्वतो वा त्रिकालं स्मरतो वा नरस्य पापं नश्येत् ॥ ९ ॥ इति श्रीमद्भागवतचूर्णिका० पंचमस्कंधे

उत्तरा हनावगस्तिरधराहनौ यमो मुखेषु चांगारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चंद्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः ॥ ७ ॥ एतदुहैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ॥ ८ ॥ ग्रहर्क्षतारामयमाधिदैविकं पापापहं मंत्रकृतां त्रिकालम् ॥ नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापम् ॥ ९ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे शिशुमारसंस्थानवर्णनं नाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ ॥ श्रीशुक उवाच ॥ अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चालभत भगवदनुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हस्तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः ॥ १ ॥ यददस्तरणेर्मंडलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबंधः सूर्याचंद्रमसावभिधावति ॥ २ ॥ तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपरागमिति वदंति लोकाः ॥ ३ ॥ ततोऽधस्तात्सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ॥ ४ ॥ ॥ ॥

त्रयोविंशोऽध्यायः ॥ २३ ॥ एवं त्रिभिर्द्युमर्यादापालनं वर्णितं तथा । अधोभुवनप्रर्यादापालनं त्रिभिरुच्यते ॥ १ ॥ चतुर्विंशे रवेरर्वाक् स्वर्भान्वादिस्थितिः क्रमात् । अतलादिबिलस्वर्गमर्यादाः सप्त वर्णिताः ॥२॥ श्रीशुक उवाच ॥ सूर्यस्याधस्तादयुतयोजनांतरे राहुर्नक्षत्रवत्तिष्ठति । योऽसौ भगवदनुग्रहादमरत्वं ग्रहत्वं च लेभे । तस्य जन्म कर्माणि चाग्रे वक्ष्यामः ॥ १ ॥ सूर्यस्य मंडलं दशसहस्रयोजनमस्ति । चंद्रस्य द्वादशसहस्रमस्ति । राहोस्त्रयोदशसहस्रमस्ति । यः पर्वणि पर्वणि पूर्ववैरेण सूर्यचंद्रौप्रति धावति ॥२॥ तयोः सूर्यचंद्रयोः संरक्षणार्थं भगवत्प्रयुक्तं यत्सुदर्शननामकं चक्रं तस्य तेजसा भीतः सन् निवर्तते तद्ग्रहणमिति लोका वदंति ॥ ३ ॥ ततो राहोरधस्ताद्दशसहस्रयोजनांतरे सिद्धचारणादीनां स्थानानि संति ॥ ४ ॥ ॥ ॥

ततोऽधस्ताद्यक्षरक्षःपिशाचादीनां क्रीडास्थानमंतरिक्षं यावन्मेघा भ्रमंते यावद्वायुस्तीव्रो वाति ॥५॥ ततोऽधः शतयोजनांतरे इयं पृथिवी तदुपरि यावद्धंसश्येनादिपक्षिणो गच्छंति तावद्भूर्लोक एव ॥ ६ ॥ भूमे रचनाविशेषः पूर्वमेव वर्णितः । अथ भूमेरधस्तात्सप्त भूविवराणि संति । तान्येकैकशो दशसहस्रयोजनांतरेणायामविस्तारेण रचितानि । तानि च– अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ॥७॥ एषु बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिः समृद्धगृहोद्यानाक्रीडविहारेषु दैत्यदानवसर्पा नित्यं हर्षिता वसंति ॥ ८ ॥ येषु बिलस्वर्गेषु मायाविना मयेन मणिघटितविचित्रगृह-

ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमंतरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यंते ॥ ५ ॥ ततोऽधस्ताच्छतयोजनांतर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्रिप्रवरा उत्पतंतीति ॥ ६ ॥ उपवर्णितं भूमेर्यथा संनिवेशावस्थानमवनेरप्यधस्तात्सप्त भूमिवरा एकैकशो योजनायुतांतरेणायामविस्तारेणोपक्लृप्ताः अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ॥ ७ ॥ एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसंति ॥८॥ येषु महाराज मयेन मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासति ॥९॥ उद्यानानि चातितरां मनइंद्रियानंदिभिः कुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपविटपिनां लतांगालिंगितानां श्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानां झषकुलोल्लंघनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशयितानि ॥ १० ॥ यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ॥ ११ ॥ यत्र हि महाहिप्रवरशिरोमणयः सर्वं तमः प्रबाधंते ॥ १२ ॥ न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरिति वयोवस्थाश्च भवंति ॥ १३ ॥ नहि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥ १४ ॥ यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवंति पतंति च ॥ १५ ॥ ॥ ॥

प्राकारगोपुरसभादिभिरलंकृता नगर्यः प्रकाशंते ॥ ९ ॥ तथा येषूद्यानानि च पुष्पफलाढ्यवृक्षलतानां शोभाभिः तथा विमलजलपूर्णानां चक्रवाकाद्यनेकपक्षियुक्तानां जलाशयानां शोभाभिश्च देवलोकशोभाया अप्यतिशयितानि शोभंते ॥ १० ॥ यत्राहोरात्रादिविभागैरुत्पत्स्यमानं कालभयं नास्ति । सूर्याद्यभावात् ॥ ११ ॥ यत्र सर्पशिरोमणयः सर्वमंधकारं बाधंते ॥ १२ ॥ यत्र वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधिव्याधिदुर्गंधिश्रमग्लान्यादयो जरादयो वयोऽवस्थाश्च न भवंति ॥१३॥ यत्र मृत्युश्च न भवति विना भगवतः सुदर्शनचक्रात् ॥१४॥ यस्मिन् चक्र प्रविष्टेऽसुरस्त्रीणां गर्भा

अथातले मयपुत्रोऽसुरो बलो निवसति येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयंति यस्य च जृंभमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव ॥ १६ ॥ ततोऽधस्ताद्वितले हरो भगवान्हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूत आस्ते यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयंति ॥ १७ ॥ ततोऽधस्तात्सुतल उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेंद्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा बटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकंपयैव पुनः प्रवेशित इंद्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवंतमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥ १८ ॥ नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यम् ॥१९॥ यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन्पुरुषः कर्मबंधनमंजसा विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभंते ॥ २० ॥ तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतयैव ॥ २१ ॥

स्रवंति[1] पतंति च ॥१५॥ अथातले मयपुत्रो बलो नाम निवसति । येन बलेनास्मिंल्लोके षण्णवतिर्माया निर्मितास्तासां मध्ये काश्चिन्माया[2] अद्यापि मायाविनो धारयंति ॥ यस्य बलस्य जृंभमाणस्य सतो मुखतस्त्रयः स्त्रीगणा उत्पन्नाः । स्वैरिण्यः[3] कामिन्यः[4] पुंश्चल्य[5] इति । ता बिलस्थानं प्रविष्टं पुरुषंप्रति हाटकाख्यं रसं पाययित्वा तं भोगसमर्थं कृत्वा तेन सह विलासादिभिर्यथेच्छं रमंते तं रमयंति च । यस्मिन् हाटकरसे पीते सति पुरुषो दशसहस्रमहागजबलः सन् सिद्धोऽहमीश्वरोऽहमिति मन्यमानो मदांध इव कत्थते ॥१६॥ तस्मादतलादधो दशसहस्रयोजनांतरे वितले स्वगणावृतो हाटकेश्वरो नाम भगवान् शंकरो भवान्या सह मिथुनीभूत आस्ते । तयोर्वीर्यतः प्रवृत्ता हाटकी नाम नदी तिष्ठति । तस्यास्तद्रेतोभूतमुदकं वायुना प्रदीप्तोऽग्निः पिबति । तेन फूत्कृत्य त्यक्तं तद्धाटकाख्यं सुवर्णं भवति । तत्पुरुषाः स्त्रीभिः सह भूषणरूपेण धारयंति ॥१७॥ ततो वितलादधः सुतले पुण्यश्लोको विरोचनपुत्रो बलिः श्रीवामनेन हृतत्रैलोक्योऽपि तत्कृपया शक्रादीनां दुर्लभया सुसमृद्धसंपत्त्या सेवितः सन् स्वधर्मेण हरिमाराधयन् वसति ॥ १८ ॥ वासुदेवे पात्रे प्राप्ते सति दत्तस्य दानस्य मोक्षहेतुत्वादेतत्सुतलैश्वर्यं भूदानस्य फलं न भवति ॥ १९ ॥ यस्य हरेः सकृन्नाम गृणन् पुरुषः कर्मबंधं त्यजति ॥ २० ॥ तस्मिन् भगवति हरौ आत्मतयैव समर्पितस्य भूदानस्येदं फलं नेत्यर्थः ॥ २१ ॥ ॥ ॥ ॥ ॥

---

१ गर्भिण्या गर्भस्य–आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः । २ कपटविद्याः । ३ स्ववर्णे रताः स्वैरिण्यः । ४ कामिन्यस्त्वसवर्णेऽपि । ५ तत्राप्यतिचंचलाः पुंश्चल्यः ।

भगवानमुं बलिं नैवानुगृहीतवान् । यतो भगवत्स्मृतिनाशकमैश्वर्यमेव ददौ ॥२२॥ किंच । भगवता याच्ञाछलेन हृतसर्वार्थो वरुणपाशैर्बद्धः सुतले प्रक्षिप्तोऽपि सन् बलिरुवाच ॥२३॥ अहो यस्य बृहस्पतिः सहायः सोऽपींद्रः पुरुषार्थेषु न निपुणः। यतो बृहस्पतये विचारमपृष्ट्वा वामनद्वारेण मां लोकत्रयं ययाचे। मन्वंतरावसाने कालेन नश्वरमिदं लोकत्रयं कियत् ॥२४॥ अस्मत्पितामहः प्रह्लादो यस्य हरेर्दास्यमेव वव्रे न राज्यम् ॥ २५ ॥ तस्य प्रह्लादस्य मार्गं रागद्वेषादियुक्तो भगवदनुग्रहरहितोऽस्मद्विधः को वा पुमान् गंतुमर्हति ॥ २६ ॥ अथ बलेश्चरितमष्टमस्कंधे विस्तरेण कथयिष्ये । यस्य द्वारि नारायणो गदापाणिः

न वै भगवान्नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति ॥ २२ ॥ यत्तद्भगवतानधिगतान्योपायेन याच्ञाच्छलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च संप्रतिमुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥ २३ ॥ नूनं बतायं भगवानर्थेषु न निष्णातो योऽसाविंद्रो यस्य सचिवो मंत्राय वृत एकांततो बृहस्पतिस्तमतिहाय स्वयमुपेंद्रेणात्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यमतिगंभीरवयसः कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदम् ॥ २४ ॥ यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥ २५ ॥ तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥ २६ ॥ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते यस्य भगवान्स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥ २७ ॥ ततोऽधस्तात्तलातले मयो नाम दानवेंद्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥ २८ ॥ ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवंतः पतत्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति ॥२९॥ ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ॥ ३० ॥ ॥ ॥

स्थितः । येन नारायणेन द्वारि प्रविशन् रावणः पादांगुष्ठेन दशकोटियोजनपर्यंतमुच्चाटितः ॥ २७ ॥ सुतलादधो दशसहस्रयोजनांतरे तलातले मयो नाम दानवेंद्रो महादेवेन रक्षितो गतसुदर्शनभय आस्ते ॥ २८ ॥ ततोऽधो महातले काद्रवेयसर्पाणां क्रोधवशो नाम गणः । ते सर्पाः कुहकतक्षककालियप्रधाना गरुडाद्भीताः क्वचित्प्रमत्ताः संतः स्त्रीपुत्रादिसंगेन विहरंति ॥ २९ ॥ ततोऽधो रसातले दैतेया दानवाः पणयो निवातकवचाः संति । ते च सरमानामयेंद्रदूत्योच्चारिताभिर्मंत्रवर्णाभिर्वाग्भिरिंद्राद्बिभ्यति ॥ ३० ॥ ॥ ॥ ॥ ॥

ततो रसातलादधः पाताले नागाधिपा वासुकिशंखकुलिकश्वेतधनंजयशंखचूडादयो निवसंति । तेषां पंच सप्तदशशतसहस्रशीर्षाणां फणासु स्थिता मणयः पातालांधकारं नाशयंति ॥३१॥ इति श्रीमद्भागवतचू० पंच० चतुर्विंशोऽध्यायः॥२४॥ ॥ पंचविंशे ततोऽधस्तादाह शेषस्य संस्थितिम् । संजिहीर्षोरिदं काले यत्र रुद्रसमुद्भवः ॥१॥ श्रीशुक उवाच ॥ अथ पातालस्य मूलप्रदेशे त्रिंशत्सहस्रयोजनांतरे भगवत्कलाऽनंत आस्ते । चतुर्व्यूहोपासने भक्ता यं संकर्षणमित्याचक्षते ॥१॥ यस्य मूर्धनीदं भूमंडलं सर्षप इव लक्ष्यते ॥२॥ विश्वसंहर्तुर्यस्य भ्रूमध्यतः संकर्षणो नाम रुद्रस्त्रिनेत्रस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ॥ ३ ॥ यस्य

ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवत्तादयो महाभोगिनो महामर्षा निवसंति येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ॥३१॥ इति श्रीमद्भागवते महा० पंच० राह्वादिस्थितिबिलस्वर्गमर्यादानिरूपणं नाम चतुर्विंशतितमोऽध्यायः ॥२४॥ श्रीशुक उवाच ॥ तस्य मूलदेशे त्रिंशद्योजनसहस्रांतर आस्ते या वै कला भगवतस्तामसी समाख्यातानंत इति सात्वती या द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं यं संकर्षणमित्याचक्षते ॥१॥ यस्येदं क्षितिमंडलं भगवतोऽनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥२॥ यस्य ह वा इदं कालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण सांकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ॥ ३ ॥ यस्यांघ्रिकमलयुगलारुणविशदनखमणिषंडमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानि परिस्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ॥ ४ ॥ यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति ॥५॥ स एव भगवाननंतोऽनंतगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ६ ॥ ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककुदिकृतसुभगसुंदरभुजो भगवान्माहेंद्रो वारणेंद्र इव कांचनीं कक्षामुदारलीलो बिभर्ति ॥ ७ ॥ ॥ ॥

चरणकमलनखमंडलमणिषु नमंतो नागपतयः प्रतिबिंबितानि स्ववदनानि विलोकयंति ॥ ४ ॥ किंच । नागराजकुमार्यो यस्य वदनारविंदं सव्रीडं पश्यंति ॥५॥ स भगवाननंतः संहृतक्रोधः सन् लोकानां स्वस्तय आस्ते ॥ ६ ॥ स च देवदैत्यसिद्धगंधर्वादिभिर्ध्यायमान एककुंडलो नवतुलसिकायाः सुगंधमधुरसेन माद्यन्मधुकराणां मधुरगीतेन शोभितां वैजयंतीं स्वां वनमालां बिभर्ति ॥ ७ ॥ ॥ ॥ ॥

य एष ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितं हृदयग्रंथिं शीघ्रं निर्भिनत्ति।तस्यानुभावान् भगवान्नारदस्तुंबुरुणा सह ब्रह्मणः सभायां वर्णयामास ॥८॥ किंच । जगदुत्पत्त्यादिहेतवः सत्वादिगुणा यस्येक्षया स्वस्वकार्ये समर्था आसन् ॥९॥ यस्मिन्निदं कार्यकारणात्मकं जगद्भाति स भक्तानामस्माकं कृपया सत्वमूर्तिं दधार ॥१०॥ पतितेनापि यस्य नाम श्रुतं कीर्तितं च सत्तत्कालं सर्वं पापं हंति। तस्माच्छेषादन्यं मुमुक्षुः कमाश्रयेत् ॥११॥ यस्य मूर्धनि स्थापितो भूगोलोऽणुवत्तिष्ठति ।तस्यामितपराक्रमस्य शेषस्य वीर्याणि सहस्रजिह्वोऽपि को गणयेत् ॥ १२ ॥ एवंप्रभावो भगवान् रसातलस्य मूले स्थितः सन् विश्वपालनाय भूमिं बिभर्ति ॥१३॥ हे राजन्, अस्मिन् भरतखंडे सकामैः पुरुषैः कर्मभिर्निर्मिता एता उच्चावचा गतयस्ते वर्णिताः ॥ १४॥ एतावत्य एव पुंसः प्रवृत्तिलक्षणस्य धर्मस्य गतयः संति । अतः परं तवान्यत् किं कथयामः ॥१५॥ इति श्रीमद्भागवतचू॰ पंच॰ पंचविंशतितमोऽध्यायः ॥२५॥ ॥ षड्विंशे तु ततोऽधस्तान्नरकस्थितिरुच्यते । पापिनो यत्र दह्यंते यमदूतैर्यथायथम् ॥१॥ राजोवाच ॥ हे महर्षे, जीवलोकस्योत्तममध्यमकनिष्ठगतिप्राप्तिरूपमेतद्विचित्रत्वं कथं भवति ॥ १॥ श्रीशुक उवाच ॥ हे नृप, कर्तुस्त्रिगुणात्मकत्वात् श्रद्धया भिन्ना एव कर्मगतयः सर्वा एव सर्वेषां श्रद्धातारतम्येन भवंति ॥२॥ निषिद्धधर्माचरणतः पुंसः कर्मफलं दुःखप्रदं भवति । अतोऽविद्याकृतकामपरिणामलक्षणा नरकाः सहस्रशः प्राप्ता भवंति । तेषु मुख्यान् वर्णयिष्यामः ॥३॥ ॥

य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रंथिं सत्वरजस्तमोमयमंतर्हृदयं गत आशु निर्भिनत्ति तस्यानुभावान्भगवान्स्वायंभुवो नारदः सह तुंबुरुणा सभायां ब्रह्मणः संश्लोकयामास॥८॥ उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन् ॥ यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमु ह वेद तस्य वर्त्म ॥९॥ मूर्तिं नः पुरुकृपया बभार सत्वं संशुद्धं सदसदिदं विभाति यत्र ॥ यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥१०॥ यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा ॥ हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ ११ ॥ मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्वम् ॥ आनंत्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥१२॥ एवं प्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः ॥ मूले रसायाः स्थित आत्मतंत्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥१३॥ एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्म विनिर्मिता यथोपदेशमनुवर्णिताः कामान्कामयमानैः ॥१४॥ एतावतीर्हि राजन्पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयाम इति ॥ १५ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भूविवरविध्युपवर्णनं नाम पंचविंशतितमोऽध्यायः ॥२५॥ राजोवाच ॥ महर्ष एतद्वैचित्र्यं लोकस्य कथमिति ॥ १ ॥ ऋषिरुवाच ॥ त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारम्येन भवंति ॥ २ ॥ अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति याह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ॥ ३ ॥ ॥

हे भगवन्, नरका नाम किंदेशविशेषास्त्रिलोक्या बहिर्वा मध्ये वा संति तत्कथ्यताम् ॥ ४ ॥ श्रीशुक उवाच ॥ जगत्या अंतराल एव दक्षिणस्यां दिशि भूमेरधस्ताज्जलादुपरि नरकाः संति । तस्यामेव दिशि अग्निष्वात्तादयः पितृगणाः स्वानां गोत्रजानामाशिषश्चिंतयमाना निवसंति ॥ ५ ॥ यत्र भगवान् पितृराजो यमो मृतजंतूनां कर्मानुरूपं दंडं करोति ॥६॥ अथ मुख्यानष्टाविंशति नरकान्नामरूपलक्षणतः कथयामि । तामिस्रः अंधतामिस्रः रौरवः महारौरवः कुंभीपाकः कालसूत्रं असिपत्रवनं सूकरमुखं अंधकूपः कृमिभोजनः संदंशः तप्तसूर्मिः वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधः विशसनं लालाभक्षः सारमेयादनं अवीचिः अयःपानं क्षारकर्दमः रक्षोगणभोजनः शूलप्रोतः दंदशूकः अवटनिरोधः पर्यावर्तनः सूचीमुख इत्यष्टाविंशति नरकाः संति ॥ ७ ॥

राजोवाच ॥ नरका नाम भगवन् किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदंतराल इति ॥४॥ ऋषिरुवाच ॥ अंतराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसंति ॥५॥ यत्र ह वाव भगवान्पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथा कर्मावद्यं दोषमेवानुल्लंघितभगवच्छासनः सगणो दमं धारयति ॥६॥ तत्र हैके नरकानेकविंशतिं गणयंति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामस्तामिस्रोंऽधतामिस्रो रौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति ॥ किंच क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दंदशूको ऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशति नरका विविधयातनाभूमयः ॥७॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते अनशनानुदपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये॥८॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादीनुपयुंक्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपदिशंति ॥९॥ यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुडुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १०॥ ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसंति तस्माद्रौरवमित्याहू रुरुरिति सर्पादतिक्रूरसत्वस्यापदेशः॥११॥

तत्र यः परद्रव्याणि पुत्रकलत्राणि चापहरति स दूतैः पाशबद्धस्तामिस्रे नरके निपात्यते । तत्र अभोजनाऽजलपानताडनादिभिर्दुःखं प्रापितो जंतुर्मूर्छां प्राप्नोति ॥८॥ यः पुरुषं वंचयित्वा दारादीनुपभुंक्ते सोंऽधतामिस्रे पतति तत्र यातनायां स्थितो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति ॥ ९ ॥ यस्तु ममेदमहमिति मत्वा भूतद्रोहेण स्वकुटुंबमेव पुष्णाति स रौरवे निपतति ॥ १० ॥ यथा ये तेन हिंसितास्त एव परलोके रुरवो भूत्वा तं खादंति ॥ ११ ॥ ॥

---

१ रुरुरिति सर्पादप्यतिक्रूरप्राणिनो नाम ।

यः केवलं देहंभरः स महारौरवे निपतति । तत्र क्रव्यादा नाम रुरवस्तस्य मांसं खादंति ॥ १२ ॥ यस्तु सजीवान् पशून् पक्षिणो वा पचति तं परलोके यमदूतास्तप्ततैले कुंभीपाकनामके नरके रंधयंति ॥१३॥ यश्च मातापित्रादीनां ब्राह्मणानां च द्रोहं करोति स तप्तताम्रमये समदेशे कालसूत्राख्ये नरके पतति । तत्र क्षुत्पिपासाभ्यां दह्यमानः सन् पशुरोमसंख्यावर्षसहस्राणि निवसति आस्ते शेते चेष्टते परिधावति च ॥१४॥ यस्तु स्ववेदमार्गं त्यक्त्वा पाखंडमार्गमाश्रितस्तं दूता असिपत्रवनं नरकं प्रवेश्य कशया प्रहरंति । तत्रेतस्ततो धावमानोऽसौ उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वांगो हा हतोऽस्मीति वेदनया

एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयंति यः केवलं देहंभरः ॥ १२ ॥ यस्त्विह वा उग्रः पशून्पक्षिणो वा प्राणत उपरंधयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके तप्ततैले उपरंधयंति ॥ १३ ॥ यस्त्विह पितृविप्रब्रह्मध्रुक्स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमंडले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानांतर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावंति पशुरोमाणि तावद्वर्षसहस्राणि ॥ १४ ॥ यस्त्विह वै निजवेदपथादनापद्यपगतः पाखंडं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति तत्र हासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वांगो हा हतोऽस्मीति परमया वेदनया मूर्छितः पदेपदे निपतति स्वधर्महा पाखंडानुगतं फलं भुंक्ते ॥ १५ ॥ यस्त्विह वै राजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखंड आर्तस्वरेण स्वनयन्क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥ १६ ॥ यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रांधकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जंतुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये केचाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः ॥ १७ ॥ यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते ॥ १८ ॥ ॥ ॥

मूर्छितः पदे पदे निपतति । स्वधर्मत्यागी पाखंडमार्गानुगतं फलं भुंक्ते ॥१५॥ यस्तु राजा राजसेवको वा अदंड्ये दंडं ब्राह्मणे वा शरीरदंडं करोति स सूकरमुखे नरके निपतति । तत्रेक्षुदंडवत् निष्पिष्यमाणावयवो मूर्छितो दुःखं प्राप्नोति ॥ १६ ॥ यश्चेश्वरकल्पितवृत्तीनां भूतानां व्यथां करोति सोंऽधकूपे पतति । तत्र तैः पशुपक्षिमृगसर्पवृश्चिकमशकयूकामत्कुणमक्षिकादिभिः पीड्यमानो दुःखं प्राप्नोति ॥ १७ ॥ यस्तु पंचमहायज्ञानकृत्वा भुंक्ते स शतसहस्रयोजने कृमिकुंडे कृमिभूतः कृमिभिर्भक्ष्यमाणः सन् स्वयं कृमिभोजनो भवति ॥ १८ ॥ ॥ ॥ ॥

यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन्यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैस्त्वचि निष्कुषंति ॥ १९ ॥ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयंतस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिंगयंति स्त्रियं च पुरुषरूपया सूर्म्या ॥ २० ॥ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षंति ॥ २१ ॥ ये त्विह वै राजन्या राजपुरुषा वा अपाखंडा धर्मसेतून्भिंदंति ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंतो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यंते ॥ २२ ॥ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरंति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतंति तदेवातिबीभत्सितमश्नंति ॥ २३ ॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तानपि संपरेताँल्लक्ष्यभूतान्यमपुरुषा इषुभिर्विध्यंति ॥ २४ ॥ ये त्विह वै दांभिका दंभयज्ञेषु पशून्विशसंति तानमुष्मिँल्लोके वैशसे नरके पतितान्निरयपतयो यातयित्वा विशसंति ॥२५॥ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः संपाययंति ॥ २६ ॥ ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान्सार्थान्वा विलुंपंति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति ॥ २७ ॥ यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित्स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ २८ ॥ ॥

यस्तु चौर्येण बलात्कारेण वा द्विजस्यान्यस्य वा सुवर्णरत्नादीनि हरति स संदंशे नरके पतति । तत्र तं लोहमयैः संदंशैश्छिंदंति ॥ १९ ॥ यः पुरुषोऽगम्यां स्त्रियं अगम्यं वा पुरुषं योषिदभिगच्छति तौ कशया ताडयंतो यमदूतास्तप्तसूर्मिनामके नरके तप्तलोहमय्यां स्त्रीप्रतिमायां पुरुषं पुरुषप्रतिमायां स्त्रियं चालिंगयंति ॥ २० ॥ यस्तु पश्वादिषु गमनं करोति तं वज्रकंटकशाल्मलीमारोप्य निष्कर्षंति ॥ २१ ॥ ये तु राजन्या राजपुरुषा वा धर्ममार्गान् भिंदंति ते विष्ठामूत्रपूयशोणितकेशनखास्थिमेदोमांसवाहिन्यां वैतरण्यां पतंति ॥ २२ ॥ ये तु शूद्रीपतयो नष्टशौचाचाराः पशुचर्यां चरंति ते । प्रेत्य विण्मूत्रश्लेष्ममलपूर्णसमुद्रे पतंति तदेव खादंति ॥ २३ ॥ ये तु श्वगर्दभपतयो मृगयाविहारा विहितकर्मादन्यत्र मृगान् घ्नंति तांल्लक्ष्यभूतान् यमदूताः प्राणरोधे नरके बाणैर्विंध्यंति ॥ २४ ॥ ये दांभिका दंभयज्ञेषु पशून् घातयंति तान् वैशसनामके नरके पतितान् यमदूता घातयंति ॥ २५ ॥ यस्तु सवर्णां भार्यां द्विजो रेतः पाययति तं लालाभक्षे नरके निपात्य यमदूता रेतः पाययंति ॥ २६ ॥ ये तु चोररूपा अग्निदा विषदा राजानो राजदूता वा ग्रामादीन् लुंपंति तान् सारमेयादने नरके पतितान् वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च ७२० खादंति ॥ २७ ॥ यस्तु साक्ष्ये मिथ्या वदति सोऽवीचिनामके नरके योजनश-

तोच्छ्रिताद्गिरिमस्तकान्निपात्यते । यत्र जलमिव स्थलमश्मपृष्ठं भासते । तत्र तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥२८॥ यो विप्रो राजन्यो वैश्यो वा तद्भार्या वा प्रमादतः सुरां पिबति तानयःपाननामके नरके निपात्य तेषां मुखे वह्निना द्रवीभूतं लोहरसं निषिंचंति ॥ २९ ॥ य आत्मसंभावनेन जन्मतपोविद्यावर्णाश्रमवतः श्रेष्ठान्न बहु मन्यते। स क्षारकर्दमेऽवाक्शिरा निपतति दुरंता यातनाश्च भुंक्ते ॥ ३० ॥ ये पुरुषा इह पुरुषमेधेन भैरवादीन् यजंते याः कामरूपाः स्त्रियो नृपशून् खादंति तान् परलोके तैर्नाशिताः पशवो रक्षोगणा भूत्वा शस्त्रेण छित्वा तद्रक्तं पिबंति नृत्यंति च ॥ ३१ ॥

यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिंचंति ॥२९॥ अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरंता यातना ह्यश्नुते ॥ ३० ॥ ये त्विह वै पुरुषाः पुरुषमेधेन यजंते याश्च स्त्रियो नृपशून्खादंति तांश्च ते पशव इव निहता यमसदने यातयंतो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायासृक् पिबंति नृत्यंति च गायंति च हृष्यमाणा यथेह पुरुषादाः ॥ ३१॥ ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रंभकैरुपसृतानुपविश्रंभय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान्क्रीडनकतया यातयंति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्मरंति ॥ ३२ ॥ ये त्विह वै भूतान्युद्वेजयंति नरा उल्बणस्वभावा यथा दंदशूकास्तेऽपि प्रेत्य नरके दंदशूकाख्ये निपतंति यत्र नृप दँदशूकाः पंचमुखाः सप्तमुखा उपसृत्य ग्रसंति यथा बिलेशयान् ॥ ३३ ॥ ये त्विह वा अंधावटकुसूलगृहादिषु भूतानि निरुंधंति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुंधंति ॥ ३४ ॥ यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्राः कंककाकवटादयः प्रसह्योरुबलादुत्पाटयंति ॥ ३५ ॥ यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशंकी अर्थव्ययनाशचिंतया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयंति ॥ ३६ ॥ ॥ ॥

ये इह निरपराधान् पशून् विपिने ग्रामे वा विश्वास्य शूलसूत्रादिषु प्रोतान् घातयंति । ते प्रेत्य शूलादिषु प्रोताः कंकवटादिभिः पक्षिभिस्तुंडैराहन्यमानाः स्वपापं स्मरंति ॥ ३२ ॥ ये भूतान् त्रासयंति ते दंदशूकनामके नरके निपतंति यत्र पंचमुखाः सप्तमुखाः सर्पा मूषकानिव तान् ग्रसंति ॥ ३३ ॥ ये गुहादिषु भूतानि रुंधंति तान् परलोकेऽवटनिरोधनामके नरके सविषवह्निना धूमेन निरुंधंति ॥ ३४ ॥ योऽतिथीनभ्यागतान् वक्रदृष्ट्या निरीक्षते तस्य नेत्रे वज्रतुंडा गृध्राः कंककाकवटादयः पर्यावर्तननामके नरके बलात्समुत्पाटयंति ॥ ३५ ॥ यो धनगर्वितो मानी द्रव्यनाशचिंतया शुष्यद्वदनहृदयो ग्रह इव धनं रक्षति। स

प्रेत्य सूचीमुखनामके नरके पतति । यत्र दूतास्तमंगेषु सूत्रैः परिवयंति ॥ ३६ ॥ हे नृप, एवंविधा नरका यमालये शतशः सहस्रशः संति । तेषु पापकृतो यथाकर्म प्रविशंति । धार्मिकास्तु स्वर्गादौ प्रविशंति । धर्माधर्मशेषाभ्यां मर्त्यलोके प्रविशंति ॥ ३७ ॥ निवृत्तिलक्षणो मार्गो द्वितीयस्कंधे कथितः । एतावानेवांडकोशो यः पुराणेषु चतुर्दशलोकरूपेण गीयते । एतद्भगवतः स्थूलं मायामयं रूपं य आदरेण पठति शृणोति श्रावयति वा स भक्त्या विशुद्धबुद्धिः सन्

एवंविधा नरका यमालये संति शतशः सहस्रशस्तेषु च सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशंति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति ॥ ३७ ॥ निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥ एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥ ३८ ॥ श्रुत्वा स्थूलं यथा सूक्ष्मं रूपं भगवतो यतिः ॥ स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ॥ ३९ ॥ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था ॥ गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ४० ॥ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पंचमस्कंधे नरकानुवर्णनं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ ॥ ॥

अग्राह्यमपि भगवतः स्वरूपं वेत्ति ॥ ३८ ॥ यत्नशीलो नरो भगवतः स्थूले रूपे निर्जितं मनो बुद्ध्या शनैः सूक्ष्मे रूपे नयेत् ॥ ३९ ॥ हे नृप, भूमिद्वीपखंडनदीपर्वताकाशसमुद्रपातालदिङ्नरकज्योतिश्चक्रसंस्था मया तुभ्यं कथिता । इदमीश्वरस्य स्थूलं रूपं ते वर्णितम् ॥ ४० ॥ इति श्रीमद्भागवतचूर्णिकायां पंचमस्कंधे नरकवर्णनं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ श्रीरस्तु ॥ ॥ समाप्तोऽयं स्कंधः ॥ ॥

इति सचूर्णिकश्रीमद्भागवते पंचमः स्कंधः समाप्तः

अथ सचूर्णिकश्रीमद्भागवते षष्ठस्कंधारंभः

४६

॥ श्रीगणेशाय नमः ॥ अध्यायैकोनविंशत्या षष्ठे पोषणमुच्यते । अतिलंघितमर्यादभक्तरक्षणलक्षणम् ॥१॥ तत्रादौ प्रथमे विष्णोर्दूतैः पातकिमोचने । तत्पापख्यापनायोक्तं
याम्यैर्धर्मादिलक्षणम् ॥२॥ राजोवाच ॥ हे ब्रह्मन्, भवता पूर्वं[1] निवृत्तिमार्गः कथितः । येन मार्गेण ब्रह्मणा सह मोक्षो भवति ॥ १ ॥ तथा
स्वर्गादिसुखफलः प्रवृत्तिलक्षणश्च मार्गः कथितः । येन जीवस्य वारंवारं जन्म भवति ॥ २ ॥ अधर्मलक्षणा नाना नरकाश्च वर्णिताः । स्वायंभुवं मन्वंतरं च
कथितम् ॥३॥ प्रियव्रतोत्तानपदोर्वंशः तच्चरितानि द्वीपखंडसमुद्रपर्वतनद्युद्यानवृक्षाश्च कथिताः ॥ ४ ॥ पृथ्वीमंडलस्थितिं ग्रहमंडलस्थितिं पातालादीनां लक्षणं
च यथा विभुः ससर्ज तथा त्वया कथितम् ॥५॥ अधुना नर उग्रयातनान्नरकान् येनोपायेन न गच्छेत्तन्मे वद ॥६॥ श्रीशुक उवाच ॥ इह लोके मनोवाग्देहैः

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ निवृत्तिमार्गः कथित आदौ भगवता यथा ॥ क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥
प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ॥ योऽसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः ॥ २ ॥ अधर्मलक्षणा नाना नरकाश्चानुवर्णिताः ॥
मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ॥ ३ ॥ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च ॥ द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥ ४ ॥
धरामंडलसंस्थानं भागलक्षणमानतः ॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥५॥ अधुनेह महाभाग
यथैव नरकान्नरः ॥ नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥ श्रीशुक उवाच ॥ न चेदिहैवापचितिं यथांहसः
कृतस्य कुर्यान्मनउक्तिपाणिभिः ॥ ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ७ ॥ तस्मात्पुरैवाश्विह
पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक्चिकित्सेत रुजां निदानवित् ॥८॥ राजोवाच ॥
दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम् ॥ करोति भूयो विवशः प्रायश्चित्तमथो कथम् ॥ ९ ॥ क्वचिन्निवर्ततेऽभद्रात्क्वचिच्चरति तत्पुनः ॥
प्रायश्चित्तमतोऽपार्थं मन्ये कुंजरशौचवत् ॥१०॥ श्रीशुक उवाच ॥ कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते ॥
अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनम् ॥ ११ ॥ नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवंति हि ॥ एवं नियमकृद्राजन् शनैः
क्षेमाय कल्पते ॥ १२ ॥ तपसा ब्रह्मचर्येण शमेन च दमेन च ॥ त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३॥ ॥

कृतस्य पापस्य मन्वादिभिः कथितं प्रायश्चित्तं यो न करोति स नरकान् प्राप्नोति॥७॥तस्मात् पुरुषेण मृत्योः पूर्वमेव स्वपापानामल्पत्वं महत्त्वं च ज्ञात्वा तेषां नाशार्थं
प्रायश्चित्तादिर्यत्नः कार्यः॥८॥राजोवाच॥ दृष्ट[2]श्रुताभ्यां पापमात्मनोऽहितं जानन्नप्ययं जीवः प्रायश्चित्तानंतरमपि पुनः पापं करोति । अतः प्रायश्चित्तस्योपयोगः
कः न कोऽपि॥९॥ पुनः पापे कृते प्रायश्चित्तं कुंजरशौचवद्व्यर्थं मन्ये॥१०॥श्रीशुक उवाच॥हे राजन्, सत्यमुक्तम् । कृच्छ्रप्रायश्चित्तादिकर्मणा पापस्य समूलनाशो
न भवति। प्रायश्चित्तकर्तुरज्ञत्वात् । अज्ञानसंस्कारेण पापांतरस्य पुनः प्ररोहो भवति। अतः ज्ञानप्राप्तिरेव मुख्यं प्रायश्चित्तम्॥११॥हे राजन्,पथ्यमेवान्नं भुंजतो यथा
व्याधयो न भवंति तथा नियमादिकर्ता पुमान् शनैस्तत्त्वज्ञानाय समर्थो भवति॥१२॥केचित् धर्मज्ञाः पुमांसः तपसा ब्रह्मचर्येण शमेन दमेन त्यागशौचाभ्यां च॥१३॥

---

[1] द्वितीयस्कंधे 'वैश्वानरं याति'इत्यादिना ।
[2] दृष्टं राजदंडादि दुःखं श्रुतं नरकपातादि दुःखं ताभ्याम् ।

देहवाग्बुद्धिजं पापं नाशयंति । अग्निर्वेणुगुल्ममिव ॥१४॥ केचित् केवलया भक्त्या संपूर्णं पापं नाशयंति । सूर्यो हिमसमूहमिव ॥ १५ ॥ कृष्णेऽर्पितप्राणः पुमान् साधुसेवया यथा पवित्रो भवति तथा तपआदिभिः पवित्रो न भवति ॥ १६ ॥ अयं भक्तिमार्ग एव लोके समीचीनोऽस्ति । यत्र नारायणपरायणाः साधवः संति ॥१७॥ आचरितानि प्रायश्चित्तानि नारायणपराङ्मुखं न पुनंति । गंगादिनद्यः सुराकुंभमिव ॥ १८ ॥ यैः पुरुषैः कृष्णचरणारविंदयोः सकृन्मनो निवेशितं ते पूताः संतः स्वप्नेऽपि यमं तद्दूतांश्च न पश्यंति ॥१९॥ अस्मिन् विषये विष्णुयमयोर्दूतानां संवादरूपमितिहासं कथयंति तं मत्तः श्रृणु ॥ २० ॥ पुरा कान्यकुब्जनामके नगरे अजामिलो नाम कश्चिद्द्विजो दास्याः संगेन दूषितः सन्नाचाराद्भ्रष्ट आसीत् ॥ २१ ॥ स द्यूतचौर्यादिनिंदितवृत्त्या कुटुंबं पुष्णन्

देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥१४॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥१५॥ न तथाह्यगवान्राजन्पूयेत तपआदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥१६॥ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोऽकुतोभयः ॥ सुशीलाः साधवो यत्र नारायणपरायणाः ॥१७॥ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ॥ न निष्पुनंति राजेंद्र सुराकुंभमिवापगाः ॥ १८ ॥ सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भटान्स्वप्नेऽपि पश्यंति हि चीर्णनिष्कृताः ॥१९॥ अत्र चोदाहरंतीममितिहासं पुरातनम् ॥ दूतानां विष्णुयमयोः संवादस्तं निबोध मे ॥२०॥ कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ॥ नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥२१॥ बंद्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ॥ बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः ॥२२॥ एवं निवसतस्तस्य लालयानस्य तत्सुतान् ॥ कालोऽत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः ॥२३॥ तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः ॥ बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥ २४ ॥ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम्॥२५॥भुंजानः प्रपिबन् खादन् बालकस्नेहयंत्रितः ॥ भोजयन्पाययन्मूढो न वेदागतमंतकम् ॥२६॥ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते ॥ मतिं चकार तनये बाले नारायणाह्वये ॥ २७ ॥ स पाशहस्तांस्त्रीन्दृष्ट्वा पुरुषान्भृशदारुणान् ॥ वक्रतुंडानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥२८॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम् ॥ प्लावितेन स्वरेणोच्चैराजुहावाकुलेंद्रियः ॥ २९ ॥ निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्तनम् ॥ भर्तुर्नाम महाराज पार्षदाः सहसाऽऽपतन् ॥ ३० ॥ ॥

लोकान् पीडयामास ॥२२॥ एवं दास्याः सुतान् लालयतस्तस्याजामिलस्याष्टाशीति८८वर्षात्मक आयुष्यकालो गतः ॥ २३ ॥ तस्य वृद्धस्य दास्यां दश पुत्रा जाताः । तेषां कनिष्ठो नारायणो नाम्नाऽऽसीत् ॥२४॥ स वृद्धस्तस्य कलभाषणादिक्रीडा वीक्ष्य परं हर्षमवाप ॥ २५ ॥ स तस्मिन् बालके बद्धस्नेहः सन् तेन सह भोजनपानादि कुर्वन् आगतं कालं न वेद ॥२६॥ स मृत्युकाले प्राप्ते सति तस्मिन्नारायणे बाले बुद्धिं चकार ॥ २७ ॥ स चात्मानं नेतुमागतान् भयानकान् त्रीन् पुरुषान् दृष्ट्वा ॥२८॥ व्याकुलेंद्रियो भीतः सन्नुच्चस्वरेण नारायणेति बालमाजुहाव ॥२९॥ तदा मरणोन्मुखस्याजामिलस्य हरिकीर्तनं निशम्य तत्र

सहसा विष्णुपार्षदा एत्य ॥ ३० ॥ अजामिलं हृदयादाकर्षतो यमदूतान् वारयामासुः ॥ ३१ ॥ तदा यमदूतास्तान् विष्णुदूतानूचुः । धर्मराजस्य यमस्याज्ञायाः प्रतिषेधकर्तारो यूयं के स्थ ॥३२॥ यूयं कुत आयाताः । किं देवा उपदेवा वा किंवा सिद्धाः स्थ ॥३३॥ सर्वे कमलनेत्राः पीतवस्त्राः किरीटकुंडलधारिणः वनमालिनः ॥३४॥ सर्वे नूतनवयसः शंखचक्रगदापद्मधारिणश्चतुर्भुजाः ॥३५॥ स्वतेजसा दिशां तमो दूरीकुर्वंतः संतो यमस्य दूतान् नः किमर्थं निषेधथ ॥३६॥ श्रीशुक उवाच ॥ यमदूतैरेवमुक्ते सति विष्णुदूताः प्रहस्य मेघवद्वाण्या तानूचुः ॥३७॥ यूयं धर्मराजस्य यदि किंकराः तर्हि धर्मस्य तत्त्वं लक्षणं च नो ब्रूत ॥३८॥ तथा केन प्रकारेण दंडः कार्यः दंडस्य पात्रं किम् । कर्मकारिणः सर्वे दंड्याः किंवा तेषु कतिचिद्दंड्यास्तद्ब्रूत ॥ ३९ ॥ इत्याकर्ण्य यमदूता ऊचुः ।

विकर्षतोंऽतर्हृदयाद्दासीपतिमजामिलम् ॥ यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ ३१ ॥ ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः ॥ के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम् ॥ ३२ ॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ ॥ किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ ३३ ॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ॥ किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ॥ ३४ ॥ सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ॥ धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः ॥ ३५ ॥ दिशो वितिमिरालोकाः कुर्वंतः स्वेन रोचिषा ॥ किमर्थं धर्मपालस्य किंकरान्नो निषेधथ ॥ ३६ ॥ श्रीशुक उवाच ॥ इत्युक्ते यमदूतैस्तैर्वासुदेवोक्तकारिणः ॥ तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥ विष्णुदूता ऊचुः ॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः ॥ ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणम् ॥ ३८ ॥ कथं स्विद्ध्रियते दंडः किंवास्य स्थानमीप्सितम् ॥ दंड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणाम् ॥ ३९ ॥ यमदूता ऊचुः ॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम ॥ ४० ॥ येन स्वधाम्न्यमी भावा रजःसत्वतमोमयाः ॥ गुणनामक्रियारूपैर्विभाव्यंते यथातथम् ॥ ४१ ॥ सूर्योऽग्निः खं मरुद्गावः सोमः संध्याहनी दिशः ॥ कं कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः ॥ ४२ ॥ एतैरधर्मो विज्ञातः स्थानं दंडस्य युज्यते ॥ सर्वे कर्मानुरोधेन दंडमर्हंति कारिणः ॥ ४३ ॥ संभवंति हि भद्राणि विपरीतानि चानघाः ॥ कारिणां गुणसंगोऽस्ति देहवान्नह्यकर्मकृत् ॥ ४४ ॥ येन यावान्यथाऽधर्मो धर्मो वेह समीहितः ॥ स एव तत्फलं भुंक्ते तथा तावदमुत्र वै ॥ ४५ ॥ यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते ॥ भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते ॥ ४६ ॥ ॥ ॥

वेदेन विहितो धर्मः । वेदेन निषिद्धोऽधर्मः । वेदस्तु साक्षान्नारायण इत्यस्माभिः श्रुतमस्ति ॥४०॥ येन नारायणेन स्वस्वरूपे रजःसत्वतमोमया वर्णाश्रमादयो रच्यंते ॥४१॥ सूर्यः अग्निः आकाशः वायुः गावः सोमः संध्या अहः रात्रिः दिशः जलं पृथ्वी कालः धर्मश्चेत्येते जीवस्य साक्षिणः संति ॥ ४२ ॥ एतैर्हेतुभूतैरधर्मो ज्ञातश्चेत् दंडस्य पात्रमुच्यते । सर्वे कर्मकर्तारः कर्मानुरूपं दंडमर्हंति ॥ ४३ ॥ किंच । कोऽपि देहवान् कर्म विना नास्ति । अतस्तेषां कर्मिणां पापस्यावश्यंभावित्वात्ते सर्वे दंडमर्हंति॥४४॥अतो मनुष्यलोके येन यथा धर्मोऽधर्मो वाऽऽचरितः स परलोके तत्फलं सुखं दुःखं वा भुंक्ते ॥४५॥ हे देवश्रेष्ठाः, इह जन्मनि

प्राणिषु सत्वादिगुणानां विचित्रत्वात् कर्मणां शांतघोरमूढत्वेन सुखदुःखमिश्रत्वेन वा यथा त्रैविध्यं लभ्यते तथा जन्मांतरेऽप्यनुमीयते ॥४६॥ यथा वर्तमानो वसंतादिः कालो भूतभाविनोर्वसंतादिकालयोर्गुणसूचको भवति एवं धर्माधर्मौ भूतभाविजन्मनोः फलं दर्शयतः ॥ ४७ ॥ संयमिन्यां नगर्यां स्थित एव यमो जीवस्य धर्माधर्मयुक्तं पूर्वरूपं पश्यति भविष्यं च विचारयति ॥४८॥ अज्ञो जीवो जन्मना नष्टस्मृतिः सन् पूर्वापरं न वेद ॥४९॥ अथ जीवस्य संसारं दर्शयति । अयं षोडशकलात्मकलिंगशरीरस्थो जीवः पंचकर्मेंद्रियैः कर्माणि करोति पंचज्ञानेंद्रियैः पंच विषयान् गृह्णाति । प्राणपंचकेन देहवृत्तिं प्रवर्तयति । एवं मनसा विषयान् स्वीकरोति ॥५०॥ एतत् षोडशकलं लिंगशरीरं जीवे हर्षशोकभयार्तिदां संसृतिं धत्ते ॥५१॥ जीवः संसारे मुह्यन् निर्गमोपायं न जाना-

वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा ॥ एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ॥ ४७ ॥ मनसैव पुरे देवः पूर्वरूपं विपश्यति ॥ अनुमीमांसतेऽपूर्वं मनसा भगवानजः ॥ ४८ ॥ यथाऽज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥ पंचभिः कुरुते स्वार्थान्पंच वेदाथ पंचभिः ॥ एकस्तु षोडशेन त्रीन्स्वयं सप्तदशोऽश्नुते ॥५०॥ तदेतत्षोडशकलं लिंगं शक्तित्रयं महत् ॥ धत्तेऽनुसंसृतिं पुंसि हर्षशोकभयार्तिदाम् ॥ ५१ ॥ देह्यज्ञोऽजितषड्वर्गो नेच्छन्कर्माणि कार्यते ॥ कोशकार इवात्मानं कर्मणाऽऽच्छाद्य मुह्यति ॥५२॥ नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥ ५३ ॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ॥ यथायोनि यथाबीजं स्वभावेन बलीयसा ॥ ५४ ॥ एष प्रकृतिसंगेन पुरुषस्य विपर्ययः ॥ आसीत्स एव न चिरादीशसंगाद्विलीयते ॥५५॥ अयं हि श्रुतसंपन्नः शीलवृत्तगुणाऽऽलयः ॥ धृतव्रतो मृदुर्दांतः सत्यवान्मंत्रविच्छुचिः ॥ ५६ ॥ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः ॥ सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥ एकदासौ वनं यातः पितृसंदेशकृद्द्विजः ॥ आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥ ददर्श कामिनं कंचिच्छूद्रं सह भुजिष्यया ॥ पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ॥ ५९ ॥ मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम् ॥ क्रीडंतमनु गायंतं हसंतमनयांतिके ॥ ६० ॥ दृष्ट्वा तां कामलिप्तेन बाहुना परिरंभिताम् ॥ जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥ स्तंभयन्नात्मनात्मानं यावत्सत्वं यथाश्रुतम् ॥ न शशाक समाधातुं मनो मदनवेपितम् ॥ ६२ ॥ ॥

ति ॥५२॥ अयं जीवः क्षणमपि कर्म विना न तिष्ठति । किंतु अवशः सन् स्वाभाविकैर्गुणैर्बलात्कर्म कार्यते ॥ ५३ ॥ अस्य जीवस्य पूर्वकर्मवशेन व्यक्ताव्यक्तरूपं स्थूलं सूक्ष्मं च शरीरं भवति ॥५४॥ एतावता जीवस्य प्रकृतिसंगेन संसारो भवति । ईश्वरभजनान्मोक्षश्च भवति ॥ ५५ ॥ अयमजामिलः पूर्वं विद्यासंपन्नः सुस्वभावः सत्यवान् मंत्रवित् पवित्रः ॥५६॥ अहंकाररहितो गुर्वग्न्यतिथिवृद्धानां सेवकश्चाभूत् ॥५७॥ असावेकदा पितुराज्ञया वनं गत्वा ततः फलपुष्पसमित्कुशान् गृहीत्वा परावृत्तः ॥५८॥ तदा मार्गे मदिरापानेन मत्तया नग्नया कयाचिच्छूद्रया सह क्रीडंतं गायंतं कंचित्कामिनं शूद्रं ददर्श ॥ ५९ ॥ ६० ॥ तेन बाहुना आलिंगितां तां शूद्रीं च दृष्ट्वा काममोहितः सन् ॥ ६१ ॥ ज्ञानेनात्मानं स्तंभयन्नपि मदनवेपितं मनो वशीकर्तुं समर्थो न बभूव ॥ ६२ ॥ ॥

किंतु कामेन व्याप्तः सन् तामेव मनसा ध्यायन् स्वधर्माद्भ्रष्टो जातः ॥६३॥ ततस्तां स्वीकृत्य गृहस्थितेन द्रव्येण मनोरमैर्ग्राम्यैर्विषयैस्तामेव तोषयामास ॥६४॥ सतीं नवयौवनां स्वभार्यां त्यक्त्वा ॥६५॥ चौर्यादिना धनमानीय तस्या एव कुटुंबं पुपोष ॥ ६६ ॥ यस्मादसौ शास्त्राचारं समुल्लंघ्य तया सह चिरं कालं पापं कृतवान् ॥६७॥ तस्मादेनं पापिनमकृतप्रायश्चित्तं दंडपाणेर्यमस्य समीपं नेष्यामः । यत्र दंडेन शुद्ध्यति ॥६८॥ इति श्रीमद्भागवतचू॰ षष्ठस्कंधे अजामिलोपाख्याने प्रथमोऽध्यायः ॥१॥ ॥ द्वितीये वैष्णवैर्याम्यान्नाममाहात्म्यमद्भुतम् । श्रावयित्वा द्विजो विष्णोर्लोकं नीत इतीर्यते ॥१॥ श्रीशुक उवाच ॥ हे राजन्, नीतिचतुरा विष्णुदूता यमदूतवाक्यं श्रुत्वा तानाहुः ॥१॥ विष्णुदूता ऊचुः । अहो कष्टम् । धर्मज्ञानां सभांप्रत्यधर्मः स्पृशति । यस्यां सभायां धर्मज्ञाः पुरुषा

तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ॥ तामेव मनसा ध्यायन्स्वधर्माद्विरराम ह ॥६३॥ तामेव तोषयामास पित्र्येणार्थेन यावता ॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥६४॥ विप्रां स्वभार्यामप्रौढां कुले महति लंभिताम् ॥ विससर्जाचिरात्पापः स्वैरिण्यापांगविद्धधीः ॥६५॥ यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम् ॥ बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयम् ॥ ६६ ॥ यदसौ शास्त्रमुल्लंघ्य स्वैरचार्यार्यगर्हितः ॥ अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥ तत एनं दंडपाणेः सकाशं कृतकिल्बिषम् ॥ नेष्यामोऽकृतनिर्वेशं यत्र दंडेन शुद्ध्यति ॥ ६८ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे अजामिलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ ॥ श्रीशुक उवाच ॥ एवं ते भगवद्दूता यमदूताभिभाषितम् ॥ उपधार्याथ तान्राजन्प्रत्याहुर्नयकोविदाः ॥१॥ विष्णुदूता ऊचुः ॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम् ॥ यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा ॥२॥ प्रजानां पितरो ये च शास्तारः साधवः समाः ॥ यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ॥३॥ यद्यदाचरति श्रेयानितरस्तत्तदीहते ॥ स यत्प्रमाणं कुरुते लोकस्तदनु वर्तते ॥ ४ ॥ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः ॥ स्वयं धर्ममधर्मं वा नहि वेद यथा पशुः ॥ ५ ॥ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम् ॥ विश्रंभणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥ अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥ यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥ एतेनैव ह्यघोनोऽस्य कृतं स्यादघनिष्कृतम् ॥ यदा नारायणायेति जगाद चतुरक्षरम् ॥ ८ ॥ स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः ॥ स्त्रीराजपितृगोहंता ये च पातकिनोऽपरे ॥ ९ ॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ १० ॥ ॥

निष्पापिनां दंडं कुर्वंति ॥२॥ ये प्रजानां पितृवत्पालकाः शास्तारः साधवः समाः तेषु यदि वैषम्यं स्यात् तर्हि प्रजाः कं शरणं यांति ॥३॥ श्रेष्ठः पुरुषो यद्यदाचरति यच्च प्रमाणं करोति तत्तल्लोकोऽनुवर्तते ॥४॥ लोको यस्यांके शिरः स्थापयित्वा निश्चिंतः शेते । स्वयं धर्ममधर्मं वा न वेद यथा पशुः ॥५॥ स विश्वसनीयः पुरुषोऽर्पितदेहं सुप्तं तं द्रोग्धुं कथमर्हति ॥६॥ अयमजामिलस्तु हरेर्नामोच्चारितवान् । अतोऽनेन कोटिजन्मकृतमपि पापं नाशितम् ॥७॥ यच्चतुरक्षरं नारायणेति जगाद एतेनैवास्य संपूर्णपापनाशो जातः ॥८॥ स्तेनः सुरापः मित्रद्रोही ब्रह्महा गुरुतल्पगः स्त्रीराजपितृगोहंता अन्ये च ये पातकिनः ॥ ९ ॥ तेषां सर्वेषां पापिनां

हेरर्नामोच्चारणमेव प्रायश्चित्तम् ॥१०॥ यथा विष्णोर्नाम्ना शुद्ध्यति तथा मन्वादिभिरुक्तैः प्रायश्चित्तैर्न शुद्ध्यति ॥११॥ अतः पापनाशमिच्छतां पुंसां हरेर्गुणानुवाद एव प्रायश्चित्तम् । यतः स चित्तशोधकोऽस्ति ॥१२॥ तस्मात्कृतप्रायश्चित्तमेनमजामिलं यूयं मा नयत ॥ १३ ॥ पुत्रादौ संकेतिततया हास्येन हेलनेन वा वैकुंठनामग्रहणं सर्वपापहरं विदुः ॥१४॥ प्रासादादिभ्यः पतितः स्खलितः भग्नगात्रः सर्पादिभिर्दष्टः ज्वरादिना तप्तो वा यः पुमान् हरिरिति वदति स यातनां नार्हति ॥१५॥ मन्वादिभिर्गुरूणां लघूनां च पापानां गुरूणि लघूनि च प्रायश्चित्तानि कथितानि ॥१६॥ तैस्तपोदानादिभिस्तान्येव पापानि नश्यंति न वासना । सापि हरिकीर्तनादिना नश्यति ॥१७॥ अज्ञानाज्ज्ञानाद्वा कीर्तितं हरिनाम पुंसः पापं दहेत् । यथाऽनलः काष्ठानि दहति तद्वत् ॥१८॥ यथा

न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः ॥ यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकम् ॥ ११ ॥
नैकांतिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे ॥ तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्वभावनः
॥ १२ ॥ अथैनं मापनयत कृताशेषाघनिष्कृतम् ॥ यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ १३ ॥ सांकेत्यं पारिहास्यं वा
स्तोभं हेलनमेव वा ॥ वैकुंठनामग्रहणमशेषाघहरं विदुः ॥ १४ ॥ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः ॥ हरिरित्यवशेनाह
पुमान्नार्हति यातनाम् ॥ १५ ॥ गुरूणां च लघूनां च गुरूणि च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि
महर्षिभिः ॥ १६ ॥ तैस्तान्यघानि पूयंते तपोदानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥ १७ ॥ अज्ञानादथवा
ज्ञानादुत्तमश्लोकनाम यत् ॥ संकीर्तितमघं पुंसो दहेदेधो यथानलः ॥ १८ ॥ यथाऽगदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजानतोऽप्यात्मगुणं
कुर्यान्मंत्रोऽप्युदाहृतः ॥ १९ ॥ (पतिं वः पृच्छत भटा धर्मेऽस्मिन् यदि संशयः ॥ स वेद परमं गुह्यं धर्मस्य
भगवान्यमः ॥ १ ॥) ॥ श्रीशुक उवाच ॥ त एवं सुविनिर्णीय धर्मं भागवतं नृप ॥ तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन्
॥ २० ॥ इति प्रत्युदिता याम्या दूता यात्वा यमांतिके ॥ यमराज्ञे यथा सर्वमाचचक्षुररिंदम ॥ २१ ॥ द्विजः पाशाद्विनिर्मुक्तो
गतभीः प्रकृतिं गतः ॥ ववंदे शिरसा विष्णोः किंकरान्दर्शनोत्सवः ॥ २२ ॥ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः
॥ सहसा पश्यतस्तस्य तत्रांतर्दधिरेऽनघ ॥ २३ ॥ अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः ॥ धर्मं
भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम् ॥ २४ ॥ ॥ ॥ ॥

ज्ञातमज्ञातं वौषधं भक्षितं चेदारोग्यं करोति एवं नामात्मको मंत्रोऽप्युच्चारितश्चेत्सर्वपापनाशको भवति ॥१९॥ (हे यमदूताः, अस्मिन् धर्मे भवतां संशयश्चेत्तर्हि स्वपतिं यमं पृच्छत । स धर्मस्य तत्त्वं जानाति ॥१॥) श्रीशुक उवाच ॥ ते विष्णुदूता एवं भगवद्धर्मं निर्णीय विप्रं याम्यपाशान्निर्मुच्य मृत्योरपि मोचयामासुः ॥ २० ॥ ततो यमदूता यमांतिके गत्वा तस्मै सर्वं न्यवेदयन् ॥२१॥ द्विजस्तु याम्यपाशान्मुक्तः सन् विष्णुपार्षदान् ववंदे ॥ २२ ॥ ते विष्णुदूतास्तं वक्तुमिच्छतं ज्ञात्वांऽतर्दधिरे ॥२३॥ अजामिलो यमकृष्णयोर्दूतानां संवादे भागवतं शुद्धं धर्मं श्रुत्वा ॥ २४ ॥ ॥ ॥

भगवन्नाममाहात्म्यं च श्रुत्वा भगवति भक्तिमान् जातः । ततः स्वपापं स्मरन् पश्चात्तापयुक्तो भूत्वा आत्मानं निनिंद ॥ २५ ॥ अहो मे महती हानिर्जाता ।
येन शूद्र्यां पुत्रत्वेन जातेन मया स्वस्य ब्रह्मतेजो नाशितम् ॥२६॥ अतः सद्भिर्दूषितं कुलकज्जलं मां धिक् । योऽहं सतीं बालां स्त्रीं हित्वा सुरापां शूद्रीमगाम् ॥२७॥ अहो कृतघ्नेन मया वृद्धौ मातापितरौ नीचवत्त्यक्तौ ॥२८॥ सोऽहं भयंकरे नरके पतिष्यामि। यत्र धर्मघ्नाः कामिजना यमयातना विंदंति ॥२९॥
अहो मया किं स्वप्नो दृष्टः किंवा तत्सत्यं दृष्टम् । अहो ये मां व्यकर्षन् ते यमदूताः क्व गताः ॥ ३० ॥ ये च यमदूतैर्नीयमानं मां व्यमोचयन् ते सिद्धाश्च
क्व गताः ॥३१॥ भाग्यहीनस्यापि मे विष्णुदूतदर्शनार्थं मंगलकर्मणा भाव्यम् ॥ ३२ ॥ अन्यथा म्रियमाणस्य शूद्रीपतेर्मे जिह्वा वैकुंठनामग्रहणं वक्तुं नार्हति

भक्तिमान्भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो महानासीत्स्मरतोऽशुभमात्मनः ॥ २५ ॥ अहो मे परमं कष्टमभूदविजितात्मनः ॥ येन विप्लावितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ ॥ धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम् ॥ हित्वा बालां
सतीं योऽहं सुरापामसतीमगाम् ॥ २७ ॥ वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ ॥ अहो मयाधुना त्यक्तावकृतज्ञेन नीचवत्
॥ २८ ॥ सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे ॥ धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः ॥२९॥ किमिदं स्वप्न आहोस्वित्साक्षाद्दृष्टमिहाद्भुतम् ॥ क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः ॥३०॥ अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः ॥
व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः ॥ ३१ ॥ अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ॥ भवितव्यं मंगलेन येनात्मा मे प्रसीदति ॥ ३२ ॥ अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ॥ वैकुंठनामग्रहणं जिह्वा वक्तुमिहार्हति ॥ ३३ ॥ क्व चाहं कितवः
पापो ब्रह्मघ्नो निरपत्रपः ॥ क्व च नारायणेत्येतद्भगवन्नाम मंगलम् ॥ ३४ ॥ सोऽहं तथा यतिष्यामि यतचित्तेंद्रियानिलः ॥ यथा
न भूय आत्मानमंधे तमसि मज्जये ॥ ३५ ॥ विमुच्य तमिमं बंधमविद्याकामकर्मजम् ॥ सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान् ॥ ३६ ॥ मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया ॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ॥ ३७ ॥ ममाहमिति
देहादौ हित्वा मिथ्यार्थधीर्मतिम् ॥ धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ॥ ३८ ॥ इति जातसुनिर्वेदः क्षणसंगेन साधुषु ॥ गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः ॥ ३९ ॥ श्रीशुक उवाच ॥ स तस्मिन्देवसदन आसीनो योगमाश्रितः ॥ प्रत्याहृतेंद्रियग्रामो
युयोज मन आत्मनि ॥ ४० ॥ ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ॥ युयुजे भगवद्धाम्नि ब्रह्मण्यनुभवात्मनि ॥ ४१ ॥

॥३३॥ अहं कपटी पापी ब्रह्मघ्नो निर्लज्जः क्व । नारायणेत्येतन्मंगलं भगवन्नाम च क्व ॥ ३४ ॥ सोऽहमितः परं तथा यतिष्यामि । यथा भूयो नरके आत्मानं
न मज्जये ॥३५॥ अविद्याकामकर्मजं बंधं विमुच्य सर्वभूतमित्रः शांतः कारुणिकश्च सन् ॥३६॥ स्त्रीमय्या मायया ग्रस्तमात्मानं मोचये॥ ३७ ॥ देहादौ अहंममेति मतिं हित्वा भगवत्कीर्तनादिभिः शुद्धं मनो भगवति धारयिष्ये ॥ ३८ ॥ एवं सत्संगेन प्राप्तज्ञानोऽजामिलः पुत्रादिस्नेहं त्यक्त्वा तस्मात्स्थानाद्गंगाद्वारं
ययौ ॥३९॥ श्रीशुक उवाच ॥ स तस्मिन् क्षेत्रे योगमार्गमाश्रित्य स्थितः सन्निंद्रियनिग्रहं कृत्वा मन आत्मनि युयोज ॥४०॥ ततो देहेंद्रियादिभ्य आत्मानं

विशोध्य तं चित्तैकाग्र्येणानुभवरूपे ब्रह्मणि योजितवान् ॥४१॥ ततस्तनुत्यागसमये भूयो विष्णुदूतान् दृष्ट्वा शिरसा ननाम ॥ ४२ ॥ ततो गंगायां स्वं कलेवरं हित्वा तत्कालं भगवत्पार्षदस्वरूपं जगृहे ॥४३॥ ततस्तैर्विष्णुपार्षदैः सह हैमं विमानमारुह्य वैकुंठं ययौ ॥४४॥ एवं त्यक्तसर्वधर्मा पतितोऽप्यजामिलो भगवन्नाम गृणन् सद्यो मुक्तः ॥४५॥ अतो मुक्तिमिच्छतां पुंसां भगवन्नामोच्चारणं विनान्यत्साधनं कर्मबंधनाशकं नास्ति ॥ ४६ ॥ य इममितिहासं भक्त्या शृणुयात्कीर्तयेद्वा ॥४७॥ स नरकं न याति किंतु विष्णुलोके पूज्यो भवति ॥४८॥ म्रियमाणोऽजामिलः पुत्रमिषेणोच्चारितं हरेर्नाम गृणन् वैकुंठं जगाम । तदा श्रद्धया गृणन् वैकुंठं यातीति किमु वक्तव्यम् ॥४९॥ इति श्रीमद्भागवतचू० षष्ठस्कं० द्वितीयोऽध्यायः ॥ २ ॥ ॥ तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनैः ।

यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः ॥ ४२ ॥ हित्वा कलेवरं तीर्थे गंगायां दर्शनादनु ॥ सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनाम् ॥ ४३ ॥ साकं विहायसा विप्रो महापुरुषकिंकरैः ॥ हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः ॥ ४४ ॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ॥ निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम गृह्णन् ॥ ४५ ॥ नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात् ॥ न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा ॥ ४६ ॥ य एवं परमं गुह्यमितिहासमघापहम् ॥ शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्यानुकीर्तयेत् ॥ ४७ ॥ न वै स नरकं याति नेक्षितो यमकिंकरैः ॥ यद्यप्यमंगलो मर्त्यो विष्णुलोके महीयते ॥४८॥ म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितम् ॥ अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन् ॥४९॥ इति श्री०म०ष०अजामिलोपाख्याने द्वितीयोऽध्यायः ॥२॥ ॥ राजोवाच ॥ निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान्प्रति धर्मराजः ॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयम् ॥१॥ यमस्य देवस्य न दंडभंगः कुतश्चनर्षे श्रुतपूर्व आसीत् ॥ एतन्मुने वृश्चति लोकसंशयं नहि त्वदन्य इति मे विनिश्चितम् ॥ २ ॥ श्रीशुक उवाच ॥ भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः ॥ पतिं विज्ञापयामासुर्यमं संयमिनीपतिम् ॥ ३ ॥ यमदूता ऊचुः ॥ कति संतीह शास्तारो जीवलोकस्य वै प्रभो ॥ त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥ ४ ॥ यदि स्युर्बहवो लोके शास्तारो दंडधारिणः ॥ कस्य स्यातां न वा कस्य मृत्युश्चामृतमेव वा ॥५॥ किंतु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणाम् ॥ शास्तृत्वमुपचारो हि यथा मंडलवर्तिनाम् ॥ ६ ॥ अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः ॥ शास्ता दंडधरो नृणां शुभाशुभविवेचनः ॥ ७ ॥

सांत्वयित्वा स्वदूतांस्ते वैष्णवे किंकरीकृताः ॥१॥ राजोवाच ॥ यमः स्वदूतवर्णितं श्रुत्वा तान्प्रति किं जगाद ॥१॥ हे मुने, यमस्य दंडभंगः कुत्रापि पूर्वं न श्रुतः । अत एतं लोकसंशयं त्वं छिंधि ॥२॥ श्रीशुक उवाच ॥ हे राजन्, भगवद्दूतैः प्रतिहतोद्योगा यमदूताः स्वप्रभुं यमं विज्ञापयामासुः ॥३॥ यमदूता ऊचुः ॥ हे प्रभो, पुण्यं पापं मिश्रं च कर्म कुर्वतो जीवलोकस्य शास्तारः कति संति ॥४॥ यदि लोके दंडधारिणो बहवः स्युस्तर्हि कस्य सुखदुःखे स्यातां कस्य वा न स्याताम् ॥५॥ बहुशास्तृत्वे सत्यपि सार्वभौम इव सर्वशास्तरि त्वयि मुख्यं शास्तृत्वं स्यादितरेषां मंडलवर्तिनामिव गौणं स्यात् ॥६॥ सर्वभूतानां पुण्यपाप विवेचकः

शास्ता दंडधरश्च त्वमेवासि ॥७॥ इदानीं तु अद्भुतैश्चतुर्भिः सिद्धैस्तवाज्ञा भग्ना कृतास्ति ॥ ८ ॥ तवाज्ञयास्माभिर्नरकान् नीयमानं पातकिनं ते सिद्धा बलात्पाशांश्छित्वा व्यमोचयन् ॥९॥ पातकिना नारायणेत्युक्ते सति ते मा भैरिति वदंतः शीघ्रमागताः। ते के एतज्ज्ञातुमिच्छामः ॥ १० ॥ श्रीशुक उवाच ॥ इति दूतैः पृष्टः सन् यमो हरेः पादांबुजं स्मरन् स्वदूतान्प्रत्याह ॥११॥ यम उवाच ॥ हे दूताः, भूतानामुत्पत्तिस्थितिनाशकरो मदन्य ईश्वरोऽस्ति ॥१२॥ कृषीवलो दामन्यां दामभिर्बलीवर्दानिव यो भगवान् वेदरूपदामन्यां ब्राह्मणादिदामभिर्जनान् बध्नाति। ते यदधीनाः संतः कर्म कुर्वंति ॥१३॥ अहं यमः इंद्रः निर्ऋतिः वरुणः सोमः अग्निः शिवः वायुः सूर्यो ब्रह्मेत्याद्याः ॥१४॥ अन्ये भृग्वादयश्च यस्य चेष्टितं न विदुः ॥ १५ ॥ यं च अंतर्हृदि संतमपि प्राणिन इंद्रि-

तस्य ते विहतो दंडो न लोके वर्ततेऽधुना ॥ चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता ॥ ८ ॥ नीयमानं तवादेशादस्माभिर्यातनागृहान् ॥ व्यमोचयन्पातकिनं छित्त्वा पाशान्प्रसह्य ते ॥९॥ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम् ॥ नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतम् ॥१०॥ श्रीशुक उवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः ॥ प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः ॥ ११ ॥ यम उवाच ॥ परो मदन्यो जगतस्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वम् ॥ यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥ १२ ॥ यो नामभिर्वाचि जनान्निजायां बध्नाति तंत्यामिव दामभिर्गाः ॥ यस्मै बलिं त इमे नामकर्मनिबंधबद्धाश्चकिता वहंति ॥ १३ ॥ अहं महेंद्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिंचः ॥ आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ॥१४॥ अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः ॥ यस्येहितं न विदुः स्पृष्टमायाः सत्वप्रधाना अपि किं ततोऽन्ये ॥ १५ ॥ यं वै न गोभिर्मनसासुभिर्वा हृदा गिरा वासुभृतो विचक्षते ॥ आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयस्ततः परम् ॥ १६ ॥ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ॥ प्रायेण दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः ॥ १७ ॥ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि ॥ रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥ १८ ॥ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः ॥ न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः ॥ १९ ॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः ॥ प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ २० ॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः ॥ गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते ॥ २१ ॥ ॥

यैर्मनसा च न जानंति। यथा रूपाणि स्वप्रकाशकमपि चक्षुर्न जानंति तद्वत्। एवंभूतः परमेश्वरो मदन्योऽस्ति ॥ १६ ॥ तस्य हरेर्दूताः तद्रूप[1]गुणस्वभावा इह विचरंति॥१७॥ते विष्णुभक्तान् सर्वसंकटेभ्यो रक्षंति ॥१८॥ साक्षाद्भगवतोक्तं धर्मं ऋषयो देवाः सिद्धा असुरा मनुष्याश्च न विदुः। विद्याधरचारणादयश्च कुतो जानंति॥१९॥तथापि ब्रह्मा नारदः शंभुः सनत्कुमारः कपिलः मनुः प्रह्लादः जनकः भीष्मः बलिः शुकः अहं यमश्च॥२०॥एते द्वादश गुह्यं भगवद्धर्मं जानीमः।

---

[1] तस्यैव रूपं चतुर्भुजादि, गुणाः प्रभावादयः, स्वभावो भक्तवात्सल्यादिश्च येषां ते।

यं धर्मं ज्ञात्वापि मोक्षसुखं प्राप्नोति ॥ २१ ॥ भगवन्नामग्रहणादिभिर्भगवति भक्तियोगः कर्तव्य एतावानेवास्मिंल्लोके पुंसां परो धर्मः स्मृतः ॥ २२ ॥ हे पुत्रकाः, हरेर्नामोच्चारणमाहात्म्यं पश्यत । अजामिलोऽपि यन्नाम्ना मृत्युपाशान्मुक्तः ॥ २३ ॥ पुंसां पापक्षयाय भगवतो गुणकर्मनामकीर्तनमेवालम् । यतो महापातक्यजामिलोऽपि पुत्रमिषेण नारायणेति नामोच्चारयन् मुक्तिं प्राप ॥२४॥ मन्वादयो भगवन्मायया मोहिताः संतो नाममाहात्म्यमज्ञात्वा पापनाशाय कृच्छ्रादिव्रतानि कथयंति । यथा वैद्या मृतसंजीवनौषधमजानंतो रोगनाशाय कटुनिंबादीन् कथयंति तद्वत् ॥ २५ ॥ ज्ञानिन एवं विमृश्य भगवति भक्तियोगं कुर्वंति ते मे दंडं नार्हंति ॥ २६ ॥ ये भगवंतं प्रपन्नाः तान् हरिर्गदया रक्षति। अतस्तेषां समीपे मा गच्छत ॥२७॥ ये हरेः पादारविंदविमुखा गृहे बद्ध-

एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः ॥ भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ २२ ॥ नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः ॥ अजामिलोऽपि येनैव मृत्युपाशादमुच्यत ॥ २३ ॥ एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नाम् ॥ विक्रुश्य पुत्रमघवान्यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥ २४ ॥ प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययालम् ॥ त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥२५॥ एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयोगम् ॥ ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तदपि हंत्युरुगायवादः ॥ २६ ॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ॥ तान्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे ॥ २७ ॥ तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रम् ॥ निष्किंचनैः परमहंसकुलै रसज्ञैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥ २८ ॥ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदम् ॥ कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥ तत्क्षम्यतां स भगवान्पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः ॥ स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने ॥ ३० ॥ तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसाम् ॥ महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतम् ॥ ३१ ॥ शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः ॥ यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ॥ ३२ ॥ कृष्णांघ्रिपद्ममधुलिण्न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु ॥ अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् ॥ ३३ ॥ ॥ ॥

तृष्णास्तान् दुष्टानानयध्वम् ॥ २८ ॥ येषां जिह्वा हरेर्नाम न वक्ति । चेतस्तं न ध्यायति । शिरः कृष्णायैकदापि न नमति तानानयध्वम् ॥ २९ ॥ असद्भूतैर्यदन्याय्यं कृतं तद्भगवान् क्षम्यताम् । तस्मै पुरुषाय नमः ॥ ३० ॥ श्रीशुक उवाच ॥ हे नृप, त्वं विष्णोर्नामसंकीर्तनं महापातकानामपि नाशकं विद्धि ॥ ३१ ॥ हरेः पराक्रमान् शृण्वतां गृणतां च पुंसां मनो भक्त्या यथा शुद्ध्येत् तथा व्रतादिभिर्न शुद्ध्येत् ॥ ३२ ॥ यस्य मनो भगवति संलग्नं स पुनः संसारे न रमते । अन्यस्तु पुनः पुनः कर्म कृत्वा संसारं प्राप्नोति ॥ ३३ ॥ ॥ ॥ ॥

हे नृप, दूता इत्थं यमगदितं श्रुत्वा तद्दिनमारभ्य भक्तजनं द्रष्टुमपि बिभ्यतिस्म ॥ ३४ ॥ इममितिहासं मलयाचले आसीनोऽगस्त्यो हरिं पूजयन् कथयामास । स मया तुभ्यं वर्णितः ॥ ३५ ॥ इति श्रीमद्भागवतचूर्णिकायां षष्ठस्कंधे तृतीयोऽध्यायः ॥३॥ ॥ चतुर्थादित्रिभिर्विश्वरूपजन्मविवक्षया । प्रचेतःसुतदक्षस्य वंशस्तावत्प्रतन्यते ॥ १ ॥ चतुर्थे तु प्रजासृष्ट्यै दक्षेणाराधनं हरेः । तपसा हंसगुह्याख्यस्तोत्रेण च निरूप्यते ॥ २ ॥ राजोवाच ॥ देवासुरमनुष्याणां नागानां मृगपक्षिणां स्वायंभुवमन्वंतरे यः सर्गस्त्वया तृतीयस्कंधे संक्षेपेण प्रोक्तः ॥ १ ॥ तस्यैवाधुना विस्तारं श्रोतुमिच्छामि ॥ २ ॥ सूत उवाच ॥ एवं राज्ञः प्रश्नमाकर्ण्य तं प्रतिनंद्य महायोगी मुनिर्जगाद ॥ ३ ॥ श्रीशुक उवाच ॥ हे नृप, यदा प्राचीनबर्हिषो दश पुत्राः प्रचेतसः समुद्राद्बहिर्निर्गता-

इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते ॥ नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततःप्रभृति स्म राजन् ॥ ३४ ॥ इतिहासमिमं गुह्यं भगवान्कुंभसंभवः ॥ कथयामास मलय आसीनो हरिमर्चयन् ॥ ३५ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे तृतीयोऽध्यायः ॥ ३ ॥ ॥ राजोवाच ॥ देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् ॥ सामासिकस्त्वया प्रोक्तो यस्तु स्वायंभुवेंऽतरे ॥१॥ तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ अनुसर्गं यया शक्त्या ससर्ज भगवान्परः ॥ २ ॥ सूत उवाच ॥ इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमाः ॥ ३ ॥ श्रीशुक उवाच ॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ॥ अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम् ॥४॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य करूद्वह ॥ राजोवाच महान्सोमो मन्युं प्रशमयन्निव ॥६॥ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ ॥ विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥७॥ अहो प्रजापतिपतिर्भगवान्हरिरव्ययः ॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥८॥ अन्नं चराणामचरा ह्यपदः पादचारिणाम् ॥ अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥९॥ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥१०॥ आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम् ॥ पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ११ ॥ तोकानां पितरौ बंधुर्दृशः पक्ष्म स्त्रियाः पतिः ॥ पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत् ॥ १२ ॥ ॥ ॥

स्तदा वृक्षैर्व्याप्तां पृथ्वीं ददृशुः ॥ ४ ॥ तदा क्रुद्धास्ते वृक्षान् दग्धुं मुखतो वायुमग्निं च ससृजुः ॥ ५ ॥ तदा दह्यमानान् वृक्षान् दृष्ट्वा तेषां राजा सोमस्तत्रैत्य तानुवाच ॥ ६ ॥ हे महाभागाः, यूयं प्रजानां पतयः स्थ । अतो दीनेभ्यो द्रुमेभ्यो द्रोग्धुं नार्हथ ॥ ७ ॥ अहो हरिर्वनस्पतीनोषधीः प्रजानामन्नं च ससर्ज ॥ ८ ॥ तत्र पशुपक्ष्यादीनामन्नं फलतृणादयः । व्याघ्रादीनां पश्वादयः । मनुष्याणामन्नं मेषाद्या धान्यानि च संति ॥ ९ ॥ यूयं च प्रजासर्गाय पित्रा कृताज्ञाः संतो वृक्षान् दग्धुं कथमर्हथ ॥ १० ॥ अतः पूर्वजैराचरितं मार्गं स्वीकुरुत । प्रदीप्तं कोपं च शांतं कुरुत ॥ ११ ॥ यथा बालानां रक्षकौ पितरौ । स्त्रीणां रक्षकः पतिः । तथा मूर्खाणां बोधकर्ता ज्ञान्येव सुहृत् ॥ १२ ॥ ॥ ॥ ॥

हे प्रचेतसः, ईश्वरो हरिः सर्वभूतानामंतर्देहेष्वास्ते । अतः सर्वं विश्वं तस्याधिष्ठानं पश्यत । एवं कृते भवद्भिस्तस्य तोषणं कृतं स्यात् ॥ १३ ॥ यो देहे आकाशात्पतितं क्रोधमात्मज्ञानेन निवर्तयति स मुक्तो भवति ॥ १४ ॥ अतो दग्धैर्वृक्षैरलम् । शेषाणां वृक्षाणां युष्माकं च कल्याणमस्तु । एषा वृक्षैः पालिता वार्क्षी नाम कन्या पत्नीत्वे प्रतिगृह्यताम् ॥ १५ ॥ हे नृप, एवं प्रचेतसः सांत्वयित्वा तेभ्यः कन्यां च दत्वा सोमो राजा ययौ । तेऽपि विधिना तामुपयेमिरे ॥१६॥ ततस्तेभ्यस्तस्यां दक्षो नाम पुत्रोऽभवत् । यस्य संततिवृद्ध्या त्रैलोक्यं पूर्णमासीत् ॥१७॥ अथ दक्षो यथा भूतानि रेतसा मनसा च ससर्ज तथा मत्तः श्रृणु ॥ १८ ॥ स दक्षः पूर्वं देवासुरमनुष्यादीन् मनसैव ससर्ज ॥ १९ ॥ तमवृद्धं वंशं ज्ञात्वा विंध्याचलं गत्वा दुष्करं तपश्चचार ॥ २० ॥ तत्राघमर्षण-

अंतर्देहेषु भूतानामात्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥ १३ ॥ यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् ॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्तते ॥ १४ ॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ॥ बार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम् ॥ १५ ॥ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे ॥ १६ ॥ तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल ॥ यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥ यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहितः श्रृणु ॥ १८ ॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्नभस्थलजलौकसः ॥ १९ ॥ तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ॥ विंध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः ॥ २० ॥ तत्राघमर्षणं नाम तीर्थं पापहरं परम् ॥ उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम् ॥ २१ ॥ अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजम् ॥ तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ २२ ॥ प्रजापतिरुवाच ॥ नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे ॥ २३ ॥ न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन्संवसतः पुरेऽस्मिन् ॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमस्करोमि ॥ २४ ॥ देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ॥ २५ ॥ यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् ॥ य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥ २६ ॥ मनीषिणोंऽतर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ॥ वह्निं यथा दारुणि पांचदश्यं मनीषया निष्कर्षति गूढम् ॥ २७ ॥ ॥ ॥

नामके तीर्थे स्नात्वा तपसा हरिं तोषयन् सन् ॥२१॥ हंसगुह्याख्येन स्तोत्रेण हरिं तुष्टाव । तदहं तुभ्यं कथयामि ॥२२॥ दक्ष उवाच ॥ पराय जीवमाययोर्नियंत्रे जीवैरदृष्टस्वरूपाय स्वप्रकाशाय नमः ॥२३॥ जीवोऽस्मिन् देहे वसन्नपि स्वपार्श्वे वसतोऽपि यस्य सख्यं न जानाति । तस्मै महेशाय नमस्करोमि ॥२४॥ देहः प्राणाः इंद्रियाणि अंतःकरणं चैतानि स्वस्वरूपमन्यं देवतावर्गं च न विदुः । जीवस्तु स्वस्वरूपमिंद्रियवर्गं देवतावर्गं च वेत्ति तथापि यं सर्वज्ञं न वेद तमनंतमहं स्तौमि ॥२५॥ यदा दर्शनस्मरणयोर्लयेन मनस एकाग्रता भवति तदा केवलेन स्वरूपज्ञानेन यः प्रकाशते तस्मै हंसाय नमः ॥२६॥ यथा याज्ञिकाः पंचदशसामिधेनीमंत्रैः

प्रकाश्यं काष्ठस्थितमग्निं मंथनेन पृथङ्निष्कर्षति तथा विवेकिनोंऽतर्हृदये स्थितं यं स्वबुद्ध्या विविच्य ध्यायंति ॥ २७ ॥ सः अशेषमायानिषेधेन मोक्षसुखानुभवस्वरूपो
विश्वरूपो भगवान् नः प्रसीदताम् ॥ २८ ॥ वचसोक्तं मनोबुद्धींद्रियादिभिर्निरूपितं च यद्यत्तत्तद्यस्य स्वरूपं न भवति तस्मै नमः ॥ २९ ॥
कर्तृकर्मकरणसंप्रदानादिसप्तविभक्त्यर्थप्रतिपादितं भावकर्मादिप्रत्ययार्थरूपं परावरेषां प्राक् प्रसिद्धं च यदेकं ब्रह्म तस्मै नमः ॥ ३० ॥ यस्य शक्तयो
वदतां वादिनां विवादसंवादहेतवो भूत्वा तेषां मोहं कुर्वंति तस्मै अनंतगुणाय नमः ॥ ३१ ॥ उपासनाशास्त्रे यस्य विराड्रूपस्य पादादिकं पातालाद्यस्तीति ।
ज्ञानशास्त्रे पादादिकं नास्तीति च परस्परं विरुद्धयोः शास्त्रयोरनुकूलमपि वस्तुतस्तयोः परं यत्समं ब्रह्म तस्मै नमः ॥ ३२ ॥ यो नामरूपरहितोऽपि भगवान्

स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८ ॥
यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य ॥ मा भूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणापायविसर्गलक्षणः
॥ २९ ॥ यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ॥ परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकम्
॥ ३० ॥ यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति ॥ कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने
॥ ३१ ॥ अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ॥ अवेक्षितं किंचन योगसांख्ययोः समं परं ह्यनुकूलं
बृहत्तत् ॥ ३२ ॥ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः ॥ नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं
परमः प्रसीदतु ॥ ३३ ॥ यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे
कुरुतान्मनोरथम् ॥ ३४ ॥ श्रीशुक उवाच ॥ इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे ॥ आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः
॥ ३५ ॥ कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः ॥ चक्रशंखासिचर्मेषुधनुःपाशगदाधरः ॥ ३६ ॥ पीतवासा घनश्यामः
प्रसन्नवदनेक्षणः ॥ वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥ महाकिरीटकटकः स्फुरन्मकरकुंडलः ॥ कांच्यंगुलीयवलय
नूपुरांगदभूषितः ॥ ३८ ॥ त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः ॥ वृतो नारदनंदाद्यैः पार्षदैः सुरयूथपैः ॥ ३९ ॥ स्तूयमानोऽनुगायद्भिः
सिद्धगंधर्वचारणैः ॥ रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ॥ ४० ॥ ॥ ॥

पादमूलं भजतामनुग्रहार्थं जन्मकर्मभिर्नामरूपाणि धत्ते स मह्यं प्रसीदतु ॥ ३३ ॥ यः प्राकृतैर्ज्ञानमार्गैर्जनानामिच्छानुरूपमनेकदेवतारूपेण भासते । स
ईश्वरो मे मनोरथं पूर्णं करोतु ॥ ३४ ॥ श्रीशुक उवाच ॥ एवं स्तुतो भक्तवत्सलो भगवान् तस्मिन्नघमर्षणे तीर्थे प्रादुरासीत् ॥ ३५ ॥ गरुडारूढः
प्रलंबाष्टमहाभुजः शंखचक्रखड्गचर्मबाणधनुःपाशगदाधरः ॥ ३६ ॥ घनश्यामः पीतवासाः प्रसन्नवदनेक्षणः श्रीवत्सकौस्तुभधरः ॥ ३७ ॥ किरीटकुंडलकटकनूपुरांगदादिभिर्भूषितः
॥ ३८ ॥ नारदनंदाद्यैः पार्षदैः परिवेष्टितः त्रैलोक्यमोहनं रूपं धारयन् प्रादुरासीत् ॥ ३९ ॥ तदा देवैः
स्तूयमानं गंधर्वादिभिर्गीयमानं च भगवंतं वीक्ष्य ॥ ४० ॥ ॥ ॥ ॥

हृष्टमना दक्षो भूमौ ननाम । तदा प्रेम्णा रुद्धकंठः सन् किंचिदपि वक्तुं नाशकत् ॥४१॥ तदा नम्रं भक्तं प्रजाकामं दक्षं चित्तज्ञो भगवान् जगाद ॥ ४२ ॥ श्रीभगवानुवाच ॥ हे प्राचेतस, भवान् तपसा सिद्धोऽसि । यतो मयि प्रेमलक्षणं भावं गतः ॥ ४३ ॥ भूतानां समृद्धयो भूयासुरिति या ममेच्छा सा त्वत्तपसा पूर्णा भविष्यतीति त्वय्यहं प्रीतोऽस्मि ॥४४॥ ब्रह्मा रुद्रो भवंतः प्रजापतयो मनवश्चैता भूतोत्पत्तिहेतवो मम विभूतयः संति ॥ ४५ ॥ तपो मे हृदयम् । विद्या मे तनुः । धर्मो मे आत्मा । देवा मे प्राणाः ॥ ४६ ॥ सृष्टेः पूर्वमहमेवासम् । अन्यद्ग्राह्यं ग्राहकं च किंचिदपि नासीत् ॥ ४७ ॥ मयि मायागुणतो गुणमयं ब्रह्मांडं जातम् । तदैव ब्रह्मा बभूव ॥४८॥ स ब्रह्मा यदा सर्गकर्मणि आत्मानमसमर्थमिव मेने ॥ ४९ ॥ तदा मया तपतपेत्युक्तः सन् तपसा युष्मान्

ननाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः ॥ न किंचनोदीरयितुमशकत्तीव्रया मुदा ॥ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ॥४१॥ तं तथावनतं भक्तं प्रजाकामं प्रजापतिम् ॥ चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥ ४२ ॥ श्रीभगवानुवाच ॥ प्राचेतस महाभाग संसिद्धस्तपसा भवान् ॥ यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥४३॥ प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योद्बृंहणं तपः ॥ ममैष कामो भूतानां यद्भूयासुर्विभूतयः ॥ ४४ ॥ ब्रह्मा भवो भवंतश्च मनवो विबुधेश्वराः ॥ विभूतयो मम ह्येता भूतानां भूतिहेतवः ॥४५॥ तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाऽऽकृतिः ॥ अंगानि क्रतवो जाता धर्म आत्माऽसवः सुराः ॥ ४६ ॥ अहमेवासमेवाग्रे नान्यत्किंचांतरं बहिः ॥ संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः॥४७॥ मय्यनंतगुणेऽनंते गुणतो गुणविग्रहः ॥ यदासीत्तत एवाद्यः स्वयंभूः समभूदजः ॥४८॥ स वै यदा महादेवो मम वीर्योपबृंहितः ॥ मेने खिलमिवात्मानमुद्यतः सर्गकर्मणि ॥४९॥ अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम् ॥ नव विश्वसृजो युष्मान्येनादावसृजद्विभुः ॥५०॥ एषा पंचजनस्यांग दुहिता वै प्रजापतेः ॥ असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम् ॥५१॥ मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः ॥ मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥५२॥ त्वत्तोऽधस्तात्प्रजाः सर्वा मिथुनीभूय मायया ॥ मदीयया भविष्यंति हरिष्यंति च मे बलिम् ॥५३॥ श्रीशुक उवाच ॥ इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभावनः ॥ स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे हरिः ॥५४॥ इति श्रीम० षष्ठस्कंधे चतुर्थोऽध्यायः ॥४॥ ॥ श्रीशुक उवाच ॥ तस्यां स पांचजन्यां वै विष्णुमायोपबृंहितः ॥ हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥१॥ अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप ॥ पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशम् ॥ २॥ ॥ ॥

नव प्रजापतीन् ससर्ज ॥५०॥ हे दक्ष, पंचजनस्य प्रजापतेर्दुहिताऽसिक्नीनाम्न्यस्ति । तां पत्नीत्वे त्वं प्रतिगृहाण ॥५१॥ त्वं तस्यां मैथुनधर्मेण भूरिशः प्रजा भावयिष्यसि ॥५२॥ त्वत्तोऽधस्तात्सर्वाः प्रजाः मन्मायया मैथुनधर्मेणैव भविष्यंति ॥५३॥ श्रीशुक उवाच ॥ इत्युक्त्वा भगवान् तस्य दक्षस्य पश्यतः सतस्तत्रैवांतर्दधे ॥५४॥ इति श्रीमद्भागवतचू० षष्ठ० चतुर्थोऽध्यायः ॥ ४ ॥ ॥ पंचमे नारदेनाथ वाचःकूटैस्तु नाशितान् । सुतानाकर्ण्य दक्षोऽमुं शशापेति निरूप्यते ॥ १ ॥ श्रीशुक उवाच ॥ स दक्षस्तस्यां पांचजन्यां हर्यश्वनामकानयुतं १०००० पुत्रान् जनयामास ॥ १ ॥ हे नृप, ते सर्वे एकाचारस्वभावाः पुत्राः पित्रा प्रजासर्गे आज्ञा-

पिताः संतः प्रतीचीं दिशं प्रययुः ॥२॥ तत्र सिंधुनद्याः समुद्रस्य च संगमे नारायणसरोनाम तीर्थं प्राप्य ॥ ३ ॥ तस्य स्नानादेव शुद्धांतःकरणाः संतो मोक्षे उत्पन्नबुद्धयोऽपि ते ॥४॥ पितुराज्ञया बद्धाः संतः प्रजाविवृद्धये उग्रं तपस्तेपिरे । तान्नारदो ददर्श ॥ ५ ॥ उवाच च । हे हर्यश्वाः, भुवोंऽतं न दृष्ट्वा यूयं बालबुद्ध्या प्रजाः कथं स्रक्ष्यथ ॥६॥ तथैकपुरुषं राष्ट्रम् । अदृष्टनिर्गमं बिलम् । बहुरूपां स्त्रियम् ॥ ७ ॥ पुंश्चलीपतिं पुरुषम् । उभयतोवाहां नदीम् । पंचविंशतेर्गृहम् । चित्रकथं हंसम् । स्वतंत्रभ्रमणस्वभावं क्षौरपव्यम् ॥ ८ ॥ विदुषः स्वपितुरादेशं च न विज्ञाय कथं सर्गं करिष्यथ ॥ ९ ॥ श्रीशुक उवाच ॥ हर्यश्वा देवर्षेरेवं वाचःकूटानि श्रुत्वा धिया विचारयामासुः ॥१०॥ लिंगशरीरस्य नाशमज्ञात्वा मोक्षानुपयोगिभिः कर्मभिः किं भवेत् ॥ ११ ॥ एक एव भगवानाश्रयः सर्वसाक्षी तमज्ञात्वा ईश्वराऽसमर्पितैः कर्मभिः किं स्यात् ॥१२॥ पातालमिव ज्योतीरूपं ब्रह्म । यत्र गत्वा न निवर्तेत । तदविदुषो नश्वरस्वर्गादिसाधनैः कर्मभिः किं० ॥ १३ ॥ रजआदिगुणैर्युक्ताया बुद्धेर्विवेकमप्राप्तस्याशांतैः कर्मभिः किं० ॥ १४ ॥ बुद्धिसंगेन भ्रंशितस्वातंत्र्यं संसरंतं जीवमजानतो बुद्ध्यविवेकप्राप्तैः कर्म० ॥ १५ ॥ उत्पत्तिनाशकरीं मायामविचारयतो मायिकैः कर्मभिः किं० ॥ १६॥ पंचविंशतितत्वानां य आश्रयोंऽतर्यामी तं न जानतो मिथ्यास्वातंत्र्यकृतैः कर्म० ॥ १७ ॥ ईश्वरप्रतिपादकं शास्त्रं बंधमोक्षानुदर्शनमविदुषो बहिर्मुखैः कर्मभिः किं भवेत् ॥ १८ ॥ ॥

तत्र नारायणसरस्तीर्थं सिंधुसमुद्रयोः ॥ संगमो यत्र सुमहन्मुनिसिद्धनिषेवितम् ॥ ३ ॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥ ४ ॥ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः ॥ प्रजाविवृद्धये यत्तान्देवर्षिस्तान्ददर्श ह ॥ ५ ॥ उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः ॥ अदृष्ट्वांतं भुवो यूयं बालिशा बत पालकाः ॥ ६ ॥ तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमम् ॥ बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ॥ ७ ॥ नदीमुभयतोवाहां पंचपंचाद्भुतं गृहम् ॥ क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयंभ्रमिम् ॥ ८ ॥ कथं स्वपितुरादेशमविद्वांसो विपश्चितः ॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ॥ ९ ॥ ॥ श्रीशुक उवाच ॥ तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया ॥ वाचःकूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥ १० ॥ भूः क्षेत्रं जीवसंज्ञं यदनादि निजबंधनम् ॥ अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ॥ ११ ॥ एक एवेश्वरस्तुर्यो भगवान्स्वाश्रयः परः ॥ तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत् ॥ १२ ॥ पुमान्नैवैति यद्गत्वा बिलस्वर्गं गतो यथा ॥ प्रत्यग्धामाऽविद इह किमसत्कर्मभिर्भवेत् ॥ १३ ॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता ॥ तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत् ॥ तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १५ ॥ सृष्ट्यप्ययकरीं मायां वेलाकूलांतवेगिताम् ॥ मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् ॥ १६ ॥ पंचविंशतितत्वानां पुरुषोऽद्भुतदर्पणम् ॥ अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥ ऐश्वरं शास्त्रमुत्सृज्य बंधमोक्षानुदर्शनम् ॥ विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ॥ १८ ॥ ॥ ॥

---

१ भुवोंऽतमित्यारभ्य दश वाचःकूटानि तेषां व्याख्या एकादशश्लोकादारभ्य कृताऽस्ति ।

भ्रमणात्मकं जगदाकर्षकं कालचक्रमबुधस्य सकामैः कर्मभिः किं भवेत् ॥१९॥ शास्त्ररूपस्य पितुर्निवर्तकमादेशं यो न वेद। स गुणमये प्रवृत्तिमार्गे विश्वासयुक्तः सन् सृष्ट्यादौ कथं प्रवृत्तः स्यात् ॥ २० ॥ हे राजन्, एवं कृतनिश्चयास्ते हर्यश्वा नारदं परिक्रम्य अपुनरावृत्तिमार्गं ययुः ॥ २१ ॥ नारदोऽपि वीणां क्वणयन् हृषीकेशपदांबुजे अखंडं चित्तमावेश्य लोकेषु विचचार ॥ २२ ॥ ततो दक्षो नारदात्पुत्राणां नाशं निशम्य पुत्रशोकेन दुःखितो बभूव ॥ २३ ॥ ततो ब्रह्मणा सांत्वितः सन् स दक्षः पुनः शबलाश्वसंज्ञान् सहस्रं पुत्रान् जनयामास ॥२४॥ तेऽपि प्रजासर्गे पित्राऽऽज्ञापिताः संतो यत्र पूर्वे बंधवः सिद्धास्तन्नारायणसरो जग्मुः॥२५॥ ते तत्र सरसि स्नात्वा शुद्धचित्ता भूत्वा ब्रह्म जपंतः संतस्तपस्तेपुः ॥२६॥ कतिचिन्मासानुदकभक्षाः कतिचिन्मासान् वायुभक्षा भूत्वा हरिं

कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् ॥ स्वतंत्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥ शास्त्रस्य पितुरादेशं यो न वेद निवर्तकम् ॥ कथं तदनुरूपाय गुणविश्रंभ्युपक्रमेत् ॥ २० ॥ इति व्यवसिता राजन्हर्यश्वा एकचेतसः ॥ प्रययुस्तं परिक्रम्य पंथानमनिवर्तनम् ॥ २१ ॥ स्वरब्रह्मणि निर्भातहृषीकेशपदांबुजे ॥ अखंडं चित्तमावेश्य लोकाननुचरन्मुनिः ॥ २२ ॥ नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् ॥ अन्वतप्यत कः शोचन्सुप्रजास्त्वं शुचां पदम् ॥ २३ ॥ स भूयः पांचजन्यायामजेन परिसांत्वितः ॥ पुत्रानजनयद्दक्षः शबलाश्वान्सहस्रशः ॥ २४ ॥ तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः ॥ नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः ॥ २५ ॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ जपंतो ब्रह्म परमं तेपुस्तत्र महत्तपः ॥२६॥ अब्भक्षाः कतिचिन्मासान्कतिचिद्वायुभोजनाः ॥ आराधयन्मंत्रमिममभ्यस्यंत इडस्पतिम् ॥ २७ ॥ ॐ नमो नारायणाय पुरुषाय महात्मने ॥ विशुद्धसत्वधिष्ण्याय महाहंसाय धीमहि ॥ २८ ॥ इति तानपि राजेंद्र प्रतिसर्गधियो मुनिः ॥ उपेत्य नारदः प्राह वाचःकूटानि पूर्ववत् ॥ २९ ॥ दाक्षायणाः संश्रृणुत वदतो निगमं मम ॥ अन्विच्छतानुपदवीं भ्रातृणां भ्रातृवत्सलाः ॥ ३० ॥ भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् ॥ स पुण्यबंधुः पुरुषो मरुद्भिः सह मोदते ॥ ३१ ॥ एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः ॥ तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ॥ ३२ ॥ सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ॥ नाद्यापि ते निवर्तंते पश्चिमा यामिनीरिव ॥ ३३ ॥ एतस्मिन्काल उत्पातान्बहून्पश्यन्प्रजापतिः ॥ पूर्ववन्नारदकृतं पुत्रनाशमुपाश्रृणोत् ॥ ३४ ॥ चुक्रोध नारदायासौ पुत्रशोकविमूर्च्छितः ॥ देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ॥ ३५ ॥ ॥ ॥

पूजयंतः संतः ॐनमो नारायणायेत्यादिमंत्रं जपंतिस्म ॥२७॥२८॥ हे नृप, तानपि नारद एत्य पूर्ववद्वाचःकूटान्युवाच ॥२९॥ हे शबलाश्वाः, यूयं ममोपदेशं श्रृणुत। यूयं भ्रातृणां मार्गमनुतिष्ठत ॥३०॥ यो भ्रातृणां मार्गमनुगच्छति स मरुद्भिर्देवैः सह मोदते ॥ ३१ ॥ एवमुक्त्वा नारदो ययौ। ते च शबलाश्वा भ्रातृणामेव मार्गं जग्मुः ॥३२॥ प्रत्यग्वृत्तिलभ्यं निवृत्तिमार्गं गतास्तेऽद्यापि न निवर्तंते ॥ ३३ ॥ एतस्मिन् काले दक्षो बहूनुत्पातान् पश्यन् पूर्ववन्नारदकृतं पुत्रनाशं शुश्राव ॥ ३४ ॥ ततः पुत्रशोकव्याप्तः क्रोधेन स्फुरिताधरोष्ठश्च दक्षः स्वेच्छया प्राप्तं नारदं दृष्ट्वा जगाद ॥ ३५ ॥ ॥ ॥

॥ दक्ष उवाच ॥ अहो असाधो, त्वया साधुरूपेण मम बालानां संन्यासिनो मार्गो दर्शितः ॥३६॥ त्रिभिर्ऋणैरमुक्तानामिहपरयोर्लोकयोर्विघातः कृतः ॥३७॥ एवं त्वं निर्दयो बालानां बुद्धिभेदकरो निर्लज्जः सन् हरेः पार्षदमध्ये कथं चरसि ॥ ३८ ॥ वैरभावरहितानां प्राणिनां वैरंकरं त्वां विनाऽन्ये भागवता भूतानामनुग्रहे तत्पराः संति ॥ ३९ ॥ एवं बुद्धिचालने कृते सति पुंसां वैराग्यं नैव स्यात् ॥ ४० ॥ यथा नरो विषयोद्भवं सुखदुःखानुभवं ज्ञात्वा पश्चाद्वैराग्यं प्राप्नोति तथा विषयानुभवं विना न प्राप्नोति । न च तेन विना ज्ञानं न च तेन विना मोक्षः ॥४१॥ अतस्त्वया गृहस्थाश्रमिणामस्माकं विप्रियं कृतम् ॥४२॥ यस्मात्त्वयास्माकं वंशच्छेदः कृतः । अतो लोके भ्रमतस्ते स्थिरं स्थानं न भवेत् ॥ ४३ ॥ श्रीशुक उवाच ॥ नारदस्तदा दक्षं प्रतिशप्तुं समर्थोऽपि दक्षस्य शापं

॥ दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिंगेन नस्त्वया ॥ असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥ ३६ ॥ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ॥ विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ॥ ३७ ॥ एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः ॥ पार्षदमध्ये चरसि यशोहा निरपत्रपः ॥ ३८ ॥ ननु भागवता नित्यं भूतानुग्रहकातराः ॥ ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणाम् ॥ ३९ ॥ नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा ॥ मन्यसे यद्युपशमं स्नेहपाशनिकृंतनम् ॥ ४० ॥ नानुभूय न जानाति पुमान्विषयतीक्ष्णताम् ॥ निर्विद्येत स्वयं तस्मान्न तथा भिन्नधीः परैः ॥ ४१ ॥ यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनाम् ॥ कृतवानसि दुर्मर्ष विप्रियं तव मर्षितम् ॥ ४२ ॥ तंतुकृंतन यन्नस्त्वमभद्रमचरः पुनः ॥ तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदम् ॥ ४३ ॥ श्रीशुक उवाच ॥ प्रतिजग्राह तद्बाढं नारदः साधुसंमतः ॥ एतावान्साधुवादो हि तितिक्षेतेश्वरः स्वयम् ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे नारदशापो नाम पंचमोऽध्यायः ॥ ५ ॥ ॥ श्रीशुक उवाच ॥ ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा ॥ षष्टिं संजनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥ दश धर्माय कायेंदोर्द्विषट् त्रिणव दत्तवान् ॥ भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः ॥ २ ॥ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ॥ यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ॥ ३ ॥ भानुर्लंबा ककुब्जामिर्विश्वा साध्या मरुत्वती ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुतान् शृणु ॥ ४ ॥ भानोऽस्तु देवऋषभ इंद्रसेनस्ततो नृप ॥ विद्योत आसील्लंबायास्ततश्च स्तनयित्नवः ॥ ५ ॥ ॥ ॥

जगृहे । यतः परकृतापराधसहनकर्तैव साधुः ॥४४॥ ॥ इति श्रीमद्भागवतचू० षष्ठ० पंचमोऽध्यायः ॥५॥ ॥ षष्ठे दक्षेण सृष्टायां कन्याषष्ट्यां प्रकीर्तिताः । पृथग्वंशा यतो जातो विश्वरूपोऽदितेः सुतात् ॥१॥ श्रीशुक उवाच ॥ हे नृप, ततो ब्रह्मणा सांत्वितो दक्षोऽसिक्न्यां पत्न्यां षष्टिं कन्या जनयामास ॥१॥ तत्र १ धर्माय दश । २ कश्यपाय त्रयोदश । ३ चंद्राय सप्तविंशतिः । ४ भूताय द्वे । ५ अंगिरसे द्वे । ६ कृशाश्वाय द्वे । ७ तार्क्ष्येति नामांतरं प्राप्ताय कश्यपाय चतस्रः ॥२॥ आसां नामानि मत्तः शृणु । यासां प्रसवैस्त्रयो लोका आपूरिताः ॥३॥ तत्र १ धर्मस्य-भानुः लंबा ककुप् जामिः विश्वा साध्या मरुत्वती वसुः मुहूर्ता संकल्पा चेति दश स्त्रियः । तासां पुत्रपौत्रान् शृणु ॥ ४ ॥ भानोः-देवऋषभः तस्येंद्रसेनः । लंबायाः-विद्योतः तस्य स्तनयित्नवः ॥ ५ ॥ ॥

---

१ जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वेति ।

ककुभः– संकटः तस्य कीकटः ततो दुर्गाभिमानिनो देवाः । जाम्याः–स्वर्गः ततो नंदिः ॥ ६ ॥ विश्वायाः–विश्वेदेवाः तेऽप्रजाः । साध्यायाः– साध्यो गणः साध्यानां सुतोऽर्थसिद्धिः ॥ ७ ॥ मरुत्वत्यां–मरुत्वान् जयंतश्चेति द्वौ बभूवतुः । जयंतो वासुदेवांशः यमुपेंद्रमिति विदुः ॥ ८ ॥ मुहूर्तायाः–मौहूर्तिका देवगणाः ये स्वस्वकालजं फलं प्रयच्छंति ॥ ९ ॥ संकल्पायाः–संकल्पः ततः कामः । वसोः–अष्टौ वसवः तेषां नामानि शृणु ॥ १० ॥ –द्रोणः प्राणः ध्रुवः अर्कः अग्निः दोषः वसुः विभावसुरिति । तेषां वंशाः । १ द्रोणस्य–अभिमत्यां हर्षशोकभयादय आसन् ॥ ११ ॥ २ प्राणस्य–ऊर्जस्वत्यां सहः आयुः पुरोजवश्च पुत्राः । ३ ध्रुवस्य–धरण्यां नगराभिमानिन्यो देवताः ॥१२॥ ४ अर्कस्य–वासनायां तर्षादयः । ५ अग्नेः–वसोर्धारायां द्रविणकादयः ॥ १३ ॥ अ-

ककुभः संकटस्तस्य कीकटस्तनयो यतः ॥ भुवो दुर्गाणि जामेयः स्वर्गो नंदिस्ततोऽभवत् ॥६॥ विश्वेदेवास्तु विश्वाया अप्रजांस्ता-
न्प्रचक्षते ॥ साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ॥७॥ मरुत्वांश्च जयंतश्च मरुत्वत्यां बभूवतुः ॥ जयंतो वासुदेवांश
उपेंद्र इति यं विदुः ॥८॥ मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ॥ ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजम् ॥९॥ संकल्पा-
याश्च संकल्पः कामः संकल्पजः स्मृतः ॥ वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥१०॥ द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसु-
र्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥११॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः ॥ ध्रुवस्य भार्या धरणि-
रसूत विविधाः पुरः ॥ १२ ॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः ॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ॥ १३ ॥
स्कंदश्च कृतिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला ॥१४॥ वसोरांगिरसीपुत्रो विश्वकर्मा कृती-
पतिः ॥ ततो मनुश्चाक्षुषोऽभूद्विश्वे साध्या मनोः सुताः ॥ १५॥ विभावसोरसूतोषा व्युष्टं रोचिषमातपम् ॥ पंचयामोऽथ भूतानि
येन जाग्रति कर्मसु ॥१६॥ सरूपाऽसूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः ॥ १७ ॥
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ॥ रुद्रस्य पार्षदाश्चान्ये प्रेता भूतविनायकाः ॥१८॥ प्रजापतेरंगिरसः स्वधा पत्नी पितॄ-
नथ ॥ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती ॥ १९ ॥ कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् ॥ धिषणायां वेदशिरा देवलं
वयुनं मनुम् ॥ २० ॥ तार्क्ष्यस्य विनता कद्रूः पतंगी यामिनी इति ॥ पतंग्यसूत पतगान्यामिनी शलभानथ ॥ २१ ॥ ॥

न्यस्यां कृत्तिकायां स्कंदः तस्य विशाखादयः पुत्राः । ६ दोषस्य–शर्वर्यां शिशुमारः ॥१४॥ ७ वसोः–आंगिरस्यां विश्वकर्मा तस्य चाक्षुषो मनुः । मनोः विश्वे साध्याश्च पुत्राः ॥१५॥ ८ विभावसोः–उषायां व्युष्टः रोचिः आतपश्चेति त्रयः । आतपाद्दिवसो जातः ॥ १६ ॥ ४ भूतस्य--सरूपायां रैवतः अजः भवः भीमः वामः उग्रः वृषाकपिः अजैकपात् अहिर्बुध्न्यः बहुरूपः महान् इत्येकादश रुद्रा जाताः ॥१७॥ अन्यस्यां भार्यायां प्रेतभूतविनायकादयो रुद्रपार्षदा आसन् ॥१८॥ ५ अंगिरसः–स्वधापत्न्यां पितरः । अन्यस्यां सत्यां अथर्वांगिरानाम वेदो जातः ॥१९॥ ६ कृशाश्वस्य–आर्चिषि धूम्रकेशः । अन्यस्यां धिषणायां देवलः वयुनः मनुः एते त्रयो जाताः ॥ २० ॥ ७ तार्क्ष्यस्य–विनता कद्रूः पतंगी यामिनी चेति चतस्रः स्त्रियः । तत्र पतंग्यां पक्षिण । यामिन्यां शलभ-

पक्षिणः ॥२१॥ विनतायां गरुडोऽरुणश्च । कद्रूसंज्ञायां नागाः ॥ २२ ॥ ३ चंद्रस्य—कृत्तिकादयः सप्तविंशतिः स्त्रियः । चंद्रः दक्षशापात् क्षयरोग्यनपत्यश्चाभूत् ॥ २३ ॥ तदा दक्षं पुनः प्रसाद्य कृष्णपक्षे खंडिताः कला एव केवलं शुक्लपक्षे लेभे न त्वपत्यानि ॥ २४ ॥ अथ २ कश्यपस्य—स्त्रीणां नामानि शृणु । अदितिः दितिः दनुः काष्ठा अरिष्टा सुरसा इला मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ॥ २५ ॥ २६ ॥ तत्र—१३ तिमेः—यादोगणाः । १२ सरमायाः—श्वापदाः । ११ सुरभेः—महिषादयो द्विशफाः ॥२७॥ १० ताम्रायाः—श्येनगृध्राद्याः । ८ मुनेः—अप्सरोगणाः । ९ क्रोधवशायाः—दंदशूकादिसर्पाः ॥२८॥ ७ इलायाः—वृक्षाः । ६ सुरसायाः--राक्षसाः । ५ अरिष्टायाः--गंधर्वाः । ४ काष्ठायाः—अश्वाद्या एकशफाः ॥२९॥ ३ दनोः--एकषष्टिः सुताः । तत्र मुख्याः--

सुपर्णाऽसूत गरुडं साक्षाद्यज्ञेशवाहनम् ॥ सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥२२॥ कृत्तिकादीनि नक्षत्राणींदोः पत्न्यस्तु भारत ॥ दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ २३ ॥ पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः ॥२४॥ शृणु नामानि लोकानां मातॄणां शंकराणि च ॥ अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत्॥२५॥अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ॥२६॥ तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः ॥ सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ॥२७॥ ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ दंदशूकादयः सर्पा राजन् क्रोधवशात्मजाः ॥२८॥ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः ॥ २९ ॥ सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु ॥ द्विमूर्धा शंबरोऽरिष्टो हयग्रीवो विभावसुः ॥३०॥ अयोमुखः शंकुशिराः स्वर्भानुः कपिलोऽरुणः ॥ पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ॥३१॥ धूमकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ॥ ३२॥ वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ॥ वैश्वानरसुतायाश्च चतस्रश्चारुदर्शनाः ॥३३॥ उपदानवी हयशिरा पुलोमा कालका तथा ॥ उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ॥ ३४॥ पुलोमां कालकां च द्वे वैश्वानरसुते तु कः ॥ उपयेमेऽथ भगवान्कश्यपो ब्रह्मचोदितः ॥३५॥ पौलोमाः कालकेयाश्च दानवा युद्धशालिनः ॥ तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता ॥ जघान स्वर्गतो राजन्नेक इंद्रप्रियंकरः ॥३६॥ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ॥ राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागताः ॥ ३७ ॥ ॥

द्विमूर्धा शंबरः अरिष्टः हयग्रीवः विभावसुः ॥३०॥ अयोमुखः शंकुशिराः स्वर्भानुः कपिलः अरुणः पुलोमा वृषपर्वा एकचक्रः अनुतापनः ॥ ३१ ॥ धूमकेशः विरूपाक्षः विप्रचित्तिः दुर्जयश्चेति । तत्र स्वर्भानोः सुप्रभां कन्यां नमुचिरुवाह ॥३२॥ वृषपर्वणः शर्मिष्ठां ययातिरुवाह। दनोः पुत्रो वैश्वानरः तस्य--उपदानवी हयशिरा पुलोमा कालका चेति चतस्रः कन्याः ॥ ३३ ॥ तत्र हिरण्याक्ष उपदानवीं क्रतुर्हयशिरां ब्रह्मणा प्रेरितः कश्यपः पुलोमां कालकां चोवाह ॥ ३४ ॥ ॥ ३५ ॥ ताभ्यां पौलोमकालकेयनामकाः षष्टिसहस्राणि युद्धशालिनो दानवा आसन् ॥ तान् स्वर्गगतोऽर्जुन इंद्रप्रियार्थं जघान ॥ ३६ ॥ विप्रचित्तिः सिंहिकायां एकाधिकं शतं पुत्रानजीजनत् । तत्र यो ग्रहत्वं प्राप स राहुर्ज्येष्ठः केतवश्च शतमासन् ॥ ३७ ॥ ॥ ॥

अथ १ अदितेर्वंशं श्रृणु । यत्र नारायणोंऽशेनावतरत् ॥३८॥ अदितेर्द्वादश पुत्राः । ते च--विवस्वान् अर्यमा पूषा त्वष्टा सविता भगः धाता विधाता वरुणः मित्रः शक्रः उरुक्रमश्चेति ॥३९॥ तत्र १ विवस्वतः संज्ञा छाया चेति द्वे भार्ये। तत्र संज्ञा--श्राद्धदेवं मनुं यमं यमुनां च सुषुवे। सैव वडवा भूत्वा अश्विनीकुमारौ सुषुवे ॥४०॥ छाया शनैश्चरं सावर्णिं मनुं तपतीं कन्यां च सुषुवे । सा तपती कन्या संवरणं पतिं वव्रे॥४१॥ २ अर्यम्णः--मातृकायां मनुष्या आसन् ॥४२॥ ३ पूषा तु--अनपत्यः पिष्टभुग्जातः ॥४३॥ ४ त्वष्टुः--रचनायां संनिवेशो विश्वरूपश्च जज्ञे ॥४४॥ बृहस्पतिना त्यक्ता देवा द्विषतां दौहित्रमपि विश्वरूपं पौरोहित्याय वव्रिरे ॥४५॥ इति श्रीमद्भागवतचू० षष्ठ० षष्ठोऽध्यायः ॥ ६ ॥ सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः । गुरुणा संपरित्यक्तैः पौरो-

अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ॥ यत्र नारायणो देवः स्वांशेनावतरद्विभुः ॥३८॥ विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः ॥ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥३९॥ विवस्वतः श्राद्धदेवं संज्ञाऽसूयत वै मनुम् ॥ मिथुनं च महाभागा यमं देवं यमीं तथा ॥ सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ॥४०॥ छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः ॥ कन्यां च तपतीं या वै वव्रे संवरणं पतिम् ॥४१॥ अर्यम्णोमातृका पत्नी तयोश्चर्षणयः सुताः ॥ यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥४२॥ पूषानपत्यः पिष्टादो भग्नदंतोऽभवत्पुरा ॥ योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ॥४३॥ त्वष्टुर्दैत्यानुजा भार्या रचनानाम कन्यका ॥ संनिवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ॥४४॥ तं वव्रिरे सुरगणा दौहित्रं द्विषतामपि ॥ विमतेन परित्यक्ता गुरुणांगिरसेन यत् ॥४५॥ इति श्रीम०महा०षष्ठ०षष्ठोऽध्यायः ॥६॥ ॥ राजोवाच ॥ कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः ॥ एतदाचक्ष्व भगवन् शिष्याणामक्रमं गुरौ ॥१॥ श्रीशुक उवाच ॥ इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः ॥ मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ॥२॥ विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः ॥ सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥३॥ विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ॥ निषेव्यमाणो मघवान्स्तूयमानश्च भारत ॥४॥ उपगीयमानो ललितमास्थानाध्यासनाश्रितः ॥ पांडुरेणातपत्रेण चंद्रमंडलचारुणा ॥५॥ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ॥ विराजमानः पौलोम्या सहार्धासनया भृशम् ॥ ६ ॥ स यदा परमाचार्यं देवानामात्मनश्च ह ॥ नाभ्यनंदत संप्राप्तं प्रत्युत्थानासनादिभिः ॥ ७ ॥ वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम् ॥ नोच्चचालासनादिंद्रः पश्यन्नपि सभागतम् ॥ ८ ॥ ॥ ॥ ॥

हित्यमथाकरोत् ॥ १ ॥ राजोवाच ॥ हे ब्रह्मन्, बृहस्पतिः कस्माद्देवान् त्यक्तवान् । एतं शिष्याणां गुरावपराधं वद ॥ १ ॥ श्रीशुक उवाच ॥ इंद्रस्त्रैलोक्यैश्वर्यमदेन मत्तः मरुद्भिर्वसुरुद्रादित्यैः ॥ २ ॥ विश्वेदेवैरश्विनीकुमाराभ्यां सिद्धचारणगंधर्वैश्च संवेष्टितः ॥ ३ ॥ मुनिभिर्विद्याधराप्सरोभिः किन्नरैश्च सेव्यमानः ॥ ४ ॥ सिंहासनस्थितः श्वेतच्छत्रेण चामरव्यजनादिभिः अर्धासनगतयेंद्राण्या च विराजमानः सन् ॥ ५ ॥ ६ ॥ यदा देवानामात्मनश्चाचार्यं बृहस्पतिं संप्राप्तं प्रत्युत्थानादिभिर्नाभ्यनंदत ॥ ७ ॥ किंतु तं गुरुं सभागतं पश्यन्नपि आसनान्नोच्चचाल ॥ ८ ॥ ॥ ॥

ततो निर्गत्य सहसा कविरांगिरसः प्रभुः ॥ आययौ स्वगृहं तूष्णीं विद्वान् श्रीमदविक्रियाम् ॥ ९ ॥ तर्ह्येव प्रतिबुध्द्येंद्रो गुरुहेलनमात्मनः ॥ गर्हयामास सहसि स्वयमात्मानमात्मना ॥ १० ॥ अहो बत ममासाधु कृतं वै दभ्रबुद्धिना ॥ यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥ ११ ॥ को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि ॥ ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥ १२ ॥ ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन ॥ प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥१३॥ तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ॥ ये श्रद्दध्युर्वचस्ते वै मज्जंत्यश्मप्लवा इव ॥ १४ ॥ अथाहममराचार्यमगाधधिषणं द्विजम् ॥ प्रसादयिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥१५॥ एवं चिंतयतस्तस्य मघोनो भगवान्गृहात् ॥ बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥१६॥ गुरोर्नाधिगतः संज्ञां परीक्षन्भगवान्स्वराट् ॥ ध्यायन्धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥१७॥ तच्छ्रुत्वैवासुराः सर्व आश्रित्यौशनसं मतम् ॥ देवान्प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥१८॥ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ॥ ब्रह्माणं शरणं जग्मुः सहेंद्रा नतकंधराः ॥१९॥ तांस्तथाभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः ॥ कृपया परया देव उवाच परिसांत्वयन् ॥ २०॥ ब्रह्मोवाच ॥ अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत् ॥ ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनंदत ॥ २१ ॥ तस्यायमनयस्यासीत्परेभ्यो वः पराभवः ॥ प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च यत्सुराः ॥२२॥ मघवन्द्विषतः पश्य प्रक्षीणान्गुर्वतिक्रमात् ॥ संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः ॥ आददीरन्निलयनं ममापि भृगुदेवताः ॥२३॥ त्रिविष्टपं किं गणयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः ॥ न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि नरेश्वराणाम् ॥२४॥ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतम् ॥ सभाजितोऽर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ २५ ॥

तदा गुरुः संपत्तिमदेन व्याप्तमिंद्रं दृष्ट्वा स्वगृहं ययौ ॥ ९ ॥ तत इंद्रो गुरोरपमानं ज्ञात्वा सभायां स्वं निंदयन्नाह ॥१०॥ अहो ऐश्वर्यमत्तेन मया सभायां गुरुरपमानितः । अतो मां धिक् ॥ ११ ॥ को ज्ञानी स्वर्गस्यापि लक्ष्मीमिच्छेत् । यया देवेश्वरोऽप्यहमासुरं भावं प्रापितः ॥ १२ ॥ राज्ञा आसनान्नोत्थातव्यमिति ये वदंति ते धर्मं न विदुः ॥ १३ ॥ तेषां कुमार्गोपदेशकानां वचनं ये श्रद्दध्युस्तेऽधः पतंति ॥ १४ ॥ अतोऽहमगाधबुद्धिं बृहस्पतिं गुरुं शीर्ष्णा तच्चरणं स्पृशन् प्रसादयिष्ये ॥ १५ ॥ एवमिंद्रस्य चिंतयतः सतो बृहस्पतिरात्ममाययांतर्धानं प्राप्तः ॥ १६ ॥ इंद्रो देवैः सह गुरुं शोधयन्नपि तमप्राप्य मनसि स्वस्थतां न प्राप ॥ १७ ॥ तच्छ्रुत्वा सर्वे दैत्याः शुक्रमतमाश्रित्य देवैः सह युद्धं कर्तुमुद्योगं चक्रुः ॥ १८ ॥ तदा तेषां बाणैर्भिन्नावयवाः सेंद्रा देवा ब्रह्माणं शरणं जग्मुः ॥१९॥ ब्रह्मा तान् दुःखितान् दृष्ट्वा कृपया सांत्वयन्नुवाच ॥२०॥ ब्रह्मोवाच ॥ हे देवाः, भवद्भिरैश्वर्यमदेन गुरुस्तिरस्कृतः एतन्महदभद्रं कृतम् ॥ २१ ॥ तस्यान्यायस्य फलरूपोऽयं शत्रुभ्यो वः पराभव आसीत् ॥ २२ ॥ हे मघवन्, गुरोरवज्ञया क्षीणप्रायानपि तव शत्रूनधुना भक्त्या शुक्रमाराध्य वृद्धिं गतान् पश्य । एते ममापि स्थानं गृहीष्यंति ॥ २३ ॥ अभेद्यमंत्ररक्षितास्तेऽसुरा अधुना स्वर्गं किं गणयंति । ब्राह्मणरक्षितानामकल्याणं न स्यात् ॥ २४ ॥ तस्मादाशु यूयं विश्वरूपं विप्रं भजत । तस्यासुरपक्षपातरूपं कर्म यूयं यदि क्षमिष्यध्वं तर्हि स युष्माकं मनोरथान् पूर्णान् करिष्यति ॥ २५ ॥ ॥

॥ श्रीशुक उवाच ॥ एवं ब्रह्मवचः श्रुत्वा देवा विश्वरूपं गत्वा तमालिंग्याब्रुवन् ॥ २६ ॥ देवा ऊचुः ॥ हे तात विश्वरूप, वयं देवास्तेऽतिथयः प्राप्ताः । अस्माकमिच्छा पूर्यताम् ॥२७॥ पुत्राणां पितृशुश्रूषणमेव परमो धर्मः ॥ २८ ॥ यतो गुरुर्वेदस्य मूर्तिः । पिता ब्रह्मणो मूर्तिः । भ्रातेंद्रस्य मूर्तिः । माता भूमेर्मूर्तिः ॥२९॥ भगिनी दयाया मूर्तिः । अतिथिर्धर्मस्य मूर्तिः । सर्वभूतानि श्रीविष्णोर्मूर्तिः ॥ ३० ॥ अतोऽस्माकं पितृणां दुःखं तपसा नाशयन् सन् आज्ञां कर्तुं त्वमर्हसि ॥३१॥ वयं ब्रह्मिष्ठं त्वामुपाध्यायं वृणीमहे । तव तेजसाऽनायासेन शत्रून् जेष्यामः ॥३२॥ कार्येषु मंत्रविदः कनिष्ठस्य वंदनं न निंदंति । मंत्रेभ्योऽन्यत्र वयो ज्यैष्ठ्यस्य कारणं न मंत्रेषु । अतो मंत्रदातृत्वेन त्वमेव ज्येष्ठो भविष्यसि ॥३३॥ एवं देवैः पौरोहित्ये प्रार्थितो विश्वरूपो मधुरवाण्या तानाह

॥ श्रीशुक उवाच ॥ त एवमुदिता राजन्ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥ २६ ॥ देवा ऊचुः ॥ वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ॥ कामः संपाद्यतां तात पितॄणां समयोचितः ॥ २७ ॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् ॥ अपि पुत्रवतां ब्रह्मन्किमुत ब्रह्मचारिणाम् ॥ २८ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः ॥ २९ ॥ दयाया भगिनी मूर्तिर्धर्मस्यात्माऽतिथिः स्वयम् ॥ अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ३० ॥ तस्मात्पितॄणामार्तानामार्तिं परपराभवम् ॥ तपसाऽपनयंस्तात संदेशं कर्तुमर्हसि ॥ ३१ ॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् ॥ यथांजसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३२ ॥ न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्यभिवादनम् ॥ छंदोभ्योऽन्यत्र न ब्रह्मन्वयो ज्यैष्ठ्यस्य कारणम् ॥ ३३ ॥ ऋषिरुवाच ॥ अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ॥ स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥ विश्वरूप उवाच ॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्च उपव्ययम् ॥ कथं नु मद्विधो नाथा लोकेशैरभियाचितम् ॥ प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥ ३५ ॥ अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्क्रियः ॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥ ३६ ॥ तथापि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ॥ भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३७ ॥ श्रीशुक उवाच ॥ तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः ॥ पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥ ३८ ॥ सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ॥ आच्छिद्यादान्महेंद्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥ यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ॥ तां प्राह स महेंद्राय विश्वरूप उदारधीः ॥ ४० ॥

॥ ३४ ॥ विश्वरूप उवाच ॥ हे देवाः, स्वपुण्यनाशकं पौरोहित्यं धर्मशीलैर्निंदितमस्ति । तथापि लोकेशैर्याचितं तेषां शिष्यो मादृशः कथं प्रत्याख्यास्यति । यतः प्रत्याख्यानाभाव एव शिष्यस्य स्वार्थ उच्यते ॥३५॥ अकिंचनानां तपस्विनां शिलोंछनमेव धनम् । तेन कृतनिर्वाहोऽहं येन दुष्टबुद्धिः पुरुषो हृष्यति तन्निंद्यं पौरोहित्यं कथं करोमि ॥३६॥ तथाप्यहं किंचिदपि न प्रतिब्रूयाम् । भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥३७॥ श्रीशुक उवाच ॥ विश्वरूप एवं प्रतिज्ञाय देवैर्वृतः सन् तेषां पौरोहित्यं चक्रे ॥३८॥ शुक्रविद्यया रक्षितां दैत्यसंपात्तिं वैष्णव्या विद्यया आच्छिद्येंद्राय ददौ ॥ ३९ ॥ इंद्रो यया विद्यया रक्षितः सन्

दैत्यसेनां जिग्ये तां विद्यां विश्वरूप इंद्रायाह ॥ ४० ॥ इति श्रीमद्भागवतचूर्णिकायां षष्ठस्कंधे सप्तमोऽध्यायः ॥ ७ ॥ ॥ अष्टमे विश्वरूपस्तु वर्म नारायणात्मकम् । इंद्राय प्राह येनेंद्रो गुप्तो दैत्यानथाजयत् ॥ १ ॥ राजोवाच ॥ इंद्रो येन नारायणकवचेन रक्षितः सन् शत्रून् निर्जित्य त्रैलोक्यलक्ष्मीं बुभुजे ॥ १ ॥ हे शुक, तन्नारायणकवचं मे आख्याहि ॥ २ ॥ श्रीशुक उवाच ॥ हे राजन्, विश्वरूप इंद्राय यन्नारायणकवचं जगाद तच्छृणु ॥ ३ ॥ विश्वरूप उवाच ॥ हस्तौ पादौ प्रक्षाल्याचम्य सपवित्र उदङ्मुखो मौनी अष्टाक्षरद्वादशाक्षरमंत्राभ्यामंगन्यासं करन्यासं च कृत्वा ॥ ४ ॥ नारायणकवचं धारयेत् । ‘ ॐ न मो ना रा य णा य ’ इति पादयोः जानुनोः ऊर्वोः उदरे हृदये उरसि मुखे शिरसि चानुक्रमेण न्यसेत् ॥ ५ ॥ ६ ॥ ततः ‘ ॐ नमो भगवते वासु-

इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे सप्तमोऽध्यायः ॥ ७ ॥ ॥ राजोवाच ॥ यया गुप्तः सहस्राक्षः सवाहान्रिपुसैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥१॥ भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ॥ यथाऽऽततायिनः शत्रून्येन गुप्तोऽजयन्मृधे ॥ २ ॥ श्रीशुक उवाच ॥ वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उवाच ॥ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः ॥ कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ ४ ॥ नारायणमयं वर्म सन्नह्येद्भय आगते ॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ५ ॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ॥ ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ ६ ॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ प्रणवादियकरांतमंगुल्यंगुष्ठपर्वसु ॥ ७ ॥ न्यसेद्धृदय ओंकारं विकारमनु मूर्धनि ॥ षकारं तु भ्रुवोर्मध्ये णकारं शिखयादिशेत् ॥ ८ ॥ वेकारं नेत्रयोर्युञ्ज्यान्नकारं सर्वसंधिषु ॥ मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः ॥९॥ सविसर्गं फडंतं तत्सर्वदिक्षु विनिर्दिशेत् ॥ ॐ विष्णवे नम इति ॥ १० ॥ आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम् ॥ विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत् ॥११॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे ॥ दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः ॥ १२ ॥ जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ॥ स्थलेषु मायाबटुवामनोऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३ ॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ॥ विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ १४ ॥ रक्षत्वसौ माऽध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥ १५ ॥ ॥ ॥

देवाय ’। अस्य मंत्रस्य प्रणवादियकारांतैर्द्वादशाक्षरैर्दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यंतमंगुलीषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोराद्यंतपर्वसु न्यसेत् ॥ ७ ॥ ततः ‘ ॐ विषणवे नमः ’ इति सप्ताक्षराणि–हृदये मस्तके भ्रुवोः शिखायां नेत्रयोः सर्वसंधिषु विन्यस्य मः इत्यस्त्रं सर्वदिक्षु विनिर्दिशेत् ॥८॥९॥१०॥ तत आत्मानं ईश्वररूपं ध्यात्वा नारायणकवचं जपेत् ॥११॥ भगवान् गरुडारूढः शंखाद्यायुधधारकोऽष्टबाहुर्हरिर्मम सर्वरक्षां करोतु ॥१२॥ मत्स्यमूर्तिर्जलेषु मां रक्षतु । वामनः स्थलेषु रक्षतु । त्रिविक्रम आकाशे र० ॥१३॥ नृसिंहः संकटादिस्थानेषु र० ॥१४॥ वराहो मार्गे र० । परशुरामो गिरिशिखरे र० । श्रीरामचंद्रः

प्रवासे र० ॥१५॥ नारायणो जारणादिप्रयोगाद्रक्षतु । नरो गर्वात् र० । दत्तो योगभ्रंशात् र० । कपिलः कर्मबंधाद्र० ॥ १६ ॥ सनत्कुमारो मदनाद्र० । हयग्रीवो मार्गे देवापमानाद्र० । कूर्मो नरकाद्र० ॥ १७ ॥ धन्वंतरिः कुभोजनाद्र० । ऋषभः शीतोष्णादिद्वंद्वभयाद्र० । यज्ञो जनापवादाद्र० । बलभद्रः कालाद्र० । शेषः सर्पगणाद्र० ॥ १८ ॥ व्यासोऽज्ञानाद्र० । बुद्धः पाखंडगणाद्र० । कल्किः कलिकालमलाद्र० ॥ १९ ॥ केशवो गदया प्रातः काले र० । गोविंदः सार्धप्रहरपर्यंतं र० । विष्णुर्मध्यंदिने र० ॥ २० ॥ मधुहाऽपराह्णे र० । माधवः सायं र० । हृषीकेशः प्रदोषे र० । पद्मनाभोऽर्धरात्रे र० ॥ २१ ॥

मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात् ॥१६॥ सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ॥ देवर्षिवर्यः पुरुषार्चनांतरात्कूर्मो हरिर्मां निरयादशेषात् ॥१७॥ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृषभो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनांताद्बलो गणात्क्रोधवशादहींद्रः ॥ १८ ॥ द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखंडगणात्प्रमादात् ॥ कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥१९॥ मां केशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः ॥ नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥२०॥ देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम् ॥ दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥२१॥ श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः ॥ दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः ॥२२॥ चक्रं युगांतानलतिग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तम् ॥ दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥२३॥ गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि ॥ कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णय चूर्णयारीन् ॥ २४ ॥ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ॥२५॥ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि ॥ चक्षूंषि चर्मन् शतचंद्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥ २६ ॥ यन्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥ २७ ॥ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥२८॥ गरुडो भगवान्स्तोत्रस्तोभश्छंदोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९ ॥ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ॥ बुद्धींद्रियमनःप्राणान्पांतु पार्षदभूषणाः ॥ ३० ॥ ॥ ॥

ईशोऽपररात्रे र० । जनार्दन उषःकाले र० । दामोदरोऽनुसंध्यं र० । विश्वेश्वरः प्रभाते र० ॥ २२ ॥ हे चक्र, त्वं मम शत्रुसैन्यं दंदग्धि दंदग्धि ॥ २३ ॥ हे गदे, त्वं यक्षभूतपिशाचादिशत्रून् चूर्णय चूर्णय ॥ २४ ॥ हे शंख, त्वं ब्रह्मराक्षसादीन् विद्रावय विद्रावय ॥ २५ ॥ हे खड्ग, त्वं मम शत्रुसैन्यं तिग्मधारया छिंधि छिंधि । हे चर्मन्, त्वं द्विषां चक्षूंषि छादय हर च ॥ २६॥ नः ग्रहेभ्यः केतुभ्यो मनुष्येभ्यो व्याधेभ्यः सर्पादिभ्यश्च यानि भयानि तानि ॥२७॥ भगवन्नामकीर्तनात्सद्यः क्षय यांतु ॥२८॥ गरुडो मां सर्वदुःखेभ्यो र० ॥२९॥ सर्वापद्भ्यो हरेर्नाम रूपादीनि रक्षंतु । पार्षदा बुद्धींद्रियमनःप्राणान् रक्षंतु ॥ ३० ॥

यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः ॥ ३१ ॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ॥ भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ॥ ३२ ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः ॥ पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः ॥ प्रहापयंल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥३४॥ मघवन्निदमाख्यातं वर्म नारायणात्मकम् ॥ विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥३५॥ एतद्धारयमाणस्तु यं यं पश्यति चक्षुषा ॥ पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥३६॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ॥३७॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः ॥ योगधारणया स्वांगं जहौ स मरुधन्वनि ॥३८॥ तस्योपरि विमानेन गंधर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥३९॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥४०॥ श्रीशुक उवाच ॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥४१॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥४२॥ इति श्री०म०ष०नारायणवर्मकथनं नामाष्टमोऽध्यायः ॥८॥

॥ श्रीशुक उवाच ॥ तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥१॥ स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ॥२॥ स एव हि ददौ भागं परोक्षमसुरान्प्रति ॥ यजमानोऽवहद्भागं मातृस्नेहवशानुगः ॥ ३ ॥ तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः ॥ आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥ ४ ॥

सर्वे उैपद्रवा नामस्मरणेन नाशं यांतु ॥३१॥ यथा हरिः स्वमाययाऽयुधानि रूपाणि च धत्ते ॥३२॥ तथा तैः सर्वैः स्वरूपैर्नः सदा सर्वत्र रक्षतु ॥३३॥ विदिक्षु दिक्षु ऊर्ध्वे अधः आसमंताच्च सर्वत्र नारसिंहः पातु ॥३४॥ हे इंद्र, इदं नारायणनामकं कवचं ते कथितम् । येन त्वं शत्रून् जेष्यसि ॥३५॥ एतद्धारयमाणः पुरुषो यं यं चक्षुषा पश्यति पदा वा स्पृशेत्स तस्मात्तस्मादुद्भूताद्भयात्सद्यो मुच्यते ॥३६॥ इमां विद्यां धारयतः पुरुषस्य राजचोरादेः कुतश्चिदपि भयं न भवेत् ॥३७॥ पुरा कश्चित्कौशिको द्विज इमां विद्यां धारयन् मरुदेशे स्वशरीरं जहौ ॥३८॥ एकदा तस्योपरि चित्ररथो गंधर्वपतिर्विमानेन ययौ ॥३९॥ स सद्यः सविमानो गगनान्न्यपतत् । पुनर्वालखिल्यवचनात्तस्य कौशिकस्यास्थीनि गृहीत्वा सरस्वत्यां प्रक्षिप्य स्नात्वा स्वधाम ययौ ॥४०॥ श्रीशुक उवाच ॥ इदं नारायणकवचं यः शृणुयात् धारयति च स सर्वतो भयान्मुच्यते । तस्मै सर्वाणि भूतानि नमंति च ॥४१॥ इंद्रो विश्वरूपादेतां विद्यां प्राप्य युद्धेऽसुरान् जित्वा त्रैलोक्यलक्ष्मीं बुभुजे ॥४२॥ इति श्रीमद्भागवतचू० षष्ठ० अष्टमोऽध्यायः ॥८॥ ॥ नवमे विश्वरूपे तु हते शक्रेण कोपतः । त्वष्ट्रा चोत्पादिते वृत्रे भीतैर्देवैर्हरेः स्तुतिः ॥१॥ श्रीशुक उवाच ॥ तस्य विश्वरूपस्य– सोमपीथं सुरापीथमन्नादमिति त्रीणि शिरांस्यासन् ॥१॥ स एकदा यज्ञे देवेभ्यः प्रत्यक्षं सविनयं हविर्भागं ददौ ॥२॥ स एव मातृस्नेहेन दैत्येभ्यो गुप्तं भागं ददौ ॥३॥ इंद्रस्तस्येदं कापट्यं ज्ञात्वा दैत्यसंवर्धनेनास्मद्घातं करिष्यतीति शंकया खड्गेन शीघ्रं तस्य मस्त-

कानि चिच्छेद ॥ ४ ॥ तदा तस्य यत्सोमपीथं शिरस्तत्कपिंजलो यत्सुरापीथं तत्कलविंको यदन्नादं तत्तित्तिरिश्चेत्येवं त्रयः पक्षिणो जाताः ॥ ५ ॥ इंद्रस्तद्वधेन प्राप्तां ब्रह्महत्यां वारयितुं समर्थोऽपि तामंजलिना जग्राह। संवत्सरांते आत्मशुद्धये तद्ब्रह्महत्यापापं चतुर्धा विभज्य भूम्युदकवृक्षस्त्रीभ्यो ददौ ॥ ६ ॥ तत्र भूमिः खातपूरवरेण ब्रह्महत्यायाश्चतुर्थांशं जगृहे। तत्स्वरूपं भूमौ ऊषरं दृश्यते ॥७॥ द्रुमा अग्रच्छेदनेऽपि वृद्धिभवनरूपेण वरेण चतुर्थांशं जगृहुः। तत्स्वरूपं तेषु निर्यासो दृश्यते ॥८॥ स्त्रियः सगर्भत्वेऽपि संभोगक्षमत्ववरेण चतुर्थांशं जगृहुः। तत्स्वरूपं तासु मासि मासि रजो दृश्यते ॥ ९ ॥ उदकानि स्वमिश्रणेन क्षीरादेर्द्रव्यस्याधिक्यवरेण चतुर्थांशं जगृहुः। तत्स्वरूपं तेषु बुद्बुदफेनौ दृश्येते ॥ १० ॥ ततस्त्वष्टा पुत्रनाशं श्रुत्वेंद्रशत्रो विवर्धस्वेत्यादिमंत्रैर्दक्षिणाग्नौ

सोमपीथं तु यत्तस्य शिर आसीत्कपिंजलः ॥ कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः ॥५॥ ब्रह्महत्यामंजलिना जग्राह यदपीश्वरः ॥ संवत्सरांते तदघं भूतानां स विशुद्धये ॥ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥६॥ भूमिस्तुरीयं जग्राह खातपूरवरेण वै ॥ ईरणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ॥७॥ तुर्यं छेदविरोहेण वरेण जगृहुर्द्रुमाः ॥ तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥ ८ ॥ शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः ॥ रजोरूपेण तास्वंहो मासि मासि प्रदृश्यते ॥ ९ ॥ द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्मलम् ॥ तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् ॥ १० ॥ हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे ॥ इंद्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम् ॥ ११ ॥ अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ॥ कृतांत इव लोकानां युगांतसमये यथा ॥ १२ ॥ विष्वग्विवर्धमानं तमिषुमात्रं दिने दिने ॥ दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसम् ॥ १३ ॥ तप्तताम्रशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् ॥ १४ ॥ देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी ॥ नृत्यंतमुन्नदंतं च चालयंतं पदा महीम् ॥ १५ ॥ दरीगंभीरवक्त्रेण पिबता च नभस्तलम् ॥ लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् ॥ १६ ॥ महता रौद्रदंष्ट्रेण जृंभमाणं मुहुर्मुहुः ॥ वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ १७ ॥ येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्तिना ॥ स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥ १८ ॥ तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ॥ स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः ॥ १९ ॥ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः ॥ प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः ॥ २० ॥ देवा ऊचुः ॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः ॥ हराम यस्मै बलिमंतकोऽसौ बिभेति यस्मादरणं ततो नः ॥ २१ ॥ ॥ ॥

होमं चकार ॥११॥ अथ दक्षिणाग्नेः कृतांत इव भयंकरदर्शनः पुरुष उत्थितः ॥१२॥ प्रतिदिनं सर्वतो बाणमात्रं वर्धमानं भयंकरं दग्धपर्वतसदृशम् ॥ १३ ॥ तप्तताम्रशिखाश्मश्रुं मध्याह्नसूर्य इवोग्रनेत्रम् ॥१४॥ त्रिशिखे शूले द्यावापृथिव्यौ आरोप्येव नृत्यंतमुन्नदंतं पदा महीं कंपयंतम् ॥१५॥ जिह्वया नक्षत्राणि लिहंतं भुवनत्रयं ग्रसता मुखेन जृंभमाणं तं दृष्ट्वा लोकास्त्रस्ताः संतो दश दिशो दुद्रुवुः ॥१६॥१७॥ येनेमे लोका व्याप्ताः स वृत्र इति प्रोक्तः ॥१८॥ तमिंद्राद्या देवाः स्वैः स्वैः शस्त्रास्त्रैर्निजघ्नुः। वृत्रस्तानि सर्वाणि शस्त्रास्त्राण्यग्रसत् ॥१९॥ तदा देवाः खिन्नाः संतस्तत्रैव स्थित्वांतयामिणं हरिं तुष्टुवुः ॥ २० ॥ देवा ऊचुः ॥ हे भगवन्, पंचमहा-

भूतानि तैर्निर्मितास्त्रयो लोकास्तेषामधिपतयो ब्रह्मादयस्ततोऽर्वाचीना वयं च सर्वे यस्मै बलिं हराम । स कालोऽपि यस्माद्बिभेति तस्मात्परमेश्वरादस्माकं रक्ष-
णमस्तु ॥२१॥ य ईश्वरं विनान्यं शरणं गच्छति स शुनःपुच्छेन समुद्रं तर्तुमिच्छति ॥२२॥ यस्य मत्स्यरूपिणो भगवतः शृंगे पृथ्वीरूपां स्वनावं बध्वा सत्य-
व्रतो राजा संकटं ततार । सोऽस्मान् रक्षिष्यति ॥२३॥ यः पुरा प्रलयोदके ब्रह्माणं ततार । सोऽद्य नस्तारकोऽस्तु ॥२४॥ य ईशः स्वमायया नः ससर्ज । यस्य
स्वरूपं वयं न पश्यामः ॥२५॥ यः शत्रुभिरर्द्यमानान् नो नानावतारैर्युगे युगे पाति ॥ २६ ॥ तमात्मदैवतं वयं शरणं व्रजेम । स ईश्वरो नः सुखं विधास्यति

अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतम् ॥ विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्ति सिंधुम् ॥ २२ ॥
यस्योरुशृंगे जगतीं स्वनावं मनुर्यथाबद्ध्य ततार दुर्गम् ॥ स एव नस्त्वाष्ट्रभयाद्दुरंतात्त्राताश्रितान्वारिचरोऽपि नूनम् ॥२३॥ पुरा
स्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः कराले ॥ एकोऽरविंदात्पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः ॥२४॥ य एक ईशो
निजमायया नः ससर्ज येनानुसृजाम विश्वम् ॥ वयं न यस्यापि पुरः समीहतः पश्याम लिंगं पृथगीशमानिनः ॥२५॥ यो नः
सपत्नैर्भृशमर्द्यमानान्देवर्षितिर्यङ्नृषु नित्य एव ॥ कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च ॥२६॥ तमेव देवं
वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यम् ॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥ २७ ॥ श्रीशुक
उवाच ॥ इति तेषां महाराज सुराणामुपतिष्ठताम् ॥ प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाधरः ॥ २८ ॥ आत्मतुल्यैः षोडशभि-
र्विना श्रीवत्सकौस्तुभौ ॥ पर्युपासितमुन्निद्रशरदंबुरुहेक्षणम् ॥ २९ ॥ दृष्ट्वा तमवनौ सर्व ईक्षणाह्लादविक्लवाः ॥ दंडवत्पतिता
राजन्शनैरुत्थाय तुष्टुवुः ॥ ३० ॥ देवा ऊचुः ॥ नमस्ते यज्ञवीर्याय वयसे उत ते नमः ॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये
॥ ३१ ॥ यत्ते गतीनां तिसृणामीशितुः परमं पदम् ॥ नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ॥ ३२ ॥ ॐ नमस्तेऽस्तु भगव-
न्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममंगल परमकल्याण परमकारुणिक केवलजगदाधार लोकैकनाथ सर्वेश्वर
लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्तेऽपावृत
आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ ३३ ॥ दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षिता-
स्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ॥ ३४ ॥ ॥ ॥ ॥

॥२७॥ श्रीशुक उवाच ॥ इति तेषां देवानां वच आकर्ण्य शंखचक्रगदाधरो हरिः प्रथमं तेषां हृदि ततः समीपे प्रादुर्बभूव ॥२८॥ तदा देवाः सुनंदादिषोडशपा-
र्षदैः सेवितं तं ॥२९॥ दृष्ट्वा भुवि दंडवत्पतिताः संतः शनैरुत्थाय तुष्टुवुः ॥३०॥ देवा ऊचुः ॥ स्वर्गादिफलोत्पादने सामर्थ्यं यस्य तस्मै यज्ञरूपिणे कालात्मने
शोभनबहुनाम्ने च तुभ्यं नमः ॥३१॥ हे पालक, तव निर्गुणं स्वरूपमर्वाचीनः कः पुमान् वेदितुमर्हति । अतः केवलं ते नमोऽस्तु ॥ ३२॥ हे भगवन्, ना-
रायण वासुदेव आदिपुरुष महापुरुष परममंगल परमकारुणिक जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ, ते नमोऽस्तु ॥ ३३ ॥ हे भगवन्, तवायं क्रीडा-

योगो दुर्ज्ञेयः । यतस्त्वं निर्गुणोऽपि मायया विश्वं सृजसि पासि हरसि च ॥३४॥ अथ भवान् देवदत्तवत् पारतंत्र्येण शुभाशुभयोः कर्मयोः फलं स्वीकरोति । किंवात्मारामः सन् केवलं साक्षितया वर्तते तद्द्वयं न विद्मः ॥ ३५ ॥ हे हरे, अपरिमितगुणमये भगवति त्वयि मायया कोऽर्थः कर्तृत्वादिर्दुर्घट इव भवति नकोऽपि ॥३६॥ किंच । समविषमबुद्धीनां देवादीनामनुग्रहनिग्रहादिकं त्वन्मायया त्वयि स्फुरति ॥३७॥ स एव त्वं नानारूपेण प्रतीतः सद्रूपः सर्वेश्वरः सर्वविषयाणां प्रकाशैरुपलक्षितः सर्वांतर्यामित्वाज्जीवस्यापि प्रकाशकोऽसि ॥३८॥ हे मधुमथन, तव ये एकांतभक्तास्ते सर्वभूतप्रियसुहृदि सर्वात्मनि त्वयि निर्वृ-

अथ तत्र भवान्किं देवदत्तवदिह गुणविसर्गपतितः पारतंत्र्येण स्वकृतकुशलाकुशलं फलमुपाददात्याहोस्विदात्माराम उपशमशीलः समंजसदर्शन उदास्त इति ह वाव न विदामः॥३५॥नहि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलांतःकरणाश्रयदुरवग्रहवादिनां विवादानवसर उपरतसमस्तमायामये केवल एवात्ममायामंतर्धाय कोऽन्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात्॥३६॥समविषममतीनां मतमनुसरसि यथा रज्जुखंडः सर्पादिधियाम्॥३७॥स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः॥३८॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यंदमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरंतरं निर्वृतमनसः कथमुह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्तः॥३९॥त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दंडं दंडधर दधर्थ एवमेनमपि भगवन् जहि त्वाष्ट्रमुत यदि मन्यसे॥४०॥ अस्माकं तावकानां तव नतानां तत ततामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चांतस्तापमनघार्हसि शमयितुम् ॥४१॥ अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामंतर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलंभकतयानुभवतः सर्वप्रत्ययसाक्षिण आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद्विस्फुलिंगादिभिरिव हिरण्यरेतसः ॥ ४२ ॥ ॥ ॥

तमनसः संतः संसारभ्रमणरहितां त्वच्चरणकमलसेवां कथं विसृजंति । नैव विसृजंति ॥३९॥ हे त्रिविक्रम, हे त्रिलोकनायक, यद्यपि दैत्यदानवास्तवैव विभूतयस्तथापि तासामयमुद्यमकालो न भवतीति मत्वा हे दंडधर, यथा पूर्वं त्वं दंडं धृतवानसि एवमेनं वृत्रासुरमपि यदि हंतुमिच्छसि तर्हि जहि ॥ ४० ॥ प्रथमं तावत्त्वदीयानामस्माकमंतस्तापमनुकंपया मधुरया वाण्या शमयितुमर्हसि ॥ ४१ ॥ हे भगवन्, साक्षात्परमात्मनः सर्वसाक्षिणस्तव विस्फुलिंगैरग्नेरिवाऽस्माभिः

किं विज्ञापनीयं स्यात् । अस्मदभिप्रायस्तु त्वया ज्ञात एवास्ति ॥४२॥ अतस्तव चरणकमलच्छायां यत्कामेन वयं प्राप्तास्तत्कार्यं स्वयमेव त्वं संपादय ॥४३॥
हे कृष्ण, येनास्माकं तेजोस्त्रायुधानि ग्रस्तानि तं वृत्रं जहि ॥ ४४ ॥ शुद्धाय हृदयाकाशस्थिताय बुद्ध्यादिसाक्षिणे सदानंदरूपाय दुःखहराय हरये ते नमः
॥४५॥ श्रीशुक उवाच ॥ एवं देवैः सादरं स्तुतो हरिस्तानुवाच ॥ ४६ ॥ श्रीभगवानुवाच ॥ हे देवाः, यया आत्मनोऽसंसारित्वस्मरणं भक्तिश्च भवति एवंवि-
धया भवद्भिः कृतया स्तुत्याऽहं प्रीतोऽस्मि ॥४७॥ मयि प्रीते सति दुष्प्रापं किमस्ति न किमपि । तथापि तत्त्ववेत्ता मम भक्तो मत्तोऽन्यत्किमपि न वांछति
॥४८॥ कृपणस्तु विषयान् वांछन् सन् स्वस्य श्रेयो न वेद । तस्य विषयिणोऽज्ञस्य यदि कश्चिद्विषयानेव दद्यात्तर्हि सोऽप्यज्ञ एव ॥४९॥ विद्वान् मूढाय प्रवृ-

अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां
वयं यत्कामेनोपसादिताः ॥ ४३ ॥ अथो ईश जहि त्वाष्ट्रं ग्रसंतं भुवनत्रयम् ॥ ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च
॥ ४४ ॥ हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ॥ सत्संग्रहाय भवपांथनिजाश्रमाप्तावंते परीष्टगतये
हरये नमस्ते ॥ ४५ ॥ श्रीशुक उवाच ॥ अथैवमीडितो राजन्सादरं त्रिदशैर्हरिः ॥ स्वमुपस्थानमाकर्ण्य प्राह तानभिनंदितः
॥ ४६ ॥ श्रीभगवानुवाच ॥ प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥ ४७ ॥
किं दुरापं मयि प्रीते तथापि विबुधर्षभाः ॥ मय्येकांतमतिर्नान्यन्मत्तो वांछति तत्त्ववित् ॥ ४८ ॥ न वेद कृपणः श्रेय आत्मनो
गुणवस्तुदृक् ॥ तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ॥ ४९ ॥ स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि ॥ न
राति रोगिणोऽपथ्यं वांछतो हि भिषक्तमः ॥ ५० ॥ मघवन्यात भद्रं वो दध्यंचमृषिसत्तमम् ॥ विद्याव्रततपःसारं गात्रं याचत मा
चिरम् ॥ ५१ ॥ स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम् ॥ यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ॥ ५२ ॥ दध्य-
ङ्ङाथर्वणस्त्वष्ट्रे वर्माभेद्यं मदात्मकम् ॥ विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः ॥ ५३ ॥ युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोंऽ-
गानि दास्यति ॥ ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥ ५४ ॥ येन वृत्रशिरो हर्ता मत्तेजउपबृंहितः ॥ तस्मिन्विनिहते
यूयं तेजोऽस्त्रायुधसंपदः ॥ भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान् ॥५५॥ इति श्रीम०म०ष०नवमोऽध्यायः ॥ ९ ॥ ॥

त्तिमार्गं न वक्ति । यथा वैद्यो रोगिणोऽपथ्यं न ददाति ॥५०॥ हे इंद्र, वो देवानां भद्रमस्तु । यूयं दधीचिमृषिं गत्वा तस्य शरीरं याचत । माचिरम् ॥५१॥
स दधीचिरश्वशिरोनाम्ना प्रसिद्धं शुद्धं ब्रह्माश्विनीकुमाराभ्यामुपदिदेश ॥५२॥ स एव दधीचिरभेद्यं श्रीनारायणकवचं त्वष्ट्रे प्रादात् । त्वष्टा च तद्विश्वरू-
पाय पुत्राय प्रादात् । यस्मात्त्वं धृतवानसि ॥५३॥ अतोऽश्विभ्यां सह युष्माभिर्याचितः सन् स धर्मज्ञो दधीचिः स्वांगानि युष्मभ्यं दास्यति । तदस्थिभिर्वि-
श्वकर्मविनिर्मित आयुधश्रेष्ठो वज्रो भविष्यति ॥५४॥ येन वज्रेण त्वं मत्तेजसा वर्धितः सन् वृत्रशिरो हरिष्यसि । तस्मिन् हते सति यूयं भूयस्तेजोऽस्त्रायुधसं-
पदः प्राप्स्यथ । मत्परांश्च केऽपि न हिंसंति ॥५५॥ इति श्रीमद्भागवतचू० षष्ठस्कंधे नवमोऽध्यायः ॥ ९ ॥ ॥ ॥ ॥

दशमे केशवादिष्टदध्यङ्ङस्थिजवज्रधृक् । इंद्रोऽयुध्यत वृत्रेण सासुरेण सनिर्जरः ॥ १ ॥ श्रीशुक उवाच ॥ एवमिंद्रं समादिश्य भगवान् देवानां पश्यतां सतां तत्रैवांतर्दधे ॥१॥ ततो देवैर्याचितो दधीचिः प्रहसन्निव जगाद ॥२॥ हे देवाः, यूयं शरीरिणां मृत्युदुःखं न जानीथ ॥३॥ देहिनां देहोऽत्यंतं प्रियः । अतो भिक्षमाणाय विष्णवेऽपि देहं दातुं क उत्सहेत ॥४॥ देवा ऊचुः ॥ हे ब्रह्मन्, भूतानुकंपिनां भवद्विधानां पुंसां दुस्त्यजं किम् ॥५॥ ननु स्वार्थसाधको लोकः परसंकटं न वेद । यदि वेद तर्हि न याचेत । यदि च दाता दानसमर्थस्तर्हि सोऽपि नेति न[1] वदेत् ॥६॥ दधीचिरुवाच ॥ धर्मं श्रोतुमिच्छया मया युष्मान्प्रति कथितम् । तथापि मां कालांतरे त्यजंतं देहमहमेव त्यजामि ॥७॥ योऽध्रुवेण देहेन यशो धर्मं च न साधयेत्स शोकयोग्यः ॥ ८ ॥ यो भूतानां शोकेन

॥ श्रीशुक उवाच ॥ इंद्रमेवं समादिश्य भगवान्विश्वभावनः ॥ पश्यतामनिमेषाणां तत्रैवांतर्दधे हरिः ॥ १ ॥ तथाभियाचितो देवैर्ऋषिराथर्वणो महान् ॥ मोदमान उवाचेदं प्रहसन्निव भारत ॥ २ ॥ अपि वृंदारका यूयं न जानीथ शरीरिणाम् ॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥ जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः ॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥ ४ ॥ देवा ऊचुः ॥ किं नु तद्दुस्त्यजं ब्रह्मन्पुंसां भूतानुकंपिनाम् ॥ भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणाम् ॥ ५ ॥ ननु स्वार्थपरो लोको न वेद परसंकटम् ॥ यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥ ऋषिरुवाच ॥ धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः ॥ एष वः प्रियमात्मानं त्यजंतं संत्यजाम्यहम् ॥ ७ ॥ योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान् ॥ ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः ॥ यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥ अहो दैन्यमहो कष्टं पारक्यैः क्षणभंगुरैः ॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ १० ॥ श्रीशुक उवाच ॥ एवं कृतव्यवसितो दध्यङ्ङाथर्वणस्तनुम् ॥ परे भगवति ब्रह्मण्यात्मानं संनयन् जहौ ॥ ११ ॥ यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबंधनः ॥ आस्थितः परमं योगं न देहं बुबुधे गतम् ॥ १२ ॥ अथेंद्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ॥ मुनेः शुक्तिभिरुत्सिक्तो भगवत्तेजसान्वितः ॥ १३ ॥ वृतो देवगणैः सर्वैर्गजेंद्रोपर्यशोभत ॥ स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥ वृत्रमभ्यद्रवच्छेत्तुमसुरानीकयूथपैः ॥ पर्यस्तमोजसा राजन्क्रुद्धो रुद्र इवांतकम् ॥ १५ ॥ ॥ ॥

शोचति हर्षेण हृष्यति च तस्य यो धर्मः स एवाक्षयो धर्मः ॥९॥ अहो निरुपयोगैः श्वसृगालादिभक्ष्यैः क्षणभंगुरैर्धनपुत्रदेहैर्मर्त्यो यदि परोपकारं न कुर्यात्तर्हि स केवलं शोच्योऽस्ति ॥१०॥ श्रीशुक उवाच ॥ एवं कृतनिश्चयो दधीचिर्भगवति मनो योजयन् देहं जहौ ॥ ११ ॥ स दधीचिर्योगमास्थितः सन् गतं देहं न बुबुधे ॥ १२ ॥ अथेंद्रस्तदस्थिभिर्विश्वकर्मणा निर्मितं वज्रं गृहीत्वा भगवत्तेजसान्वितः ॥ १३ ॥ देवैर्वृतः सन् गजेंद्रोपर्यशोभत । ततो मुनिगणैः स्तुतः सन् त्रैलोक्यं हर्षयन् ॥ १४ ॥ असुरयुक्तं वृत्रं हंतुं दुद्राव ॥ १५ ॥ ॥ ॥ ॥

---

१ यथा तव संकटं स्वार्थपरा वयं न जानीम एवं प्रत्याख्यानकर्ता त्वमस्मत्संकटं न जानासीति भावः ।

तदा त्रेतायुगारंभे नर्मदातीरे देवासुरयोर्दारुणः संग्रामो बभूव ॥ १६ ॥ रुद्रैर्वसुभिरादित्यैर्मरुद्भिरन्यैश्च देवैः सहितम् ॥ १७ ॥ इंद्रं दृष्ट्वा वृत्रपुरःसरा दैत्या नासहंत ॥१८॥ तेके– नमुचिः शंबरः अनर्वा द्विमूर्धा ऋषभः अंबरः हयग्रीवो विप्रचित्तिः॥१९॥ पुलोमा वृषपर्वा प्रहेतिः हेतिः दैत्यदानवयक्षरक्षांसि च॥२०॥ सुमाल्यादयः सर्वे इंद्रसेनाग्र्यं प्रतिषिध्य ॥२१॥ सिंहनादेनाभ्यर्दयन् । कैरित्याह–गदापरिघबाणैः प्रासमुद्गरतोमरैः ॥ २२ ॥ शूलैः परशुभिः खड्गैश्च सर्वतो देवान्प्रति छादयामासुः ॥२३॥ तदा शरजालैश्छादिता देवा नादृश्यंत ॥ २४ ॥ ततस्ते दैत्यानां शस्त्रौघाः देवैराकाशे सहस्रधा छिन्नाः संतो देवान्न प्रापुः

ततः सुराणामसुरै रणः परमदारुणः ॥ त्रेतामुखे नर्मदायामभवत्प्रथमे युगे ॥ १६ ॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ॥ मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ॥ १७ ॥ दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वया श्रिया ॥ नामृष्यन्नसुरा राजन्मृधे वृत्रपुरःसराः ॥ १८ ॥ नमुचिः शंबरोऽनर्वा द्विमूर्धा ऋषभोऽम्बरः ॥ हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः ॥ १९ ॥ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ॥ २० ॥ सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः ॥ प्रतिषिध्येंद्रसेनाग्र्यं मृत्योरपि दुरासदम् ॥ २१ ॥ अभ्यर्दयन्नसंभ्रांताः सिंहनादेन दुर्मदाः॥ गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ॥२२॥ शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः ॥ सर्वतोऽवाकिरन् शस्त्रैरस्त्रैश्च विबुधर्षभान् ॥ २३ ॥ न तेऽदृश्यंत संछन्नाः शरजालैः समंततः ॥ पुंखानुपुंखपतितैर्ज्योतींषीव नभो घनैः ॥ २४ ॥ न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान् ॥ छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २५ ॥ अथ क्षीणास्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः ॥ अभ्यवर्षन्सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २६ ॥ तानक्षतान्स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः ॥ द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्तत्रसुरिंद्रसैनिकान् ॥ २७ ॥ सर्वे प्रयासा अभवन्विमोघाः कृताः कृता देवगणेषु दैत्यैः ॥ कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥२८॥ ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥२९॥ वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् ॥ पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः॥३०॥ कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः ॥ हे विप्रचित्ते नमुचे पुलोमन्मयानर्वन् शंबर मे शृणुध्वम् ॥३१॥ जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता ॥ लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तम् ॥ ३२ ॥ ॥

॥२५॥ तदा क्षीणशस्त्रौघा दैत्या गिरिशृंगैर्द्रुमैः पाषाणैश्च देवसैन्यं ववृषुः । तदा देवाः पूर्ववत्तान् चिच्छिदुः ॥ २६ ॥ तदा दैत्याः शस्त्रास्त्रवृक्षपाषाणादिभिरक्षतान् देवान् दृष्ट्वा तत्रसुः ॥२७॥ तेषामुद्योगाः कृष्णानुकूलेषु देवेषु निष्फला अभवन् ॥ २८ ॥ दैत्या एवं वीक्ष्य संग्रामे स्वपतिं त्यक्त्वा पलायनं चक्रिरे ॥२९॥ तदा वृत्रः पलायमानान् दैत्यान् वीक्ष्य विहस्य बभाषे ॥३०॥ हे विप्रचित्ते, हे नमुचे, हे शंबर, यूयं कालोचितं मद्वचः श्रृणुध्वम्॥३१॥ जातस्य मृत्युः सर्वतो ध्रुव एव । तस्य प्रतिक्रिया नास्ति । अतो लोकयशस्करं मृत्युं को नेच्छेत् ॥ ३२ ॥ ॥ ॥

इह लोके शास्त्रसंमतौ द्वौ मृत्यू[1] स्तः । योगेन देहत्यागरूप एकः । युद्धे समुखमरणरूपो द्वितीयः॥३३॥इति श्रीमद्भागवतचू०षष्ठस्कंधे दशमोऽध्यायः ॥१०॥ एकादशे तु वृत्रस्य युध्यमानस्य वज्रिणा । भक्तिज्ञानबलोदर्काश्चित्रा वाचोऽनुवर्णिताः ॥१॥ श्रीशुक उवाच ॥ हे नृप, एवं धर्मं कथयतो वृत्रस्य धर्मयुक्तमपि तद्वचो दैत्या नागृह्णन् ॥१॥ कालानुकूलैर्देवैरनाथवत् द्राव्यमाणां सेनां ॥२॥ दृष्ट्वा क्रोधेन संतप्तो वृत्रासुरो देवान्निर्भर्त्सयन् जगाद ॥ ३ ॥ हे देवाः, शूराणां भीतस्य वधः स्तुत्यः स्वर्गप्राप्तिकरश्च नास्ति ॥४॥ हे तुच्छा देवाः । युद्धे यदि वः श्रद्धा तर्हि मेऽग्रे क्षणं तिष्ठत ॥५॥ एवं क्रुद्धः सन् देवान् स्वदेहेन भीषयन्न-

द्वौ संमताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः ॥ कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः ॥३३॥ इति श्रीमद्भा० महापुराणे षष्ठस्कंधे इंद्रवृत्रासुरयुद्धवर्णनं नाम दशमोऽध्यायः ॥ १० ॥ ॥ श्रीशुक उवाच ॥ त एवं शंसतो धर्मं वचः पत्युरचेतसः ॥ नैवागृह्णन्भयत्रस्ताः पलायनपरा नृप ॥१॥ विशीर्यमाणां पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥२॥ दृष्ट्वातप्यत संक्रुद्ध इंद्रशत्रुरमर्षितः ॥ तान्निवार्यौजसा राजन्निर्भर्त्स्येदमुवाच ह ॥३॥ किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ॥ नहि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥४॥ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ॥ अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥ ५ ॥ एवं सुरगणान्क्रुद्धो भीषयन्वपुषा रिपून् ॥ व्यनदत्सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥ ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥ विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम् ॥ चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥ ९ ॥ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवाहं गदयोग्रविक्रमः ॥ जघान कुंभस्थल उन्नदन्मृधे तत्कर्म सर्वे समपूजयन्नृप ॥ १० ॥ ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ॥ अपासरद्भिन्नमुखः सहेंद्रो मुंचन्नसृक्सप्तधनुर्भृशार्तः ॥ ११ ॥ न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः स गदां महात्मा ॥ इंद्रोऽमृतस्यंदिकराभिमर्शवीतव्यथक्षतवाहोऽवतस्थे ॥ १२ ॥ स तं नृपेंद्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ॥ स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसन् जगाद ॥ १३ ॥ ॥

नाद ॥६॥ तेन वृत्रशब्देन सर्वे देवगणा मूर्छिता भूत्वा भूमौ निपेतुः ॥७॥ तदोद्यतशूलो वृत्रो निमीलिताक्षं तद्देवसैन्यं ममर्द ॥ ८ ॥ तद्विलोक्य क्रुद्ध इंद्रः स्वशत्रवे गदां चिक्षेप । तदा वृत्र आयांतीं तां दुःसहां गदां वामकरेण गृहीत्वा ॥९॥ तयैव गदयैरावतस्य गंडस्थले जघान । तदा तत्तस्य कर्म सर्वे देवदैत्याः समपूजयन् ॥१०॥ ऐरावतो वृत्रगदया पीडितो रुधिरं वमन् सप्तधनुःप्रमाणं[2] देशमपासरत् ॥ ११ ॥ तदा मूर्छितवाहनायेंद्राय स वृत्रो भूयो गदां न प्रायुंक्त। इंद्रश्चामृतस्त्राविहस्तस्पर्शेन गतव्यथवाहनः सन् पुनर्युद्धायावतस्थे॥१२॥वृत्रो भ्रातुर्हंतारं वज्रायुधं दृष्ट्वा तत्कर्म स्मरन् शोकेन मोहेन च हसन् जगाद ॥१३॥

---

१ द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखे हतः । २ अष्टाविंशतिहस्तप्रमाणं देशम् ।

वृत्र उवाच ॥ हे इंद्र, त्वं ब्रह्महा गुरुहा भ्रातृहा चासि । अतोऽद्य त्वां हत्वा भ्रातृऋणान्मुक्तो भवामि ॥ १४ ॥ हे इंद्र, त्वं स्वर्गकामः पशोरिव ममाग्रजस्य विश्वरूपस्य शिरांसि चकर्तिथ ॥१५॥ अतो निंद्यकर्मणा लज्जाश्रीदयाकीर्तिभिर्हीनं मच्छूलभिन्नहृदयं त्वां गृध्रा भक्षयिष्यंति ॥ १६ ॥ अन्ये ये देवाः शस्त्रैर्मह्यं प्रहरंति तान् त्रिशूलेन हत्वा भैरवादीन् यजामि ॥१७॥ हे इंद्र, यदि च त्वं वज्रेण मे शिरो हरिष्यसि तर्हि देहेन भूतानां बलिं विधाय परं पदं प्राप्स्यामि ॥१८॥ हे सुरेश, ममोपरि वज्रं कस्मान्न क्षिपसि । त्वं संशयं मा कुरु । गदेव वज्रं निष्फलं न स्यात् ॥१९॥ यस्मादयं वज्रो हरेस्तेजसा दधीचेस्तपसा च तीक्ष्णीकृतोऽस्ति । अतस्तेनैव शत्रुं मां जहि । यत्र श्रीहरिस्तत्रैव विजयः संपत्तिश्च स्तः ॥ २० ॥ अहं संकर्षणचरणारविंदे मनः प्रवेश्य त्वद्वज्रहतः सन् देहं

वृत्र उवाच ॥ दिष्ट्या भवान्मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च ॥ दिष्ट्यानृणोऽद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदा
चिरात् ॥१४॥ यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य ॥ विश्रभ्य खड्गेन शिरांस्यवृश्चत्पशोरिवाकरुणः
स्वर्गकामः ॥१५॥ ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यम् ॥ कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदंति
गृध्राः ॥१६॥ अन्येऽनु ये त्वेह नृशंसमज्ञा ये ह्युद्यतास्त्राः प्रहरंति मह्यम् ॥ तैर्भूतनाथान्सगणान्निशातत्रिशूलनिर्भिन्नगलैर्यजामि
॥१७॥ अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह ॥ तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये॥१८॥
सुरेश कस्मान्न हिनोषि वज्रं पुरः स्थिते वैरिणि मय्यमोघम् ॥ मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याच्ञा ॥१९॥
नन्वेष वज्रस्तव शक्रतेजसा हरेर्दधीचेस्तपसा च तेजितः ॥ तेनैव शत्रुं जहि विष्णुयंत्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः॥२०॥
अहं समाधाय मनो यथाह संकर्षणस्तच्चरणारविंदे ॥ त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ॥२१॥ पुंसां किलैकांतधियां
स्वकानां याः संपदो दिवि भूमौ रसायाम् ॥ न राति यद्द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयासः ॥२२॥ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते
पुरुषस्य शक्र ॥ ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोऽन्यैः ॥२३॥ अहं हरे तव
पादैकमूलदासानुदासो भवितास्मि भूयः ॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतु कायः ॥ २४ ॥ न नाकपृष्ठं न च
पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरहय्य कांक्षे ॥२५॥ अजातपक्षा इव मातरं
खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ॥ प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविंदाक्ष दिदृक्षते त्वाम् ॥ २६ ॥ ॥

त्यक्त्वा योगिनां गतिं यास्यामि ॥२१॥ हरिः स्वभक्तानां स्वर्गादिसंपदो न ददाति । यतः संपद्भ्यो द्वेषमदकलहादयो भवंति ॥ २२ ॥ अतोऽस्मत्पतिः स्वभक्ताय धर्मार्थकामविषयो यः श्रमस्तस्य नाशं करोति ॥२३॥ एवमुक्त्वा हरिं प्रार्थयते । हे हरे, अहं तव दासानुदासो भूयो भविष्यामि । मम मनस्तव गुणान् स्मरतु । वाक् ते गुणान् कीर्तयतु । कायस्तव पूजनादि कर्म करोतु ॥ २४ ॥ हे ईश्वर, त्वां विना स्वर्गलोकं ब्रह्मलोकं सार्वभौमं पातालाधिपत्यं योगसिद्धीर्मोक्षं वा नेच्छामि ॥२५॥ यथा क्षुधार्ता अजातपक्षाः खगा मातरं द्रष्टुमिच्छंति तथा मे मनस्त्वां द्रष्टुमिच्छति ॥ २६ ॥ ॥ ॥

संसारचक्रे भ्रमतो मे तव भक्तेष्वेव सख्यं भूयात् । पुत्रदारगृहादिषु मे चित्तस्यासक्तिर्माभूत् ॥ २७ ॥ इति श्रीमद्भागवतचूर्णि० षष्ठस्कंधे एकादशोऽध्यायः ॥ ११ ॥ ॥ द्वादशेऽतिविषण्णेन स्वयमुत्साहितेन तु । महेंद्रेण महायुद्धे वृत्रस्य वध ईर्यते ॥ १ ॥ श्रीशुक उवाच ॥ हे नृप, एवं युद्धे वृत्रो विजयान्मृत्युं श्रेष्ठं मन्यमानः सन् शूलं प्रगृह्येंद्रमभ्यपतत् ॥१॥ ततः कठोरजिह्वं शूलं भ्रामयित्वा तदिंद्रोपरि क्षिप्त्वा रोषेण हे पाप, हतोऽसि हतोऽसीति जगाद ॥ २ ॥ इंद्रो वज्रेणं आपतत्तच्छूलं वृत्रस्य दक्षिणभुजं च चिच्छेद ॥ ३ ॥ तदा छिन्नैकभुजो वृत्रः परिघेण देवेंद्रमैरावतं च हनौ तताड । तदेंद्रहस्ताद्वज्रं पपात ॥४॥ वृत्रस्य तत्कर्म सर्वे देवासुरा अपूजयन् । इंद्रस्य संकटं वीक्ष्य देवाश्चुक्रुशुः ॥ ५ ॥ इंद्रः पतितं वज्रं लज्जया पुनर्न जगृहे । तद्विलोक्य वृत्र आह । हे

ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ॥ त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥२७॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे वृत्रस्येंद्रोपदेशो नाम एकादशोऽध्यायः ॥ ११ ॥ ॥ ऋषिरुवाच ॥ एवं जिहासुर्नृपदेहमाजौ मृत्युं वरं विजयान्मन्यमानः ॥ शूलं प्रगृह्याभ्यपतत्सुरेंद्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥ ततो युगांताग्निकठोरजिह्वमाविध्य शूलं तरसाऽसुरेंद्रः ॥ क्षिप्त्वा महेंद्राय विनद्य वीरो हतोऽसि पापेति रुषा जगाद ॥ २ ॥ ख आपतत्तद्विचलद्ग्रहोल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः ॥ वज्रेण वज्री शतपर्वणाच्छिनद्भुजं च तस्योरगराजभोगम् ॥ ३ ॥ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम् ॥ हनौ तताडेंद्रमथामरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ ॥ वृत्रस्य कर्मातिमहाद्भुतं तत्सुरासुराश्चारणसिद्धसंघाः ॥ अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशम् ॥ ५ ॥ इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः ॥ तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥ युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनाम् ॥ विनैकमुत्पत्तिलयस्थितीश्वरं सर्वज्ञमाद्यं पुरुषं सनातनम् ॥ ७ ॥ लोकाः सपाला यस्येमे श्वसंति विवशा वशे ॥ द्विजा इव शिचा बद्धाः स काल इह कारणम् ॥ ८ ॥ ओजः सहो बलं प्राणममृतं मृत्युमेव च ॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडम् ॥ ९ ॥ यथा दारुमयी नारी यथा यंत्रमयो मृगः ॥ एवं भूतानि मघवन्नीशतंत्राणि विद्धि भोः ॥ १० ॥ पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेंद्रियाशयाः ॥ शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ॥ ११ ॥ अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ॥ भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम् ॥ १२ ॥ ॥ ॥

इंद्र, वज्रं गृहाण । तेन च स्वशत्रुं मां जहि । अयं खेदकालो नहि ॥ ६ ॥ एकं सनातनमीश्वरं विना युद्धं कुर्वतां वीराणां सदा जयो न भवति किंतु कदाचिदेव भवति ॥ ७ ॥ लोका यस्य वश्याः संतश्चेष्टंते स कालो जयादौ कारणम् ॥ ८ ॥ जन इंद्रियशक्त्यादीनां मृत्योश्च हेतुं कालमविज्ञाय जडं देहं हेतुं मन्यते ॥ ९ ॥ हे मघवन्, यथा काष्ठमयी स्त्री यथा यंत्रमयश्च हरिणः ।एवं भूतानि भगवत्स्वाधीनानीति विद्धि ॥१०॥ भूतेंद्रियांतःकरणानि यदनुग्रहं विना स्वकार्यं कर्तुं न शक्नुवंति ॥ ११ ॥ स ईश्वर एव स्वतंत्र इति ज्ञानरहितः पुरुषो जीवमेवेश्वरं स्वाधीनं च मन्यते ॥ १२ ॥ ॥

पुरुषस्य जयकाले आयुःश्रीकीर्त्यादयः प्राप्ताश्च । पराजयकालेऽकीर्त्यादयः प्राप्ता भवंति॥१३॥तस्माज्जयपराजययोर्मृत्युजीवितयोः सुखदुःखयोश्च समः स्यात् ॥१४॥ यः सत्वादिगुणरहितं सर्वसाक्षिणमात्मानं वेद स हर्षादिभिर्न बध्यते ॥ १५ ॥ हे शक्र, युद्धे तव प्राणजिहीर्षया स्थितं मां पश्य ॥ १६ ॥ हे इंद्र, अस्मिन् युद्धद्युते प्राणा एव पणः । बाणा एवाक्षाः । अत्र जयपराजयौ न ज्ञायेते ॥१७॥ श्रीशुक उवाच ॥ इंद्रो वृत्रवचः श्रुत्वा निष्कपटं तत्सत्कृत्य गृहीतवज्रः सन् तमाह ॥१८॥ अहो दानव त्वं सिद्धोऽसि । यस्य ते संकटसमयेऽपीदृशी बुद्धिः । स त्वं केवलमीश्वरभक्तोऽसि ॥१९॥ भवान् वैष्णवीं मायामतार्षीत् । यतस्त्वमासुरं

आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः ॥ भवंत्येव हि तत्काले यथानिच्छोर्विपर्ययाः ॥ १३ ॥ तस्मादकीर्तियशसोर्जयापजययोरपि ॥ समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा ॥ १४ ॥ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥१५॥ पश्य मां निर्जितं शक्र वृक्णायुधभुजं मृधे ॥ घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥१६॥ प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः ॥ अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः ॥१७॥ श्रीशुक उवाच ॥ इंद्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् ॥ गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥ १८ ॥ इंद्र उवाच ॥ अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी ॥ भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरम् ॥१९॥ भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् ॥ यद्विहायासुरं भावं महापुरुषतां गतः ॥ २० ॥ खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव ॥ वासुदेवे भगवति सत्वात्मनि दृढा मतिः ॥ २१ ॥ यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ॥ विक्रीडतोऽमृतांभोधौ किं क्षुद्रैः खातकोदकैः ॥ २२ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ॥ युयुधाते महावीर्याविंद्रवृत्रौ युधांपती ॥ २३ ॥ आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः ॥ इंद्राय प्राहिणोद्घोरं वामहस्तेन मारिष ॥ २४ ॥ स तु वृत्रस्य परिघं करं च करभोपमम् ॥ चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥ २५ ॥ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः ॥ छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥ २६ ॥ कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ॥ नभोगंभीरवक्त्रेण लेलिहोल्बणजिह्वया ॥ २७ ॥ दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ॥ अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् ॥ २८ ॥ गिरिराट् पादचारीव पद्भ्यां निर्जरयन्महीम् ॥ जग्रास स समासाद्य वज्रिणं सहवाहनम् ॥ २९ ॥ महाप्राणो महावीर्यो महासर्प इव द्विपम् ॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ॥ हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥ ३० ॥

भावं त्यक्त्वा भगवद्भक्तत्वं प्राप्तोऽसि ॥२०॥ रजोगुणस्वभावस्य तवेश्वरे दृढा भक्तिरित्याश्चर्यम् ॥२१॥ यस्येश्वरे प्रीतिस्तस्यान्यैः स्वर्गादिभिः किम् ॥२२॥ श्रीशुक उवाच ॥एवमन्योन्यं ब्रुवाणाविंद्रवृत्रौ युयुधाते ॥२३॥ वृत्रः परिघेणेंद्रं ताडयामास॥२४॥ इंद्रश्च वज्रेण तं परिघं वृत्रस्य वामं हस्तं च चिच्छेद ॥२५ ॥ तदा छिन्नमूलाभ्यां बाहुभ्यां वृत्रासुरः छिन्नपक्षः पर्वत इव बभौ॥२६॥ छिन्नहस्तोऽपि वृत्रोऽधरोष्ठं भूमौ ऊर्ध्वोष्ठं दिवि च कृत्वा गंभीरमुखेन ॥२७॥ दंष्ट्राभिर्जगत्त्रयं ग्रसन्निव ॥२८॥ पादचारी पर्वत इव ऐरावतेन सह वज्रधारिणमिंद्रं जग्रास ॥ २९ ॥ अजगरेण गिलितं गजमिव वृत्रेण ग्रस्तमिंद्रं दृष्ट्वा देवाः ।

निगीर्णोऽप्यसुरेंद्रेण न ममारोदरं गतः ॥ महापुरुषसन्नद्धो योगमायाबलेन च ॥ ३१ ॥ भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः ॥ उच्चकर्त शिरः शत्रोर्गिरिशृंगमिवौजसा ॥ ३२ ॥ वज्रस्तु तत्कंधरमाशुवेगः कृंतन्समंतात्परिवर्तमानः ॥ न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥ ३३ ॥ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः ॥ वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ॥ ३४ ॥ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम ॥ पश्यतां सर्वलोकानामलोकं समपद्यत ॥ ३५ ॥ इति श्रीमद्भागवते महा० षष्ठस्कंधे वृत्रवधो नाम द्वादशोऽध्यायः ॥ १२ ॥

॥ श्रीशुक उवाच ॥ वृत्रे हते त्रयो लोका विना शक्रेण भूरिद ॥ सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः ॥ १ ॥ देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयम् ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः ॥२॥ राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने ॥ येनासन्सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ॥ ३ ॥ श्रीशुक उवाच ॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः ॥ तद्वधायार्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात् ॥ ४ ॥ इंद्र उवाच ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम् ॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व मार्ज्म्यहम् ॥ ५ ॥ श्रीशुक उवाच ॥ ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् ॥ याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ॥ ६ ॥ हयमेधेन पुरुषं परमात्मानमीश्वरम् ॥ इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥ ७ ॥ ब्रह्महा पितृहा गोघ्नो मातृहाऽऽचार्यहाघवान् ॥ श्वादः पुल्कसको वापि शुद्ध्येरन्यस्य कीर्तनात् ॥ ८ ॥ तमश्वमेधेन महामखेन श्रद्धान्वितोऽस्माभिरनुष्ठितेन ॥ हत्वापि सब्रह्म चराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥ ९ ॥ ॥ ॥

महर्षयश्च हा कष्टमिति चुक्रुशुः । इंद्रस्तस्योदरं गतोऽपि नारायणकवचयोगेन योगमायाबलेन च न ममार ॥ ३० ॥ ३१ ॥ स वज्रेण तत्कुक्षिं भित्वा निष्क्रम्य तस्य शिरश्चिच्छेद ॥ ३२ ॥ तदैंद्रप्रेरितोऽतिवेगवान् वज्रस्तस्य ग्रीवां समंतात्कृंतन् सन् एकसंवत्सरेण वृत्रशिरो न्यपातयत् ॥ ३३ ॥ तदा खे दुंदुभयो नेदुः । गंधर्वसिद्धाः पुष्पैरवाकिरन् । महर्षयो वृत्रहंतुः पराक्रमप्रकाशकैर्मंत्रैरिंद्रं तुष्टुवुः ॥ ३४ ॥ तदा वृत्रस्य देहान्निर्गतमात्मज्योतिः सर्वेषां पश्यतां सतां लोकातीतं भगवंतं समपद्यत ॥ ३५ ॥ इति श्रीमद्भागवतचूर्णि० षष्ठस्कंधे द्वादशोऽध्यायः ॥ १२ ॥ ॥ त्रयोदशे तु वृत्रस्य ब्रह्महत्यामहाभयात् । चिरं नष्टोऽवितः शक्रो विष्णुनेति निरूप्यते ॥१॥ श्रीशुक उवाच ॥ हे नृप, वृत्रे हते सति इंद्रं विना सर्वे लोकाः सुखिनो जाताः ॥१॥ तदा असुखिनं शक्रमपृष्ट्वा देवर्षिपित्रादयो ब्रह्मेशाद्याश्च स्वं स्वं स्थानंप्रति जग्मुः ॥ २ ॥ राजोवाच ॥ अहो यदा वृत्रवधेन देवाः सुखिन आसन् तदा जितशत्रोरिंद्रस्यैव दुःखं कुतोऽभूत् तन्नो वद ॥३॥ श्रीशुक उवाच ॥ सर्वे देवा वृत्राद्भीतास्तद्वधायेंद्रं प्रार्थयन् ॥ ४ ॥ तदैंद्र उवाच ॥ हे देवाः, विश्वरूपवधोद्भवां ब्रह्महत्यां स्त्रीभूजलद्रुमेभ्यो विभज्याहं दत्तवान् । अधुना वृत्रहत्यां क्व मार्जयामि ॥५॥ श्रीशुक उवाच ॥ ऋषय इंद्रवचः श्रुत्वोचुः । हे इंद्र, अश्वमेधेन त्वां याजयिष्यामः । त्वं मा भैः ॥६॥ अश्वमेधेन नारायणमिष्ट्वा जगद्वधादपि मोक्ष्यसे ॥७॥ ब्रह्महा पितृहा गोघ्नो मातृहा आचार्यहा चांडालोऽपि यस्य नामसंकीर्तनात् शुध्येरन् ॥८॥ तं हरिमश्वमेधेनेष्ट्वा चराचरं हत्वापि

त्वं न लिप्यसे । खलनिग्रहेण न लिप्यस इति किं वक्तव्यम् ॥ ९ ॥ श्रीशुक उवाच ॥ एवं विप्राज्ञया वृत्रं जघान । तदैव ब्रह्महत्येंद्रमाससाद ॥ १० ॥ तया ब्रह्महत्ययेंद्रस्तापं प्राप । धैर्यादयो गुणा अपि निंद्यकर्मकरं न सुखयंति ॥ ११ ॥ तदा चांडालीमिव रुधिरयुक्तवस्त्रां क्षयरोगव्याप्तां दुर्गंधेन मार्गं दूषयंतीम् ॥१२॥ तिष्ठ तिष्ठेति भाषिणीं पश्चाद्धावंतीं विलोक्य ॥१३॥ इंद्रः सर्वा दिशो गतः सन् तस्या निवृत्तिमलब्ध्वेशान्यां दिशि मानसं सरोवरं प्रविष्टः ॥ १४ ॥ तत्र कमलनालतंतून् प्रविश्यालब्धभोगो ब्रह्मवधान्मोक्षं चिंतयन् वर्षसहस्रपर्यंतमुवास ॥ १५ ॥ तावद्विद्यायोगबलेन नहुषः स्वर्गं शशास । स संपदैश्वर्यमदांधबुद्धिरिंद्राण्याऽजगरत्वं प्रापितः ॥१६॥ इंद्रः पुनर्ब्राह्मणैरुपहूतः सन् स्वर्गं प्राप्तः ॥१७॥ अथ ब्रह्मर्षयस्तत्रैत्येंद्रमश्वमेधेन दीक्षयांचक्रुः ॥ १८॥ तस्मिन्नश्वमेधे महेंद्रेण सर्वदेवमये भगवतीज्यमाने सति ॥१९॥ पापसमूहरूपोऽपि स वृत्रवधस्तेन भगवता नाशं प्रापितः ॥२०॥ एवमिंद्रो मरीचिप्रमुखैर्ऋषिभिर्यथोक्तेनाश्वमेधेन यज्ञपतिमिष्ट्वा विधूतपापो बभूव ॥२१॥ इदमाख्यानमिंद्रस्य जयं भक्तजनानुवर्णनं महेंद्रमोक्षं सर्वपापानां क्षालनम् ॥२२॥ ये पुरुषाः सदा पर्वणि पर्वणि वा पठंति शृण्वंति वा तेषामिदं धनप्राप्तिकरं यशोवृद्धिकरं शत्रुनाशकमायुष्यवर्धकं च भवति॥ २३ ॥ इति श्रीम० चूर्णि० षष्ठ० त्रयोदशोऽध्यायः॥ १३ ॥

श्रीशुक उवाच ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुम् ॥ ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥ तयेंद्रः स्मासहत्तापं निर्वृतिर्नामुमाविशत् ॥ ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः ॥ ११ ॥ तां ददर्शानुधावंतीं चांडालीमिव रूपिणीम् ॥ जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटाम् ॥ १२ ॥ विकीर्य पलितान्केशांस्तिष्ठ तिष्ठेति भाषिणीम् ॥ मीनगंध्यसुगंधेन कुर्वतीं मार्गदूषणम् ॥ १३ ॥ नभोगतो दिशः सर्वाः सहस्राक्षो विशांपते ॥ प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसम् ॥१४॥ स आवसत्पुष्करनालतंतूनलब्धभोगो यदिहाग्निदूतः ॥ वर्षाणि साहस्रमलक्षितोंऽतः स चिंतयन्ब्रह्मवधाद्विमोक्षम् ॥१५॥ तावत्त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः ॥ स संपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चां गतिमिंद्रपत्न्या ॥ १६ ॥ ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः ॥ पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥ १७ ॥ तं च ब्रह्मर्षयोऽभ्येत्य हयमेधेन भारत ॥ यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह ॥ १८ ॥ अथेज्यमाने पुरुषे सर्वदेवमयात्मनि ॥ अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः ॥ १९ ॥ स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ॥ नीतस्तेनैव शून्याय नीहार इव भानुना ॥ २० ॥ स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ॥ इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो महानास विधूतपापः ॥ २१ ॥ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनम् ॥ भक्त्युच्छ्रयं भक्तजनानुवर्णनं महेंद्रमोक्षं विजयं मरुत्वतः ॥ २२ ॥ पठेयुराख्यानमिदं सदा बुधाः शृण्वंत्वथो पर्वणि पर्वणींद्रियम् ॥ धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथायुषम् ॥२३॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे इंद्रविजयो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥

परीक्षिदुवाच ॥ रजस्तमःस्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः ॥ नारायणे भगवति कथमासीद्दृढा मतिः ॥ १ ॥ देवानां शुद्धसत्वानामृषीणां चामलात्मनाम् ॥ भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥ २ ॥ रजोभिः समसंख्याताः पार्थिवैरिह जंतवः ॥ तेषां ये केचनेहंते श्रेयो वै मनुजादयः ॥ ३ ॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम ॥ मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥ ४॥ मुक्तानामपि सिद्धानां नारायणपरायणः ॥ सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ॥ ५ ॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ॥ इत्थं दृढमतिः कृष्ण आसीत्संग्राम उल्बणे ॥६॥ अत्र नः संशयो भूयान्श्रोतुं कौतूहलं प्रभो ॥ यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥ ७ ॥ सूत उवाच ॥ परीक्षितोऽथ संप्रश्नं भगवान्बादरायणिः ॥ निशम्य श्रद्दधानस्य प्रतिनंद्य वचोऽब्रवीत् ॥८॥ श्रीशुक उवाच ॥ शृणुष्वावहितो राजन्नितिहासमिमं यथा ॥ श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ॥ ९ ॥ आसीद्राजा सार्वभौमः शूरसेनेषु वै नृप ॥ चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ्मही ॥ १० ॥ तस्य भार्यासहस्राणां सहस्राणि दशाभवन् ॥ सांतानिकश्चापि नृपो न लेभे तासु संततिम् ॥ ११ ॥ रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ॥ संपन्नस्य गुणैः सर्वैश्चिंता वंध्यापतेरभूत् ॥ १२ ॥ न तस्य संपदः सर्वा महिष्यो वामलोचनाः ॥ सार्वभौमस्य भूश्चेयमभवन्प्रीतिहेतवः ॥ १३ ॥ तस्यैकदा तु भवनमंगिरा भगवानृषिः ॥ लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥ १४ ॥ तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमुपासीदत्सुखासीनं समाहितः ॥ १५ ॥ महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ॥ प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् ॥१६॥ अंगिरा उवाच ॥ अपि तेऽनामयं स्वस्ति प्रकृतीनां तथात्मनः ॥ यथा प्रकृतिभिर्गुप्तः पुमान्राजापि सप्तभिः ॥ १७ ॥ ॥

चतुर्दशे तु सहसा कृच्छ्राल्लब्धे सुते मृते । चित्रकेतोरतिस्नेहादतिशोको निरूप्यते ॥ १ ॥ राजोवाच ॥ हे ब्रह्मन्, रजस्तमःस्वभावस्य वृत्रस्य नारायणे भगवति दृढा मतिः कथमासीत् ॥ १ ॥ शुद्धसत्वानामपि देवानां मुकुंदचरणे भक्तिर्बहुधा न जायते ॥ २ ॥ इह जगति जीवा अनंताः संति । तेषां मध्ये केचन धर्मं कुर्वंति ॥३॥ तेषां मध्ये केचन मुमुक्षवः । तेषामपि सहस्रेषु कश्चिद्गृहादिसंगाद्विमुच्यते तत्त्वं जनाति च ॥ ४॥ मुक्तानामपि कोटिषु शांतचित्तो नारायणपरायणः सुदुर्लभोऽस्ति॥५॥एवं सति पापिष्ठो वृत्रो भयंकरे संग्रामेऽपि कृष्णे दृढमतिः कथमासीत् ॥६॥ अत्र नो भूयान् संशयोऽस्ति तं छिंधि ॥७॥ सूत उवाच ॥ राज्ञः प्रश्नं श्रुत्वा भगवान् शुकस्तं प्रतिनंद्याब्रवीत् ॥८॥ श्रीशुक उवाच ॥ हे राजन्, अस्मिन् विषये श्रीव्यासान्नारदाद्देवलादपि मया श्रुतमितिहासं त्वं शृणु ॥९॥ शूरसेनदेशेषु कश्चिच्चित्रकेतुनाम्ना सार्वभौमो राजाऽऽसीत् ॥१०॥ तस्यैककोटिर्भार्या आसन् । तासु राजा संततिं न लेभे ॥ ११ ॥ रूपौदार्यैश्वर्यादिभिः संपन्नस्यापि वंध्यापतेस्तस्य चिंताऽभूत् ॥१२॥ तस्य सर्वाः स्त्रियः संपदः इयं भूश्च प्रीतिहेतवो नाभवन् ॥१३॥ एकदा तस्य गृहे यदृच्छया अंगिरानाम ऋषिराजगाम ॥१४॥ तदा राजा प्रत्युत्थानार्हणादिभिस्तं विधिवत्पूजयित्वा तस्य समीपमुपविष्टोऽभूत् ॥ १५॥ तदा प्रश्रयावनतं तं राजानंप्रति सत्कृत्य महर्षिरब्रवीत् ॥ १६ ॥ अंगिरा उवाच ॥ हे राजन्, ते आरोग्यमस्ति किम् । तथामात्यादिसप्तप्रकृतीनां कल्याणमस्ति किम् ॥ १७ ॥ ॥

राजा प्रधानादिषु आत्मनः सर्वं भारं निधाय तेषां साहाय्येन यथा राज्यसुखमनुभवति तथा ते प्रधानादयोऽपि स्वाधिकारप्रभुत्वं राजनि निधाय सुखिनो भवंति ॥१८॥ हे नृप, तव स्त्रियः प्रधानभृत्यजनपदाः पुत्राश्च वशवर्तिनः संति किम् ॥१९॥ यस्य मनो वशीभूतं तस्य सर्वे जना मांडलिकाश्च वशगा भवंति ॥२०॥ हे राजन्, भवान् मनसा न तुष्यति किम् । चिंतया शुष्कमुखं त्वामहं लक्षये ॥२१॥ एवं मुनेर्वाक्यं निशम्य प्रजाकामो राजोवाच ॥२२॥ चित्रकेतुरुवाच ॥ हे मुने, तपोज्ञानसमाधिभिर्युक्तस्य तवाज्ञातं किमस्ति न किमपि ॥ २३ ॥ तथापि पृच्छतस्तवानुज्ञयाहं मनसि चिंतितं वक्ष्ये ॥ २४ ॥ लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसंपदः मे संति । तथापि ता अप्रजं मां न सुखयंति ॥२५॥ अतः पूर्वजैः सह नरकं यथा प्रजया तरेयं तथा त्वं विधेहि ॥२६॥ श्रीशुक

आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् ॥ राज्ञा तथा प्रकृतयो नरदेवाहिताधयः ॥ १८ ॥ अपि दाराः प्रजामात्या भृत्याः श्रेण्योऽथ मंत्रिणः ॥ पौरा जानपदा भूपा आत्मजा वशवर्तिनः ॥१९॥ यस्यात्मानुवशश्चेत्स्यात्सर्वे तद्वशगा इमे ॥ लोकाः सपाला यच्छंति सर्वे बलिमतंद्रिताः ॥ २० ॥ आत्मना प्रीयते नात्मा परतः स्वत एव वा ॥ लक्षयेऽलब्धकामं त्वां चिंतया शबलं मुखम् ॥ २१ ॥ एवं विकल्पितो राजन्विदुषा मुनिनापि सः ॥ प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिम् ॥ २२ ॥ चित्रकेतुरुवाच ॥ भगवन्किं न विदितं तपोज्ञानसमाधिभिः ॥ योगिनां ध्वस्तपापानां बहिरंतःशरीरिषु ॥२३॥ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितम् ॥ भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥ २४ ॥ लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसंपदः ॥ न नंदयंत्यप्रजं मां क्षुत्तृट्काममिवापरे ॥ २५ ॥ ततः पाहि महाभाग पूर्वैः सह गतं तमः ॥ यथा तरेम दुस्तारं प्रजया तद्विधेहि नः ॥२६॥ श्रीशुक उवाच ॥ इत्यर्थितः स भगवान्कृपालुर्ब्रह्मणः सुतः ॥ श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्विभुः ॥२७॥ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत ॥ नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद्विजः ॥२८॥ अथाह नृपतिं राजन्भवितैकस्तवात्मजः ॥ हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥२९॥ सापि तत्प्राशनादेव चित्रकेतोरधारयत् ॥ गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजम् ॥ ३० ॥ तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः ॥ ववृधे शूरसेनेश तेजसा शनकैर्नृप ॥३१॥ अथ काल उपावृत्ते कुमारः समजायत ॥ जनयन् शूरसेनानां शृण्वतां परमां मुदम् ॥ ३२ ॥ हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः ॥ वाचयित्वाऽऽशिषो विप्रैः कारयामास जातकम् ॥ ३३ ॥ तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ॥ ग्रामान्हयान् गजान्प्रादाद्धेनूनामर्बुदानि षट् ॥ ३४ ॥ ॥

उवाच ॥ एवं राज्ञा प्रार्थितो मुनिश्चरुं श्रपयित्वा त्वष्टारमयजत् ॥२७॥ ततो यज्ञोच्छिष्टं गृहीत्वा राज्ञः सर्वस्त्रीणां मध्ये ज्येष्ठायै कृतद्युतिनाम्न्यै ददौ ॥२८॥ अथ मुनिस्तं राजानं जगाद । हे राजन्, हर्षशोकप्रद एकः पुत्रस्तव भविष्यतीत्युक्त्वा सोंऽगिरा ययौ ॥ २९ ॥ सा कृतद्युति श्चरुप्राशनाच्चित्रकेतोर्गर्भं दधार ॥३०॥ तस्या गर्भः प्रतिदिनं शुक्ले चंद्र इव ववृधे ॥३१॥ अथ काले प्राप्ते शूरसेनदेशानां परमं हर्षं जनयन् कुमारो जज्ञे ॥३२॥ तदा हृष्टो राजा स्नातः सन् विप्रैः कुमारस्य जातकं कारयित्वा ॥३३॥ तेभ्यो हिरण्यं ग्रामान् हयान् गजान् षष्टि६०कोटीर्धेनूंश्च ददौ ॥ ३४ ॥ ॥ ॥

अन्येषां पर्जन्य इव यथेच्छं ववर्ष ॥३५॥ अथ महाप्रयत्नलब्धे पुत्रे दिने दिने मातापित्रोः स्नेहो ववृधे ॥ ३६ ॥ कृतद्युतेः सपत्नीनां प्रजाकामरूपस्तापो बभूव ॥३७॥ प्रतिदिनं पुत्रं लालयतश्चित्रकेतोः पुत्रवत्यां कृतद्युतौ यथा परमा प्रीतिरासीत्तथान्यासु स्त्रीषु नासीत् ॥३८॥ ता आनपत्येन दुःखेन राज्ञोऽनादरणेन चात्मानं निंदयामासुः ॥३९॥ अहो राज्ञोऽसंमतां सपत्नीभिर्दासीमिव तिरस्कृतामप्रजां स्त्रियं धिक् ॥४०॥ दास्यस्तु स्वामिनः परिचर्यया लब्धमानाः संति । वयं तु दास्या दासी यथा तथा भाग्यहीनाः स्मः ॥४१॥ एवं सपत्न्याः पुत्रसंपत्तिं वीक्ष्य पुत्रद्वेषं कुर्वत्यः सत्यः ॥ ४२ ॥ दुष्टबुद्ध्या कुमाराय विषं

ववर्ष काममन्येषां पर्जन्य इव देहिनाम् ॥ धन्यं यशस्यमायुष्यं कुमारस्य महामनाः ॥ ३५ ॥ कृच्छ्रलब्धेऽथ राजर्षेस्तनयेऽनुदिनं पितुः ॥ यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्धत ॥ ३६ ॥ मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः ॥ कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥ ३७ ॥ चित्रकेतोरतिप्रीतिर्यथा दारे प्रजावति ॥ न तथान्येषु संजज्ञे बालं लालयतोऽन्वहम् ॥ ३८ ॥ ताः पर्यतप्यन्नात्मानं गर्हयंत्योऽभ्यसूयया ॥ आनपत्येन दुःखेन राज्ञोऽनादरणेन च ॥ ३९ ॥ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमताम् ॥ सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम् ॥ ४० ॥ दासीनां को नु संतापः स्वामिनः परिचर्यया ॥ अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ॥ ४१ ॥ एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा ॥ राज्ञोऽसंमतवृत्तीनां विद्वेषो बलवानभूत् ॥ ४२ ॥ विद्वेषनष्टमतयस्त्रियो दारुणचेतसः ॥ गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति ॥ ४३ ॥ कृतद्युतिरजानंती सपत्नीनामघं महत् ॥ सुप्त एवेति संचिंत्य निरीक्ष्य व्यचरद्गृहे ॥ ४४ ॥ शयानं सुचिरं बालमुपधार्य मनीषिणी ॥ पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ॥ ४५ ॥ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम् ॥ प्राणेंद्रियात्मभिस्त्यक्तं हतास्मीत्यपतद्भुवि ॥ ४६ ॥ तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नंत्याः कराभ्यामुर उच्चकैरपि ॥ प्रविश्य राज्ञी त्वरयात्मजांतिकं ददर्श बालं सहसा मृतं सुतम् ॥ ४७ ॥ पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहांबरा ॥ ४८ ॥ ततो नृपांतःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम् ॥ आगत्य तुल्यव्यसनाः सुदुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः ॥ ४९ ॥ श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतन् स्खलन्पथि ॥ स्नेहानुबंधैधितया शुचा भृशं विमूर्च्छितोऽनुप्रकृतिर्द्विजैर्वृतः॥ ५० ॥ पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहांबरः ॥ दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकंठो न शशाक भाषितुम्॥ ५१ ॥ ॥

ददुः ॥४३॥ कृतद्युतिः सपत्नीनां कर्म न जानती बालः सुप्त एवेति संचिंत्य गृहकर्म चकार ॥४४॥ बालं बहुकालं शयानं वीक्ष्य पुत्रमानयेति धात्रीमाज्ञापयामास ॥४५॥ सा शयानं बालमुपव्रज्य तमुत्तारलोचनं मृतं दृष्ट्वा हा हतास्मीति शब्दं कृत्वा भुवि पपात ॥ ४६ ॥ तस्या रोदनं श्रुत्वा त्वरया कृतद्युतिस्तत्रैत्य मृतं पुत्रं वीक्ष्य ॥४७॥ शोकेन मुक्तकेशा सती भूमौ पपात ॥४८॥ ततोंऽतःपुरवर्तिनो नरा नार्यश्च रुरुदुः । सपत्न्यश्च कापट्येन तुल्यदुःखिताः सत्यो रुरुदुः ॥ ४९ ॥ नृपः पुत्रं मृतं श्रुत्वा स्नेहानुबद्धो नष्टदृष्टिश्च पदे पदे प्रपतन् ॥ ५० ॥ तत्रागत्य बालस्य पादमूले पतित्वा शोकाश्रुलोचनो रुद्धकंठो दीर्घं

श्वसन् भाषितुं न शशाक ॥५१॥ ततः कृतद्युतिः शोकव्याप्तं पतिं पुत्रं च मृतं दृष्ट्वा ॥ ५२ ॥ केशान् विकीर्य पाणिनोरःशिरो घ्नंती सती कुररीव सुस्वरं चित्रं
रुरोद ॥ ५३ ॥ अहो विधातः त्वमतीव बालिशोऽसि । यतः स्वसृष्टेर्विपरीतं चेष्टसे । यतो वृद्धे जीवति सति बालस्य मरणेन तव सृष्टिर्नष्टा स्यात् । एवं
विपरीतत्वे सति त्वं केवलं लोकानां शत्रुरसि ॥ ५४ ॥ हे ब्रह्मन्, सृष्टिवृद्ध्यर्थं त्वया यः स्नेहपाशः कृतस्तं स्वयमेव छिनत्सि चेत्तर्हि कश्चिदपि पुत्रादिस्नेहं न
करिष्यति ॥५५॥ हे बालक, त्वं कृपणां मां त्यक्तुं नार्हसि । त्वं शोकतप्तं पितरं च पश्य । अप्रजानां दुस्तरं यन्नरकदुःखं तत्त्वया वयमनायासेन तरेम ।
अतस्त्वं निर्दयेन यमेन सह दूरं मा गच्छ ॥५६॥ हे तात, त्वमुत्तिष्ठ इमे ते वयस्या बालास्त्वां क्रीडितुमाह्वयंति । हे राजनंदन, क्षुधार्तस्त्वं मे स्तनं पिब ।

पतिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिम् ॥ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥५२॥
स्तनद्वयं कुंकुमगंधमंडितं निषिंचती सांजनबाष्पबिंदुभिः ॥ विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरम् ॥५३॥
अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे ॥ परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥ ५४ ॥
नहि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ॥ यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि
॥ ५५ ॥ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम् ॥ अंजस्तरेम भवताऽप्रजदुस्तरं यद्ध्वांतं न याह्यकरुणेन
यमेन दूरम् ॥ ५६ ॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुम् ॥ सुप्तश्चिरं ह्यशनया च
भवान्परीतो भुङ्क्ष्व स्तनं पिब शुचो हर नः स्वकानाम् ॥ ५७ ॥ नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जम्
॥ किंवा गतोऽस्यपुनरन्वयमन्यलोकं नीतोऽघृणेन न शृणोमि कला गिरस्ते ॥ ५८ ॥ श्रीशुक उवाच ॥ विलपंत्या
मृतं पुत्रमिति चित्रविलापनैः ॥ चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह ॥ ५९ ॥ तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः ॥
रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥ ६० ॥ एवं कश्मलमापन्नं नष्टसंज्ञमनायकम् ॥ ज्ञात्वांगिरा नाम मुनिराजगाम
सनारदः ॥ ६१ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे चित्रकेतुविलापो नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ श्रीशुक उवाच
॥ ऊचतुर्मृतकोपांते पतितं मृतकोपमम् ॥ शोकाभिभूतं राजानं बोधयंतौ सदुक्तिभिः ॥ १ ॥ ॥

स्वकानां शोकं हर ॥५७॥ हे पुत्र, अहं तव हास्ययुक्तं मुखं नापश्यम् । मधुरा वाचश्च न श्रुताः । यथा पुनरागमनं न भविष्यति तथा निर्दयेन यमेन
दूरं नीतोऽसि किम् ॥५८॥ श्रीशुक उवाच ॥ एवं मृतं पुत्रं विलपंत्या स्त्रिया सह चित्रकेतुरपि शोकतप्तः सन् मुक्तकंठो रुरोद ॥५९॥ एवं दंपत्योर्विलपतोः
सतोः सर्वे नरा नार्यो रुरुदुः । तदा सर्वमचेतनमासीत् ॥६०॥ एवं शोकनिमग्नं राजानं ज्ञात्वा तत्र बोधकश्च कोऽपि नास्तीति ज्ञात्वा नारदसहितोंऽगिरा
ऋषिराजगाम ॥ ६१ ॥ इति श्रीमद्भागवतचूर्णिका० षष्ठस्कंधे चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ततः पंचदशे चित्रकेतोः शोकापनोदनम् । कृतं तत्त्वोपदेशेन
नारदेनांगिरोयुजा ॥ १ ॥ श्रीशुक उवाच ॥ मृतबालकसमीपे पतितं शोकव्याप्तं राजानं बोधयंतौ नारदांगिरसावूचतुः ॥ १ ॥ ॥

हे राजेंद्र, त्वं यं शोचसि अयं ते कः त्वं चास्य कः। ये पूर्वजन्मनि पित्रादयस्त एवेह जन्मनि पुत्रादयो भवंति॥२॥ यथा नदीवेगेन वालुकाः संयोगं वियोगं च प्राप्नुवंति तथा कालेन जीवा अपि॥३॥यथा धानानां जन्यजनकत्वेऽपि पितृपुत्रादिभावो नास्ति। एवमीश्वरमायया जीवानामपि पितृपुत्रादिभावो निश्चितो नास्ति। अतः शोको न कार्यः॥४॥इमे चराचरा वयं च त्वं च जन्मनः प्राक् मृत्योःपश्चाच्च यथा नास्म तथाऽधुनापि न स्मः॥५॥बालवन्निरपेक्षोऽपि भगवान् भूतैर्भूतानि लीलया सृजतिपाति हरति च॥६॥हे राजन्, पितुर्देहेन पुत्रस्य देहो मातुर्देहाद्बीजाद्बीजमिव जायते। देही जीवस्तु शाश्वत एव॥७॥ एवं देहदेहिनोः परस्परसंबंधेन स्थितोऽयं विभागोऽज्ञानेन कल्पितः॥ अतः शोकं मा कुरु॥८॥ श्रीशुक उवाच॥ एवं द्विजोक्तिभिराश्वासितो राजा पाणिना मुखं प्रमृज्योवाच॥९॥ राजोवाच॥ अवधूतवेषे-

कोऽयं स्यात्तव राजेंद्र भवान्यमनुशोचति॥ त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परम्॥२॥ यथा प्रयांति संयांति स्रोतोवेगेन वालुकाः॥ संयुज्यंते वियुज्यंते तथा कालेन देहिनः॥३॥ यथा धानासु वै धाना भवंति न भवंति च॥ एवं भूतेषु भूतानि चोदितानीशमायया॥ ४॥ वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः॥ जन्ममृत्योर्यथा पश्चात्प्राङ्नैवमधुनापि भो॥ ५॥ भूतैर्भूतानि भूतेशः सृजत्यवति हंत्यजः॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोऽपि बालवत्॥ ६॥ देहेन देहिनो राजन्देहाद्देहोऽभिजायते॥ बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः॥ ७॥ देहदेहिविभागोऽयमविवेककृतः पुरा॥ जातिव्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः॥ ८॥ श्रीशुक उवाच॥ एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः॥ प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत॥ ९॥ राजोवाच॥ कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसाम्॥ अवधूतेन वेषेण गूढाविह समागतौ॥१०॥ चरंति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः॥ मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः॥ ११॥ कुमारो नारद ऋभुरंगिरा देवलोऽसितः॥ अपांतरतमो व्यासो मार्कंडेयोऽथ गौतमः॥ १२॥ वसिष्ठो भगवान्रामः कपिलो बादरायणिः॥ दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथाऽरुणिः॥ १३॥ रोमशश्च्यवनो दत्त आसुरिः सपतंजलिः॥ ऋषिर्वेदशिरा बोध्यो मुनिः पंचशिरास्तथा॥ १४॥ हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः॥ एते परे च सिद्धेशाश्चरंति ज्ञानहेतवः॥ १५॥ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू॥ अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यताम्॥ १६॥ अंगिरा उवाच॥ अहं ते पुत्रकामस्य पुत्रदोऽस्म्यंगिरा नृप॥ एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः॥ १७॥ ॥ ॥

णात्रागतौ युवां ज्ञानसंपन्नौ कौ॥१०॥ भगवद्भक्ता ब्राह्मणा मादृशानामज्ञानां बोधाय भूमौ चरंति॥११॥ ते च—सनत्कुमारः नारदः ऋभुः अंगिराः देवलः असितः अपांतरतमः व्यासः मार्कंडेयः गौतमः॥१२॥ वसिष्ठः परशुरामः कपिलः शुकः दुर्वासाः याज्ञवल्क्यः जातूकर्ण्यः अरुणिः॥ १३॥ रोमशः च्यवनः दत्तात्रेयः आसुरिः पतंजलिः वेदशिराः बोध्यः पंचशिराः॥१४॥ हिरण्यनाभः कौशल्यः श्रुतदेवः ऋतध्वजः। एतेऽपरे च सिद्धेशा ज्ञानोपदेशार्थं भूमौ चरंति॥१५॥तस्माद्युवां मूढबुद्धेरज्ञानांधकारे मग्नस्य मम ज्ञानदीप उदीर्यताम्॥१६॥ अंगिरा उवाच॥ हे नृप, पुत्रकामस्य ते पुत्रदोऽहमंगिरा अस्मि। एष

ज्ञारदोऽस्ति ॥१७॥ पुत्रशोकेनाज्ञाने मग्नं हरिभक्तं त्वां ज्ञात्वा ॥ १८ ॥ भवतोऽनुग्रहायावां समागतौ स्तः । अतस्त्वं शोचितुं नार्हसि ॥ १९ ॥ अहं पूर्वमेव ते ज्ञानोपदेशार्थं प्राप्तः । तदा ते पुत्रप्राप्तीच्छां ज्ञात्वा पुत्रमेव दत्तवान् ॥२०॥ अधुना पुत्रवतां यस्तापः स त्वयानुभूयते । एवं स्त्रीगृहधनविविधैश्वर्यसंपदः ॥२१॥ पृथ्वीराज्यकोशभृत्यादयश्च नश्वरा ज्ञातव्याः ॥२२॥ हे शूरसेन, इमे सर्वेऽपि शोकमोहभयदुःखदाः स्वप्नमायामनोरथसदृशाः ॥ २३ ॥ तात्विकेन स्वरूपेण विनैव दृश्यमाना अपि क्षणांतरे न दृश्यंते । कर्मवासनाभिर्विषयान् ध्यायतः पुंसो मनस एव कर्माणि भवंति । अतो मनःकल्पिता एव ॥ २४ ॥ अयमधिभूताधिदैवाध्यात्मरूपो देह एव जीवस्य विविधान् क्लेशान् संतापांश्च करोति ॥२५॥ अतः स्वस्थेन मनसा आत्मतत्त्वं विचार्य द्वैते स्थिरत्वविश्वासं

इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ॥ अतदर्हमनुस्मृत्य महापुरुषगोचरम् ॥१८॥ अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ॥ ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥ १९ ॥ तदैव ते परं ज्ञानं ददामि गृहमागतः ॥ ज्ञात्वान्याभिनिवेशं ते पुत्रमेव ददावहम् ॥ २० ॥ अधुना पुत्रिणां तापो भवतैवानुभूयते ॥ एवं दारा गृहा रायो विविधैश्वर्यसंपदः ॥ २१ ॥ शब्दादयश्च विषयाश्चला राजविभूतयः ॥ मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः ॥ २२ ॥ सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः ॥ गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ २३ ॥ दृश्यमाना विनार्थेन न दृश्यंते मनोभवाः ॥ कर्मभिर्ध्यायतो नाना कर्माणि मनसोऽभवन् ॥ २४ ॥ अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ॥ देहिनो विविधक्लेशसंतापकृदुदाहृतः ॥ २५ ॥ तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः ॥ द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश ॥ २६ ॥ नारद उवाच ॥ एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम ॥ यां धारयन्सप्तरात्राद्द्रष्टा संकर्षणं प्रभुम् ॥२७॥ यत्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे चित्रकेतुसांत्वनं नाम पंचदशोऽध्यायः ॥१५॥ श्रीशुक उवाच ॥ अथ देवऋषी राजन्संपरेतं नृपात्मजम् ॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ॥ १ ॥ नारद उवाच ॥ जीवात्मन्पश्य भद्रं ते मातरं पितरं च ते ॥ सुहृदो बांधवास्तप्ताः शुचा त्वत्कृतया भृशम् ॥ २ ॥ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ॥ भुंक्ष्व भोगान्पितृप्रत्तानधितिष्ठ नृपासनम् ॥ ३ ॥ ॥

त्यक्त्वोपशममाश्रय ॥२६॥ नारद उवाच ॥ हे राजन्, मत्तस्त्वमेतां मंत्रोपनिषदं गृहाण । यां धारयन् सप्तरात्रात्संकर्षणं विभुं द्रक्ष्यसि ॥ २७ ॥ शिवादयो यत्पादमूलं प्राप्य ममाहमिति भ्रमं विसृज्य यथा ज्ञानं प्रापुस्तथा भवानपि ज्ञानं प्राप्स्यसि ॥ २८ ॥ इति श्रीमद्भागवतचूर्णिका० षष्ठस्कंधे पंचदशोऽध्यायः ॥ १५ ॥ ॥ षोडशे तत्सुतोक्त्यैव विशोकीकृत्य तं नृपम् । आदिदेश महाविद्यां नारदः शेषतोषणीम् ॥ १ ॥ श्रीशुक उवाच ॥ हे राजन्, नारदो ज्ञातीनां मध्ये मृतं बालं जीवयित्वा ज्ञातीनां सांत्वनार्थमिदमुवाच ॥ १ ॥ हे जीवात्मन्, त्वमात्मनो मातरं पितरं शोचतः सुहृदश्च पश्य ॥ २ ॥ स्वं कलेवरमाविश्य शेषेणायुष्येण पित्रा दत्तान् भोगान् भुंक्ष्व नृपासनं चाधितिष्ठ ॥ ३ ॥ ॥ ॥ ॥

जीव उवाच ॥ कर्मभिर्देवतिर्यङ्मनुष्ययोनिषु भ्राम्यमाणस्य मेऽमी कस्मिन् जन्मनि पितरो मातरश्चाभवन् ॥ ४ ॥ ज्ञातिशत्रुमित्रोदासीनाः सर्व एव सर्वेषां क्रमशो भवंति ॥५॥ यथा क्रयविक्रयादिषु सुवर्णं भ्रमति तथा कर्मणा जीवो जनकेषु भ्रमति ॥६॥ यावद्यस्य देहस्य संबंधस्तावदेव तस्य ममत्वम् ॥७॥ एवं जीवः पित्रादिसंबंधं यावत्प्राप्नोति तावदेव तत्र ममत्वं वर्तते स च संबंधोऽनित्यः ॥ ८ ॥ जीवस्त्वव्ययः सर्वाश्रयः सर्वेंद्रियसाक्षी स आत्ममायया गुणैरात्मानं सृजते ॥९॥ अस्य प्रियाप्रियौ न स्तः । अयं हिताहितकर्तॄणां मित्रादीनां या विचित्रा बुद्धयस्तासां द्रष्टाऽस्ति ॥१०॥ स आत्मा सुखं दुःखं राज्यादिकं च नादत्ते । एवंभूतस्य मम युष्माकं च संबंधो नास्ति । अतः शोकं मा कुरुत ॥११॥ श्रीशुक उवाच ॥ जीव इत्युक्त्वांऽतर्हितः । तदा सर्वे ज्ञातयो विस्मि-

जीव उवाच ॥ कस्मिन् जन्मन्यमी मह्यं पितरो मातरोऽभवन् ॥ कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥४॥ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ॥ सर्व एव हि सर्वेषां भवंति क्रमशो मिथः ॥ ५ ॥ यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ॥ पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥ नित्यस्यार्थस्य संबंधो ह्यनित्यो दृश्यते नृषु ॥ यावद्यस्य हि संबंधो ममत्वं तावदेव हि ॥७॥ एवं योनिगतो जीवः स नित्यो निरहंकृतः ॥ यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ॥ ८ ॥ एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् ॥ आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥ ९ ॥ न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥१०॥ नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम् ॥ उदासीनवदासीनः परावरदृगीश्वरः॥११॥ श्रीशुक उवाच ॥ इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ॥ विस्मिता मुमुचुः शोकं छित्त्वात्मस्नेहशृंखलाम् ॥ १२॥ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः ॥ तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदम् ॥ १३ ॥ बालघ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः ॥ बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम् ॥ यमुनायां महाराज स्मरंत्यो द्विजभाषितम् ॥ १४॥ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ॥ गृहांधकूपान्निष्क्रांतः सरःपंकादिव द्विपः ॥१५॥ कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः ॥ मौनेन संयतप्राणो ब्रह्मपुत्राववंदत ॥ १६ ॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ॥ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥१७॥ ॐ नमस्तुभ्यं भगवते वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः सकर्षणाय च ॥ १८ ॥ नमो विज्ञानमात्राय परमानंदमूर्तये ॥ आत्मारामाय शांताय निवृत्तद्वैतदृष्टये ॥ १९ ॥ आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ॥ हृषीकेशाय महते नमस्ते विश्वमूर्तये ॥ २० ॥

ताः संतः स्नेहशृंखलां छित्वा शोकं मुमुचुः ॥१२॥ ततः पुत्रस्य कलेवरं दग्ध्वा क्रियाश्च कृत्वा शोकमोहौ तत्यजुः ॥ १३ ॥ तत्र बालघ्न्यः स्त्रियो लज्जिताः सत्यो ब्राह्मणैर्निरूपितं बालहत्याव्रतं यमुनायां चेरुः ॥१४॥ एवं स चित्रकेतुर्द्विजोक्तिभिः प्राप्तज्ञानः सन् गृहांधकूपान्निष्क्रम्य ॥१५॥ कालिंद्यां विधिवत् स्नात्वा पितृतर्पणादि कृत्वा मौनेन संयतप्राणः सन् ब्रह्मपुत्राववंदत ॥१६॥ तदा प्रपन्नाय तस्मै नारद एतां विद्यां प्रोवाच ॥ १७ ॥ ॐनमस्तुभ्यं भगवते वासुदेवाय प्रद्युम्नायानिरुद्धाय संकर्षणाय च नमोऽस्तु ॥१८॥ परमानंदमूर्तये आत्मारामाय शांताय च नमः ॥१९॥ हृषीकेशाय विश्वमूर्तये च नमः ॥ २० ॥ ॥

इंद्रियेषु शांतेषु यः प्रकाशते स कार्यकारणयोः कारणरूपो भगवानस्मान् रक्षतु ॥२१॥ यस्मिन् जगत्तिष्ठति। यत उत्पद्यते नश्यति च तस्मै ब्रह्मणे नमः ॥ २२ ॥ मनोबुद्धींद्रियप्राणा यं न विदुः। तं हरिं नतोऽस्मि ॥२३॥ देहेंद्रियमनआदयो यस्य चैतन्येन स्वस्वकर्मसु प्रचरंति तस्मै नमः ॥ २४ ॥ ॐनमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये नमोऽस्तु ॥२५॥ श्रीशुक उवाच ॥ नारदो भक्तायैतां विद्यामादिश्यांगिरसा सह ब्रह्मलोकं ययौ ॥२६॥ चित्रकेतुरब्भक्षः सन् नारदोक्तां तां विद्यां सप्ताहं धारयामास ॥२७॥ ततः सप्तरात्रांते तया विद्यया स विद्याधराधिपत्यं लेभे ॥२८॥ ततः कतिपयैर्दिवसैर्म-

वचस्युपरतेऽप्राप्य य एको मनसा सह ॥ अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २१ ॥ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ॥ मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥ यन्न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहिश्च विततं व्योमवत्तं नतोऽस्म्यहम् ॥ २३ ॥ देहेंद्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरंति कर्मसु ॥ नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेति ॥२४॥ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविंदयुगल परम परमेष्ठिन्नमस्ते ॥२५॥ श्रीशुक उवाच ॥ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ॥ ययावंगिरसा साकं धाम स्वायंभुवं प्रभो ॥ २६ ॥ चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम् ॥ धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥ २७ ॥ ततश्च सप्तरात्रांते विद्यया धार्यमाणया ॥ विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ॥ २८ ॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥ जगाम देवदेवस्य शेषस्य चरणांतिकम् ॥ २९ ॥ मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकंकणम् ॥ प्रसन्नवक्त्रारुणलोचनं वृतं ददर्श सिद्धेश्वरमंडलैः प्रभुम् ॥ ३० ॥ तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलांतःकरणोऽभ्ययान्मुनिः ॥ प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽनमदादिपूरुषम् ॥३१॥ स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः ॥ प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरम् ॥ ३२ ॥ ततः समाधाय मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ ॥ नियम्य सर्वेंद्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहम् ॥ ३३ ॥ चित्रकेतुरुवाच ॥ अजितजितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता ॥ विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः ॥ ३४ ॥ तव विभवः खलु भगवन् जगदुदयस्थितिलयादीनि ॥ विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्धंते पृथगभिमत्या ॥ ३५ ॥ ॥ ॥

नोगत्या शेषस्य चरणांतिकं जगाम ॥२९॥ तत्र मृणालवद्गौरं नीलवस्त्रं किरीटांगदकंकणैर्युक्तं सिद्धेश्वरमंडलैः परिवेष्टितं प्रभुं ददर्श ॥ ३० ॥ तद्दर्शनेन गतपापो हृष्टरोमा प्रेमाश्रुलोचनश्चित्रकेतुर्भक्त्या तमादिपुरुषं ननाम ॥३१॥ तदा प्रेम्णोपरुद्धकंठः सन् तस्य शेषस्य स्तवनं कर्तुं न शशाक ॥ ३२ ॥ ततो मनः स्थिरं कृत्वा जगद्गुरुं तुष्टाव ॥ ३३ ॥ चित्रकेतुरुवाच ॥ हे अजित, भवानन्यैरजितोऽपि भक्तैर्जितोऽसि। ते निष्कामा भक्ता अपि भवता स्वस्वरूपदानेन विजिताः ॥ ३४ ॥ हे ईश, जगत उत्पत्तिस्थितिलयप्रवेशनियमनादीनि तवैव लीलास्ति ॥ ३५ ॥ ॥ ॥

त्वमाद्यंतमध्यरहितोऽपि जगत आदावंते मध्ये च त्वमेवासि । यतोऽलंकारादिषु आदावंते च यत्सुवर्णाद्यस्ति तदेव मध्येऽपि ॥ ३६ ॥ हे भगवन्, अयं ब्रह्मांडकोशः पृथिव्यादिभिः सप्तावरणैः संवेष्टितः सन् त्वयि परमाणुवत्परिभ्रमति तस्मात्त्वमनंतोऽसि ॥ ३७ ॥ ये नरपशवस्त्वां विहाय तव विभूतीरुपासते तेषां मनोरथा नश्यंति ॥३८॥ विषयकामनयापि कृता त्वत्सेवा मोक्षफलैव भवति ॥ ३९ ॥ हे अजित, यदा भवान् भागवतं धर्ममाह तदैव त्वया सर्वोत्कर्षेण स्थितम् । ये निष्किंचनाः सनकादयो ऋषयस्ते मोक्षप्राप्त्यर्थं त्वामुपासते ॥ ४० ॥ यस्मिन् भगवद्धर्मे विषमा बुद्धिर्नास्ति । शत्रुमरणादिविषमबुद्ध्या विहितो यो धर्मः स क्षयिष्णुत्वादधर्मप्राय एव ॥ ४१ ॥ स्वस्य परस्य च द्रोहरूपेण धर्मेणं कुशलं किं न किंचित् ॥ ४२ ॥ यया साधुसेवितो भागवतो धर्म

परमाणुपरममहतोस्त्वमाद्यंतांतरवर्ती त्रयविधुरः ॥आदावंतेऽपि च सत्वानां यद्ध्रुवं तदेवांतरालेऽपि ॥३६॥ क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरंडकोशः ॥ यत्र पतत्यणुकल्पः सहांडकोटिकोटिभिस्तदनंतः ॥३७॥ विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ॥ तेषामाशिष ईश तदनु विनश्यंति यथा राजकुलम् ॥ ३८ ॥ कामधियस्त्वयि रचिता न परम रोहंति यथा करंभबीजानि ॥ ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वंद्वजालानि ॥ ३९ ॥ जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यम् ॥ निष्किंचना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ ४० ॥ विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ॥ विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥ ४१ ॥ कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ॥ स्वद्रोहात्तव कोपः परसंपीडया च तथा धर्मः ॥४२॥ न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः॥ स्थिरचरसत्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः ॥ ४३ ॥ नहि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ॥ यन्नाम सकृच्छ्रवणात्पुल्कसकोऽपि विमुच्यते संसारात् ॥ ४४ ॥ अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ॥ सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥ विदितमनंत समस्तं तव जगदात्मनो जनैरिहाचरितम् ॥ विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥ ४६ ॥ नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ॥ दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥ ४७ ॥ यं वै श्वसंतमनु विश्वसृजः श्वसंति यं चेकितानमनु चित्तय उच्चकंति ॥ भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥ ४८ ॥ श्रीशुक उवाच ॥ संस्तुतो भगवानेवमनंतस्तमभाषत ॥ विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ॥ ४९ ॥

उक्तः सा ते दृष्टिः परमार्थं न मुंचति ॥४३॥ हे भगवन्, तद्दर्शनान्नृणां सर्वपापक्षय एतदघटितं नहि । यतस्त्वन्नामसकृच्छ्रवणाच्चांडालोऽपि संसारान्मुच्यते ॥ ४४ ॥ हे भगवन्, अधुना तव दर्शनेनाहं कृतार्थोऽस्मि । यतो नारदोपदेशो मिथ्या कथं भवति नैव भवति ॥ ४५ ॥ सर्वांतर्यामिणस्तव जनैः किं प्रार्थनीयम् । सूर्यस्य खद्योतैरिव ॥ ४६ ॥ अतः कुयोगिनां दुर्दर्शाय परमहंसाय ते नमः ॥ ४७ ॥ यस्य मूर्धनि भूमंडलं सर्षपायति तस्मै ते सहस्रमूर्ध्ने नमः ॥ ४८ ॥ श्रीशुक उवाच ॥ एवं स्तुतोऽनंतो विद्याधरपतिं चित्रकेतुं जगाद ॥ ४९ ॥ ॥ ॥ ॥

श्रीभगवानुवाच ॥ ह राजन्, नारदांगिरोभ्यां कृतेनोपदेशेन मंत्रोपनिषद्विद्यया मद्दर्शनाच्च त्वं सिद्धोऽसि ॥ ५० ॥ हे राजन्, सर्वभूतानामहमात्मा । विश्वं मद्व्यतिरिक्तं नास्ति । परब्रह्म वेदब्रह्म च ममैव रूपे स्तः ॥५१॥ अतो भोक्तृभोग्यात्मकमुभयं मया व्याप्तं मयि प्रकल्पितं च स्मरेत् ॥५२॥ यथा सुप्तः पुरुषः स्वप्ने गिरिवनादिरूपं देशांतरस्थं विश्वमात्मन्येव पश्यति । स्वप्नमध्य एव सुषुप्तिं जाग्रदवस्थां च पश्यति ॥५३॥ तथा प्रत्यक्षाणि जागरणादीन्यपि जीवोपाधेर्बुद्धेरवस्थाभूतानि । मायामात्राणीत्येवं विज्ञाय तदवस्थारहितमात्मानं स्मरेत् ॥ ५४ ॥ जीवो येन स्वरूपेण स्वापकाले निर्गुणं सुखं वेद । तमात्मानं मां जानीहि ॥ ५५ ॥ प्रस्वापं प्रतिबोधं चानुसंदधतः पुंसो यज्ज्ञानं तयोः प्रकाशकत्वेनान्वेति व्यतिरिच्यते च । तदेव परं ब्रह्मात्मानं जानीहि ॥ ५६ ॥

श्रीभगवानुवाच ॥ यन्नारदांगिरोभ्यां ते व्याहृतं मेऽनुशासनम् ॥ संसिद्धोऽसि तया राजन्विद्यया दर्शनाच्च मे ॥ ५० ॥ अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥ शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥ लोके विततमात्मानं लोकं चात्मनि संततम् ॥ उभयं च मया व्याप्तं मयि चैवोभयं कृतम् ॥ ५२ ॥ यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ॥ आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥ एवं जागरणादीनि जीवस्थानानि चात्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ॥ सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ॥ ५५ ॥ उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ॥ अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम् ॥ ५६ ॥ यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः ॥ ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ॥ ५७ ॥ लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवाम् ॥ आत्मानं यो न बुध्येत न क्वचिच्छममाप्नुयात् ॥ ५८ ॥ स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् ॥ अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः ॥ ५९ ॥ सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः ॥ ततोऽनिवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥ ६० ॥ एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनाम् ॥ आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥ ६१ ॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ॥ ज्ञानविज्ञानसंतुष्टो मद्भक्तः पुरुषो भवेत् ॥ ६२ ॥ एतावानेव मनुजैर्योगनैपुणबुद्धिभिः ॥ स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनम् ॥ ६३ ॥ त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ॥ ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि ॥ ६४ ॥ ॥

यदा मत्स्वरूपं विस्मृतं तदात्मनः सकाशाद्भिन्नं भवति । ततः पुंसो जन्ममरणरूपः संसारो भवति ॥ ५७ ॥ इह मानुषीं योनिं लब्ध्वा य आत्मानं न वेद स कुत्रापि सुखं नाप्नुयात् ॥ ५८ ॥ अतो विचारी पुरुषः प्रवृत्तिमार्गे क्लेशं निवृत्तिमार्गे मोक्षं च निश्चित्य संकल्पाद्विरमेत् ॥ ५९ ॥ किंच । दंपती सुखाय दुःखनाशाय च कर्माणि कुर्वाते । ततः सुखप्राप्तिर्दुःखनाशश्च न भवति ॥ ६० ॥ एवं नृणां कर्मफलं विपरीतमात्मनश्च सूक्ष्मां गतिं बुद्ध्वा ॥ ६१ ॥ दृष्टश्रुतविषयैर्मुक्तः स ज्ञानविज्ञानतुष्टो मम भक्तो भवेत् ॥ ६२ ॥ योगनैपुण्यबुद्धिभिर्यत्परमात्मा सर्वत्रैक एवास्तीति ज्ञानं स एव स्वार्थो ज्ञातव्यः ॥ ६३ ॥ एवं मम वचो धारयन् ज्ञानविज्ञानसंपन्नस्त्वमाशु सिद्ध्यसि ॥ ६४ ॥ ॥ ॥ ॥

श्रीशुक उवाच ॥ एवं हरिश्चित्रकेतुमाश्वास्यांतर्दधे ॥ ६५ ॥ इति श्रीमद्भागवतचू० षष्ठे० षोडशोऽध्यायः ॥ १६ ॥ ॥ ततः सप्तदशेऽमोघमहर्द्धिं प्राप्य खेचरन् । विहस्य गिरिशं शापादुमाया वृत्रतां गतः ॥ १ ॥ श्रीशुक उवाच ॥ हे राजन्, चित्रकेतुर्यस्यां दिशि भगवान् गुप्तस्तस्यै दिशे नमस्कृत्वा गगनेचरश्चचार ॥ १ ॥ सोऽव्याहतबलेंद्रियो विद्याधरः सिद्धचारणमुनिभिः स्तूयमानः सन् ॥ २ ॥ स्त्रीभिः सह हरिं गायन् कुलाचलेंद्रद्रोणीषु रेमे ॥ ३ ॥ स एकदा विष्णुदत्तविमानेन भ्रमन् सिद्धचारणैर्वेष्टितं शिवं ददृशे ॥ ४ ॥ ऋषिसभायां देवीमालिंग्य स्थितं शिवं दृष्ट्वा देव्याः शृण्वत्याः सत्या उच्चैर्हसित्वा जगाद ॥ ५ ॥ चित्रकेतुरुवाच ॥ अयं लोकगुरुः साक्षाद्देहिनां धर्मवक्तापि सन् सभायां भार्यामालिंग्यास्ते ॥ ६ ॥ अहो जटाधरस्तीव्रतपस्वी सभापतिरपि स-

॥ श्रीशुक उवाच ॥ आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ॥ पश्यतस्तस्य विश्वात्मा ततश्चांतर्दधे हरिः ॥६५॥ इति श्रीम० महा० षष्ठस्कंधे चित्रकेतोः परमात्मदर्शनं नाम षोडशोऽध्यायः ॥१६॥ ॥ श्रीशुक उवाच ॥ यतश्चांतर्हितोऽनंतस्तस्यै कृत्वा दिशे नमः ॥ विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥१॥ स लक्षं वर्षलक्षाणामव्याहतबलेंद्रियः ॥ स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ॥२॥ कुलाचलेंद्रद्रोणीषु नानासंकल्पसिद्धिषु ॥ रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरम् ॥३॥ एकदा स विमानेन विष्णुदत्तेन भास्वता ॥ गिरिशं ददृशे गच्छन्परीतं सिद्धचारणैः ॥४॥ आलिंग्यांकीकृतां देवीं बाहुना मुनिसंसदि ॥ उवाच देव्याः शृण्वत्या जहासोच्चैस्तदंतिके ॥५॥ चित्रकेतुरुवाच ॥ एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणाम् ॥ आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ॥ ६ ॥ जटाधरस्तीव्रतपा ब्रह्मवादिसभापतिः ॥ अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥ ७ ॥ प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति ॥ अयं महाव्रतधरो बिभर्ति सदसि स्त्रियम् ॥८॥ श्रीशुक उवाच ॥ भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप ॥ तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥ इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनम् ॥ रुषाह देवी धृष्टाय निर्जितात्माभिमानिने ॥१०॥ पार्वत्युवाच ॥ अयं किमधुना लोके शास्ता दंडधरः प्रभुः ॥ अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् ॥११॥ न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः ॥ न वै कुमारः कपिलो मनुश्च ये नो निषेधंत्यतिवर्तिनं हरम् ॥ १२ ॥ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयम् ॥ यः क्षत्रबंधुः परिभूय सूरीन्प्रशास्ति धृष्टस्तदयं हि दंड्यः ॥ १३ ॥ नायमर्हति वैकुंठपादमूलोपसर्पणम् ॥ संभावितमतिः स्तब्धः साधुभिः पर्युपासितम् ॥ १४ ॥ ॥

भायां स्त्रियमालिंग्य निर्लज्ज इवास्ते ॥७ ॥ प्राकृता अपि प्रायः स्त्रियं रहसि बिभ्रति । अयं तु सदसि बिभर्ति ॥८॥ श्रीशुक उवाच ॥ एवं तद्वचः श्रुत्वा शिवः सभ्याश्च तूष्णीमासन् ॥९॥ एवं बह्वशोभनं ब्रुवाणे सति देवी क्रोधेन तस्मै जगाद ॥१०॥ पार्वत्युवाच ॥ अधुना लोकेऽयं विद्याधरोऽस्मद्विधानां शास्ता दंडधरः किम् ॥ ११ ॥ ब्रह्मनारदादयो धर्मं न विदुः । ये शास्त्रमुल्लंघ्य वर्तमानं हरं न निषेधंति ॥ १२ ॥ अयं क्षत्रियाधमो ब्रह्मादीनज्ञान् कृत्वा तैर्ध्येयचरणं धर्ममूर्तिं जगद्गुरुं शिवं शास्ति तस्मादयं दंडयोग्योऽस्ति ॥ १३ ॥ अयं साधुसेवितं विष्णुचरणसामीप्यं गंतुं नार्हति ॥ १४ ॥ ॥

अतो हे दुर्बुद्धे, यथा त्वं भूयो महतामपराधं न करिष्यसि तथा आसुरीं योनिं याहि ॥१५॥ श्रीशुक उवाच ॥ एवं देव्या शप्तश्चित्रकेतुर्विमानादुत्तीर्य देवीं
प्रणम्याह ॥१६॥ चित्रकेतुरुवाच ॥ हे अंबिके, अहं तव शापं गृह्णामि । देवैर्मनुष्याय यदुक्तमस्ति तत्तस्य पूर्वकर्मणैव प्राप्तमस्ति ॥१७॥ अज्ञानमोहितो जंतुः
संसारे भ्रमन् सर्वत्र सुखं दुःखं च भुंक्ते ॥१८॥ अतोऽत्र मम तव च कोऽपि न दोषः । यतो जंतोः सुखदुःखकर्ता आत्मा परो वा तात्विकः कोऽपि नास्ति
॥१९॥ यतोऽस्मिन् संसारे कः शापः कोऽनुग्रहः कः स्वर्गः को नरकः सुखं दुःखं च किम् ॥२०॥ भगवान् मायया भूतानि तेषां बंधं मोक्षं सुखं दुःखं च
सृजति॥२१॥ तस्य कश्चित् प्रियः अप्रियः ज्ञातिः स्वकीयः परकीयश्च नास्ति, अतस्तस्य प्रीती रोषश्च कुतः ॥२२॥ तथापि शरीरिणां सुखदुःखजन्ममरणबं-

अतः पापीयसीं योनिमासुरीं याहि दुर्मते ॥ यथेह भूयो महतां न कर्ता पुत्र किल्बिषम् ॥१५॥ श्रीशुक उवाच ॥ एवं शप्तश्चि-
त्रकेतुर्विमानादवरुह्य सः ॥ प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत ॥१६॥ चित्रकेतुरुवाच ॥ प्रतिगृह्णामि ते शापमात्मनोऽजलि-
नांबिके ॥ देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् ॥१७॥ संसारचक्र एतस्मिञ्जंतुरज्ञानमोहितः ॥ भ्राम्यन् सुखं च दुःखं च भुंक्ते
सर्वत्र सर्वदा ॥१८॥ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः ॥ कर्तारं मन्यतेऽप्राज्ञ आत्मानं परमेव च ॥१९॥ गुणप्रवाह एतस्मि-
न् कः शापः कोऽन्वनुग्रहः ॥ कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ॥२०॥ एकः सृजति भूतानि भगवानात्ममायया ॥
एषां बंधं च मोक्षं च सुखं दुःखं च निष्कलः ॥२१॥ न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः ॥ समस्य सर्वत्र
निरंजनस्य सुखेन रागः कुत एव रोषः ॥२२॥ तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ॥ बंधाय मोक्षाय च
मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते ॥ २३ ॥ अथ प्रसादये न त्वां शापमोक्षाय भामिनि ॥ यन्मन्यसे असाधूक्तं मम
तत्क्षम्यतां सति ॥२४॥ श्रीशुक उवाच ॥ इति प्रसाद्य गिरिशौ चित्रकेतुररिंदम ॥ जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः
॥२५॥ ततस्तु भगवान्रुद्रो रुद्राणीमिदमब्रवीत् ॥ देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ॥२६॥ श्रीरुद्र उवाच ॥ दृष्टवत्यसि
सुश्रोणि हरेरद्भुतकर्मणः ॥ माहात्म्यं भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ॥ २७॥ नारायणपराः सर्वे न कुतश्चन बिभ्यति ॥
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ २८ ॥ देहिनां देहसंयोगाद्द्वंद्वानीश्वरलीलया ॥ सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव
च ॥ २९ ॥ अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि ॥ गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः ॥ ३० ॥ ॥ ॥

धमोक्षादि सर्वं मायया जनितमस्ति ॥ २३ ॥ अतो हे देवि, शापमोक्षाय त्वां न प्रार्थये ।तथापि मयोक्तं योग्यमपि त्वमयोग्यं मन्यसे चेत्तर्हि तत्त्वं क्षमस्व
॥२४॥ श्रीशुक उवाच ॥ इत्युक्त्वा तौ पार्वतीपरमेश्वरौ प्रसाद्य तयोः पश्यतोः सतोर्जगाम ॥२५॥ ततः सर्वेषां शृण्वतां सतां रुद्रो रुद्राणीं जगाद ॥ २६ ॥
श्रीरुद्र उवाच॥ हे देवि, हरेर्भक्तानां माहात्म्यं त्वं दृष्टवत्यसि किम् ॥२७॥ नारायणपराः कुतश्चन न बिभ्यति । ते स्वर्गे नरके च समदर्शिनः संति ॥२८॥
देहिनां देहयोगात्सुखं दुःखं शापोऽनुग्रहो जन्म मरणं च भवंति ॥ २९ ॥ पुंसोऽविवेकेनात्मनि सुखदुःखादिभेदो जातः ॥ ३० ॥ ॥ ॥

वासुदेवे भगवति भक्तिं कुर्वतां ज्ञानवैराग्ययुक्तानां नृणामिह कश्चिदर्थः स्वीकार्यो नास्ति ॥ ३१ ॥ अहं ब्रह्मा नारदादयश्च यस्याभिप्रेतं न जानीमः ॥ ३२॥ यस्य च कश्चित्प्रियोऽप्रियः स्वः परो वा नास्ति, स हरिः सर्वभूतप्रियोऽस्ति॥३३॥ तस्यायं भक्तः । अहं च तस्य भक्तः । अतो मम तस्मिन् क्रोधो नाभूत्॥३४॥ तस्मात्तद्भक्तेषु त्वया विस्मयो न कार्यः ॥३५॥श्रीशुक उवाच ॥ इति शिवभाषितं श्रुत्वोमा शांता बभूव ॥३६॥एवं चित्रकेतुर्देवीं शप्तुं समर्थोऽपि शापमेव जगृहे । एतावत् साधुलक्षणम् ॥३७॥ ततः स दैत्ययोनिमाश्रित्य त्वष्टुर्दक्षिणाग्नौ ज्ञानविज्ञानसंयुक्तो वृत्रनामा असुरो जातः ॥३८॥ एतद्वृत्रस्यासुरजातेर्भगवन्मतेश्च कारणं मया ते कथितम् ॥३९॥ इमं चित्रकेतोरितिहासं विष्णुभक्तमाहात्म्यं च श्रुत्वा जनो बंधान्मुच्यते ॥४०॥ य एतत्प्रातःकाले श्रद्धया शृणुयात्पठेद्वा स

वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् ॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ३१ ॥ नाहं विरिंचो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः ॥ विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥३२ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ॥ आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥ ३३ ॥ तस्य चायं महाभागश्चित्रकेतुः प्रियोऽनुगः ॥ सर्वत्र समदृक् शांतो ह्यहं चैवाच्युतप्रियः ॥ ३४ ॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु ॥ महापुरुषभक्तेषु शांतेषु समदर्शिषु ॥ ३५ ॥ श्रीशुक उवाच ॥ इति श्रुत्वा भगवतः शिवस्योमाभिभाषितम् ॥ बभूव शांतधी राजन्देवी विगतविस्मया ॥३६॥ इति भागवतो देव्याः प्रतिशप्तुमलंतमः ॥ मूर्ध्ना संजगृहे शापमेतावत्साधुलक्षणम् ॥ ३७ ॥ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः ॥ वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ॥ ३८ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ॥ ३९ ॥ इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः ॥ माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ॥४०॥ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् ॥ इतिहासं हरिं स्मृत्वा स याति परमां गतिम् ॥ ४१ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे चित्रकेतुशापो नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ श्रीशुक उवाच ॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीम् ॥ अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ १ ॥ सिद्धिर्भगस्य भार्याऽग महिमानं विभुं प्रभुम् ॥ आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ॥ २ ॥ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ॥ सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ३ ॥ अग्नीन्पुरीष्यानाधत्त क्रियायां समनंतरः ॥ चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ ४ ॥ ॥

हरिं स्मृत्वा परां गतिं याति ॥४१॥ इति श्रीमद्भागवतचू० षष्ठ० सप्तदशोऽध्यायः ॥१७ ॥ ॥ अदितेः पंचमादीनां पुत्राणामन्वयोक्तिभिः । अष्टादशे दितेर्गर्भे शक्रेण मरुतां भिदा ॥१॥ श्रीशुक उवाच ॥ अथ ५–सवितुः पत्नी पृश्निः– सावित्रीं व्याहृतिं त्रयीं चेति तिस्रः कन्याः अग्निहोत्रं पशुयागं सोमयागं चातुर्मास्यं महामखं चेति पंचपुत्रांश्च सुषुवे ॥१॥६–भगस्य सिद्धिर्भार्या– महिमानं विभुं प्रभुं आशीर्नामिकां कन्यां च प्रासूत ॥ २ ॥७–धातुः कुहूः सिनीवाली राका अनुमतिश्चेति चतस्रो भार्याः । ता अनुक्रमेण- सायं दर्शं प्रातः पूर्णमासं चेति चतुरः सुतान् सुषुवुः ॥३॥ ८ विधाता क्रियायां भार्यायां- पुरीष्यनामकान्

वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ॥ अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी ॥५ ॥ रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतम् ॥ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥६॥ पौलोम्यामिंद्र आधत्त त्रीन्पुत्रानिति नः श्रुतम् ॥ जयंतमृषभं तात तृतीयं मीढुषं प्रभुः ॥७॥ उरुक्रमस्य देवस्य मायावामनरूपिणः ॥ कीर्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन् सौभगादयः ॥८॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः ॥ पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥९॥ अथ कश्यपदायादान् दैतेयान् कीर्तयामि ते ॥ यत्र भागवतः श्रीमान्प्रह्लादो बलिरेव च ॥१०॥ दितेर्द्वावेव दायादौ दैत्यदानववंदितौ ॥ हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥११॥ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ॥ जंभस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥ १२ ॥ संह्लादं प्रागनुह्लादं ह्लादं प्रह्लाद मेव च ॥ तत्स्वसा सिंहिका नाम राहुं विप्रचितोऽग्रहीत् ॥१३॥ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतम् ॥ संह्लादस्य कृतिर्भार्याऽसूत पंचजनं ततः ॥१४॥ ह्लादस्य धमनिर्भार्याऽसूत वातापिमिल्वलम् ॥ योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलम् ॥१५॥ अनुह्लादस्य सूर्म्यायां बाष्कलो महिषस्तथा ॥ विरोचनस्तु प्राह्लादिर्देव्यास्तस्याभवद्बलिः ॥१६॥ बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत् ॥ तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥१७॥ बाण आराध्य गिरिशं लेभे तद्गणमुख्यताम् ॥ यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः ॥१८॥ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः ॥ त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मताम् ॥१९॥ राजोवाच ॥ कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो ॥ इंद्रेण प्रापिताः सात्म्यं किं तत्साधु कृतं हि तैः ॥ २० ॥ इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह ॥ परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥ २१ ॥ ॥ ॥

पंचचितानग्नीन् जनयामास । ९--वरुणस्य चर्षण्यां भृगुर्वल्मीकाद्वाल्मीकिश्च जातौ ॥४॥ मित्रावरुणौ उर्वश्याः सन्निधौ द्रुतं रेतः कुंभे सिषिचतुः । तस्मादगस्त्यवसिष्ठौ पुत्रौ जातौ । १०--मित्रस्य रेवत्यां- उत्सर्गारिष्टपिप्पलाः पुत्रा जाताः ॥५॥६॥ ११--इंद्रस्य पौलोम्यां जयंतर्षभमीढुषा अभवन् ॥ ७ ॥ १२-वामनस्य कीर्त्यां बृहच्छ्लोकः पुत्रः । तस्य सौभगादयः पुत्रा आसन् ॥८॥ तस्य वामनस्य कर्मगुणवीर्याणि पश्चादष्टमस्कंधे वक्ष्यामहे ॥९॥ अथ कश्यपस्य दितेर्वंशं शृणु यत्र भागवतः प्राह्लादो बलिश्च जातौ ॥१०॥ दितेः हिरण्यकशिपुः हिरण्याक्षश्च द्वौ पुत्रौ ॥ ११ ॥ हिरण्यकशिपोर्भार्या कयाधुः-- संह्लादं अनुह्लादं ह्लादं प्रह्लादं चेति चतुरः सुतान् सिंहिकां कन्यां च सुषुवे । सा सिंहिका विप्रचितो दैत्याद्राहुं पुत्रं सुषुवे ॥१२॥१३॥ अमृतं पिबतो यस्य राहोः शिरो हरिर्जहार, संह्लादात्कृत्यां पंचजनो जज्ञे ॥१४॥ ह्लादाद्धमन्यामिल्वलो वातापिश्च जातौ ॥१५॥ अनुह्लादात्सूर्म्यायां बाष्कलमहिषौ जातौ । प्रह्लादाद्देव्यां विरोचनः । तस्य बलिः ॥१६॥ बलेरनुभावः पश्चादष्टमस्कंधे वक्ष्यते । बलेरशनाभार्यायां बाणज्येष्ठं पुत्रशतं बभूव ॥१७॥ बाणः शिवमाराध्य तस्य गणमुख्यतां प्राप ॥ १८॥ दितेर्मरुतश्चैकोनपंचाशत् ४९ पुत्रा अभवन् ॥ ते अप्रजाः संत इंद्रेण समानरूपतां नीताः ॥ १९ ॥ राजोवाच ॥ हे गुरो, ते आसुरं भावं हित्वा कथं देवत्वं प्राप्ताः । तैः किं पुण्यं कृतम् ॥ २० ॥ तत् इमे ऋषयो मया सह श्रोतुमिच्छंति अतः कथ्यताम् ॥ २१ ॥ ॥ ॥

सूत उवाच ॥ तद्विष्णुरातस्य स बादरायणिर्वचो निशम्याहृतमल्पमर्थवत् ॥ सभाजयन्संनिभृतेन चेतसा जगाद सत्रायण सर्वदर्शनः
॥२२॥ श्रीशुक उवाच ॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ॥ मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत् ॥२३॥
कदा नु भ्रातृहंतारमिंद्रियाराममुल्बणम् ॥ अक्लिन्नहृदयं पापं घातयित्वा शये सुखम् ॥२४॥ कृमिविड्भस्मसंज्ञाऽऽसीद्यस्येशाभिहितस्य
च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥२५॥ आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ॥ मदशोषक इंद्रस्य भूयाद्येन
सुतो हि मे ॥२६॥ इति भावेन सा भर्तुराचचारासकृत्प्रियम् ॥ शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥२७॥ भक्त्या परमया
राजन्मनोज्ञैर्वल्गुभाषितैः ॥ मनो जग्राह भावज्ञा सुस्मितापांगवीक्षणैः ॥२८॥ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया ॥ बाढमित्याह
विवशो न तच्चित्रं हि योषिति ॥२९॥ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः ॥ स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता
॥३०॥ एवं शुश्रूषितस्तात भगवान् कश्यपः स्त्रिया ॥ प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ॥३१॥ कश्यप उवाच ॥ वरं
वरय वामोरु प्रीतस्तेऽहमनिंदिते ॥ स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ॥३२॥ पतिरेव हि नारीणां दैवतं परमं स्मृतम् ॥
मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥ ३३ ॥ स एव देवतालिंगैर्नामरूपविकल्पितैः ॥ इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक्
॥३४॥ तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे ॥ यजंतेऽनन्यभावेन पतिमात्मानमीश्वरम् ॥३५॥ सोऽहं त्वयार्चितो
भद्रे ईदृग्भावेन भक्तितः ॥ तत्ते संपादये काममसतीनां सुदुर्लभम् ॥३६॥ दितिरुवाच ॥ वरदो यदि मे ब्रह्मन् पुत्रमिंद्रहणं वृणे ॥
अमृत्युं मृतपुत्राऽहं येन मे घातितौ सुतौ ॥३७॥ निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत ॥ अहो अधर्मः सुमहानद्य मे समुपस्थितः३८

सूत उवाच ॥ हे शौनक, श्रीशुकस्तद्राज्ञो वचः श्रुत्वा तत्सत्कृत्य जगाद ॥ २२ ॥ श्रीशुक उवाच ॥ हे राजन्, एकदा इंद्रस्य साहाय्यं कुर्वता विष्णुना घातितपुत्रा दितिरचिंतयत् ॥ २३ ॥ पुत्रहंतारमिंद्रं घातयित्वाहं कदा नु सुखेन शये ॥ २४॥ यो देहस्यार्थे भूतेभ्यो द्रुह्यति स नरके पतति ॥ २५ ॥ अतो येन मे पुत्रा नाशितास्तस्य मदनाशकरः पुत्रो मम केन साधनेन भवेत् ॥२६॥ एवं सा विचार्य शुश्रूषया नम्रतया ॥२७॥ परमभक्त्या मनोहरभाषणेन सहासकटाक्षावलोकनैश्च कश्यपस्य मनो वशं चकार ॥२८॥ एवं स्त्रिया जडीकृतः स विद्वानपि बाढमित्याह । योषिति एतदाश्चर्यं न ॥२९॥ यतः प्रजापतिः स्वदेहार्धं स्त्रियं चक्रे । यया पुंसां मतिर्हृता ॥३०॥ एवं शुश्रूषितः कश्यपः प्रीतः सन् दितिमाह ॥ ३१॥ हे वरोरु, त्वं वरं वरय, अहं ते प्रीतोऽस्मि । भर्तरि प्रीते सति स्त्रीणां मनोरथः को न सिद्ध्येत् ॥३२॥ पतिरेव स्त्रीणां परमं दैवतमस्ति । यः सर्वभूतानां मनसि स्थितो लक्ष्मीपतिर्भगवान् वासुदेवः स एव स्त्रीभिः पतिरूपेण पूज्यते ॥ ३३॥३४॥ तस्मात्पतिव्रताः स्त्रिय एकभावेन पतिमीश्वरं मत्वा सेवंते ॥ ३५ ॥ सोऽहं त्वया यत ईदृग्भावेन पूजितः, अतो हे भद्रे, अहं तव मनोरथं पूर्णं करिष्यामि ॥ ३६ ॥ दितिरुवाच ॥ हे ब्रह्मन्, यदि मे त्वं वरदोऽसि तर्हि मृतपुत्राहं येन मे सुतौ घातितौ तस्येंद्रस्य हंतारं मृत्युहीनं पुत्रं वरं वृणे ॥ ३७ ॥ तदा कश्यपस्तद्वचो निशम्य खिन्नः सन् पर्यतप्यत । परितापमेवाह । अहो अधर्मो महान् प्राप्तः ॥ ३८ ॥ ॥

योषिन्मय्या मायया गृहीतचेता अहं ध्रुवं नरके पतिष्ये ॥ ३९ ॥ स्वभावमनुसरंत्याः स्त्रियः कोऽपराधः । स्वार्थे अबुधं मां धिक् ॥ ४० ॥ किंच, यस्याः कमलसदृशं मुखं वचनं श्रवणामृतं हृदयं क्षुरधारोपमं तस्याः स्त्रियश्चेष्टितं को वेद ॥ ४१ ॥ स्त्रीणां कोऽपि प्रियो न । याः स्वार्थे पतिं पुत्रं भ्रातरं वा घ्नंति घातयंति च ॥ ४२ ॥ अस्तु । मया ददामीत्युक्तं तन्मृषा माभूत् । इंद्रोऽपि वधं नार्हति । तत्रेदं योग्यम् ॥ ४३ ॥ एवं विचार्य कश्यपः किंचित्कुपितः सन्नुवाच ॥ ४४ ॥ कश्यप उवाच ॥ हे भद्रे, इदं संवत्सरात्मकं पुंसवनं व्रतं यदि यथावद्धारयिष्यसि तर्हि तवेंद्रहा पुत्रो भविष्यति । व्रतवैगुण्ये सति देवबांधवो भविष्यति ॥ ४५ ॥ दितिरुवाच ॥ हे ब्रह्मन्, अहं व्रतं धारयिष्ये । तस्य आवश्यकानि निषिद्धानि च कृत्यानि कथय ॥ ४६ ॥ कश्यप उवाच ॥

अहो अद्येंद्रियारामो योषिन्मय्येह मायया ॥ गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम् ॥३९॥ कोऽतिक्रमोऽनुवर्तंत्याः स्वभावमिह योषितः ॥ धिङ् मां बताबुधं स्वार्थे यदहं त्वजितेंद्रियः ॥ ४० ॥ शरत्पद्मोत्सवं वक्रं वचश्च श्रवणामृतम् ॥ हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥ ४१ ॥ नहि कश्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मनाम् ॥ पतिं पुत्रं भ्रातरं वा घ्नंत्यर्थे घातयंति च ॥४२॥ प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् ॥ वधं नार्हति चेंद्रोऽपि तत्रेदमुपकल्पते ॥ ४३ ॥ इति संचिंत्य भगवान्मारीचः कुरुनंदन ॥ उवाच किंचित्कुपित आत्मानं च विगर्हयन् ॥४४॥ कश्यप उवाच ॥ पुत्रस्ते भविता भद्रे इंद्रहा देवबांधवः ॥ संवत्सरं व्रतमिदं यद्यंजो धारयिष्यसि ॥४५॥ दितिरुवाच ॥ धारयिष्ये व्रतं ब्रह्मन्ब्रूहि कार्याणि यानि मे ॥ यानि चेह निषिद्धानि न व्रतं घ्नंति यानि तु ॥४६॥ कश्यप उवाच ॥ न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत् ॥ न छिंद्यान्नखरोमाणि न स्पृशेद्यदमंगलम् ॥४७॥ नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः ॥ न वसीताधौतवासः स्रजं च विधृतां क्वचित् ॥४८॥ नोच्छिष्टं चंडिकान्नं च सामिषं वृषलाहृतम् ॥ भुंजीतोदक्यया दृष्टं पिबेदंजलिना त्वपः ॥ ४९ ॥ नोच्छिष्टा स्पृष्टसलिला संध्यायां मुक्तमूर्धजा ॥ अनर्चिताऽसंयतवाङ्नासंवीता बहिश्चरेत् ॥ ५० ॥ नाधौतपादाऽप्रयता नार्द्रपान्नो उदक्शिराः ॥ शयीत नापराङ्गान्यैर्न नग्ना न च संध्ययोः ॥ ५१ ॥ धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता ॥ पूजयेत्प्रातराशात्प्राग्गोविप्रान् श्रियमच्युतम् ॥ ५२ ॥ स्त्रियो वीरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः ॥ पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तम् ॥ ५३ ॥ ॥

भूतानि न हिंस्यात् । न शपेत् । मिथ्या न वदेत् । नखरोमाणि न छिंद्यात् । निषिद्धवस्तूनि न स्पृशेत् ॥४७ ॥ जले प्रविश्य न स्नायात् । दुष्टैः सह न संभाषेत । अधौतं वस्त्रं न वसीत । पूर्वधृतां मालां न धारयेत् ॥ ४८ ॥ उच्छिष्टं भद्रकाल्यै निवेदितं पिपीलिकादूषितं रजस्वलादृष्टं चान्नं मांसं च न भुंजीत । अंजलिना जलं न पिबेत् ॥ ४९ ॥ उच्छिष्टा संध्यायां मुक्तकेशा मंडनहीना उपवस्त्ररहिता च बहिर्न गच्छेत् ॥५० ॥ अधौतपादा आर्द्रपदोदक्शिराः पश्चिमशिरा नग्ना संध्ययोश्च न शयीत ॥ ५१ ॥ धौतवासाः शुचिः सर्वमंगलसंयुता भोजनात्प्राक् गोविप्रान् लक्ष्मीमच्युतं च पूजयेत् ॥ ५२ ॥ सुवासिनीश्च पूजयेत् । पतिमभ्यर्च्य समीपे तिष्ठेत् । हरिं कुक्ष्यंतरगतं ध्यायेत् ॥ ५३ ॥ ॥ ॥ ॥

एवं पुंसवनं व्रतं संवत्सरं यदि धारयिष्यसि तर्हि ते शक्रहा पुत्रो भविष्यति ॥५४॥ सा दितिस्तद्वचः स्वीकृत्य कश्यपाद्व्रतं गर्भं च दधार ॥५५॥ तदेंद्रो मातृष्वसुरभिप्रायं ज्ञात्वा शिष्यः सन् दितेः शुश्रूषां चक्रे ॥५६॥ नित्यं वनात्फलपुष्पमूलादीनि काले काले उपाहरत् ॥५७॥ इंद्रस्तस्या व्रतच्छिद्रं ध्यायन् कापट्येन सेवितवान् ॥५८॥ यदा व्रतच्छिद्रं नापश्यत् तदा मे शिवं केन स्यादिति चिंतां प्राप ॥५९॥ एकदा सा दितिरुच्छिष्टाऽधौतांघ्रिर्दैवमोहिता सती संध्यायां सुष्वाप ॥६०॥ इंद्रस्तदंतरं वीक्ष्य योगमायया दितेरुदरं प्रविश्य ॥६१॥ वज्रेण तं गर्भं सप्तधा चिच्छेद । ते सप्तधा भूता रुरुदुः । पुनरेकैकं मारोदीरित्युक्त्वा सप्तधा चकर्त ॥६२॥ तदा ते उचुः ॥ हे इंद्र, वयं मरुतस्तव भ्रातरः । अस्मान् किं जिघांससि ॥६३॥ तदेंद्र आह । यूयं चेन्मम भ्रातरस्तर्हि

सांवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ॥ धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥ ५४ ॥ बाढमित्यभिप्रेत्याथ दिती राजन्महामनाः ॥ काश्यपं गर्भमाधत्त व्रतं चांजो दधार सा ॥ ५५॥ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ॥ ५६ ॥ नित्यं वनात्सुमनसः फलमूलसमित्कुशान् ॥ पत्रांकुरमृदोऽपश्च काले काल उपाहरत् ॥ ५७ ॥ एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ॥ प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥ ५८ ॥ नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ॥ चिंतां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ॥ ५९॥ एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता ॥ अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहिता ॥ ६० ॥ लब्ध्वा तदंतरं शक्रो निद्रापहृतचेतसः ॥ दितेः प्रविष्ट उदरं योगेशो योगमायया ॥६१॥ चकर्त सप्तधा गर्भं वज्रेण कनकप्रभम् ॥ रुदंतं सप्तधैकैकं मा रोदीरिति तान्पुनः ॥ ६२ ॥ ते तमूचुः पाट्यमानाः सर्वे प्रांजलयो नृप ॥ नो जिघांससि किमिंद्र भ्रातरो मरुतस्तव ॥ ६३ ॥ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥ अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ॥ ६४ ॥ न ममार दितेर्गर्भः श्रीनिवासानुकंपया ॥ बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ॥ ६५ ॥ सकृदिष्ट्वाऽऽदिपुरुषं पुरुषो याति साम्यताम् ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥६६॥ सजूरिंद्रेण पंचाशद्देवास्ते मरुतोऽभवन् ॥ व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ॥ ६७ ॥ दितिरुत्थाय ददृशे कुमाराननलप्रभान् ॥ इंद्रेण सहितान्देवी पर्यतुष्यदनिंदिता ॥ ६८ ॥ अथेंद्रमाह ताताहमादित्यानां भयावहम् ॥ अपत्यमिच्छंत्यचरं व्रतमेतत्सुदुष्करम् ॥ ६९ ॥ एकः संकल्पितः पुत्रः सप्तसप्ताभवन्कथम् ॥ यदि ते विदितं पुत्र सत्यं कथय मा मृषा ॥ ७० ॥ ॥ ॥

माभैष्ट ॥६४॥ वज्रेण बहुधा छिन्नोऽपि दितेर्गर्भो हरेरनुकंपया न ममार । यथा ब्रह्मास्त्रेण भवान् तथा ॥६५॥ भगवंतं सकृत्संपूज्य पुरुषः साम्यतां याति । दित्या किंचिदूनं संवत्सरं हरिः पूजितः । अतस्तस्या गर्भो न मृत इत्याश्चर्यं नहि ॥६६॥ ते मरुत इंद्रेण सह पंचाशद्देवा अभवन् । एवं ते मातृदोषमपोह्येंद्रेण सोमपाः कृताः ॥६७॥ ततो दितिरुत्थायेंद्रेण सहाग्निप्रभान् कुमारान् दृष्ट्वा संतोषं प्राप ॥६८॥ अथ दितिः प्राह । हे तात, अहं देवानां भयप्रदं पुत्रमिच्छंती व्रतमचरम् ॥ ६९ ॥ ते सप्तसप्तधा कथं बभूवुः। यदि ते विदितं तर्हि सत्यं कथय। मृषा मा कथय ॥ ७० ॥ ॥ ॥

इंद्र उवाच ॥ हे अंब, तव विचारं ज्ञात्वा स्वार्थबुद्ध्या त्वत्समीपमागत्य स्थितोऽहं तव व्रतच्छिद्रं वीक्ष्योदरं गत्वा गर्भं सप्तधाऽच्छिदम् । ते सप्त पुत्रा जाताः
॥ ७१ ॥ पुनश्च प्रत्येकं सप्तधाऽच्छिदम् । तथापि ते न मम्रिरे ॥७२॥ मया तदाश्चर्यं वीक्ष्य हरिपूजायाः कापीयमनिर्वचनीया सिद्धिरिति निश्चितम् ॥७३॥
ये निष्कामा हरिमाराधयंति ते स्वार्थकुशलाः ॥७४ ॥ आत्मप्रदं तमाराध्य विषयभोगं क इच्छेत् । विषयभोगस्तु नरकेऽप्यस्ति ॥७५॥ अतो हे मातः, मम
मूढस्यापराधं त्वं क्षंतुमर्हसि ॥ ७६ ॥ श्रीशुक उवाच ॥ तदा दितिस्तस्य शुद्धभावं दृष्ट्वैतान् पालय तव साहाय्यं करिष्यंतीत्याह । तत इंद्रस्तां नत्वा तैः सह
दिवं ययौ ॥ ७७ ॥ हे राजन्, तव मरुतां मंगलं जन्म कथितं भूयस्ते किं कथयामि ॥ ७८ ॥ इति श्रीमद्भागवतचूर्णिकायां षष्ठस्कंधे अष्टादशोऽध्यायः

॥ इंद्र उवाच ॥ अंब तेऽहं व्यवसितमुपधार्यागतोंऽतिकम् ॥ लब्धांतरोऽच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥ ७१ ॥ कृत्तो मे सप्तधा
गर्भ आसन्सप्त कुमारकाः ॥ तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७२ ॥ ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया ॥
महापुरुषपूजायाः सिद्धिः काप्यानुषंगिणी ॥ ७३ ॥ आराधनं भगवत ईहमाना निराशिषः ॥ ये तु नेच्छंत्यपि परं ते स्वार्थकुशलाः
स्मृताः ॥ ७४ ॥ आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्वरम् ॥ को वृणीते गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ॥ ७५ ॥
तदिदं मम दौर्जन्यं बालिशस्य महीयसि ॥ क्षंतुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥ ७६ ॥ श्रीशुक उवाच ॥ इंद्रस्तयाभ्यनुज्ञातः
शुद्धभावेन तुष्टया ॥ मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥ ७७ ॥ एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि
॥ मंगलं मरुतां जन्म किं भूयः कथयामि ते ॥ ७८ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे मरुदुत्पत्तिकथनं नामाष्टादशोऽध्यायः
॥ १८ ॥ ॥ राजोवाच ॥ व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितम् ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति
॥ १ ॥ श्रीशुक उवाच ॥ शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ॥ आरभेत व्रतमिदं सार्वकामिकमादितः ॥ २ ॥ निशम्य
मरुतां जन्म ब्राह्मणाननुमंत्र्य च ॥ स्नात्वा शुक्लदती शुक्ले वसीतालंकृतांबरे ॥ पूजयेत्प्रातराशात्प्राग्भगवंतं श्रिया सह॥३॥अलं
ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते॥ महाविभूतिपतये नमः सकलसिद्धये॥४॥यथा त्वं कृपया भूत्या तेजसा महिनौजसा॥जुष्ट ईशगुणैः
सर्वैस्ततोऽसि भगवान्प्रभुः॥ ५ ॥विष्णुपत्नि महामाये महापुरुषलक्षणे ॥ प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥ ६ ॥

॥ १८ ॥ ॥ ऊनविंशे तु यत्प्रोक्तं कश्यपेन दितेर्व्रतम् । तदेव विवृतं लोके हिताय हरितोषणम् ॥ १ ॥ राजोवाच ॥ हे ब्रह्मन्, भवता यत् पुंसवनं व्रतं
कथितं तस्य प्रकारं ज्ञातुमिच्छामि । येन विष्णुः प्रसीदति ॥ १ ॥ श्रीशुक उवाच ॥ मार्गशीर्षशुक्लपक्षप्रतिपदि स्त्री भर्तुरनुज्ञया सर्वमनोरथपूरकमिदं
व्रतमारभेत ॥ २ ॥ पूर्वं मरुतां जन्म निशम्य ब्राह्मणाज्ञया स्नात्वा श्वेतवस्त्रालंकारान् धृत्वा प्रातर्लक्ष्म्या सह विष्णुं पूजयेत् ॥ ३॥ आदौ नमस्कारमंत्रानाह
। निरपेक्षाय पूर्णकामाय महाविभूतिपतये ते नमोऽस्तु ॥ ४ ॥ हे ईश, त्वं तेजसा सर्वैर्गुणैश्च सेवितोऽसि ततो भगवानसि ॥ ५ ॥ हे विष्णुपत्नि,
हे महामाये, हे लोकमातः, ते नमोऽस्तु ॥ ६ ॥ ॥ ॥ ॥

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुपहराणीति ॥ अनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूपदीपोपहाराद्युपचारांश्च समाहित उपाहरेत् ॥ ७ ॥ हविःशेषं तु जुहुयादनले द्वादशाहुतीः ॥ ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥ ८ ॥ श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ ॥ भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसंपदः ॥ ९ ॥ प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेतसा ॥ दशवारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत् ॥ १० ॥ युवां तु विश्वस्य विभू जगतः कारणं परम् ॥ इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया ॥ ११ ॥ तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः परः ॥ त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥ १२ ॥ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भवान् ॥ त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेंद्रियाशया ॥ नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥ १३ ॥ यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ ॥ तथा म उत्तमश्लोक संतु सत्या महाशिषः ॥ १४ ॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ॥ तन्निःसार्योपहरणं दत्वाचमनमर्चयेत् ॥ १५ ॥ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ॥ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥ १६ ॥ पतिं च परया भक्त्या महापुरुषचेतसा ॥ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ॥ बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च ॥ १७ ॥ कृतमेकतरेणापि दंपत्योरुभयोरपि ॥ पत्न्यां कुर्यादनर्हायां पतिरेतत्समाहितः ॥ १८ ॥ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन ॥ विप्रान्स्त्रियो वीरवतीः स्रग्गंधबलिमंडनैः ॥ अर्चेदहरहर्भक्त्या देवं नियममास्थितः ॥ १९ ॥ उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः ॥ अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा ॥ २० ॥ एतेन पूजाविधिना मासान्द्वादश हायनम् ॥ नीत्वाथोपचरेत्साध्वी कार्तिके चरमेऽहनि ॥ २१ ॥ ॥ ॥

ॐनमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये पूजोपचारान् समर्पयामि । अनेन मंत्रेण प्रतिदिनं विष्णोरावाहनार्घ्यपाद्याचमनस्नानवस्त्रोपवीतभूषणगंधपुष्पधूपदीपोपहारादीनुपचारान् समर्पयेत् ॥ ७ ॥ तत ॐनमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति मंत्रेणाग्नौ हविःशेषेण द्वादशाहुतीर्जुहुयात् ॥८॥एवं भक्त्या श्रियं विष्णुं च नित्यं संपूज्य॥९॥भूमौ दंडवत्प्रणम्य तं मंत्रं दशवारं जपित्वा प्रार्थयेत् ॥१०॥ युवां सर्वजगतः कारणम् । इयं हि सूक्ष्मा मायाशक्तिः प्रकृतिः ॥११॥ तस्याः साक्षादधीश्वरस्त्वं पुरुषोऽसि ॥१२॥ इयं देवी गुणव्यक्तिस्त्वं गुणप्रकाशकः । इयं शरीरेंद्रियरूपा त्वं शरीरिणामात्मा । इयं नामरूपात्मिका त्वं नामरूपयोः प्रकाशकः आधारश्चासि ॥१३॥ यथा युवां त्रिलोकस्य वरदौ तथा मम मनोरथान् सत्यान् कुरुताम् ॥ १४ ॥ एवं स्तुत्वाचमनं दत्वा पुनरर्चयेत् ॥१५॥ ततो भक्त्या स्तोत्रेण स्तुत्वा यज्ञोच्छिष्टमवघ्राय पुनर्हरिमर्चयेत् ॥१६॥ परमभक्त्या पतिं च सेवेत । पतिश्च स्वयं प्रेमयुक्तः सन् पत्न्या अनुकूलो भवेत् ॥१७॥ पत्न्यां रजस्वलादिदोषयुक्तायां सत्यां भर्ता सर्वकर्माणि स्वयं कुर्यात् । एकेनापि कृतमुभयोरपि फलदं भवति ॥१८॥ इदं विष्णोर्व्रतं कथंचन न छिंद्यात् । ततो विप्रान् सुवासिनीश्च स्रग्गंधोपहारैर्नित्यमर्चयेत् ॥१९॥ ततो देवं देवगृहे संस्थाप्य तन्निवेदितमन्नं स्वयमश्नीयात् ॥२०॥ एवं द्वादशमासात्मकसंवत्सरपर्यंतं कृत्वा

कार्तिकांतेऽमावास्यामुपवसेत् ॥ २१ ॥ श्वः प्रातःकाले स्नात्वा पूर्ववद्विष्णुं संपूज्य पायसेन घृतमिश्रचरुणा यथाविधि द्वादशाहुतीर्जुहुयात् ॥२२॥ द्विजाशीर्वादान् गृहीत्वा तान् प्रणम्य तदनुज्ञया ॥ २३ ॥ आचार्यमग्रतः कृत्वा वाग्यतो बंधुभिः सह भुंजीत । ततश्चरोः शेषं पत्न्यै दद्यात् ॥ २४ ॥ एवं कृते पुमानीप्सितार्थं लभते । स्त्री तु सौभाग्यं श्रियं सुप्रजां यशश्च लभते ॥ २५ ॥ कन्योत्तमं वरं विंदति । विधवा सद्गतिमाप्नोति । मृतप्रजा जीवसुता भवति ।

श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ॥ पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ॥ पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥२२॥ आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः ॥ प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञया ॥२३॥ आचार्यमग्रतः कृत्वा वाग्यतः सह बंधुभिः ॥ दद्यात्पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगम् ॥२४॥ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह ॥ स्त्री त्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशो गृहम् ॥२५॥ कन्या च विंदेत समग्रलक्षणं वरं त्ववीरा हतकिल्बिषा गतिम् ॥ मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम् ॥२६॥ विंदेद्विरूपा विरुजा विमुच्यते य आमयावींद्रियकल्पदेहम् ॥ एतत्पठन्नाभ्युदये च कर्मण्यनंततृप्तिः पितृदेवतानाम् ॥२७॥ तुष्टाः प्रयच्छंति समस्तकामान्होमावसाने हुतभुक् श्रीर्हरिश्च ॥ राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥२८॥ इति श्रीम॰ महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां षष्ठस्कंधे पुंसवनव्रतकथनं नामैकोनविंशोऽध्यायः ॥१९॥ ॥ श्रीकृष्णार्पणमस्तु ॥ नमो भगवते वासुदेवाय ॥ ॥

दुर्भगा सुभगा भवेत् ॥ २६ ॥ कुरूपा सुरूपं लभते । यो देवपितृकर्मणीदं व्रतं पठेत्तस्य देवपित्रोरनंततृप्तिर्भवेत् ॥ २७ ॥ होमावसानेऽग्निः श्रीर्हरिश्च तृप्ताः संतः सर्वान् कामान् प्रयच्छंति । हे राजन्, पवित्रं मरुतां जन्म दितेर्व्रतं च ते कथितम् ॥ २८ ॥ इति श्रीमद्भागवतचूर्णिकायां षष्ठस्कंधे पुंसवनव्रतकथनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥

इति सचूर्णिकश्रीमद्भागवते षष्ठस्कंधः समाप्तः

अथ सचूर्णिकश्रीमद्भागवते सप्तमस्कंधारंभः

॥ श्रीगणेशाय नमः ॥ अथ सप्तमस्कंधचूर्णिका प्रारभ्यते ॥ ऊतिः पंचदशाध्यायैः सप्तमे वर्ण्यतेऽधुना । ऊतिश्च वासना प्रोक्ता तत्तत्कर्मानुसारिणी ॥१॥ तत्र तु प्रथमेऽध्याये हिरण्यकशिपोः सुते । विष्णुभक्ते विरोधस्तु विप्रशापज ईर्यते ॥२॥ राजोवाच ॥ हे ब्रह्मन्, भगवान् भूतानां प्रियः समश्च सन् इंद्रकार्यार्थे दैत्यान् कथमवधीत् ॥१॥ निर्गुणस्येश्वरस्य देवैः प्रयोजनं नास्ति । दैत्यैः सह द्वेषोऽपि नास्ति ॥२॥ एवं सति देवपक्षपातेन दैत्यनाशः कथं जात इति नारायणस्यानुग्रहनिग्रहरूपगुणान्प्रति मम महान् संशयो जातस्तं भवान् छेत्तुमर्हति ॥ ३ ॥ श्रीशुक उवाच ॥ हे राजन्, त्वया हरेश्चरितं साधु पृष्टम् । यत्र पुण्यं प्रह्लादस्य माहात्म्यं नारदादिभिर्गीयते । अतो व्यासं नमस्कृत्य हरेः कथां कथयिष्ये ॥४॥५॥ (यः पुमान् जिह्वां लब्ध्वापि विष्णुं न कीर्तयेत् स मोक्षं न प्राप्नोति ॥१॥ यश्चगोविंदमाहात्म्यं श्रृणुयात्कीर्तयेच्च स कृतार्थो भवति ॥२॥ तस्माद्धे राजन्, गोविंदस्य पुण्यां कथां त्वं श्रृणु)॥ ३ ॥ भगवान् नि-

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ समः प्रियः सुहृद्ब्रह्मन्भूतानां भगवान्स्वयम् ॥ इंद्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ॥ १ ॥ न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ॥ नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥२॥ इति नः सुमहाभाग नारायणगुणान्प्रति ॥ संशयः सुमहान् जातस्तद्भवांश्छेत्तुमर्हति ॥ ३ ॥ श्रीशुक उवाच॥साधु पृष्टं महाराज हरेश्चरितमद्भुतम् ॥ यत्र भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥४॥ गीयते परमं पुण्यमृषिभिर्नारदादिभिः ॥ नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥५॥ (जिह्वां लब्ध्वापि यो विष्णुं कीर्तनीयं न कीर्तयेत् ॥ लब्ध्वापि मोक्षनिःश्रेणीं स नारोहति दुर्मतिः ॥ १ ॥ तस्माद्गोविंदमाहात्म्यमानंदरससुंदरम् ॥ श्रृणुयात्कीर्तयेन्नित्यं स कृतार्थो न संशयः ॥ २ ॥ तस्माद्धीमन् कथां पुण्यां गोविंदचरितांचिताम् ॥ महापुण्यप्रदां यस्माच्छृणुष्व नृपसत्तम ॥३॥) निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान्प्रकृतेः परः ॥ स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥६॥ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ न तेषां युगपद्राजन् ह्रास उल्लास एव वा ॥७॥ जयकाले तु सत्वस्य देवर्षीन्रजसोऽसुरान् ॥ तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥८॥ ज्योतिरादिरिवाभाति संघातान्न विविच्यते ॥ विदंत्यात्मानमात्मस्थं मथित्वा कवयोंऽततः ॥९॥ यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ॥ सत्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥१०॥ कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत् ॥ य एष राजन्नपि काल ईशिता सत्वं सुरानीकमिवैधयत्यतः ॥ तत्प्रत्यनीकानसुरान्सुरप्रियो रजस्तमस्कान्प्रमिणोत्युरुश्रवाः ॥ ११ ॥

गुणोऽपि स्वमायायाः सत्वगुणमाविश्य बाध्यान् दैत्यान्प्रति बाधकतां प्राप्तः ॥६॥ हे नृप, सत्वं रजस्तम इति प्रकृतेर्गुणाः । तेषामेककाले ह्रासो वृद्धिश्च न भवति ॥७॥ सत्वोत्कर्षकाले देवान् वर्धयति । रजस उत्कर्षे दैत्यान् तमस ऊत्कर्षे यक्षरक्षांसि वर्धयति । एवं तत्तत्कालानुकूलो भगवान् भवति ॥८॥ अग्निर्यथा काष्ठेषु तत्तत्स्वरूपो भाति तथा भगवान् देवादिषु तत्तत्स्वरूपो भाति । निपुणास्तु तमात्मस्थमात्मानं सृष्ट्यादिकार्यदर्शनेन विचार्य जानंति ॥ ९ ॥ यदा भगवान् स्रष्टुमिच्छति तदा रजो वर्धयति । एवं क्रीडितुं सत्वं संहर्तुं तमश्च वर्धयति॥ १० ॥ हे राजन्, ईश्वरः प्रकृतिंपुरुषाभ्यां सह वर्तमानं

---

१ कालशक्तिक्षुभितं गुणगतं वैषम्यं सन्निधिमात्रेण तद्धिष्ठातरि स्फुरतीति प्रकरणार्थः।

कालं स्वयमेव सृजति। तेन च देवसैन्यं वर्धयति असुरादींश्च हिनस्ति ॥११॥ हे राजन्, एतद्विषये राजसूययज्ञे पृच्छते युधिष्ठिराय पूर्वं नारदेनेतिहासः कथितः तं श्रृणु ॥१२॥ यज्ञे शिशुपालतेजः कृष्णे प्रविष्टं दृष्ट्वा ॥१३॥ मुनीनां शृण्वतां सतां युधिष्ठिरो नारदं पप्रच्छ ॥१४॥ युधिष्ठिर उवाच ॥ अहो एकांतभक्तानामपि दुर्लभा कृष्णे प्राप्तिः द्विषतः शिशुपालस्य कथं जाता ॥१५॥ एतज्ज्ञातुं सर्वे वयमिच्छामः। भगवन्निंदया वेनो द्विजैर्नरके पातितः ॥१६॥ शिशुपालस्तु बाल्यादारभ्यैतावत्कालपर्यंतं कृष्णद्वेष्टा। तथैव दंतवक्रः ॥१७॥ निरंतरं विष्णुं शपंतौ तौ नरकं न विविशतुः ॥१८॥ किंतु तौ तस्मिन् भगवति सर्वलोकसमक्षं सायुज्यं कथं प्राप्तौ ॥१९॥ एतद्विषये मे मनो दीपार्चिरिव भ्राम्यति। तत्र कारणं ब्रूहि ॥ २० ॥ श्रीशुक उवाच ॥ नारदो राज्ञस्तद्वचः श्रुत्वा

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ॥ प्रीत्या महाक्रतौ राजन्पृच्छतेऽजातशत्रवे ॥ १२ ॥ दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ
॥ वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥१३॥ तत्रासीनं सुरऋषिं राजा पांडुसुतः क्रतौ ॥ पप्रच्छ विस्मितमना मुनीनां
शृण्वतामिदम् ॥१४॥ युधिष्ठिर उवाच ॥ अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि ॥ वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः
॥ १५ ॥ एतद्वेदितुमिच्छामः सर्व एव वयं मुने ॥ भगवन्निंदया वेनो द्विजैस्तमसि पातितः ॥ १६ ॥ दमघोषसुतः पाप आरभ्य
कलभाषणात् ॥ संप्रत्यमर्षी गोविंदे दंतवक्रश्च दुर्मतिः ॥१७॥ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययम् ॥ श्वित्रो न जातो जिह्वायां
नांधं विविशतुस्तमः ॥१८॥ कथं तस्मिन्भगवति दुरवग्राहधामनि ॥ पश्यतां सर्वलोकानां लयमीयतुरंजसा ॥१९॥ एतद्भ्राम्यति
मे बुद्धिर्दीपार्चिरिव वायुना ॥ ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणम् ॥२०॥ श्रीशुक उवाच ॥ राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः
॥ तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः ॥ २१ ॥ नारद उवाच ॥ निंदनस्तवसत्कारन्यक्कारार्थं कलेवरम् ॥
प्रधानपरयो राजन्नविवेकेन कल्पितम् ॥ २२ ॥ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा ॥ वैषम्यमिह भूतानां ममाहमिति
पार्थिव ॥ २३ ॥ यन्निबद्धोऽभिमानोऽयं तद्वधात्प्राणिनां वधः ॥ तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ॥ परस्य दमकर्तुर्हि
हिंसा केनास्य कल्प्यते ॥ २४ ॥ तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा ॥ स्नेहात्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक् ॥
॥ २५ ॥ यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् ॥ न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २६ ॥ कीटः पेशस्कृता
रुद्धः कुड्यायां तमनुस्मरन् ॥ संरंभभययोगेन विंदते तत्सरूपताम् ॥ २७ ॥ ॥ ॥ ॥

तुष्टः सन् सभायाः श्रृण्वत्याः सत्याः प्राह ॥२१॥ नारद उवाच ॥ निंदास्तुतिसत्काराद्यर्थं प्रकृतिपुरुषयोरज्ञानेन शरीरं रचितमस्ति ॥२२॥ तत्र यथा प्राणिनो देहाभिमानेन ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति ॥ २३ ॥ तथा सर्वात्मन ईश्वरस्य वैषम्यमेव नास्ति। तदा हिंसादिकं कुतः स्यात् ॥ २४ ॥ अतो वैरानुबंधेन निर्वैरेण भयेन स्नेहात् कामेन वा हरौ मनो युंज्यात् ॥२५॥ यथा मर्त्यो वैरानुबंधेन तन्मयतां याति तथा भक्तियोगेन न यातीति मम निश्चयः ॥२६॥ यथा भ्रमरेण रुद्धः कीटस्तं स्मरन् संरंभभययोगेन तत्स्वरूपतां प्राप्नोति ॥ २७ ॥ ॥ ॥

तथा पुमान् भगवति मनो युंजन् तत्स्वरूपतां प्राप्नोति ॥२८॥ कामद्वेषादिभिः परमेश्वरे मनः स्थापयित्वा बहवस्तद्गतिं प्राप्ताः ॥२९॥ ते के—गोप्यः कामात् । कंसो भयात् । शिशुपालादयो नृपा द्वेषात् । यादवाः संबंधात् । यूयं स्नेहात् । वयं भक्त्या ॥३०॥ एषु मध्ये वेनः कतमोऽपि नास्ति । तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥३१॥ शिशुपालदंतवक्रौ तु विष्णुपार्षदौ विप्रशापेन वैकुंठात्पतितौ ॥३२॥ युधिष्ठिर उवाच ॥ हे मुने, हरिदासयोः कीदृशः कस्य वा शापो जातः ॥३३॥ देहेंद्रियप्राणरहितानां वैकुंठवासिनां कथं देहसंबंध एतन्मे कथितुं त्वमर्हसि ॥३४॥ नारद उवाच ॥ एकदा भुवनत्रयं चरंतः सनकादय ऋषयो यदृच्छया वैकुंठं जग्मुः ॥३५॥ तदा जयविजयौ द्वारपालौ तान् पंचषड्वर्षान् नग्नान् शिशून् मत्वा प्रत्यषेधताम् ॥ ३६ ॥ तदा ते क्रुद्धाः संत ऊचुः । हे

एवं कृष्णे भगवति मायामनुज ईश्वरे ॥ वैरेण पूतपाप्मानस्तमापुरनुचिंतया ॥२८॥ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः ॥ आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ २९ ॥ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ॥ संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥ ३० ॥ कतमोऽपि न वेनः स्यात्पंचानां पुरुषं प्रति ॥ तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३१ ॥ मातृष्वस्रेयो वश्चैद्यो दंतवक्त्रश्च पांडव ॥ पार्षदप्रवरौ विष्णोर्विप्रशापात्पदाच्च्युतौ ॥३२॥ युधिष्ठिर उवाच ॥ कीदृशः कस्य वा शापो हरिदासाभिमर्शनः ॥ अश्रद्धेय इवाभाति हरेरेकांतिनां भवः ॥ ३३ ॥ देहेंद्रियासु हीनानां वैकुंठपुरवासिनाम् ॥ देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ॥ ३४ ॥ नारद उवाच ॥ एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया ॥ सनंदनादयो जग्मुश्चरंतो भुवनत्रयम् ॥ ३५ ॥ पंचषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः ॥ दिग्वाससः शिशून्मत्वा द्वाःस्थौ तान्प्रत्यषेधताम् ॥३६॥ अशपन्कुपिता एवं युवां वासं न चार्हथः ॥ रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ॥ पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ॥३७॥ एवं शप्तौ स्वभवनात्पतंतौ तैः कृपालुभिः ॥ प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम् ॥ ३८ ॥ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववंदितौ ॥ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ॥ ३९ ॥ हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ॥ हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ॥४०॥ हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् ॥ जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४१ ॥ सर्वभूतात्मभूतं तं प्रशांतं समदर्शनम् ॥ भगवत्तेजसा स्पृष्टं नाशक्नोद्धंतुमुद्यमैः ॥ ४२ ॥ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ ॥ रावणः कुंभकर्णश्च सर्वलोकोपतापनौ ॥ ४३ ॥ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ॥ रामवीर्यं श्रोष्यसि त्वं मार्कंडेयमुखात्प्रभो ॥ ४४ ॥ ॥

द्वारपालौ, युवामत्र वासं कर्तुं नार्हथः । अतः पापिष्ठामासुरीं योनिं यातम् ॥३७॥ एवं शप्तौ तौ तत्स्थानात्पतंतौ संतौ तैः कृपालुभिः पुनः प्रोक्तौ । युवां त्रिभिर्जन्मभिः स्वपदं प्राप्नुतम् ॥ ३८ ॥ तौ दितेः पुत्रौ हिरण्यकशिपुहिरण्याक्षौ जातौ ॥३९ ॥ नृसिंहरूपेण हरिणा हिरण्यकशिपुर्हतः वराहरूपेण हिरण्याक्षश्च हतः॥ ४० ॥ हिरण्यकशिपुर्भगवत्प्रियं प्रह्लादं जिघांसुर्मृत्युहेतवे नाना यातानाः कृत्वा ॥ ४१ ॥ सर्वभूतात्मभूतं प्रशांतं तं शस्त्रास्त्रप्रहारैर्हंतुं नाशक्नोत् ॥४२॥ ततस्तौ विश्रवसः केशिन्यां रावणकुंभकर्णौ पुत्रौ जातौ ॥ ४३ ॥ तौ श्रीरामो जघान । हे धर्म, श्रीरामचरित्रं त्वं मार्कंडेयमुखात् श्रोष्यसि ॥ ४४ ॥ ॥

तोवव शिशुपालदंतवक्त्रौ जातौ। तावधुना कृष्णचक्रेण हतौ संतौ ॥४५॥ शापमुक्तौ भूत्वा श्रीकृष्णे लयं प्राप्य पुनः पार्षदौ जातौ ।४६। युधिष्ठिर उवाच॥ हे भगवन्, विष्णुभक्ते पुत्रे हिरण्यकशिपोर्द्वेषः कथमासीत् । दैत्यस्य प्रह्रादस्य हरिभक्तिश्च कथमासीत् ॥ तन्मे ब्रूहि ॥४७॥ इति श्रीम० चू० सप्तम० प्रथमोऽध्यायः ॥ १ ॥ द्वितीये विष्णुरोषेण लोकं विप्लाव्य दानवैः । तद्धतभ्रातृपुत्रादीनितिहासैरसांत्वयत् ॥१॥ नारद उवाच ॥ हे राजन्, वराहरूपेण हरिणा देवपक्षपातेन हिरण्याक्षे हते सति हिरण्यकशिपू रोषेण शोकेन च संतप्तोऽभूत् ॥१ ॥ संदष्टाधरोष्ठः कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमंबरं निरीक्षन् ॥२॥ करालदंष्ट्रः स सदसि शूलमुद्यम्य दानवानिदमब्रवीत् ॥३॥ भो भो दानवदैतेयाः, हे हयग्रीव, हे नमुचे, हे पाक, हे इल्वल, ॥४॥ हे विप्रचित्ते, सर्वे यूयं मद्वचः श्टणुत । तथैव शीघ्रं क्रियताम्

तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ॥ अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥४५ ॥ वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्मताम् ॥ नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४६ ॥ युधिष्ठिर उवाच ॥ विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि ॥ ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ॥ ४७ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादचरितोपक्रमे प्रथमोऽध्यायः ॥ १ ॥ ॥ नारद उवाच ॥ भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ॥ हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शुचा ॥ १ ॥ आह चेदं रुषा घूर्णः संदष्टदशनच्छदः ॥ कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन् धूम्रमंबरम्॥२॥ करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः॥ शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥ ३ ॥ भो भो दानवदैतेया द्विमूर्धंस्त्र्यक्ष शंबर॥ शतबाहो हयग्रीव नमुचे पाक इल्वल ॥ ४ ॥ विप्रचित्ते मम वचः पुलोमन् शकुनादयः ॥ श्रृणुतानंतरं सर्वे क्रियतामाशु मा चिरम् ॥ ५ ॥ सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् ॥ पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ॥ भजंतं भजमानस्य बालस्येवास्थिरात्मनः ॥७॥ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै॥ रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥ तस्मिन्कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ ॥ विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः ॥ ९॥ तावद्यात भुवं यूयं विप्रक्षत्रसमेधिताम् ॥ सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः ॥ १० ॥ विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ॥ देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥ ११ ॥ यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः ॥ तं तं जनपदं यात संदीपयत वृश्चत ॥ १२ ॥ इति ते भर्तृनिर्देशमादाय शिरसाऽऽदृताः ॥ तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥ १३ ॥ ॥

॥५॥ मम शत्रुभिर्देवैर्हरिणा मे भ्राता घातितः ॥६॥ तस्य मायावराहस्य भजतामनुकूलस्य ॥७॥ मच्छूलभिन्नग्रीवस्य हरेः रुधिरेणाहं यदा भ्रातरं तर्पयिष्ये तदा गतदुःखः स्याम् ॥८॥ तस्मिन् हरौ नष्टे सति विष्णुप्राणाः सर्वे देवाः शुष्यंति । छिन्नमूले वृक्षे शाखा इव ॥९॥ अतो यावदहं भ्रातरं तर्पयिष्ये तावद्यूयं भुवं यात । तत्र तपोयज्ञादियुतान् द्विजान् घातयत ॥१०॥ एवं कृते द्विजक्रियामूलो धर्ममयो विष्णुर्नश्येत् ॥ ११ ॥ तस्माद्यत्र यत्र द्विजा गावो वेदाः वर्णाश्रमधर्माः संति तं तं देशं दहत । उपजीविकाकरान् वृक्षान् छेदयत ॥ १२ ॥ इति प्रभोराज्ञां श्रुत्वा ते दैत्यास्तथा प्रजानां नाशं चक्रुः ॥ १३ ॥ ॥

पुरग्रामव्रजाश्रमखेटखर्वटादीन् नगराणि च ददहुः ॥१४॥ केचित्कुद्दालादिभिः सेतुप्राकारगोपुराणि बिभिदुः । केचित् परशुभिर्वृक्षान् चिच्छिदुः ॥१५ ॥ एवं दैत्यैरुपद्रुते लोके सति देवा दिवं त्यक्त्वा गुप्ताः संतो भुवि चेरुः ॥१६॥ हिरण्यकशिपुस्तु मृतस्य भ्रातुरौर्ध्वदैहिकीं क्रियां कृत्वा ॥१७॥ तस्य शकुनिशंबरवृककालनाभादीन् पुत्रान् ॥१८॥ तत्पत्नीं रुषाभानुं जननीं दितिं च मधुरया वाण्या सांत्वयन् जगाद ॥१९॥ हिरण्यकशिपुरुवाच ॥ हे मातः, हे वधूः, हे पुत्राः, यूयं वीरं हिरण्याक्षं मा शोचत । शूराणां रणे वधः इष्ट एव॥२०॥ इह जगति प्राचीनकर्मणा संयोजितानां वियोजितानां च प्राणिनां संगमः प्रपायामिवास्ति ॥२१॥ आत्मा तु शुद्धोऽव्ययो नित्यश्चास्ति तस्याविद्याकृतो लिंगशरीरोपाधिकः संसारो भवति ॥ २२ ॥ यथा चंचलेन प्रवाहोदकेन तीरस्था वृक्षा अपि चं-

पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ॥ खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥१४॥ केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ॥
आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः ॥ प्रादहन् शरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥१५॥ एवं विप्रकृते लोके दैत्येंद्रा-
नुचरैर्मुहुः ॥ दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥१६॥ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः ॥ कृत्वा कटोदकादीनि
भ्रातृपुत्रानसांत्वयत् ॥ १७ ॥ शकुनिं शंबरं धृष्टं भूतसंतापनं वृकम् ॥ कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ॥ १८ ॥
तन्मातरं रुषाभानुं दितिं च जननीं गिरा ॥ लक्षणया देशकालज्ञ इदमाह जनेश्वर ॥१९॥ हिरण्यकशिपुरुवाच ॥ अंबांब हे वधूः
पुत्रा वीरं मार्हथ शोचितुम् ॥ रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ २० ॥ भूतानामिह संवासः प्रपायामिव सुव्रते ॥
दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥२१॥ नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः ॥ धत्तेऽसावात्मनो लिंगं मायया
विसृजन्गुणान् ॥२२॥ यथांभसा प्रचलता तरवोऽपि चला इव ॥ चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥२३॥ एवं गुणैर्भ्रा-
म्यमाणे मनस्यविकलः पुमान् ॥ याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव ॥२४॥ एष आत्मविपर्यासो ह्यलिंगे लिंगभावना
एष प्रियाप्रियैर्योगो वियोगः कर्म संसृतिः ॥२५॥ संभवश्च विनाशश्च शोकश्च विविधः स्मृतः ॥ अविवेकश्च चिंता च विवेका-
स्मृतिरेव च ॥२६ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ यमस्य प्रेतबंधूनां संवादं तं निबोधत ॥ २७ ॥ उशीनरेष्वभूद्राजा
सुयज्ञ इति विश्रुतः ॥ सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥ २८ ॥ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् ॥ शरनिर्भिन्नहृदयं
शयानमसृगाविलम् ॥ २९ ॥ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ॥ रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे ॥ ३० ॥

चला इव दृश्यंते ॥२३॥ तथा गुणैर्मनसि भ्राम्यमाणे सति परिपूर्णोऽपि पुरुषस्तत्साम्यतां प्राप्नोति ॥२४ ॥ अलिंगे आत्मनि यो लिंगशरीरोपाधिको देहाभिमान एष एवात्मनोऽन्यथाभावः । अयमेव संयोगवियोगजन्ममरणादिरूपः संसारः । तस्मादज्ञानकृतं सर्वमेतदिति ज्ञात्वा शोकं मा कुरुत ॥ २५ ॥ २६ ॥ अत्र यमस्य प्रेतबंधूनां च संवादरूपमितिहासमुदाहरंति । तं श्रृणुत ॥ २७ ॥ उशीनरदेशेषु सुयज्ञो नाम राजा बभूव । स शत्रुभिर्युद्धे हतः । तदा तस्य स्त्रीपुत्रादिज्ञातयस्तमावृत्य स्थिताः ॥ २८ ॥ तदा बाणनिर्भिन्नहृदयं विशीर्णकवचं शयानम् ॥ २९ ॥ छिन्नायुधभुजं रजसा व्याप्तमुखम् ॥ ३० ॥ ॥

एवंविधं स्वपतिं दृष्ट्वा तस्य स्त्रियो दुःखिताः सत्यो हस्तैरुरो घ्नंत्यो हानाथ नाथेति वदत्यस्तत्पादयोः पेतुः ॥३१॥ ता विस्रस्तकेशाभरणाः कुचकुंकुमारुणैरश्रुभिः
पतेश्चरणकमलं सिंचंत्य उच्चै रुदंत्यो विलेपिरे ॥३२॥ अहो निर्दयेन ब्रह्मणा त्वमीदृशीं दशां प्रापितोऽसि । येन पुरा त्वं उशीनरदेशानां जीविकाप्रदः कृतः ।
तेनैव ब्रह्मणाऽधुना त्वं तेषां शोकविवर्धनः कृतोऽसि ॥३३॥ हे महीपते, त्वां विना वयं कथं जीवेम। हे वीर, यत्र त्वं यास्यसि तत्रानुगमनेऽस्माकमाज्ञां देहि
॥३४॥ एवं मृतं पतिं प्रगृह्य विलपंतीनां तस्य दाहार्थं नयनमनिच्छतीनां तासां सूर्योऽस्तं गतः ॥३५॥ तदा यमस्तासां विलापं श्रुत्वा बालकरूपेण तत्रागत्य
तान् बोधयामास ॥३६॥ यम उवाच॥ अहो वयसाऽधिकानाममीषां मोहं पश्यत। स्वयं मृत्युधर्मयुक्ता अपि यस्मादागतस्तत्र गतं मनुष्यं वृथा शोचंति ॥३७॥

उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ॥ हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मुहुस्तत्पदयोरुपापतन्
॥३१॥ रुदत्य उच्चैर्दयितांघ्रिपंकजं सिंचंत्य अस्रैः कुचकुंकुमारुणैः ॥ विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आक्रंदनया विलेपिरे
॥३२॥ अहो विधात्राऽकरुणेन नः प्रभो भवान्प्रणीतो दृगगोचरां दशाम् ॥ उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन
शुचां विवर्धनः ॥३३॥ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते ॥ तत्रानुयानं तव वीर पादयोः शुश्रूषतीनां
दिश यत्र यास्यसि ॥३४॥ एवं विलपतीनां वै परिगृह्य मृतं पतिम् ॥ अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥ ३५ ॥ तत्र ह
प्रेतबंधूनामाश्रुत्य परिदेवितम् ॥ आह तान्बालको भूत्वा यमः स्वयमुपागतः ॥३६॥ यम उवाच॥ अहो अमीषां वयसाऽधिकानां
विपश्यतां लोकविधिं विमोहः ॥ यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचंत्यपार्थम् ॥३७॥ अहो वयं धन्यतमा यदत्र
त्यक्ताः पितृभ्यां न विचिंतयामः ॥ अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ॥३८॥ य इच्छयेशः सृजतीदमव्ययो
य एव रक्षत्यवलुंपते च यः ॥ तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं निग्रहसंग्रहे प्रभुः ॥३९॥ पथि च्युतं तिष्ठति दिष्टरक्षितं
गृहे स्थितं तद्विहतं विनश्यति ॥ जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति ॥४०॥ भूतानि तैस्तैर्निजयोनिकर्मभिर्भवंति
काले न भवंति सर्वशः ॥ न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४१ ॥ इदं
शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहम् ॥ यथौदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४२ ॥

अहो, वयं युष्मत्तो धन्याः । यतो बाल्यावस्थायामेवात्र पितृभ्यां त्यक्ता अपि वयं न चिंतयामः । कुतः यो गर्भे रक्षति स एव सर्वत्र रक्षिताऽस्ति ॥ ३८ ॥
हे अबलाः, योऽविनाशी ईश्वर इच्छयेदं सृजति रक्षति संहरति च तस्येदं जगत्क्रीडनमाहुः ॥३९॥ यथा मार्गे च्युतमपि वस्तु दैवरक्षितं सत्तिष्ठति । गृहे स्थितमपि
दैवविहतं चेन्नश्यति एवमीश्वरेण रक्षितोऽनाथोऽपि वने जीवति । तेनारक्षितो गृहे गुप्तोऽपि न जीवति ॥ ४० ॥ सृष्टिकाले भूतानि कर्मभिर्भवंति लयकाले
नश्यंति च । तत्रात्मा देहस्थितोऽपि प्रकृतेर्गुणैर्न बध्यते ॥ ४१ ॥ इदं पुरुषस्य शरीरमविवेकादात्मत्वेन जातं वस्तुतस्तु आत्मनः पृथक् ।
यथात्मत्वेन स्वीकृतमपि गृहं पृथक् तद्वत् । यथा जले जातो बुद्बुद एव नश्यति न जलं तथात्मनि जातो देह एव नश्यति नात्मा ॥ ४२ ॥ ॥

यथाऽऽकाशं सर्वगतमपि न सज्जते तथात्मा देहस्थितोऽपि तत्र न सज्जते ॥४३॥ हे मूढाः, यूयं यमनुशोचथ सोऽयं सुयज्ञः शेते। अयं श्रोता वक्ता च नेति चेत्तर्हि यः श्रोता वक्ता च स कर्हिंचिदपि न दृश्यते ॥ ४४ ॥ स चात्मा प्राणदेहयोरन्योऽस्ति ॥ ४५ ॥ स विभुर्भूतेंद्रियमनोयुक्तानुच्चनीचदेहान् सृजति नाशयति च ॥४६॥ यावल्लिंगशरीरयुक्त आत्मा तावत्कर्मबंधो भवति। ततश्च क्लेशोऽनुवर्तते ॥४७॥ सुखदुःखादिषु यः सत्यत्वाग्रहः स स्वप्ने राज्यलाभ इव मिथ्याभूतः ॥ ४८ ॥ तस्मात् ज्ञानिनो नित्यमात्मानमनित्यं देहं च न शोचंति। अतो यूयं शोकं मा कुरुत ॥४९॥ स्वयं मृत्युधर्मयुक्ता इत्युक्तं तत्रेतिहासमाह। पुरा कश्चिद्वने लुब्धक आसीत्। स कणादिभिः पक्षिणो लोभयन् जालं विस्तार्य पक्षिणो धृतवान् ॥ ५० ॥ तेनैकं कुलिंगपक्षिणोर्युग्मं दृष्ट्वा

यथानलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक् स्थितः ॥ यथा नभः सर्वगतं न सज्जते तथा पुमान्सर्वगुणाश्रयः परः ॥४३॥ सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ ॥ यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिंचित् ॥४४॥ न श्रोता नानुवक्तायं मुख्योऽप्यत्र महानसुः ॥ यस्त्विहेंद्रियवानात्मा स चान्यः प्राणदेहयोः ॥४५॥ भूतेंद्रियमनोलिंगान्देहानुच्चावचान्विभुः ॥ भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥४६॥ यावल्लिंगान्वितो ह्यात्मा तावत्कर्मनिबंधनम् ॥ ततो विपर्ययः क्लेशो मायायोगोऽनुवर्तते ॥४७॥ वितथाभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः ॥ यथा मनोरथः स्वप्नः सर्वमैंद्रियकं मृषा ॥४८॥ अथ नित्यमनित्यं वा नेह शोचंति तद्विदः ॥ नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ॥ ४९॥ लुब्धको विपिने कश्चित्पक्षिणां निर्मितोंऽतकः ॥ वितत्य जालं विदधे तत्र तत्र प्रलोभयन् ॥५०॥ कुलिंगमिथुनं तत्र विचरत्समदृश्यत ॥ तयोः कुलिंगी सहसा लुब्धकेन प्रलोभिता ॥५१॥ साऽसज्जत शिचस्तंत्यां महिषी कालयंत्रिता ॥ कुलिंगस्तां तथापन्नां निरीक्ष्य भृशदुःखितः ॥ स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ॥५२॥ अहो अकरुणो देवः स्त्रियाऽकरुणया विभुः ॥ कृपणं माऽनुशोचंत्या दीनया किं करिष्यति ॥५३॥ कामं नयतु मां देवः किमर्धेनात्मनो हि मे ॥ दीनेन जीवता दुःखमनेन विधुरायुषा ॥५४॥ कथं त्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहम् ॥ मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ॥५५॥ एवं कुलिंगं विलपंतमारात्प्रियावियोगातुरमश्रुकंठम् ॥ स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ॥५६॥ एवं यूयमपश्यंत्य आत्मापायमबुद्धयः ॥ नैनं प्राप्स्यथ शोचंत्यः पतिं वर्षशतैरपि ॥ ५७ ॥ हिरण्यकशिपुरुवाच ॥ बाल एवं प्रवदति सर्वे विस्मितचेतसः ॥ ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥ ५८॥ ॥

तयोर्मध्ये कुलिंगीं जालेन धृतवान् ॥ ५१ ॥ तां जाले बद्धां दृष्ट्वा कुलिंगस्तां मोचयितुमसमर्थो वृक्षमाश्रित्य स्नेहाद्विलापं चकार ॥ ५२ ॥ अहो निर्दयो देवो दीनया मम स्त्रिया किं करिष्यति ॥५३॥ स देवो मामपि कामं नयतु। यतः स्त्रीविहीनस्य मे जीवितेन किं प्रयोजनम् ॥ ५४ ॥ अहमजातपक्षान् मातृहीनान् तान् बालकान् कथं बिभर्मि ॥५५॥ एवं विलपंतं कुलिंगं लुब्धको गुप्तः सन् शरेण विव्याध ॥५६॥ एवं यूयं स्वमृत्युमपश्यंत्यः शोचंत्यो वर्षशतैरपि पतिं न प्राप्स्यथ ॥ ५७ ॥ हिरण्यकशिपुरुवाच ॥ एवं बाले वदति सति सुयज्ञस्य स्त्रीपुत्रादयः सर्वमनित्यं मेनिरे ॥ ५८ ॥ ॥

यम एतदुक्त्वा तत्रैवांतरधीयत। ततः सुयज्ञस्य ज्ञातयोऽपि तस्यौर्ध्वदेहिकीं क्रियां चक्रुः॥५९॥तस्माद्यूयमात्मनः परस्य च शोकं मा कुरुत। स्वपराभिमानरूपेणाज्ञानेन विना स्वकीयः परकीयश्च कोऽपि नास्ति॥६०॥ नारद उवाच ॥ हे राजन्, एवं दैत्यपतेर्वाक्यं सस्नुषा दितिः श्रुत्वा पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तं दधार ॥ ६१ ॥ इति श्रीम० सप्त० द्वितीयोऽध्यायः ॥ २ ॥ तृतीये तस्य तपसा तप्तं वीक्ष्य जगद्विधिः। आगत्य विस्मितस्तेन संस्तुतश्च वरानदात् ॥ १ ॥ नारद उवाच ॥ हे युधिष्ठिर, हिरण्यकशिपुरात्मानमजेयमजरामरं शत्रुहीनं कर्तुमैच्छत् ॥१ ॥ स ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठेन पृथ्वीमाश्रितः सन् मंदरद्रोण्यां दारुणं तपस्तेपे ॥२॥ स जटाकांतिभिः शुशुभे। तदा देवाः स्वस्थानानि भेजिरे ॥३॥ बहुकालकृततपसा तस्य मूर्ध्नः सधूमोऽग्निः समुत्थितः। तेन त्रैलोक्यं तप्तम् ॥४ ॥

यम एतदुपाख्याय तत्रैवांतरधीयत ॥ ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत्सांपरायिकम् ॥ ५९ ॥ ततः शोचत मा यूयं परं चात्मानमेव च ॥ क आत्मा कः परो वात्र स्वीयः पारक्य एव वा ॥ स्वपराभिनिवेशेन विनाऽज्ञानेन देहिनाम् ॥६०॥ नारद उवाच ॥ इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ॥ पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ॥६१॥ इति श्रीम० महा० सप्त० दितिशोकापनयनं नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ नारद उवाच ॥ हीरण्यकशिपू राजन्नजेयमजरामरम् ॥ आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत ॥१॥ स तेपे मंदरद्रोण्यां तपः परमदारुणम् ॥ ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः ॥२॥ जटादीधितिभी रेजे संवर्तार्क इवांशुभिः॥ तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ॥३॥ तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः ॥ तिर्यगूर्ध्वमधो लोकानतपद्विष्वगीरितः ॥४॥ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः ॥ निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥ ५ ॥ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः ॥ धात्रे विज्ञापयामासुर्देवदेव जगत्पते ॥६॥ दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ॥ तस्य चोपशमं भूमन्विधेहि यदि मन्यसे ॥ लोका न यावन्नंक्ष्यंति बलिहारास्तवाभिभूः ॥ ७ ॥ तस्यायं किल संकल्पश्चरतो दुश्चरं तपः ॥ श्रूयतां किं न विदितस्तवाथापि निवेदितः ॥८॥ सृष्ट्वा चराचरमिदं तपोयोगसमाधिना ॥ अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥९॥ तदहं वर्धमानेन तपोयोगसमाधिना ॥ कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः ॥१०॥ अन्यथेदं विधास्येऽहमयथापूर्वमोजसा ॥ किमन्यैः कालनिर्धूतैः कल्पांते वैष्णवादिभिः ॥११॥ इति शुश्रुम निर्बंधं तपः परममास्थितः ॥ विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर ॥१२॥

समुद्राश्चुक्षुभुः। द्वीपपर्वतैः सह भूमिश्चचाल। दिशो जज्वलुः। ग्रहतारा निपेतुः ॥ ५ ॥ तेनाग्निना तप्ता देवा दिवं त्यक्त्वा ब्रह्मलोकं गत्वा धात्रे विज्ञापयामासुः ॥ ६ ॥ हे देवदेव, हिरण्यकशिपुतपसा तप्ता वयं स्वर्गे स्थातुं न समर्थाः। हे भूमन्, लोका यावन्न नंक्ष्यंति तावत्तस्योपशमं कुरु ॥७॥ हे ब्रह्मन्, तव सर्वं विदितमस्ति तथाप्यस्माभिः कथितं श्रूयताम्। तपः कुर्वतस्तस्यायं संकल्पोऽस्ति ॥८॥ ब्रह्मा तपोयोगसमाधिना विश्वं सृष्ट्वा सत्यलोके श्रेष्ठमासनं तिष्ठति॥९॥ तदासनमहं वृद्धिंगतेन तपोयोगेन कालात्मनोश्च नित्यत्वादात्मनः साधयिष्ये॥१०॥ततोऽहमसुरान् स्वर्गे देवान्नरके च स्थापयित्वा जगति धर्माधर्मस्थितिं वैपरीत्येन करिष्यामि ॥ ११ ॥ एवं त्वत्पदग्रहणे तस्य संकल्पं वयं शुश्रुम। अतोऽत्र यद्योग्यं तद्विचारय ॥ १२ ॥ ॥ ॥

हे ब्रह्मन्, तवासनं तु द्विजानां गवां च सुखायैश्वर्याय विजयाय च वर्तते ॥ १३॥ एवं देवैर्विज्ञापितो ब्रह्मा भृगुदक्षादिभिः सह तस्याश्रमं ययौ ॥१४ ॥ तत्र वल्मीकतृणकीचकैर्गुप्तं तं प्रथमं न ददर्श । पश्चात्पिपीलिकाभिर्भक्षितमेदस्त्वङ्मांसशोणितं तं दैत्यं कथंचिदालक्ष्य ॥ १५ ॥ विस्मितः सन् प्रहस्य जगाद ॥ १६ ॥ ब्रह्मोवाच ॥ हे काश्यप, त्वमुत्तिष्ठोत्तिष्ठ । ते कल्याणमस्तु । त्वं तपसा सिद्धोऽसि ॥ अहं वरदः प्राप्तोऽस्मि । अत ईप्सितो वरो व्रियताम् ॥१७॥ मक्षिकादिभिर्भक्षितदेहस्य ते प्राणा अस्थिषु शेरते । एवं ते धैर्यं मया दृष्टम् ॥१८॥ एतत्तपः पूर्वे ऋषयो न चक्रुः । अपरेऽपि न करिष्यंति । दिव्यशतवर्षपर्यंतं जलं विना प्राणान् को धारयेत् ॥ १९ ॥ हे दितिनंदन, तपोनिष्ठेन त्वया जितोऽहम् ॥ २० ॥ मद्दर्शनं ते निष्फलं न भविष्यति ।

तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते ॥ भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १३ ॥ इति विज्ञापितो देवैर्भगवानात्मभूर्नृप ॥ परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमम् ॥ १४ ॥ न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ॥ पिपीलिकाभिराचीर्णमेदस्त्वङ्मांसशोणितम् ॥ १५ ॥ तपंतं तपसा लोकान्यथाभ्रापिहितं रविम् ॥ विलक्ष्य विस्मितः प्राह प्रहसन्हंसवाहनः ॥१६॥ ब्रह्मोवाच ॥ उत्तिष्ठोतिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप ॥ वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १७ ॥ अद्राक्षमहमेतत्ते हृत्सारं महद्भुतम् ॥ दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते ॥ १८ ॥ नैतत्पूर्वर्षयश्चक्रुर्न करिष्यंति चापरे ॥ निरंबुर्धारयेत्प्राणान्को वै दिव्यसमाः शतम् ॥ १९॥ व्यवसायेन तेऽनेन दुष्करेण मनस्विनाम् ॥ तपोनिष्ठेन भवता जितोऽहं दितिनंदन ॥२०॥ ततस्त आशिषः सर्वा ददाम्यसुरपुंगव ॥ मर्त्यस्य ते अमर्त्यस्य दर्शनं नाफलं मम ॥२१॥ नारद उवाच ॥ इत्युक्त्वाऽऽदिभवो देवो भक्षितांगं पिपीलिकैः ॥ कमंडलुजलेनौक्षद्दिव्येनामोघराधसा ॥ २२ ॥ स तत्कीचकवल्मीकात्सहओजोबलान्वितः ॥ सर्वावयवसंपन्नो वज्रसंहननो युवा ॥ उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥२३॥ स निरीक्ष्यांबरे देवं हंसवाहमवस्थितम् ॥ ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥ उत्थाय प्रांजलिः प्रह्व ईक्षमाणो दृशा विभुम् ॥ हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयाऽगृणात् ॥ २५ ॥ हिरण्यकशिपुरुवाच ॥ कल्पांते कालसृष्टेन योंऽधेन तमसा वृतम् ॥ अभिव्यनक् जगदिदं स्वयंज्योतिः स्वरोचिषा ॥ २६ ॥ आत्मना त्रिवृता चेदं सृजत्यवति लुंपति ॥ रजःसत्वतमोधाम्ने पराय महते नमः ॥ २७ ॥ नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये ॥ प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥ २८ ॥ ॥ ॥

अतो वरं वृणीष्व ॥ २१ ॥ नारद उवाच ॥ एवमुक्त्वा ब्रह्मा कमंडलुजलेन पिपीलिकैर्भक्षितांगं तं प्रोक्षितवान् ॥ २२॥ ततः स सर्वावयवसंपन्नो युवा तप्तसुवर्णसदृशो वल्मीकात्समुत्थितः सन् ॥ २३ ॥ आकाशे स्थितं ब्रह्माणं दृष्ट्वा शिरसा भूमौ ननाम ॥२४॥ तत उत्थाय हर्षाश्रुपूर्णाक्षः कृतांजलिः सन् गद्गदया गिरा तुष्टाव ॥२५॥ हिरण्यकशिपुरुवाच ॥ हे देव, त्वं कल्पांते कालसृष्टेन तमसा व्याप्तमिदं जगत् प्रकटं कृतवानसि ॥२६ ॥ इदं त्वमेव सृजसि पासि नाशयसि च । तस्मै रजःसत्वगुणाश्रयाय तुभ्यं नमः ॥२७ ॥ आद्यबीजाय ज्ञानविज्ञानमूर्तये ते नमः ॥ २८ ॥ ॥ ॥

हे विभो, त्वं चराचरस्य जगतो नियंताऽसि ॥ २९ ॥ हे ईश, त्वमेव वेदत्रयरूपेण यज्ञान् विस्तारयसि । त्वमेक आत्मा अनंतपारोऽसि ॥३०॥ त्वमेव कालः सन् जनानामायुः क्षिणोषि । त्वं जीवलोकस्य च जीव आत्माऽसि ॥ ३१ ॥ कार्यकारणादि सर्वं त्वद्व्यतिरिक्तं नास्ति । वेदोपवेदादयोऽपि तवैव तनवः संति । अतस्त्वं हिरण्यगर्भोऽसि ॥३२॥ हे विभो, त्वं स्वस्वरूप एव स्थितः सन् स्थूलशरीरेणेंद्रियादिद्वारा विषयान् भुंक्षे । त्वं ब्रह्मरूपः पुराणः पुरुषश्चासि ॥३३॥ हे अनंत, येन त्वयाऽव्यक्तरूपेणेदं विश्वं व्याप्तं तस्मै अचिंत्यैश्वर्याय ते नमः ॥ ३४॥ हे वरदोत्तम, त्वं मे यदि ईप्सितान् वरान् दास्यसि तर्हि त्वत्सृष्टेभ्यो भूतेभ्यो मे मृत्युर्माभूत् ॥३५॥ तथा अंतः बहिः दिवा नक्तं आयुधैः भूमौ आकाशे मनुष्यैः मृगैः सप्राणैः अप्राणैः सुरासुरमहोरगैश्च मे मृत्युर्माभूत् । युद्धे

त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ॥ चित्तस्य चित्तेर्मन इंद्रियाणां पतिर्महान्भूतगुणाशयेशः ॥ २९ ॥
त्वं सप्ततंतून्वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च ॥ त्वमेक आत्माऽऽत्मवतामनादिरनंतपारः कविरंतरात्मा ॥ ३० ॥
त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ॥ कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा
॥ ३१ ॥ त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति ॥ विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः
॥ ३२ ॥ व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वम् ॥ भुङ्क्षे स्थितो धामनि पारमेष्ठ्य अव्यक्त आत्मा पुरुषः
पुराणः ॥ ३३ ॥ अनंताव्यक्तरूपेण येनेदमखिलं ततम् ॥ चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ॥ ३४ ॥ यदि दास्यस्य-
भिमतान्वरान्मे वरदोत्तम ॥ भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ॥ ३५ ॥ नांतर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः ॥
न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि ॥ ३६ ॥ व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः ॥ अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च
देहिनाम् ॥ ३७ ॥ सर्वेषां लोकपालानां महिमानं यथाऽऽत्मनः ॥ तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित् ॥ ३८ ॥ इति
श्रीमद्भागवते महापुराणे सप्तमस्कंधे हिरण्यकशिपोर्वरयाचनं नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ नारद उवाच ॥ एवं वृतः
शतधृतिर्हिरण्यकशिपोरथ ॥ प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् ॥ १ ॥ ब्रह्मोवाच ॥ तातेमे दुर्लभाः पुंसां यान्वृणीषे
वरान्मम ॥ तथापि वितराम्यंग वरान्यदपि दुर्लभान् ॥ २ ॥ ततो जगाम भगवानमोघानुग्रहो विभुः ॥ पूजितोऽसुरवर्येण स्तू-
यमानः प्रजेश्वरैः ॥ ३ ॥ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः ॥ भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥ ॥

अप्रतिद्वंद्वतां देहिनां ऐकाधिपत्यं च मे देहि ॥३६॥३७॥ यथा तव महिमास्ति तथा महिमानं तपोयोगाभ्यामुत्पद्यमानमणिमाद्यैश्वर्यं च मे देहि ॥ ३८ ॥ इति श्रीमद्भागवतचू० सप्त० तृतीयोऽध्यायः ॥ ३ ॥ ॥ चतुर्थे तु वरान् लब्ध्वा विजित्याखिललोकपान् । विष्णुद्वेषेण तान् सर्वान् दैत्येंद्रः समपीडयत् ॥१॥ नारद उवाच ॥ ब्रह्मा इत्याकर्ण्य तत्तपसा प्रीतः सन् दुर्लभानपि वरान् तस्मै प्रादात् ॥१॥ ब्रह्मोवाच ॥ हे तात, यद्यपीमे वरा लोकानां दुर्लभास्तथापि तांस्ते ददामि ॥२॥ इत्युक्त्वा ब्रह्मा वरान् दत्वा तेन पूजितः सन् सत्यलोकं जगाम ॥ ३ ॥ एवं प्राप्तवरो दैत्यः सुवर्णमयं शरीरं बिभ्रत् भ्रातुर्वधं स्मरन्

भगवति द्वेषं चकार ॥४॥ ततो लोकत्रयं देवासुरमनुष्येंद्रान् गंधर्वादींश्च जित्वा ॥५॥ तथा सिद्धचारणविद्याधरान् ऋषिपितृमनून् यक्षपिशाचादींश्च ॥ ६ ॥
जित्वा वशमानीय लोकपालानां स्थानानि तेजसा सह जहार ॥७॥ देवोद्यानशोभया युक्तं विश्वकर्मणा निर्मितं स्वर्गमधिष्ठितवान् ॥८॥ यत्र प्रवालानां सोपानाः
मरकतानां भूमयः वैदूर्याणां स्तंभपंक्तयश्च संति ॥९॥ यत्र मुक्तासमूहयुक्तानि वितानानि मणिमयान्यासनानि पयःफेननिभाः शय्याः स्वर्णमयाः परिच्छदाश्च
संति ॥१०॥ यत्र देव्यो नूपुरैः शब्दयंत्यः सत्यः रत्नस्थलीषु सुंदरं मुखं पश्यंति ॥११॥ तस्मिन् महेंद्रभवने सुरादिभिर्वंदितचरणः स हिरण्यकशिपू
रेमे ॥१२॥ हे धर्म, मद्येन मत्तं तं ब्रह्मविष्णुरुद्रैर्विनेंद्रादयो देवा उपायनयुक्तहस्तैरुपासत ॥१३॥ इंद्रासने स्थितस्य तस्याग्रे विश्वावसुतुंबुरुप्रमुखा अस्मदादयश्च

स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरः ॥ देवासुरमनुष्येंद्रान्गंधर्वगरुडोरगान् ॥ ५ ॥ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् ॥
यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ॥६॥ सर्वसत्वपतीन्जित्वा वशमानीय विश्वजित् ॥ जहार लोकपालानां स्थानानि
सह तेजसा ॥ ७ ॥ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम् ॥ महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा ॥ त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ॥ ८ ॥
यत्र विद्रुमसोपाना महामारकता भुवः ॥ यत्र स्फाटिककुड्यानि वैदूर्यस्तंभपंक्तयः ॥९॥ यत्र
चित्रवितानानि पद्मरागासनानि च ॥ पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः ॥१०॥ कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः ॥
रत्नस्थलीषु पश्यंति सुदतीः सुंदरं मुखम् ॥ ११ ॥ तस्मिन्महेंद्रभवने महाबलो महामना निर्जितलोक एकराट् ॥ रेमेऽभिवंद्यांघ्रियुगः
सुरादिभिः प्रतापितैरूर्जितचंडशासनः ॥ १२ ॥ तमंग मत्तं मधुनोरुगंधिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ॥ उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् ॥ १३ ॥ जगुर्महेंद्रासनमोजसा स्थितं विश्वावसुस्तुंबुरुरस्मदादयः ॥ गंधर्वसिद्धा
ऋषयोऽस्तुवन्मुहुर्विद्याधरा अप्सरसश्च पांडव ॥ १४ ॥ स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ॥ इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा ॥ १५ ॥ अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही ॥ तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥ १६ ॥ रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ॥ क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥ शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः ॥ दधार लोकपालानामेक एव पृथग्गुणान् ॥ १८ ॥ स इत्थं निर्जितककुबेकराड्विषयान्प्रियान् ॥ यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः ॥ १९ ॥ एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ॥ कालो महान् व्यतीयाय ब्रह्मशापमुपेयुषः ॥२०॥ ॥

गंधर्वा जगुः । अप्सरसो ननृतुः । ऋषयस्तुष्टुवुः ॥ १४ ॥ स एव वर्णाश्रमयुक्तैः प्रजाभिः कृतैर्यज्ञादिभिरिज्यमानो हविर्भागान् जग्राह ॥ १५ ॥
तस्याकृष्टपच्या पृथ्वी जाता । स्वर्गः कामदुघ आसीत् ॥ १६ ॥ सप्तसमुद्रा रत्नसमूहान् ददुः । नद्यो घृतदुग्धादीन् वहंतिस्म ॥ १७ ॥ पर्वताः क्रीडास्थानानि ददुः । वृक्षाः सर्वर्तुषु फलपुष्पादीन् दधुः । एवं स लोकपालानां पृथग्गुणान् स्वयमेक एव दधार ॥ १८ ॥ एवं स त्रैलोक्यैश्वर्यं भुंजन्नपि
नातृप्यत् ॥ १९ ॥ एवमैश्वर्यमत्तस्य तस्य महान् कालो गतः ॥ २० ॥ ॥ ॥ ॥ ॥

तस्योग्रदंडेनोद्विग्नाः सर्वे लोकपाला अच्युतं शरणं जग्मुः ॥२१॥ यत्र सर्वदुःखहर्ता हरिरस्ति। यत्र च ज्ञानिनो गत्वा न निवर्तंते तस्यै दिशे नमोऽस्तु ॥ २२ ॥ एवमेकाग्रबुद्ध्या गतनिद्रा वायुभोजनास्ते देवा हरिं तुष्टुवुः ॥२३॥ तदा तैः साधूनामभयंकरी अशरीरवाणी श्रुता ॥२४॥ सा चैवम्। हे देवाः, यूयं मा भैष्ट। सर्वेषां वः कल्याणमस्तु ॥२५॥ तस्य हिरण्यकशिपोर्दुष्टचित्तत्वं मया ज्ञातम्। तस्य शांतिं करिष्यामि। तावत्कालं यूयं प्रतीक्षत ॥२६॥ यदा देववेदगोविप्रसाधुधर्मेषु मयि च द्वेषं करिष्यति तदा शीघ्रं नाशंप्राप्स्यति ॥२७॥ तत्रापि निर्वैराय शांताय स्वसुताय मद्भक्ताय प्रह्लादाय यदा द्रुह्येत् तदा प्राप्तवरमपि तं हनिष्ये ॥२८॥ नारद उवाच ॥ देवा इत्थमाकर्ण्य तं हरिं प्रणम्य निवृत्ताः। तं दैत्यं च हतं मेनिरे ॥२९॥ तस्य दैत्यपतेश्चत्वारः पुत्रा आसन्। तेषु प्रह्लादो वयसा

तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः ॥ अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ॥२१॥ तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ॥ यद्गत्वा न निवर्तंते शांताः संन्यासिनोऽमलाः ॥२२॥ इति ते संयतात्मानः समाहितधियोऽमलाः ॥ उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥२३॥ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना ॥ सन्नादयंती ककुभः साधूनामभयंकरी ॥२४॥ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ॥ मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य च ॥ तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत ॥ २६ ॥ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ॥ धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥२७॥ निर्वैराय प्रशांताय स्वसुताय महात्मने ॥ प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥२८॥ नारद उवाच ॥ इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ॥ न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतम् ॥२९॥ तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ॥ प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥ ३० ॥ ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेंद्रियः ॥ आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ॥ ३१ ॥ दासवत्संनतार्यांघ्रिः पितृवद्दीनवत्सलः ॥ भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः ॥ विद्यार्थरूपजन्माढ्यो मानस्तंभविवर्जितः ॥३२॥ नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ॥ दांतेंद्रियप्राणशरीरधीः सदा प्रशांतकामो रहितासुरोऽसुरः ॥३३॥ यस्मिन्महद्गुणा राजन् गृह्यंते कविभिर्मुहुः ॥ न तेऽधुनापि धीयंते यथा भगवतीश्वरे ॥ ३४ ॥ यं साधुगाथासदसि रिपवोऽपि सुरा नृप ॥ प्रतिमानं प्रकुर्वंति किमुतान्ये भवादृशाः ॥ ३५ ॥ गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते ॥ वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥ ३६ ॥ न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया ॥ कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥ ३७ ॥

कनिष्ठोऽपि गुणैर्महानासीत् ॥३०॥ ब्रह्मण्यः सत्यप्रतिज्ञः सर्वप्रियः जितेंद्रियः ॥ ३१ ॥ पितृवद्दीनवत्सलः सदृशे भ्रातृवत्स्निग्धः गुरुष्वीश्वरभावनः मानस्तंभरहितः ॥३२॥ संकटेष्वपि नोद्विग्नचित्तः विषयेषु निःस्पृहः ॥३३॥ यस्मात् ज्ञानिनोऽपि मुहुर्मुहुर्महद्गुणान् गृह्णंति ॥ ३४ ॥ शत्रवोऽपि देवाः साधुकथाप्रसंगवत्यां सभायां यं प्रह्लादं दृष्टांतं कुर्वंति। भवादृशाः कुर्वंतीति किमु वक्तव्यम् ॥ ३५ ॥ तस्यासंख्येयैर्गुणैः पूर्णं माहात्म्यं मया केवलं द्योत्यते। यस्य वासुदेवे भगवति स्वाभाविकी प्रीतिः ॥३६॥ यो बालोऽपि त्यक्तक्रीडनकः सन् भगवदेकचित्तत्वेन जगदपि न वेद ॥ ३७॥ ॥ ॥

य आसीनः पर्यटन् शयानः प्रपिबन्नपि आत्मनैक्यं प्राप्तः सन् तानि कर्माणि नानुसंधत्ते ॥३८॥ क्वचित् गोविंदचिंतया रुदति क्वचिद्धसति क्वचिद्गायति॥३९॥ क्वचिद्विलज्जः सन्नृत्यति । क्वचित्तद्भावनायुक्तस्तच्चेष्टादिकं स्वयं कृतवान् ॥४०॥ क्वचित्प्रेमानंदेन मीलितेक्षणः सन् तूष्णीमास्ते ॥४१॥ एवं स प्रह्लादो भगवद्भक्त्याऽऽत्मनः सुखं विस्तारयन् अन्यस्यापि मनसः शांतिं चकार ॥४२॥ हे राजन्, ईदृशे भगवद्भक्ते पुत्रे हिरण्यकशिपुर्द्वेषं चकार ॥४३॥ युधिष्ठिर उवाच॥ हे देवर्षे, साधवे स्वपुत्राय तत्पिता कस्माद्द्वेषं चकार । एतज्ज्ञातुमिच्छामः ॥ ४४ ॥ प्रतिकूलानपि पुत्रान् पुत्रवत्सलाः पितरः शिक्षार्थं निंदंति । परंतु न घ्नंति ॥४५॥ एवं सति पित्रा पुत्रस्य मरणार्थं प्रवर्तितो द्वेषस्तस्य पितुर्मरणाय कथं जातः । एतत्कौतूहलं दूरीकुरु ॥ ४६ ॥ इति श्रीमद्भागवतचू० सप्तमस्कंधे चतु-

आसीनः पर्यटन्नश्नन् शयानः प्रपिबन्ब्रुवन् ॥ नानुसंधत्त एतानि गोविंदपरिरंभितः ॥ ३८ ॥ क्वचिद्रुदति वैकुंठचिंताशबलचेतनः ॥ क्वचिद्धसति तच्चिंताह्लाद उद्गायति क्वचित् ॥ ३९ ॥ नदति क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित् ॥ क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥ ४० ॥ क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ॥ अस्पंदप्रणयानंदसलिलामीलितेक्षणः ॥ ४१ ॥ स उत्तमश्लोकपदारविंदयोर्निषेवयाऽकिंचनसंगलब्धया ॥ तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसंगदीनान्यमनःशमं व्यधात् ॥ ४२ ॥ तस्मिन्महाभागवते महाभागे महात्मनि ॥ हिरण्यकशिपू राजन्नकरोदघमात्मजे ॥ ४३ ॥ ॥ युधिष्ठिर उवाच ॥ देवर्ष एतदिच्छामो वेदितुं तव सुव्रत ॥ यदात्मजाय शुद्धाय पिताऽदात्साधवे ह्यघम् ॥ ४४ ॥ पुत्रान्विप्रतिकूलान्स्वान्पितरः पुत्रवत्सलाः ॥ उपालभंते शिक्षार्थं नैवाघमपरो यथा ॥ ४५ ॥ किमुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् ॥ एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ॥ पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादचरिते चतुर्थोऽध्यायः ॥ ४ ॥ ॥ नारद उवाच ॥ पौरोहित्याय भगवान्वृतः काव्यः किलासुरैः ॥ शंडामर्कौ सुतौ तस्य दैत्यराजगृहांतिके ॥ १ ॥ तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् ॥ पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥ २ ॥ यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनुपपाठ च ॥ न साधु मनसा मेने स्वपरासद्ग्रहाश्रयम् ॥३ ॥ एकदाऽसुरराट् पुत्रमंकमारोप्य पांडव ॥ पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ ४ ॥ प्रह्लाद उवाच ॥ तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ॥ हित्वाऽऽत्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५ ॥ ॥

र्थोऽध्यायः ॥ ४ ॥ ॥ नारद उवाच ॥ पंचमे गुरुतोऽधीतं त्यक्त्वा विष्णुस्तुतौ रतम् । घातयंन् द्विपसर्पाद्यैः सुतं दैत्यो न चाशकत् ॥१॥ नारद उवाच ॥ असुरैः पौरोहित्याय शुक्रो वृतः । तस्य पुत्रौ शंडामर्कौ राजगृहसमीपे न्यवसताम् ॥१॥ तौ राज्ञा प्रापितं बालं प्रह्लादमन्यांश्च दैत्यबालकान्प्रति राजनीत्यादीन् पाठयामासतुः ॥२॥ ताभ्यां प्रोक्तं द्वैतशास्त्रं प्रह्लादः शुश्रुवे पपाठ च, परंतु मनसा तत्साधु न मेने ॥३॥ एकदा हिरण्यकशिपुः पुत्रं प्रह्लादमंकमारोप्य पप्रच्छ । हे वत्स, त्वं यत्साधु मन्यसे तत्कथय ॥४॥ प्रह्लाद उवाच ॥ हे दैत्यश्रेष्ठ, आत्मनोऽधःपातनिमित्तं मोहप्रापकं गृहं हित्वा वनं गतः सन् हरिमाश्र-

येतेति यत्तत्साधु मन्ये ॥५॥ नारद उवाच ॥ एवं पुत्रगिरः श्रुत्वा प्रहस्य गुरून् जगाद ॥६॥ अस्य बुद्धिर्वैषांतरेण गुप्तैर्भगवद्भक्तैर्यथा न भिद्येत तथा भवद्भ्यां स्वगृहे बालस्य रक्षणं कार्यम् ॥७॥ ततो दैत्ययाजकाः प्रह्रादं गृहमानीय प्रशस्य तं पप्रच्छुः ॥८॥ हे प्रह्राद, सत्यं कथय । बालानतिक्रम्य ते बुद्धिविपर्ययः कुतो जातः ॥९॥ ते बुद्धिभेदः परकृतः स्वत एव वा जातः एतद्वद ॥१०॥ प्रह्राद उवाच ॥ स्वः पर इत्यज्ञानं यस्य मायया भवतां दृष्टम् । तस्मा अचिंत्ययोगमायेश्वराय नमः ॥११॥ यदा हरिरनुकूलः स्यात्तदा पुंसां स्वः पर इति भेदबुद्धिर्नश्यति ॥१२॥ यस्य लीला दुर्घटाऽस्ति । यं ज्ञातुं प्रवृत्ता ब्रह्मादयोऽपि मुह्यंति । स मे बुद्धिं भिनत्ति ॥१३॥ यथा लोहचुंबकस्य सांनिध्याल्लोहं भ्रमति तथा चक्रपाणेः सन्निधौ मे चेतो भिद्यते ॥१४॥ नारद उवाच ॥

॥ नारद उवाच ॥ श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः ॥ जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥ ६ ॥ सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः ॥ विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥ ७ ॥ गृहमानीतमाहूय प्रह्रादं दैत्ययाजकाः ॥ प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ॥ ८ ॥ वत्स प्रह्राद भद्रं ते सत्यं कथय मा मृषा ॥ बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ९ ॥ बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् ॥ भण्यतां श्रोतुकामानां गुरूणां कुलनंदन ॥ १० ॥ प्रह्राद उवाच ॥ स्वः परश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः॥ विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥११॥ स यदाऽनुव्रतः पुंसां पशुबुद्धिर्विभिद्यते ॥ अन्य एष तथान्योऽहमिति भेदगता सती ॥ १२ ॥ स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ॥ मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ॥ १३ ॥ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ ॥ तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥ १४ ॥ नारद उवाच ॥ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः ॥ तं निर्भर्त्स्याथ कुपितः स दीनो राजसेवकः ॥ १५ ॥ आनीयतामरे वेत्रमस्माकमयशस्करः ॥ कुलांगारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ॥ १६ ॥ दैतेयचंदनवने जातोऽयं कंटकद्रुमः ॥ यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ॥ १७ ॥ इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः ॥ प्रह्रादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥ १८ ॥ तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ॥ दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतम् ॥ १९ ॥ पादयोः पतितं बालं प्रतिनंद्याशिषाऽसुरः ॥ परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥ २० ॥ आरोप्यांकमवघ्राय मूर्धन्यश्रुकलांबुभिः ॥ आसिंचन्विकसद्वक्त्रमिदमाह युधिष्ठिर॥२१॥ ॥ ॥

एवमुक्त्वा प्रह्रादो विरराम । तदा गुरुः कुपितः सन् तं निर्भर्त्स्य जगाद ॥१५॥ अस्माकमयशस्करोऽयं दुर्बुद्धिर्दंडयोग्योऽस्ति । अतो हे शिष्या वेत्रमानीयताम् ॥१६॥ दैत्यरूपे चंदनवनेऽयं कंटकवृक्षो जातः । दैत्यवनमूलच्छेदने परशुस्थानीयस्य विष्णोरयं दंडरूपः सहकारी जातः ॥ १७ ॥ एवं तं भीषयन् धर्मार्थकामप्रतिपादकं शास्त्रमध्यापयामास ॥१८॥ ततो गुरुरेनमधीतविद्यं ज्ञात्वा मात्रा वस्त्रालंकारादितिर्भूषितं बालं दैत्येंद्रं दर्शयामास ॥ १९ ॥ ततो हिरण्यकशिपुः पादयोः पतितं बालमालिंग्यानंदं प्राप ॥२०॥ ततोंऽकमारोप्य मूर्ध्न्यवघ्राय प्रेम्णा पप्रच्छ ॥ २१ ॥ ॥ ॥

हिरण्यकशिपुरुवाच ॥ हे प्रह्राद, एतावता कालेन गुरोर्यद्भवता स्वधीतं तदुच्यताम् ॥२२॥ प्रह्राद उवाच ॥ हे तात, विष्णोः श्रवणं कीर्तनं स्मरणं पादसेवनमर्चनं वंदनं दास्यं सख्यं स्वदेहसमर्पणम् ॥२३॥ इति नवविधा भक्तिर्विष्णावर्पितैव सती क्रियते चेत्तर्हि तदुत्तममधीतं मन्ये ॥ २४॥ एवं पुत्रवचः श्रुत्वा क्रोधेन स्फुरिताधरो हिरण्यकशिपुर्गुरुपुत्रं जगाद ॥२५॥ हे ब्राह्मणाधम, एतत्त्वया किं कृतम् । हे दुर्मते, मामनादृत्य पुत्रोऽसारं किमिति ग्राहितः ॥२६ ॥ अस्मिन् लोके कापट्यवेषधारका असाधवो बहवः संति । तेषां मनसि स्थितं दुर्जनत्वं कालांतर उदयं प्राप्नोति ॥ २७ ॥ गुरुपुत्र उवाच ॥ हे इंद्रशत्रो, तव सुतो मत्कथितं परकथितं च न वदति । अस्येयं स्वाभाविकी बुद्धिः । अतो मयि क्रोधं मा कुरु ॥ २८ ॥ नारद उवाच ॥ एवं गुरुभाषणं श्रुत्वाऽसुरः पुत्रं

हिरण्यकशिपुरुवाच ॥ प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमम् ॥ कालेनैतावताऽऽयुष्मन्यदशिक्षद्गुरोर्भवान् ॥२२॥ ॥ प्र-
ह्लाद उवाच ॥ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥ इति पुंसा-
ऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥ क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४॥ निशम्यैतत्सुतवचो हिरण्यकशिपुस्त-
दा ॥ गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥ २५ ॥ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयताऽसता ॥ असारं ग्राहितो बालो मामना-
दृत्य दुर्मते ॥ २६ ॥ संति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ॥ तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥ ॥ गुरु-
पुत्र उवाच ॥ न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेंद्रशत्रो ॥ नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कददाः स्म मा नः
॥ २८ ॥ ॥ नारद उवाच ॥ गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम् ॥ न चेद्गुरुमुखीयं ते कुतोऽभद्रासती मतिः ॥ २९ ॥
॥ प्रह्लाद उवाच ॥ मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम् ॥ अदांतगोभिर्विशतां तमिस्रं पुनः पुनश्चर्वि-
तचर्वणानाम् ॥ ३० ॥ न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ॥ अंधा यथांधैरुपनीयमाना वाचीशतं-
त्यामुरुदाम्नि बद्धाः ॥ ३१ ॥ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः ॥ महीयसां पादरजोऽभिषेकं निष्किंच-
नानां न वृणीत यावत् ॥ ३२ ॥ इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा ॥ अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ॥ ३३॥
आहामर्षरुषाविष्टः कषायीभूतलोचनः ॥ वध्यतामाश्वयं वध्यो निःसारयत नैर्ऋताः ॥ ३४ ॥ अयं मे भ्रातृहा सोऽयं हित्वा-
स्वान्सुहृदोऽधमः ॥ पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ॥ ३५ ॥ ॥ ॥

जगाद ॥ हे पुत्र, इयं ते बुद्धिर्गुरुवाक्यजनिता न चेत्तर्हि कुतः प्राप्ता ॥ २९॥ प्रह्राद उ० ॥ हे पितः, विषयासक्तानां पुंसां श्रीकृष्णे बुद्धिः परतः स्वतो वा अन्योन्यतो वा नोत्पद्यते ॥३०॥ विषयासक्तैर्गुरुभिः शिक्षिता ये विषयिणस्ते साधुप्राप्यं विष्णुं न जानंति । यथा अंधैर्नीयमाना अंधाः पंथानं न जानंति तद्वत् ॥३१॥ यावत्साधूनां चरणरजोऽभिषेकं जना न प्राप्नुवंति तावत्तेषां कृष्णे मतिर्नोपजायते ॥ ३२ ॥ इत्युक्त्वोपरतं प्रह्रादं हिरण्यकशिपुः क्रोधेन स्वोत्संगान्महीतले निरस्यत ॥ ३३ ॥ राक्षसानुवाच च । हे राक्षसाः, अयं पुत्रो भवद्भिर्वध्यतां नगरान्निःसार्यतां वा ॥३४॥ यो हिरण्याक्षहंतुर्विष्णोः पादौ दास-

वत्पूजयति ॥३५॥ योऽयं पंचवर्षोऽपि बालक आवयोः पित्रोः सौहृदं जहौ ॥ ३६ ॥ शत्रुरपि हितकृच्चेत्तर्हि सुतो ज्ञेयः । स्वदेहजोऽपि पुत्रो हितकृन्नो चेत्तर्हि रोगवद्घातको ज्ञेयः । यतो देहावयवोऽपि हस्तादिः सर्पदंशादिना दूषितश्चेत्तर्हि छेद्यः । येन विना शेषं शरीरं सुखं जीवति ॥३७॥ अतोऽयं भोजनशयनासनादिभिः सर्वैरुपायैर्हतव्यः ॥३८॥ एवं भर्त्राऽऽज्ञापितास्ते राक्षसा नदंतश्छिंधि भिंधीति वादिनः संत आसीनं प्रह्रादं शूलैः सर्वमर्मसु जघ्नुः ॥ ३९ ॥ ४० ॥ तथापि महाभागवते भगवत्यर्पितचित्ते तस्मिन्प्रह्रादे तेषां प्रहारा निष्फला आसन् ॥ ४१ ॥ तस्मिन् प्रयासे व्यर्थे जाते सति हिरण्यकशिपुस्तद्वधोपायानाग्रहेण चकार ॥४२॥ दिग्गजैः सर्पैः कृत्त्याप्रयोगैः पर्वतशिरात्पातनैः शंबरनिर्मितमायाभिः विषदानैः उपोषणैः ॥ ४३ ॥ हिमवाय्वग्निजलादिभिरुपायैर्निष्पा-

विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमंजसः ॥ सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ॥३६॥ परोऽप्यपत्यं हितकृद्यथौषधं स्वदेहजोऽप्यामयवत्सुतोऽहितः ॥ छिंद्यात्तदंगं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात् ॥३७॥ सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः ॥ सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियम् ॥ ३८ ॥ नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः ॥ तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥३९॥ नदंतो भैरवान्नादांश्छिंधि भिंधीति वादिनः ॥ आसीनं चाहनन् शूलैः प्रह्रादं सर्वमर्मसु ॥४०॥ परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ॥ युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥ ४१ ॥ प्रयासेऽपहते तस्मिन्दैत्येंद्रः परिशंकितः॥ चकार तद्वधोपायान्निर्बंधेन युधिष्ठिर ॥४२॥ दिग्गजैर्दंदशूकैश्च अभिचारावपातनैः ॥ मायाभिः संनिरोधैश्च गरदानैरभोजनैः ॥४३॥ हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ॥ न शशाक यदा हंतुमपापमसुरः सुतम् ॥ चिंतां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥४४ ॥ एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ॥ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥४५॥ वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयम् ॥ न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ॥४६॥ अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः ॥ नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ॥४७॥ इति तं चिंतया किंचिन्म्लानश्रियमधोमुखम् ॥ शंडामर्कावौशनसौ विविक्त इति होचतुः ॥ ४८ ॥ जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृंभणत्त्रस्तसमस्तधिष्ण्यपम् ॥ न तस्य चिंत्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदम् ॥४९॥ इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ॥ बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ॥५०॥ ॥

पं सुतं हंतुं यदा न शशाक । तदा दीर्घां चिंतां प्राप्तः सन्नाह ॥४४॥ मयास्य वधोपाया बहवो निर्मिताः । तथापि तेभ्यः स्वेनैव तेजसा मुक्तः ॥४५॥ अयं मेसमीपे वसन् बालोऽपि मे शत्रुत्वं न विस्मरति ॥४६॥ अयमकुतश्चिद्भयोऽमरोऽस्ति किम् । अस्य विरोधेन मे मृत्युर्भविष्यति किम् ॥४७॥ इति चिंतयाऽधोमुखं हिरण्यकशिपुं शंडामर्कावेकांते ऊचतुः ॥ ४८ ॥ हे नाथ, त्वयैकेन जगत्त्रयं जितमस्ति । तस्य तव चिंत्यं किमपि न पश्यामः । अतः शिशोर्गुणदोषौ न चिंतनीयौ ॥ ४९ ॥ तथाप्यस्य बंधनमुचितम् । अतो यावच्छुक्राचार्यस्तपश्चर्यां पूर्णां कृत्वा आगमिष्यति तावदेनं वारुणपाशैर्बध्वा स्थापय । पुरुषस्य बुद्धिर्वयसा आर्यसेवया च समीचीना भवति ॥ ५० ॥ ॥ ॥ ॥ ॥

तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ॥ धर्मा ह्यस्योपदेष्टव्या राज्ञां ये गृहमेधिनाम् ॥ ५१ ॥ धर्ममर्थं च कामं च नितरां चानुपूर्वशः ॥ प्रह्लादायोचतू राजन्प्रश्रितावनताय च ॥ ५२ ॥ यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम् ॥ न साधु मेने तच्छिक्षां द्वंद्वारामोपवर्णिताम् ॥ ५३ ॥ यदाऽऽचार्यः परावृत्तो गृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥५४॥ अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ॥ उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥ ५५ ॥ ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः ॥ बाला न दूषितधियो द्वंद्वारामेरितेहितैः ॥ ५६ ॥ पर्युपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः ॥ तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥ ५७ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते पंचमोऽध्यायः ॥ ५ ॥ ॥ प्रह्लाद उवाच ॥ कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ १ ॥ यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ॥ यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ २ ॥ सुखमैंद्रियकं दैत्या देहयोगेन देहिनाम् ॥ सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ॥ ३ ॥ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् ॥ न तथा विंदते क्षेमं मुकुंदचरणांबुजम् ॥ ४ ॥ ततो यतेत कुशलः क्षेमाय भयमाश्रितः ॥ शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ ५ ॥ पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः ॥ निष्फलं यदसौ रात्र्यां शेतेंऽधं प्रापितस्तमः ॥ ६ ॥ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः ॥ जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥ ७ ॥ दुरापूरेण कामेन मोहेन च बलीयसा ॥ शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥ को गृहेषु पुमान्सक्तमात्मानमजितेंद्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥ ॥ ॥

राजा तथेत्युक्त्वा जगाद । अस्य राज्ञां धर्मा उपदेष्टव्याः ॥५१॥ तदा गुरू धर्मार्थकामप्रतिपादकं शास्त्रं दैत्यबालकैः सह तमध्यापयामासतुः ॥५२॥ प्रह्लादस्तद्गुरुशिक्षितं साधु न मेने ॥५३॥ यदा आचार्यो गृहकर्मसु गतस्तदा प्राप्तावसरैर्बालकैः क्रीडार्थमाहूतः ॥५४॥ प्रह्लादः स्वयमेव तानाहूय कृपया जगाद ॥ ५५ ॥ ते बालाः प्रह्लादस्य गुरुत्वात्त्यक्तक्रीडनकाः संतः ॥५६॥ तं पर्युपासत । ततो महाभागवतो दयालुः प्रह्लादस्तान् बालानाह ॥ ५७ ॥ इति श्रीमद्भागवतचू॰ सप्त॰ पंचमोऽध्यायः ॥५॥ षष्ठे गुरौ गृहव्यग्रे प्रह्लादो दैत्यबालकान् । अनुकंप्य परं तत्त्वं नारदोक्तमुपादिशत् ॥१॥ निरर्थकक्रियालापैरायुर्व्ययमजानताम् । प्रह्लादः सदयं प्राह धर्मं भागवतं कृती ॥ २ ॥ प्रह्लाद उवाच ॥ हे बालकाः, प्राज्ञः पुरुषः कौमार एव भगवद्धर्मानाचरेत् । यत इह मानुष्यं जन्म दुर्लभमर्थदं च ॥१॥ इह विष्णोः पादसेवनमेव योग्यम् । यतो विष्णुरेव सर्वभूतानामात्मा प्रिय ईश्वरश्चास्ति ॥ २ ॥ हे दैत्याः, प्राणिनां सर्वयोनिषु देहयोगेन विषयसुखं दैवाल्लभ्यत एव ॥ ३ ॥ अतस्तदर्थं यत्नो न कार्यः । यतो यत्नेनायुष्यस्य व्यर्थं व्ययो भवति ॥ ४ ॥ तस्मात्संसारं प्राप्तः पुमान् यावच्छरीरं न नश्येत् तावत् क्षेमाय यत्नं कुर्यात् ॥५॥ पुंसो वर्षशतमायुः । तस्यार्धं रात्रौ निद्रया निष्फलं गच्छति ॥ ६ ॥ मूढस्य बाल्ये कौमारे च क्रीडतः सतो विंशतिर्वर्षाणि यांति । जरया ग्रस्तदेहस्य विंशतिर्वर्षाणि यांति ॥ ७॥ शेषं दुष्पूरेण कामेन मोहेन च गृहे सक्तस्य याति ॥ ८ ॥ गृहेषु सक्तं दृढैः स्नेहपाशैर्बद्धं चात्मानं

मो चितुं कः समर्थः स्यान्न कोऽपि ॥९॥ तथा धनस्य तृष्णां को नु विसृजेत् । यद्धनं तस्करः सेवको वणिक् चैते प्राणहानिमंगीकृत्यापि साधयंति ॥१०॥ गृहासक्तः पुमान् कोशस्कारी[1] कीट इव बंधहेतूनि कर्माणि लोभात् कुर्वाणः, प्रियाया रहसि संगं, शिशूनां मधुराणि भाषणानि, पुत्रान्, श्वशुरगृहे स्थिताः कन्याः, भ्रातॄन्, स्वसॄः, दीनौ मातापितरौ, मनोज्ञाः परिच्छदा येषु तान् गृहान्, पशुभृत्यवर्गांश्च स्मरन्, अवितृप्तकामः जिह्वोपस्थसुखं बहु मन्यमानो दुरंतमोहः सन् कथं विरक्तो भवेत् ॥११॥१२॥१३॥ यतः स दुरंतमोहः पुरुषः कुटुंबपोषणार्थं क्षीयमाणं स्वकीयमायुः विहतं पुरुषार्थं च न मन्यते ॥ १४ ॥ किं तु स द्रव्यलोभी कुटुंबी, परवित्तहर्तुरिहामुत्र च दंडनरकरूपं दोषं जानन्नपि तत्परवित्तं हरते ॥१५॥ इत्थं कुटुंबं पुष्णन् आत्मविचाराय न कल्पते । किं तु मूढ इव

कोन्वर्थतृष्णां विसृजेत्प्राणेभ्योऽपि य ईप्सितः ॥ यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥ कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् ॥ सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ ॥ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥१२॥ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ॥ औपस्थ्यजैह्वयं बहु मन्यमानः कथं विरज्येत दुरंतमोहः ॥१३॥ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः ॥ सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः ॥१४॥ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ॥ प्रेत्येह चाथाप्यजितेंद्रियस्तदशांतकामो हरते कुटुंबी ॥१५॥ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन्स्वलोकाय न कल्पते वै ॥ यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत तथा विमूढः ॥१६॥ यतो न कश्चित्क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः ॥ विमोचितुं कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः ॥१७॥ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु ॥ उपेत नारायणमादिदेवं स मुक्तसंगैरिषितोऽपवर्गः ॥ १८ ॥ न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ॥ आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः ॥१९॥ परावरेषु भूतेषु ब्रह्मांतस्थावरादिषु ॥ भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥ २० ॥ गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा ॥ एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥२१॥ प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ॥ व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २२ ॥ केवलानुभवानंदस्वरूपः परमेश्वरः ॥ माययांतर्हितैश्वर्य ईयते गुणसर्गया ॥ २३ ॥ ॥

विद्वानपि गृहादिष्वासक्तो भवति ॥१६॥ यतः कश्चिदपि पुमान् कुत्रापि स्थले कस्मिन्नपि काले स्वमात्मानं मोचितुं न समर्थः ॥१७॥ तस्मात् हे दैत्यबालकाः, विषयात्मकेषु दैत्येषु संगं त्यक्त्वा नारायणं शरणं गच्छत । यतः स नारायण एव विवेकिभिर्मोक्षत्वेन स्वीकृतोऽस्ति ॥१८॥ हे दैत्यबालकाः, अच्युतं संतोषयतः पुंसोऽतिप्रयासो नास्ति । यतः स सर्वभूतानामात्मा सर्वत्र सिद्धश्चास्ति ॥१९॥ यो जीवेष्वजीवेष्वाकाशादिषु[2] च परमात्मा व्याप्य स्थितः ॥ २० ॥ यः प्रकृतौ गुणेषु महत्तत्वादिषु चैक एवास्ति ॥२१॥ स केवलानुभवानंदस्वरूप एव देहेंऽतर्यामिद्रष्टृभोक्तृस्वरूपेण व्यापकत्वेन, दृश्यभोग्यस्वरूपेण व्याप्य-

---

[1] यथा कोशस्कारी कीटः आत्मनो हितं गृहं कुर्वाणो निर्गमाय द्वारमपि नावशेषयति तद्वत् । [2] घटादिषु ।

त्वेन च मायया प्रकाशते ॥२२॥२३॥ तस्माद्यूयमासुरं भावं विसृज्य सर्वभूतेषु दयां सौहृदं च कुरुत । यया दयया हरिस्तुष्यति ॥२४॥ हरौ तुष्टे सति अप्राप्यं किमस्ति न किमपि । तथापि तं गायतां नो दैवादेवायत्नसिद्धैर्धर्मार्थकाममोक्षैः कांक्षितैः किं फलं न किमपि । अतो यूयं तस्य गुणकर्माणि गायत ॥२५॥ धर्मार्थकाम इति त्रिवर्ग आत्मविद्या कर्मविद्या तर्कशास्त्रं दंडनीतिर्विविधा जीविका चेत्येतत्सर्वं वेदप्रतिपादितमपि निर्गुणे भगवति स्वात्मार्पणे साधनं चेत्तर्हिं सत्यं मन्ये अन्यथा तदसत्यमेव ॥ २६ ॥ एतज्ज्ञानं नारायणो नारदाय कथितवान् । इदं ज्ञानमेकांतभक्तानां सर्वेषामपि स्यान्नतूत्तमानामेवेति नियमः ॥२७॥ इदं भगवद्धर्मरूपं ज्ञानं मया पूर्वं नारदाच्छ्रुतम् ॥२८॥ दैत्यपुत्रा ऊचुः ॥ हे प्रह्लाद, वयं त्वं च शंडामर्कौ विनान्यं गुरुं न जानीमः ॥२९॥ अंतः-

तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदम् ॥ आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥ २४ ॥ तुष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ॥ धर्मादयः किमगुणेन च कांक्षितेन सारं जुषां चरणयोरुपगायतां नः ॥ २५ ॥ धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता ॥ मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥ २६ ॥ ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ॥ एकांतिनां भगवतस्तदकिंचनानां पादारविंदरजसाप्लुतदेहिनां स्यात् ॥ २७ ॥ श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् ॥ धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥ दैत्यपुत्रा ऊचुः ॥ प्रह्लाद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुम् ॥ एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥ २९ ॥ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः ॥ छिंधि नः संशयं सौम्य स्याच्चेद्विश्रंभकारणम् ॥ ३० ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते षष्ठोऽध्यायः ॥ ६ ॥ ॥ नारद उवाच ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ॥ उवाच स्मयमानांस्तान्स्मरन्मदनुभाषितम् ॥ १ ॥ ॥ प्रह्लाद उवाच ॥ पितरि प्रस्थितेऽस्माकं तपसे मंदराचलम् ॥ युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥ २ ॥ पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः ॥ पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥ तेषामतिबलोद्योगं निशम्यासुरयूथपाः ॥ वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतोदिशम् ॥ ४ ॥ कलत्रपुत्रमित्राप्तान्गृहान्पशुपरिच्छदान् ॥ नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥ ॥ ॥

पुरस्थस्य बालस्य तव महत्संगो दुर्घटः । अतस्त्वत्कथितेऽस्माकं विश्वासकारणं चेत्तर्हिं तत्कथयित्वा नः संशयं छिंधि ॥३०॥ इति श्रीमद्भागवतचू० सप्त० षष्ठोऽध्यायः ॥ ६ ॥ ॥ सप्तमे मातृगर्भस्थे स्वस्मिन्नारदभाषितम् । प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥ १ ॥ अश्रावि नारदादेतन्मया गर्भ इतीरितुम् । तत्प्रस्तावकथामाह पद्यैः षोडशभिः सुधीः ॥२॥ नारद उवाच ॥ एवं दैत्यसुतैः पृष्टः प्रह्लादःपूर्वोक्तं मम भाषितं स्मरन् तानुवाच ॥१॥ प्रह्लाद उवाच ॥ अस्मत्पितरि हिरण्यकशिपौ तपः कर्तुं मंदरपर्वतं गते सति देवा दानवान्प्रति युद्धोद्योगं चक्रुः ॥२॥ इंद्रादयो देवाः स्वपापेन पिपीलिकाभिरहिमिव भक्षितं हिरण्यकशिपुं वीक्ष्य हर्षं प्रापुः ॥३॥ दैत्या देवानां बलोद्योगं दृष्ट्वा तैस्ताड्यमानाः संतः ॥ ४ ॥ स्त्रीपुत्रगृहमित्राप्तपश्वादीन् हित्वा प्राणरक्षणेच्छया सर्वतोदिशं

दुद्रुवुः ॥५॥ ततो देवा राज्ञो गृहं व्यलुंपन् । इंद्रस्तु मम मातरं कयाधूं गृहीत्वा नीतवान् ॥ ६ ॥ तदा नीयमानां भयविह्वलां पथि रुदतीं तां नारदो दृष्ट्वा इंद्रं प्राह ॥७॥ हे सुरपते, निरपराधामेनां मुंच मुंच । सतीं परस्त्रियं त्वं नेतुं नार्हसि ॥८॥ इंद्र उवाच । हे ऋषे, अस्या जठरे असह्यं हिरण्यकशिपोर्वीर्यमस्ति । अतः प्रसवोत्तरं जातं पुत्रं हत्वाऽनंतरमिमां मोक्ष्ये ॥ ९ ॥ नारद उवाच ॥ हे इंद्र, अयं गर्भो महाभागवतोऽस्ति । अतस्त्वत्तो मृत्युं न यास्यति ॥१०॥ इंद्रस्तद्वचो मानयन् तां मार्गे विहाय स्वर्गं ययौ ॥ ११ ॥ ततो नारदो मे मातरमाश्वास्य निजाश्रमं नीत्वा यावत्ते भर्तुरागमनं स्यात्तावत्त्वमिह वसेत्युवाच ॥१२॥ तदा सा तथेत्युक्त्वा निर्भया सती तस्मिन्नारदाश्रम उवास ॥१३॥ गर्भवती सा भर्तुरागमनानंतरं प्रसवार्थं स्वगर्भस्य क्षेमार्थं च भक्त्या तमृ-

व्यलुंपन्राजशिबिरममरा जयकांक्षिणः ॥ इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६ ॥ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ॥ यदृच्छयाऽऽगतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥ प्राह मैनां सुरपते नेतुमर्हस्यनागसम् ॥ मुंच मुंच महाभाग सतीं परपरिग्रहम् ॥ ८ ॥ ॥ इंद्र उवाच ॥ आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ॥ आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं गतः ॥ ९ ॥ नारद उवाच ॥ अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ॥ त्वया न प्राप्स्यते संस्थामनंतानुचरो बली ॥ १० ॥ इत्युक्तस्तां विहायेंद्रो देवर्षेर्मानयन्वचः ॥ अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥ ततो नो मातरमृषिः समानीय निजाश्रमम् ॥ आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः ॥ १२ ॥ तथेत्यवात्सीद्देवर्षेरंति साऽप्यकुतोभया ॥ यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्तत ॥ १३ ॥ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती ॥ अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः ॥ धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम् ॥ १५ ॥ तत्तु कालस्य दीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ॥ ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः ॥ १६ ॥ भवतामपि भूयान्मे यदि श्रद्दधते वचः ॥ वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥ १७ ॥ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः ॥ फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥ आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ॥ अविक्रियः स्वदृग्घेतुर्व्यापकोऽसंग्यनावृतः ॥ १९ ॥ एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ॥ अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥ ॥ ॥

षिं पर्यचरत् ॥१४॥ ऋषिस्तस्याः शोकशांत्यै मामप्युद्दिश्य धर्मस्य भक्तिलक्षणं तत्त्वं ज्ञानं च प्रादात् ॥ १५ ॥ तज्ज्ञानं तु दीर्घकालत्वात् स्त्रीत्वाच्च मातुर्गुप्तं बभूव । ऋषिकृपयानुगृहीतस्य तस्य ज्ञानस्य स्मृतिर्मामद्यापि न जहाति ॥१६॥ अतो यदि मम वचो भवंतः श्रद्दधते तर्हि भवतामपि भक्तिर्ज्ञानं च भूयात् ॥ १७ ॥ अथ देहात्मविवेकप्रकारं दर्शयति । हे मित्राः, कालयोगेन जन्माद्याः षड्विकारा वृक्षे सत्येव यथा फलानां दृश्यंते तद्वदात्मनि तथैव स्थिते सति देहस्य दृष्टाः ॥१८॥ आत्मा तु नित्यः अव्ययः शुद्धः एकः क्षेत्रज्ञः आश्रयः अविक्रियः स्वप्रकाशः हेतुः व्यापकः असंगी अनावृतश्च ॥ १९ ॥ एतैर्द्वादशभिर्लक्षणैरात्मनो देहाद्भेदं ज्ञात्वा देहादावहंममेति मिथ्याबुद्धिं त्यजेत् ॥ २० ॥ ॥ ॥ ॥

यथा स्फुरत्स्वर्णकणेषु पाषाणेषु उपायैर्हेमकारः स्वर्णं प्राप्नुयात् तथा देहेषु ज्ञानप्राप्त्युपायैर्ज्ञानविद्ब्रह्मतां लभते ॥२१॥ अष्टौ[1] प्रकृतयः एकादशेंद्रियाणि पंच महाभूतानि एवं चतुर्विंशतितत्वसहितः पुमान् ॥ २२ ॥ स पुरुषः स्थावरजंगमात्मके देह एव अन्वय[2]व्यतिरेकोपजनितविवेकाच्छुद्धेन मनसा जगत उत्पत्तिस्थितिसंहारानुसंधानेन विचारयद्भिः पुरुषैर्नेति नेतीति वाक्यैर्जडनिरसनेन विमृग्यते ॥२३॥२४॥ विचारप्रकारमेवाह। जाग्रत्स्वप्नसुषुप्तिवृत्तयो बुद्धेर्भवंति। ता येनानुभूयंते स पुरुषः साक्षी ॥ २५ ॥ कर्मजन्यैरेभिर्बुद्धिभेदैरात्मनः स्वरूपं जानीयात् ॥ २६ ॥ बुद्धिद्वारक एव संसारोऽज्ञानमूलो मिथ्या भूतोऽपि पुंसः स्वप्न इव दृश्यते ॥ २७ ॥ तस्माद्भवद्भिरीश्वरे सर्वकर्मनाशको जाग्रदाद्यवस्थारूपबुद्धिप्रवाहोपरमो योगः कर्तव्यः ॥ २८ ॥ यैर्धर्मैर्भगवति रतिर्भवति।

स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ॥ क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥ अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ॥ विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥ देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा ॥ अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् ॥ २३ ॥ अन्वयव्यतिरेकेण विवेकेनोशतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ॥ ता येनैवानुभूयंते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ॥ स्वरूपमात्मनो बुध्येद्गंधैर्वायुमिवान्वयात् ॥ २६ ॥ एतद्द्वारो हि संसारो गुणकर्मनिबंधनः ॥ अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेष्यते ॥ २७ ॥ तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनाम् ॥ बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥ तत्रोपायसहस्राणामयं भगवतोदितः ॥ यदीश्वरे भगवति यथा यैरंजसा रतिः ॥ २९ ॥ गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ॥ संगेन साधुभक्तानामीश्वराराधनेन च ॥ ३० ॥ श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ॥ ३१ ॥ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ॥ इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥ एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ॥ वासुदेवे भगवति यया संलभते रतिम् ॥ ३३ ॥ निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ॥ ३४ ॥ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनम् ॥ मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ॥३५॥ तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः ॥ निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ३६ ॥

तत्रोपायसहस्रेष्वप्ययं श्रेष्ठ उपायो भगवता कथितोऽस्ति ॥ २९ ॥ तत्रैवांतरंगान् धर्मानाह। गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन साधुसंगेनेश्वराराधनेन ॥३०॥ तत्कथायां श्रद्धया तत्पादकमलध्यानात् ॥३१॥ सर्वभूतेषु हरिरास्ते एवं मनसा चिंतयन् सर्वभूतानि साधु मानयेत् ॥३२॥ एवं जितकामक्रोधादिषड्वर्गैर्वासुदेवे भगवति भक्तिः क्रियते। यया भक्त्या हरौ रतिं लभते॥३३॥ हरेर्भक्तवात्सल्यादिगुणान् कर्माणि च श्रुत्वा यदा हर्षेण रोमांचितः सन् गायति रौति नृत्यति॥३४॥हसति आक्रंदते गतलज्जः सन् हे हरे, हे नारायणेति वक्ति च ॥३५॥ तदा पुमान् मुक्तसमस्तबंधनः सन् महीयसा भक्तियोगेन भगवंतं प्राप्नोति ॥३६॥

---

[1] मूलप्रकृतिः। महदहंकारौ। शब्दस्पर्शरूपरसगंधाश्चेत्यष्टौ। [2] मणिषु सूत्रमिव सर्वानुस्यूतत्वेनान्वयः। मणिभ्यः सूत्रस्यैवैकैकव्यतिरेकश्च।

भगवतो मनसा स्पर्शनमेव संसारनिवर्तकं मोक्षसुखरूपं च बुधा विदुः ॥ अतो हृदये ईश्वरं भजध्वम् ॥ ३७ ॥ हे दैत्यबालकाः, हृदि स्थितस्य हरेर्भजने को वा अतिप्रयासोऽस्ति न कोऽपि ॥ ३८ ॥ द्रव्यपुत्रकलत्रादयः क्षणभंगुरायुषो मर्त्यस्य कियत् प्रियं कुर्वंति ॥ ३९ ॥ यथा पुत्रकलत्रादिजनितं सुखं नश्वरमेवं पुण्यार्जितं स्वर्गादिसुखमपि नश्वरम् । तस्मादात्मप्राप्तये भक्त्या हरिं भजत ॥४०॥ अयं नरो यत्संकल्प्य कर्माणि करोति तद्विपरीतं फलं प्राप्नोति ॥ ४१ ॥ इह कर्मिणः सुखाय दुःखमोक्षाय च संकल्पोऽस्ति तथापि यः पूर्वं निरिच्छया सुखयुक्त आसीत्स एवेच्छया दुःखं प्राप्नोति ॥४२॥ पुरुषो यदर्थं कामान् कामयते स देहः पारक्यः[1] क्षणभंगुरो याति प्राप्नोति च ॥४३॥ तदा स्त्रीपुत्रगृहधनादयः पारक्या इति किं वक्तव्यम् ॥ ४४ ॥ एतैर्नश्वरैरनर्थकारकैः स्त्रीपुत्रादिभिर्नित्यानंदमहोदधेः कः स्वार्थः स्यान्न कोऽपि ॥ ४५ ॥ हे असुराः, प्राचीनैः कर्मभिर्गर्भवासादिषु क्लिश्यमानस्य देहिनः पुनः कर्मभिः कियानर्थस्तत्कथ्यताम् ॥४६॥ जीवो देहसंबंधेन कर्माणि करोति पुनः कर्मभिर्देहमुत्पादयति एवमुभयमप्यज्ञानेनैव भवति ॥४७॥ तस्माद्धर्मार्थकामा यत्स्वाधीनास्तं हरिं यूयं भजध्वम् ॥४८॥ हरिः सर्वभूतानामात्मास्ति स एव भूतानामंतर्यामी सन् जीवसंज्ञितो भवति ॥४९॥ असुराणां हरिभजनेऽनधिकार इति न वाच्यम् । यतो देवः असुरः मनुष्यः यक्षः गंधर्वो वा कोऽप्यस्तु स मुकुंदचरणकमलं भजन् स्वस्तिमान् स्यात् । यथा वयम् ॥ ५० ॥ ॥ ॥

अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् ॥ तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३७ ॥ कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः ॥ स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥ रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः ॥ सर्वेऽर्थकामाः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ॥ ३९ ॥ एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ॥ तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥ यदध्यर्थ्येह कर्माणि विद्वन्मान्यसकृन्नरः ॥ करोत्यतो विपर्यासममोघं विंदते फलम् ॥ ४१ ॥ सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः ॥ सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ॥ ४२ ॥ कामान्कामयते काम्यैर्यदर्थमिह पूरुषः ॥ स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ॥ ४३ ॥ किमु व्यवहितापत्यदारागारधनादयः ॥ राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥ किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ॥ अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ॥४५॥ निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः ॥ निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ॥ ४६ ॥ कर्माण्यारभते देही देहेनात्मानुवर्तिना ॥ कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥ ४७ ॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ॥ भजतानीहयात्मानमनीहं हरिमीश्वरम् ॥ ४८ ॥ सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ॥ भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥ ४९ ॥ देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव च ॥ भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयम् ॥५०॥ ॥

---

[1] श्वसृगालादिभक्ष्यः ।

हे दैत्यात्मजाः, द्विजत्वं देवत्वं ऋषित्वं बहुज्ञता दानं तपः यज्ञः शौचं व्रतानि च हरिसंतोषाय न भवंति ॥ ५१ ॥ हरिः केवलया भक्त्या प्रसन्नो भवति ।
अन्यत्सर्वं नटनमात्रम् ॥५२॥ तस्मात्सर्वभूतात्मनीश्वरे हरौ आत्मौपम्येन भूतानि पश्यंतः संतो भक्तिं कुरुत ॥ ५३ ॥ दैत्ययक्षराक्षसस्त्रीशूद्रखगमृगपापजीवा
अपि भक्त्या अच्युततां गताः संति ॥५४॥ गोविंदे एकांतभक्तिः सर्वत्र तदवलोकनं चेत्येतावानेवास्मिन् लोके पुरुषस्य स्वार्थः स्मृतः ॥५५॥ इति श्रीमद्भा-
गवतचू० सप्तम० सप्तमोऽध्यायः ॥७॥ ॥ अष्टमेऽतिरुषा सूनुं निघ्नन् दैत्यो हतः स्वयम् । आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः ॥१॥ नारद उवाच॥
अथ दैत्यसुता निर्दोषं प्रह्लादवाक्यं जगृहुः ॥ गुरुशिक्षितं नैव जगृहुः ॥१॥ तत आचार्यसुतो बालानामीश्वरे तत्परां बुद्धिं दृष्ट्वा भीतः सन् शीघ्रं राज्ञे न्यवेद-

नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः ॥ प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता ॥५१॥ न दानं न तपो नेज्या न शौचं
न व्रतानि च ॥ प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनम् ॥५२॥ ततो हरौ भगवति भक्तिं कुरुत दानवाः॥ आत्मौपम्येन सर्वत्र
सर्वभूतात्मनीश्वरे ॥५३॥ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ॥ खगा मृगाः पापजीवाः संति ह्यच्युततां गताः ॥ ५४ ॥
एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणम् ॥५५॥ इति श्रीम०म०सप्त० प्रह्लादानु-
चरिते दैत्यपुत्रानुशासनं नाम सप्तमोऽध्यायः ॥७॥ ॥ नारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ॥ जगृहुर्नि-
रवद्यत्वान्नैव गुर्वनुशिक्षितम् ॥१॥ अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थिताम् ॥ आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥
श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयम् ॥ कोपावेशचलद्गात्रः पुत्रं हंतुं मनोऽदधे ॥३॥ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हण-
म् ॥ आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥४॥ प्रश्रयावनतं दांतं बद्धांजलिमवस्थितम् ॥ सर्पः पदाहत इव श्वसन्प्रकृति-
दारुणः ॥५॥ हे दुर्विनीत मंदात्मन्कुलभेदकराधम ॥ स्तब्धं मच्छासनोद्भूतं नेष्ये त्वाद्य यमक्षयम् ॥ ६ ॥ क्रुद्धस्य यस्य कंपंते
त्रयो लोकाः सहेश्वराः ॥ तस्य मेऽभीतवन्मूढ शासनं किंबलोऽत्यगाः ॥७॥ प्रह्लाद उवाच ॥ न केवलं मे भवतश्च राजन्स वै बलं
बलिनां चापरेषाम् ॥ परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥ स ईश्वरः काल उरुक्रमोऽसावोजःसहःसत्व-
बलेंद्रियात्मा ॥ स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥९॥ जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व
न संति विद्विषः ॥ ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनंतस्य महत्समर्हणम् ॥ १० ॥ ॥ ॥

यत् ॥२॥ दैत्यस्तद्विप्रियं श्रुत्वा क्रोधावेशेन चलद्गात्रः पुत्रं हंतुं मनो दधे ॥३॥ तदा कठोरवाण्या प्रह्लादं तिरस्कृत्य पापया वक्रदृष्ट्या विलोकयन् ॥४॥ पदा
हतः सर्प इव श्वसन् बद्धांजलिं समीपे स्थितं प्रह्लादं जगाद ॥५॥ हे मंदात्मन्, हे कुलभेदकर, मच्छासनपराङ्मुखं त्वामद्य यमालयं नेष्यामि ॥६॥ यस्य मम
क्रोधात्त्रयो लोकाः कंपंते तस्य मे शासनं कस्य बलेन त्वं त्यक्तवान् तदुच्यताम् ॥७॥ प्रह्लाद उवाच ॥ स ईश्वरः केवलं मे बलं नहि । किंतु तवान्येषां बलि-
नां च बलमस्ति। येन ब्रह्मादयो वशं प्रणीताः ॥८॥ स ईश्वर इदं विश्वं सृजति पाति संहरति च॥९॥ अतस्त्वमात्मन आसुरं स्वभावं त्यज । मनः समं कुरु ।

यतोऽजितान्मनसोऽन्ये शत्रवः केऽपि न संति । सर्वत्र साम्येन मनसो धारणमेव भगवत आराधनं जानीहि ॥१०॥ भवत्सदृशा मंदाः प्रथमं सर्वस्वं हरतः कामादिशत्रून् न जित्वा दश दिशः स्वयं जिता मन्यंते । साधोस्तु स्वाज्ञानकल्पिताः कामादयोऽपि शत्रवो न संति । तदा बाह्याः कुतः स्युः ॥११॥ हिरण्यकशिपुरुवाच । हे मंदात्मन्, निश्चितं त्वं मर्तुकामोऽसि । यतस्त्वममर्यादं विकत्थसे । मरणोन्मुखानामनन्विता वाचः स्युः ॥१२॥ हे मंदभाग्य, त्वया मदन्यो यो जगदीश्वर उक्तः स क्वास्ति । प्रह्लाद आह । स सर्वत्रास्ति । हिरण्यकशिपुराह । यदि सर्वत्रास्ति तर्हि स्तंभे कस्मान्न दृश्यते । प्रह्लादस्तं स्तंभं निरीक्ष्य नमस्यन्नाह दृश्यत इति ॥१३॥ हिरण्यकशिपुस्तमपश्यन्नाह । विपरीतं ब्रुवाणस्य तव शिरो हरामि । त्वां हरिरद्य रक्षतु ॥ १४ ॥ एवं दुरुक्तैः सुतं पीडयन्

दस्यून्पुरा षण्णविजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश ॥ जितात्मनोऽज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥११॥ हिरण्यकशिपुरुवाच ॥ व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ॥ मुमूर्षूणां हि मंदात्मन्ननु स्युर्विप्लवा गिरः ॥१२॥ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः ॥ क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते ॥१३॥ सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ॥ गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् ॥१४॥ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः ॥ खड्गं प्रगृह्योत्पतितो वरासनात्स्तंभं तताडातिबलः स्वमुष्टिना ॥१५॥ तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनांडकटाहमस्फुटत् ॥ यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामाप्ययमंग मेनिरे ॥१६॥ स विक्रमन्पुत्रवधेप्सुरोजसा निशम्य निर्ह्लादमपूर्वमद्भुतम् ॥ अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥ १७ ॥ सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन्स्तंभे सभायां न मृगं न मानुषम् ॥१८॥ स सत्वमेनं परितो विपश्यन्स्तंभस्य मध्यादनुनिर्जिहानम् ॥ नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेंद्ररूपम् ॥१९॥ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम् ॥ प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेसरजृंभिताननम् ॥ २० ॥ करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भृकुटीमुखोल्बणम् ॥ स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ॥ २१ ॥ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षस्थलमल्पमध्यमम् ॥ चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ॥ २२ ॥ ॥ ॥

सन् खड्गं प्रगृह्य सिंहासनादुत्पत्य स्वमुष्टिना स्तंभं तताड ॥१५॥ ततः स्तंभे भीषणः शब्दो जातः । तं श्रुत्वा ब्रह्मादयः स्वस्थाननाशं मेनिरे ॥१६ ॥ पुत्रवधेप्सुर्दैत्यः सभामध्ये नादं श्रुत्वा तस्याश्रयं न ददर्श । येन नादेन सर्वे दैत्यास्त्रासं प्रापुः ॥१७॥ तदा भगवान् स्वसेवकभाषणं सत्यं कर्तुं न मृगं न मानुषं चाद्भुतं रूपं धारयन् सन् सभायां स्तंभं विदार्याऽदृश्यत ॥१८॥ स दैत्यः स्तंभमध्यान्निर्गतं नृमृगेंद्रयोर्मिश्रं रूपं दृष्ट्वा नायं मृगो नापि नरः अहो किमेतदिति विचारं कृतवान् ॥१९॥ एवं भयानकं तन्नृसिंहरूपं मीमांसमानस्य तस्याऽग्रतो नृसिंहरूपो हरिः प्रादुर्भूतः । तदा तप्तसुवर्णलोचनं जृंभिताननम् ॥ २० ॥ करालदंष्ट्रं क्षुरधारावत्तीक्ष्णजिह्वं शंकुवदूर्ध्वकर्णं गिरिगुहावत्प्रसृतमुखम् ॥२१ ॥ दिविस्पृशत्कायं ह्रस्वग्रीवं विशालवक्षःस्थलं कृशोदरं नखायुधं चंद्रकिरण-

वज्रैरै रोमभिर्व्याप्तम् ॥२२॥ ईदृशं नृसिंहं दृष्ट्वा जगाद । अहो महामायिना हरिणायं मम वधोपायश्चिंतितः । अनेन किं स्यान्न किमपि ॥ २३ ॥ एवं ब्रुवन् दैत्यकुंजरो नृसिंहमभ्यपतत् । तदा स नृसिंहतेजसि वह्नौ पतंग इवादृष्टोऽभूत् ॥२४॥ स्वप्रकाशे हरौ तमोमयस्य दैत्यस्यादर्शनमाश्चर्यं नहि । ततो दैत्यो रुषा गदया नृसिंहं जघान ॥२५॥ तदा नृसिंहेन गरुडेण पन्नग इव स दैत्यो गृहीतः सन् हस्ताद्विनिःसृतः ॥ २६ ॥ तदा मेघांतरिता देवा असाध्वमन्यंत । दैत्यो नृसिंहं निजपराक्रमाच्छंकितं मन्यमानः सन् खड्गचर्मणी प्रगृह्य वेगेन तं नृसिंहमभ्यपतत् ॥ २७ ॥ तदा हरिरुच्चस्वरेणाट्टहासं कृत्वा तेन मीलिताक्षं

दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ॥ प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किम् ॥ २३ ॥
एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः ॥ अलक्षितोऽग्नौ पतितः पतंगमो यथा नृसिंहौजसि सोऽसुरस्तदा
॥ २४ ॥ न तद्विचित्रं खलु सत्वधामनि स्वतेजसा यो नु पुराऽपिबत्तमः ॥ ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेग-
या ॥२५॥ तं विक्रमंतं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाऽग्रहीत् ॥ स तस्य हस्तोत्कलितस्तदाऽसुरो विक्रीडतो यद्वदहि-
र्गरुत्मतः ॥२६॥ असाध्वमन्यंत हृतौकसोऽमरा घनच्छदा भारत सर्वधिष्ण्यपाः ॥ तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो
नृहरिं महासुरः ॥ पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥ २७ ॥ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमु-
पर्यधो हरिः ॥ कृत्वाऽट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः ॥२८॥ विष्वक्स्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं
कुलिशाक्षतत्वचम् ॥ द्वार्यूर आपात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम् ॥ २९ ॥ संरंभदुष्प्रेक्ष्यकराललोचनो व्यात्ता-
ननांतं विलिहन्स्वजिह्वया ॥ असृग्लवाक्तारुणकेसराननो यथांत्रमाली द्विपहत्यया हरिः ॥ ३० ॥ नखांकुरोत्पाटितहृत्सरोरुहं
विसृज्य तस्यानुचरानुदायुधान् ॥ अहन्समंतान्नखशस्त्रपार्ष्णिभिर्दोर्दंडयूथोऽनुपथान्सहस्रशः ॥ ३१ ॥ सटावधूता जलदाः परा-
पतन्ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः ॥ अंभोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिग्गिभा विचुक्रुशुः ॥ ३२ ॥ द्यौस्तत्सटोत्क्षिप्त-
विमानसंकुला प्रोत्सर्पत क्ष्मा च पदाऽतिपीडिता ॥ शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ॥ ३३ ॥ ततः
सभायामुपविष्टमुत्तमे नृपासने संहृततेजसं विभुम् ॥ अलक्षितद्वैरथमत्यमर्षणं प्रचंडवक्त्रं न बभाज कश्चन ॥ ३४ ॥ ॥

दैत्यं गृहीत्वा ॥२८॥ सर्पं आखुमिव सभायां द्वार्यूरौ निपात्य तस्य हृदयं संध्यायां नखैर्विददार ॥२९॥ तदा गजवधेन सिंह इव क्रोधावेशेन दुःप्रेक्ष्यनेत्रो हरिः स्वजिह्वया मुखप्रांतौ विलिहन् अंत्रमाली[1] असृग्लवाक्तारुणकेसराननो[2] बभूव ॥ ३० ॥ ततो मृतं दैत्यं विसृज्य धृतायुधान् सहस्रशस्तस्यानुचरान् नखशस्त्रपार्ष्णिभिरहन् ॥३१॥ तदा तस्य सटाभिः कंपिता मेघा व्यशीर्यंत । तद्दृष्ट्या ग्रहा निष्प्रभा अभवन् । श्वासहताः समुद्राश्चुक्षुभुः ॥३२॥ तत्पादपीडिता मही चचाल । तस्य वेगेन शैला उत्पेतुः । तत्तेजसा खं दिशो न रेजिरे॥३३॥ ततः सभायां नृपासने स्थितं उपसंहृततेजसमपि विभुं भयात्कोऽपि समीपं न जगाम ॥३४॥

---

[1] अंत्राणां माला कंठे विद्यते यस्य सः । [2] रक्तस्य बिंदुभिः सिक्ता अत एव अरुणाः केसरा आननं च यस्य सः ।

तदा हरिणा त्रिलोकशत्रुं हतं दृष्ट्वा हर्षिताः सुरस्त्रियः पुष्पैर्हरिं ववृषुः ॥ ३५ ॥ विमानपंक्तिभिराकाशं व्याप्तमासीत् । देवैर्वादिता दुंदुभयो नेदुः । गंधर्वा जगुः । अप्सरसो ननृतुः ॥३६॥ तत्र ब्रह्मेंद्रशिवादयः ऋषयः पितरः सिद्धा विद्याधराः सर्पाः॥३७॥ मनवः प्रजापतयो गंधर्वाश्चारणा यक्षाः किंपुरुषा वैतालाः सिद्धाः किंनराः ॥३८॥ विष्णुपार्षदाश्च बद्धांजलिपुटाः संतो दूरादेव पृथक् पृथक् नृहरिं तुष्टुवुः ॥ ३९ ॥ ब्रह्मोवाच ॥ हे अनंत, अनंतशक्तये विचित्रवीर्याय पवित्रकर्मणे ते नमोऽस्तु ॥४०॥ श्रीरुद्र उवाच ॥ हे भगवन्, ते कोपकालो युगांतोऽस्ति । अयं नहि । अयं तु अल्पोदैत्यो हतः। तस्मात् तत्सुतं स्वभक्तं पाहि ॥४१॥ इंद्र उवाच ॥ हे नृहरे, अस्मान् रक्षता भवता स्वभागा दैत्यादानीताः । अहो कालेन ग्रस्तमिदं जगत्कियदस्ति । त्वद्भक्तानां मुक्तिरपि न बहुमता ।

निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ॥ प्रहर्षवेगोत्कलिताननना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥३५॥ तदा विमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनाम् ॥ सुरानका दुंदुभयोऽथ जघ्निरे गंधर्वमुख्या ननृतुर्जगुः स्त्रियः ॥३६॥ तत्रोपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः ॥ ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥३७॥ मनवः प्रजानां पतयो गंधर्वाप्सरचारणाः ॥ यक्षाः किंपुरुषास्तात वेतालाः सिद्धकिन्नराः ॥३८॥ ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः ॥ मूर्ध्नि बद्धांजलिपुटा आसीनं तीव्रतेजसम् ॥ ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥ ३९ ॥ ब्रह्मोवाच ॥ नतोऽस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे ॥ विश्वस्य सर्गस्थितिसंयमान्गुणैः स्वलीलया संदधतेऽव्ययात्मने ॥ ४० ॥ श्रीरुद्र उवाच ॥ कोपकालो युगांतस्ते हतोऽयमसुरोऽल्पकः ॥ तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ॥४१॥ इंद्र उवाच ॥ प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रत्यबोधि ॥ कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां नहि बहु मता नारसिंहापरैः किम् ॥४२॥ ऋषय ऊचुः ॥ त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज ॥ तद्विप्रलुप्तममुनाद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४३ ॥ पितर ऊचुः ॥ श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलांबु ॥ तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ४४ ॥ सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहारषीद्योगतपोबलेन ॥ नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ ४५ ॥ विद्याधरा ऊचुः ॥ विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥ ४६ ॥ ॥

तत्र स्वर्गादिभिः किम् । अत इत ऊर्ध्वं क्रोधं संहर ॥४२॥ ऋषय ऊचुः ॥ हे शरणपालक, त्वं नो यत्तप आत्थ तदनेन दैत्येन कुंठितमासीत् । तं दैत्यं हत्वा पुनरपि तपः कुरुतेत्यस्माकमाज्ञां कृतवानसि तस्मै ते नमः ॥४३॥ पितर ऊचुः । अस्माकं पुत्रादिभिः श्रद्धया दत्तानि पिंडतिलोदकादीनि यो बलाद्बुभुजे। तस्योदरात्तानि य आहृतवान् तस्मै ते नमः ॥४४॥ सिद्धा ऊचुः ॥ योऽस्माकं योगसिद्धामणिमादिसिद्धिं हृतवान् तं गर्वितं भवान्नखैर्विददार । तस्मै ते नमः ॥४५॥ विद्याधरा ऊचुः ॥ यो नो धारणया प्राप्तां विद्यां न्यषेधत् । स एव पशुवत्त्वया हतः । त्वां मायानृसिंहं नताः स्मः ॥ ४६ ॥ ॥ ॥

नागा ऊचुः ॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षःपाटनेनासां दत्तानंद नमोऽस्तु ते ॥ ४७ ॥ मनव ऊचुः ॥ मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः ॥ भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ॥४८॥ प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वया भिन्नवक्षा नु शेते जगन्मंगलं सत्वमूर्तेऽवतारः ॥ ४९ ॥ गंधर्वा ऊचुः ॥ वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः ॥ स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ५० ॥ चारणा ऊचुः ॥ हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः ॥ यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः ॥ ५१ ॥ यक्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ॥ स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पंचविंश ॥५२॥ किंपुरुषा ऊचुः ॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः ॥ अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥५३॥ वैतालिका ऊचुः ॥ सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे ॥ यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवान्यथाऽऽमयः ॥५४॥ किन्नरा ऊचुः ॥ वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिमसुनाऽनु कारिताः ॥ भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ॥५५॥ विष्णुपार्षदा ऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म ॥ सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥५६॥ इति श्रीमद्भागवते म० सप्तमस्कंधे प्रह्लादानुचरिते दैत्यराजवधे नृसिंहस्तवो नामाष्टमोऽध्यायः ॥ ८ ॥

नागा ऊचुः ॥ येन नः फणासु स्थितानि रत्नानि स्त्रीरत्नानि च हृतानि । तद्वक्षोविदारणेनास्माकं स्त्रीणां च त्वयाऽऽनंदो दत्तः । तस्मै ते नमः ॥४७॥ मनव ऊचुः । तवाज्ञाकारिणो वयं धर्मपालका मनवः स्मः । येन नो मर्यादा हृता । स दैत्यस्त्वया हतः । हे प्रभो, पुनश्च नः किंकरान् त्वं शिक्षय ॥४८॥ प्रजापतय ऊचुः ॥ हे परेश, वयं प्रजापतयः स्मः । येन प्रजासर्गो निषिद्धः । स दैत्यस्त्वया हतः सन् शेते। अतः परं तवाज्ञया प्रजाः सृजामः । हे सत्वमूर्ते, तवायमवतारो जगतो मंगलरूपोऽस्ति ॥४९॥ गंधर्वा ऊचुः । हे प्रभो, त्वदीया वयं गंधर्वाः । येन स्ववशे कृताः । स त्वया मृत्युं नीतः । इदं योग्यं जातम् ॥ ५० ॥ चारणा ऊचुः ॥ हे हरे, त्वया साधुभयजनकोऽयं दैत्यो हतः । अतो वयं तव चरणकमलं मोक्षायाश्रिताः स्मः ॥५१॥ यक्षा ऊचुः ॥ वयं दैत्येन शिबिकावाहकत्वं प्रापिताः । स त्वया मृत्युं नीतः ॥५२॥ किंपुरुषा ऊचुः॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः । अयं कुपुरुषस्त्वया हतः॥५३॥ वैतालिका ऊचुः ॥ हे भगवन्, वयं सभासु यज्ञेषु च तव निर्मलं यशो गीत्वा महतीं पूजां लभामहे । तां यो हृतवान् स त्वया हतः । एतद्दिष्ट्या ॥ ५४ ॥ किंनरा ऊचुः ॥ हे हरे। तव सेवकाः किंनरा वयं दैत्येन विष्टिं निरंतरं कारिताः । स त्वया हतः । हे नाथ, त्वं नः समृद्धये भव ॥५५ ॥ विष्णुपार्षदा ऊचुः ॥ हे भगवन्, लोकानां मंगलदमिदं तव नृसिंहरूपमद्यैवास्माभिर्दृष्टं न तु पूर्वम् । हे ईश, सोऽयं ते किंकरो विप्रशप्तस्तस्येदं मारणं तस्यैवानुग्रहायेति वयं विद्मः ॥ ५६ ॥ इति श्रीमद्भागवतचूर्णिकायां सप्तमस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥ ॥ ॥

नवमे ब्रह्मणा भीत्या चोदितोऽसुरबालकः । कोपं प्रशमयन्नस्तौन्नृसिंहमतिभीषणम् ॥१॥ उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी ॥ केसरीव स्वपोतानामन्येषामुग्रविग्रहः ॥२॥ नारद उवाच ॥ एवं दूरतः स्थित्वा स्तुवंतो ब्रह्माद्या देवास्तत्समीपे गंतुं नाशकन् ॥१॥ तदा देवैः प्रेषिता लक्ष्मीस्तदद्भुतं रूपं दृष्ट्वा शंकिता सती समीपं न जगाम ॥२॥ ततो ब्रह्मा स्वसमीपे स्थितं प्रह्लादं जगाद। हे वत्स, तव पित्रे कुपितं प्रभुं प्रशमय । इत्युक्त्वा तं देवसमीपं प्रेषयामास ॥३॥ प्रह्लादस्तथेत्युक्त्वा शनैः समीपं गत्वा कृतांजलिः सन् भुवि कायेन ननाम ॥४॥ नृहरिः स्वपादमूले पतितं बालं विलोक्य कृपया तमुत्थाप्य तन्मस्तके करांबुजं दधौ ॥५॥ तदा भगवत्करस्पर्शाद्गतसर्वपापः प्राप्तज्ञानो हृष्टरोमाऽश्रुलोचनस्तच्चरणकमलं हृदये दधौ ॥६॥ तत एकाग्रमनसा तन्न्यंस्तहृदयेक्षणः सन् प्रेमगद्गदया वाचा हरिं तुष्टाव ॥७॥ प्रह्लाद उवाच ॥ ब्रह्मादयः सुरगणा मुनयः सिद्धा बहुभिर्ज्ञानादिगुणैरपि यमाराधयितुमशक्ताः स हरिरसुरजातेर्मम कथं संतोषं प्राप्तुमर्हति ॥८॥ किंच । धनं सत्कुले जन्म सौंदर्यं तपः पांडित्यं इंद्रियनैपुण्यं कांतिः प्रतापः शारीरशक्तिः उद्योगः प्रज्ञा अष्टांगयोगश्चेत्येते द्वादशाऽपि गुणा ईश्वरस्याराधनाय न भवंतीत्येवमहं मन्ये । यतः केवलभक्त्यैव हरिर्गजेंद्राय तुष्टोऽभवत् ॥ ९ ॥ द्वादशगुणयुक्तादपि भगवच्चरणारविंदविमुखाद्विप्रात् भक्तियुक्तं चांडालं श्रेष्ठं मन्ये । यतः स सर्वं कुलं पुनाति ॥ १० ॥ अयं प्रभुरज्ञजनादात्मनः पूजां नेच्छति । यतोऽयं निजलाभेन पूर्णोऽस्ति । यद्यद्वस्तु भगवते समर्पयति तत्तदात्मन एव भवति । यथा मुखे कृतैव तिलकादिशोभा प्रतिबिंबस्य भवति तद्वत् ॥ ११ ॥ ॥ ॥

॥ नारद उवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसुराः ॥ नोपेतुमशकन्मन्युसंरंभं सुदुरासदम् ॥ १ ॥ साक्षाच्छ्रीः प्रेषिता देवै-
र्दृष्ट्वा तन्महदद्भुतम् ॥ अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता ॥ २ ॥ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके ॥ तात प्रशमः
योपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥ तथेति शनकै राजन्महाभागवतोऽर्भकः ॥ उपेत्य भुवि कायेन ननाम विधृतांजलिः
॥ ४ ॥ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ॥ उत्थाप्य तच्छीर्ष्ण्यदधात्करांबुजं कालाहिवित्रस्तधियां
कृताभयम् ॥ ५ ॥ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ॥ तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्न-
हृदश्रुलोचनः ॥ ६ ॥ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः ॥ प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥ प्रह्लाद उवाच ॥
ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्वैकतानमतयो वचसां प्रवाहैः ॥ नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स
मे हरिरुग्रजातेः ॥ ८ ॥ मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनाय हि भवंति परस्य पुंसो
भक्त्या तुतोष भगवान्गजयूथपाय ॥ ९ ॥ विप्राद्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचं वरिष्ठम् ॥ मन्ये तदर्पितम-
नोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः ॥ १० ॥ नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो
वृणीते ॥ यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ ११ ॥ ॥ ॥

---

१ तस्मिन्नेव नृसिंहे न्यस्तं हृदयमीक्षणं च येन सः ।

अहं नीचोऽपि यथामति तस्य महिमानं वर्णयायामि । येन वर्णितेन पुमान् पूयेत ॥१२॥ हे ईश, अमी बिभ्यतः सर्वे ब्रह्मादयस्तव भक्ता एव संति । न तु वयमिव वैरभावेन भक्ताः । तव रुचिरावतारैः क्रीडा जगतः क्षेमाय । न तु भयोत्पादनाय ॥१३॥ अत एषां भयपरिहाराय त्वं मन्युमुपसंहर । यदर्थं मन्युर्धृतः स च दैत्योऽधुनैव त्वया हतः । परोपद्रवकारिणो वृश्चिकादेर्वधेन तस्यैव तद्भद्रं जातमिति साधुरपि मोदेतैव । लोकाश्च सुखं प्राप्ताः संतः क्रोधोपशमं प्रतीक्षंते । एतद्रूपस्य स्मरणादेव जनानां भयनिवृत्तिर्भवेत् ॥१४॥ हे अजित, अस्मादतिभयंकरादपि ते रूपादहं न बिभेमि ॥१५॥ किंतु हे दीनवत्सल, स्वकर्मभिर्बद्धोऽहं संसारदुःखाद्बिभेमि । कदा नु त्वं प्रीतः सन् तव चरणकमलंप्रति मामाह्वयसि ॥१६॥ दास्ये सति मत्प्रीतिरिति चेत्तर्हि हे भूमन्, अहं ज-

तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम् ॥ नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥१२॥ सर्वे ह्यमी विधिकरास्तव सत्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः ॥ क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः ॥१३॥ तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ॥ लोकाश्च निर्वृतिमिताः प्रतियंति सर्वे रूपं नृसिंह विभयाय जनाः स्मरंति ॥ १४ ॥ नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ॥ आन्त्रस्रजः क्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥१५॥ त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः ॥ बद्धः स्वकर्मभिरुशत्तम तेंऽघ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥ १६ ॥ यस्मात्प्रियाप्रियवियोगसयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः ॥ दुःखौषधं तदपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगम् ॥१७॥ सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिंचगीताः ॥ अंजस्तितर्म्यनुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससंगः ॥१८॥ बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः ॥ तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टस्तावद्विभो तनुभृतां त्वदुपेक्षितानाम् ॥१९॥ यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा ॥ भावः करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्वरूपम् ॥२०॥ माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः ॥ छंदोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥ २१ ॥ ॥

न्ममरणाभ्यां दह्यमानः सन् देहाद्यभिमानेन मोहं प्राप्य नानायोनिषु भ्रमामि । अतो मोहनाशकरं तव दास्ययोगं मे वद ॥ १७ ॥ हे नृसिंह, अहं त्वद्दासः सन् तव लीलाकथा अनुगृणन् सत्समागमं कृत्वा महादुःखानि न गणयिष्यामि ॥१८॥ हे नृसिंह, बालस्य पितरौ रक्षकौ न भवतः । यतस्ताभ्यां पाल्यमानस्यापि दुःखदर्शनात् । समुद्रे मज्जतो नौ रक्षका न भवति । कदाचित्तया सहापि मज्जनदर्शनात् । अतः सर्वत्र त्वमेव रक्षकोऽसि ॥१९॥ हे भगवन्, यश्च क्वचित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षको दृश्यते सोऽपि तत्तद्रूपेण सर्वात्मकः सप्तविभक्त्यर्थरूपस्त्वमेवासि ॥ २० ॥ हे अज, त्वदंशस्य पुरुषस्येक्षणरूपानुग्रहेण माया कर्ममयं दुर्जयं षोडशविकारात्मकं मनः सृजति । तत्संसारचक्रात्मकं मनस्त्वामभजन् कोऽतितरेन्न कोऽपि ॥ २१ ॥ ॥ ॥

स त्वं हि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः ॥ चक्रे विसृष्टमजयेश्वर षोडशारे निष्पीड्यमानमुपकर्ष विभो प्रपन्नम् ॥२२॥ दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान्जनोऽयम् ॥ येऽस्मत्पितुः कुपितहासविजृंभितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥२३॥ तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैंद्रियमाविरिंचात् ॥ नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वम् ॥२४॥ कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ॥ निर्विद्यते न तु जनो यदपीति विद्वान्कामानलं मधुलवैः शमयन्दुरापैः॥२५॥ क्वाहं रजःप्रभव ईश तमोऽधिकेऽस्मिन्जातः सुरेतरकुले क्व तवानुकंपा ॥ न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥२६॥ नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथापि ॥ संसेवया सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न परावरत्वम् ॥२७॥ एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगात् ॥ कृत्वाऽऽत्मसात्सुरर्षिणा भगवन्गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवाम्॥२८॥ मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ॥ खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ २९ ॥ एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यसि मध्यतश्च ॥ सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः॥३०॥ त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था ॥ यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वै तदेव वसुकालवदष्टितर्वोः॥ ३१ ॥ न्यस्येदमात्मनि जगद्विलयांबुमध्ये शेषेऽत्मना निजसुखानुभवो निरीहः ॥ योगेन मीलितदृगात्मनि पीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युंक्षे ॥ ३२ ॥ ॥

अतः सर्वनियंता त्वं संसारचक्रे इक्षुदंडवन्निष्पीड्यमानं प्रपन्नं मां स्वसमीपं नय ॥२२॥ हे विभो, मया स्वर्गे या लोकपालानां संपदो दृष्टास्ताः सर्वा अस्मत्पितुः कोपेन विध्वस्ताः । स च त्वया हतः ॥२३॥ तस्माद्ब्रह्मपदमभिव्याप्य स्थितान् भोगानहं नेच्छामि । तथा कालेन विध्वस्ता अणिमादिसिद्धीरपि नेच्छामि । अतो मां स्वसेवकसांनिध्यं नय ॥२४॥ किंच कर्णप्रिया मृगतृष्णारूपाः संपत्तयः क्व । रोगाणामुत्पत्तिस्थानं कलेवरं च क्व । एवं जानन्नपि जनः कामाग्निं दुःसाध्यैः सुखलेशैः शमयन् सन् विरक्तो न भवति ॥२५॥ तमोगुणाऽधिकेऽसुरकुले जातोऽहं क्व । तव कृपा च क्व । यया कृपया ब्रह्मादीनां शिरसि यो नैवार्पितः स पुरुषार्थरूपः करस्त्वया मे शिरस्यर्पितः ॥ २६ ॥ ब्रह्मादय उत्तमा अयमसुरो नीच इत्येषा प्राकृतस्य बुद्धिर्भवतो नैव स्यात् । सेवकेच्छानुसारेण कल्पवृक्षस्येव ते प्रसादो भवति ॥२७॥ हे नरसिंह, यथा त्वया अनुकंपितोऽस्मि एवं नारदेन पूर्वमनुगृहीतोऽस्मि । सोऽहं कथं नु तव भृत्यसेवां विसृजामि ॥२८॥ हे अनंत, मत्प्राणरक्षणं मत्पितुर्वधश्चेति यद्द्वयं त्वया कृतं तत्स्वभृत्यऋषिवाक्यं सत्यं कर्तुं कृतमिति मन्ये ॥२९॥ त्वं जगत आदिमध्यावसानेषु स्थित एक एव जगत्सृष्ट्वा तदनु प्रविष्टः सन् रक्षक इव हंतेव च प्रतीयसे ॥३०॥ इदं कार्यकारणात्मकं जगत्त्वमेवासि । न त्वत्तः पृथक् । त्वं तु ततोऽन्यः । अतः स्वः पर इति या बुद्धिः सा मायैव ॥३१॥ यस्त्वं प्रलय इदं जगदात्मनि निक्षिप्य निरीहोऽवस्थात्रयातीतः सन् प्रयलोदके शयनं करोषि ॥ ३२ ॥

तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढम् ॥ अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावट-
वन्महाब्जम् ॥३३॥ तत्संभवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिंत्य ॥ नाविंददब्दशतमप्सु निमज्जमा-
नो जातेऽकुरे कथमुहोपलभेत बीजम् ॥ ३४ ॥ स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः ॥
त्वामात्मनीश भुवि गंधमिवातिसूक्ष्मं भूतेंद्रियाशयमये विततं ददर्श ॥ ३५ ॥ एवं सहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनय-
नाभरणायुधाढ्यम् ॥ मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिंचः ॥ ३६॥ तस्मै भवान्हयशिरस्तनुवं च बिभ्र-
द्वेदद्रुहावतिबलौ मधुकैटभाख्यौ ॥ हत्वानयच्छ्रुतिगणांस्तु रजस्तमश्च सत्वं तव प्रियतमां तनुमामनंति ॥३७ ॥ इत्थं नृतिर्यगृ-
षिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् ॥ धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम्
॥३८॥ नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रम् ॥ कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं
विमृशामि दीनः ॥३९॥ जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक्
क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ॥४० ॥ एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतम् ॥
पश्यन्जनं स्वपरविग्रहवैरमैत्रं हंतेति पारचर पीपृहि मूढमद्य ॥४१॥ को न्वत्र तेऽखिलगुरो भगवन्प्रयास उत्तारणेऽस्य भवसंभव-
लोपहेतोः ॥ मूढेषु वै महदनुग्रह आर्तबंधो किं तेन ते प्रियजनाननुसेवतां नः ॥ ४२ ॥ नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वी-
र्यगायनमहामृतमग्नचित्तः ॥ शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ॥ ४३ ॥ ॥

तस्यैव तवेदं जगत्स्वरूपमस्ति । त्वन्नाभेः सकाशात्सूक्ष्माद्वटबीजान्महावट इव लोककमलं बभूव ॥३३॥ तत्संभवो ब्रह्मा कमलादन्यदपश्यमानः सन् त्वां बीजमात्मनि स्थितमपि नापश्यत् ॥ ३४ ॥ तदा विस्मितः स ब्रह्मा कमलमास्थितः सन् तपसा शुद्धचित्तो भूत्वा त्वामात्मनि स्थितं ददर्श ॥ ३५ ॥ ततो बहिः स्थितं च सहस्रमुखचरणशिरआदिकं सर्वभूषणायुधैर्युक्तं त्वां दृष्ट्वा विरिंचो मुदमाप ॥ ३६ ॥ तदा त्वं हयग्रीवमूर्तिं धृत्वा मधुकैटभौ दैत्यौ हत्वा तस्मै ब्रह्मणे श्रुतिगणान् समर्पितवान् ॥ ३७ ॥ एवं त्वं राममत्स्याद्यवतारैर्लोकान् धर्मं च पालयसि दुष्टान् हंसि च ॥ ३८ ॥ हे विकुंठनाथ, हर्षशोकादिभिर्दुःखितं कामातुरं मम मनस्तव कथासु न प्रीतिं करोति । एवंभूते मनसि सति दीनोऽहं तव तत्त्वं कथं विचारयामि ॥३९ ॥ हे अच्युत, जिव्हा शिश्न उदरं कर्णौ नासिका चक्षुः कर्मेंद्रियाणि च बह्व्यः सपत्न्यः पतिमिव मां त्रोटयंति ॥४०॥ हे प्रभो, भववैतरण्यां[1] पतितं जनं हे पारचर[2], त्वं वैतरणीमुत्तार्य पालय ॥४१॥ हे अखिलगुरो, भगवन्, सर्वजनोत्तारणे ते को नु प्रयासः न कोऽपि । मूढेष्वेव तवानुग्रहो योग्यः । त्वद्भक्तसेवकानामस्माकं तेनोत्तारणेन किम् ॥४२॥ हे सर्वोत्तम, त्वत्कथामृतमग्नचित्तोऽहं वैतरण्याः सकाशान्न बिभेमि । किंतु त्वत्कथाविमुखान् मूढान् जनान् शोचामि ॥ ४३ ॥ ॥ ॥

---

१ वैतरणी यमद्वारनदी । २ तस्याः पारे स्थित–नित्यमुक्त ।

एतान् कृपणान् विहायाहं मुक्तिमपि नेच्छामि । अस्य जनस्य त्वत्तोऽन्यं रक्षकमहं न पश्यामि ॥ ४४ ॥ यन्मैथुनादि गृहस्थाश्रमसुखं तत्तुच्छं कंडूयनेन खर्जूवत् दुःखमनु दुःखरूपं च । तथापि कामुकास्तस्मिन् गृहमेधिसुखे न तृप्यंति ॥ ४५ ॥ मौनं व्रतानि श्रवणं तपः वेदाध्ययनं स्वधर्मः ग्रंथव्याख्यानं एकांतवासः जपः समाधिश्चेति दश धर्मा मोक्षहेतवोऽपि दांभिकानां कदाचिज्जीवनोपाया भवंति ॥४६॥ हे प्रभो, अरूपस्यापि ते इमे कार्यकारणे द्वे रूपे वेदेन प्रकाशिते स्तः। तयोर्मध्ये योगिनस्त्वां दारुष्वग्निमिव पश्यंति ॥४७॥ हे हरे, यत्पंचमहाभूतप्राणेंद्रियहृदयादि मनोवचोभ्यां प्रकाशितं तत्सर्वं त्वमेवासि॥४८॥ एते महत्तत्वादयस्तद्देवताश्च सोपाधय आद्यंतवंतः संति अतो निरुपाधिमनाद्यनंतं त्वां न विदंति। एवं विचार्य ज्ञानिनस्त्वामेव समाधिनोपासते ॥ ४९ ॥ हे सर्वश्रेष्ठ, अयं जनः नम-

प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति विजने न परार्थनिष्ठाः ॥ नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥४४॥ यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःखदुःखम् ॥ तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसिजं विषहेत धीरः ॥ ४५ ॥ मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ॥ प्रायः परं पुरुष ते त्वजितेंद्रियाणां वार्ता भवंत्युत न वात्र तु दांभिकानाम् ॥ ४६॥ रूपे इमे सदसती तव वेदसृष्टे बीजांकुराविव न चान्यदरूपकस्य ॥ युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥४७॥ त्वं वायुरग्निरवनिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च ॥ सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ ४८॥ नैते गुणानगुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः ॥ आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधियो विरमंति शब्दात् ॥४९ ॥ तत्तेऽर्हत्तम नमःस्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ॥ संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः परमहंसगतौ लभेत ॥ ५० ॥ नारद उवाच ॥ एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ॥ प्रह्रादं प्रणतं प्रीतो यतमन्युरभाषत ॥५१॥ श्रीभगवानुवाच ॥प्रह्राद भद्र भद्रं ते प्रीतोऽहं तेऽसुरोत्तम ॥ वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥५२॥ मामप्रीणत आयुष्मन्दर्शनं दुर्लभं हि मे ॥ दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ॥५३॥ प्रीणंति ह्यथ मां धीराः सर्वभावेन साधवः ॥ श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम् ॥ ५४॥ एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ॥ एकांतित्वाद्भगवति नैच्छत्तानसुरोत्तमः ॥५५॥ इति श्रीमद्भागवते महा० सप्त० प्रह्रादचरिते भगवत्स्तवो नाम नवमोऽध्यायः ॥ ९ ॥

स्कारः स्तुतिः सर्वकर्मार्पणं परिचर्या चरणस्मृतिः कथाश्रवणं चेत्येवं षडंगया सेवया विना त्वयि भक्तिं कथं लभेत। यस्मादेवं भक्तिं विना न मोक्षः न च भक्तिः सेवया विना। अतः प्राक् प्रार्थितं त्वद्दास्ययोगमेव देहि ॥५०॥ नारद उवाच॥ एवं प्रह्रादेन स्तुतः प्रीतो नृहरिः शांतक्रोधः सन् तमभाषत॥५१॥ श्रीभगवानुवाच॥ हे प्रह्राद, तव भद्रमस्तु। अहं ते प्रीतोऽस्मि। त्वमभीष्टं वरं वृणीष्व ॥५२॥ अभक्तस्य मे दर्शनं दुर्लभम्। जंतुर्मां दृष्ट्वा पुनरपूर्णकामत्वेन शोचितुं नार्हति ॥५३॥ अतः श्रेयस्कामाः साधवः सर्वभावेन मां तोषयंति ॥५४॥ एवं लोकप्रलोभनैर्वरैः प्रलोभ्यमानोऽप्येकांतभक्तः प्रह्रादस्तान् वरान्नैच्छत् ॥५५॥ इति श्रीम०चू०सप्त०नवमोऽध्यायः॥९॥

दशमे त्वनुगृह्यामुं भक्तमंतर्हिते हरौ । प्रसंगाद्धरिणा रुद्रे कृतोऽनुग्रह ईर्यते ॥ १ ॥ नारद उवाच ॥ प्रह्लादस्तद्वरप्रदानादिकं सर्वं भक्तियोगस्य विघ्नकरं ज्ञात्वा नृसिंहं प्रत्याह ॥१॥ प्रह्लाद उवाच ॥ हे नृहरे, अहं मुमुक्षुस्त्वामुपाश्रितः । अतो मां वरैर्मा प्रलोभय ॥२॥ हे भगवन्, त्वं भक्तलक्षणपरीक्षार्थं संसारबीजेषु कामेषु भक्तं योजयसि ॥३॥ यः सेवकस्त्वत्तः कामान्वांछते स सेवको न किंतु वणिक् ॥ ४ ॥ यः स्वामी भृत्यात्सेवामिच्छन् तस्मै धनादि ददादि स स्वाम्यपि नहि किंतु व्यापारी ॥५॥ अहं तु निष्कामस्त्वद्भक्तः । त्वं च मत्तः सेवाभिलाषरहितः स्वामी । अत आवयो राजसेवकयोरिव प्रयोजनं नास्ति ॥ ६ ॥ हे वरदर्षभ, यदि मे वरान् दास्यसि तर्हि मम हृदि कामानामनुत्पत्तिं भवतो वरं वृणे ॥७॥ कामस्योत्पत्त्या सत्यधर्मधैर्यविवेकादयो गुणा नश्यंति ॥८॥ मनुष्यो मनः-

॥ नारद उवाच ॥ भक्तियोगस्य तत्सर्वमंतरायतयार्भकः ॥ मन्यमानो हृषीकेशं स्मयमान उवाच ह ॥१॥ प्रह्लाद उवाच ॥ मा मां प्रलोभयोत्पत्त्याऽसक्तं कामेषु तैर्वरैः ॥ तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ॥२॥ भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् ॥ भवान्संसारबीजेषु हृदयग्रंथिषु प्रभो ॥ ३ ॥ नान्यथा तेऽखिलगुरो घटेत करुणात्मनः ॥ यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ॥४॥ आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ॥ न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः ॥५॥ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ॥ नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ६ ॥ यदि रासीश मे कामान्वरांस्त्वं वरदर्षभ ॥ कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् ॥ ७ ॥ इंद्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ॥ ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ॥ ८ ॥ विमुंचति यदा कामान्मानवो मनसि स्थितान् ॥ तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते ॥ ९ ॥ नमो भगवते तुभ्यं पुरुषाय महात्मने ॥ हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥ १० ॥ नृसिंह उवाच ॥ नैकांतिनो मे मयि जात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः ॥ अथापि मन्वंतरमेतदत्र दैत्येश्वराणामनुभुंक्ष्व भोगान् ॥ ११ ॥ कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकम् ॥ सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥ १२ ॥ भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ॥ कीर्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबंधः ॥ १३ ॥ य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः ॥ त्वां च मां च स्मरन्काले कर्मबंधात्प्रमुच्यते ॥ १४ ॥ प्रह्लाद उवाच ॥ वरं वरय एतत्ते वरदेशान्महेश्वर ॥ यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ॥१५॥ ॥ ॥

स्थितान् कामान् यदा मुंचति तर्ह्येव त्वत्समानैश्वर्याय योग्यो भवति।९।भगवतेऽद्भुतनृसिंहाय ब्रह्मणे परमात्मने तुभ्यं नमः।१०।नृसिंह उवाच॥ममैकांतभक्ता वरान् नैव वांछंति। अथापि त्वं एतन्मन्वंतरं दैत्येश्वराणां भोगान् भुंक्ष्व॥११॥ मदीयाः कथाः सेवमानः सर्वभूतस्थं मां मनसि कृत्वा मय्यर्पणेन कर्माणि कुर्वन् मां यजस्व ॥१२॥ सुखानुभवेन पुण्यं पुण्याचरणेन पापं च हित्वा भुवि सत्कीर्तिं विस्तार्य कालेन कलेवरं हित्वा मुक्तबंधः सन् मां प्राप्स्यसि ॥१३॥ हे प्रह्लाद, त्वया कृतमिदं स्तोत्रं त्वां च मां च इदं मच्चरितं च यः स्मरन् कीर्तयेत् स कर्मबंधान्मुच्यते ॥१४॥ प्रह्लाद उवाच ॥ हे हरे, मम पिता तवैश्वरं तेजोऽजानन् त्वाम-

निंदत् ॥१५॥ हिरण्याक्षवधकरणाद्धेतोस्त्वयि द्वेषकर्ता मयि च द्रोहकर्ता ॥१६॥ स मे पिता पूतो भवतु इममन्यं वरं वृणे ॥१७॥ श्रीभगवानुवाच ॥ वत्स, तव पितैकविंशत्या पितृभिः सह पूतः। यतस्तस्य कुले त्वं साधुर्जातः ॥१८॥ हे प्रह्लाद, यत्र यत्र मद्भक्ता वसंति ते कीकटा अपि देशाः शुद्धा भवंति ॥१९॥ लोके मद्भक्ता उच्चावचेषु भूतेषु न किंचन हिंसंति ॥ २० ॥ ये पुरुषास्त्वामनुगतास्तेऽपि मद्भक्ता भवंति । अतो मद्भक्तानां मध्ये त्वं श्रेष्ठोऽसि ॥ २१ ॥ हे अंग, मदंगस्पर्शनेन पूतस्य तव पितुः प्रेतकार्याणि त्वं कुरु ॥२२॥ पितुः सिंहासनं चातिष्ठ । ततो मत्परः सन् कर्माणि कुरु ॥२३॥ श्रीशुक उवाच ॥ हे राजन्, प्रह्लादोऽपि

विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुम् ॥ भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् ॥ १६ ॥ तस्मात्पिता मे पूयेत दुरंताद्दुस्तरादघात् ॥ पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल ॥ १७॥ श्रीभगवानुवाच ॥ त्रिःसप्तभिः पिता पूतः पितृभिः सह तेऽनघ ॥ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥ १८ ॥ यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शिनः ॥ साधवः समुदाचारास्ते पूयंत्यपि कीकटाः ॥ १९ ॥ सर्वात्मना न हिंसंति भूतग्रामेषु किंचन ॥ उच्चावचेषु दैत्येंद्र मद्भावेन गतस्पृहाः ॥ २० ॥ भवंति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ॥ भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २१ ॥ कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ॥ मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः ॥ २२ ॥ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ॥ मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥ २३ ॥ नारद उवाच ॥ प्रह्लादोऽपि तथा चक्रे पितुर्यत्सांपरायिकम् ॥ यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः ॥ २४ ॥ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् ॥ स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २५ ॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज ॥ दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः ॥२६ ॥ योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ॥ तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २७ ॥ दिष्ट्यास्य तनयः साधुर्महाभागवतोऽर्भकः ॥ त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना ॥ २८ ॥ एतद्वपुस्ते भगवन्ध्यायतः प्रयतात्मनः ॥ सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः ॥ २९ ॥ नृसिंह उवाच ॥ मैवं वरोऽसुराणां ते प्रदेयः पद्मसंभव ॥ वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ ३० ॥ ॥ नारद उवाच ॥ इत्युक्त्वा भगवान्राजंस्तत्रैवांतर्दधे हरिः ॥ अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३१ ॥ ततः संपूज्य शिरसा ववंदे परमेष्ठिनम् ॥ भवं प्रजापतीन्देवान्प्रह्लादो भगवत्कलाः ॥ ३२ ॥ ॥ ॥

पितुरौर्ध्वदेहिकं चक्रे । द्विजैश्च स राज्येऽभिषिक्तः ॥२४॥ तदा देवादिभिः सहितो ब्रह्मा प्रसन्नं नृहरिं दृष्ट्वा प्राह ॥२५॥ ब्रह्मोवाच ॥ हे देवदेव, लोकसंतापकरोऽयमसुरस्त्वया हत एतद्दिष्ट्या ॥२६॥ योऽसौ मम सृष्टिभिरवध्यत्वं प्राप्य तपोयोगसामर्थ्येन धर्मान्नाशितवान् ॥२७॥ त्वद्भक्तोऽयमर्भकस्त्वया मृत्योर्मोचित इदमपि भद्रं जातम् ॥२८॥ एतत्तव वपुर्ध्यायतो नरस्य सर्वभयेभ्यो रक्षकं भविष्यति ॥१९॥ नृसिंह उवाच ॥ हे कमलसंभव, सर्पाणाममृतं यथा न देयं तथा त्वयाऽसुराणामेवं वरो न देयः ॥३०॥ नारद उवाच ॥ हे राजन्, भगवानित्युक्त्वा ब्रह्मणा पूजितः सन् तत्रैवांतर्दधे ॥३१ ॥ ततः प्रह्लादो ब्रह्मरुद्रादिदेवान् मरीच्यादीन्प्रजापतींश्च सं-

पूज्य ववंदे ॥३२॥ ततो ब्रह्मा शुक्रादिभिर्मुनिभिर्दैत्यदानवानां पतिं प्रह्लादं चकार ॥३३॥ ततो ब्रह्माद्या देवाः प्रह्लादायाशिषो दत्वा तेन पूजिताः संतः स्वस्थानानि ययुः ॥३४॥ हे धर्म, एवं तौ विष्णुपार्षदौ विप्रशापेन दितेः पुत्रत्वं प्रापितौ। तौ श्रीहरिणा हतौ ॥३५॥ पुनश्च तौ कुंभकर्णदशग्रीवौ राक्षसौ जातौ ॥३६॥ तौ युद्धे रामबाणैर्भिन्नहृदयौ संतौ श्रीरामे चित्तं स्थापयित्वा देहं जहतुः ॥३७॥ तावेव पुनरिह शिशुपालदंतवक्त्रौ जातौ। तौ वैरानुबंधेन तव पश्यतः सतो हरौ सायुज्यं प्रापतुः ॥३८॥ कृष्णवैरिणो राजानो यत्पूर्वकृतं पापं तत् अंते श्रीकृष्णध्यानेन तदात्मानः संतो जहुः॥३९॥ हे राजन्, यथा साधवो भक्त्या हरिं प्राप्नुवंति तथा शिशुपालादयो नृपा हरेश्चिंतया तत्सारूप्यं प्रापुः ॥ ४० ॥ शिशुपालादीनां शत्रूणां हरेः सारूप्यं कथमिति त्वं यत्पृष्टवान् तत्सर्वं कथितम् ॥ ४१ ॥ हे राजन्, एषा पवित्रा श्रीकृष्णस्य श्रीनृसिंहावतारकथा कथिता ॥४२॥ अस्मिन्नाख्याने– प्रह्लादस्य चरितं भक्तिर्ज्ञानं वैराग्यम् ॥४३॥ हेरर्गुणकर्मानुवर्णनं देवदैत्यस्थानानां कालेन व्यत्ययः ॥ ४४ ॥ भागवतानां धर्मः आत्मानात्मविवेकश्च कथितोऽस्ति ॥४५ ॥ य इदमाख्यानं कीर्तयेत् शृणुयाद्वा स कर्मपाशान्मुच्यते ॥ ४६॥ य एतां नृसिंहलीलां हिरण्यकशिपुवधं प्रह्लादचरितं च पठति स वैकुंठं प्राप्नोति॥४७॥ हे युधिष्ठिर, यूयं नृलोके भूरिभागाः। यतो युष्माकं गृहेषु नराकारं श्रीकृष्णाख्यं गूढं परं ब्रह्म साक्षाद्वसति। अतस्तद्दर्शनार्थं मुनयः सर्वत आयांति ॥ ४८ ॥ ॥ ॥

ततः काव्यादिभिः सार्धं मुनिभिः कमलासनः ॥ दैत्यानां दानवानां च प्रह्लादमकरोत्पतिम् ॥ ३३ ॥ प्रतिनंद्य ततो देवाः प्रयुज्य परमाशिषः ॥ स्वधामानि ययू राजन्ब्रह्माद्याः प्रतिपूजिताः ॥ ३४ ॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः ॥ हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३५ ॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः ॥ कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३६ ॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ॥ तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३७ ॥ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ॥ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ॥ ३८ ॥ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ॥ जहुस्त्वंते तदात्मानः कीटः पेशस्कृतो यथा ॥ ३९ ॥ यथा यथा भगवतो भक्त्या परमयाऽभिदा ॥ नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ॥ ४० ॥ आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान् ॥ दमघोषसुतादीनां हरेः सात्म्यमपि द्विषाम् ॥ ४१ ॥ एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ॥ अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४२ ॥ प्रह्लादस्यानुचरितं महाभागवतस्य च ॥ भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४३ ॥ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनम् ॥ परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥४४ ॥ धर्मो भागवतानां च भगवान्येन गम्यते ॥ आख्यानेऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४५॥ य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् ॥ कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥ ४६ ॥ एतद्य आदिपुरुषस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत ॥ दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकम् ॥ ४७ ॥ यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति ॥ येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगम् ॥ ४८ ॥ ॥

यः परमानंदानुभवरूप आत्मा स भवतां मातुलपुत्रो हितकृत् पूज्यो गुरुश्चास्ति ॥४९॥ यस्य स्वरूपं शिवब्रह्मादिभिरपि इदमित्थमिति साक्षान्नोपवर्णितम् । स युष्माकं स्वयमेव प्रसन्नः । एवंभूतो भगवान्नः प्रसीदतु ॥५०॥ हे राजन्, स एष भगवान् मयासुरेण खंडितं रुद्रस्य यशो विस्तारितवान् ॥५१ ॥ युधिष्ठिर उवाच ॥ अनेन श्रीकृष्णेन रुद्रस्य कीर्तिः कस्मिन् कर्मणि वर्धिता तत्कथ्यताम् ॥५२॥ नारद उवाच ॥ पुरा देवैर्जिता असुरा मयासुरं शरणं जग्मुः ॥२३॥ स हेमरौप्यलोहमय्यस्तिस्रः पुरो निर्मायासुरेभ्यो ददौ ॥ ५४ ॥ ताभिस्ते दैत्याः सेश्वरान् त्रीन् लोकान् बबाधिरे ॥ ५५ ॥ तदा देवा दुःखिताः संतः शिवं शरणं ययुः ॥ ५६ ॥ ततो रुद्रो मा भैष्टेति देवाननुगृह्य धनुष्यस्त्राभिमंत्रितं शरं संधाय पुरेषु व्यमुंचत ॥ ५७ ॥ तस्मादग्निवर्णाः शराः सूर्यमंडलात्किरणसमूहा इवोत्पेतुः ॥ ५८ ॥ तैर्बाणैः पुरवासिनो दैत्या मृताः संतः पेतुः । तदा महायोगी मयासुरो स्वयं निर्मिते कूपामृते तान् चिक्षेप ॥ ५९ ॥ तेऽमृतरसस्पर्शेन वज्रवद्दृढांगा भूत्वा उत्तस्थुः ॥ ६०॥ तदा भग्नसंकल्पं शिवं वीक्ष्य भगवानुपायमकरोत् ॥ ६१ ॥ तदा ब्रह्मा वत्सो भूत्वाऽयं विष्णुर्गौश्च भूत्वा त्रिपुरासुराणां रसकूपसमीपं गत्वा कूपस्थममृतं पपौ ॥६२ ॥ तेऽसुराः पश्यंतोऽपि भगवन्मायामोहिताः संतो न न्यषेधन् । मयस्तां दैवगतिं विज्ञाय स्वयं शोकयुक्तः सन् रसकूपरक्षकानिदं जगौ ॥ ६३ ॥ देवासुरमनुष्याद्या आत्मनोऽन्यस्य वा दैवमन्यथा कर्तुं न समर्थाः ॥ ६४ ॥ ॥

स वा अयं ब्रह्म महद्भिर्मृग्यं कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ॥४९॥ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥५०॥ स एष भगवान्राजन्व्यतनोद्विहतं यशः ॥ पुरा रुद्रस्य देवस्य मयेनानंतमायिना ॥ ५१॥ राजोवाच ॥ कस्मिकर्मणि देवस्य मयोऽहन् जगदीशितुः ॥ यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यताम् ॥५२॥ नारद उवाच ॥ निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ॥ मायिनां परमाचार्यं मयं शरणमाययुः ॥५३॥ स निर्माय पुरस्तिस्रो हैमी रौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥५४॥ ताभिस्तेऽसुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप ॥ स्मरंतो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥५५॥ ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो ॥ त्राहि नस्तावकान्देव विनष्टांस्त्रिपुरालयैः ॥ ५६ ॥ अथानुगृह्य भगवान्मा भैष्टेति सुरान्विभुः ॥ शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुंचत ॥ ५७ ॥ ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् ॥ यथा मयूखसंदोहा नादृश्यंत पुरो यतः ॥५८॥ तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः ॥ तानानीय महायोगी मयः कूपरसेऽक्षिपत् ॥ ५९ ॥ सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ॥ उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ॥६०॥ विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजम् ॥ तदायं भगवान्विष्णुस्तत्रोपायमकल्पयत् ॥६१॥ वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ॥ प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥६२॥ तेऽसुरा ह्यपि पश्यंतो न न्यषेधन्विमोहिताः ॥ तद्विज्ञाय महायोगी रसपालानिदं जगौ ॥ ६३ ॥ स्वयं विशोकः शोकार्तान्स्मरन्दैवगतिं च ताम् ॥ देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन ॥ आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ॥ ६४ ॥

अथासौ श्रीकृष्णो धर्मज्ञानक्रियादिभिः शक्तिभिः शंभोः संग्रामसाधनं रथसारथिध्वजादि कल्पयामास ॥ ६५ ॥६६॥ ततो रुद्रः सावधानः सन् रथमास्थाय शरं धनुश्च गृहीत्वा अभिजिन्मुहूर्ते धनुषि शरं संधाय तेन दुर्भेद्यास्तिस्रः पुरो ददाह । तदा दिवि दुंदुभयो नेदुः ॥ ६७॥ ६८ ॥ देवर्षिपितृसिद्धेशा जयेति पुष्पैरवाकिरन् । गंधर्वा जगुः । अप्सरसो ननृतुः ॥६९॥ एवं शिवः पुरत्रयं दग्ध्वा ब्रह्मादिभिः स्तुतः सन् स्वधाम ययौ ॥७०॥ एवं श्रीकृष्णो रुद्रस्य यशसो विस्तारं चकार । एवं श्रीकृष्णवीर्याणि जगत्पवित्राणि बहूनि संति । अपरं किं वदामि ॥ ७१ ॥ इति श्रीमद्भागवतचूर्णिकायां सप्तम० दशमोऽध्यायः ॥१०॥ ॥ एकादशे नृणां धर्माः साधारण्येन वर्णिताः । विशेषेण च वर्णानां मुख्यामुख्याश्च योषिताम् ॥ १ ॥ श्रीशुक उवाच ॥ युधिष्ठिरः प्रह्लादस्य नृसिंहस्य चाख्यानं श्रुत्वा हर्षयुक्तः पुनर्नारदं पप्रच्छ ॥ १ ॥ युधिष्ठिर उवाच ॥ हे नारद, नृणां वर्णाश्रमाचारयुतं धर्मं श्रोतुमिच्छामि । येन धर्माचरणेन पुमान् ज्ञानं भक्तिं च विंदति ॥ २ ॥ हे नारद, त्वं ब्रह्मपुत्राणां मध्ये मान्योऽसि ॥ ३ ॥ नारायणपरास्त्वद्विधा विप्राः साधवो गुह्यं धर्मं यथा विदुः तथान्ये न विदुः ॥ ४ ॥ नारद उवाच ॥ हे धर्म, भगवते श्रीनारायणाय नत्वा नारायणमुखाच्छ्रुतं धर्मं वक्ष्ये ॥ ५ ॥ यो नारायणो धर्मतो दाक्षायण्यामंशेनावतीर्य बदरिकाश्रमे तपस्तेपे ॥६॥ श्रुतिः स्मृतिः सदाचारः मनसः संतोषश्चैतानि धर्मस्य मुख्यानि प्रमाणानि ॥७॥ तत्र साधारणधर्माः– सत्यं दया तपः शौचं

अथासौ शक्तिभिः स्वाभिः शंभोः प्राधनिकं व्यधात् ॥ धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ॥ ६५ ॥ रथं सूतं ध्वजं वाहान्धनुर्वर्म शरादि यत् ॥ ६६ ॥ सन्नद्धो रथमास्थाय शरं धनुरुपाददे ॥ शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ॥६७ ॥ ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप ॥ दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः ॥ ६८ ॥ देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ॥ अवाकिरन्जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ॥ ६९ ॥ एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ॥ ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ ७० ॥ एवंविधान्यस्य हरेः स्वमायया विडंबमानस्य नृलोकमात्मनः ॥ वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किम् ॥ ७१ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे त्रिपुरविजयो नाम दशमोऽध्यायः ॥ १० ॥ ॥ श्रीशुक उवाच ॥ श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः ॥ युधिष्ठिरो दैत्यपतेर्मुदा युतः पप्रच्छ भूयस्तनयं स्वयंभुवः ॥ १ ॥ युधिष्ठिर उवाच ॥ भगवन् श्रोतुमिच्छामि नृणां धर्मं सनातनम् ॥ वर्णाश्रमाचारयुतं यत्पुमान्विंदते परम् ॥ २ ॥ भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः ॥ सुतानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः ॥३॥ नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ॥ करुणाः साधवः शांतास्त्वद्विधा न तथाऽपरे ॥ ४ ॥ नारद उवाच ॥ नत्वा भगवतेऽजाय लोकानां धर्महेतवे ॥ वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतम् ॥ ५ ॥ योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्मतः ॥ लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥ ६ ॥ धर्ममूलं हि भगवान्सर्ववेदमयो हरिः ॥ स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ॥ ७ ॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ॥ अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥ ८ ॥

तितिक्षा[1] युक्तायुक्तविवेकः शमः अहिंसा ब्रह्मचर्यं दानं स्वाध्यायः[2] आर्जवम् ॥ ८ ॥ [3]संतोषः महतां सेवा प्रवृत्तकर्मभ्यो निवृत्तिः निष्फलक्रियाणामीक्षणं मौनं[4] आत्मविचारः[5] ॥ ९ ॥ अन्नाद्यादेः संविभागः भूतेषु आत्मेति देवतेति च बुद्धिः ॥ १० ॥ श्रवणं कीर्तनं स्मरणं ईशपादसेवनं अर्चनं वंदनं दास्यं सख्यं आत्मसमर्पणम् ॥११॥ एवं त्रिंशल्लक्षणवान् सर्वेषां परो धर्मः कथितः ॥१२॥ द्विजलक्षणमाह। गर्भाधानादिसंस्कारा यस्मिन्नविच्छिन्नाः स द्विजः तदितरः शूद्रः। द्विजानां[6] यजनाध्ययनदानानि विहितानि ॥ १३ ॥ विप्रस्याध्ययनादीनि[7] षट् कर्माणि। तत्र तु याजनमध्यापनं प्रतिग्रहश्च जीविका ॥ १४ ॥ क्षत्रियस्य विपत्तिकाले याजनमध्यापनं च वृत्तिः । वैश्यस्य कृषिवाणिज्यगोरक्षाकुसीद[8]वृत्तिः। शूद्रस्य द्विजानां शुश्रूषा वृत्तिः ॥१५॥ विप्रवृत्ति-

संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ॥ नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः ॥ तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव ॥ १० ॥ श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ॥ सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ॥ ११ ॥ नृणामयं परो धर्मः सर्वेषां समुदाहृतः ॥ त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यति ॥ १२ ॥ संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यम् ॥ इज्याध्ययनदानानि विहितानि द्विजन्मनाम् ॥ जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥ १३ ॥ विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः ॥ राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः ॥ १४ ॥ वैश्यस्तु वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः ॥ शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १५ ॥ वार्ता विचित्रा शालीनयायावरशिलोंछनम् ॥ विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥ १६ ॥ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ॥ ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ १७ ॥ ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥१८॥ ऋतमुंछशिलं प्रोक्तममृतं यदयाचितम् ॥ मृतं तु नित्ययाच्ञा स्यात्प्रमृतं कर्षणं स्मृतम् ॥ १९ ॥ सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ॥ वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ॥ सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २० ॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवम् ॥ ज्ञानं दयाऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २१ ॥ ॥ ॥

भेदानाह। कृषिः अयाचितं प्रतिदिनं धान्ययाच्ञा शिलोंछं[9] चेति । आसूत्तरोत्तरा श्रेष्ठा ॥१६॥ नीचोऽनापदि राजन्यं विनोत्तमां वृत्तिं नो भजेत्। राजा तु विपत्तौ प्रतिग्रहं विनान्यां वृत्तिं सेवेत ॥१७॥ ऋताऽमृतमृतप्रमृतसत्यानृतैर्जीवेत। श्ववृत्त्या कदापि न जीवेत ॥१८॥ ऋतादीनामर्थमाह । उंछशिलं ऋतं प्रोक्तं, अयाचितममृतं, नित्ययाच्ञा मृतं, कृषिः प्रमृतम् ॥ १९ ॥ वाणिज्यं सत्यानृतं, नीचसेवनं श्ववृत्तिः। तां विप्रो राजन्यश्च वर्जयेत्। यतो विप्रः सर्ववेदमयः नृपश्च सर्वदेवमयः ॥२०॥ शमः दमः तपः शौचं संतोषः क्षांतिः आर्जवम्। ज्ञानं दया श्रीविष्णुपरत्वं सत्यमेतानि ब्राह्मणलक्षणानि ॥ २१ ॥ ॥

---

१ सहनशक्तिः। २ यथोचितजपः। ३ दैवलब्धेनालंबुद्धिः। ४ वृथालापनिवृत्तिः। ५ देहादिव्यतिरिक्तात्मानुसंधानम्। ६ ब्राह्मणक्षत्रियवैश्यानाम्। ७ अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्च। ८ वृद्धिः। ९ शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं शिलम्। आपणादिपतितकणोपादानमुंछम्।

युद्धोत्साहः वीर्यं तेजः दानं मनोजयः क्षमा ब्रह्मण्यता अनुग्रहः रक्षणं चेत्येतानि क्षत्रियलक्षणानि ॥२२॥ देवादिषु भक्तिः त्रिवर्गपालनं नित्यमुद्योगश्चेत्येतद्वैश्यलक्षणम् ॥२३॥ शौचं स्वामिसेवा नमस्कारेणैव पंचयज्ञानुष्ठानं अचौर्यं सत्यं चेत्येवं शूद्रलक्षणानि ॥२४॥ पतिसेवा तद्बंधूनां च सेवा तेषां हिताचरणं पतिनियमाचरणमेतत्स्त्रीणां धर्मलक्षणम् ॥२५॥ संमार्जनोपलेपादिभिर्निर्मलीकृतगृहोपकरणा स्वयं च मंडिता सती स्त्री ॥२६॥ उच्चावचैः कामैः प्रियवाक्यैश्च पतिं भजेत् ॥२७॥ संतुष्टा लोभरहिता सावधाना सत्यवाक् हास्ययुक्ता सती पतिं सेवेत ॥ २८ ॥ या स्त्री पतिं हरिभावेन भजते सा वैकुंठे पत्त्या सह मोदते ॥२९॥ चौर्यहिंसादिरहितानां अंत्यजां[1]ऽतेवसायिनां[2] कुलपरंपराप्राप्तैव वस्त्रनिर्णेजनादिका वृत्तिः ॥३०॥ हे राजन्, अयं नृणां धर्म इह परत्र च वेदद्दग्भिः पुरुषैः

शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ॥ ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ॥२२॥ देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम् ॥ आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ॥ २३॥ शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया ॥ अमंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम् ॥२४॥ स्त्रीणां च पतिदेवानां तच्छुश्रूषाऽनुकूलता ॥ तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ॥२५॥ संमार्जनोपलेपाभ्यां गृहमंडलवर्तनैः ॥ स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा ॥२६॥ कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ॥ वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत्पतिम् ॥२७॥ संतुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ॥ अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥२८॥ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ॥ हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥२९॥ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् ॥ अचौराणामपापानामंत्यजांतेवसायिनाम् ॥३०॥ प्रायः स्वभावविहितो नृणां धर्मो युगे युगे ॥ वेदद्दग्भिः स्मृतो राजन्प्रेत्य चेह च शर्मकृत् ॥३१॥ वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत् ॥ हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥३२॥ उप्यमानं बहु क्षेत्रं स्वयं निर्वीर्यतामियात् ॥ न कल्पते पुनः सूत्या उप्तं बीजं च नश्यति ॥३३॥ एवं कामाशयं चित्तं कामानामतिसेवया ॥ विरज्येत यथा राजन्नाग्निवत्कामबिंदुभिः ॥३४॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकम् ॥ यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥३५॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे युधिष्ठिरना० सदाचारनिर्णयो नामैकादशोऽध्यायः ॥११॥ ॥ नारद उवाच ॥ ब्रह्मचारी गुरुकुले वसन्दांतो गुरोर्हितम् ॥ आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥ ॥

सुखहेतुः कथितः ॥३१॥ यः स्ववृत्त्या वर्तते स्वकर्म करोति च स शनैर्निर्गुणतां प्राप्नोति ॥ ३२ ॥ बहूप्यमानं क्षेत्रं शनैर्निर्वीर्यतां याति । तत्र क्षिप्तं बीजं च पुनर्धान्यप्रसवाय न कल्पते ॥३३॥ एवं कामसक्तस्य चित्तं बहुकामसेवया शाम्यति ॥३४॥ यदा ब्राह्मणे क्षत्रियलक्षणं क्षत्रिये च ब्राह्मणलक्षणं दृश्येत तदा तेन निमित्तेनैव क्षत्रियो ब्राह्मणो वा ज्ञातव्यो न जातिनिमित्तेन ॥ ३५ ॥ इति श्रीम० चू० सप्त० एकादशोऽध्यायः ॥ ११ ॥ ॥ द्वादशे वर्ण्यते धर्मो ब्रह्मचारिवनस्थयोः । चतुर्णामाश्रमाणां च साधारण्येन कश्चन ॥१॥ नारद उवाच ॥ हे राजन्, ब्रह्मचारी गुरुकुले वसन् दासवद्गुरोर्हितं कुर्यात् ॥ १ ॥ ॥

---

[1] रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः [2] अंतेऽवसायिनस्तु चांडालपुल्कसमातंगादयः ।

सायंप्रातर्गुर्वग्न्यर्कसुरोत्तमान् उपासीत । गायत्रीं जपन् संध्यात्रयमुपासीत । उभे संध्ये संध्याकालनिमित्तं मौनं कुर्यात् ॥ २ ॥ गुरुणा आहूतश्चेत् छंदास्यधीयीत । आदावंते च गुरोश्चरणौ नमेत् ॥३॥ दर्भपाणिः सन् मेखलाजिनवस्त्राणि जटादंडकमंडलूनुपवीतं च बिभृयात् ॥४॥ सायंप्रातर्भैक्षमानीय गुरवे निवेदयेत् । तेनानुज्ञातश्चेद्भुंजीत नोचेदुपवसेत् ॥ ५ ॥ मितभुक् जितेंद्रियः सन् स्त्रीषु स्त्रीलुब्धजनेषु यथोपयोगमेव व्यवहरेत् ॥ ६ ॥ ब्रह्मचर्यवान् स्त्रीणां कथां वर्जयेत् ॥७॥ केशप्रसाधनोन्मर्दनस्नपनांजनादिकं तरुणः सन् युवतीभिर्गुरुस्त्रीभिर्न कारयेत् ॥ ८ ॥ प्रमदानामाग्निः घृतकुंभमयः पुमान् । अतो रहसि सुतामपि जह्यात् ॥९॥ स्वरूपसाक्षात्कारेणेदं देहेंद्रियादिकमाभासमात्रं निश्चित्य जीवो यावदीश्वरेणैक्यं न प्राप्नुयात् तावदयं पुमानियं स्त्रीति भेदो न विरमेत् ।

सायंप्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् ॥ उभे संध्ये च यतवाग्जपन्ब्रह्म समाहितः ॥२॥ छंदास्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः ॥
उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ॥३॥ मेखलाजिनवासांसि जटादंडकमंडलून् ॥ बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ॥४॥
सायं प्रातश्चरेद्भैक्षं गुरवे तन्निवेदयेत् ॥ भुंजीत यद्यनुज्ञातो नोचेदुपवसेत्क्वचित् ॥ ५ ॥ सुशीलो मितभुग्दक्षः श्रद्दधानो जितेंद्रियः॥
यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥६॥ वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः॥ इंद्रियाणि प्रमाथीनि हरत्यंपि यतेर्मनः ॥७॥
केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकम् ॥ गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥ नन्वग्निः प्रमदा नाम घृतकुंभमयः
पुमान् ॥ सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ॥९॥ कल्पयित्वाऽऽत्मना यावदाभासमिदमीश्वरः॥ द्वैतं तावन्न विरमेत्ततो ह्यस्य
विपर्ययः ॥१०॥ एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि ॥ गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु॥
स्रग्गंधलेपालंकारांस्त्यजेयुर्ये धृतव्रताः ॥१२॥ उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च ॥ त्रयीं सांगोपनिषदं यावदर्थं यथाबलम् ॥१३॥
दत्त्वाऽऽरमनुज्ञातो गुरोः कामं यदीश्वरः ॥ गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् ॥१४॥ अग्नौ गुरावात्मनि
च सर्वभूतेष्वधोक्षजम् ॥ भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥१५॥ एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही ॥ चरन्विदितविज्ञानः
परं ब्रह्माधिगच्छति ॥१६॥ वानप्रस्थस्य वक्ष्यामि नियमान्मुनिसंमतान् ॥ यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा
॥१७॥ न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः ॥ अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ॥ १८ ॥ ॥

भेदाच्च गुणाध्यासेन भोग्यताबुद्धिर्भवति ॥ १० ॥ एतत्सर्वं गृहस्थस्य यतेरपि कथितम् ॥ ११ ॥ ये व्रतस्था गृहस्थास्तेऽभ्यंगं स्रग्गंधलेपालंकारादींश्च त्यजेयुः ॥१२॥ एवं द्विजो गुरुगृहे स्थित्वा शिक्षादिभिरुपनिषद्भिश्च सहितां वेदत्रयीमधीत्य ॥ १३ ॥ गुरवे दक्षिणां दत्वा तदनुज्ञातो गृहस्थाश्रमं स्वीकुर्यात् । वनं वा प्रविशेत् नैष्ठिकब्रह्मचारी वा भवेत् ॥१४॥ अग्नौ गुरावात्मनि भूतेषु च स्थितमीश्वरमप्रविष्टमपि जीवरूपेण प्रविष्टवत् पश्येत् ॥१५॥ ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा एवमाचरन् ज्ञानी भूत्वा परं ब्रह्म प्राप्नोति ॥ १६ ॥ अथ वानप्रस्थस्य नियमान् वक्ष्यामि । यानाचरन् पुमान् महर्लोकं प्राप्नोति ॥ १७ ॥ वानप्रस्थोऽकृष्टपच्यमन्नमग्निपक्वमन्नं च फलादिकं चाश्नीयात् ॥ १८ ॥ ॥ ॥ ॥

वन्यैर्धान्यैर्दर्शपूर्णमासादिकं कुर्यात् । नवेऽन्नादिके प्राप्ते सति पूर्वसंचितं त्यजेत् ॥१९॥ अग्निसेवार्थं पर्णकुटीं वा गुहां वा संपादयेत् । स्वयं हिमवाय्वग्निवृष्टिसूर्यातपान् सहेत ॥२०॥ केशरोमनखश्मश्रुमलानि दंडकमंडल्वादींश्च धारयेत् ॥२१॥ एवं द्वादश अष्टौ चतुरो द्वौ एकं वा यथाशक्ति वर्षाणि वने चरेत् ॥२२॥ यदा व्याधिभिर्जरया वा स्वकर्म कर्तुं ज्ञानाभ्यासं वा संपादयितुमसमर्थः स्यात्तदा अनशनादिकं व्रतं कुर्यात् ॥२३॥ आत्मन्यग्निं समारोप्याहंममतां त्यक्त्वा देहमाकाशादिषु प्रविलापयेत् ॥२४॥ तदेव दर्शयति । आकाशे देहगतच्छिद्राणि वायौ श्वासान् तेजसि ऊष्माणं उदकेषु रक्तं क्षितौ अस्थिमांसादिकं विलापयेत् ॥२५॥ एवं स्थूलशरीरस्य लयमुक्त्वा लिंगशरीस्य लयं कुर्यात् । वाचं वह्नौ । पादौ विष्णौ । कराविंद्रे । उपस्थं प्रजापतौ ॥२६॥ पायुं मृत्यौ । श्रोत्रं दिक्षु । त्वचं

वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ॥ लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् ॥ १९ ॥ अग्न्यर्थमेव शरणमुटजं वाद्रिकंदराम् ॥ श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयम् ॥२०॥ केशरोमनखश्मश्रुमलानि जटिलो दधत् ॥ कमंडल्वजिने दंडवल्कलाग्निपरिच्छदान् ॥ २१ ॥ चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथाबुद्धिर्न विपद्येत कृच्छ्रतः ॥ २२ ॥ यदाऽकल्पः स्वक्रियायां व्याधिभिर्जरयाऽथवा ॥ आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम् ॥ २३ ॥ आत्मन्यग्नीन्समारोप्य संन्यस्याहंममात्मताम् ॥ कारणेषु न्यसेत्सम्यक् संघातं तु यथार्हतः ॥ २४ ॥ खे खानि वायौ निःश्वासांस्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ॥ २५ ॥ वाचमग्नौ स वक्तव्यामिंद्रे शिल्पं करावपि ॥ पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥ मृत्यौ पायुं विसर्गं च यथास्थानं विनिर्दिशेत् ॥ दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम् ॥ २७ ॥ रूपाणि चक्षुषा राजन् ज्योतिष्यभिनिवेशयेत् ॥ अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥२८॥ मनो मनोरथैश्चंद्रे बुद्धिं बोध्यैः कवौ परे ॥ कर्माण्यध्यात्मना रुद्रे यदहंममता क्रिया ॥ सत्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥२९॥ अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् ॥ कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ॥ ३० ॥ इत्यक्षरतयाऽऽत्मानं चिन्मात्रमवशेषितम् ॥ ज्ञात्वाऽद्वयोऽथ विरमेद्दग्धयोनिरिवानलः ॥३१॥ इति श्रीम॰ म॰ सप्त॰ युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ नारद उवाच ॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ॥ ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥१॥

स्पर्शे ॥२७॥ रूपाण्यादित्ये । जिह्वां वरुणे । घ्राणं पृथिव्याम् ॥२८॥ मनश्चंद्रे । बुद्धिं ब्रह्मणि । अहंकारं रुद्रे । चित्तं क्षेत्रज्ञे जीवे । गुणैः सह जीवं ब्रह्मणि ॥२९ ॥ क्षितिमप्सु । अपो ज्योतिषि । तेजो वायौ । वायुं नभसि । नभोऽहंतत्वे । अहंतत्वं महत्तत्वे । महत्तत्वं प्रधाने । प्रधानं परमात्मनि ॥ ३० ॥ एवं सर्वोपाधिलयेन शिष्टं चिन्मात्रमात्मानमक्षरतया ज्ञात्वा द्वैतरहितः सन् दग्धकाष्ठोऽग्निरिव विरमेत् ॥३१॥ इति श्रीमद्भागवतचूर्णिकायां सप्तमस्कंधे द्वादशोऽध्यायः ॥ १२ ॥ ॥ त्रयोदशे यतेर्धर्मः साधकस्योच्यते महान् । अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ॥१ ॥ नारद उवाच ॥ ज्ञानाभ्याससमर्थश्चेत्तर्हि संन्यासं गृहीत्वा ग्रामैकरात्रविधिना निरपेक्षो महीं चरेत् ॥ १ ॥ ॥ ॥ ॥

यावता गुह्यमाच्छाद्यते तावन्मात्रं कौपीनं दंडकमंडलू च बिभृयात् ॥ २॥ भिक्षुर्नारायणपरायण एक एव चरेत् ॥ ३ ॥ अव्यये ब्रह्मण्यात्मानं पश्येत् । आत्मनि च विश्वं पश्येत् ॥४॥ सुप्तिजागरयोः संधावात्मानं लक्षीकृत्यात्मनस्तत्वं पश्यन् बंधं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येत् ॥५॥ देहस्याशाश्वतं जीवनं शाश्वतं मृत्युं च नाभिनंदेत् । किंतु केवलं कालं प्रतीक्षेत ॥६॥ असच्छास्त्रेषु न सज्जेत । वितंडादिवादांस्त्यजेत् ॥७॥ बहुशिष्यान्न संपादयेत् । बहुग्रंथान्नाभ्यसेत् । मठादिव्यापारान्न कुर्यात् ॥८॥ शांतो यतिर्ज्ञानोत्पत्तिपर्यंतं बहूदकादिचिह्नमाश्रित्य नियमानाचरन् ज्ञानोत्पत्तौ यतेत । उत्पन्ने ज्ञाने नियमानाचरेत्त्यजेद्वा ॥९॥ अव्यक्तचिह्नः मनीष्यपि मत्तवत् बालवच्च कविरपि मूकवदात्मानं नृणां दर्शयेत् ॥१०॥ अस्मिन् परमहंसधर्मविषये आजगरस्य

बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम् ॥ त्यक्तं न दंडलिंगादेरन्यत्किंचिदनापदि ॥ २ ॥ एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छांतो नारायणपरायणः ॥ ३ ॥ पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये ॥ आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥ सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् ॥ पश्यन्बंधं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥ नाभिनंदेद्ध्रुवं मृत्युमध्रुवं वास्य जीवितम् ॥ कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ॥ ६ ॥ नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ॥ वादवादांस्त्यजेत्तर्कान्पक्षं कंच न संश्रयेत् ॥ ७ ॥ न शिष्याननुबध्नीत ग्रंथान्नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुंजीत नारंभानारभेत्क्वचित् ॥ ८ ॥ न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ॥ शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ ९ ॥ अव्यक्तलिंगो व्यक्तार्थो मनीष्युन्मत्तबालवत् ॥ कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ॥ १० ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥ तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ॥१२॥ ददर्श लोकान्विचरँल्लोकतत्त्वविवित्सया ॥ वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥ कर्मणा कृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः ॥ न विदंति जना यं वै सोऽसाविति न वेति च ॥१४॥ तं नत्वाभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् ॥ विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः ॥१५॥ बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा ॥ वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ॥ भोगिनां खलु देहोऽयं पीवा भवति नान्यथा ॥ १६ ॥ न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः ॥ अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत् ॥ १७ ॥ ॥

मुनेः प्रह्लादस्य च संवादं श्रृणु ॥ ११ ॥ एकदा प्रह्लादः कतिपयैरमात्यैर्वृतो लोकतत्त्वविवित्सया विचरन् सन् कावेरीनदीतीरे सह्याद्रेस्तटे भूपृष्ठे शयानं धूलिव्याप्तैर्देहावयवैर्गुप्ततेजसं मुनिं ददर्श ॥ १२ ॥ १३ ॥ यं कर्मणा आकृतिलिंगवर्णाश्रमादिभिर्वा जना अयममुक इति न विदुः ॥ १४ ॥ तं मुनिं नत्वा जिज्ञासुः प्रह्लादः पप्रच्छ ॥१५॥ हे ब्रह्मन्, सोद्यमः पुमान् यथा पुष्टं देहं बिभर्ति तथा त्वमपि बिभर्षि । तत्र हेतुं वद । उद्यमवतां वित्तं वित्तवतां भोगो भोगिनां च देहः पुष्टो भवति । अन्यथा न भवति ॥ १६ ॥ अतो निरुद्यमस्य तव देहः पुष्टो यतो जातस्तद्वक्तुं योग्यं चेद्वद ॥ १७ ॥ ॥

त्वं समर्थो विद्वान् चतुरः सर्वप्रियो लोकस्य कर्म पश्यन्नपि शयनं करोषि ॥१८॥ नारद उवाच ॥ एवं प्रह्लादेन पृष्टो मुनिः स्मयमानः सन् तमाह ॥ १९ ॥
ब्राह्मण उवाच ॥ हे असुरश्रेष्ठ, त्वं प्रवृत्तिनिवृत्त्योः फलानि ज्ञानदृष्ट्या जानास्येव ॥२०॥ यतो नारायणस्तव हृद्गतः सन् अज्ञानं नाशयति ॥२१॥ अथापि हे
दैत्य, तव प्रश्नान् यथाश्रुतं ब्रूमहे ॥२२॥ अहं भवप्रवाहकारिण्या तृष्णया कर्मसु प्रवर्त्यमानो नानायोनिषु भ्रमन् ॥२३॥ यदृच्छया स्वर्गापवर्गयोर्द्वारं मनुष्यदेहं
प्रापितः ॥२४॥ अत्र मनुष्यत्वेऽपि सुखाय दुःखनिवृत्त्यै च कर्म कुर्वतां दंपतीनां विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ॥२५॥ सुखं तु जीवस्य स्वरूपमेव। तत्सर्वकर्मनिवृत्तौ
स्वत एव प्रकाशते । अतोऽशाश्वतान् भोगान् दृष्ट्वा प्रारब्धभोगान् भुंजानो निरुद्योगोऽस्मि ॥ २६ ॥ एवमात्मनः स्वस्मिन्नेव संतं स्वार्थं वि-

कविः कल्पो निपुणदृक् चित्रप्रियकथः समः ॥ लोकस्य कुर्वतः कर्म शेषे तद्वीक्षितापि वा ॥ १८ ॥ नारद उवाच ॥ स इत्थं
दैत्यपतिना परिपृष्टो महामुनिः ॥ स्मयमानस्तमभ्याह तद्वागमृतयंत्रितः ॥ १९ ॥ ब्राह्मण उवाच ॥ वेदेदमसुरश्रेष्ठ भवान्नन्वार्यसंमतः ॥
ईहोपरमयोर्नॄणां पदान्यध्यात्मचक्षुषा ॥ २० ॥ यस्य नारायणो देवो भगवान्हृद्गतः सदा ॥ भक्त्या केवलयाऽज्ञानं
धुनोति ध्वांतमर्कवत् ॥ २१ ॥ अथापि ब्रूमहे प्रश्नांस्तव राजन्यथाश्रुतम् ॥ संभावनीयो हि भवानात्मनः शुद्धिमिच्छताम् ॥
२२ ॥ तृष्णया भववाहिन्या योग्यैः कामैरपूरया ॥ कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः ॥ २३ ॥ यदृच्छया
लोकमिमं प्रापितः कर्मभिर्भ्रमन् ॥ स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ २४ ॥ अत्रापि दंपतीनां च सुखायान्यापनुत्तये ॥
कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ॥ २५ ॥ सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः ॥ मनःसंस्पर्शजान्दृष्ट्वा भोगान्स्वप्स्यामि
संविशम् ॥ २६ ॥ इत्येतदात्मनः स्वार्थं संतं विस्मृत्य वै पुमान् ॥ विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ॥२७॥
जलं तदुद्भवैश्छन्नं हित्वाऽज्ञो जलकाम्यया ॥ मृगतृष्णामुपाधावेद्यथाऽन्यत्रार्थदृक् स्वतः ॥ २८ ॥ देहादिभिर्दैवतंत्रैरात्मनः सुखमीहतः ॥
दुःखात्ययं चानीशस्य क्रिया मोघाः कृताः कृताः ॥ २९ ॥ आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ॥ मर्त्यस्य
कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥ ३० ॥ पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् ॥ भयादलब्धनिद्राणां
सर्वतोऽभिविशंकिनाम् ॥३१॥ राजतश्चोरतः शत्रोः स्वजनात्पशुपक्षितः॥ अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयम् ॥३२॥
शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ॥ यन्मूलाः स्युर्नृणां जह्यात्स्पृहां प्राणार्थयोर्बुधः ॥ ३३ ॥ ॥

स्मृत्य असत्यपि द्वैते पुमान् संसृतिं प्राप्नोति ॥२७॥ अज्ञस्तृणशैवालादिभिश्छादितं जलं हित्वा जलेच्छया मृगतृष्णां यथा धावति तथा जीव आत्मस्वरूपादन्यत्र
पुरुषार्थं पश्यन् संसरति ॥ २८ ॥ सुखमिच्छतो निर्दैवस्य पुंसः कृतानि कर्माणि निष्फलानि भवंति ॥ २९ ॥ मरिष्यमाणस्य दुःखेन प्राप्तैर्विषयभोगैः
किं क्रियेत ॥ ३० ॥ अहं भयादलब्धनिद्राणां लुब्धानां धनिनां क्लेशं पश्यामि ॥ ३१ ॥ प्राणवतामर्थवतां च राजचौरशत्रुपशुपक्षिभ्यः कालतश्च नित्यं भयं
पश्यामि ॥ ३२ ॥ नृणां शोकमोहभयक्रोधादयो द्रव्यमूलाः स्युः । अतो बुधो द्रव्ये स्पृहां त्यजेत् ॥ ३३ ॥ ॥ ॥

अत्र लोके मधुमक्षिकामहासर्पौ द्वौ नो गुरूत्तमौ स्तः । ययोः शिक्षया वयं वैराग्यं संतोषं च प्राप्ताः ॥ ३४ ॥ यस्मात्कष्टैः संपादितं द्रव्यं द्रव्यपतिं हत्वा मधुवदन्यो हरेत् । तस्मान्मया सर्वकामेभ्यो वैराग्यं मधुमक्षिकायाः शिक्षितम् ॥३५॥ यदृच्छाप्राप्तेनाहं संतुष्टो भवामि। न प्राप्तं चेत्तर्हि धैर्यवान् सन् महाहिरिव बहुदिवसानि शये ॥३६॥ क्वचिदल्पं क्वचिद्बहु प्राप्तं स्वादु अस्वादु वान्नं भुंजे ॥३७॥ क्वचिच्छ्रद्धया कदाचिन्मानवर्जितं वा प्राप्तमन्नं क्वचिद्दिवा नक्तं वा यदृच्छया भुंजे ॥३८॥ क्वचित्क्षौमं दुकूलमजिनं वस्त्रखंडं वा परिदधे ॥३९॥ क्वचिद्धरायां तृणादिषु वा क्वचित्परेच्छया प्रासादपर्यंके कशिपौ वा शये ॥ ४० ॥ क्वचित्स्नातः स्वलंकृतः परेच्छया रथेभाश्वैर्विचरामि । क्वचिद्दिगंबरो विचरामि ॥ ४१ ॥ अहं स्वभावविषमं जनं न निंदे न च स्तौमि ॥ ४२ ॥ एवं-

मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ ॥ वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ॥ ३४ ॥ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ॥ कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिम् ॥ ३५ ॥ अनीहः परितुष्टात्मा यदृच्छोपनतादहम् ॥ नो चेच्छये बह्वहानि महाहिरिव सत्ववान् ॥ ३६ ॥ क्वचिदल्पं क्वचिद्भूरि भुंजेऽन्नं स्वाद्वस्वादु वा ॥ क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥ श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम् ॥ भुंजे भुक्त्वाथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया ॥ ३८ ॥ क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा ॥ वसेऽन्यदपि संप्राप्तं दिष्टभुक् तुष्टधीरहम् ॥ ३९ ॥ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ॥ क्वचित्प्रासादपर्यंके कशिपौ वा परेच्छया ॥ ४० ॥ क्वचित्स्नातोऽनुलिप्तांगः सुवासाः स्रग्व्यलंकृतः ॥ रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ॥४१॥ नाहं निंदे न च स्तौमि स्वभावविषमं जनम् ॥ एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥ विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे ॥ मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु ॥ ४३ ॥ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ्मुनिः ॥ ततो निरीहो विरमेत्स्वानुभूत्याऽऽत्मनि स्थितः ॥४४॥ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् ॥ व्यपेतं लोकशास्त्राभ्यां भवान् हि भगवत्परः ॥ ४५ ॥ नारद उवाच ॥ धर्मं पारमहंस्यं वै मुनेः श्रुत्वाऽसुरेश्वरः ॥ पूजयित्वा ततः प्रीत आमंत्र्य प्रययौ गृहम् ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे यतिधर्मे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ युधिष्ठिर उवाच ॥ गृहस्थ एतां पदवीं विधिना येन चांजसा ॥ याति देवऋषे ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥ नारद उवाच ॥ गृहेष्ववस्थितो राजन्क्रियाः कुर्वन्गृहोचिताः ॥ वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥२॥ ॥

भूतत्वेन स्थितावुपायमाह । मुनिर्जातिरूपादिभेदं चित्ते जुहुयात् । चित्तमहंकारे तं च मायायाम् ॥४३॥ मायामात्मनि जुहुयात्ततो निरीहो विरमेत् ॥४४॥ हे प्रह्लाद, एवं सुगुप्तमपि स्वात्मवृत्तं तुभ्यं वर्णितम् । यतो भवान् भगवत्प्रियोऽसि ॥ ४५॥ नारद उवाच ॥ प्रह्लाद एवं मुनेः पारमहंस्यं धर्मं श्रुत्वा तं पूजयित्वाऽऽज्ञां गृहीत्वा गृहं ययौ ॥४६॥ इति श्रीम० चूर्णि० सप्त० त्रयोदशोऽध्यायः ॥१३॥ ॥ चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते । देशकालादिभेदेन पुनः श्रेयोविशेषकृत् ॥१॥ युधिष्ठिर उवाच ॥ हे देवर्षे,मादृशा गृहस्था येन विधिना संन्यासिनां पदवीं यांति तं विधिं ब्रूहि ॥१॥ नारद उवाच॥हे राजन्,गृहस्थः स्वाश्रमोचिता-

नि कर्माणि वासुदेवार्पणं यथाभवत्येवं कुर्वन् ऋषीनुपासीत ॥२॥ भगवतोऽवतारकथामृतं वारंवारं श्रद्धया श्रृण्वन् ॥३॥ सत्संगादात्मजायापुत्रादिषु संगं शनैस्त्यजेत् ॥४॥ देहे गृहे च यावत्कार्यं संबंधं धारयन् अंतस्त्वनासक्तो बहिस्त्वासक्त इव जनमध्ये मनुष्यत्वं न्यसेत् ॥५॥ ज्ञातयः पितरौ पुत्रभ्रातृसुहृदादयो यद्वदंति यदिच्छंति च तत्र स्वाग्रहरहितः सन्ननुमोदेत ॥६॥ ईश्वरनिर्मितं दिव्यं धान्यादि भौमं निधानादि आंतरिक्षमकस्माल्लभ्यं च द्रव्यमस्ति तदुपभुंजानः सन् पूर्वोक्तं कर्मादि कुर्यात् ॥७॥ यावज्जठरं पूर्येत तावदेव देहिनः स्वत्वमस्ति । अधिकं स्वत्वं योऽभिमन्येत स स्तेनो दंडमर्हति ॥८॥ मृगोष्ट्रखरमर्कटमूषकसर्पादिप्राणिन आत्मनः पुत्रवत्पश्येत् ॥९॥ गृहस्थोऽपि धर्मार्थकामानतिसंकटेन न सेवेत ॥ १० ॥ श्वानपतितचांडालादिभ्यः स्वभोग्यवस्तूनि यथार्हं विभज्य दद्यात् ।

श्रृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतम् ॥ श्रद्दधानो यथाकालमुपशांतजनावृतः ॥३॥ सत्संगाच्छनकैः संगमात्मजायात्मजादिषु ॥ विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥ ४ ॥ यावदर्थमुपासीनो देहे गेहे च पंडितः ॥ विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ॥५॥ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ॥ यद्वदंति यदिच्छंति चानुमोदेत निर्ममः ॥ ६ ॥ दिव्यं भौमं चांऽतरिक्षं वित्तमच्युतनिर्मितम् ॥ तत्सर्वमुपभुंजान एतत्कुर्यात्स्वतो बुधः ॥७॥ यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम् ॥ अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति ॥८॥ मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः ॥ आत्मनः पुत्रवत्पश्येत्तैरेषामंतरं कियत् ॥ ९ ॥ त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि ॥ यथादेशं यथाकालं यावद्दैवोपपादितम् ॥ १० ॥ आश्वाघांतेवसायिभ्यः कामान्संविभजेद्यथा ॥ अप्येकामात्मनो दारा न्नृणां स्वत्वग्रहो यतः ॥११॥ जह्याद्यदर्थे स्वप्राणान्हन्याद्वा पितरं गुरुम् ॥ तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः ॥१२॥ कृमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरम् ॥ क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥१३॥ सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः ॥ शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात् ॥ १४ ॥ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहम् ॥ स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥१५॥ यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः ॥ वैतानिकेन विधिना अग्निहोत्रादिना यजेत् ॥ १६ ॥ न ह्यग्निमुखतोऽयं वै भगवान्सर्वयज्ञभुक् ॥ इज्येत हविषा राजन्यथा विप्रमुखे हुतैः ॥१७॥ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः ॥ तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु ॥१८॥ कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः ॥ श्राद्धं पित्रोर्यथावित्तं तद्बंधूनां च वित्तवान् ॥ १९ ॥

एकामपि स्वस्त्रियमतिथिसेवने युंजीत ॥११॥ यदर्थे प्राणान् जह्यात् । पितरं गुरुं च हन्यात् तस्यां स्त्रियां यः स्वत्वाभिमानं त्यजेत्तेनेश्वरो जित एव ॥१२॥ कृमिविड्भस्मपरिणामं तुच्छं कलेवरं क्व । तस्य देहस्य रतिर्यस्यां सा स्त्री क्व । आकाशस्यापि व्यापक आत्मा च क्व ॥१३॥ प्राज्ञः पंचयज्ञशेषैरन्नादिभिः स्ववृत्तिं कल्पयेत् । शेषे सत्तां त्यजन् महतां पदवीं प्राप्नुयात् ॥१४॥ स्ववृत्त्या प्राप्तवित्तेनान्वहं पंचयज्ञदेवता यजेत ॥ १५ ॥ यदा स्वस्याधिकाराद्या यज्ञसंपदश्च स्युः तदाऽग्निहोत्रादिना पुरुषं यजेत् ॥ १६ ॥ विप्रमुखे हुतैर्यथा भगवान् तुष्येत तथाऽग्निमुखे हुतैर्न तुष्येत ॥१७॥ अतो ब्राह्मणदेवमनुष्यादिष्वनुक्रमेणांतर्यामिणमीश्वरं यजस्व ॥ १८ ॥ द्विजो भाद्रपदे मासे पित्रोरापरपक्षीयं श्राद्धं कुर्यात् । संपन्नश्चेत्तद्बंधूनां च कुर्यात् ॥ १९ ॥ ॥

कर्कमकरसंक्रमणद्वये व्यतीपाते दिनक्षये चंद्रसूर्यग्रहणे द्वादश्यां श्रवणे ॥२०॥ अक्षय्यतृतीयायां कार्तिकशुक्लनवम्यां मार्गशीर्षादिमासचतुष्टये याश्चतस्रोऽष्टकास्तासु ॥२१॥ माघशुक्लसप्तम्यां मघायुक्तपौर्णमास्याम् ॥२२॥ श्रवणानुराधोत्तरात्रययुक्तद्वादश्यां उत्तरात्रययुक्तैकादश्यां च ॥२३॥ एषु श्राद्धादिकं कुर्यात्। एते काला नृणां श्रेयोविवर्धनाः संति । श्रेयोवर्धनमेवायुषः साफल्यम् ॥ २४ ॥ एषु यत्कृतं दानहोमजपादि तदक्षय्यं भवति ॥ २५ ॥ भार्यायाः पुंसवनादीनि पुत्रस्य जातकर्मादीनि मृतानां दहनादीनि आत्मनश्च यज्ञदीक्षादीनि श्रेयस्कराणि कर्माणि कुर्यात् ॥२६ ॥ अथ पुण्यदेशान् वक्ष्यामि । यत्र सत्पात्रं लभ्यते स एव पुण्यतमो देशः ॥२७॥ यत्र भगवद्भक्ताः यत्र ब्राह्मणकुलम् ॥२८॥ यत्र हरेराराधनं गंगाद्या नद्यश्च ॥२९॥ यत्र पुष्करादीनि सरांसि तथा कुरुक्षेत्रं गया प्रयागः पुलहाश्रमः

अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये ॥ चंद्रादित्योपरागे च द्वादशीश्रवणेषु च ॥२०॥ तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके ॥ चतसृष्वप्यष्टकासु हेमंते शिशिरे तथा ॥२१॥ माघे च सितसप्तम्यां मघाराकासमागमे ॥ राकया चानुमत्या वा मासर्क्षाणि युतान्यपि ॥ २२ ॥ द्वादश्यामनुराधा स्याच्छ्रवणस्तिस्र उत्तराः ॥ तिसृष्वेकादशी वाऽसु जन्मर्क्षश्रोणयोगयुक् ॥ २३ ॥ त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः ॥ कुर्यात्सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥ २४ ॥ एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ॥ पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरम् ॥ २५ ॥ संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ॥ प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥ २६॥ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेय आवहान् ॥ स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥२७॥ बिंबं भगवतो यत्र सर्वमेतच्चराचरम् ॥ यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितम् ॥ २८ ॥ यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ॥ यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः ॥ २९ ॥ सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत ॥ कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ॥ ३० ॥ नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ॥ वाराणसी मधुपुरी पंपा बिंदुसरस्तथा ॥ ३१ ॥ नारायणाश्रमो नंदा सीतारामाश्रमादयः ॥ सर्वे कुलाचला राजन्महेंद्रमलयादयः ॥ ३२॥ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ॥ एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥ ३३ ॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ॥ हरिरेवैक उर्वीश यन्मयं वै चराचरम् ॥ ३४ ॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ॥ राजन्यदग्रपूजायां मतः पात्रतयाऽच्युतः ॥ ३५ ॥ जीवराशिभिराकीर्ण आंडकोशांघ्रिपो महान् ॥ तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥ ३६ ॥

॥ ३० ॥ नैमिषं फाल्गुनं सेतुः प्रभासः द्वारका वाराणसी मथुरा पंपा बिंदुसरः ॥ ३१ ॥ बदरिकाश्रमः सीतारामाश्रमादयो महेंद्रमलयादयः कुलपर्वताः ॥ ३२ ॥ एते यत्र संति ते पुण्यतमा देशाः । एतान् देशान् पुण्येच्छुः सेवेत । एषु स्थानेष्वाचरितो धर्मः सहस्रगुणिताधिकफलदो भवति ॥३३॥ हे राजन्, सर्वेषु पात्रेषु मध्ये हरिरेव पात्रं विद्वद्भिर्निर्णीतम् ॥ ३४ ॥ यस्मात् सनकादिषु सत्स्वपि तव राजसूये यज्ञेऽग्रपूजायां हरिः पात्रतया संमतः ॥ ३५ ॥ ब्रह्मांडकोशवृक्षस्य मूलमच्युतः । तस्य चरणपूजनेन सर्वेषां पूजनं भवति ॥ ३६ ॥ ॥ ॥

भगवान् मनुष्यतिर्यगादिपुरेषु जीवरूपेण शेते । अतः पुरुष इति प्रसिद्धः ॥ ३७॥ सर्वप्राणिषु भगवान् [1]तारतम्येन वर्तते । अतः पुरुषः सत्पात्रम् । तत्रापि यावान् ज्ञानांशो यथा यथा तपआदियोगेन यत्र यत्र प्रतीयते तथा तथाऽसौ पात्रम् ॥३८॥ लोकास्त्रेतादिषु प्रतिमादौ हरेः पूजां कुर्वंति ॥ ३९ ॥ हरेः कृतापि पूजा पुरुषद्वेषिणामर्थदा न भवति । द्वेषं हित्वा कृता चेदर्थदा भवति ॥४० ॥ हे राजेंद्र, पुरुषेष्वपि ब्राह्मणं सत्पात्रं विदुः । यतस्तपआदिना स हरेस्तनुं वेदं धत्ते ॥ ४१ ॥ पादरजसा त्रिलोकीं पुनंतो ब्राह्मणाः कृष्णस्यापि महद्दैवतं तदा इतरेषां दैवतमिति किं वक्तव्यम् ॥ ४२॥ इति श्रीमद्भागवतचूर्णिकायां सप्तमस्कंधे चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ततः पंचदशे सर्ववर्णाश्रमनिबंधनम् । सारतः संग्रहेणाथ वर्ण्यते मोक्षलक्षणम् ॥१॥ नारद उवाच ॥

पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ॥ शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥३७॥ तेष्वेषु भगवान्राजंस्तारतम्येन वर्तते ॥ तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ॥३८॥ दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप॥ त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥३९॥ ततोऽर्चायां हरिं केचित्संश्रद्धाय सपर्यया ॥ उपासत उपास्तापि नार्थदा पुरुषद्विषाम् ॥४०॥ पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः ॥ तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥४१॥ नन्वस्य ब्राह्मणा राजन्कृष्णस्य जगदात्मनः ॥ पुनंतः पादरजसा त्रिलोकीं दैवतं महत् ॥ ४२॥ इति श्रीमद्भागवते महापुरा॰ सप्त॰ सदाचारनिर्णयो नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ नारद उवाच ॥ कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपापरे ॥ स्वाध्यायेऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ॥१॥ ज्ञाननिष्ठाय देयानि कव्यान्यानंत्यमिच्छता ॥ दैवे च तदभावे स्यादितरेभ्यो यथार्हतः ॥२॥ द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत्सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ॥३॥ देशकालोचितश्रद्धाद्रव्यपात्रार्हणानि च ॥ सम्यग्भवंति नैतानि विस्तरात्स्वजनार्पणात् ॥ ४ ॥ देशे काले च संप्राप्ते मुन्यन्नं हरिदैवतम् ॥ श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयम् ॥ ५॥ देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ॥ अन्नं संविभजन्पश्येत्सर्वं तत्पुरुषात्मकम् ॥६॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ॥ मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥७॥ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम् ॥ न्यासो दंडस्य भूतेषु मनोवाक्कायजस्य यः॥८॥

केचिद्द्विजाः कर्मनिष्ठा अपरे तपोनिष्ठा अन्ये स्वाध्यायनिष्ठाः केचिज्ज्ञानयोगनिष्ठाः ॥ १ ॥ तत्रानंतफलमिच्छता पुंसा हव्यकव्यानि ज्ञाननिष्ठाय देयानि । तदभावे इतरेभ्यो यथार्हतो देयानि ॥ २ ॥ दैवे द्वौ पितृकार्ये त्रीन् उभयत्रैकैकं वा ब्राह्मणं भोजयेत् । समृद्धोऽपि श्राद्धे विस्तरं न कुर्यात् ॥ ३ ॥ विस्तरे कृते सति देशकालोचितश्रद्धापूजादिकं सम्यक् न भवति ॥४॥ देशे काले च संप्राप्ते सति व्रीह्याद्यन्नं सत्पात्रे दत्तं चेदक्षयं भवति ॥ ५ ॥ देवर्षिपितृभूतेभ्यः स्वजनाय चान्नं विभजन् सर्वमीश्वरात्मकं पश्येत् ॥ ६॥ धर्मज्ञः श्राद्धे आमिषं न दद्यात् स्वयं च नाश्नीयात् । व्रीह्यादिभिर्यथा हरेः प्रीतिर्भवति तथा पशुहिंसया न भवति ॥ ७ ॥ नृणां हिंसात्यागसदृशोऽन्यो धर्मो नास्ति॥ ८ ॥ ॥ ॥ ॥

---

[1] तिर्यगादिभ्यो मनुष्यमुनिदेवतासु आधिक्येन वर्तते ।

एके निष्कामा ज्ञानिनो ज्ञानप्रदीप्ते मनोनिग्रहरूपेऽग्नौ कर्ममयान् यज्ञान् जुह्वति[1] ॥९॥ द्रव्ययज्ञैर्यक्ष्यमाणं नरं दृष्ट्वा एष निर्दयो मां हन्यादिति भूतानि बिभ्यति ॥१०॥ तस्माद्धर्मवित्पुरुषस्तुष्टः सन् दैवप्राप्तेन मुन्यन्नेनापि नित्यनैमित्तिकीः क्रियाः कुर्यात् ॥ ११ ॥ किंच । विधर्मः परधर्मः उपमा छलः आभासश्चेति पंच अधर्मशाखा धर्मज्ञस्त्यजेत् ॥१२॥ विधर्मादीनामर्थमाह । स्वधर्मबाधो विधर्मः, अन्यस्योक्तोऽन्यस्य परधर्मः, पाखंड उपधर्मः, शब्दभेदक[2]श्छलधर्मः ॥१३॥ इच्छया कृत आभासधर्मः । स्वधर्मानुष्ठानानंतरं धर्मभूयस्त्वार्थमपि परधर्मो नानुष्ठेयः ॥१४॥ स्वयमधनो धर्मार्थं यात्रार्थं वा धनं नापेक्षेत । निरिच्छस्यानीहा अजगरसर्प इव वृत्तिदा भवति ॥१५॥ संतुष्टस्य पुंसो यत्सुखं तत् लोभेन दश दिशो धावतः कुतः स्यात् ॥१६॥ सदा संतुष्टमनसो नरस्य सर्वा दिशः

एके कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः ॥ आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥९॥ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ॥ एष माकरुणो हन्यादतज्ज्ञो ह्यसुतृप्ध्रुवम् ॥१०॥ तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् ॥ संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः ॥११॥ विधर्मः परधर्मश्च आभास उपमा छलः ॥ अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥१२ ॥ धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः ॥ उपधर्मस्तु पाखंडो दंभो वा शब्दभिच्छलः ॥१३॥ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात्पृथक् ॥ स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये ॥ १४ ॥ धर्मार्थमपि नेहेत यात्रार्थं वाऽधनो धनम् ॥ अनीहानीहमानस्य महाहेरिव वृत्तिदा ॥१५॥ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखम् ॥ कुतस्तत्कामलोभेन धावतोऽर्थेहया दिशः ॥ १६ ॥ सदा संतुष्टमनसः सर्वाः सुखमया दिशः ॥ शर्कराकंटकादिभ्यो यथोपानत्पदः शिवम् ॥१७॥ संतुष्टः केन वा राजन्न वर्तेतापि वारिणा ॥ औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः ॥१८॥ असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशः ॥ स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते ॥१९॥ कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् ॥ जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥२०॥ पंडिता बहवो राजन्बहुज्ञाः संशयच्छिदः ॥ सदसस्पतयोऽप्येके असंतोषात्पतंत्यधः ॥२१॥ असंकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् ॥ अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥२२॥ आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया ॥ योगांतरायान्मौनेन हिंसां कायाद्यनीहया ॥ २३ ॥ कृपया भूतजं दुःखं दैवं जह्यात्समाधिना ॥ आत्मजं योगवीर्येण निद्रां सत्वनिषेवया ॥ २४ ॥ ॥

सुखमयाः । यथा शर्कराकंटकादिभ्य उपानत्पदः सुखं भवति ॥१७॥ उपस्थजिह्वेंद्रियजन्यसुखे लंपटो जनः श्वा[3]नवदाचरति ॥१८॥ असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशश्चेंद्रियचांचल्येन स्रवंति ॥१९॥ जनः क्षुधातृषेच्छाया अंतमन्नोदकादिलाभेन [illegible] । क्रोधस्यांतं हिंसया याति । तथापि दिशो जित्वा भुवं भुक्त्वापि लोभस्यांतं न याति ॥ २० ॥ बहुज्ञा अपि पंडिता असंतोषादधः पतंति ॥ २१ ॥ असंकल्पात्कामं जयेत् कामत्यागात् क्रोधम् । अर्थेऽनर्थदर्शनेन लोभम् । अद्वैतानुसंधानेन भयं च जयेत् ॥२२॥ आत्मानात्मविचारेण शोकमोहौ । साधुसेवया दंभम् । कामादिष्वनीहया हिंसां जयेत् ॥२३॥ प्राणायामेन देहजं दुःखं।

---

१ मनो नियम्य तदंतरायतया कर्माणि त्यजंतीत्यर्थः । २ यथा दशावरानित्युक्ते दशभ्योऽवरानित्यर्थो गृह्यते स शब्दभित् । ३ परवशतया वर्तते ।

कृपया भूतजं दुःखम् । सात्विकाहारादिना निद्रां जह्यात् ॥२४॥ सत्वेन रजस्तमसी । उपशमेन सत्वम् । एतत्सर्वं गुरौ भक्त्या पुरुषो जयेत् ॥ २५ ॥ ज्ञानप्रदे गुरौ यस्य मनुष्य इति बुद्धिस्तस्य शास्त्रश्रवणं गजस्नानवद्व्यर्थम् ॥२६॥ एष भगवान् योगेश्वरैर्विमृग्यचरणः । तमीश्वरं जनो नरं मन्यते ॥ २७ ॥ एवं सर्वैरुपायैः कामादिवेगं जित्वा जितेंद्रियो भूत्वा ध्यानपरो भवेत् ॥ २८ ॥ यथा कृष्यादीनि कर्माणि मोक्षं न साधयंति तथा बहिर्मुखस्येष्टापूर्तादिकर्माण्यपि मोक्षं न साधयंति ॥२९॥ यश्चित्तविजये प्रयत्नशीलः स संन्यासी निःसंगो भिक्षामितभोजी भूत्वा ॥ ३० ॥ शुचौ देशे आसनं संस्थाप्य तत्रोपविश्य ॐइत्युच्चारयन् ॥३१॥ पूरकुंभकरेचकैः प्राणापानौ संनिरुध्यात् । यावन्मनो विषयवासनास्त्यजेत् तावत्स्वनासाग्रनिरीक्षणः सन् ॥३२॥ यत्र यत्र मनो धावति ततस्तत

रजस्तमश्च सत्वेन सत्वं चोपशमेन च ॥ एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् ॥ २५॥ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ॥ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् ॥२६॥ एष वै भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ योगेश्वरैर्विमृग्यांघ्रिर्लोको वै मन्यते नरम् ॥२७॥ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः ॥ तदंता यदि नो योगानावहेयुः श्रमावहाः ॥२८॥ यथा वार्तादयो ह्यर्था योगस्यार्थं न बिभ्रति ॥ अनर्थाय भवेयुस्ते पूर्तमिष्टं तथाऽसतः ॥२९॥ यश्चित्तविजये यत्तः स्यान्निःसंगोऽपरिग्रहः ॥ एको विविक्तशरणो भिक्षुर्भिक्षामिताशनः ॥ ३० ॥ देशे शुचौ समे राजन्संस्थाप्यासनमात्मनः ॥ स्थिरं समं सुखं तस्मिन्नासीतर्ज्वंग ओमिति ॥३१॥ प्राणापानौ संनिरुंध्यात्पूरकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ॥३२॥ यतो यतो निःसरति मनः कामहतं भ्रमत् ॥ ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बुधः ॥३३॥ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः ॥ अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ॥३४॥ कामादिभिरनाविद्धं प्रशांताखिलवृत्ति यत् ॥ चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥३५॥ यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः ॥ यदि सेवेत तान्भिक्षुः स वै वांताश्यपत्रपः ॥३६॥ यैः स्वदेहः स्मृतो नात्मा मर्त्यो विट्क्रिमिभस्मसात् ॥ त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ॥३७॥ गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि ॥ तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलौल्यता ॥३८॥ आश्रमापसदा ह्येते खल्वाश्रमविडंबकाः ॥ देवमायाविमूढांस्तानुपेक्षेतानुकंपया ॥ ३९ ॥ आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः ॥ किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लंपटः ॥ ४० ॥ आहुः शरीरं रथमिंद्रियाणि हयानभीषून्मन इंद्रियेशम् ॥ वर्त्मानि मात्रा धिषणां च सूतं सत्वं बृहद्बंधुरमीशसृष्टम् ॥ ४१ ॥ ॥

आकृष्य हृदि रुंध्यात् ॥३३॥ एवमभ्यसतो यत्नशीलस्याल्पेन कालेन चित्तं शांतिं याति ॥ ३४ ॥ तच्च चित्तं ब्रह्मसुखस्पृष्टं सत्पुनः कदाऽपि विषयासक्तं न भवति ॥३५॥ यो यतिस्त्यक्तान् धर्मार्थकामान् पुनः सेवेत स वमनभक्षको निर्लज्जो ज्ञेयः ॥ ३६ ॥ कृमिविड्भस्मपरिणामं देहमात्मत्वेन ये गृह्णंति तेऽज्ञानिनः ॥३७॥ गृहस्थस्य क्रियात्यागो ब्रह्मचारिणो व्रतत्यागो वानप्रस्थस्य ग्रामसेवा संन्यासिनश्चेंद्रियैर्विषयसेवनम् ॥३८॥ एते आश्रमेष्वधमा आश्रमविडंबका ज्ञेयाः । तान् दययोपेक्षेत ॥३९॥ नर आत्मानं परं ब्रह्म जानीयाच्चेत् तर्हि लंपटः सन् कस्य हेतोर्देहं पुष्णाति ॥४०॥ अथ नृदेहस्य रथरूपकमाह । शरीरं

अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवम् ॥ धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यम् ॥४२॥ रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानोऽवमानोऽसूया च माया हिंसा च मत्सरः ॥४३॥ रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ॥ रजस्तमःप्रकृतयः सत्वप्रकृतयः क्वचित् ॥ ४४ ॥ यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरीष्ठचरणार्चनया निशातम् ॥ ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्ट उपशांत इदं विजह्यात् ॥४५॥ नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपंति ॥ ते दस्यवः सहयसूतममुं तमोंऽधे संसारकूप उरुमृत्युभये क्षिपंति ॥ ४६ ॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम् ॥ ४७ ॥ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांतिदम् ॥ दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः ॥ ४८ ॥ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ॥ पूर्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥ ४९ ॥ द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः ॥ अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ ५० ॥ अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः ॥ एकैकश्येनानुपूर्वं भूत्वा भूत्वेह जायते ॥५१॥ निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः ॥ इंद्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ॥ ५२ ॥ इंद्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ॥ वाचं वर्णसमाम्नाये तमोंकारे स्वरे न्यसेत् ॥ ओंकारं बिंदौ नादे तं तं तु प्राणे महत्यमुम् ॥ ५३ ॥ अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् ॥ विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ ५४ ॥ देवयानमिदं प्राहुर्भूत्वा भूत्वानुपूर्वशः ॥ आत्मयाज्युपशांतात्मा ह्यात्मस्थो न निवर्तते ॥ ५५ ॥

रथं वदंति । तस्य इंद्रियाणि तुरगाः । बुद्धिः सारथिः । मनो रश्मयः । शब्दादिविषया गंतव्यदेशाः । चित्तं बंधनम् ॥ ४१ ॥ धर्माधर्मौ चक्रे । साहंकारो जीवो रथी । प्रणवो धनुः । शुद्धो जीवः शरः । परब्रह्म लक्ष्यम् । यथा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यते ॥४२॥ रागः द्वेषः लोभः शोकः मोहः भयं मदः मानः अवमानः निंदा वंचना हिंसा मत्सरः ॥४३॥ प्रमादः क्षुधा निद्रा इत्यादयः शत्रवः ॥ ४४ ॥ एवं मनुष्यदेहरूपं रथमास्थाय ज्ञानखड्गेन तान् शत्रून् निर्जित्य अच्युताश्रयः शांतः स्वानंदे तुष्टः सन् इदं रथादिकमुपेक्षेत ॥४५॥ एवं न कृते त्वेते दुष्टेंद्रियवाजिसूताः प्रमत्तं जनं प्रवृत्तिमार्गे नीत्वा विषयदस्युषु क्षिपंति । ते दस्यव एनं सरथं संसारकूपे क्षिपंति ॥ ४६ ॥ प्रवृत्तं निवृत्तं च द्विविधं वैदिकं कर्म स्यात् । तत्र प्रवृत्तेन कर्मणा संसरति । निवृत्तेन मोक्षं याति ॥ ४७ ॥ हिंसामयं द्रव्यमयं काम्यं अग्निहोत्रं दर्शः पूर्णमासः चातुर्मास्यं पशुयागः सोमायागः ॥ ४८ ॥ वैश्वदेवः बलिहरणं देवालयवापीकूपतडागादिबंधनं एतत्सर्वं प्रवृत्ताख्यं कर्म जानीहि ॥४९॥ अनेन कर्मणा भूतसूक्ष्मयुतो भूत्वा धूमरात्रिकृष्णपक्षदक्षिणायनदेवताः प्राप्य सोमलोकं याति ॥५०॥ तत्र भोगान् भुक्त्वा पुनर्वृष्टिद्वारेणौषध्यन्नरेतःसाम्यप्राप्तिक्रमेण पृथिव्यां पुनःपुनर्जायते । एष प्रवृत्तिमार्गः ॥५१॥ गर्भाधानादिस्मशानांतसंस्कारैः संस्कृतो द्विजः ॥५२॥ इंद्रियाणि मनसि मनो वाचि वाचं वर्णसमुदाये तमोंकारे ॐकारं नादे नादं च ब्रह्मणि न्यसेत् ॥५३॥ अस्मिन्मार्गेऽग्निदिवसशुक्लपक्षोत्तरायणदेवताः प्राप्य सूर्यद्वारेण ब्रह्मलोकं गत्वा स्थूलसूक्ष्मकारणलयद्वारा आत्मनि स्थितः सन्न निवर्तते । एष निवृत्तिमार्गः ॥५४॥५५॥

एतौ पितृदेवमार्गौ यः शास्त्रचक्षुषा वेद स देहस्थोऽपि न मुह्यति ॥५६॥ देहानामादौ कारणत्वेनांतेऽवधित्वेन च तथा बहिर्भोग्यत्वेनांतर्भोक्तृत्वेन च यद्वस्तु तज्ज्ञानी स्वयमेव भवति अतो न मुह्येत् ॥ ५७ ॥ तर्कविरोधेन बाधितोऽपि प्रतिबिंबादिराभासो यथा वस्तुत्वेन कल्प्यते तद्वदिंद्रियग्राह्यं सर्वं कल्पितं न तु परमार्थतोऽस्ति ॥ ५८ ॥ पृथिव्यादिपंचमहाभूतानामैक्यबुद्ध्यालंबनं देहादि, संघातारंभपरिणामानां मध्ये किमपि न भवति अतो मृषैव ॥ ५९ ॥ महाभूतान्यपि मिथ्याभूतानि । यतस्तानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः । ते सूक्ष्मा अवयवास्तु नश्वरत्वान्मिथ्याभूताः ॥ ६० ॥ आत्मवस्तुनोऽविद्यया भेदे सति देहादौ य आत्मसादृश्यभ्रमो भाति सोऽपि मिथ्याभूताविद्याकल्पितत्वान्मिथ्याभूतः । तस्य भ्रमस्य विधिनिषेधपरं शास्त्रमपि स्वप्नमध्ये जाग्रत्सुषुप्ति-

य एते पितृदेवानामयने वेदनिर्मिते ॥ शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥५६॥ आदावंते जनानां सद्बहिरंतः परावरम् ॥ ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिस्त्वयं स्वयम् ॥५७॥ आबाधितोऽपि ह्याभासो यथा वस्तुतया स्मृतः ॥ दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितम् ॥५८॥ क्षित्यादीनामिहार्थानां छाया न कतमापि हि ॥ न संघातो विकारोऽपि न पृथङ् नान्वितो मृषा ॥५९॥ धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना ॥ न स्युर्ह्यसत्यवयविन्यसन्नवयवोंऽततः ॥६०॥ स्यात्सादृश्यभ्रमस्तावद्विकल्पे सति वस्तुनः ॥ जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥६१॥ भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः ॥ वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ॥६२॥ कार्यकारणवस्त्वैक्यमर्शनं पटतंतुवत् ॥ अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ॥६३॥ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणम् ॥ मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ॥६४॥ आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् ॥ यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥ यद्यस्य वा निषिद्धं स्याद्येन यत्र यतो नृप ॥ स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥ ६६ ॥ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ॥ गृहेऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ॥ ६७ ॥ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ॥ यत्पादपंकेरुहसेवया भवानहारषीन्निर्जितदिग्गजः क्रतून् ॥ ६८ ॥ अहं पुराऽभवं कश्चिद्गंधर्व उपबर्हणः ॥ नाम्नाऽतीते महाकल्पे गंधर्वाणां सुसंमतः ॥ ६९ ॥ ॥ ॥

व्यवस्थावन्मिथ्याभूतम् ॥ ६१ ॥ एवमुक्तमद्वैतं भावनात्रयेण द्रढयति । भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं चात्मसत्त्वानुभवेन यो जानाति स जाग्रदादीन् त्रीन् स्वप्नान् निवर्तयति ॥६२॥ तत्र पटतंतुवत्कार्यकारणवस्त्वैक्यस्य दर्शनं भावाद्वैतम् ॥६३॥ परे ब्रह्मणि सर्वकर्मार्पणं क्रियाद्वैतम् ॥ ६४ ॥ स्वस्य जायापुत्रादिसर्वप्राणिनां च यदभेदावलोकनं तद्द्रव्याद्वैतम् ॥६५॥ यस्य पुंसो यस्मिन्काले यद्द्रव्यं विहितं स्यात्स पुमान् तस्मिन्काले तेन द्रव्येण कर्माणि कर्तुमिच्छेत् ॥६६॥ एतैरन्यैश्च वेदोक्तैः कर्मभिर्वर्तमानः पुमान् गृहेऽपि श्रीकृष्णस्य गतिं प्राप्नुयात् ॥ ६७ ॥ हे नृपदेव, यथा यूयं श्रीकृष्णादेव हेतोरापद्गणादुत्तीर्णाः । यथा च भवान् दिशो जित्वा राजसूयादियज्ञान् कृतवान् तथा श्रीकृष्णादेव तारकात् संसारादप्युत्तरत ॥ ६८ ॥ श्रीकृष्णसेवा महतामवज्ञया भ्रश्यति ।

---

१ देहादीनां पंचमहाभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदः । २ उत्तीर्णा भवत ।

तत्कृपया च सिद्ध्यति तत्स्वोदाहरणेन दर्शयति । हे धर्म, पुरा गतकल्पेऽहमुपबर्हणो नाम गंधर्व आसम् ॥ ६९ ॥ रूपसौकुमार्यमाधुर्यैः प्रियदर्शनः स्त्रीणां प्रियः स्त्रीषु लंपटश्चासम् ॥७०॥ एकदा देवयज्ञे दक्षादिप्रजापतिभिर्हरिकथागायने गंधर्वा अप्सरोगणाश्चाहूताः ॥ ७१ ॥ तदा स्त्रीभिः परिवृतोऽहं गायन् तत्र गतः । तदा मया कृतामवज्ञां ज्ञात्वा दक्षादयस्त्वं शूद्रो भवेति शेपुः ॥ ७२ ॥ तेन शापेनाहं दासीपुत्रो जातः । तत्रापि ब्रह्मवादिनां सेवया बह्मपुत्रतां प्राप्तः ॥७३॥ हे राजन्, एवं ते गृहस्थाश्रमिणां धर्म उक्तः । येन गृहस्थः संन्यासिनां पदवीं प्राप्नुयात् ॥७४॥ हे युधिष्ठिर, यूयं नृलोके भूरिभागाः । यतो युष्माकं गृहेषु नराकारं श्रीकृष्णाख्यं गूढं परं ब्रह्म साक्षाद्वसति । अतस्तद्दर्शनार्थं मुनयः सर्वत आयांति ॥७५॥ यः परमानंदानुभवरूप आत्मा स भवतां

रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः ॥ स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलंपटः ॥ ७० ॥ एकदा देवसत्रे तु गंधर्वाप्सरसां गणाः ॥ उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥ अहं च गायंस्तद्विद्वांस्त्रीभिः परिवृतो गतः॥ ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ॥ याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥ ७२ ॥ तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम् ॥ शुश्रूषयानुषंगेण प्राप्तोऽहं ब्रह्मपुत्रताम् ॥ ७३ ॥ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः ॥ गृहस्थो येन पदवीमंजसा न्यासिनामियात् ॥७४॥ यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति ॥ येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगम् ॥७५ ॥ स वा अयं ब्रह्म महद्भिमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च ॥ ७६ ॥ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ७७ ॥ श्रीशुक उवाच ॥ इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः ॥ पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥७८॥ कृष्णपार्थावुपामंत्र्य पूजितः प्रययौ मुनिः ॥ श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥७९ ॥ इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः॥ देवासुरमनुष्याद्या लोका यत्र चराचराः ॥८०॥ इति श्रीमद्भागवते महा०सप्तमस्कंधे प्रह्लादानुचरिते युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नाम पंचदशोऽध्यायः ॥ १५ ॥ समाप्तोऽयं स्कंधः ॥ प्रह्लादक्लेशपरिहर्त्रे भगवते नृसिंहाय नमः ॥ ॥

मातुलपुत्रो हितकृत् पूज्यो गुरुश्चास्ति ॥ ७६ ॥ यस्य स्वरूपं शिवब्रह्मादिभिरपि इदमित्थमिति साक्षान्नोपवर्णितम् । स युष्माकं स्वयमेव प्रसन्नः । एवंभूतो भगवान् नः प्रसीदतु ॥ ७७ ॥ श्रीशुक उवाच ॥ हे राजन्, एवं नारदेनोक्तं वर्णाश्रमाचारयुक्तं धर्मं निशम्य प्रीतो धर्मराजः श्रीकृष्णं नारदं च पूजयामास ॥७८॥ पूजितो नारदः कृष्णपार्थावामंत्र्य ययौ । धर्मः कृष्णं परं ब्रह्म श्रुत्वा विस्मित आसीत् ॥ ७९ ॥ एवं ते दक्षकन्यानां वंशाः पृथक् कथिताः । यत्र देवासुरमनुष्याद्याश्चराचरा अभवन् ॥८०॥ इति श्रीमद्भागवतचू०सप्तमस्कंधे सदाचारनिरूपणं नाम पंचदशोऽध्यायः ॥१५ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥

इति सचूर्णिकश्रीमद्भागवते सप्तमस्कंधः समाप्तः

अथ सचूर्णिकश्रीमद्भागवते अष्टमस्कंधारंभः

श्रीगणेशाय नमः ॥ अथाष्टमस्कंधचूर्णिका प्रारभ्यते ॥ अथाष्टमे चतुर्विंशत्यध्यायैर्मनुवर्णनम् । तत्सुतैर्ऋषिदेवेंद्रैर्मूर्तिभिश्च हरेः सह ॥ १ ॥ तत्र तु प्रथमे स्वायंभुवः स्वारोचिषस्तथा । उत्तमस्तामसश्चेति चतुर्मनुनिरूपणम् ॥२॥ राजोवाच ॥ स्वायंभुवस्य मनोर्वंशो विस्तरान्मया श्रुतः । यत्र मनुकन्यासु मरीच्यादीनां पुत्रपौत्रादिरूपा सृष्टिर्जाता ॥ (यत्र च विविधा धर्माः संति) अथान्यान् मनून् वदस्व ॥१॥ यत्र यत्र मन्वंतरे हरेर्जन्मानि कर्माणि च कवयो वदंति तानि नो वद ॥ २ ॥ तथा भगवान् गतेषु मन्वंतरेषु यत्कृतवान् भविष्ये यत्करिष्यति वर्तमाने च यत्करोति तदपि ब्रूहि ॥ ३ ॥ श्रीशुक उवाच ॥ अस्मिन् कल्पे स्वायंभुवादयः षट् मनवो गताः । तत्राद्यो मनुस्ते कथितः ॥४॥ स्वायंभुवस्याकूतिदेवहूतिनाम्न्योः कन्ययोर्धर्मज्ञानोपदेशार्थं हरिः पुत्रतां प्राप्तः ॥ ५ ॥

ॐ नमो भगवते वासुदेवाय ॥ ॥ राजोवाच ॥ स्वायंभुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः ॥ यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः ॥ (यत्र धर्माश्च विविधाश्चातुर्वर्ण्याश्रिताः शुभाः) ॥ १ ॥ यत्र यत्र हरेर्जन्म कर्माणि च महीयसः ॥ गृणंति कवयो ब्रह्मंस्तानि नो वद शृण्वताम् ॥ २ ॥ यद्यस्मिन्नंतरे ब्रह्मन्भगवान्विश्वभावनः ॥ कृतवान्कुरुते कर्ता ह्यतीतेऽनागतेऽद्य वा ॥ ३ ॥ श्रीशुक उवाच ॥ मनवोऽस्मिन्व्यतीताः षट् कल्पे स्वायंभुवादयः ॥ आद्यस्ते कथितो यत्र देवादीनां च संभवः ॥४॥ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ॥ धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ॥ ५ ॥ कृतं पुरा भगवतः कपिलस्यानुवर्णितम् ॥ आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह ॥६॥ विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ॥ विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥ सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन् ॥ तप्यमानस्तपो घोरमिदमन्वाह भारत ॥ ८ ॥ मनुरुवाच ॥ (वासुदेवो वसत्येषु सर्वदेहेष्वनन्यदृक्) ॥ येन चेतयते विश्वं विश्वं चेतयते न यम् ॥ यो जागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः ॥ ९ ॥ आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् ॥ तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनम् ॥ १० ॥ यं न पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति ॥ तं भूतनिलयं देवं सुपर्णमुपधावत ॥ ११ ॥ न यस्याद्यंतौ मध्यं च स्वः परो नांतरं बहिः ॥ विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥ १२ ॥ ॥ ॥

तत्र कपिलस्य चरित्रं तृतीयस्कंधे कथितम् । यज्ञो यच्चकार तदाख्यास्ये ॥६॥ स्वायंभुवो मनुर्विरक्तः सन् राज्यं हित्वा सभार्यो वनं प्रविश्य ॥७॥ सुनंदायां नद्यां वर्षशतं एकेन पदा भुवं स्पृशन् घोरं तपस्तप्यमानः समाधावनुभूतमिदं सुप्तोच्छ्वसितवदुपदिशन्निवाह ॥ ८ ॥ मनुरुवाच ॥ (एषु सर्वदेहेषु वासुदेवो वसति) येन विश्वं चेतनीभवति विश्वं तु यं न चेतनीकरोति । अस्मिन् जने सुप्ते सति यः साक्षितया वर्तते । अयं जनस्तं न वेद । स तु इमं जनं वेद॥९॥ लोके सर्वमीश्वरेण सत्ताचैतन्याभ्यां संव्याप्तमतस्तेनैव दत्तेन धनेन हे जन, त्वं भोगान् भुंक्ष्व। कस्यचिदपि धनं मा कांक्षीः ॥१०॥ यं पश्यंतं जनो न पश्यति । यस्य पश्यतो ज्ञानं न नश्यति । तं देवं भजध्वम् ॥११॥ यस्याद्यंतादीनि न संति । विश्वस्य तु तानि यस्माद्भवंति ॥ १२ ॥ ॥ ॥

---

१ यज्ञकपिलमूर्तिभ्याम् ।

स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः ॥ धत्तेऽस्य जन्माद्यजयाऽऽत्मशक्त्या तां विद्ययोदस्य निरीह आस्ते॥१३॥ अथाग्रे ऋषयः कर्माणीहंतेऽकर्महेतवे ॥ ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥१४॥ ईहते भगवानीशो नहि तत्र विषज्जते ॥ आत्मलाभेन पूर्णार्थो नावसीदंति येऽनु तम् ॥१५॥ तमीहमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितम् ॥ नॄन् शिक्षयंतं निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनम् ॥ १६ ॥ श्रीशुक उवाच ॥ इति मंत्रोपनिषदं व्याहरंतं समाहितम् ॥ दृष्ट्वाऽसुरा यातुधाना जग्धुमभ्यद्रवन्क्षुधा ॥ १७ ॥ तांस्तथाऽवसितान्वीक्ष्य यज्ञः सर्वगतो हरिः ॥ यामैः परिवृतो देवैर्हत्वाऽशासत्त्रिविष्टपम् ॥ १८ ॥ स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत् ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः ॥ १९ ॥ तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ॥ ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः ॥ २० ॥ ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ॥ तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥ २१ ॥ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ॥ अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः ॥ २२ ॥ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ॥ पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप ॥ २३ ॥ वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः ॥ सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित् ॥ २४ ॥ धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः ॥ सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥ २५ ॥ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् ॥ भूतद्रुहो भूतगणांस्त्ववधीत्सत्यजित्सखः ॥ २६ ॥ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः ॥ पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥ २७ ॥ ॥

स विश्वकायो मायया विश्वस्य जन्मादीनि धत्ते । तां च मायां विद्यया हित्वा निष्क्रिय आस्ते ॥ १३ ॥ तस्मात्[1]कारणान्मुनय आदौ मोक्षार्थं कर्माणि कुर्वंति ॥१४॥ भगवानात्मलाभेन पूर्णार्थोऽस्ति । अतः कर्मसु न विषज्जते ॥ १५ ॥ तं भगवंतं रामकृष्णाद्यवतारैर्वेदोक्तं कर्म कुर्वंतं सर्वधर्मप्रवर्तकं प्रभुं शरणं प्रपद्ये ॥१६॥ श्रीशुक उवाच ॥ एवं समाधौ मंत्रोपनिषदमुच्चारयंतं मनुं दृष्ट्वा असुरा यातुधानाश्च तं भक्षयितुमभ्यद्रवन् ॥१७ ॥ तान् वीक्ष्य सर्वसाक्षी यज्ञावतारो भगवान् स्वपुत्रैर्यामैः परिवृतः सन् तत्रागत्य तान् हत्वा मन्वंतर[2]पर्यंतं स्वर्गं पालयामास ॥१८॥ द्वितीयोऽग्नेः पुत्रः स्वारोचिषो नाम मनुः ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तत्सुताः ॥१९॥ तत्र रोचन इंद्रः । तुषितादयो देवाः । ऊर्जस्तंभादयः सप्त ऋषयः ॥२० ॥ वेदशिरस ऋषेस्तुषितायां पत्न्यां विभुरिति नाम्नाऽवतारो जातः ॥२१॥ ब्रह्मचारिणस्तस्मादष्टाशीतिसहस्राणि ऋषयो ब्रह्मचर्यव्रतमशिक्षन् ॥२२॥ ततस्तृतीयः प्रियव्रतसुत उत्तमो नाम मनुः । पवनसृंजयाद्यास्तत्सुताः ॥२३॥ वसिष्ठात्मजाः प्रमदादयः सप्तर्षयः । सत्यादयो देवाः । सत्यजिदिंद्रः ॥२४॥ धर्मात्सूनृतायां पत्न्यां सत्यसेनो नाम हरेरवतारो जातः ॥२५॥ स इंद्रसखः सन् दुष्टान् यक्षराक्षसान् जघान ॥ २६ ॥ ततश्चतुर्थ उत्तमभ्राता तामसो नाम मनुः । पृथुः ख्यातिः नरः केतुः इत्याद्या दश तत्सुताः ॥२७ ॥

---

[1] यस्मादीश्वरः कर्म कृत्वा संत्यज्य नैष्कर्म्येणास्ते तस्मादित्यर्थः ।

[2] अस्मिन्स्वायंभुवे प्रथमे मन्वंतरे-स्वायंभुवो मनुः । प्रियव्रतोत्तानपादौ मनुपुत्रौ । यामादयो देवाः । मरीचिप्रमुखा ऋषयः । यज्ञोऽवतारः । स एवेंद्रः । एवं षड्विधम् ।

सत्यकाः हरयः वीराः एते देवाः । त्रिशिखः इंद्रः । ज्योतिर्धामादयः सप्त ऋषयः ॥ २८ ॥ अन्याश्च विधृतेस्तनया वैधृतयो नाम देवाः । यैः कालेन नष्टा वेदाः स्वतेजसा विधृताः ॥२९॥ तत्रापि हरिमेधसो विप्रस्य हरिण्यां स्त्रियां हरिर्जातः । येन ग्राहाद्गजेंद्रो मोचितः ॥ ३० ॥ राजोवाच ॥ हे शुक, हरिर्यथा गजेंद्रं मोचयामास तद्वयं श्रोतुमिच्छामहे ॥३१॥ यत्र यत्रोत्तमश्लोको हरिर्गीयते सा सा कथा सुमहत्पुण्या कल्याणकारका च ज्ञेया ॥ ३२ ॥ सूत उवाच ॥ राज्ञैवं भगवत्कथासु प्रेरितः शुकस्तं राजानं प्रतिनंद्य जगाद ॥३३॥ इति श्रीमद्भागवतचू० अष्टमस्कंधे प्रथमोऽध्यायः ॥१॥ ॥ तुर्यमन्वंतरे प्रोक्तं गजेंद्रस्य विमोक्षणम् । द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥१॥ द्वितीये तु गजेंद्रस्य गजीभिः क्रीडतो जले । दैवाद्ग्राहगृहीतस्य हरिस्मृतिरुदीर्यते ॥२॥ श्रीशुक उवाच ॥

सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ॥ ज्योतिर्धामादयः सप्त ऋषयस्तामसेंऽतरे ॥२८॥ देवा वैधृतयो नाम विधृतेस्तनया नृप ॥ नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥२९॥ तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधसः ॥ हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात् ॥३०॥ राजोवाच ॥ बादरायण एतत्ते श्रोतुमिच्छामहे वयम् ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥३१॥ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभम् ॥ यत्र यत्रोत्तमश्लोको भगवान्गीयते हरिः ॥३२॥ सूत उवाच ॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ॥ उवाच विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वताम् ॥३३॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे मन्वंतरानुचरिते प्रथमोऽध्यायः ॥१॥ श्रीशुक उवाच ॥ आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः ॥ क्षीरोदेनावृतः श्रीमान्योजनायुतमुच्छ्रितः ॥१॥ तावता विस्तृतः पर्यक् त्रिभिः शृंगैः पयोनिधिम् ॥ दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥२॥ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसाम् ॥३॥ स चावनिज्यमानांघ्रिः समंतात्पयऊर्मिभिः ॥ करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥ ४ ॥ सिद्धचारणगंधर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ॥५॥ यत्र संगीतसन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंति हरयः श्लाघिनः परशंकया ॥६॥ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥ ७ ॥ सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभांब्वनिलैर्युतः ॥ ८ ॥ तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ॥ उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥ ९ ॥ ॥

हे राजन्, कश्चित्त्रिकूटनामा गिरिश्रेष्ठः क्षीरसमुद्रेणावृतो दशसहस्रयोजनोच्छ्रितो दशसहस्रयोजनानि परितो विस्तृतश्चास्ति ॥१॥ स रौप्यलोहहिरण्मयैः शिखरैर्दिंश आकाशं च प्रकाशयन्नास्ते ॥२॥ अन्यै रत्नधातुमयैः शिखरैर्नानावृक्षलतागुल्मैश्च युक्तोऽस्ति ॥३॥ स च क्षीरसमुद्रलहरीभिरासमंतात्क्षालितमूलप्रांतः सन् हरिन्मरकतपाषाणैः श्यामवर्णां भूमिं करोति ॥४॥ यस्य गुहासु सिद्धचारणगंधर्वविद्याधरकिन्नरगणा अप्सरोगणाश्च क्रीडंति ॥५॥ यत्र किन्नरादीनां गायनप्रतिध्वनिना सिंहा अन्यसिंहशंकया गर्जंति ॥६॥ स पर्वतो नाना वनपशूनां समूहयुक्ताभिर्द्रोणीभिः शोभायमान आस्ते । यत्रोद्यानेषु मधुरस्वना विहंगमाः संति ॥७॥ यः स्वच्छोदकैः सरित्सरोभिर्मणिमयवालुकैः पुलिनैश्च युक्तः ॥ ८ ॥ तस्य चित्रकूटस्य द्रोण्यां सुरस्त्रीणां क्रीडास्थानं वरुणस्य ऋतुमन्नामोद्यानमस्ति ॥ ९ ॥

स च चित्रकूटो मंदारपारिजाताशोकचंपकपनसाम्रैः ॥१०॥ पूगनारिकेरखर्जूरबीजपूरकमधूकतालतमालार्जुनैः ॥ ११ ॥ उदुंबरप्लक्षवटपलाशचंदननिंबकोविदारदेवदारुभिः ॥१२॥ द्राक्षेक्षुरंभाजंबूबदरीबिल्वकपित्थभल्लातकादिभिश्च वृक्षैर्युतोऽस्ति ॥१३॥ तत्रैकं सरोवरं चास्ति । कथंभूतम् । लसत्सुवर्णकमलम् ॥१४॥ कुमुदोत्पलकह्लारादीनां शोभया शोभितम् ॥१५ ॥ हंसकारंडवचक्रवाकसारसजलकुक्कुटटिट्टिभजलकाककुलैः कूजितम् ॥१६॥ मत्स्यकूर्मादीनां संचारेण व्याप्तोदकम् । कदंबवेतसनलनीपवंजुलकैर्वृतम् ॥१७ ॥ कुंदकुरबकाशोकशिरीषकुटजेंगुदैः नागचंपकपुन्नागजातिभिः ॥१८॥ मल्लिकाशतपत्रमाधवीभिश्च शोभितम्

सर्वतोऽलंकृतं दिव्यैर्नित्यं पुष्पफलद्रुमैः ॥ मंदारैः पारिजातैश्च पाटलाशोकचंपकैः ॥१०॥ चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥ क्रमुकैर्नालिकेरैश्च खर्जूरैर्बीजपूरकैः ॥११॥ मधूकैः सालतालैश्च तमालैरसनार्जुनैः ॥ अरिष्टोदुंबरप्लक्षैर्वटैः किंशुकचंदनैः ॥ १२ ॥ पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः ॥ द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः ॥१३॥ बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः ॥ तस्मिन्सरः सुविपुलं लसत्कांचनपंकजम् ॥ १४ ॥ कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितम् ॥ मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः ॥ १५ ॥ हंसकारंडवाकीर्णं चक्राव्हैः सारसैरपि ॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजितम् ॥ १६ ॥ मत्स्यकच्छपसंचारचलत्पद्मरजः पयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतम् ॥ १७ ॥ कुंदैः कुरबकाशोकैः शिरीषैः कुटजेंगुदैः ॥ कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥१८॥ मल्लिकाशतपत्रैश्च माधवीजालकादिभिः ॥ शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः ॥ १९॥ तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् ॥ सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् ॥२०॥ यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः ॥ महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः शरभाश्चमर्यः ॥ २१ ॥ वृका वराहा महिषर्क्षशल्या गोपुच्छसालावृकमर्कटाश्च ॥ अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण ॥ २२ ॥ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ॥ गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥ २३ ॥ सरोऽनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः ॥ वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद्द्रुतम् ॥२४॥ विगाह्य तस्मिन्नमृतांबु निर्मलं हेमारविंदोत्पलरेणुवासितम् ॥ पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः ॥२५॥ स्वपुष्करेणोद्धृतसीकरांबुभिर्निपाययन्संस्नपयन्यथा गृही ॥ घृणी करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ॥ २६ ॥ ॥

॥१९॥तस्मिन् चित्रकूटपर्वते पर्वतवनाश्रयेण स्थितो गजेंद्रो हस्तिनीभिः सह सकंटकवृक्षकीचकवेणुवेत्रादिगुल्मं भंजन् सन् बभ्राम ॥२०॥ यस्य गंधमात्रात्सिंहगजेंद्रव्याघ्रादयो व्यालमहोरगाश्च भयात्पलायंते ॥२१॥ वृकवराहमहिषर्क्षशल्यगोपुच्छश्वानमर्कटादयस्तु तद्दृष्टिपथं हित्वाऽन्यत्र चरंति ॥२२॥ स गजेंद्र ऊष्मणा तप्तः सन् अन्यैर्गजैर्हस्तिनीभिर्गजशावकैश्चानुद्रुतः सन् स्वगरिम्णा पर्वतं कंपयन् सन्॥२३ ॥ दूरादेव कमलरेणुमिश्रं सरोवरानिलं जिघ्रन् तृषार्दितेन स्वयूथेन वृतः सन् त्वरया तत्सरोवरसमीपं जगाम॥२४॥ ततस्तत्सरोवरं प्रविश्य गतश्रमः सन् निर्मलं हेमकमलरेणुसुवासितं जलं यथेच्छं पपौ॥ २५॥ ततः करेणूः कलभांश्च स्नप-

यन् पाययन् सन् प्राप्तं स्वसंकटं न ज्ञातवान् ॥२६ ॥ तत्र कश्चिद्दैवप्रेरितो बलवान् ग्राहो रुषा तं चरणेऽग्रहीत् । एवं दुःखं प्राप्तो गजो यथाबलं स्वमोचने
आकर्षणादिना यत्नं चकार ॥२७॥ तथा पीडितं तं गजेंद्रमन्ये गजा मोचयितुं नाशकन् । करेणव आतुरं यूथपतिं दृष्ट्वा केवलं विचुक्रुशुः ॥२८॥ एवं गजेंद्रनक्रयोर्मिथो
विकर्षणेन युद्धं कुर्वतोःसतोर्वर्षसहस्रं जगाम । तद्दृष्ट्वा देवा आश्चर्यममंसत ॥ २९ ॥ ततो दीर्घेण कालेन गजेंद्रबलं क्षीणमभूत् । नक्रस्य बलाधिक्यं
जातम् ॥३०॥ एवं गजेंद्रो यदा संकटं प्राप तदाऽकस्मादिमां बुद्धिं प्राप्तवान् ॥ ३१ ॥ तामेवाह । अहो इमे गजा आतुरं मां मोचितुं न समर्थाः । तदा
हस्तिन्यः कुतः समर्था भवंति । अहं ग्राहरूपेण दैवपाशेन वेष्टितोऽस्मि । तथापि तमीश्वरं शरणं यामि ॥ ३२ ॥ य ईशः प्रचंडवेगेन धावतो मृत्युसर्पाद्भीतं

तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत् ॥ यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे॥२७॥
तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ॥ विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन्॥२८॥
नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः ॥ २९ ॥ ततो
गजेंद्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्सकलं जलौकसः ॥ ३० ॥
इत्थं गजेंद्रः स यदाऽऽप संकटं प्राणस्य देही विवशो यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत॥३१॥
नमामि मे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुम् ॥ ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम्
॥३२॥ यः कश्चनेशो बलिनोंऽतकोरगात्प्रचंडवेगादभिधावतो भृशम्॥ भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि॥३३॥
इति श्री॰म॰अष्ट॰मन्वंतरा नुवर्णने गजेंद्रोपाख्याने द्वितीयोऽध्यायः॥२॥ ॥ श्रीशुक उवाच॥ एवं व्यवसितो बुद्ध्या समाधाय मनो
हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥ १ ॥ गजेंद्र उवाच॥ ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् ॥ पुरुषायादिबीजाय
परेशायाभिधीमहि ॥२॥ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ॥ योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ॥३॥ यः स्वात्मनीदं
निजमाययाऽर्पितं क्वचिद्विभातं क्व च तत्तिरोहितम् ॥ अविद्धदृक्साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ॥४॥
कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ॥ तमस्तदासीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ॥ ५ ॥

जनं परिपाति तमहं शरणं गच्छामि ॥३३॥ इति श्रीमद्भागवतचू॰ अष्ट॰ गजेंद्रोपाख्याने द्वितीयोऽध्यायः॥२॥ ॥ तृतीये तु गजेंद्रेण स्तुतो हरिरुपेत्य तम् ।
समुद्दधार तं ग्राहाद्ग्राहं देवलशापतः ॥ १ ॥ श्रीशुक उवाच ॥ एवं बुद्ध्या विचार्य गजेंद्रो मनः स्थिरं कृत्वा इंद्रद्युम्नसंज्ञके पूर्वजन्मनि शिक्षितं श्रेष्ठं स्तोत्रं
जजाप ॥१॥ गजेंद्र उवाच ॥ यतश्चिद्रूपाद्देहादिकं सचेतनं भवति तस्मै पुरुषायादिबीजाय परमेश्वराय नमनं ध्यायेम ॥ २ ॥ यस्मिन्नधिष्ठाने यत उपादानाद्येन
कर्त्रा यश्च स्वयमेवेदं भवति । यश्च कार्यकारणात्परस्तं स्वतःसिद्धं शरणं व्रजामि ॥ ३ ॥ यः स्वात्मनि विश्वं क्वचिल्लीनं क्वचित्प्रकाशितं चेक्षते । स मां
रक्षतु ॥४॥ कालेन सर्वेषु लोकेषु नाशं प्राप्तेषु सत्सु तदा गंभीरं तम आसीत् । तस्य पारे यो विराजते ॥५॥ ॥ ॥

यस्य च स्वरूपं देवा ऋषयश्च न विदुस्तं कोऽन्यो जंतुर्ज्ञातुं वक्तुं वा समर्थः। सोऽतर्क्यचरित्रो मां रक्षतु ॥६॥ यस्य पदं द्रष्टुमिच्छवो मुनयो वने ब्रह्मचर्यादि व्रतं चरंति स मे गतिरस्तु ॥७॥ अपि च। यस्य जन्मकर्मादीनि न संति। तथापि लोकानामुत्पत्तिनाशार्थं जन्मकर्माणि यो धारयति ॥८॥ तस्मै परेशाय ब्रह्मणेऽनंतशक्तये नमः ॥९॥ आत्मप्रदीपाय साक्षिणे मनोवचसोर्विदूराय परमात्मने नमः ॥१०॥ शुद्धसत्वेन प्राप्याय कैवल्यनाथाय मोक्षानंदानुभूतये नमोऽस्तु ॥११॥ सत्वादिगुणधर्मानुकारिणे ज्ञानघनाय नमः ॥१२॥ क्षेत्रज्ञाय सर्वाध्यक्षाय पुरुषाय मूलप्रकृतये[1] नमः ॥१३॥ सर्वेंद्रियगुणद्रष्ट्रे[2] सर्वेंद्रियवृत्तिज्ञापकाय ।

न यस्य देवा ऋषयः पदं विदुर्जंतुः पुनः कोऽर्हति गंतुमीरितुम् ॥ यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स माऽवतु
॥ ६ ॥ दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः सुसाधवः ॥ चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः
॥ ७ ॥ न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ॥ तथापि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकालमृच्छति ॥ ८ ॥ तस्मै नमः परेशाय ब्रह्मणेऽनंतशक्तये ॥ अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥ नम आत्मप्रदीपाय
साक्षिणे परमात्मने ॥ नमो गिरां विदूराय मनसश्चेतसामपि ॥१०॥ सत्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ॥ नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥११॥ नमः शांताय घोराय मूढाय गुणधर्मिणे ॥ निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥ १२ ॥
क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ॥ पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥१३॥ सर्वेंद्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ॥ असता
छाययोक्ताय सदाभासाय ते नमः ॥ १४ ॥ नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय ॥ सर्वागमाम्नायमहार्णवाय
नमोऽपवर्गाय परायणाय ॥ १५ ॥ गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय ॥ नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥ १६ ॥ मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ॥ स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ॥ १७ ॥ आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसंगविवर्जिताय ॥
मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ॥ १८ ॥ यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति ॥ किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् ॥ १९ ॥ ॥ ॥

अहंकारादिप्रपंचेन प्रतिबिंबेन बिंबमिव दर्शिताय सदाभासाय[3] ते नमः ॥ १४ ॥ सर्वकारणरूपाय निष्कारणाय सर्वागमाम्नायमहार्णवाय[4] मोक्षरूपाय नमः ॥ १५ ॥ आत्मतत्त्वभावनया विधिनिषेधातीतानां साधूनां स्वप्रकाशाय ॥ १६ ॥ मादृक्प्रपन्नपशुपाशविमोक्षणाय करुणानिधये नमोऽस्तु ॥ १७ ॥ देहपुत्राप्तवित्तजनेषु सक्तैः प्राप्तुमशक्याय ज्ञानात्मने भगवते ईश्वराय नमः ॥ १८ ॥ यं धर्मार्थकाममोक्षकामा भजंतः संतः कामितं धर्मादिफलं प्राप्नुवंत्येव। स मे केवलं विमोक्षणमेव करोतु ॥ १९ ॥ ॥ ॥ ॥

---

[1] मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतवे। [2] सर्वेंद्रियाणां ये गुणा विषयास्तेषां द्रष्ट्रे। [3] सद्रूपो विषयेष्वाभासो यस्य तस्मै। [4] सर्वे आगमाः पंचरात्रादयः आम्नाया वेदाश्च तेषां महार्णवाय पर्यवसानस्थानाय।

अहो यस्यैकांतभक्ताः सुमंगलस्य तच्चरित्रस्य गायनं कृत्वा आनंदसमुद्रमग्नाः संतः किमपि न वांछंति ॥ २० ॥ तमाद्यमक्षरमनंतं परिपूर्णं परं ब्रह्म स्तौमि ॥२१॥ ब्रह्मादयो देवा वेदा लोकाश्च यस्यांशेन कृताः ॥२२॥ यथाग्नेर्ज्वाला उद्भवंति लीयंते च तथा मनोबुद्ध्यादिगुणप्रवाहो यतो भवति लीयते च ॥२३॥ यश्च देवोऽसुरो मनुष्यस्तिर्यक् स्त्री षंढः पुमांश्च न भवति । स परमात्मा मद्विमोक्षाय प्रकटो भवतु ॥ २४ ॥ अहं ग्राहाच्छरीरमोक्षणेन जीवितुं नेच्छामि । किंतु यस्य कालेन नाशो नास्ति तस्यात्मप्रकाशावरणस्याज्ञानस्य मोक्षमिच्छामि ॥२५॥ सोऽहं मुमुक्षुर्विश्वात्मानमजं ब्रह्म केवलं प्रणतोऽस्मि । न तु तं जानामि ॥२६॥ योगिनो यं हृदि पश्यंति तं योगेशं नतोऽस्मि ॥२७॥ हे ईश, प्रपन्नपालाय दुरंतशक्तये तुभ्यं नमोऽस्तु ॥२८॥ अयं जनः स्वमात्मानं न वेद । तं

एकांतिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः ॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः ॥ २० ॥ तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् ॥ अतींद्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीडे ॥२१॥ यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ॥ नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥२२॥ यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृत्स्वरोचिषः ॥ तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनःखानि शरीरसर्गाः ॥ २३ ॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षंढो न पुमान्न जंतुः ॥ नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥ २४ ॥ जिजीविषे नाहमिहामुया किमंतर्बहिश्चावृतयेभयोन्या ॥ इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षम् ॥ २५ ॥ सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ॥ विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥२६॥ योगरंधितकर्माणो हृदि योगविभाविते ॥ योगिनो यं प्रपश्यंति योगेशं तं नतोऽस्म्यहम् ॥ २७ ॥ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालाय दुरंतशक्तये कदिंद्रियाणामनवाप्यवर्त्मने ॥ २८ ॥ नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतम् ॥ तं दुरत्ययमाहात्म्यं भगवंतमितोऽस्म्यहम् ॥२९॥ श्रीशुक उवाच ॥ एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः ॥ नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ॥ ३० ॥ तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ॥ छंदोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेंद्रः ॥ ३१ ॥ सोंऽतःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ॥ उत्क्षिप्य सांबुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते ॥ ३२ ॥ ॥ ॥

दुरत्ययमाहात्म्यं भगवंतमाश्रितोऽस्मि ॥ २९ ॥ श्रीशुक उवाच ॥ एवं मूर्तिभेदं विना वर्णितं परं तत्त्वं येन तं गजेंद्रं विविधमूर्तिभेदाभिमानिनो ब्रह्मादयो यदा नोपजग्मुस्तदा तत्र सर्वदेवमयो हरिराविरासीत् ॥३०॥ तदेवाह । दुःखितं गजेंद्रं ज्ञात्वा तेन कृतं स्तोत्रं च श्रुत्वा स्तुवद्भिर्देवैः सह जगन्निवासो हरिर्गरुडमारुह्य चक्रं गृहीत्वा यत्र गजेंद्रस्तत्र प्राप्तः ॥ ३१ ॥ तदा गजेंद्रः सरसि बलीयसा ग्राहेण गृहीत आर्तः सन् गरुडे धृतचक्रं हरिं दृष्ट्वा शुंडोद्धृतं कमलं प्रक्षिप्य हे नारायण, हे अखिलगुरो हे भगवन् ते नमः इति गिरं जगाद ॥ ३२ ॥ ॥ ॥

तदा हरिः पीडितं गजेंद्रं वीक्ष्य गरुडादवतीर्य कृपया सरोवरात्सग्राहं तमुज्जहार । ततो देवेषु पश्यत्सु सत्सु हरिश्चक्रेण ग्राहमुखं विदार्य गजेंद्रं मोचयामास ॥३३॥ इति श्रीमद्भागवतचू० अष्ट० तृतीयोऽध्यायः ॥३॥ ॥ चतुर्थे तु तयोर्ग्राहः प्राप गंधर्वतां पुनः । गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदम् ॥ १ ॥ श्रीशुक उवाच ॥ तदा देवर्षिगंधर्वब्रह्मशिवादयो हरेः कर्म शंसंतः संतः पुष्पवृष्टिं चक्रुः ॥१॥ देवदुंदुभयो नेदुः । गंधर्वा ननृतुर्जगुश्च । ऋषयस्तुष्टुवुः ॥ २ ॥ हे राजन्, योऽसौ ग्राहः स परमाश्चर्यरूपधृक् हूहूर्गंधर्वो जातः । असौ देवल[1]शापेन पूर्वं ग्राहोऽभूत् ॥३॥ स उत्तमश्लोकं हरिं प्रणम्य तस्य महिमानमगायत

तं वीक्ष्य पीडितमजः सहसाऽवतीर्य सग्राहमाशु सरसः कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुच्छ्रियाणाम् ॥ ३३ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे गजेंद्रमोक्षणे तृतीयोऽध्यायः ॥ ३ ॥ ॥ श्रीशुक उवाच ॥ तदा
देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः ॥ मुमुचुः कुसुमासारं शंसंतः कर्म तद्धरेः ॥ १ ॥ नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः ॥
ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम् ॥ २ ॥ योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् ॥ मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ॥ ३ ॥ प्रणम्य शिरसाऽधीशमुत्तमश्लोकमव्ययम् ॥ अगायत यशोधाम कीर्तन्यगुणसत्कथम् ॥ ४ ॥ सोऽनुकंपित ईशेन
परिक्रम्य प्रणम्य तम् ॥ लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ ५ ॥ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् ॥
प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ॥ ६ ॥ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्तमः ॥ इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥ स एकदाऽऽराधनकाल आत्मवान्गृहीतमौनव्रत ईश्वरं हरिम् ॥ जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥ ८ ॥ यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः ॥ तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥ तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य ॥ विप्रावमंता विशतां तमोऽधं यथा गजः स्तब्धमतिः स एव ॥ १० ॥ श्रीशुक उवाच ॥ एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः ॥ इंद्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन्
॥ ११ ॥ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशनीम् ॥ हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः ॥ १२ ॥ ॥

॥४॥ तत ईशेनानुकंपितः स पुनस्तं प्रणम्य परिक्रम्य च स्वं गंधर्वलोकमगमत् ॥५॥ ततो गजेंद्रो भगवत्स्पर्शेनाज्ञानबंधनान्मुक्तः सन् चतुर्भुजं भगवद्रूपं प्राप ॥६॥ हे नृप, स पूर्वं द्रविडदेशे पांड्यो विष्णुव्रतपरायण इंद्रद्युम्ननामा राजाऽऽसीत् ॥ ७ ॥ स एकदा मलयाचले धृतमौनो जटाधरोऽच्युतं पूजयामास ॥८॥ तत्र यदृच्छया सशिष्योऽगस्त्य आगमत् । तदा तमकृतार्हणं तूष्णीं स्थितं राजानं वीक्ष्य मुनिश्चुकोप ॥९॥ आह च । अयं विप्रावमंता गजवत् स्तब्धमतिः । अतो गज एव भवतु ॥१०॥ श्रीशुक उवाच ॥ एवं शप्त्वाऽगस्त्यो गतः । इंद्रद्युम्नोऽपि दैवप्रापितं सर्वं पश्यन् ॥ ११ ॥ आत्मस्मृतिविनाशिनीं गज-

---

१ एवंहीतिहासोत्तमे कथा । हूहूर्गंधर्वः सरसि स्त्रीभिः क्रीडन् स्नातुं प्रविष्टं देवलं पादे प्रगृह्य विचकर्ष । स च कुपितो ग्राहो भवेति शशाप । तेन च प्रसादितः सन्नुवाच । एवमेव गजेंद्रं गृहीष्व । ततश्च गजेंद्रमुद्धरन् हरिस्त्वामपि मोचयिष्यतीति ।

योनिं प्राप्तः । तथापि हरिपूजनसामर्थ्येन गजत्वेऽप्यात्मस्मृतिर्जाता ॥१२॥ एवं भगवान् गजेंद्रं विमोक्ष्य पार्षदस्वरूपं प्रापितेन गजेंद्रेण युक्तः सन् देवगंधर्वादिभिः स्तूयमानो गरुडारूढो भूत्वा वैकुंठं जगाम ॥१३॥ हे राजन्, एवं मया तव गजेंद्रमोक्षणरूपः श्रीकृष्णानुभावो वर्णितः । इदं गजेंद्रमोक्षणं शृण्वतां स्वर्गप्राप्तिकरं यशोवृद्धिकरं पापनाशकं दुःस्वप्ननाशकं चास्ति ॥१४॥ अतः श्रेयस्कामा द्विजाः प्रातरुत्थाय दुःस्वप्नाद्युपशांतय एतत्कीर्तयंति ॥ १५ ॥ हे राजन्, तदा सर्वभूतानां शृण्वतां सतां श्रीहरिर्गजेंद्रमिदमाह ॥ १६ ॥ श्रीभगवानुवाच ॥ हे गजेंद्र, ये मां त्वामिदं सरो गिरिकंदरकाननं वेत्रकीचकवेणूनां गुल्मानि कल्पवृक्षान् ॥१७॥ ब्रह्मणो मे शिवस्य च स्थानानि । क्षीरसमुद्रं श्वेतद्वीपम् ॥ १८ ॥ श्रीवत्सं कौस्तुभं मालां गदां सुदर्शनं शंखं गरुडम्

एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः ॥ गंधर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात् ॥ १३ ॥ एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणम् ॥ स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वताम् ॥ १४ ॥ यथानुकीर्तयंत्येतच्छ्रेयस्कामा द्विजातयः ॥ शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये ॥ १५ ॥ इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम ॥ शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः ॥ १६ ॥ श्रीभगवानुवाच ॥ ये मां त्वां च सरश्चेदं गिरिकंदरकाननम् ॥ वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥ १७ ॥ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ॥ क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम् ॥ १८ ॥ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम ॥ सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरम् ॥ १९ ॥ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयाम् ॥ ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥ २० ॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ॥ कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनम् ॥ २१ ॥ प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्ययम् ॥ दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥ २२ ॥ गंगां सरस्वतीं नंदां कालिंदीं सितवारणम् ॥ ध्रुवं ब्रह्मऋषीन्सप्त पुण्यश्लोकांश्च मानवान् ॥ २३ ॥ उत्थायापररात्रांते प्रयताः सुसमाहिताः ॥ स्मरंति मम रूपाणि मुच्यंते ह्येनसोऽखिलात् ॥२४॥ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये ॥ तेषां प्राणात्यये चाहं ददामि विमलां मतिम् ॥ २५ ॥ श्रीशुक उवाच ॥ इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम् ॥ हर्षयन्विबुधानीकमारुरोह खगाधिपम् ॥ २६ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे गजेंद्रमोक्षणं नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ गजेंद्रमोचकाय भगवते हरये नमो नमः ॥ ॥ ॥

॥१९॥ शेषं लक्ष्मीं ब्रह्माणं नारदं शंकरं प्रह्लादम् ॥२०॥ मत्स्याद्यवतारकर्माणि सूर्यं सोमम् ॥२१॥ प्रणवं सत्यं गोविप्रान् भक्तिलक्षणं धर्मम् ॥ २२ ॥ गंगां सरस्वतीं नंदां कालिंदीमैरावतं ध्रुवं सप्तर्षीन् पुण्यश्लोकान् मानवान् ॥२३॥ एता मे विभूतीरपररात्रांते उत्थाय ये स्मरंति ते पापान्मुच्यंते ॥२४॥ ये प्रातस्त्वत्कृतेन स्तोत्रेण मां स्तुवंति तेषां प्राणात्यये विमलां बुद्धिं ददामि ॥ २५ ॥ श्रीशुक उवाच ॥ एवमुक्त्वा भगवान् शंखं वादयित्वा देवान् हर्षयन् वैकुंठं गंतुं गरुडमारुरोह ॥ २६ ॥ इति श्रीमद्भागवतचूर्णिकायां अष्ट० चतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥

अमृताख्यानमष्टाभिरध्यायैरनुवर्ण्यते ॥ स्वभक्तपक्षपातेन यत्र योषायितं प्रभोः ॥ १ ॥ पंचमे पंचमं चाथ षष्ठं वा कथयन् मनुम् । विप्रशापाच्च निःश्रीकैः कृता देवैर्हरेः स्तुतिः ॥२॥ श्रीशुक उवाच ॥ हे राजन्, हरेः पापनाशकं गजेंद्रमोक्षणरूपं कर्म ते कथितम् । अथ रैवतमन्वंतरं शृणु ॥ १ ॥ पंचमस्तामससोदरो रैवतो नाम मनुः । अर्जुनबलिविंध्यादयस्तस्य पुत्राः ॥२॥ विभुरिंद्रः । भूतरयाद्या देवाः । हिरण्यरोमादयः सप्त ऋषयः ॥३॥ शुभ्रस्य विकुंठायां पत्न्यां वैकुंठो नामावतारो जातः ॥४॥ लक्ष्म्याः प्रियकामनया येन वैकुंठलोको निर्मितः ॥५॥ तस्य हरेः प्रभावो[1] गुणाश्च[2] तृतीयस्कंधादिषु कथिताः ॥ ६ ॥ षष्ठश्चाक्षुषनामा मनुः । पूरुपूरुषसुद्युम्नाद्यास्तत्पुत्राः ॥७॥ मंत्रद्रुम इंद्रः । आप्यादयो देवाः । हविष्मद्वीरकादयः सप्तर्षयः ॥ ८ ॥ वैराजात्संभूत्यामजितो नामावतारो जातः

॥ श्रीशुक उवाच ॥ राजन्नुदितमेतत्ते हरेः कर्माघनाशनम्॥ गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु ॥१॥ पंचमो रैवतो नाम मनुस्तामससोदरः ॥ बलिविंध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥ २ ॥ विभुरिंद्रः सुरगणा राजन्भूतरयादयः ॥ हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ॥ ३ ॥ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः ॥ तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयम् ॥ ४ ॥ वैकुंठः कल्पितो येन लोको लोकनमस्कृतः ॥ रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ५ ॥ तस्यानुभावः कथितो गुणाश्च परमोदयाः ॥ भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ॥ ६ ॥ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः ॥ पूरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ७ ॥ इंद्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गणाः ॥ मुनयस्तत्र वैराजन्हविष्मद्वीरकादयः ॥ ८ ॥ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः ॥ अजितो नाम भगवानंशेन जगतः पतिः ॥ ९ ॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा ॥ भ्रममाणोंऽभसि धृतः कूर्मरूपेण मंदरः ॥ १० ॥ राजोवाच ॥ यथा भगवता ब्रह्मन्मथितः क्षीरसागरः ॥ यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना ॥ ११ ॥ यथाऽमृतं सुरैः प्राप्तं किंचान्यदभवत्ततः ॥ एतद्भगवतः कर्म वदस्व परमाद्भुतम् ॥ १२ ॥ त्वया संकथ्यमानेन महिम्ना सात्वता पतेः ॥ नातितृप्यति मे चित्तं सुचिरं तापतापितम् ॥ १३ ॥ ॥ सूत उवाच ॥ संपृष्टो भगवानेवं द्वैपायनसुतो द्विजाः ॥ अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥ १४ ॥ ॥ श्रीशुक उवाच ॥ यदा युद्धेऽसुरैर्देवा बाध्यमानाः शितायुधैः ॥ गतासवो निपतिता नोत्तिष्ठेरन्स्म भूयशः ॥ १५ ॥ ॥ ॥

॥ ९ ॥ येन पयोनिधिं निर्मथ्य सुराणाममृतं साधितम् । कूर्मरूपेणोदके मंदरपर्वतो धृतः ॥ १० ॥ राजोवाच ॥ हे ब्रह्मन्, यथा भगवता क्षीरसागरो मथितः । यदर्थं पर्वतं कूर्मरूपेण दधार ॥ ११ ॥ यथा च सुरैरमृतं प्राप्तम् । समुद्रमथनादन्यच्च किमभवत् । तद्धरेः परमाद्भुतं कर्म वद ॥ १२ ॥ त्वया कथ्यमानेन हरेर्महिम्ना मे चित्तं न तृप्यति ॥ १३ ॥ सूत उवाच ॥ हे ऋषयः, एवं पृष्टः शुको हरेर्माहात्म्यं कथितुं प्रारंभं कृतवान् ॥१४॥ श्रीशुक उवाच ॥ यदा युद्धे असुरैः पीड्यमाना देवा गतप्राणा भूत्वा पतिताः संतो न पुनर्जीवंतिस्म ॥ १५ ॥ ॥ ॥

---

१ सनकादिशापेन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां वराहादिरूपेण युद्धादिलक्षणः प्रभावः । २ गुणाश्च ब्रह्मण्यतादयः ।

किंच । हे नृप, यदा दुर्वाससः शापादिंद्रसहितास्त्रयो लोका गतश्रियो बभूवुस्तदा यज्ञादिक्रिया नष्टाः ॥१६॥ एतदिंद्रवरुणादयो देवा दृष्ट्वा स्वयं विचारयंतोऽपि निश्चयं न प्रापुः ॥१७॥ ततो मेरोर्मूर्धनि ब्रह्मसभां गत्वा प्रणताः संतो ब्रह्मणे सर्वं निवेदयामासुः ॥१८॥ तदा ब्रह्मा तान् निःसत्वान् दृष्ट्वा दैत्यांश्च तेजस्विनो दृष्ट्वा ॥१९॥ एकाग्रेण मनसा हरिं स्मरन् देवानुवाच ॥२०॥ हे देवाः, अहं भवो यूयं जरायुजांडजोद्भिज्जस्वेदजाश्च सर्वे यस्यांशाज्जाताः । तं शरणं व्रजामः ॥२१॥ यस्य कश्चिद्वध्यो रक्षणीयश्च नास्ति । तथापि यो जगत उत्पत्तिस्थितिसंहारार्थं रजःसत्वतमोगुणान् धत्ते ॥२२॥ अयं च कालस्तस्य पालनरूपो

यदा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप ॥ निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः ॥ १६ ॥ निशाम्यैतत्सुरगणा महेंद्रवरुणादयः ॥ नाध्यगच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिश्चयम् ॥ १७ ॥ ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः ॥ सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने ॥ १८ ॥ स विलोक्येंद्रवाय्वादीन्निःसत्वान्विगतप्रभान् ॥ लोकानमंगलप्रायानसुरानयथा विभुः ॥१९॥ समाहितेन मनसा संस्मरन्पुरुषं परम् ॥ उवाचोत्फुल्लवदनो देवान्स भगवान्परः ॥२०॥ अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः ॥ तस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥२१॥ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः ॥ अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्वतमांसि काले ॥ २२ ॥ अयं च तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय देहिनाम् ॥ तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥२३॥ श्रीशुक उवाच ॥ इत्याभाष्य सुरान्वेधाः सह देवैररिंदम ॥ अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥२४॥ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो ॥ स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेंद्रियः ॥२५॥ ब्रह्मोवाच ॥ अविक्रियं सत्यमनंतमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ॥ मनोग्रयानं वचसानिरुक्तं नमामहे देववरं वरेण्यम् ॥ २६ ॥ विपश्चितं प्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणम् ॥ छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥२७॥ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु ॥ त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥२८॥ य एकवर्णं तमसः परं तदलोकमव्यक्तमनंतपारम् ॥ आसांचकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥२९॥ न यस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थम् ॥ तं निर्जितात्मात्मगुणं परेशं ननाम भूतेषु समं चरंतम् ॥ ३० ॥

वर्तते । अतस्तं जगद्गुरुं शरणं व्रजामः । स नः कल्याणं करिष्यति ॥२३॥ श्रीशुक उवाच ॥ इति ब्रह्मा देवान् संभाष्य देवैः सह क्षीरसमुद्रं जगाम ॥२४॥ तत्रादृष्टरूपस्य हरेर्वैदिकीभिर्गीर्भिः स्तुतिं चकार ॥२५॥ ब्रह्मोवाच ॥ हे ईश, अविक्रियं सत्यं देवश्रेष्ठं त्वां नमाम ॥२६॥ प्राणादींद्रियाणां ज्ञातारं सर्वव्यापिनं त्रिषु युगेष्वाविर्भवंतं त्वां शरणं व्रजाम ॥२७॥ मायया प्रेर्यमाणं मनोमयं जीवचक्रं यस्याधिष्ठानमाहुस्तं सत्यं शरणं प्रपद्ये ॥२८॥ धीरा अष्टांगयोगेन यमुपासते तं प्रकृतेः परं ज्ञानैकस्वरूपं हरिं नमामि ॥ २९ ॥ यस्य मायां कश्चिदपि नातिक्रामति । यया मायया जनो मुह्यन् सन् आत्मस्वरूपं न वेद तं परेशं

---

१ दुर्वाससाहि कदाचिन्मार्गे गच्छंतमिंद्रं दृष्ट्वा तस्मै स्वकंठस्था माला दत्ता । इंद्रेण च श्रीमदेनानादृत्यैरावतस्य कुंभयोर्निक्षिप्ता । स च गजो मत्तः पद्भ्यां तां मालां चूर्णीचकार । ततः कुपितो दुर्वासास्तं शशाप । त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति ।

नमाम ॥३०॥ हे देव, इमे वयं देवा यस्य तव सत्वेन सृष्टा अपि निरुपाधिं त्वां न विद्मः । तदा रजस्तमोमया दैत्यास्त्वां न विदुरिति किं वक्तव्यम् ॥ ३१ ॥ यस्य पादौ मही । यस्यां जरायुजादिचतुर्विधो भूतसर्गोऽस्ति । स स्वतंत्रो महाविभूतिर्नः प्रसीदतु ॥ ३२ ॥ यस्य रेत उदकम् । यत उदकाल्लोका जायंते जीवंति वर्धंते च स महाविभूतिर्नः प्रसीदतु ॥ ३३ ॥ यस्य मनश्चंद्रः । यतश्चंद्राद्देवानामन्नं बलमायुश्च भवति । स महाविभूतिर्नः प्रसीदतु ॥ ३४ ॥ यस्य मुखमग्निः । यतोऽग्नेरुदरमध्येऽन्नादिकं पचति । स महाविभूतिर्नः प्रसीदतु ॥३५॥ यस्य चक्षुः सूर्यः । यस्मात्सूर्यान्मुक्तेरमृतस्य मृत्योश्च द्वारं भवति । स महाविभूतिर्नः प्रसीदतु ॥३६॥ यस्य प्राणाच्चराचराणां प्राणो जातः । यं प्राणं सार्वभौमं भृत्या इव वयमनुसृत्य स्थिताः । स महा०र्नः प्र० ॥३७॥ यस्य कर्णाद्दिशः ।

इमे वयं यत्प्रिययैव तन्वा सत्वेन सृष्टा बहिरंतराविः ॥ गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ॥ ३१ ॥ पादौ महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः ॥ स वै महापूरुष आत्मतंत्रः प्रसीदतां ब्रह्म महाविभूतिः ॥३२॥ अंभस्तु यद्रेत उदारवीर्यं सिध्यंति जीवंत्युत वर्धमानाः ॥ लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३३ ॥ सोमं मनो यस्य समामनंति दिवौकसां वै बलमंध आयुः ॥ ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः ॥३४॥ अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा ॥ अंतःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतां नः स महाविभूतिः ॥३५॥ यच्चक्षुरासीत्तरणिर्दैवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् ॥ द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः ॥ ३६ ॥ प्राणादभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः ॥ अन्वास्म संम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ॥३७॥ श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ॥ प्राणेंद्रियात्मा सुशरीरकेतं प्रसीदतां नः स महाविभूतिः ॥३८॥ बलान्महेंद्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिंचः ॥ खेभ्यश्च छंदांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ॥३९॥ श्रीर्वक्षसः पितरश्छायया ऽऽसन्धर्मः स्तनादितरः पृष्ठतोऽभूत् ॥ द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात्प्रसीदतां नः स महाविभूतिः ॥४०॥ विप्रो मुखं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ॥ ऊर्वोर्विडोजोऽङ्घ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभूतिः ॥४१॥ लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः ॥ भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः ॥ ४२ ॥ द्रव्यं वयः कर्मगुणान्विशेषं यद्योगमायाविहितान्वदंति ॥ यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः स महाविभूतिः ॥ ४३ ॥

हृदयाद्देहगतच्छिद्राणि । नाभ्याश्चांतरिक्षं जातं. स महा०र्नः प्रसीदतु ॥ ३८ ॥ यस्य बलादिंद्रः । प्रसादाद्देवाः । क्रोधाद्रुद्रः । बुद्धेर्ब्रह्मा । शिश्नात्प्रजापतिः । स महा०र्नः प्र० ॥ ३९ ॥ यस्य वक्षसः श्रीः । छायायाः पितरः । दक्षिणस्तनाद्धर्मः । पृष्ठतोऽधर्मः । मस्तकात्स्वर्गः । विहारादप्सरसो जाताः । स महा०र्नः प्र० ॥४०॥ यस्य मुखाद्विप्रो वेदाश्च । भुजयोः क्षत्रियो बलं च । ऊर्वोर्वैश्यो वार्ता च । पद्भ्यां शूद्रः शुश्रूषा चासीत् । स महा०र्नः प्र० ॥४१॥ यस्याधरोष्ठाल्लोभः । ऊर्ध्वोष्ठात्प्रीतिः । नासिकायाः कांतिः । स्पर्शेन कामः । स महा०र्नः प्र०॥४२॥ यस्य योगमायायाः कालकर्मगुणादिप्रपंचो जातः । स महा०र्नः प्र० ॥४३॥

तस्मै उपशांतशक्तये ते नमोऽस्तु ॥४४॥ एवंभूतस्त्वं प्रपन्नानां तव सुस्मितं मुखकमलं दिदृक्षूणां नः स्वस्वरूपं दर्शय ॥ ४५ ॥ त्वं काले काले स्वेच्छाधृतै रूपैरस्माकमशक्यं कर्म स्वयं करोषि ॥४६॥ देहिनां कर्माणि भूरिक्लेशानि स्वल्पफलानि च संति । त्वय्यर्पितानि तु कर्माण्यनंतफलानि भवंति ॥४७॥ अल्पोऽपि कर्माभास ईश्वरार्पितश्चेद्विफलाय न कल्पते ॥४८॥ यथा वृक्षमूलस्य सेचनेन शाखानां तृप्तिर्भवति तथा विष्णोराराधनेन सर्वेषां तृप्तिर्भवति ॥४९॥ हे प्रभो, तस्मै अनंताय निर्गुणाय सांप्रतं सत्वस्थाय च तुभ्यं नमः ॥ ५० ॥ इति श्रीमद्भागवतचूर्णिकायां अष्टमस्कंधे पंचमोऽध्यायः ॥ ५ ॥ ॥ षष्ठे पुनः स्तुतिर्विष्णाविर्भूते सुरैः कृता । तन्मंत्रेणासुरैः साकममृतार्थे महोद्यमः ॥१॥ श्रीशुक उवाच ॥ हे राजन्, एवं सुरगणैः स्तुतो भगवान् सहस्रसूर्योदयस-

नमोऽस्तु तस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥४४॥ स त्वं नो दर्शयाऽत्मानमस्मत्करणगोचरम् ॥ प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखांबुजम् ॥४५॥ तैस्तैः स्वेच्छाधृतै रूपैः काले काले स्वयं विभो ॥ कर्म दुर्विषहं यन्नो भगवांस्तत्करोति हि ॥४६॥ क्लेशभूर्यल्पसाराणि कर्माणि विफलानि वा ॥ देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥ ४७ ॥ नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः ॥ कल्पते पुरुषस्यैष स ह्यात्मा दयितो हितः ॥४८॥ यथा हि स्कंधशाखानां तरोर्मूलावसेचनम् ॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ४९ ॥ नमस्तुभ्यमनंताय दुर्वितर्क्यात्मकर्मणे ॥ निर्गुणाय गुणेशाय सत्वस्थाय च सांप्रतम् ॥ ५० ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधेऽमृतमथने पंचमोऽध्यायः ॥ ५ ॥ ॥ श्रीशुक उवाच ॥ एवं स्तुतः सुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः ॥ १ ॥ तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः ॥ नापश्यन्खं दिशः क्षोणिमात्मानं च कुतो विभुम् ॥२॥ विरिंचो भगवान्दृष्ट्वा सह शर्वेण तां तनुम् ॥ स्वच्छां मरकतश्यामां कंजगर्भारुणेक्षणाम् ॥ ३ ॥ तप्तहेमावदातेन लसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवम् ॥४॥ महामणिकिरीटेन केयूराभ्यां च भूषिताम् ॥ कर्णाभरणनिर्भातकपोलश्रीमुखांबुजाम् ॥ ५ ॥ कांचीकलापवलयहारनूपुरशोभिताम् ॥ कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीम् ॥६॥ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासिताम् ॥ तुष्टाव देवप्रवरः सशर्वः पुरुषं परम् ॥ सर्वामरगणैः साकं सर्वांगैरवनिं गतैः ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणाय निर्वाणसुखार्णवाय ॥ अणोरणिम्ने परिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ८ ॥ ॥ ॥

दृशकांतिः सन् प्रादुर्बभूव ॥ १ ॥ तदा तत्तेजसा देवाः प्रतिहतेक्षणाः संतः खं दिशश्च नापश्यन् ॥ २ ॥ ततः शिवेन सह ब्रह्मा आविर्भूतां स्वच्छां मरकतश्यामां कमललोचनाम् ॥ ३ ॥ वस्त्राभरणैर्युताम् । चारुसर्वांगीं सुमुखीम् ॥ ४ ॥ मणिखचितकिरीटेन केयूराभ्यां च भूषिताम् ॥ ५ ॥ मेखलाहारनूपुरशोभितां वनमालायुताम् ॥ ६ ॥ मूर्तिमद्भिः सुदर्शनादिभिरस्त्रैरुपासितां तां तनुं दृष्ट्वा तं परं पुरुषं तुष्टाव ॥ ७ ॥ ब्रह्मोवाच ॥ हे ईश, अजातजन्मस्थितिसंयमाय निर्वाणसुखार्णवाय महानुभावाय तुभ्यं नमो नमः ॥ ८ ॥ ॥ ॥ ॥

हे देवश्रेष्ठ, इदं तव रूपं श्रेयोर्थिभिः सदा पूज्यम् । अस्मिन् रूपे सर्वान् देवान् त्रीन् लोकांश्चाहं पश्यामि ॥९॥ इदं विश्वं आदिमध्यावसानेषु त्वय्येवासीत् ॥१०॥ हे ईश, त्वं मायया विश्वं निर्माय तत्र प्रविष्टोऽसि ॥ ११ ॥ यथा काष्ठे मथनेनाग्निं गोषु दोहनेन घृतं च प्राप्नुवंति तथा मनुष्यास्त्वां योगसाधनाद्युपायेन प्राप्नुवंति ॥ १२ ॥ हे कमलनाभ, एवंभूतं त्वां दृष्ट्वाद्य वयं निर्वृतिं गताः स्मः ॥ १३ ॥ वयं ते पादमूलं शरणं यदर्थं प्राप्तास्तत्त्वं विधत्स्व । हे अंतरात्मन्, अशेषसाक्षिणस्तवान्यैः किं विज्ञाप्यमस्ति न किमपि ॥ १४ ॥ हे ईश, अहं शिव इंद्रादयश्च देवा अग्नेर्विस्फुलिंगा इव त्वत्तः पृथग्विभाताः संत आत्मनः श्रेयः किमपि न विद्मः । अतो देवानां द्विजानां चास्माकमिदं यूयं कुरुतेत्युपायमुपदिश ॥ १५ ॥ श्रीशुक उवाच ॥ एवं ब्रह्मादिभिः स्तुतो भगवान् तेषामभिप्रायं ज्ञात्वा बद्धांजलीन् तान् जगाद ॥ १६ ॥ तस्मिन् देवकार्ये एक एव समर्थोऽपि भगवान् समुद्रमथनादिभिः क्रीडितुमिच्छंस्तानुवाच ॥ १७ ॥ श्रीभगवानुवाच ॥ हे ब्रह्मन्, हे शंभो, हे देवाः, मम भाषणं शृणुत ॥ १८ ॥ यूयं दैत्यान्प्रति यात । उत च वः यावद्वृद्धिर्भविष्यति तावद्दानवदैतेयैः सह सख्यं विधीयताम् ॥ १९ ॥ हे देवाः, आदौ स्वकार्यसाधनार्थं शत्रवोऽपि मित्राणि कार्याणि । पश्चात्सर्पमूषकवद्वर्तितव्यम् ॥ २० ॥ अमृतोत्पादने शीघ्रं यत्नः क्रियताम् । यस्यामृतस्य पीतस्य सतो मृत्युग्रस्तोऽपि जंतुरमरो भवेत् ॥ २१ ॥ ॥ ॥

रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोऽर्थिभिर्वैदिकतांत्रिकेण ॥ योगेन धातः सह नस्त्रिलोकान्पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ॥९॥ त्वय्यग्र
आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे ॥ त्वमादिरंतोऽजगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्तात् ॥ १० ॥ त्वं
माययाऽऽत्माश्रयया स्वयेदं निर्माय विश्वं तदनु प्रविष्टः ॥ पश्यंति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ॥११॥
यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमंबूद्यमने च वृत्तिम् ॥ योगैर्मनुष्या अधियंति हि त्वां गुणेषु बुद्ध्या कवयो वदंति ॥ १२ ॥
तं त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थम् ॥ दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गांगमंभः ॥ १३ ॥
स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलम् ॥ समागतास्ते बहिरंतरात्मन्किं वान्यविज्ञाप्यमशेषसाक्षिणः ॥ १४॥
अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते ॥ किंवा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमंत्रम् ॥ १५ ॥
श्रीशुक उवाच ॥ एवं विरिंचादिभिरीडितस्तद्विज्ञाय तेषां हृदयं तथैव ॥ जगाद जीमूतगभीरया गिरा बद्धांजलीन्संवृतसर्वकारकान् ॥१६॥ एक एवेश्वरस्तस्मिन्सुरकार्ये सुरेश्वरः ॥ विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ॥१७॥ श्रीभगवानुवाच ॥ हंत
ब्रह्मन्नहो शंभो हे देवा मम भाषितम् ॥ शृणुतावहिताः सर्वे श्रेयो वः स्याद्यथा सुराः ॥१८॥ यात दानवदैतेयैस्तावत्संधिर्विधीयताम् ॥ कालेनानुगृहीतैस्तैर्यावद्वो भव आत्मनः ॥१९॥ अरयोऽपि हि संधेयाः सति कार्यार्थगौरवे ॥ अहिमूषकवद्देवा ह्यर्थस्य
पदवीं गतैः ॥ २० ॥ अमृतोत्पादने यत्नः क्रियतामविलंबितम् ॥ यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोऽमरो भवेत् ॥ २१ ॥ ॥

---

१ पेटिकायां निरुद्धः सर्पो यथा निर्गमद्वारविधानार्थं प्रथमं मूषकेण संधिं विधत्ते पश्चात्तमेव कदाचिद्भक्षयति तथाऽर्थमार्गप्रवृत्तैर्युष्माभिः प्रथमं दैत्याः संधेया इत्यर्थः ।

तत्कर्तव्यतामाह । हे देवाः, क्षीरसमुद्रे तृणलतौषधीः क्षिप्त्वा मंदरं पर्वतं–मंथानं वासुकिं सर्प–रज्जुं च कृत्वा ॥ २२ ॥ मया सहायेन निर्मंथध्वम् । एवं कृते
दैत्याः क्लेशभागिनो भविष्यंति । यूयं फलभागिनो भविष्यथ ॥२३॥ असुरा यद्यदिच्छंति तत्तद्यूयमनुमोदध्वम् । हे सुराः, सर्वेऽर्थाः साममार्गेण यथा सिद्ध्यंति
तथा संरंभेण न सिद्ध्यंति ॥२४॥ किंच । समुद्रसंभवाद्विषान्न भेतव्यम् । तथा मथनादुत्पन्नेषु वस्तुषु कामरोषलोभा न कार्याः ॥२५॥ श्रीशुक उवाच । एवं पुरु-
षोत्तमो भगवान् देवानादिश्यांतर्दधे ॥२६॥ अथ तस्मै भगवते नमस्कृत्य ब्रह्मा शिवश्च स्वं स्वं धाम जग्मतुः । देवाश्च बलिं जग्मुः ॥२७॥ तदा शस्त्रादिरहि-
तानपि तान् देवान् दृष्ट्वा युद्धार्थं जातक्षोभान् स्वसेनाधिपतीन् दृष्ट्वा संधिविग्रहकालवेत्ता बलिर्दैत्यान्न्यषेधत् ॥२८॥ ते देवा बलिं गत्वा परमैश्वर्येण युक्तमा-

क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥२२॥ सहायेन मया देवा निर्मंथध्वम-
तंद्रिताः ॥ क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः ॥२३॥ यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः ॥ न संरंभेण सिध्यंति सर्वेऽर्थाः
सांत्वया यथा ॥२४॥ न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात् ॥ लोभः कार्यो न वै जातु रोषः कामस्तु वस्तुषु ॥ २५ ॥ श्रीशुक उ-
वाच ॥ इति देवान्समादिश्य भगवान्पुरुषोत्तमः ॥ तेषामंतर्दधे राजन्स्वच्छंदगतिरीश्वरः ॥२६॥ अथ तस्मै भगवते नमस्कृत्य पितामहः ॥
भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः ॥२७॥ दृष्ट्वाऽरीनप्यसंयत्तान्जातक्षोभान्स्वनायकान् ॥ न्यषेधद्दैत्यराट् श्लोक्यः संधिविग्रह-
कालवित् ॥२८॥ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः ॥ श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥ २९ ॥ महेंद्रः श्लक्ष्णया वाचा सांत्व-
यित्वा महामतिः ॥ अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ॥३०॥ तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः ॥ शंबरोऽरिष्टनेमि-
श्च ये च त्रिपुरवासिनः ॥३१॥ ततो देवासुराः कृत्वा संविदं कृतसौहृदाः ॥ उद्यमं परमं चक्रुरमृतार्थे परंतप ॥३२॥ ततस्ते मंदर-
गिरिमोजसोत्पाट्य दुर्मदाः ॥ नदंत उदधिं निन्युः शक्ताः परिघबाहवः ॥३३॥ दूरभारोद्वहश्रांताः शक्रवैरोचनादयः ॥ अपारयंत-
स्तं वोढुं विवशा विजहुः पथि ॥३४॥ निपतन्स गिरिस्तत्र बहूनमरदानवान् ॥ चूर्णयामास महता भारेण कनकाचलः ॥३५॥ तांस्तथा
भग्नमनसो भग्नबाहूरुकंधरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥३६॥ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ॥ ईक्षया जी-
वयामास निर्जरान्निर्व्रणान्यथा ॥ ३७ ॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया ॥ आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥३८॥

सीनं तं दृष्ट्वा ॥२९॥ महेंद्रो बलिं मधुरया वाचा सांत्वयित्वा पुरुषोत्तमात् शिक्षितं बभाषे ॥ ३० ॥ तद्वचो बलेरन्येषां शंबरारिष्टनेम्यादीनां चारोचत ॥ ३१ ॥
ततो देवासुरा मिथः समयं कृत्वाऽमृतार्थमुद्योगं चक्रुः ॥ ३२ ॥ ततस्ते देवासुरा मंदरपर्वतं बलेनोत्पाट्य गर्जंतः संतस्तं पर्वतं क्षीरसमुद्रंप्रति निन्युः ॥३३॥
तदा इंद्रबलिप्रभृतयो दूरपर्यंतं भारवहनेन श्रांताः संतस्तं पर्वतं मार्गे तत्यजुः ॥ ३४ ॥ स कनकाचलस्तत्र निपतन् स्वभारेण बहून् देवासुरान् चूर्ण-
यामास ॥ ३५ ॥ ततो भग्नसंकल्पान् भग्नबाहूरुकंधरान् देवासुरान् ज्ञात्वा तत्र भगवान् गरुडारूढः सन् प्रादुर्बभूव ॥ ३६ ॥ ततो गिरिपातेन चूर्णप्रायान्
देवासुरानमृतदृष्ट्या जीवयामास ॥ ३७ ॥ तत एकहस्तेन गिरिं गरुड आरोप्य स्वयं चारुह्य सुरासुरैः सह क्षीराब्धिं ययौ ॥ ३८ ॥ ॥

गरुडो गिरिं हरिं च स्कंधादुत्तार्य गिरिं जले क्षिप्त्वा हरिणा प्रस्थापितः सन् वैकुंठं ययौ ॥३९॥ इति श्रीमद्भागवतचूर्णिकायां अष्टमस्कंधे षष्ठोऽध्यायः ॥६॥ सप्तमे मथनोद्भूतविषभीत्याऽखिलैर्जनैः । स्तुतः सन् कृपया रुद्रः पपौ विषमितीर्यते ॥१॥ श्रीशुक उवाच ॥ ते देवा वासुकिं तवाप्यमृतभागो भविष्यतीति संमंत्र्य तं गिरौ संवेष्ट्य क्षीरसमुद्रं मथितुं प्रारेभिरे ॥१॥ तत्र हरिः प्रथमं देवैः सह वासुकेर्मुखं जगृहे ॥२॥ तद्भगवच्चेष्टितं दैत्यपतयो नैच्छन् ॥३॥ हे देवाः, स्वाध्यायश्रुतसंपन्ना वयं सर्पस्यामंगलं पुच्छं न गृह्णीमः । एवमुक्त्वा तूष्णीं स्थितान् दैत्यान् विलोक्य हरिः स्मयमानः सन् देवैः सह मुखं विसृज्य पुच्छं जग्राह ॥ एवं कृतस्थानविभागास्ते देवदैत्या अमृतार्थं पयोनिधिं ममंथुः ॥४॥५॥ एवं समुद्रे मथ्यमाने सति बलिभिर्ध्रियमाणोऽपि स पर्वतोऽनाधारः सन् गुरुत्वा-

अवरोप्य गिरिं स्कंधात्सुपर्णः पततां वरः ॥ ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ॥३९॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे अमृतमथने मंदराचलानयनं नाम षष्ठोऽध्यायः ॥६॥ ॥ श्रीशुक उवाच ॥ ते नागराजमामंत्र्य फलभागेन वासुकिम् ॥ परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥१॥ आरेभिरे सुसंयत्ता अमृतार्थं कुरूद्वह ॥ हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥२॥ तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितम् ॥ न गृह्णीमो वयं पुच्छमहेरंगममंगलम् ॥३॥ स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ॥ इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः ॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ॥४॥ कृतस्थानविभागास्त एवं कश्यपनंदनाः ॥ ममंथुः परमायत्ता अमृतार्थं पयोनिधिम् ॥ ५ ॥ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ध्रियमाणोऽपि बलिभिर्गौरवात्पांडुनंदन ॥६॥ ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ॥ आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥ ७ ॥ विलोक्य विघ्नेशविधिं तदेश्वरो दुरंतवीर्यो वितथाभिसंधिः ॥ कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहार ॥ ८ ॥ तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः ॥ दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् ॥ ९ ॥ सुरासुरेंद्रैर्भुजवीर्यवेपितं परिभ्रमंतं गिरिमंग पृष्ठतः ॥ बिभ्रत्तदावर्तनमादिकच्छपो मेनेऽगकंडूयनमप्रमेयः ॥ १० ॥ तथाऽसुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ॥ उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागेंद्रमबोधरूपः ॥११॥ उपर्यगेंद्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः ॥ तस्थौ दिवि ब्रह्मभवेंद्रमुख्यैरभिष्टुवद्भिः सुमनोऽभिवृष्टः ॥ १२ ॥ ॥

दुदके निममज्ज ॥ ६ ॥ ततस्ते देवदैत्याः स्वपौरुषे नष्टे सति खिन्ना बभूवुः ॥ ७ ॥ तदेश्वरो गणपतिरचितं विघ्नं विलोक्य तं पूजयित्वा कूर्मरूपं धृत्वा तोयं प्रविश्य गिरिमुज्जहार ॥ ८ ॥ एवं कृते तं गिरिमुत्थितं वीक्ष्य ते देवदैत्या मथितुं पुनरुत्थिताः । तदा कूर्मरूपो भगवान् लक्षयोजनविस्तृतपृष्ठेन तं पर्वतं दधार ॥ ९ ॥ ततः सुरासुरेंद्राणां भुजवीर्यकंपितं पृष्ठे भ्रमंतं गिरिं धारयन् हरिस्तद्गिरिभ्रमणमंगकडूयनं मेने ॥ १० ॥ तदा हरिरसुरान् दैत्याकारेण देवान् देवाकारेण च रूपेण प्रविश्य तेषां बलवीर्यं प्रेरयन्नास ॥ ११ ॥ यदा मथनसमये गिरिरुपर्युपर्यगात्तदा तस्योपरि भगवान् सहस्रबाहुयुक्तमन्यं रूपं गृहीत्वा हस्तेन पर्वतं धृत्वा ब्रह्मशिवेंद्रमुख्यैः स्तुतः सन् तस्थौ ॥ १२ ॥ ॥ ॥

तदा उपर्यधश्च देवदैत्यमध्ये पर्वत[1]रज्जुमध्ये च प्रविशता हरिणा वृद्धिंगतास्तेऽब्धिं ममंथुः ॥१३॥ तदा वासुकेरपरिमितदृङ्मुखेभ्योऽग्निधूमौ निर्गतौ । ताभ्यां दग्धतेजसो दैत्या अभवन् ॥ १४ ॥ तस्य श्वासज्वालाभिर्हतप्रभान् धूम्रवर्णवस्त्रमुखान् देवान्प्रति भगवदाज्ञापिता मेघा अभ्यवर्षन् ॥ शीतलो वायुश्च ववौ ॥१५॥ एवं तैर्मथ्यमानेऽब्धौ यदा सुधा न जाता तदा भगवान् स्वयं ममंथ ॥ १६॥ स मेघश्यामः पीतवासा मालाधरो रक्तनेत्रो हरिर्बाहुभिर्वासुकिं गृहीत्वा मथ्नन् प्रतिद्वंद्वी पर्वत इव शुशुभे ॥१७॥ ततो मथ्यमानादुदधेर्हालाहलं नाम विषं जातं तदा मत्स्यमकरादयो व्याकुला अभवन् ॥१८॥ तदुग्रवेगं विषं दिशि

उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः ॥ ममंथुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभितनक्रचक्रम् ॥ १३ ॥ अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाऽऽहतवर्चसोऽसुराः ॥ पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरला इवाभवन् ॥१४॥ देवांश्च तच्छ्वासशिखाहतप्रभान्धूम्रांबरस्रग्वरकंचुकाननान् ॥ समभ्यवर्षन्भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः ॥१५॥ मथ्यमानात्तथा सिंधोर्देवासुरवरूथपैः ॥ यदा सुधा न जायेत निर्ममंथाजितः स्वयम् ॥१६॥ मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः ॥ जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः ॥१७॥ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः ॥ संभ्रांतमीनोन्मकराहिकच्छपात्तिमिद्विपग्राहतिमिंगिलाकुलात् ॥१८॥ तदुग्रवेगं दिशिदिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति ॥ भीताः प्रजा दुद्रुवुरंग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥ १९ ॥ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याऽभिमतं मुनीनाम् ॥ आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥२०॥ प्रजापतय ऊचुः ॥ देव देव महादेव भूतात्मन्भूतभावन ॥ त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥२१॥ त्वमेकः सर्वजगत ईश्वरो बंधमोक्षयोः ॥ तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥२२॥ गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो ॥ धत्से यदा स्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधाम् ॥२३॥ त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः ॥ नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥२४॥ त्वं शब्दयोनिर्जगदादिरात्मा प्राणेंद्रियद्रव्यगुणस्वभावः ॥ कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत्त्रिवृदामनंति ॥२५॥ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजम् ॥ कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ॥ २६ ॥ ॥

प्रसर्पद्दृष्ट्वा भीता देवासुराः केनापि न रक्ष्यमाणाः संतः शिवं शरणं जग्मुः ॥१९॥ ते त्रैलोक्यस्य समृद्ध्यर्थं भवान्या सह कैलासपर्वते स्थितं शिवं दृष्ट्वा स्तुतिभिः प्रणेमुः ॥२०॥ प्रजापतय ऊचुः ॥ हे देवदेव, हेभूतभावन, अस्मात्त्रैलोक्यदहनाद्विषात् शरणागतान्नः पाहि ॥२१॥ हे ईश, सर्वजगतो बंधमोक्षयोरीश्वरस्त्वमेक एव । अतस्त्वां जगद्गुरुं विवेकिनः पूजयंति ॥२२॥ यदा त्वं सर्गादीन् कर्तुमिच्छसि तदा गुणमय्या स्वशक्त्या ब्रह्मविष्णुशिवाभिधां धत्से ॥२३॥ हे ईश, गुह्यं परं ब्रह्म त्वमेवासि ॥२४॥ त्वं वेदस्योत्पत्तिकारणं महत्तत्वं अहंकारः कालः क्रतुर्धर्मश्च त्वमेवासि ॥ २५ ॥ हे भगवन्, अग्निस्तव मुखं । क्षितिः

---

[1] पर्वते दार्ढ्यरूपेण । रज्जौ अभेद्याऽबोधरूपेण ।

पादौ । कालो गतिः । दिशः कर्णौ। वरुणो जिह्वा ॥२६॥ नभो नाभिः । जलं रेतः । चंद्रो मनः । द्यौः शिरः॥२७॥ समुद्राः कुक्षिः । पर्वता अस्थीनि । ओषधयो रोमाणि । छंदासि सप्त धातवः । हे वेदत्रयमूर्ते, सर्वधर्मस्ते हृदयमस्ति ॥२८॥ हे ईश, पंचोपनिषदस्ते[1] मुखानि । यच्छिवाख्यं परमार्थतत्त्वं सा ते उपरतावस्था ॥२९॥ सत्वरजस्तमोगुणास्ते नेत्रत्रयमस्ति ॥३०॥ किं च । ब्रह्मादिलोकपालानामपि तव ज्योतिरगम्यम् । कुतः। यत्र सत्वादयो गुणा न संति ॥३१॥ हे शिव, मदनदक्षयज्ञत्रिपुरादयो ये भूतद्रुहस्तान् संहरतस्तव तच्चरितं स्तुतये[2] नभवति । यो भवान् स्वनेत्राग्निशिखया भस्मसाज्जातस्यास्य जगतोऽवलोकनमपि न करोति

नाभिर्नभस्ते श्वसनं नभस्वान्सूर्यश्च चक्षूंषि जलं स्म रेतः ॥ परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवन् शिरस्ते ॥२७॥
कुक्षिः समुद्रा गिरयोऽस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते ॥ छंदांसि साक्षात्तव सप्त धातवस्त्रयीमयात्मन्हृदयं सर्वधर्मः ॥ २८ ॥
मुखानि पंचोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छिवाख्यं परमार्थतत्त्वं देव स्वयंज्योतिरवस्थितिस्ते ॥ २९ ॥ छाया-
त्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि ॥ सांख्यात्मनः शास्त्रकृतस्तवेक्षा छंदोमयो देवऋषिः पुराणः ॥ ३० ॥ न ते
गिरित्राखिललोकपाल विरिंचवैकुंठसुरेंद्रगम्यम् ॥ ज्योतिः परं यत्र रजस्तमश्च सत्वं न यद्ब्रह्म निरस्तभेदम् ॥ ३१ ॥ कामा-
ध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते ॥ यस्त्वंतकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिंगशिखया भसितं न
वेद ॥ ३२ ॥ ये त्वात्मरामगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं चरंतमुमया तपसाऽभितप्तम् ॥ कत्थंत उग्रपरुषं निरतं श्मशाने ते नून-
मूतिमविदंस्तव हातलज्जाः ॥ ३३ ॥ तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः ॥ ब्रह्मादयः किमुत
संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रम् ॥ ३४ ॥ एतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लोकस्य
व्यक्तिस्तेऽव्यक्तकर्मणः ॥ ३५ ॥ ॥ श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः ॥ सर्वभूतसुहृद्देव इदमाह
सतीं प्रियाम् ॥ ३६ ॥ ॥ शिव उवाच ॥ अहो बत भवान्येतत्प्रजानां पश्य वैशसम् ॥ क्षीरोदमथनोद्भूतात्कालकूटादुपस्थि-
तम् ॥ ३७ ॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे ॥ एतावान्हि प्रभोरर्थो यद्दीनपरिपालनम् ॥ ३८ ॥ प्राणैः स्वैः प्राणिनः
पांति साधवः क्षणभंगुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥ ॥ ॥

॥३२॥ ये त्वामुमया सह चरंतं तस्यामत्यंतकामिनं श्मशाने भ्रमंतं क्रूरं हिंस्रं च वदंति तेऽतिमूर्खाः ॥३३॥ ब्रह्मादयोऽपि तव स्वरूपज्ञाने स्तवने चासमर्थास्तत्र तेषां सर्गेऽत्यंतार्वाचीना वयं कथं समर्था भवेम। तथाप्यस्मत्कृतं स्तवनं शक्तिपरिमितमात्रमस्ति॥ ३४ ॥ हे महेश्वर, इयं तव प्रकटता लोकस्य सुखायास्ति । अतो नः पाहि ॥३५॥ श्रीशुक उवाच ॥ प्रजानां तद्दुःखं वीक्ष्य कृपयाऽत्यंतं पीडितः शिवो देवीं जगाद ॥ ३६ ॥ शिव उवाच ॥ हे भवानि, क्षीरोदमथनोद्भूतात्कालकूटात्त्रासं प्रजानां दुःखं पश्य॥३७॥प्राणरक्षणेप्सूनामासां मयाऽभयं विधेयम् । यतो दीनपरिपालनमेव समर्थस्य कार्यमस्ति ॥३८॥ साधवस्तु क्षणभंगुरैः स्वप्राणै-

---

१ तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मंत्राः । २ अत्यल्पमेतदित्यर्थः ।

रपि जीवान् रक्षंति ॥३९॥ हे भद्रे, बद्धवैरेषु भूतेषु कृपां कुर्वतः पुंसो भगवान् प्रसन्नो भवति। तत्प्रसादे जगत्प्रसन्नं भवति॥ अत इदं विषं भुंजे। मत्तः प्रजानां सुखेन जीवनमस्तु ॥४०॥ श्रीशुक उवाच ॥ एवं देवीं पृष्ट्वा विषं जग्धुमारेभे। साथि प्रभावज्ञाऽन्वमोदत ॥४१॥ ततो जगद्व्यापकं विषं करतलपरिमितमात्रं कृत्वा। शिवो भक्षयामास ॥४२॥ तद्विषं शिवस्यापि स्ववीर्यं दर्शयामास। गले शिवं नीलं चकार। तत्साधोर्विभूषणं जातम् ॥४३॥ प्रायशः साधवो लोकतापेन तप्यंते तदेवेश्वरस्याराधनम् ॥४४॥ तच्छंभोः कर्म वीक्ष्य दाक्षायणी देवी ब्रह्मा विष्णुश्च शशंसिरे ॥४५॥ विषं पिबतस्तस्य हस्ताद्यद्गलितं तद्वृश्चिकसर्पविषौषध्यो जगृहुः ॥४६॥ इति श्रीम० चूर्णि० अष्ट० सप्तमोऽध्यायः ॥७॥ ॥ अष्टमे मथ्यमानेऽब्धौ लक्ष्म्या विष्णौ वृते सुरैः। धन्वंतरेर्हृते सोमे मोहिन्युद्भव ईर्यते ॥१॥

पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः॥ प्रीते हरौ भगवति प्रीयेऽहं सचराचरः॥ तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे ॥४०॥ श्रीशुक उवाच ॥ एवमामंत्र्य भगवान्भवानीं विश्वभावनः॥ तद्विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत ॥ ४१ ॥ ततः करतलीकृत्य व्यापि हालाहलं विषम् ॥ अभक्षयन्महादेवः कृपया भूतभावनः॥ ४२ ॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः॥ यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥४३॥ तप्यंते लोकतापेन साधवः प्रायशो जनाः॥ परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥४४॥ निशम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः॥ प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे ॥४५॥ प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत् ॥ वृश्चिकाहिविषौषध्यो दंदशूकाश्च येऽपरे ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधेऽमृतमथने सप्तमोऽध्यायः ॥७॥ ॥ श्रीशुक उवाच ॥ पीते गरे वृषांकेण प्रीतास्तेऽमरदानवाः॥ ममंथुस्तरसा सिंधुं हविर्धानी ततोऽभवत् ॥ १ ॥ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः॥ यज्ञस्य देवयानस्य मेध्याय हविषे नृप ॥ २ ॥ तत उच्चैःश्रवा नाम हयोऽभूच्चंद्रपांडुरः॥ तस्मिन्बलिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया ॥ ३ ॥ तत ऐरावतो नाम वारणेंद्रो विनिर्गतः॥ दंतैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिम् ॥४॥ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः॥ तस्मिन्हरिः स्पृहां चक्रे वक्षोऽलंकरणे मणौ ॥ ५ ॥ ततोऽभवत्पारिजातः सुरलोकविभूषणम् ॥ पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥६॥ ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः॥ रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः॥ ७ ॥ ततश्चाविरभूत्साक्षाच्छ्री रमा भगवत्परा ॥ रंजयंती दिशः कांत्या विद्युत्सौदामनी यथा ॥ ८ ॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः॥ रूपौदार्यवयोवर्णमहिमाऽऽक्षिप्तचेतसः॥ ९ ॥

श्रीशुक उवाच ॥ एवं शिवेन विषे पीते सति देवदैत्याः प्रीताः संतः पुनर्बलान्ममंथुः। ततः कामधेनुरभवत् ॥१॥ तामृषयो ब्रह्मलोकमार्गप्रापकस्य यज्ञस्य पवित्राय हविषे जगृहुः॥२॥ततः श्वेत उच्चैःश्रवा नामाश्वो जातः। तस्मिन् बलिः स्पृहां चक्रे॥३॥ तत ऐरावतो नाम चतुर्दंतयुक्तः श्वेतो गजो जातः। तमिंद्रो जगृहे॥४॥ ततः कौस्तुभाख्यं रत्नमभूत्। तस्मिन् हरिः स्पृहां चक्रे ॥५॥ ततः पारिजातः कल्पतरुरभवत्। स स्वर्गविभूषणं जातः॥६॥ ततोऽप्सरसो जाताः। ताः श्रेष्ठैर्गत्यवलोकनादिभिः स्वर्गिणां रमण्यो जाताः ॥७॥ ततो भगवत्परा श्री रमा जाता। सा स्वकांत्या दिशः प्रकाशयामास ॥ ८ ॥ तस्यां देवासुरमानवा मोहिताः संतः स्पृहां चक्रुः

तस्या आसनमानिन्ये महेंद्रो महदद्भुतम् ॥ मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि ॥१०॥ आभिषेचनिका भूमिराहरत्सकलौषधीः ॥
गावः पंच पवित्राणि वसंतो मधुमाधवौ ॥ ११ ॥ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गंधर्वा नट्यश्च
ननृतुर्जगुः ॥१२॥ मेघा मृदंगपणवमुरजानकगोमुखान् ॥ व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् ॥१३॥ ततोऽभिषिषिचुर्देवीं
श्रियं पद्मकरां सतीम् ॥ दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥१४॥ समुद्रः पीतकौशेयवाससी समुपाहरत् ॥ वरुणः
स्रजं वैजयंतीं मधुना मत्तषट्पदाम् ॥१५॥ भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः ॥ हारं सरस्वती पद्ममजो नागाश्च कुंडले ॥१६॥
ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना ॥ चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनम् ॥१७॥
स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितम् ॥ ततस्ततो नूपुरवल्गुसिंजितैर्विसर्पती हेमलतेव सा बभौ ॥१८॥
विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारि सद्गुणम् ॥ गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत ॥१९॥ नूनं तपो
यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितम् ॥ कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥ २० ॥ धर्मः
क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम् ॥ वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं नहि द्वितीयो गुणसंगवर्जितः ॥२१॥ क्वचिच्चिरायुर्नहि
शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः ॥ यत्रोभयं कुत्र च सोऽप्यमंगलः सुमंगलः कश्चन कांक्षते हि माम् ॥२२॥ एवं
विमृश्याव्यभिचारि सद्गुणैर्वरं निजैकाश्रयतयाऽगुणाश्रयम् ॥ वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं निरपेक्षमीप्सितम् ॥२३॥ तस्यांसदेश
उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ॥ तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता ॥२४॥

तस्या इंद्र आसनमानिन्ये । मूर्तिमत्यो नद्यो हेमकुंभैर्जलमानिन्युः ॥ १० ॥ भूमिः सर्वौषधीः । गावः पंच गव्यानि । वसंतः फलपुष्पादि आनिन्ये ॥ ११ ॥ ततो ऋषयोऽभिषेकं चक्रुः । तदा गंधर्वा जगुः । नर्तक्यो ननृतुः ॥१२॥ देवा मृदंगशंखगोमुखवीणादीनवादयन् ॥ १३ ॥ दिग्गजाः पूर्णकलशैर्द्विजेरितैः सूक्तवाक्यैरभिषेकं चक्रुः ॥१४॥ तदा समुद्रो लक्ष्म्यै पीतकौशेयवाससी ददौ । वरुणो वैजयंतीं मालां ददौ ॥१५॥ विश्वकर्मा विचित्रभूषणानि । सरस्वती हारम् । ब्रह्मा कमलम् । नागाः कुंडले च ददुः ॥१६॥ ततो रमा भ्रमरैर्नादितां कमलमालां हस्ते गृहीत्वा सव्रीडहासं सुंदरं मुखं दधती सती चचाल ॥ १७॥ चंदनकेशरलेपितं स्तनद्वयं दधती कृशोदरी सा लक्ष्मीर्हेमलतेव बभौ ॥१८॥ ततो देवासुरगंधर्वादिषु पतिमिच्छंती सती सद्गुणं कमपि नान्वविंदत ॥१९॥ तदेवाह । येषु दुर्वासःप्रभृतिषु तपोऽस्ति तेषु क्रोधजयो नास्ति । गुरुशुक्रादीनां ज्ञानमस्ति तथापि ते संगवर्जिता नहि । कश्चिद्ब्रह्मचंद्रादिर्महान् तस्य कामजयो नहि ॥२०॥ येषु परशुरामादिषु धर्मः तेषु भूतदया नास्ति । शिबिनृगराजादिषु त्यागः स मुक्तिकारणं न । सहस्रार्जुनादेर्वीर्यं तत्कालवेगेन परिहृतम् ॥ २१ ॥ कश्चिच्चिरायुर्मार्कंडेयादिस्तस्य शीलमंगलं न । यत्र शीलमंगलमायुश्चास्ति स शिवोऽमंगलः । कश्चित्सुमंगलः श्रीमुकुंदः स मां नेच्छति ॥२२॥ एवं सर्वेषु विचार्य सा लक्ष्मीर्निरपेक्षमपि सर्वगुणाश्रयं मुकुंदं वव्रे ॥ २३ ॥ सा हरेः स्कंधे कमलमालां निधाय तदनुग्रहं प्रतीक्षमाणा सती तूष्णीं तस्य निकटे तस्थौ ॥ २४ ॥

भगवान् तस्यै लक्ष्म्यै स्ववक्षःस्थलं निवासस्थानं ददौ ॥२५॥ तदा शंखमृदंगभेर्यादीनां नृत्यतामप्सरसां गंधर्वाणां च शब्दः प्रादुरभूत् ॥२६॥ तदा पुष्पवर्षिणो ब्रह्मरुद्राद्या विष्णुप्रतिपादकैर्मंत्रैर्विष्णोः स्तुतिं चक्रिरे ॥२७॥ ततो लक्ष्म्या विलोकिताः सर्वे देवादयः परमं सुखं प्रापुः ॥२८॥ हे राजन्, लक्ष्म्योपेक्षिता दैत्यदानवा निःसत्वा लोलुपा निर्लज्जाश्च बभूवुः ॥२९॥ अथ वारुणी देवी कन्या कमललोचना आसीत्। तामसुरा जगृहुः ॥३०॥ अथ मथ्यमानात्समुद्रात्परमाद्भुतः पुरुष उदतिष्ठत् ॥३१॥ कथंभूतः । कमलनेत्रः। श्यामः तरुणः स्रग्वी सर्वाभरणभूषितः ॥३२॥ पीतवासाः मणिकुंडलः कुंचितकेशांतः सिंहविक्रमः ॥३३॥

तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥ २५ ॥ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः ॥ देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥ २६ ॥ ब्रह्मरुद्रांगिरोमुख्याः सर्वे विश्वसृजो विभुम् ॥ ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैः पुष्पवर्षिणः ॥ २७ ॥ श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ॥ शीलादिगुणसंपन्ना लेभिरे निर्वृतिं पराम् ॥२८॥ निःसत्वा लोलुपा राजन्निरुद्योगा गतत्रपाः ॥ यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥ २९ ॥ अथासीद्वारुणी देवी कन्या कमललोचना ॥ असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥३०॥ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥ ३१ ॥ दीर्घपीवरदोर्दंडः कंबुग्रीवोऽरुणेक्षणः ॥ श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥३२॥ पीतवासा महोरस्कः सुमृष्टमणिकुंडलः ॥ स्निग्धकुंचितकेशांतः सुभगः सिंहविक्रमः ॥ ३३ ॥ अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ॥ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः ॥ ३४ ॥ धन्वंतरिरिति ख्यात आयुर्वेददृगिज्यभाक् ॥ तमालोक्यासुराः सर्वे कलशं चामृताभृतम् ॥ लिप्संतः सर्ववस्तूनि कलशं तरसाऽहरन् ॥ ३५ ॥ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने ॥ विषण्णमनसो देवा हरिं शरणमाययुः ॥ ३६ ॥ इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृत् ॥ मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ॥ ३७ ॥ (इत्युक्त्वा सांत्वयन्देवांस्तत्रैवांतर्दधे हरिः) ॥ मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसाम् ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ॥ ३८ ॥ देवाः स्वं भागमर्हंति ये तुल्यायासहेतवः ॥ सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥३९॥ इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः ॥ दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ॥ ४० ॥ एतस्मिन्नंतरे विष्णुः सर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥ ४१ ॥ ॥

अमृतपूर्णं कलशं बिभ्रत् विष्णोरंशावतारः ॥३४॥ आयुर्वेदप्रवर्तको धन्वंतरिरिति प्रख्यातः। एतादृशं तं तेनानीतममृतपूर्णं कलशं च दृष्ट्वा असुरा बलात्तं कलशमाहरन् ॥३५॥ असुरैः कलशे नीयमाने सति खिन्ना देवा हरिं शरणं ययुः ॥३६॥ भगवान् तेषां दैन्यं विलोक्य दैत्यानां मिथः कलहोत्पादनं कृत्वा मोहिनीरूपेण वोऽर्थं साधयिष्यामि। यूयं माखिद्यत ॥ ३७ ॥ (इति देवानुक्त्वा हरिस्तत्रैवांतर्दधे) ततस्तेषाममृतार्थे मिथः कलहो जातः ॥ ३८ ॥ तत्र ये दुर्बलास्ते तुल्यप्रयत्नकरा देवाः स्वभागमर्हंति एष सनातनो धर्मः ॥३९॥ इत्युक्त्वा धृतकलशान् प्रबलान् प्रत्यषेधन् ॥४०॥ एतस्मिन्नंतरे सर्वोपायविदीश्वरः परमाद्भुतं स्त्री

रूपं दधार ॥ ४१ ॥ कथंभूतम् । कमलवत् श्यामं सर्वावयवसुंदरं सुकपोलनासिकम् ॥४२ ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरं चंचललोचनम् ॥४३ ॥ स्वकेशभारेण मालां बिभ्रत् । सुग्रीवकंठाभरणं सुभुजांगदभूषितम् ॥ ४४ ॥ निर्मलवस्त्रेण वेष्टिते नितंबे धृतया कांच्या शोभितं लसच्चरणनूपुरम् ॥ ४५ ॥ भ्रूविक्षेपावलोकनैर्दैत्यानां चित्तेषु मुहुः काममुद्दीपयत् । एतादृशं स्त्रीरूपं दधार ॥ ४६ ॥ इति श्रीमद्भागवतचूर्णिकायामष्टमस्कंधे अष्टमोऽध्यायः ॥८॥ ॥ नवमे मोहितैर्दैत्यैरर्पितेऽमृतभाजने । तद्वंचनेन देवेभ्योऽमृतं दत्तं तयेर्यते ॥ १ ॥ श्रीशुक उवाच ॥ अथ ते दैत्या अमृतार्थे त्यक्तसौहृदा अन्योन्यतः पात्रं हरंतः संत आयांतीं स्त्रियं ददृशुः ॥ १ ॥ अहो अस्या रूपम् । अहो कांतिः अहो नवं वय इति वदंतः कामातुरास्ते दैत्यास्तस्याः समीपं गत्वा तां पप्रच्छुः

प्रेक्षणीयोत्पलश्यामं सर्वावयवसुंदरम् ॥ समानकर्णाभरणं सुकपोलोन्नसाननम् ॥४२॥ नवयौवननिर्वृत्तस्तनभारकृशोदरम् ॥ मुखामोदानुरक्तालिझंकारोद्विग्नलोचनम् ॥ ४३ ॥ बिभ्रत्स्वकेशभारेण मालामुत्फुल्लमल्लिकाम् ॥ सुग्रीवकंठाभरणं सुभुजांगदभूषितम् ॥ ४४ ॥ विरजांबरसंवीतनितंबद्वीपशोभया ॥ कांच्या प्रविलसद्वल्गु चलच्चरणनूपुरम् ॥ ४५ ॥ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ॥ दैत्ययूथपचेतःसु काममुद्दीपयन्मुहुः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे अष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥ श्रीशुक उवाच ॥ तेऽन्योन्यतोऽसुराः पात्रं हरंतस्त्यक्तसौहृदाः ॥ क्षिपंतो दस्युधर्माण आयांतीं ददृशुः स्त्रियम् ॥ १ ॥ अहो रूपमहो धाम अहो अस्या नवं वयः ॥ इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ २ ॥ का त्वं कंजपलाशाक्षि कुतो वा किंचिकीर्षसि ॥ कस्यासि वद वामोरु मथ्नंतीव मनांसि नः ॥ ३ ॥ न वयं त्वाऽमरैर्दैत्यैः सिद्धगंधर्वचारणैः ॥ नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ॥ ४ ॥ नूनं त्वं विधिना सुभ्रूः प्रेषितासि शरीरिणाम् ॥ सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किम् ॥५॥ सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ॥ ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ॥६॥ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ॥ विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥७॥ इत्युपामंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत् ॥८॥ श्रीभगवानुवाच ॥ कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः ॥ विश्वासं पंडितो जातु कामिनीषु न याति हि ॥९॥ सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ॥ सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वताम् ॥ १० ॥ ॥

॥ २ ॥ हे कमलनेत्रे, त्वं का । कुत आगता । किंचिकीर्षसि । कस्यासि ॥ ३ ॥ वयं त्वां देवासुरगंधर्वसिद्धचारणादिभिरस्पृष्टपूर्वां जानीमः ॥ ४ ॥ हे सुभ्रूः, नः सर्वेंद्रियमनःप्रीतिं कर्तुं सदयेनेश्वरेण त्वं प्रेषितासि किम् ॥ ५ ॥ सा त्वमेकवस्तुनि स्पर्धमानानां नः शं विधत्स्व ॥ ६ ॥ वयं कश्यपपुत्राः परस्परं भ्रातरः स्मः । अतोऽस्माकं कलहो यथा न भवेत्तथा सुधां विभजस्व ॥ ७ ॥ एवं दैत्यैः प्रार्थितो मोहिनीरूपो हरिः प्रहस्य सुंदरकटाक्षैरवलोकयन् प्राह ॥ ८ ॥ श्रीभगवानुवाच ॥ हे दैत्याः, यूयं कश्यपपुत्राः जारिण्यां मयि कथमासक्ता जाताः । पंडिताः कामिनीषु विश्वासं न प्राप्नुवंति ॥ ९ ॥ हे दैत्याः, वेश्यानां स्त्रीणां सालावृकाणां च सख्यान्यनित्यानि वदंति । यतस्ता नित्यं नवं नवं विचिन्वंति ॥ १० ॥ ॥

श्रीशुक उवाच ॥ एवं दैत्यास्तस्या नर्मवाक्यैर्मोहिताः संतो जहसुः । तस्या अमृतपात्रं च ददुः ॥११॥ ततो हरिरमृतपात्रं गृहीत्वा प्रहस्य जगाद । हे दैत्याः, मया साधु वा असाधु वा कृतं यद्यूयमंगीकुरुत तर्हि सुधां विभजे ॥१२॥ एवं तस्या वाक्यं श्रुत्वा दैत्यास्तथेत्यन्वमंसत ॥१३॥ अथ ते सर्वे कृतस्नाना उपोष्याग्निं हुत्वा ब्राह्मणादिभ्यो दानानि दत्वा ॥१४॥ नूतनानि वस्त्राणि धृत्वा भूषिताः संतः पूर्वाग्रदर्भासनेषु विविशुः॥ १५ ॥ तदा धूपसुरभीकृतशालायां देवदैत्येषु पूर्वमुखेषूपविष्टेषु सत्सु ॥ १६ ॥ तस्यां शालायां हे राजेंद्र, मदविह्वलाक्षी नूपुरैः शब्दं कुर्वती कुंभस्तनी सा मोहिनी कलशं गृहीत्वा प्रविवेश ॥ १७॥ कनककुंडलां श्रियः सखीं विगलितस्तनपट्टिकां तां दृष्ट्वा सर्वे देवासुरा मुमुहुः ॥ १८ ॥ तदा हरिर्जात्या क्रूराणामसुराणां सुधादानं सर्पाणां क्षीरदानमिवान्याय्यं

श्रीशुक उवाच ॥ इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः॥ जहसुर्भावगंभीरं ददुश्चामृतभाजनम् ॥११॥ ततो गृहीत्वाऽमृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ॥ यद्यभ्युपेत क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमाम्॥ १२ ॥ इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुंगवाः॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥१३॥ अथोपोष्य कृतस्नाना हुत्वा च हविषाऽनलम्॥ दत्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः ॥१४॥ यथोपजोषं वासांसि परिधायाहतानि ते ॥ कुशेषु प्राविशन्सर्वे प्रागग्रेष्वभिभूषिताः ॥१५॥ प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च ॥ धूपामोदितशालायां जुष्टायां माल्यदीपकैः ॥१६॥ तस्यां नरेंद्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ॥ सा कूजती कनकनूपुरसिंजितेन कुंभस्तनी कलशपाणिरथाविवेश ॥१७॥ तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्याम् ॥ संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकां ताम् ॥ १८ ॥ असुराणां सुधादानं सर्पाणामिव दुर्नयम् ॥ मत्वा जातिनृशंसानां न तां व्यभजदच्युतः ॥१९॥ कल्पयित्वा पृथक्पंक्तीरुभयेषां जगत्पतिः ॥ तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु ॥२०॥ दैत्यान्गृहीतकलशो वंचयन्नुपसंचरैः ॥ दूरस्थान्पाययामास जरामृत्युहरां सुधाम्॥२१॥ ते पालयंतः समयमसुराः स्वकृतं नृप ॥ तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥२२॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः ॥ बहुमानेन चाबद्धा नोचुः किंचन विप्रियम् ॥२३॥ देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ॥ प्रविष्टः सोमममपिबच्चंद्रार्काभ्यां च सूचितः ॥ २४ ॥ चक्रेण क्षुरधारेण जहार पिबतः शिरः ॥ हरिस्तस्य कबंधस्तु सुधयाऽप्लावितोऽपतत् ॥ २५ ॥

मत्वा तेभ्यः सुधां न व्यभजत् ॥ १९ ॥ ततो देवदैत्यानां पृथक् पृथक् पंक्तीर्विधाय स्वस्वपंक्तिषु तानुपवेश्य ॥ २० ॥ गृहीतकलशो हरिः प्रियवाक्यादिना तान् वंचयन् गमनैर्दूरस्थानपि देवान् जरामृत्युहरां सुधां पाययामास ॥२१॥ ततो दैत्याः स्वकृतं समयं पालयंतस्तस्या बहुमानेनात्यंतं[1] बद्धाः स्त्रीविवादजुगुप्सया विप्रियं किंचिदपि नोचुः । किंतु तूष्णीमासन् ॥ २२ ॥ २३ ॥ तदा राहुर्देवपंक्तौ चंद्रार्कयोर्मध्ये देववेषेण स्थितः सन् सुधां पपौ ॥ २४ ॥ तदा चंद्रार्काभ्यां सूचितो हरिश्चक्रेण तच्छिरो जहार । तत्कबंधस्तु सुधया असंस्पृष्टः सन् भूमौ पपात ॥ २५ ॥ ॥ ॥

---

[1] एते तावत्कृपणाः पूर्वं किंचित्पिबंतु यूयं तु धीराः क्षणं प्रतीक्षध्वमित्यादिना बहुमानेन ।

शिरस्त्वमरतां नीतम् । हरिस्तं ग्रहं चकार । यः पर्वणि वैरेण चंद्रार्कावभिधावति ॥ २६ ॥ एवं देवैरमृते पीतेऽसुराणां पश्यतां सतां हरिः स्वस्वरूपं जगृहे
॥२७॥ एवं देवासुराः श्रमे तुल्या अपि फले विकल्पं प्रापुः । हे नृप, देवा यत्पादपंकजरजःसंश्रयादमृतं प्रापुः । दैत्या न प्रापुः ॥२८॥ प्राणधनादिभिर्देहात्मजाद्यर्थं
यत्कर्म क्रियते तद्व्यर्थं भवति । तैरेव प्राणधनादिभिरीश्वरोद्देशेन यत्क्रियते तन्महाफलं भवति ॥२९॥ इति श्रीमद्भागवतचूर्णि॰ अष्टमस्कंधे नवमोध्यायः
॥९॥ ॥ दशमे मत्सराद्दैत्यैरारब्धे तु मृधेऽसुरैः । दैत्यमायाविषण्णेषु देवेष्वाविर्बभौ हरिः ॥१॥ तदेवममृतावाप्तिर्नाभक्तानामितीरितम् । भक्तमत्सरतः
प्राणहानिः पुनरुदीर्यते ॥२॥ श्रीशुक उवाच ॥ हे नृप, दैतेयाः कर्मणि प्रयत्नशीलाः संतोऽपि भगवत्पराङ्मुखाः । अत एवामृतं नाविंदन् ॥१॥ एवं भ-

शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ॥ यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः ॥२६॥ पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः ॥
पश्यतामसुरेंद्राणां स्वं रूपं जगृहे हरिः ॥ २७ ॥ एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फलेविकल्पाः ॥ तत्रामृतं
सुरगणाः फलमंजसापुर्यत्पादपंकजरजःश्रयणान्न दैत्याः ॥२८॥ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात्
॥तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत्॥२९॥इति श्री॰म॰अष्ट॰ऽमृतमथने नवमोऽध्यायः॥९॥
॥ श्रीशुक उवाच ॥ इति दानवदैतेया नाविंदन्नमृतं नृप ॥ युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥१॥ साधयित्वाऽमृतं
राजन्पाययित्वा स्वकान्सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥२॥ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः ॥ अमृष्यमाणा
उत्पेतुर्देवान्प्रत्युद्यतायुधाः ॥३॥ ततः सुरगणाः सर्वे सुधया पीतयैधिताः ॥ प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः॥४॥
तत्र दैवासुरो नाम रणः परमदारुणः ॥ रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ॥५॥ तत्रान्योऽन्यं सपत्नास्ते संरब्धमनसो रणे॥
समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥६॥ शंखतूर्यमृदंगानां भेरीडमरिणां महान्॥ हस्त्यश्वरथपत्तीनां नदतां निःस्वनोऽभवत्
॥७॥ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरिभाश्चेभैः समसज्जंत संयुगे ॥ ८ ॥ उष्ट्रैः केचिदिभैः केचिदपरे
युयुधुः खरैः ॥ केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥९॥ गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः
॥ १० ॥ शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ॥ बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ ११ ॥ ॥

गवानमृतं निर्माय देवान् पाययित्वा च गरुडमारुह्य वैकुंठं ययौ ॥२॥ ततो देवानां परामृद्धिं दृष्ट्वा दैत्या गृहीतायुधाः संतो देवान्प्रति युद्धार्थं ययुः ॥ ३ ॥
देवा अपि नारायणपदाश्रयात् पीतया सुधया वृद्धिं गताः संतो दैत्यान्प्रति शस्त्रैर्युयुधुः ॥ ४ ॥ तदा समुद्रतीरे देवासुरो नाम रोमहर्षणो दारुणः संग्रामोऽभवत्
॥ ५ ॥ तत्र रणे ते सपत्ना अन्योऽन्यं प्राप्य विविधायुधैर्जघ्नुः ॥ ६ ॥ तत्र शंखमृदंगडमरुभेर्यादिवाद्यानां गर्जतां हस्त्यश्वरथपत्तीनां च शब्दो जातः
॥ ७ ॥ तत्र युद्धे रथिनो रथिभिः पत्तयः पत्तिभिः अश्वारूढा अश्वारूढैर्गजारूढाश्च गजारूढैर्युयुधुः ॥ ८ ॥ तथा केचिद्भटा उष्ट्रगजसिंहऋक्षवानरैः ॥ ९ ॥
गृध्रकंकबकशरभमहिषवृषभैः ॥ १० ॥ शिवामूषकशशबस्तमृगहंससूकरैः ॥ ११ ॥ ॥ ॥ ॥

जलस्थलखगैश्च कृतवाहना उभयोः सेनयोः स्थितास्ते योधा अग्रतोऽग्रतो विविशुः ॥ १२ ॥ तदा हे नृप, विचित्रैर्ध्वजपटैः श्वेतच्छत्रैर्व्यजनैश्चामरैः ॥१३ ॥ उष्णीषैः कवचैर्भूषणैस्तीक्ष्णशस्त्रैश्च ॥ १४ ॥ देवदानववीराणां ते सैन्ये वीरपंक्तिभी रेजतुः ॥ १५ ॥ तत्र बलिर्मयासुरनिर्मितं कामगं ॥ १६ ॥ सर्वयुद्धसामग्र्या युक्तं सर्वाश्चर्यमयं ॥ १७ ॥ वैहायसं नाम विमानमारुह्य दैत्यसैन्यैर्वेष्टितश्छत्रचामरैश्चंद्र इव शुशुभे ॥ १८ ॥ तस्य सर्वतो वाहनैः सेनापतय आसन् । तेच– नमुचिः शंबरः बाणः विप्रचित्तिः अयोमुखः ॥ १९ ॥ द्विमूर्धा कालनाभः प्रहेतिः हेतिः इल्वलः शकुनिः भूतसंतापः वज्रदंष्ट्रः विरोचनः ॥ २० ॥ हयग्रीवः शंकुशिराः कपिलः मेघदुंदुभिः तारकः चक्रदृक् शुंभः निशुंभः जंभः उत्कलः ॥ २१ ॥ अरिष्टः अरिष्टनेमिः मयः अन्ये च पौलोमकालेयनिवा-

अन्ये जलस्थलखगैः सत्वैर्विकृतविग्रहैः ॥ सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः ॥१२॥ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदंडैर्व्यजनैर्बार्हचामरैः ॥१३॥ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः ॥ स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः॥१४॥ देवदानववीराणां ध्वजिन्यौ पांडुनंदन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥१५॥ वैरोचनो बलिः संख्ये सोऽसुराणां चमूपतिः ॥ यानं वैहायसं नाम कामगं मयनिर्मितम् ॥१६॥ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम् ॥१७॥ आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ॥ वालव्यजनछत्राग्र्यै रेजे चंद्र इवोदये ॥ १८ ॥ तस्यासन्सर्वतो यानैर्यूथानां पतयोऽसुराः ॥ नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ॥१९॥ द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः ॥ शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥२०॥ हयग्रीवः शंकुशिराः कपिलो मेघदुंदुभिः ॥ तारकश्चक्रदृक् शुंभो निशुंभो जंभ उत्कलः ॥२१॥ अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः ॥ अन्ये पौलोमकालेया निवातकवचादयः ॥२२॥ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः ॥ सर्व एते रणमुखे बहुशो निर्जितामराः ॥२३॥ सिंहनादान्विमुंचंतः शंखान्दध्मुर्महारवान् ॥ दृष्ट्वा सपत्नानुत्सिक्तान्बलभित्कुपितो भृशम् ॥२४॥ ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट् ॥ यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ २५ ॥ तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः ॥ लोकपालाः सह गणैर्वाय्वग्निवरुणादयः ॥२६॥ तेऽन्योन्यमभिसंसृत्य क्षिपंतो मर्मभिर्मिथः ॥ आह्वयंतो विशंतोऽग्रे युयुधुर्द्वंद्वयोधिनः ॥ २७ ॥ युयोध बलिरिंद्रेण तारकेण गुहोऽस्यत ॥ वरुणो हेतिनायुध्यन्मित्रो राजन्प्रहेतिना ॥ २८ ॥ यमस्तु कालनाभेन विश्वकर्मा मयेन वै ॥ शंबरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥ २९ ॥ ॥

तकवचादयः ॥ २२ ॥ एते अमृतस्य भागमप्राप्ताः केवलं क्लेशभागिनो दैत्याः ॥ २३ ॥ सिंहनादान् मुंचंतः संतः शंखान् दध्मुः । तदा शत्रून् दृष्ट्वा प्रकुपित इंद्रः ॥ २४ ॥ दिग्गजमैरावतमारूढः सन् उदयाद्रिमारूढः सूर्य इव शुशुभे ॥ २५ ॥ तस्य सर्वतो नानावाहनध्वजायुधा देवा वाय्वग्निवरुणादयो लोकपालाश्च गणैः सहासन् ॥ २६ ॥ तेऽन्योऽन्यं संसृत्य मर्मभिः क्षिपंतो मिथ आह्वयंतो द्वंद्वयोधिनो युयुधुः ॥ २७ ॥ तत्र बलिरिंद्रेण युयुधे । गुहस्तारकेण । वरुणो हेतिना । मित्रः प्रहेतिना ॥ २८ ॥ यमः कालनाभेन । विश्वकर्मा मयेन । त्वष्टा शंबरेण । सविता विरोचनेन ॥ २९ ॥ ॥

अपराजितो नमुचिना । अश्विनौ वृषपर्वणा ॥३०॥ सोमो राहुणा । वायुः पुलोम्ना । देवी निशुंभशुंभाभ्याम् ॥३१॥ वृषाकपिर्जंभेन । विभावसुर्महिषेण ॥३२॥ दुमर्षः कामदेवेन । बृहस्पतिः शुक्रेण । शनैश्चरो नरकेण ॥३३॥ मरुतो निवातकवचैः । वसवः कालेयैः । विश्वेदेवाः पौलोमैः । रुद्राः क्रोधवशैश्च युयुधुः ॥३४॥ त एवं तीक्ष्णबाणखड्गतोमरैर्मिथो निजघ्नुः ॥३५॥ भुशुंडिचक्रगदापट्टिशशक्तिज्वलत्काष्ठपरश्वधभल्लपरिघमुद्गरभिंदिपालैः शिरांसि चिच्छिदुः ॥३६॥ गजाश्वरथारूढाः पदातयश्च छिन्नबाहूरुशिरोधरांघ्रयो बभूवुः ॥३७॥ तेषां देवादीनां पदाघातै रथैश्च रणभूमेरुत्थितो रेणुः खं दिशः सूर्यं चाच्छादयत् ॥३८॥ तेषां कि-

अपराजितेन नमुचिरश्विनौ वृषपर्वणा ॥ सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च ॥३०॥ राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः ॥ निशुंभशुंभयोर्देवी भद्रकाली तरस्विनी ॥३१॥ वृषाकपिस्तु जंभेन महिषेण विभावसुः ॥ इल्वलः सह वातापिर्ब्रह्मपुत्रैररिंदम ॥३२॥ कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह ॥ बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ॥ ३३ ॥ मरुतो निवातकवचैः कालेयैर्वसवोऽमराः ॥ विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ॥३४॥ त एवमाजावसुराः सुरेंद्रा द्वंद्वेन संहत्य च युध्यमानाः ॥ अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ॥३५॥ भुशुंडिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंदिपालैश्च शिरांसि चिच्छिदुः ॥ ३६ ॥ गजास्तुरंगाः सरथाः पदातयः सारोहवाहा विविधा विखंडिताः ॥ निकृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥३७॥ तेषां पदाघातरथांगचूर्णितादायोधनादुल्बण उत्थितस्तदा ॥ रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ॥३८॥ शिरोभिरुद्धूतकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः ॥ महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ॥३९॥ कबंधास्तत्र चोत्पेतुः पश्यंतः स्वशिरोऽक्षिभिः ॥ उद्यतायुधदोर्दंडैराधावंतो भटान्मृधे ॥४०॥ बलिर्महेंद्रं दशभिस्त्रिभिरैरावतं चरैः ॥ चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत् ॥४१॥ स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः ॥ चिच्छेद निशितैर्भल्लैरसंप्राप्तान्हसन्निव ॥४२॥ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे ॥ तां ज्वलंतीं महोल्काभां हस्तस्थामच्छिनद्धरिः ॥ ४३ ॥ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः ॥ यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ॥४४॥ ससर्जाथासुरीं मायामंतर्धानगतोऽसुरः ॥ ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ॥ ४५ ॥ ततो निपेतुस्तरवो दह्यमाना दवाग्निना ॥ शिलाः सटंकशिखराश्चूर्णयंत्यो द्विषद्बलम् ॥ ४६ ॥ ॥ ॥

रीटकुंडलयुक्तैः शिरोभिः सायुधालंकारैर्हस्तैस्तथा वाहनानां च शिरऊरुबाहुभिः प्रास्तृता रणभूर्बभौ ॥ ३९ ॥ तत्र उद्यतायुधैर्हस्तैर्युक्ताः कंबधाः पतितानि स्वशिरांस्यक्षिभिः पश्यंतः संतः प्रतिभटोपर्युत्पेतुः ॥४०॥ ततो बलिर्दशभिः शरैरिंद्रं त्रिभिर्गजं चतुर्भिर्गजरक्षकान् एकेन गजयंतारं च विव्याध ॥४१॥ इंद्रः प्राप्तान् तान् बाणान् शीघ्रं स्वबाणैश्चिच्छेद ॥४२॥ ततो बलिस्तस्य पराक्रमं वीक्ष्य शक्तिमाददे । तत इंद्रो ज्वलंतीं हस्तस्थां तां चिच्छेद ॥४३॥ ततो बलिः शूलप्रासतोमरादि यद्यच्छस्त्रं जगृहे तत्तदिंद्रश्चिच्छेद ॥४४॥ ततो बलिरंतर्धाय मायां ससर्ज । तया देवसेनोपरि पर्वतः प्रादुरभूत् ॥४५॥ ततो दह्यमाना वृक्षाश्चूर्णं कुर्वंत्यः

शिलाः ॥४६॥ महासर्पा वृश्चिकाः सिंहव्याघ्रवराहादयश्च निपेतुः ॥४७॥ तथा छिंधि भिंधीति च वादिन्यो नग्नाः शतशो राक्षस्यो रक्षोगणाश्चोत्पेतुः ॥४८॥ तत आकाशे प्राप्ता मेघा अंगारान् मुमुचुः ॥४९॥ दैत्येन सृष्टोऽग्निः प्रलयाग्निरिव देवसैन्यं ददाह ॥ ५० ॥ समुद्रः सर्वतः प्रचंडवातैरुद्धूततरंग उद्वेलोऽदृश्यत ॥५१॥ एवं दैत्यैर्मायासु सृष्टासु सतीषु देवाः खेदं प्रापुः॥५२॥ ते तन्नाशोपायमजानंतः संतो हरिं दध्युः ॥५३॥ ततो गरुडारूढो विश्वपालको हरिः पीतांबरधरः आयुधसहिताष्टबाहुयुक्तः कमलनेत्रः किरीटकुंडलयुतः प्रादुरभूत् ॥५४॥ तदैव दैत्यनिर्मिता माया विनेशुः । हरेः स्मृतिरेव सर्वदुःखविमोक्षणी भवति किमुत हरेः प्रवेशः ॥५५॥ तदा युद्धे कालनेमिर्गरुडारूढं हरिं दृष्ट्वा शूलं चिक्षेप । तद्गरुडमूर्ध्नि पतच्छूलं भगवान् गृहीत्वा तेनैव सवाहनं शत्रुं जघान ॥५६॥

महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः ॥ सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ॥ ४७ ॥ यातुधान्यश्च शतशः शूलहस्ता विवाससः ॥ छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्रभो ॥ ४८ ॥ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४९ ॥ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः ॥ सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक्ष् ॥ ५० ॥ ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ॥ प्रचंडवातैरुद्धूततरंगावर्तभीषणः ॥५१॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः ॥ सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥ ५२ ॥ न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ॥ ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ॥५३॥ ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ॥ ५४ ॥ तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ॥ स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥ ५५ ॥ दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः ॥ तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥५६॥ माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम् ॥ आहत्य तिग्मगदयाऽहनदंडजेंद्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽद्यः ॥ ५७ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे दशमोऽध्यायः ॥ १० ॥ ॥ श्रीशुक उवाच ॥ अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयाऽनुकंपया ॥ जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान्रणे यैरभिसंहताः पुरा ॥१॥ वैरोचनाय संरब्धो भगवान्पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हाहेति चुक्रुशुः ॥२॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरः स्थितम् ॥ मनस्विनं सुसंपन्नं विचरंतं महामृधे ॥ ३ ॥ ॥ ॥

ततो माली सुमाली च चक्रेण छिन्नमस्तकौ संतौ युधि पेततुः । अथ माल्यवान् गदया हरिं निहत्य पुनर्गरुडं हंतुं गदां जगृहे । तावद्भगवान् तस्य शिरश्चक्रेण चिच्छेद ॥ ५७ ॥ इति श्रीमद्भागवतचूर्णिकायां अष्टमस्कंधे दशमोऽध्यायः ॥ १० ॥ ॥ एकादशे तु देवेषु दैत्यघातिषु नारदः । देवानवारयत् शुक्रो मृतान् दैत्यानजीवयत् ॥१॥ श्रीशुक उवाच ॥ अथेंद्रादयो देवा ईश्वरकृपया दुःखमुक्ताः संतो यैः पूर्वं संगतास्तान् दैत्यान् निजघ्नुः ॥१॥ यदा क्रुद्ध इंद्रो बलिं हंतुं वज्रं जगृहे तदा प्रजा हाहेति चुक्रुशुः ॥ २ ॥ युद्धे पुरः स्थितं बलिं तिरस्कृत्येंद्र आह ॥ ३ ॥ ॥

हे मूढ, मायाभिर्मायेशान्नो जेतुमिच्छसि । यथा नटो बालान् जित्वा तद्धनं हरति तद्वत् ॥४॥ मायाभिर्ये स्वर्गमारोढुमिच्छंति तान् दस्यून् पूर्वस्मात्पदादप्यधः पातयामि ॥५॥ हे मंदात्मन्, अहं वज्रेणाद्य ते शिरो हरिष्ये । त्वं ज्ञातिभिः सह स्वरक्षणार्थं प्रयत्नं कुरु ॥ ६ ॥ बलिरुवाच ॥ हे इंद्र, युद्धे वर्तमानानां कीर्तिर्जयः पराजयो वा क्रमात्सर्वेषां स्युः ॥७॥ एतत्कीर्त्यादिकं सर्वं कालाधीनं मत्वा ज्ञानिनो न हृष्यंति न शोचंति च । एवंविधे विवेके यूयमज्ञाः स्थ ॥८॥ अतः कीर्त्यादिकं स्वाधीनं मन्यमानानां भवतां वचो वयं न गृह्णीमः॥९॥ श्रीशुक उवाच ॥ एवं वीरमर्दनो बलिरिंद्रं विनिंद्य बाणैरहनत्॥१०॥ एवं वैरिणा तिरस्कृत इंद्रस्तद्वचो न सेहे ॥११॥ तत इंद्रस्तस्मै वज्रं प्राहरत् ॥ तदा बलिर्वैहायसविमानसहितो भूमौ पपात ॥१२॥ बलिं पतितं दृष्ट्वा तत्स-

नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनम् ॥ ४ ॥ आरुरुक्षंति मायाभिरुत्सिसृप्संति ये दिवम् ॥ तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च पदादधः ॥५॥ सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा ॥ शिरो हरिष्ये मंदात्मन् घटस्व ज्ञातिभिः सह ॥६॥ बलिरुवाच ॥ संग्रामे वर्तमानानां कालचोदितकर्मणाम् ॥ कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥७॥ तदिदं कालरशनं जनाः पश्यंति सूरयः ॥ न हृष्यंति न शोचंति तत्र यूयमपंडिताः ॥ ८ ॥ न वयं मन्यमानानामात्मानं तत्र साधनम् ॥ गिरो वः साधु शोच्यानां गृह्णीमो मर्मताडनाः ॥ ९ ॥ श्रीशुक उवाच ॥ इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः ॥ आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥ १० ॥ एवं निराकृतो देवो वैरिणा तथ्यवादिना ॥ नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ॥ ११ ॥ प्राहरत्कुलिशं तस्मा अमोघं परमर्दनः ॥ सयानो न्यपतद्भूमौ छिन्नपक्ष इवाचलः ॥ १२ ॥ सखायं पतितं दृष्ट्वा जंभो बलिसखः सुहृत् ॥ अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् ॥ १३ ॥ स सिंहवाह आसाद्य गदामुद्यम्य रंहसा ॥ जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥१४॥ गदाप्रहारव्यथितो भृशं विह्वलितो गजः ॥ जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥१५॥ ततो रथो मातलिना हरिभिर्दशशतैर्वृतः ॥ आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥ १६ ॥ तस्य तत्पूजयन्कर्म यंतुर्दानवसत्तमः ॥ शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे ॥ १७ ॥ सेहे रुजं सुदुर्मर्षां सत्वमालंब्य मातलिः ॥ इंद्रो जंभस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥ १८ ॥ जंभं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः ॥ नमुचिश्च बलः पाकस्तत्रापेतुस्त्वरान्विताः ॥ १९ ॥ वचोभिः परुषैरिंद्रमर्दयंतोऽस्य मर्मसु ॥ शरैरवाकिरन्मेघा धाराभिरिव पर्वतम् ॥ २० ॥ ॥

खो जंभो हतस्यापि सख्युर्मित्रत्वं दर्शयन् ॥१३॥ सिंहमारुह्य गदामुद्यम्य स्कंधयोः संधौ शक्रं गजं च ताडयामास ॥१४॥ तदा गजो विह्वलः सन् जानुभ्यां भुवं स्पृष्ट्वा महद्दुःखं प्राप ॥१५॥ ततो मातलिना सहस्राश्वैर्युतो रथ आनीतः । इंद्रो गजं हित्वा रथमारुरोह ॥१६॥ तदा सारथेस्तत्कर्म प्रशंसन् जंभः शूलेन मातलिं तताड ॥१७॥ मातलिर्धैर्यं धृत्वा तां दुःसहां व्यथां सेहे । तत इंद्रः क्रुद्धः सन् वज्रेण जंभशिरो जहार ॥१८॥ नारदाज्जंभं हतं श्रुत्वा तस्य ज्ञातयो नमुचिर्बलः पाक इति त्रयस्त्वरान्वितास्तत्राययुः ॥१९॥ ते त्रयोऽपि वचोभिरिंद्रमर्दयंतः शरैरवाकिरन् । मेघा धाराभिः पर्वतं यथा ॥२०॥ ॥

तत्र बलः सहस्रबाणैरिंद्रस्य सहस्रसंख्याकानश्वानर्दयामास ॥२१॥ पाको द्विशताभ्यां बाणाभ्यां सावयवं रथं मातलिं च विव्याध ॥२२॥ नमुचिः पंचदशभिर्बाणैरिंद्रं विध्वा मेघ इव व्यनदत् ॥२३॥ ततो दैत्याः सरथमिंद्रं सर्वतः शरैश्छादयामासुः ॥ २४ ॥ तदा देवा इंद्रमलक्षयंतो विह्वलाः शत्रुसैन्येन निर्जिताः संतो विचुक्रुशुः ॥२५॥ तत इंद्र इषुबद्धपंजरान्निर्गतः सन् स्वतेजसा दिशः प्रकाशयन् सूर्य इव बभौ ॥२६॥ ततो दैत्यैरर्दितां स्वसेनां निरीक्ष्येंद्रो रिपुं हंतुं वज्रं गृहीत्वा ॥२७॥ तज्ज्ञातीनां भयं जनयन् तेन वज्रेण बलपाकयोः शिरसी जहार ॥ २८ ॥ नमुचिस्तयोर्वधं दृष्ट्वा शोकक्रोधयुक्तः सन् इंद्रं हंतुं प्रयत्नं

हरीन्दशशतान्याजौ हर्यश्वस्य बलः शरैः ॥ तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥ २१ ॥ शताभ्यां मातलिं पाको रथं सावयवं पृथक् ॥ सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे ॥२२॥ नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः ॥ आहत्य व्यनदत्संख्ये सतोय इव तोयदः ॥२३॥ सर्वतः शरकूटेन शक्रं सरथसारथिम् ॥ छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदाः ॥२४॥ अलक्षयंतस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगाः ॥ अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथार्णवे ॥२५॥ ततस्तुराषाडिषुबद्धपंजराद्विनिर्गतः साश्वरथध्वजाग्रणीः ॥ बभौ दिशः खं पृथिवीं च रोचयन्स्वतेजसा सूर्य इव क्षपात्यये ॥२६॥ निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे ॥ उदयच्छद्रिपुं हंतुं वज्रं वज्रधरो रुषा ॥२७॥ स तेनैवाष्टधारेण शिरसी बलपाकयोः ॥ ज्ञातीनां पश्यतां राजन् जहार जनयन्भयम् ॥२८॥ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रं नृपते चकार परमोद्यमम् ॥ २९॥ अश्मसारमयं शूलं घंटावद्धेमभूषणम् ॥ प्रगृह्याभ्यद्रवत्क्रुद्धो हतोऽसीति वितर्जयन् ॥ प्राहिणोद्देवराजाय निनदन्मृगराडिव ॥ ३० ॥ तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा ॥ तमाहनन्नृप कुलिशेन कंधरे रुषान्वितस्त्रिदशपतिः शिरो हरन् ॥३१॥ न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः ॥ तदद्भुतं परमतिवीर्यवृत्रभित्तिरस्कृतो नमुचिशिरोधरत्वचा ॥३२॥ तस्मादिंद्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतो यतः ॥ किमिदं दैवयोगेन भूतं लोकविमोहनम् ॥३३॥ येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये ॥ कृतो निविशतां भारैः पतत्रैः पततां भुवि ॥ ३४ ॥ तपःसारमयं त्वाष्ट्रं वृत्रो येन विपाटितः ॥ अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ ३५ ॥ सोऽयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके ॥ नाहं तदाददे दंडं ब्रह्मतेजोऽप्यकारणम् ॥ ३६ ॥ इति शक्रं विषीदंतमाह वागशरीरिणी ॥ नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥ ३७ ॥ ॥

चकार ॥२९॥ स स्वर्णघंटाभिर्युक्तं शूलं प्रगृह्य हतोऽसि हतोऽसीति वदन् तच्छूलमिंद्राय प्राहिणोत् ॥ ३० ॥ तदापतच्छूलमाकाशे बाणैरिंद्रः सहस्रधा चिच्छेद । ततो रुषा वज्रेण तं कंठेऽहनत् ॥३१॥ तदा वज्रस्तस्य त्वचमपि न बिभेद । तन्महदद्भुतमभूत् ॥३२॥ तदा तस्माच्छत्रोर्भीत इंद्र इदमाह । अहो दैवेन लोकविमोहनमिदं किं जातम् ॥३३॥ येन वज्रेण मया पूर्वं पर्वतपक्षाश्छिन्नाः ॥३४॥ येन च वृत्रासुरोऽन्ये च बलाढ्या दैत्या नाशिताः ॥३५॥ सोऽयं वज्रो मयाल्पेऽसुरे मुक्तः सन् व्यर्थो जातः। तस्मात्तं वज्रमहं पुनर्न धारयिष्ये । अहो दधीचेः सामर्थ्यमपि निष्फलं जातम् ॥३६॥ एवं खेदं कुर्वंतमाकाशवागाह । हे इंद्र,

मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ॥ अतोऽन्यश्चिंतनीयस्त उपायो मघवन्रिपोः॥३८॥ तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ॥ ध्यायन्फेनमथापश्यदुपायमुभयात्मकम् ॥ ३९ ॥ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः ॥ तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुम् ॥ ४० ॥ गंधर्वमुख्यौ जगतुर्विश्वावसुपरावसू ॥ देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥ ४१ ॥ अन्येऽप्येवं प्रतिद्वंद्वान्वाय्वग्निवरुणादयः ॥ सूदयामासुरस्त्रौघैर्मृगान्केसरिणो यथा ॥४२॥ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप ॥ वारयामास विबुधान्दृष्ट्वा दानवसंक्षयम्॥ ४३ ॥ नारद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः ॥ श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥ ४४ ॥ श्रीशुक उवाच ॥ संयम्य मन्युसंरंभं मानयंतो मुनेर्वचः ॥ गीयमाना अनुचरैर्ययुः सर्वे त्रिविष्टपम् ॥ ४५ ॥ येऽवशिष्टा रणे तस्मिन्नारदानुमतेन ते ॥ बलिं विपन्नमादाय अस्तं गिरिमुपागमन् ॥४६॥ तत्राविनष्टावयवान्विद्यमानशिरोधरान् ॥ उशना जीवयामास संजीविन्या स्वविद्यया ॥४७॥ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः ॥ पराजितोऽपि नाखिद्यल्लोकतत्त्वविचक्षणः ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे देवासुरसंग्रामे एकादशोऽध्यायः ॥११॥ ॥ श्रीबादरायणिरुवाच ॥ वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् ॥ मोहयित्वाऽसुरगणान्हरिः सोममपाययत् ॥१॥ वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः ॥ सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥२॥ सभाजितो भगवता सादरं सोमया भवः ॥ सूपविष्टउवाचेदं प्रतिपूज्य स्मयन्हरिम् ॥३॥ श्रीमहादेव उवाच ॥ देव देव जगद्व्यापिन् जगदीश जगन्मय ॥ सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ॥४॥ ॥

अयं दैत्यः शुष्कैरार्द्रैश्च वधं नार्हति ॥३७॥ आर्द्रशुष्काभ्यां तव मृत्युर्नेति मयाऽस्मै वरो दत्तः । अतो हे इंद्र, त्वयास्य वधेऽन्य उपायश्चिंतनीयः ॥ ३८ ॥ इंद्रस्तां गिरं श्रुत्वोभयात्मकमुपायमपां फेनं ज्ञात्वा ॥३९॥ तेन नमुचेः शिरो जहार । तदेंद्रं मुनयः स्तुवंतः संतः पुष्पैरवाकिरन् ॥ ४० ॥ विश्वावसुपरावसू गंधर्वौ जगतुः । नर्तक्यो ननृतुः । देवदुंदुभयो नेदुः ॥४१॥ ततो वाय्वग्निवरुणादयोऽस्त्रौघैः प्रतिद्वंद्वान् दैत्यान् नाशयामासुः ॥४२॥ तदैव ब्रह्मणा प्रेषितो नारद एत्य दैत्यानां क्षयं दृष्ट्वा देवान् निवारयामास ॥४३॥ नारद उवाच ॥ हे देवाः, नारायणभुजाश्रयैर्भवद्भिरमृतं प्राप्तम् । लक्ष्म्या च संवर्धिता जाताः। अतः कलहाद्विरमत ॥४४॥ श्रीशुक उवाच ॥ एवं मुनेर्वचो मानयंतः सर्वे देवा अनुचरैर्गीयमानाः संतः स्वर्गं ययुः ॥ ४५ ॥ ततो युद्धे येऽवशिष्टा दैत्यास्ते नारदानुमतेन मूर्छितं बलिं गृहीत्वाऽस्ताचलं प्रत्यगमन् ॥४६॥ तत्र शुक्रो विद्यमानावयवान् तान् संजीविन्या विद्यया जीवयामास ॥४७॥ एवं शुक्रेण स्पर्शितो बलिः पुनः प्राप्तेंद्रियस्मृतिः सन् पराजितोऽपि नाखिद्यत् ॥४८॥ इति श्रीमद्भागवतचू० अष्ट० एकादशोऽध्यायः ॥ ११ ॥ ॥ द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकम् । भवं संमोहयामास हरिः पुनरसांत्वयत् ॥१॥ अमुह्यन्नसुरा विष्णुमायया न तदद्भुतम् । इति वक्तुं महादेवमोहोऽयमुपवर्ण्यते ॥ २ ॥ श्रीशुक उवाच ॥ हरिः स्त्रीरूपेण दैत्यान् संमोह्य देवानमृतमपाययत् । इदं श्रुत्वा शिवो देव्या सह वृषभमारुह्य भूतगणैर्वृतः सन् यत्र हरिस्तत्र ययौ ॥१॥२॥ तदा भगवता उमया सह सत्कृतः शिव उपविष्टः सन् हरिंप्रति जगाद ॥३॥ शिव उवाच ॥ हे देवदेव, हे जगदीश, सर्वभावानां त्वमुत्पत्तिकारण-

मीश्वर आत्मा चासि ॥४॥ अस्य जगत आद्यंतमध्या यतो भवंति तच्चिद्रूपं ब्रह्मैव भवान् ॥५॥ मुनयः संगं त्यक्त्वा तवैव चरणकमलमुपासते ॥६॥ हे हरे, त्वं सुखरूपं नित्यं विशोकमानंदमात्रं ब्रह्म । किंच । निरपेक्ष एव त्वं विश्वस्योत्पत्त्यादीनां हेतुरसि । अतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थम् ॥७॥ हे भगवन्, कार्यकारणरूपं द्वयं परमकारणं च त्वमेव ॥८॥ वेदांतिनस्त्वां ब्रह्म मन्यंते । मीमांसका धर्मं, सांख्याः प्रकृतिपुरुषयोः परं पुरुषं, पंचरात्रा नवशक्तियुतं[1], पातंजला महापुरुषं च मन्यंते ॥९॥ हे ईश, त्वद्रचितं विश्वं ब्रह्ममरीच्यस्मदादयो न जानंति । तदाऽन्ये दैत्यमर्त्यादयो न जानंतीति किं वक्त-

आद्यंतावस्य यन्मध्यमिदमन्यदहं बहिः ॥ यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ॥ ५ ॥ तवैव चरणांभोजं श्रेयस्कामा निराशिषः ॥ विसृज्योभयतः संगं मुनयः समुपासते ॥ ६ ॥ त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत् विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ॥ ७ ॥ एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः ॥ अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य ॥ ८ ॥ त्वां ब्रह्म केचिदवयंत्युत धर्ममेक एके परं सदसतोः पुरुषं परेशम् ॥ अन्येऽवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रम् ॥ ९ ॥ नाहं परायुर्ऋषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्वसर्गाः ॥ यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः ॥ १० ॥ स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ ॥ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयावगमोऽवरुन्त्से ॥ ११ ॥ अवतारा मया दृष्टा रममाणस्य ते गुणैः ॥ सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतम् ॥ १२ ॥ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः ॥ तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना ॥ प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत ॥ १४ ॥ श्रीभगवानुवाच ॥ कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः ॥ पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥ तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ॥ कामिनां बहु मंतव्यं संकल्पप्रभवोदयम् ॥ १६ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया ॥ १७ ॥ ॥ ॥ ॥ ॥

व्यम् ॥१०॥ हे भगवन्, जगतो बंधमोक्षौ स्थितिजन्मनाशाश्च संति तत्सर्वं त्वं जानासि ॥११॥ एवं स्तुत्वा विज्ञापयति । हे भगवन्, गुणै रममाणस्य तव मया बहवोऽवतारा दृष्टाः । सोऽहं तव योषिद्रूपं द्रष्टुं वांछामि ॥१२॥ येन दैत्या मोहिताः देवा अमृतं पायिताश्च तद्रूपं द्रष्टुं वयमागताः ॥ १३ ॥ श्रीशुक उवाच ॥ एवं शिवेन प्रार्थितो विष्णुः प्रहस्य शिवं बभाषे ॥१४॥ श्रीभगवानुवाच ॥ हे शिव, दैत्यानां कौतुकायामृतपात्रे गते सति देवकार्यार्थं मया स्त्रीवेषः कृतः ॥१५॥ तद्रूपं ते दर्शयिष्यामि । यतः कामिनां कामोदयो भवेत् ॥१६॥ श्रीशुक उवाच ॥ इत्युक्त्वा भगवान् तत्रैवांतरधीयत । ततः शिवः सर्व-

---

[1] विमला उत्कर्षणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना अनुग्रहा चेति नव शक्तयः ।

तश्चक्षुश्चारयन् देव्या सहास्ते स्म ॥१७॥ ततो विचित्रपुष्पारुणपल्लवद्रुम उपवने कंदुकलीलया क्रीडंतीम् ॥ १८ ॥ कंदुकलीलावशेन नमनोन्नमनाभ्यां कंपितस्तनयोः प्रकृष्टहाराणां च भारैः पदे पदे मध्यतः प्रभज्यमानामिव चलंतीम् ॥ १९ ॥ दिक्षु भ्रमतः कंदुकस्य चांचल्यैश्चंचलनेत्रां कुंडलशोभितकपोलाभ्यां नीलैः केशैश्च शोभितमुखाम् ॥२०॥ श्लथद्दुकूलं गलितपुष्पां कबरीं च वामहस्तेन बध्नंतीमन्यकरेण कंदुकं निघ्नतीं जगन्मोहयंतीम् ॥ २१ ॥ तां वीक्ष्य तस्याः कटाक्षेण वंचितः । स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वलः सन् समीपस्थामुमां स्वगणांश्च न वेद ॥२२॥ तस्याः करात्कंदुको यदा दूरं गत-

ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ॥ विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलाम् ॥ १८ ॥ आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदे पदे ॥ प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥ १९ ॥ दिक्षु
भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम् ॥ स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिताननाम् ॥ २० ॥
श्लथद्दुकूलं कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना ॥ विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्ममायया
॥ २१ ॥ तां वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमंतिक
उमां स्वगणांश्च वेद ॥ २२ ॥ तस्याः कराग्रात्स तु कंदुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः ॥ वासः ससूत्रं लघुमारुतोऽहरद्भवस्य
देवस्य किलानुपश्यतः ॥ २३ ॥ एवं तां रुचिरापांगीं दर्शनीयां मनोरमाम् ॥ दृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां
भवः किल ॥ २४ ॥ तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः ॥ भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ ॥ २५ ॥ सा
तमायांतमालोक्य विवस्त्रा व्रीडिता भृशम् ॥ निलीयमाना वृक्षेषु हसंती नान्वतिष्ठत ॥ २६ ॥ तामन्वगच्छद्भगवान्भवः प्रमुषितेंद्रियः
॥ कामस्य च वशं नीतः करेणुमिव यूथपः ॥ २७ ॥ सोऽनुव्रज्यातिवेगेन गृहीत्वाऽनिच्छतीं स्त्रियम् ॥ केशबंध
उपानीय बाहुभ्यां परिषस्वजे ॥ २८ ॥ सोपगूढा भगवता करिणा करिणी यथा ॥ इतस्ततः प्रसर्पंती विप्रकीर्णशिरोरुहा
॥ २९ ॥ आत्मानं मोचयित्वांग सुरर्षभभुजांतरात् ॥ प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ॥ ३० ॥ तस्यासौ पदवीं
रुद्रो विष्णोरद्भुतकर्मणः ॥ प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥ ३१ ॥ ॥ ॥

स्तमनुव्रजंत्यास्तस्याः कांचीसहितं सूक्ष्मवस्त्रं शिवस्य पश्यतः सतो मारुतो जहार ॥२३॥ एवं शिवो मनोरमां तां दृष्ट्वा विषज्जंत्यां[1] तस्यां रंतुं मनश्चक्रे॥२४॥ ततस्तत्कृतस्मरविह्वलो देव्याः पश्यंत्याः सत्या गतलज्जः सन् तत्समीपं ययौ ॥२५॥ तदा सा तं विलोक्य विवस्त्रा लज्जया वृक्षेषु निलीयमाना एकत्र नान्वतिष्ठत् ॥२६॥ कामवशं गतः शिवस्तामन्वगच्छत् ॥ २७ ॥ वेगेन तत्समीपं गत्वा तां केशबंधे गृहीत्वाऽऽलिंगनं चक्रे ॥ २८ ॥ आलिंगितापि सा इतस्ततः प्रसर्पंती विकीर्णकेशा ॥२९॥ पृथुश्रोणी तद्भुजादात्मानं मोचयित्वा प्राद्रवत् ॥३०॥ वैरिणेव कामेन जितो रुद्रः स्त्रीरूपिणो विष्णोः पश्चादन्वधावत ॥३१॥

---

१ कुंचितकटाक्षैरात्मानं निरीक्षमाणायाम् ।

तामनुधावतः शिवस्य रेतः पपात ॥३२॥ तद्रेतो भूमौ यत्र यत्र पतितं तानि तानि रूप्यस्य हेम्नश्च क्षेत्राणि जातानि ॥३३॥ एवं तामनुधावन् शिवः सरित्सरस्सु पर्वतेषु ऋषीणामाश्रमेषु संन्निहितो बभूव ॥३४॥ रेतसि पतिते सति शिव आत्मानं विष्णुमायया जडीकृतं ददर्श । ततो मोहान्निवृत्तः ॥ ३५ ॥ एवं ज्ञातमाहात्म्यः शिवो विष्णोर्मायया आत्मनो जडीकरणमद्भुतं न मेने ॥ ३६ ॥ ततो भगवान् विष्णुर्व्याकुलतया लज्जया च रहितं शिवंप्रति स्वां चतुर्भुजां मूर्तिं धृत्वा परमप्रीतः सन्नुवाच ॥३७॥ श्रीभगवानुवाच ॥ हे देवश्रेष्ठ, एतद्भाग्यम् । यन्मया स्वमायया विमोहितोऽपि त्वं स्वकीयां स्थितिं प्राप्तः ॥ ३८ ॥ मम मायां त्वां विना को नु पुमान् व्यतितरेत् न कोऽपि ॥३९॥ सेयं गुणमयी माया इत ऊर्ध्वं त्वां न पराजेष्यति ॥४०॥ श्रीशुक उवाच ॥ एवं भगवता

तस्यानुधावतो रेतश्चस्कंदामोघरेतसः ॥ शुष्मिणो यूथपस्येव वासितामनु धावतः ॥३२॥ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ॥३३॥ सरित्सरस्सु शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयस्तत्र संनिहितो हरः ॥३४॥ स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया ॥ जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ॥३५॥ अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदुहाद्भुतम् ॥३६॥ तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ॥ उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुम् ॥३७॥ श्रीभगवानुवाच ॥ दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः ॥ यन्मे स्त्रीरूपया स्वैरं मोहितोऽप्यंग मायया ॥३८॥ कोऽन्नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् ॥ तांस्तान्विसृजतीं भावान्दुस्तरामकृतात्मभिः ॥३९॥ सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता कालेन कालरूपेण भागशः ॥४०॥ श्रीशुक उवाच ॥ एवं भगवता राजन् श्रीवत्सांकेन सत्कृतः ॥ आमंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥४१॥ आत्मांशभूतां तां मायां भवानीं भगवान्भवः ॥ शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ॥४२॥ अपि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ॥ अहं कलानामृषभो विमुह्ये यया वशोऽन्ये किमुतास्वतंत्राः ॥४३॥ यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै ॥ स एष साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥४४॥ श्रीशुक उवाच ॥ इति तेऽभिहितस्तात विक्रमः शार्ङ्गधन्वनः ॥ सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ॥४५॥ एतन्मुहुः कीर्तयतोऽनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम् ॥ ४६ ॥

सत्कृतः शिवस्तमामंत्र्य परिक्रम्य च गणसहितः कैलासं ययौ ॥४१॥ ततः शिवो भवानीमृषीणां मध्ये प्रीत्या इदमाह ॥४२॥ हे देवि, त्वमपि भगवतो मायां दृष्टवत्यसि किम् । भगवदंशावतारेषु श्रेष्ठोऽप्यहं यया विमुह्ये । तदेंद्रियपराधीना मुह्यंतीति किमु वक्तव्यम् ॥४३॥ किंच । त्वं सहस्रवर्षानुष्ठानांते मां प्राप्य यम[2]पृच्छः स एष पुरुषः । यत्र कालस्य वेदस्य च प्रवेशो नास्ति ॥४४॥ श्रीशुक उवाच ॥ हे नृप, येन समुद्रमथने मंदराचलः पृष्ठे धृतस्तस्य पराक्रमस्ते कथितः ॥४५॥ इदमुत्तमश्लोकगुणानुवर्णनं शृण्वतः कीर्तयतश्च पुंस उद्योगः सफलो भवति ॥ ४६ ॥ ॥ ॥

---

[1] तानि तानि स्थलानि महादेवस्य त्वरितसाक्षात्कारस्य स्थलानि जातानीत्यर्थः । [2] परमेश्वरस्त्वं कस्याराधनं करोषीति यं देवं पृष्टवत्यसि ।

एवं कपटस्त्रीवेषो हरिर्दैत्यान् मोहयन् सन् शरणागतान् देवानमृतमपाययत् । तं शरणागतानां कामपूरकं हरिमहं नतोऽस्मि ॥४७॥ इति श्रीमद्भागवतचू०
अष्ट० द्वादशोऽध्यायः ॥ १२ ॥ ॥ त्रयोदशे तु वर्ण्यंते सप्तमादीन्यनुक्रमात् । मन्वंतराणि सर्वाणि षड्विधानि पृथक् पृथक् ॥ १ ॥ श्रीशुक उवाच ॥ अथ
विवस्वतः पुत्रः श्राद्धदेवो वर्तमानः सप्तमो मनुः । तत्पुत्रान् मत्तः श्रृणु ॥१॥ इक्ष्वाकुः नभगः धृष्टः शर्यातिः नरिष्यंतः नाभागः दिष्टः ॥२॥ करूषः पृषध्रः
वसुमांश्चैते दश तत्पुत्राः ॥३॥ आदित्या वसवः रुद्राः विश्वेदेवाः मरुद्गणाः अश्विनौ ऋभवः एते देवाः । एषां पुरंदरो नामेंद्रः ॥४॥ कश्यपः अत्रिः वसिष्ठः
विश्वामित्रः गौतमः जमदग्निः भरद्वाजः एते सप्तर्षयः ॥५॥ अस्मिन् मन्वंतरे कश्यपाददित्यां विष्णोर्वामनावतारो जातः ॥ ६ ॥ एवं सप्त मन्वंतराणि मया

असदविषयमंघ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यम् ॥कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां कामपूरं
नतोऽस्मि ॥ ४७ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे शंकरमोहनं नाम द्वादशोऽध्यायः ॥ १२ ॥ श्रीशुक
उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ सप्तमो वर्तमानो यस्तदपत्यानि मे शृणु ॥ १ ॥इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव
च ॥नरिष्यंतोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥२॥ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैते दश पुत्राः
परंतप ॥३॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ॥४॥ कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ
गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥५॥ अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ॥ आदित्यानामवरजो विष्णुर्वामनरूपधृक्
॥६॥ संक्षेपतो मयोक्तानि सप्त मन्वंतराणि ते ॥ भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च॥७॥ विवस्वतश्च
द्वे जाये विश्वकर्मसुते उभे ॥ संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव ॥ ८ ॥ तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः ॥ यमो
यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु ॥९॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या ॥ शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ
॥१०॥ अष्टमेंऽतर आयाते सावर्णिर्भविता मनुः ॥ निर्मोकविरजस्काद्याः सावर्णितनया नृप ॥११॥ तत्र देवाः सुतपसो विरजा
अमृतप्रभाः ॥ तेषां विरोचनसुतो बलिरिंद्रो भविष्यति ॥१२॥ दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम् ॥ राद्धमिंद्रपदं
हित्वा ततः सिद्धिमवाप्स्यति ॥१३॥ योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः॥ निवेशितोऽधिके स्वर्गादधुना स्ते स्वराडिव ॥१४॥

ते संक्षेपेणोक्तानि । अथ भविष्याणि वक्ष्यामि ॥७॥ विवस्वतो मनोर्द्वे भार्ये । छाया संज्ञा चेति॥८॥ तृतीयां वडवामेके आहुः। यमः यमुना श्राद्धदेवो मनुश्चेति
त्रीणि संज्ञाया अपत्यानि ॥९॥ सावर्णिः तपती कन्या शनैश्चरश्चेति त्रीणि छायाया अपत्यानि । अश्विनौ वडवासुतौ ॥१०॥ अष्टमे मन्वंतरे स सावर्णिर्मनुर्भविष्यति
। निर्मोकविरजस्काद्या दश तत्पुत्राः ॥ ११ ॥ सुतपसः विरजाः अमृतप्रभा एते देवाः । तेषां बलिरिंद्रो भविष्यति ॥ १२ ॥ यो बलिः
सप्तमे मन्वंतरे पदत्रयं याचमानाय विष्णवे भूमिं दत्वाऽष्टमे मन्वंतरे विष्णोः प्रसादेन लब्धमिंद्रपदं हित्वा ततो मोक्षं प्राप्स्यति ॥१३॥ असौ बलिर्भगवता
बद्धः । पुनः प्रीतेन तेन सुतले स्थापितः सन्नधुना तत्रास्ते ॥ १४ ॥ ॥ ॥ ॥

गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ॥ ऋष्यशृंगः पितास्माकं भगवान्बादरायणः ॥१५॥ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः ॥ इदानीमासते राजन्स्वे स्वे आश्रममंडले ॥ १६ ॥ देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः ॥ स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः ॥ १७ ॥ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप ॥ १८ ॥ पारा मरीचिगर्भाद्या देवा इंद्रोऽद्भुतः स्मृतः ॥ द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः ॥ १९ ॥ आयुष्मतोंऽबुधारायामृषभो भगवत्कला ॥ भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥ २० ॥ दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् ॥ तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥ २१ ॥ हविष्मान्सुकृतिः सत्यो जयो मूर्तिस्तदा द्विजाः ॥ सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः ॥ २२ ॥ विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति ॥ जातः स्वांशेन भगवान्गृहे विश्वसृजो विभुः ॥२३ ॥ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ॥ अनागतास्तत्सुताश्च सत्यधर्मादयो दश ॥२४॥ विहंगमाः कामगमा निर्वाणरुचयः सुराः ॥ इंद्रश्च वैधृतस्तेषामृषयश्चारुणादयः ॥ २५ ॥ आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ॥ वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥२६॥ भविता रुद्रसावर्णी राजन्द्वादशमो मनुः ॥ देववानुपदेवश्च देवश्रेष्ठादयः सुताः ॥ २७ ॥ ऋतधामा च तत्रेंद्रो देवाश्च हरितादयः ॥ ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः ॥ २८ ॥ स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ॥ अंतरं सत्यसहसः सूनृतायाः सुतो विभुः ॥ २९ ॥ मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् ॥ चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥ ३० ॥ देवाः सुकर्मसुत्रामसंज्ञा इंद्रो दिवस्पतिः ॥ निर्मोकतत्वदर्शाद्या भविष्यंत्यृषयस्तदा ॥ ३१ ॥ ॥ ॥

गालवः दीप्तिमान् परशुरामः अश्वत्थामा कृपाचार्यः ऋष्यशृंगः व्यासः ॥१५॥ एते तत्र सप्तर्षयो भविष्यंति । ते इदानीं योगमासाद्य स्वे स्वे आश्रममंडले आसते ॥१६॥ देवगुह्यस्य विप्रस्य सरस्वत्यां स्त्रिया सार्वभौम इति हरेरवतारो भविष्यति । स इंद्रात्स्वर्गं हृत्वा बलये दास्यति ॥१७॥ अथ दक्षसावर्णिर्नवमो मनुः । भूतकेतुदीप्तिकेत्वादयो दश तत्पुत्राः ॥१८॥ पारा मरीचिगर्भाद्या देवाः । अद्भुतो नामेंद्रः । द्युतिमत्प्रमुखाः सप्तर्षयः ॥१९॥ आयुष्मतोंऽबुधारायां पत्न्यामृषभावतारः । येन रक्षितां त्रिलोकीमद्भुतनामेंद्रो भोक्ष्यति ॥२०॥ अथ ब्रह्मसावर्णिर्दशमो मनुः । भूरिषेणाद्या दश तत्पुत्राः ॥२१॥ हविष्मान् सुकृतः सत्यो जयो मूर्तिः एते ऋषयः । सुवासनविरुद्धाद्या देवाः । शंभुनामेंद्रः ॥२२॥ विश्वसृजो विषूच्यां भार्यायां विष्वक्सेनावतारः । स शंभोरिंद्रस्य सख्यं करिष्यति ॥२३॥ एकादशो मनुर्धर्मसावर्णिः । सत्यधर्मादयो दश तत्पुत्राः ॥२४॥ विहंगमाः कामगमा निर्वाणरुचयो देवाः । वैधृतिर्नामेंद्रः । अरुणादयः सप्तर्षयः ॥२५॥ आर्यकस्य वैधृतायां धर्मसेतुर्नामावतारः । स त्रिलोकीं पालयिष्यति ॥ २६ ॥ द्वादशो मनू रुद्रसावर्णिः । देवश्रेष्ठादयो दश तत्पुत्राः ॥२७॥ ऋतधामेंद्रः । हरितादयो देवाः । आग्नीध्रकादयः सप्तर्षयः ॥२८॥ सत्यसहसः सूनृतायां स्वधामाख्यो हरेरवतारः । स तन्मन्वंतरं पालयिष्यति ॥२९॥ अथ देवसावर्णिस्त्रयोदशो मनुः । चित्रसेनविचित्राद्या दश तत्पुत्राः ॥ ३० ॥ सुकर्मसुत्रामसंज्ञा देवाः । दिवस्पतिनामेंद्रः । तदा निर्मोकतत्वदर्शाद्याः सप्तर्षयो भविष्यंति ॥ ३१ ॥ ॥

देवहोत्रस्य बृहत्यां भार्यायां योगेश्वरो नामावतारः ॥ ३२॥ चतुर्दशो मनुरिंद्रसावर्णिः । उरुगंभीरबुद्ध्याद्या दश तत्पुत्राः ॥ ३३ ॥ पवित्राश्चाक्षुषा देवाः । शुचिनामेंद्रः । अग्निर्बाहुः शुचिः शुद्धो मागधाद्याश्च सप्तर्षयः ॥३४॥ सत्रायणस्य वितानायां बृहद्भानुर्नामाऽवतारः । स कर्ममार्गं विस्तारयिष्यति ॥ ३५॥ हे राजन्, एतानि चतुर्दश मन्वंतराणि प्रोक्तानि । एतैः परिमितः सहस्रयुगप्रमाणः कालो ब्रह्मणो दिवस उच्यते ॥ ३६ ॥ (हे राजन्, चतुर्दशमनूनां कथां यः कीर्तयेत् शृणुयाद्वा तस्य विष्णुः प्रसीदति ॥१॥) इति श्रीमद्भागवतचू० अष्टमस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ चतुर्दशे तु सर्वेषां मन्वादीनां यथायथम् । पृथक्कर्माणि वर्ण्यंते भगवद्वशवर्तिनाम् ॥१॥ राजोवाच ॥ हे ब्रह्मन्, मन्वंतरेषु ये मन्वादय उक्तास्ते यस्मिन् कर्मणि येन नियुक्ताः संतो यत्कुर्वंति तद्वद ॥१॥ श्रीशुक उवाच ॥ मनवो मनुपुत्रा ऋषयो इंद्रा देवगणा एते सर्वे ॥२॥ यज्ञाद्यैर्भगवदवतारैः प्रेरिताः संतो जगतः स्थित्यर्थं स्वानि स्वानि कर्माणि कुर्वंति ॥३॥ तान्याह । चतुर्युगांते कालेन ग्रस्तान् वेदान् ऋषयस्तपसा पश्यंति ॥४॥ ततो मनवश्चतुष्पादं धर्मं भूमौ प्रवर्तयंति ॥ ५ ॥ मनुपुत्रास्तं धर्मं पालयंति । देवा यज्ञभागान् भुंजते ॥६॥ इंद्रो भवद्दत्तां श्रियं भुंजानः सन् त्रिलोकान् पाति लोके प्रवर्षति च ॥ ७ ॥ सनकादिसिद्धरूपधृक् हरिर्योगं ब्रूते ॥८॥ मरीच्यादिप्रजापतिरूपेण हरिः सर्गं करोति । राजमूर्तिः सन् दस्यून् हन्यात् । कालरूपेण सर्वेषां नाशाय भवति ॥ ९ ॥ नानाशास्त्रैः स्तूयमानोऽपि

देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ॥ योगेश्वरो हरेरंशो बृहत्यां संभविष्यति ॥३२॥ मनुर्वा इंद्रसावर्णिश्चतुर्दशम एष्यति ॥
उरुगंभीरबुद्ध्याद्या इंद्रसावर्णिवीर्यजाः ॥ ३३ ॥ पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति ॥ अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ॥ ३४ ॥ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः ॥ वितानायां महाराज क्रियातंतून्वितायिता ॥ ३५ ॥ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ॥ प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ॥ ३६ ॥ (चतुर्दशमनूनां च कथां यः कीर्तयेन्नरः ॥ शृणुयाद्वापि राजेंद्र तस्य विष्णुः प्रसीदति ॥ १ ॥) इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे मन्वंतरानुवर्णनं नाम
त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ राजोवाच ॥ मन्वंतरेषु भगवन्यथा मन्वादयस्त्विमे ॥ यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व
मे ॥१॥ श्रीशुक उवाच ॥ मनवो मनुपुत्राश्च मुनयश्च महीपते ॥ इंद्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥२॥ यज्ञादयो याः कथिताः
पौरुष्यस्तनवो नृप ॥ मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः ॥३॥ चतुर्युगांते कालेन ग्रस्तान् श्रुतिगणान्यथा ॥ तपसा
ऋषयोऽपश्यन्यतो धर्मः सनातनः ॥ ४ ॥ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः ॥ युक्ताः संचारयंत्यद्धा स्वे स्वे काले
महीं नृप ॥ ५ ॥ पालयंति प्रजापाला यावदंतं विभागशः ॥ यज्ञभागभुजो देवा ये च तत्रान्विताश्च तैः ॥ ६ ॥ इंद्रो भगवता
दत्तां त्रैलोक्यश्रियमूर्जिताम् ॥ भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति ॥७॥ ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ॥
ऋषिरूपधरः कर्मयोगं योगेशरूपधृक् ॥ ८ ॥ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः ॥ कालरूपेण सर्वेषामभावाय पृथग्गुणः
॥ ९ ॥ स्तूयमानो जनैरेभिर्मायया नामरूपया ॥ विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते ॥ १० ॥ ॥

हरिर्मायया मोहितजनैर्नैव दृश्यते ॥१०॥ हे राजन्, एतदवांतरकल्पस्य प्रमाणं तुभ्यं कथितम् । यत्र चतुर्दश मन्वंतराणि वदंति ॥११॥ इति श्रीमद्भागवतचू॰ अष्टमस्कंधे चतुर्दशोऽध्यायः ॥१४॥ ॥ बलिं पंचदशे विश्वजिताऽऽचार्या अयाजयन् । ततोऽसौ स्वर्गमजयद्भयाद्देवा निलिल्यिरे ॥ १ ॥ अत्रेर्यते नवाध्याय्या वामं वामनचेष्टितम् । निग्रहच्छलतो यत्र बलेर्भूयाननुग्रहः ॥२॥ राजोवाच ॥ ईश्वरो भूत्वापि कृपणवद्बलेः सकाशाद्भूमेः पदत्रयं कस्माद्ययाचे । अपिच । पूर्णमनोरथोऽपि हरिर्निरपराधं तं कस्माद्बबंध ॥१॥ परमेश्वरस्य याचना निरपराधिनो बंधनं चेत्येतन्महत्कौतुकं वयं ज्ञातुमिच्छामः ॥२॥ श्रीशुक उवाच॥ हे राजन्, युद्धे इंद्रेण पराजितो बलिर्भृगु[1]भिर्जीवितः सन् पश्चात्तान् भृग्वादीन् सर्वात्मनाऽभजत् ॥३॥ ततः प्रसन्ना भृगवो ब्राह्मणाः स्वर्गं जेतुमिच्छंतं तं

एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितम् ॥ यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः ॥ ११ ॥ इति श्रीमद्भागवते महापुराणेऽष्टम॰ चतुर्दशोऽध्यायः ॥१४॥ ॥ राजोवाच ॥ बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत ॥ भूत्वेश्वरः कृपणवल्लब्धार्थोऽपि बबंध तम् ॥१॥ एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः ॥ यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः ॥२॥ श्रीशुक उवाच ॥ पराजितश्रीरसुभिश्च हापितो हींद्रेण राजन्भृगुभिः स जीवितः ॥ सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्मार्थनिवेदनेन ॥३॥ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्विश्वजिता त्रिणाकम् ॥ जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः ॥४॥ ततो रथः कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः॥ ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ॥५॥ धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम् ॥ पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥६॥ एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान् ॥ प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामंत्र्य नमश्चकार ॥७॥ अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ॥ सुस्रग्धरोऽथ संनह्य धन्वी खड्गी धृतेषुधिः ॥८॥ हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः ॥ रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥९॥ तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः॥ पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ॥१०॥ वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः ॥ ययाविंद्रपुरीं स्वृद्धां कंपयन्निव रोदसी ॥११॥ रम्यामुपवनोद्यानैः श्रीमद्भिर्नंदनादिभिः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥१२॥ प्रवालफलपुष्पोरुभारशाखामरद्रुमैः ॥ हंससारसचक्राह्वकारंडवकुलाकुलाः ॥ नलिन्यो यत्र क्रीडंति प्रमदाः सुरसेविताः ॥ १३ ॥

बलिं विश्वजिन्नमकेन यज्ञेनायाजयन् ॥ ४ ॥ ततो होमद्रव्यैर्हूयमानादग्नेः सकाशात्सुवर्णपट्टबद्धो रथो हरितवर्णा अश्वाः ॥ ५ ॥ दिव्यं धनुः अक्षयबाणौ तूणौ कवचं च प्रादुर्बभूव । अथ प्रह्लादस्तस्मा अम्लानपुष्पां मालां शुक्रः शंखं च ददौ ॥ ६ ॥ एवं विप्रैः संपादितयुद्धसाहित्यो बलिस्तान् प्रदक्षिणीकृत्य प्रणम्य तथा प्रह्लादं च नमस्कृत्य तस्याज्ञां जगृहे ॥७॥ ततो महारथो बलिः शस्त्रालंकारादि धृत्वा । भृगुदत्तं रथमारुह्य कुंडस्थोऽग्निरिव शुशुभे ॥ ८ ॥ ९ ॥ अथ तुल्यैश्वर्यबलसंपत्तिभिर्दैत्यसेनापतिभिर्युक्तः सन् ॥ १० ॥ महतीमासुरीं सेनां विकर्षन् समृद्धामिंद्रपुरीं ययौ ॥ ११ ॥ कथंभूतां ताम् । उपवनोद्यानै रम्यां मत्तभ्रमरैः पक्षिभिश्च नादिताम् ॥ १२ ॥ फलपुष्पमहाभारेण नम्रैर्वृक्षैः शोभिताम् ॥ १३ ॥ ॥ ॥

---

[1] भृगुवंशजैः शुक्राचार्यादिभिः ।

आकाशगंगया वेष्टिताम् । अग्निवर्णेन प्राकारेण च वृताम् ॥१४॥ पृथक् पृथग्रचितमहामार्गसंयुक्ताम् । स्फटिकमयैर्नगरद्वारैर्जुष्टाम् ॥१५॥ सभाचत्वररथ्याढ्यां दशकोटिभिर्विमानैर्युक्ताम् ॥१६॥ यस्यां स्वलंकृता निर्मलवाससो नार्यः शोभंते ॥१७॥ यत्र देवस्त्रीकेशेभ्यः पतितानां कमलमालानां सुगंधमादाय मार्गे वायुर्वाति ॥१८॥ यत्र सुवर्णजालेभ्यो निर्गतेन सुगंधधूमेन प्रतिच्छन्ने मार्गेऽप्सरसो यांति ॥१९ ॥ मुक्तावितानैर्मणिसुवर्णमयैर्ध्वजैश्च व्याप्ताम् । देवांगनानां मधुरगीतैर्मंगलयुक्ताम् ॥२०॥ मृदंगशंखादिशब्दैर्गंधर्वाप्सरसां गीतनृत्यैश्च मनोरमाम् ॥२१॥ यां अधर्मिष्ठाः खलाः भूतद्रुहः शठाश्च न गच्छंति ॥२२॥ तां देव-

आकाशगंगया देव्या वृतां परिखभूतया ॥ प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च ॥ १४ ॥ रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः ॥ जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ॥ १५ ॥ सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम् ॥ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥ १६ ॥ यत्र नित्यवयोरूपाः श्यामा विरजवाससः ॥ भ्राजंते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः ॥ १७ ॥ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजाम् ॥ यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥ १८ ॥ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना ॥ पांडुरेण प्रतिच्छन्नमार्गे यांति सुरप्रियाः ॥ १९ ॥ मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ॥ शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलाम् ॥ २० ॥ मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ॥ नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभाम् ॥२१॥ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः ॥ मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति यत् ॥ २२ ॥ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया ॥ आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन्भयमिंद्रयोषिताम् ॥ २३ ॥ मघवांस्तमभिप्रेत्य बलेः परममुद्यमम् ॥ सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २४ ॥ भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः ॥ अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः ॥ २५ ॥ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः ॥ पिबन्निव मुखेनेदं लिहन्निव दिशो दश ॥ दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥ २६ ॥ ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः ॥ ओजः सहो बलं तेजो यत एतत्समुद्यमः ॥ २७ ॥ गुरुरुवाच ॥ जानामि मघवन् शत्रोरुन्नतेरस्य कारणम् ॥ शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः ॥ २८ ॥ भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिम् ॥ नास्य शक्तः पुरः स्थातुं कृतांतस्य यथा जनाः ॥ २९ ॥ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम् ॥ यात कालं प्रतीक्षंतो यतः शत्रोर्विपर्ययः ॥ ३० ॥ ॥

राजधानीं बलिर्गत्वा सेनया रुरुधे । ततो भृगुदत्तं शंखं स्त्रीणां भयं जनयन् दध्मौ ॥२३॥ अथेंद्रो बलेरुद्योगं ज्ञात्वा सर्वदेवगणैर्युतो गुरुं जगाद ॥२४॥ हे भगवन्, नः पूर्ववैरिणो बलेरयं महानुद्योगोऽस्ति । अत इममविषह्यं मन्ये । अयं केन तेजसा वृद्धिं गतः ॥२५ ॥ अयं मुखेनाकाशं पिबन्निव प्रलयाग्निरिव कुत उत्थितः ॥२६॥ हे गुरो, एतस्य कारणं ब्रूहि । किंच । मद्रिपोस्तेजोबलादिकं कुतः प्राप्तम् । यतोऽयमुद्योगः ॥ २७ ॥ गुरुरुवाच ॥ हे इंद्र, तव शत्रोरुन्नतेः कारणं जानामि । अस्मै शिष्याय भृगुभिस्तेजो दत्तम् ॥२८॥ भवद्विधो भवान् वा अस्याग्रे स्थातुं न समर्थः ॥ २९ ॥ अतो हे देवाः, यूयं स्वर्गं हित्वा शत्रो-

विंपरीतकालं प्रतीक्षंतः संतो गुप्ता भवत ॥३०॥ अधुनायं बलिर्विंप्रबलेनाभिवृद्धिं प्राप्तोऽस्ति । कालेनैषामेवापमानाद्दैत्यैः सह पराभवं प्राप्स्यति ॥३१॥ एवं गुरुणा सुमंत्रितार्था देवाः स्वर्गं हित्वा कामरूपिणः संतो जग्मुः ॥३२॥ देवेषु गुप्तेषु सत्सु बलिरिंद्रपदमास्थाय जगत्त्रयं वशं निन्ये ॥३३॥ अथ भृगवो विश्वजयिनं शिष्यं बलिं इंद्रपदं स्थिरीकर्तुं शताश्वमेधेनायाजयन् ॥३४॥ तदनुभावेन त्रैलोक्यविख्यातां कीर्तिं दिक्षु विस्तारयन् सन् बलिश्चंद्र इव रेजे॥३५॥ ततो बलिरात्मानं कृतकृत्यमिव मन्वानो ब्राह्मणैः संपादितां समृद्धां संपत्तिं बुभुजे ॥३६॥ इति श्रीमद्भागवतचूर्णि० अष्ट० पंचदशोऽध्यायः ॥ १५ ॥ ॥ षोडशे पुत्रनाशेन शोचंत्या अदितेः पतिः । प्रार्थितः कश्यपः प्राह पयोव्रतमितीर्यते ॥ १ ॥ श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु सत्सु दैत्यैश्च स्वर्गे हृते सति

एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः ॥ तेषामेवापमानेन सानुबंधो विनंक्ष्यति ॥३१॥ एवं सुमंत्रितार्थास्ते गुरुणार्थानुदर्शिना ॥ हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ॥३२॥ देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम् ॥ देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयम् ॥३३॥ तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः ॥ शतेन हयमेधानामनुव्रतमयाजयन् ॥३४॥ ततस्तदनुभावेन भुवनत्रयविश्रुताम् ॥ कीर्तिं दिक्षु वितन्वानः स रेज उडुराडिव ॥३५॥ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभिताम् ॥ कृतकृत्यमिवात्मानं मन्यमानो महामनाः ॥३६॥ इति श्रीम० महा० अष्ट० पंशदशोऽध्यायः ॥१५॥ श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु देवमाताऽदितिस्तदा ॥ हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥१॥ एकदा कश्यपस्तस्या आश्रमं भगवानगात् ॥ निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् ॥२॥ स पत्नीं दीनवदनां कृतासनपरिग्रहः ॥ सभाजितो यथान्यायमिदमाह कुरूद्वह ॥३॥ अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनाऽऽगतम् ॥ न धर्मस्य न लोकस्य मृत्योश्छंदानुवर्तिनः ॥४॥ अपि वाऽकुशलं किंचिद्गृहेषु गृहमेधिनि ॥ धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनाम् ॥५॥ अपि वातिथयोऽभ्येत्य कुटुंबासक्तया त्वया ॥ गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ॥६॥ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ॥ यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ॥७॥ अप्यग्नयस्तु वेलायां न हुता हविषा सति ॥ त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥८॥ यत्पूजया कामदुघान्याति लोकान्गृहान्वितः ॥ ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ॥९॥ अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि ॥ लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहम् ॥ १० ॥ ॥

देवमाताऽदितिः पर्यतप्यत् ॥१॥ एकदा समाधेर्विरतः कश्यपस्तस्या निरुत्सवं निरानंदमाश्रमं जगाम ॥२॥ तदा कृतासनपरिग्रहः स दीनवदनां पत्नीं दृष्ट्वा जगाद ॥३॥ हे भद्रे, अधुना विप्राणां धर्मस्य जनस्य चाभद्रं न प्राप्तं किम् ॥ ४ ॥ किंवा गृहेषु धर्मार्थकामानामकुशलम् । यत्र योगसाधनरहितानामपि स्वधर्मादिना योगफलं भवति ॥५॥ अपि वा त्वद्गृहं प्राप्ता अतिथयस्त्वया प्रत्युत्थानादिना अपूजिताः संतो गताः किम् ॥ ६ ॥ येषु गृहेष्वतिथयो जलैरपि न पूजितास्ते गृहाः सृगालगृहवत् ज्ञेयाः ॥७॥ किंवा हे सति, त्वया होमकाले हविषाऽग्नयो न हुताः किम् ॥८॥ ब्राह्मणोऽग्निश्च विष्णोर्मुखम् । तत्पूजनाद्गृहस्थः स्वर्गादिलोकान् प्राप्नोति ॥ ९ ॥ अथवा तव सर्वे पुत्राः कुशलिनः संति किम् । अहं तव मनोऽस्वस्थं लक्षयामि ॥ १० ॥ ॥ ॥

अदितिरुवाच ॥ हे ब्रह्मन्, द्विजानां गवां धर्मस्य जनस्य च भद्रम् ॥११॥ तव ध्यानयोगात्किंचिदपि न क्षीयते ॥ १२ ॥ भवान् धर्मान् यस्याः प्रभाषते तस्या मनोरथः को नु न सिध्यति ॥१३॥ हे कश्यप, तवैव सर्वाः प्रजाः तासु त्वं समः । तथापीश्वरो भक्तं भजते ॥१४॥ अत एव हे स्वामिन्, भजंत्या मे कल्याणं चिंतय । शत्रुभिर्हृतस्थानसंपत्तीन् मे पुत्रान् पाहि ॥१५॥ प्रबलैर्दैत्यैर्मत्पुत्राणामैश्वर्यादीनि हृतानि । तेन दुःखसागरे निमग्नाहम् ॥ १६ ॥ अतो हे साधो, मम पुत्रा यथा पुनस्तानि प्रपद्येरन् तथा मे कल्याणं कुरु ॥१७॥ श्रीशुक उवाच ॥ एवं प्रार्थितः कश्यपस्तामाह । अहो जगत् स्नेहबद्धमस्ति । इदं विष्णोर्मायायाः सामर्थ्यम् ॥१८॥ अयं पांचभौतिको देहः क्व । प्रकृतेः पर आत्मा च क्व । कस्य के पतिपुत्राद्याः । अत्र मोह एव कारणम् ॥१९॥ अतस्त्वं जनार्दनं जगद्गुरुं

अदितिरुवाच ॥ भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च ॥ त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे ॥११॥ अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः ॥ सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥१२॥ को नु मे भगवन्कामो न संपद्येत मानसः ॥ यस्या भवान्प्रजाध्यक्ष एवं धर्मान्प्रभाषते ॥१३॥ तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्वरजस्तमोजुषः ॥ समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः ॥१४॥ तस्मादीश भजंत्या मे श्रेयश्चिंतय सुव्रत ॥ हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो ॥ १५ ॥ परैर्विवासिता साहं मग्ना व्यसनसागरे ॥ ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥ १६ ॥ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः ॥ तथा विधेहि कल्याणं धिया कल्याणकृत्तम ॥ १७ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव ॥ अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥ १८ ॥ क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः ॥ कस्य के पतिपुत्राद्या मोह एव हि कारणम् ॥ १९ ॥ उपतिष्ठस्व पुरुषं भगवंतं जनार्दनम् ॥ सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ॥ २० ॥ स विधास्यति ते कामान्हरिर्दीनानुकंपनः ॥ अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ॥ २१ ॥ अदितिरुवाच ॥ केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिम् ॥ यथा मे सत्यसंकल्पो विदध्यात्स मनोरथम् ॥२२॥ आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम् ॥ आशु तुष्यति मे देवः सीदंत्याः सह पुत्रकैः ॥ २३ ॥ कश्यप उवाच ॥ एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः ॥ यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥ २४ ॥ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ॥ अर्चयेदरविंदाक्षं भक्त्या परमयान्वितः ॥ २५ ॥ सिनीवाल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया ॥ यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् ॥ २६ ॥

वासुदेवं भजस्व ॥२०॥ दीनानुकंपी स भगवान् ते मनोरथान् पूरयिष्यति । यतो भगवद्भक्तिरेव फलदात्र्यस्ति अन्या न ॥२१॥ अदितिरुवाच ॥ हे ब्रह्मन्, अहं केन विधिना जगत्पतिमुपास्ये । यथा स मे मनोरथं पूर्णं कुर्यात् ॥ २२॥ हे द्विजश्रेष्ठ, पुत्रैः सह सीदंत्या मे देवः शीघ्रं यथा तुष्यति तथा तत्सेवाप्रकारं कथय ॥२३॥ कश्यप उवाच ॥ हे देवमातः, पूर्वं प्रजाकामेन मया पृष्टो ब्रह्मा मम यद्व्रतमाह तद्धरितोषणं व्रतं ते वक्ष्यामि ॥२४॥ फाल्गुनस्य शुक्लपक्षे द्वादशाहं पयोव्रतः सन् हरिं पूजयेत् ॥२५॥ तत्रादौ माघामावास्यायां वनवराहेण विदीर्णया मृदा शरीरमालिप्य नद्यादौ विधिना स्नायात् ॥२६॥ ॥

मृल्लेपने इमं मंत्रमुच्चारयेत् । हे देवि मृत्तिके, आदिवराहेण पातालात्त्वमुद्धृतासि । तुभ्यं नमोऽस्तु । त्वं मम पापं नाशय ॥२७॥ ततः स्नानांते नित्यं नैमित्तिकं च कर्म कृत्वा भक्त्या प्रतिमायां भूमौ सूर्ये जले वह्नौ गुरौ वा हरिं पूजयेत् ॥२८॥ तत्रावाहनादाविमान् नव मंत्रानुच्चारयेत् । महापुरुषाय सर्वभूतनिवासाय वासुदेवाय तुभ्यं नमः ॥२९ ॥ सूक्ष्माय प्रधानपुरुषाय चतुर्विंशतितत्वज्ञाय सांख्यशास्त्रप्रवर्तकाय नमः ॥ ३० ॥ द्विशीर्ष्णे त्रिपदे चतुःश्रृंगाय सप्तहस्तायाग्निरूपाय यज्ञाय ते नमः ॥३१॥ शिवाय शक्तिधराय सर्वविद्याधिपतये नमः ॥३२॥ हिरण्यगर्भाय प्राणाय योगैश्वर्यशरीराय नमः॥ ३३ ॥ आदिदेवाय साक्षिभूताय नारायणाय नमः ॥ ३४ ॥ मरकतश्यामशरीराय केशवाय पीतवाससे नमः॥ ३५ ॥ हे ईश, त्वं पुंसां सर्ववरदोऽसि । अतो धीराः

त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ॥ उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥ २७ ॥ निर्वर्तितात्मनियमो देवमर्चेत्समाहितः ॥ अर्चायां स्थंडिले सूर्ये जले वह्नौ गुरावपि ॥ २८ ॥ नमस्तुभ्यं भगवते पुरुषाय महीयसे॥ सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ २९ ॥ नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च॥ चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥३०॥ नमो द्विशीर्ष्णे त्रिपदे चतुःश्रृंगाय तंतवे ॥ सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥३१ ॥ नमः शिवाय रुद्राय नमः शक्तिधराय च ॥ सर्वविद्याधिपतये भूतानां पतये नमः ॥ ३२ ॥ नमो हिरण्यगर्भाय प्राणाय जगदात्मने ॥ योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥ ३३ ॥ नमस्ते आदिदेवाय साक्षिभूताय ते नमः ॥ नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥ नमो मरकतश्यामवपुषेऽधिगतश्रिये ॥ केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ ॥ अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥ ३६ ॥ अन्ववर्तंत यं देवाः श्रीश्च तत्पादपद्मयोः ॥ स्पृहयंत इवामोदं भगवान्मे प्रसीदताम् ॥ ३७ ॥ एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतम् ॥ अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥ अर्चित्वा गंधमाल्याद्यैः पयसा स्नपयेद्विभुम् ॥ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥ गंधधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया ॥ ३९ ॥ शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥ ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ॥४०॥ निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयम् ॥ दत्त्वाऽऽचमनमर्चित्वा तांबूलं च निवेदयेत् ॥४१॥ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥ कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दंडवन्मुदा ॥ ४२॥ कृत्वा शिरसि तच्छेषां देवमुद्वासयेत्ततः ॥ द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितम् ॥ ४३ ॥ ॥

कल्याणार्थं ते चरणरेणुमुपासते ॥३६॥ देवाः श्रीश्च यस्य पादकमलयोः सुगंधं स्पृहयंति स भगवान् मे प्रसीदताम् ॥ ३७ ॥ एतैर्नवभिर्मंत्रैरावाहनपाद्याद्युपचारैः श्रद्धया देवं समर्चयेत् ॥३८॥ ततो दुग्धेन देवस्याभिषेकं कृत्वा वस्त्रोपवीताभरणैर्गंधपुष्पधूपदीपादिभिश्च पूजयेत् ॥३९॥ ततो घृतगुडसहितस्य पयसि शृतस्य शाल्योदनस्य नैवेद्यं दत्वा तेनैव पायसान्नेन द्वादशाक्षरमंत्रेण होमं कुर्यात् ॥४०॥ निवेदितं नैवेद्यं तद्भक्ताय दद्यात्स्वयं वा भुंजीत । तत आचमनं दत्वा तांबूलं निवेदयेत् ॥४१॥ ततोऽष्टोत्तरशतं मूलमंत्रं जप्त्वा स्तुतिभिः प्रभुं स्तुत्वा प्रदक्षिणां नमस्कारं च कुर्यात् ॥४२॥ निर्माल्यं शिरसि धृत्वा देवं विसर्ज-

येत् । ततः पायसेन द्व्यधिकान् ब्राह्मणान् भोजयेत् ॥४३॥ ततस्तैः समनुज्ञातो बंधुभिः सह भुंजीत । रात्र्यां ब्रह्मचारी सन् परेऽहनि फाल्गुनशुद्धप्रतिपदि प्रभाते ॥४४॥ यथोक्तविधिना स्नात्वा शुचिः सन् दुग्धेन विभुं स्नापयित्वा पूजयेत् ॥४५॥ ततः पूर्ववदग्निं हुत्वा विप्रांश्च भोजयेत् ॥४६॥ एवं द्वादशदिनपर्यंतं प्रत्यहं पयोभक्षः सन् हरेराराधनं होमं ब्राह्मणभोजनं च कुर्यात् ॥ ४७ ॥ प्रतिपद्दिनमारभ्य शुक्लत्रयोदशीपर्यंतं ब्रह्मचर्यं भूमिशयनं त्रिकालस्नानं च कुर्यात् ॥४८॥ मिथ्याभाषणमुच्चावचान् भोगान् हिंसादिकं च वर्जयेत् ॥४९॥ त्रयोदश्यां पंचामृतैर्विष्णुं स्नापयित्वा शास्त्रविधिना ॥५०॥ महापूजां कृत्वा

भुंजीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ॥ ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ॥ ४४ ॥ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥ पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनम् ॥ ४५ ॥ पयोभक्षो व्रतमिदं चरेद्विष्ण्वर्चनादृतः ॥ पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥ ४६ ॥ एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः ॥ हरेराराधनं होममर्हणं द्विजतर्पणम् ॥ ४७ ॥ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ॥ ब्रह्मचर्यमधः स्वप्नं स्नानं त्रिषवणं चरेत् ॥ ४८ ॥ वर्जयेदसदालापं भोगानुच्चावचांस्तथा ॥ अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥ ४९ ॥ त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ॥ ५० ॥ पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ॥ चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥ ५१ ॥ शृतेन तेन पुरुषं यजेत सुसमाहितः ॥ नैवेद्यं चातिगुणवद्दद्यात्पुरुषतुष्टिदम् ॥ ५२ ॥ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ॥ तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ॥ ५३ ॥ भोजयेत्तान्गुणवता सदन्नेन शुचिस्मिते ॥ अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ॥ ५४ ॥ दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः ॥ अन्नाद्येनाश्वपाकांश्च प्रीणयेत्समुपागतान् ॥ ५५ ॥ भुक्तवत्सु च सर्वेषु दीनांधकृपणेषु च ॥ विष्णोस्तत्प्रीणनं विद्वान्भुंजीत सह बंधुभिः ॥ ५६ ॥ नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ॥ कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ॥५७॥ एतत्पयोव्रतं नाम पुरुषाराधनं परम् ॥ पितामहेनाभिहितं मया ते समुदाहृतम् ॥ ५८ ॥ त्वं चानेन महाभागे सम्यक्चीर्णेन केशवम् ॥ आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ॥५९॥ अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् ॥ तपःसारमिदं भद्रे दानं चेश्वरतर्पणम् ॥ ६० ॥ ॥ ॥

अंतर्यामिविष्णोरुद्देशेन पयसि चरुं श्रपयित्वा ॥५१॥ तेन पुरुषमिष्ट्वा पुरुषाहारपरिमितं नैवेद्यं दद्यात् ॥ ५२ ॥ ततो ज्ञानसंपन्नमाचार्यमृत्विजश्च वस्त्राभरणधेनुभिस्तोषयेत् ॥ ५३ ॥ अन्यांश्च ब्राह्मणान् सदन्नेन भोजयेत् ॥ ५४ ॥ ततो गुरवे ऋत्विग्भ्यश्च दक्षिणां दत्वा तत्रागतान् चांडालपर्यंतानन्नादिना तर्पयेत् ॥५५॥ एवं सर्वेषु भुक्तेषु सत्सु ततो बंधुभिः सह स्वयं भुंजीत ॥५६॥ नृत्यवाद्यगीतस्तुत्यादिभिः प्रत्यहं भगवतः पूजां कारयेत् ॥५७॥ एतत्पयोव्रतं मे पितामहेनोक्तम्। तत्ते कथितम् ॥५८॥ हे महाभागे, त्वं चानेन व्रतेन शुद्धभावेन केशवं भज ॥५९॥ इदमीश्वरतोषकरत्वात्सर्वयज्ञाख्यं सर्वव्रतं तपःसारं दानं

---

१ अनेन कृतेन सर्वे यज्ञाः सर्वाणि व्रतानि तपांसि दानानि च कृतानि स्युरित्यर्थः ।

च स्मृतम् ॥६०॥ येन हरिस्तुष्यति तदेव तपो दानं व्रतं यज्ञो नियमा यमाश्च ज्ञेयाः ॥६१॥ अतो हे भद्रे, श्रद्धयेदं व्रतमाचर। अनेन तुष्टो भगवान् तव
वरान् दास्यति ॥६२॥ इति श्रीमद्भागवतचू० अष्ट० षोडशोऽध्यायः ॥१६ ॥ ॥ ततः सप्तदशेऽदित्या कृते तस्मिन् व्रते हरिः। तत्कामपूरणायादौ तत्पु-
त्रोऽभूदितीर्यते ॥१॥ श्रीशुक उवाच ॥ हे नृप, एवं कश्यपेनोक्ता साऽदितिर्द्वादशाहं पयोव्रतमन्वतिष्ठत् ॥१॥ मनसेंद्रियदुष्टाश्वान् निगृह्यैकाग्रया बुद्ध्येश्वरं
ध्यायती सती ॥२॥ मनो वासुदेवे समाधाय पयोव्रतं चचार ॥ ३ ॥ हे राजन्, तस्माद्व्रतात् पीतवासाः शंखचक्रगदाधरो भगवान् हरिः प्रादुरभूत् ॥ ४ ॥ तं
नेत्रगोचरमदितिर्वीक्ष्य सहसोत्थाय प्रीत्या भुवि कायेन दंडवन्ननाम ॥५॥ तत उत्थाय बद्धांजलिः स्थिता सती तं स्तोतुं न शशाक। किंतु आनंदजलव्याप्त-

त एव नियमाः साक्षात्त एव च यमोत्तमाः ॥ तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥६१॥ तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥
भगवान्परितुष्टस्ते वरानाशु विधास्यति ॥६२॥ इति श्रीम० महा० अष्ट० अदितिपयोव्रतं नाम षोडशोऽध्यायः ॥१६॥ ॥श्रीशुक उवाच॥
इत्युक्ता साऽदिती राजन्स्वभर्त्रा कश्यपेन वै ॥ अन्वतिष्ठद्व्रतमिदं द्वादशाहमतंद्रिता ॥१॥ चिंतयंत्येकया बुद्ध्या महापुरुषमीश्वरम् ॥
प्रगृह्येंद्रियदुष्टाश्वान्मनसा बुद्धिसारथिः ॥२॥ मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि ॥ वासुदेवे समाधाय चचार ह पयोव्रतम्
॥३॥ तस्याः प्रादुरभूत्तात भगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुः शंखचक्रगदाधरः ॥४॥ तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरम् ॥
ननाम भुवि कायेन दंडवत्प्रीतिविह्वला ॥ ५ ॥ सोत्थाय बद्धांजलिरीडितुं स्थिता नोत्सेह आनंदजलाकुलेक्षणा ॥ बभूव तूष्णीं
पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥ प्रीत्या शनैर्गद्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ॥ उद्वीक्षती
सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिम् ॥ ७ ॥ अदितिरुवाच ॥ यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमं-
गलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाऽद्य शं नः कृधीश भगवन्नसि दीननाथः ॥ ८ ॥ विश्वाय विश्वभवनस्थितिसंय-
माय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ॥ स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥९॥ आयुः परं वपुरभी-
ष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाः सकलयोगगुणास्त्रिवर्गः ॥ ज्ञानं च केवलमनंत भवंति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः
॥ १० ॥ श्रीशुक उवाच ॥ अदित्यैवं स्तुतो राजन्भगवान्पुष्करेक्षणः ॥ क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥ ११ ॥ श्री-
भगवानुवाच ॥ देवमातर्भवत्या मे विज्ञातं चिरकांक्षितम् ॥ यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १२ ॥ ॥

नेत्रा रोमांचितशरीरा तूष्णीं बभूव ॥६॥ पश्चाच्छनैर्गद्गदया गिरा सा जगत्पतिं रमापतिमुद्वीक्षती सती तुष्टाव ॥७॥ अदितिरुवाच ॥ हे यज्ञेश, हे यज्ञपुरुष,
हे भगवन्, त्वमस्माकं कल्याणं कुरु। त्वं दीननाथोऽसि ॥८॥ जगतो जन्मस्थितिसंयमार्थं गृहीतमायागुणाय हरये ते नमोऽस्तु ॥ ९ ॥ हे अनंत, तुष्टात्त्व-
त्तो नृणां ब्रह्मायुरभीष्टं शरीरमतुल्यसंपत्तिरणिमादिसिद्धयो ज्ञानं च भवंति। तदा शत्रुजयादि भवतीति किमु वक्तव्यम् ॥१०॥ श्रीशुक उवाच ॥ एवमदि-
त्या स्तुतः सर्वभूतानामंतर्यामी हरिरुवाच ॥११॥ श्रीभगवानुवाच ॥ हे देवमातः, भवत्या इच्छितं मया ज्ञातम् ॥ १२ ॥ ॥ ॥

युद्धे दैत्यान् निर्जित्य प्राप्तजयसंपत्तिभिः पुत्रैः सहैकत्र स्थातुं त्वमिच्छसि ॥१३॥ तथा शत्रूणां दुःखिता रुदतीः स्त्रियो द्रष्टुमिच्छसि ॥१४॥ तथा स्वर्गमधिष्ठाय क्रीडतः समृद्धान् स्वपुत्रान् द्रष्टुमिच्छसि ॥१५॥ हे देवि, ते शत्रवः समर्थैर्विप्रै रक्षिता अतोऽधुना जेतुमशक्याः संति । तत्र पराक्रमः सुखं न ददातीत्येवं मम मतिरस्ति ॥१६॥ अथापि मयोपायश्चिंतनीयः । यतस्ते व्रतचर्यया तुष्टस्य ममार्चनं विफलं भवितुं नार्हति ॥१७॥ हे मातः, त्वया पुत्रसंरक्षणार्थं व्रतेन पूजितोऽहं कश्यपस्य तपोऽधिष्ठाय स्थितः सन् स्वांशेन ते पुत्रत्वं प्राप्य तव सुतान् पालयिष्यामि ॥१८॥ हे भद्रे, त्वं पत्यौ मां भावयंती सती पतिं भजस्व ॥१९॥ एतद्गुह्यमन्यस्मै न कथनीयम् । देवानां रहस्यं गुप्तं सत्सर्वं सिद्ध्यति ॥ २० ॥ (अदितिरुवाच ॥ हे देव, यस्य तव रोमकूपे कोटिशो ब्रह्मांडानि तिष्ठंति ।

तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥ १३ ॥ इंद्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषाम् ॥ स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥ १४ ॥ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥ १५ ॥ प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः ॥ यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥ १६ ॥ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥१७॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ॥ स्वांशेन पुत्रत्वमुपेत्य ते सुतान्गोप्तास्मि मारीचतपस्यधिष्ठितः ॥१८॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषम् ॥ मां च भावयती पत्यावेवंरूपमवस्थितम् ॥ १९ ॥ नैतत्परस्मा आख्येयं पृष्टयापि कथंचन ॥ सर्वं संपद्यते देवि देवगुह्यं सुसंवृतम् ॥२०॥ (अदितिरुवाच ॥ नाहं वोढुं क्षमा देव त्वामाद्यं पुरुषं परम् ॥ ब्रह्मांडकोटिसाहस्रं रोमकूपे तवाव्यय ॥ १॥ महापातकयुक्तोऽपि यन्नामस्मृतिमात्रतः ॥ प्रयाति मुक्तिं देवेश तं कथं धारयाम्यहम् ॥२॥ श्रीभगवानुवाच ॥ सत्यमुक्तं महाभागे त्वया नास्त्यत्र संशयः ॥ पतिव्रताः पतिप्राणाः पतिभक्तिपरायणाः ॥ वहंति बालवद्विष्णुं स्त्रियोऽपि त्यक्तमत्सराः ॥३॥) श्रीशुक उवाच ॥ एतावदुक्त्वा भगवांस्तत्रैवांतरधीयत ॥ अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभो ॥२१॥ उपाधावत्पतिं भक्त्या परया कृतकृत्यवत् ॥ स वै समाधियोगेन कश्यपस्तदबुध्यत ॥ २२॥ प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ॥ सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतम् ॥ समाहितमना राजन्दारुण्यग्निं यथानिलः ॥ २३ ॥ अदितेर्धिष्ठितं गर्भं भगवंतं सनातनम् ॥ हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥ २४ ॥ ॥

तमाद्यं पुरुषं त्वामुदरे धारयितुमहं न समर्था ॥१॥ यस्य नामस्मरणान्महापातक्यपि मुक्तिं प्राप्नोति तं त्वामहं कथं धारयामि ॥ २ ॥ श्रीभगवानुवाच ॥ हे महाभागे अदिति, त्वया सत्यमुक्तं तथापि पतिव्रताः स्त्रियो विष्णुमपि बालवद्धृदये धारयंति ॥ ३ ॥) श्रीशुक उवाच ॥ इत्युक्त्वा भगवानंतर्दधे । अथादितिरात्मनि दुर्लभं हरेर्जन्म मत्वा ॥ २१ ॥ भक्त्या पतिमसेवयत् । कश्यपश्च समाधियोगेन ॥२२॥ आत्मनि हरेः प्रविष्टमंशं ज्ञात्वाऽदित्यां वीर्यमाधत्त ॥२३॥ ततो ब्रह्माऽदितेर्गर्भे स्थितं हरिं ज्ञात्वा गुह्यनामभिस्तुष्टाव ॥ २४ ॥ ॥ ॥ ॥

ब्रह्मोवाच ॥ हे भगवन्, त्वं जयं प्राप्नुहि । हे उरुक्रम, ब्रह्मण्यदेवाय त्रिगुणाय ते नमो नमः ॥२५॥ पृश्निगर्भाय त्रिनाभाय जीवेष्वंतर्यामितया प्रविष्टाय विष्णवे ते नमः ॥२६॥ त्वं जगत आदिर्मध्योंऽतश्चासि । कालस्वरूपो भवान् विश्वमाकर्षति ॥२७॥ त्वं देवानां परमाश्रयः । एवंभूतस्य ते जन्मादि नास्ति । अथापि देवादीनां कार्यसाधनायायमवतारोऽस्ति । अतः स्वर्गभ्रष्टान् देवान् पुनः स्वर्गे स्थापय ॥२८॥ इति श्रीम० चू० अष्ट० सप्तदशोऽध्यायः ॥१७॥ ॥ ततस्त्वष्टादशे भूत्वा वामनः सत्कृतोऽखिलैः । यज्ञं गतस्ततस्तेन सत्कृत्योक्तो वरान् वृणु ॥१॥ श्रीशुक उवाच ॥ एवं ब्रह्मणा स्तुतो भगवान् चतुर्भुजः शंखचक्रगदापद्महस्तः पीतवासाः कमलनेत्रः ॥१॥ श्यामो मकराकारकुंडलैः सुशोभितमुखकमलः श्रीवत्सवक्षाः ॥२॥ वनमालया युतो हरिः स्वतेजसा कश्यपस्य

ब्रह्मोवाच ॥ जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते ॥ नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः ॥२५॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे ॥ त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥२६॥ त्वमादिरंतो भुवनस्य मध्यमनंतशक्तिं पुरुषं यमाहुः ॥ कालो भवानाक्षिपतीश विश्वं स्रोतो यथांऽतः पतितं गभीरम् ॥२७॥ त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः ॥ दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु ॥२८॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे सप्तदशोऽध्यायः ॥१७॥ ॥ श्रीशुक उवाच ॥ इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् ॥ चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा नलिनायतेक्षणः ॥१॥ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् ॥ श्रीवत्सवक्षा वलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः ॥२॥ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः ॥ प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कंठनिविष्टकौस्तुभः ॥३॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः ॥ द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥ ४ ॥ श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ॥ सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ॥ ५ ॥ द्वादश्यां सवितातिष्ठन्मध्यंदिनगतो नृप ॥ विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥ ६ ॥ शंखदुंदुभयो नेदुर्मृदंगपणवानकाः ॥ चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥ ७ ॥ प्रीताश्चाप्सरसोऽनृत्यन्गंधर्वप्रवरा जगुः ॥ तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ॥ ८ ॥ सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः ॥ चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥ ९ ॥ गायंतोऽतिप्रशंसंतो नृत्यंतो विबुधानुगाः ॥ अदित्या आश्रमपदं कुसुमैः समवाकिरन् ॥ १० ॥ ॥ ॥

गृहांधकारं नाशयन् प्रादुरभूत् ॥३॥ तदा दिशः प्रसेदुः, नदादयः स्वच्छजलाः, प्रजाः प्रहृष्टाः, ऋतवो गुणान्विताः, द्विजाश्च प्रसन्ना बभूवुः ॥४॥ हरेः प्रादुर्भावसमयमाह । भाद्रपदशुक्लद्वादश्यां श्रवणस्थे चंद्रे मध्याह्नकालेऽभिजिन्मुहूर्ते प्रभुः प्रादुर्बभूव । जन्मनक्षत्रे सर्वे नक्षत्रग्रहाः श्रेष्ठफलदा बभूवुः ॥ ५ ॥ यस्यां द्वादश्यां हरेर्जन्म जातं सा विजया नाम तिथिः प्रोक्ता ॥६॥ तदा शंखदुंदुभयो मृदंगपणवानकाश्च नेदुः ॥७॥ अप्सरसो ननृतुः । गंधर्वा जगुः ॥८॥ सिद्धविद्याधरगणाः किंपुरुषकिन्नरचारणादयः ॥९॥ गायंतः प्रशंसंतो नृत्यंतश्च संतोऽदित्या आश्रमपदं पुष्पैरवाकिरन् ॥ १० ॥ ॥

अथाऽदितिः स्वगर्भसंभवं तं परं पुरुषं दृष्ट्वा विस्मिता सती मुदमाप । कश्यपश्च विस्मितः सन् जयेत्याह ॥११॥ हरिर्यच्चतुर्भुजादियुक्तं शरीरं दधार तेनैव शरीरेण पित्रोः पश्यतोः सतोर्वामनो बटुर्बभूव ॥ १२ ॥ ऋषयस्तं बटुं दृष्ट्वा कश्यपं पुरस्कृत्य जातकर्मादिसंस्कारान् कारयामासुः ॥ १३ ॥ तत उपनीयमानस्य तस्य वामनस्य सूर्यो गायत्रीमब्रवीत् । बृहस्पतिर्ब्रह्मसूत्रं ददौ । कश्यपो मेखलां ददौ ॥ १४ ॥ भूमिर्मृगचर्म । सोमो दंडम् । माता कौपीनम् । द्यौश्छत्रम् ॥ १५ ॥ ब्रह्मा कमंडलुम् । सप्तर्षयः कुशान् । सरस्वती रुद्राक्षमालाम् ॥ १६ ॥ कुबेरो भिक्षापात्रीम् । उमा च भिक्षां ददौ ॥ १७ ॥ एवं स बटुवामनो ब्रह्मतेजसा ब्रह्मर्षिगणव्याप्तां सभामतिक्रम्याशोभत ॥ १८ ॥ ततो बटुरग्निं प्रदीप्य परिसमुह्य परिस्तीर्याभ्यर्च्य समिद्भिरजुहोत् ॥ १९ ॥ तस्मिन्

दृष्ट्वाऽदितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता ॥ गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः॥११॥ यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः ॥ बभूव तेनैव स वामनो बटुः संपश्यतोर्दिव्यगतिर्यथा नटः ॥ १२ ॥ तं बटुं वामनं दृष्ट्वा मोदमाना महर्षयः ॥ कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ॥ १३ ॥ तस्योपनीयमानस्य सावित्रीं सविताब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥ १४ ॥ ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः ॥ कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥ १५ ॥ कमंडलुं वेदगर्भः कुशान्सप्तर्षयो ददुः ॥ अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥ १६ ॥ तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् ॥ भिक्षां भगवती साक्षादुमादादंबिका सती ॥ १७ ॥ स ब्रह्मवर्चसेनैवं सभां संभावितो बटुः ॥ ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः ॥ १८ ॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनम् ॥ परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद्द्विजः ॥ १९ ॥ श्रुत्वाश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ॥ जगाम तत्राखिलसारसंभृतो भारेण गां सन्नमयन्पदे पदे ॥ २० ॥ तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञके ॥ प्रवर्तयंतो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविम् ॥ २१ ॥ त ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप ॥ सूर्यः किलायात्युत वा विभवासुः सनत्कुमारोऽथ दिदृक्षया क्रतोः ॥ २२ ॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः ॥ छत्रं सदंडं सजलं कमंडलुं विवेश बिभ्रद्धयमेधवाटम् ॥ २३ ॥ मौंज्या मेखलया वीतमुपवीताजिनोत्तरम् ॥ जटिलं वामनं विप्रं मायामाणवकं हरिम् ॥ २४ ॥ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः ॥ प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा ॥ २५ ॥ ॥

समये भृगुभिः प्रवर्तितैरश्वमेधैर्यजत [illegible] श्रुत्वा वामनः संपूर्णबलयुक्तः सन् पदेपदे भूमिं सन्नमयन् तत्र जगाम ॥२०॥ तदा नर्मदानद्या उत्तरतीरे भृगुकच्छनामके क्षेत्रे यज्ञं प्रवर्तयंतो भृगवः सूर्यमिव प्रकाशमानं तं दृष्ट्वा व्यतर्कयन् ॥२१॥ अहो अयं यज्ञावलोकनार्थं सूर्योऽग्निः सनत्कुमारो वा आयाति किम् ॥ २२ ॥ एवं भृगुषु वितर्कयत्सु सत्सु वामनश्छत्रदंडकमंडलून् बिभ्रत् सन् यज्ञमंडपं प्रविवेश ॥ २३ ॥ तदा सशिष्या भृगवस्तं वामनं जटिलं मौंजीमेखलोपवीतमृगचर्मयुक्तं प्रविष्टं वीक्ष्य समुत्थाय तस्य सत्कारं चक्रुः ॥ २४ ॥ २५ ॥ ॥ ॥

यजमानो बलिर्दर्शनीयं मनोरमं तं दृष्ट्वा तस्मै बटवे आसनं दत्वा ॥२६ ॥ स्वागतेन नमस्कृत्य तत्पादौ क्षालयित्वा पूजयामास ॥२७॥ जनपापनाशकं तत्पादोदकं गंगारूपं भक्त्या मूर्ध्नि धृत्वाऽऽह ॥२८॥ बलिरुवाच ॥ हे ब्रह्मन्, ते स्वागतम् । तुभ्यं नमः । तव किं करवाम । त्वां प्रत्यक्षं ब्रह्मर्षीणां तप एवेत्यहं मन्ये ॥२९॥ अद्य नः पितरस्तृप्ताः । अद्य नः कुलं पावितम् । अद्यायं यज्ञश्च सांगोऽनुष्ठितो जातः । यस्मात्त्वं गृहान् प्राप्तोऽसि॥३०॥ अद्य त्वच्चरणक्षालनोदकैर्गतपापस्य मेऽग्नयः सुहुताः । तथेयं मे भूमिरपि त्वत्पदैः पवित्रीकृतास्ति ॥ ३१ ॥ हे बटो, त्वं मत्तः किंचिद्याचितुमागत इत्यहं तर्कये । अतो यद्वांछसि तन्मत्तो गृहाण । धेनुं सुवर्णं गृहं अन्नपानं ब्राह्मणकन्यां ग्रामान् अश्वान् गजान् रथांश्च यत्तवेप्सितं तन्मत्तो गृहाण॥३२॥इति श्रीमद्भागवतचू॰

यजमानः प्रमुदितो दर्शनीयं मनोरमम् ॥ रूपानुरूपावयवं तस्मा आसनमाहरत् ॥ २६ ॥ स्वागतेनाभिनंद्याथ पादौ भगवतो बलिः ॥ अवनिज्यार्चयामास मुक्तसंगं मनोरमम् ॥२७॥ तत्पादशौचं जनकल्मषापहं स धर्मविन्मूर्ध्न्यदधात्सुमंगलम् ॥ यद्देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥२८॥ बलिरुवाच ॥ स्वागतं ते नमस्तुभ्यं ब्रह्मन्किं करवाम ते ॥ ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्यवपुर्धरम् ॥२९॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् ॥ अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ॥३०॥ अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः ॥ हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥३१॥ यद्यद्बटो वांछसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानु तर्कये ॥ गां कांचनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्रकन्याम् ॥ ग्रामान्समृद्धांस्तुरगान्गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ ॥ ३२ ॥ इति श्रीम॰ महापुराणेऽष्टमस्कंधे बलिवामनसंवादेऽष्टादशोऽध्यायः ॥१८॥ ॥ श्रीशुक उवाच ॥ इति वैरोचनेर्वाक्यं धर्मयुक्तं ससूनृतम् ॥ निशम्य भगवान्प्रीतः प्रतिनंद्येदमब्रवीत् ॥१॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करम् ॥ यस्य प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः ॥ २ ॥ न ह्येतस्मिन्कुले कश्चिन्निःसत्वः कृपणः पुमान् ॥ प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये ॥३॥ न संति तीर्थे युधि चार्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः॥ युष्मत्कुले यद्यशसाऽमलेन प्रह्लाद उद्भाति यथोडुपः खे ॥ ४ ॥ यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम् ॥ प्रतिवीरं दिग्विजये नाविंदत गदायुधः ॥ ५ ॥ ॥

अष्टमस्कंधे अष्टादशोऽध्यायः ॥ १८ ॥ ॥ कनीयसि तु हरिणा याचिते च पदत्रये । प्रतिश्रुते च बलिना जानन् भृगुरवारयत् ॥ १ ॥ दातुः स्तुतिः स्वयं तुष्टिरित्यादि प्रस्तुतोचितम् । वक्तव्यमिति भिक्षुंस्तु शिक्षयन्नाह वामनः ॥२॥ श्रीशुक उवाच ॥ एवं धर्मयुक्तं बलेर्वाक्यं श्रुत्वा प्रीतो वामन इदं जगाद ॥१॥ वामन उवाच ॥ हे मनुष्यदेव, यस्य तव ऐहिके धर्मे भृगवः प्रमाणभूताः पारलौकिके च धर्मे प्रह्लादः प्रमाणभूतोऽस्ति तस्य तवैतद्वचः कुलोचितं मधुरं धर्मयुक्तं यशस्करं चास्ति ॥ २ ॥ अस्मिन् कुले कश्चित्कृपणः तथा ब्राह्मणाय ददामीत्युक्त्वा प्रत्याख्याता च नास्ति ॥ ३ ॥ किंच । दानकाले युद्धे च युष्मत्कुलजाः पराङ्मुखा न भवंति । यत्र कुले प्रह्लादो यशसा चंद्र इव प्रकाशते ॥४॥ यत्र जातो हिरण्याक्षो दिग्विजये प्रतियोद्धारं नाविंदत ॥५॥

यं निर्जित्य विष्णुस्तत्पराक्रमं स्मरन् आत्मानं जयिनं न मेने ॥६॥ ततो हिरण्यकशिपुर्भ्रातृवधं श्रुत्वा हरेः स्थानं जगाम ॥७॥ तदा कृतांतवदायांतं तं दैत्यं
विलोक्य विष्णुश्चिंतयामास ॥ ८ ॥ यतो यतोऽहं तत्रासौ प्राणिनां मृत्युरिवागमिष्यति । अतोऽस्य हृदयं प्रवेक्ष्यामि ॥ ९ ॥ एवं निश्चित्य विष्णुस्तस्य शत्रोः
प्राणरंध्रेण शरीरं प्रविवेश ॥ १० ॥ दैत्यस्तत्र हरिमपश्यन् क्रुद्धः सन्ननाद । ततो भूमिं स्वर्गं दिशः आकाशं सप्त पातालानि सप्त समुद्रांश्च विचिन्वन् विष्णुं
न ददर्श ॥ ११ ॥ एवमपश्यन्नाह । मद्भ्रातृहा विष्णुर्यतः पुमान्नावर्तते तद्ब्रह्मैव नूनं गतः ॥ १२ ॥ इह देहिनां मृत्युपर्यंतमेव वैरानुबंधः ॥ १३ ॥ किंच
तव पिता विरोचनो द्विजैर्याचितः सन् द्विजरूपधरेभ्यो देवेभ्यः स्वमायुर्ददौ ॥ १४ ॥ हे बले, त्वं ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चाचरितान् धर्मानास्थितः

यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतम् ॥ नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥६॥ निशम्य तद्वधं भ्राता हिरण्यकशिपुः
पुरा ॥ हंतुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ॥ ७ ॥ तमायांतं समालोक्य शूलपाणिं कृतांतवत् ॥ चिंतयामास कालज्ञो
विष्णुर्मायाविनां वरः ॥८॥ यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव ॥ अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥९॥ एवं स
निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेंद्र ॥ श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्नचेताः ॥१०॥ स तन्निकेतं परिमृश्य
शून्यमपश्यमानः कुपितो ननाद ॥ क्ष्मां द्यां दिशः खं विवरान्समुद्रान्विष्णुं विचिन्वन्न ददर्श वीरः ॥ ११ ॥ अपश्यन्निति
होवाच मयान्विष्टमिदं जगत् ॥ भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ॥ १२ ॥ वैरानुबंध एतावानामृत्योरिह देहिनाम् ॥
अज्ञानप्रभवो मन्युरहंमानोपबृंहितः॥१३॥पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः ॥ स्वमायुर्द्विजलिंगेभ्यो देवेभ्योऽदात्स याचितः
॥१४॥ भवानाचरितान्धर्मानास्थितो गृहमेधिभिः ॥ ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः ॥१५॥ तस्मात्त्वत्तो महीमीषद्वृणेऽहं
वरदर्षभात् ॥ पदानि त्रीणि दैत्येंद्र संमितानि पदा मम ॥१६॥ नान्यत्ते कामये राजन्वदान्याज्जगदीश्वरात् ॥ नैनः प्राप्नोति वै
विद्वान्यावदर्थप्रतिग्रहः ॥ (अधिकं योऽभिकांक्षेत स स्तेनो दंडमर्हति) ॥१७॥ बलिरुवाच ॥ अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः
॥ त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा ॥ १८ ॥ मां वचोभिः समाराध्य लोकानामेकमीश्वरम् ॥ पदत्रयं वृणीते
योऽबुद्धिमान्द्वीपदाशुषम् ॥१९॥ न पुमान्मामुपव्रज्य भूयो याचितुमर्हति ॥ तस्माद्वृत्तिकरीं भूमिं बटो कामं प्रतीच्छ मे ॥२०॥
श्रीभगवानुवाच ॥ यावंतो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियम् ॥ न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप ॥२१॥ ॥

॥ १५ ॥ तस्मात्त्वत्त ईषन्महीं मम पदा तुल्यानि त्रीणि पदानि वृणे ॥ १६ ॥ वदान्यात्त्वत्तोऽन्यं न कामये । यावदर्थपरिग्रहो विद्वान् पापं न प्राप्नोति
(अधिकं य इच्छेत्स स्तेनो दंडमर्हति) ॥ १७ ॥ बलिरुवाच ॥ अहो ब्राह्मणपुत्र, त्वं बालः स्वार्थं न वेत्सि । तव वाचो वृद्धसंमताः ॥ १८ ॥ यो भवान्
द्वीपदातारं मां वचोभिः संतोष्य पदत्रयं वृणीते स बुद्धिमान्नहि ॥ १९ ॥ यतः पुमान् मां प्राप्य पुनरन्यस्माद्याचितुं नार्हति । तस्माद्धे बटो, वृत्तिकरीं भूमिं
यथेच्छं गृहाण ॥२०॥ वामन उवाच ॥ हे राजन्, त्रैलोक्ये यावंतो विषयाः संति तेऽजितेंद्रियं याचकं संतोषयितुं न समर्थाः ॥ २१ ॥ ॥

किंच ॥ पदत्रयेण योऽसंतुष्टः स नवखंडयुक्तेन द्वीपेनापि न तुष्यति ॥२२॥ सप्तद्वीपाधिपतयः पृथुगयादयो नृपा अर्थकामैस्तृष्णाया अंतं न गता इत्यस्माभिः श्रुतम् ॥२३॥ यदृच्छया प्राप्तेन संतुष्टः सुखेन वर्तते । असंतुष्टस्तु न वर्तते ॥२४॥ किंच । पुंसोऽसंतोषः संसृतिहेतुः संतोषस्तु मुक्तये स्मृतः ॥२५॥ तथा यदृच्छालाभतुष्टस्य विप्रस्य तेजो वर्धते । तदसंतोषान्नश्यति ॥२६॥ तस्मात्त्रीणि पदान्येवाहं वृणे । एतावतैव तुष्टोऽहम् ॥ २७ ॥ श्रीशुक उवाच ॥ एवं निशम्य बलिर्हसन् जगाद । हे बटो, वांछातः प्रतिगृह्यताम् । एवमुक्त्वा वामनाय महीं दातुं जलपात्रं जग्राह ॥२८॥ तदा शुक्रो विष्णोश्चिकीर्षितं जानन् विष्णवे भूमिं दास्यंतं शिष्यं जगाद ॥२९॥ शुक्र उवाच ॥ हे वैरोचने, एष साक्षाद्विष्णुर्देवानां कार्यसाधकः कश्यपाददित्यां जातः ॥३०॥ किंच । त्वयास्मै यत्प्रतिश्रुतं तदहं साधु न मन्ये ।

त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते ॥ नववर्षसमेतेन सप्तद्वीपवरेच्छया ॥२२॥ सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः ॥ अर्थकामैर्गता नांतं तृष्णाया इति नः श्रुतम् ॥ २३ ॥ यदृच्छयोपपन्नेन संतुष्टो वर्तते सुखम् ॥ नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥२४॥ पुंसोऽयं संसृतेर्हेतुरसंतोषोऽर्थकामयोः ॥ यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः ॥२५॥ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते ॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः ॥ २६ ॥ तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात् ॥ एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम् ॥२७॥ श्रीशुक उवाच ॥ इत्युक्तः स हसन्नाह वांछातः प्रतिगृह्यताम् ॥ वामनाय महीं दातुं जग्राह जलभाजनम् ॥२८॥ विष्णवे क्ष्मां प्रदास्यंतमुशना असुरेश्वरम् ॥ जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदां वरः॥२९॥ शुक्र उवाच ॥ एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः ॥ कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥३०॥ प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ॥ न साधु मन्ये दैत्यानां महानुपगतोऽनयः ॥ ३१ ॥ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतम् ॥ दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ॥ ३२ ॥ त्रिभिः क्रमैरिमाँल्लोकान्विश्वकायः क्रमिष्यति ॥ सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्यसे कथम् ॥ ३३ ॥ क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः ॥ खं च कायेन महता तार्तीयस्य कुतो गतिः ॥ ३४ ॥ निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् ॥ प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ॥ ३५ ॥ न तद्दानं प्रशंसंति येन वृत्तिर्विपद्यते ॥ दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ॥ ३६ ॥ धर्माय यशसेऽर्थाय कामाय स्वजनाय च ॥ पंचधा विभजन्वित्तमिहामुत्र च मोदते ॥ ३७ ॥ अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम ॥ सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत् ॥ ३८ ॥ ॥

अहो दैत्यानां महद्दुःखं प्राप्तम् ॥३१॥ एष त्वत्तः स्थानमैश्वर्यादिकं चाच्छिद्येंद्राय दास्यति ॥३२॥ अयं विश्वदेहस्त्रिभिः पदैरिमान् लोकान् क्रमिष्यति । हे मूढ, विष्णवे सर्वस्वं दत्वा कथं वर्तिष्यसे ॥३३॥ एकेन पादन्यासेन भूमिं द्वितीयेन स्वर्गं देहेनाकाशं क्रममाणस्य बटोस्तृतीयपादन्यासस्य क्व गतिः ॥३४॥ ददामीति प्रतिज्ञातमप्रदातुस्तव नरके स्थितिं मन्ये ॥३५॥ येन वृत्तिर्नश्यति तद्दानं न प्रशंसंति । यतो वृत्तिमतः पुरुषाद्दानं यज्ञस्तपः कर्म च भवति ॥३६॥ अपिच । यः पुमान् स्ववित्तं धर्माय यशसेऽर्थाय कामाय स्वजनायेति च पंचधा विभजेत्स इहामुत्र च मोदते ॥ ३७ ॥ ऋग्वेदश्रुत्या सत्यानृतयोर्व्यवस्था प्रतिपादिता । तत्र

च वृत्तिसंकटादिषु अनृतमपि न निषिद्धम् । तच्छृणु । ओमिति सत्यं प्रोक्तम् । नेत्यनृतम् ॥३८॥ देहवृक्षस्य मूलमनृतम् । पुष्पफलं सत्यम् । अतो देहे नष्टे तत्सत्यं नष्टं स्यात् ॥३९॥ यथोत्पाटितमूलो वृक्षः सद्यः शुष्यति पतति च । एवं नष्टानृतो देहः शुष्येत् अत्र संशयो नास्ति ॥४०॥ तस्मादर्थिने यत्किंचिद्दास्यामीति ब्रूयात् तेन न्यूनो भवेत् । किंच भिक्षवे सर्वं दास्यामीत्यंगीकुर्वतः पुंसो देहनिर्वाहोऽपि न सिद्ध्यति । यो नित्यं मम किंचिदपि नास्ति अहं सीदामीति ब्रूते स तेनानृतेन परेषामर्थानाकर्षति । ननु तर्ह्यनृतमेव सर्वदा सेव्यम् । नेत्याह । सर्वं नेति यो ब्रूयात्स दुष्कीर्तिः श्वसन् मृतः ॥ ४१ ॥ ४२ ॥ स्त्रीषु परिहासे विवाहे वृत्त्यर्थे प्राणसंकटे कस्यचिद्धिंसायां च प्राप्तायामनृतं निंद्यं न स्यात् ॥४३॥ इति श्री० चू० अष्ट० एकोनविंशोऽध्यायः ॥१९॥ विंशे त्वनृतभीतोऽसौ ज्ञात्वापि कपटं हरेः । ददावेव ततो विष्णुः सहसाऽवर्धताद्भुतम् ॥१॥ श्रीशुक उवाच ॥ एवं कुलगुरुणोक्तो बलिः क्षणं तूष्णीं भूत्वा गुरुं प्रत्याह ॥१॥ बलिरु-

सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते ॥ वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ॥३९॥ तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् ॥ एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥४०॥ पराग्रिक्तमपूर्णं वा अक्षरं यत्तदोमिति ॥ यत्किंचिदोमिति ब्रूयात्तेन रिच्येत वै पुमान् ॥ भिक्षवे सर्वमोंकुर्वन्नालं कामेन चात्मने ॥ ४१ ॥ अथैतत्पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ॥ सर्वं नेत्यनृतं ब्रूयात्स दुष्कीर्तिः श्वसन्मृतः ॥४२॥ स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥४३॥ इति श्रीम०महापुराणेऽष्टमस्कंधे वामनप्रादुर्भावे एकोनविंशोऽध्यायः ॥१९॥ ॥ श्रीशुक उवाच ॥ बलिरेवं गृहपतिः कुलाचार्येण भाषितः ॥ तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम् ॥१॥ बलिरुवाच ॥ सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनाम् ॥ अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥२॥ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम् ॥ प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ॥३॥ नह्यसत्यात्परो धर्म इति होवाच भूरियम् ॥ सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरम् ॥४॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् ॥ न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात् ॥५॥ यद्यद्धास्यति लोकेऽस्मिन्संपरेतं धनादिकम् ॥ तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ॥६॥ श्रेयः कुर्वंति भूतानां साधवो दुस्त्यजासुभिः ॥ दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥७॥ यैरियं बुभुजे ब्रह्मन्दैत्येंद्रैरनिवर्तिभिः ॥ तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि ॥ ८ ॥ ॥

वाच ॥ हे गुरो । त्वया प्रोक्तोऽयं गृहमेधिनां धर्मः सत्योऽस्ति । योऽर्थकामादिकं न बाधेत ॥२॥ परंतु विरोचनपुत्रोऽहं दास्यामीति प्रतिज्ञाय वित्तलोभेन द्विजं कथं प्रत्याचक्षे ॥३॥ असत्यात्परोऽधर्मो नास्ति । अतो मिथ्यावादिनं नरं विना सर्वं सोढुमहं समर्थास्मीतीयं भूमिरुक्तवती ॥४॥ अहं यथा ब्राह्मणवंचनाद्बिभेमि तथा नरकात् दारिद्र्यात् स्थानपतनान्मृत्योरपि न बिभेमि ॥५॥ यद्यद्धनादिकं तत्सर्वं मृतं पुरुषमिह लोके त्यक्ष्यत्येव तर्हि तज्जीवतैव स्वयं किमिति न देयं अपितु देयमेव । वृत्तिसंकटपरिहारायार्धं देयमिति चेत्तर्हि तेन दत्तेन विप्रो न तुष्येच्चेत्तर्हि तद्दानं व्यर्थमेव स्यादतस्तद्याचितं सर्वमेव देयं न किंचित् ॥ ६ ॥ दधीचिशिबिप्रभृतयः साधवो दुस्त्यजैः प्राणैरपि भूतानां श्रेयः कुर्वंति । तदा पृथिव्यादिषु को विचारः ॥ ७ ॥ यैर्दैत्यैरियं भूमिरुपभुक्ता तेषां लोकान् भोगांश्च

कालो जग्रास न तु यशः । अतः कीर्तिरेव साध्या ॥८॥ किंच । यथा युद्धे अनिवृत्य देहत्यागिनो बहवो दृश्यंते तथा पात्रे प्राप्ते धनत्यागिनो न दृश्यंते ।
अतो मया धनत्याग एव कार्यः ॥९॥ अपिच । शूरस्य दयालोः पुंसो यादृशतादृशानामपि याचकानां कामपूरणेन यद्दैन्यं तच्छोभनमेव । भवत्सदृशानां सत्पात्राणां
कामपूरणेन दुर्गतिः शोभनेति किं पुनर्वक्तव्यम् ॥१०॥ अतो भवंतो यज्ञैर्यं यजंति स एष वरदो विष्णुरस्तु वा शत्रुरस्तु । अस्मै पृथ्वीं दास्यामि
॥११॥ यद्यपि निरपराधं मां बध्नीयात्तथापि भीतमेनं रिपुं न हिंसिष्ये ॥१२॥ यद्ययं विष्णुस्तर्हि मया दानेऽदत्ते सति स्वयशोरक्षणार्थं मां हत्वा भूमिं हरेदतोऽस्मै
दानमेव प्रशस्तम् ॥१३॥ श्रीशुक उवाच ॥ एवमुक्त्वा स्वाज्ञोल्लंघनं कुर्वाणं सत्यप्रतिज्ञं शिष्यं गुरुः शशाप ॥ १४ ॥ हे बले, त्वमात्मानमेव पंडितं-

सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥ ९ ॥ मनस्विनः कारुणिकस्य शोभनं
यदर्थिकामोऽपनयेन दुर्गतिः ॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो बटोरस्य ददामि वांछितम्॥१०॥ यजंति यज्ञक्रतुभिर्यमादृता
भवंत आम्नायविधानकोविदाः ॥ स एव विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥११॥ यद्यप्यसावधर्मेण
मां बध्नीयादनागसम् ॥ तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥१२॥ एष वा उत्तमश्लोको न जिहासति यद्यशः ॥ हत्वा
मैनां हरेद्युद्धे शयीत निहतो मया ॥१३॥ श्रीशुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ॥ शशाप दैवप्रहितः सत्यसंधं
मनस्विनम् ॥१४॥ दृढं पंडितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया ॥ मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥ २५ ॥ एवं
शप्तः स्वगुरुणा सत्यान्न चलितो महान् ॥ वामनाय ददावेनामर्चित्वोदकपूर्वकम् ॥ १६ ॥ विंध्यावलिस्तदागत्य पत्नी जालकमालिनी
॥ आनिन्ये कलशं हैममवनेजन्यपां भृतम् ॥१७॥ यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा॥ अवनिज्यावहन्मूर्धि तदपो
विश्वपावनीः ॥१८॥ तदाऽसुरेंद्रं दिवि देवतागणा गंधर्वविद्याधरसिद्धचारणाः ॥ तत्कर्म सर्वेऽपि गृणंत आर्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः
॥१९॥ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपूरुषकिन्नरा जगुः ॥ मनस्विनानेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्रयम्
॥२०॥ तद्वामनं रूपमवर्धताद्भुतं हरेरनंतस्य गुणत्रयात्मकम् ॥ भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत
॥२१॥काये बलिस्तस्य महाभिभूतेः सहर्त्विगाचार्यसदस्य एतत् ॥ ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तम्॥२२॥

मन्यमानो मदाज्ञाविमुखोऽसि । अतः शीघ्रं श्रियो भ्रश्यसे ॥१५॥ एवं गुरुणा शप्तोऽपि सत्यान्न चलितो बलिर्वामनं पूजयित्वा तस्मै उदकदानपूर्वकं भूमिं
ददौ ॥१६॥ तस्मिन् दानांगपूजने मुक्ताभरणमालावती विंध्यावलिर्जलपूर्णं सुवर्णकलशमानिन्ये ॥१७॥ ततो यजमानः स्वयं भगवतः श्रीमत्पादयुगं मुदा प्रक्षाल्य
तज्जलं विश्वपावनं मूर्ध्नि दधौ ॥१८॥ तदा स्वर्गे देवगंधर्वादयस्तत्कर्म गृणंतः संतः पुष्पैरसुरेंद्रं बलिं ववृषुः ॥ १९ ॥ सहस्रशो दुंदुभयो नेदुः । गंधर्वादयो
जगुः । अनेन बलिना शत्रवे जगत्रयं दत्तमिदं दुष्करं कृतम् ॥२०॥ एवं लोके वदति सति तद्वामनं रूपमद्भुतं यथातथाऽवर्धत । यत्र रूपे भूमिराकाशं
स्वर्गो दिशः पातालानि समुद्राश्च स्थिताः ॥ २१ ॥ ततो बलिस्तस्य देहे सकलं विश्वं ददर्श ॥ २२ ॥ ॥ ॥

तच्च–तस्यांघ्रितले रसातलम् । पादयोर्महीम् । जंघयोर्वृक्षान् । जानुनि पक्षिणः । ऊर्वोर्मरुतः ॥२३॥ गुह्ये प्रजापतीन् । जघने दैत्यान् । नाभौ नभः । कुक्षिषु समुद्रान् । उरसि नक्षत्राणि ॥२४॥ हृदि धर्मम् । स्तनयोः सत्यानृते । मनसि चंद्रम् । वक्षसि श्रियम् ॥२५॥ भुजेषु लोकपालान् । कर्णयोर्दिशः । मूर्ध्नि द्यौः । केशेषु मेघान् । नासिकायां वायुम् । अक्ष्णोः सूर्यम् । मुखेऽग्निम् ॥२६॥ वाण्यां वेदान् । जिह्वायां वरुणम् । भ्रुवोर्विधिनिषेधौ । पक्ष्मस्वहोरात्रम् । ललाटे क्रोधम् । अधरे लोभम् ॥२७॥ रेतसि जलम् । पृष्ठेऽधर्मम् । छायासु मृत्युम् । हास्ये मायाम् । रोमस्वौषधीः ॥२८॥ नाडीषु नदीः । नखेषु शिलाः । बुद्धौ ब्रह्माणम् । इंद्रियेषु देवगणान् ऋषींश्च । गात्रे स्थिरजंगमानि भूतानि ॥२९॥ एवं सर्वात्मनि त्रिभुवनं वीक्ष्य सर्वेऽसुरा भीतिं प्रापुः ॥ तदा सुदर्शनं चक्रं, शार्ङ्गं

रसामचष्टांघ्रितलेऽथ पादयोर्महीं महीध्रान्पुरुषस्य जंघयोः ॥ पतत्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिंद्रसेनः ॥ २३ ॥ संध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजापतीन् जघने आत्ममुख्यान् ॥ नाभ्यां नभः कुक्षिषु सप्तसिंधूनुरुक्रमस्योरसि चर्क्षमालाम् ॥२४॥ हृद्यंग धर्मं स्तनयोर्मुरारेर्ऋतं च सत्यं च मनस्यथेंदुम् ॥ श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरेफान् ॥२५॥ इंद्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि ॥ केशेषु मेघान् श्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निम् ॥२६॥ वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ॥ अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभम् ॥ २७ ॥ स्पर्शे च कामं नृप रेतसोंऽभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ॥ छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजातयश्च ॥ २८ ॥ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च ॥ प्राणेषु गात्रे स्थिरजंगमानि सर्वाणि भूतानि ददर्श वीरः ॥ २९ ॥ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरंग ॥ सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ॥३०॥ पर्जन्यघोषो जलजः पांचजन्यः कौमोदकी विष्णुगदा तरस्विनी ॥ विद्याधरोऽसिः शतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौ च ॥ ३१ ॥ सुनंदमुख्या उपतस्थुरीशं पार्षदमुख्याः सहलोकपालाः ॥ स्फुरत्किरीटांगदमीनकुंडलश्रीवत्सरत्नोत्तममेखलांबरैः ॥३२॥ मधुव्रतस्रग्वनमालया वृतो रराज राजन्भगवानुरुक्रमः ॥ क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ॥३३॥ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि ॥ उरुक्रमस्यांघ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे विश्वरूपदर्शनं नाम विंशतितमोऽध्यायः ॥ २० ॥ ॥ ॥

धनुः ॥३०॥ कौमोदकी गदा, विद्याधरसंज्ञोऽसिः, शतचंद्रयुक्तं चर्म, अक्षयसायकौ तूणौ च दृष्ट्वा ॥३१॥ सुनंदमुख्याः पार्षदा ईशमुपतस्थुः । हे राजन्, तदा भगवानुरुक्रमः किरीटांगदमकरकुंडलः श्रीवत्सकौस्तुभमेखलांबरवनमालाभिर्युतः सन् रराज । ततस्त्रिविक्रमो बलेर्भूमिमेकेन पदा विचक्रमे । शरीरेण नभः । बाहुभिर्दिशः ॥ ३२ ॥ ३३ ॥ द्वितीयेन पदा स्वर्गम् । तृतीयचरणाय तदीयमण्वपि नावशिष्टम् । द्वितीचरण एवोपर्युपरि गच्छन् सत्यलोकं गतः ॥ ३४ ॥

इति श्रीमद्भागवतचूर्णिकायां अष्टमस्कंधे विंशतितमोऽध्यायः ॥ २० ॥ ॥ ॥ ॥

एकविंशे पदाऽपूर्तिमिषेण बलिबंधनम् । विष्णुना कृतमुत्कर्षं तस्य ख्यापयितुं जने ॥ १ ॥ श्रीशुक उवाच ॥ अथ सत्यलोके प्राप्तमंघ्रिं वीक्ष्य ब्रह्मा तथा मरीच्यादयो ऋषयः सनंदनाद्या योगिनः ॥१॥ तथा तत्र देवतारूपेण स्थिता वेदोपवेदनियमयमतर्केतिहासांगपुराणसंहिताः एतेऽन्ये च तत्रागमन् । ततस्तच्चरणकमलं ववंदिरे ॥२॥ अथ विष्णोरंघ्रये पूजाद्रव्यमानीय भक्त्या समर्च्य ब्रह्मा तमंघ्रिमस्तौत् ॥३॥ ब्रह्मणः कमंडलुजलं त्रिविक्रमपादक्षालनपवित्रतया गंगा जाता । सा भगवतः कीर्तिः किमु लोकत्रयं पवित्रयति ॥४॥ ततः स्ववृद्धिमुपसंहृत्य पूर्ववद्वामनरूपेण स्थिताय स्वनाथाय ब्रह्मादयो लोकपालाः ॥५॥ तोयैः स्रग्भिर्गंधपुष्पधूपदीपैः फलैरंकुरैश्च पूजां समर्प्य ॥६॥ स्तुतिजयशब्दैर्नृत्यवाद्यगीतैश्च तोषयामासुः ॥७॥ तदा ऋक्षराजो जांबवांस्तु दुंदुभिनादैः सर्वासु दिक्षु वामनस्य

॥ श्रीशुक उवाच ॥ सत्यं समीक्ष्याब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् ॥ मरीचिमिश्रा ऋषयो बृहद्व्रताः सनंदनाद्या
नरदेवयोगिनः ॥१॥ वेदोपवेदा नियमान्विता यमास्तर्केतिहासांगपुराणसंहिताः ॥ ये चापरे योगसमीरदीपितज्ञानाग्निना रंधि-
तकर्मकल्मषाः ॥ ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकम् ॥२॥ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभ-
वोऽर्हणोदकम् ॥ समर्च्य भक्त्याभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयम् ॥३॥ धातुः कमंडलुजलं तदुरुक्रमस्य पादाव-
नेजनपवित्रतया नरेंद्र ॥ स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥४॥ ब्रह्मादयो लोकनाथाः
स्वनाथाय समादृताः ॥ सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥ ५ ॥ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैः
सुरभिभिर्लाजाक्षतफलांकुरैः ॥६॥ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः ॥ नृत्यवादित्रगीतैश्च शंखदुंदुभिनिःस्वनैः ॥७॥ जांब-
वानृक्षराजस्तु भेरीशब्दैर्मनोजवः ॥ विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥८॥ महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया ॥
ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥९॥ न वा अयं ब्रह्मबंधुर्विष्णुर्मायाविनां वरः ॥ द्विजरूपप्रतिच्छन्नो देवकार्यं चिकी-
र्षति ॥ १० ॥ अनेन याचमानेन शत्रुणा बटुरूपिणा ॥ सर्वस्वं नो हृतं भर्तुर्न्यस्तदंडस्य बर्हिषि ॥ ११ ॥ सत्यव्रतस्य सततं
दीक्षितस्य विशेषतः ॥ नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ॥१२॥ तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः ॥ इत्या-
युधानि जगृहुर्बलेरनुचरासुराः ॥ १३ ॥ ते सर्वे वामनं हंतुं शूलपट्टिशपाणयः ॥ अनिच्छतो बले राजन्प्राद्रवन्जातमन्यवः
॥ १४ ॥ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप ॥ प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥ १५ ॥ ॥

विजयमघोषयत् ॥८॥ अथ दैत्याः सर्वां पृथिवीं त्रिपदयाच्ञामिषेण वामनेन हृतां दृष्ट्वा क्रुद्धाः संतः परस्परमूचुः ॥९॥ अहो अयं ब्राह्मणो नहि । किंतु ब्राह्मणरूपधरो विष्णुर्देवकार्यं कर्तुमिच्छति ॥ १० ॥ यतोऽनेन बटुरूपिणा शत्रुणा सत्यव्रतस्य यज्ञे दीक्षितस्य ब्राह्मणभक्तस्य दयावतो बलेः सर्वस्वं हृतम् ॥ ११ ॥ ॥ १२ ॥ अतोऽस्य वधोऽस्माकं धर्मो भर्तुः शुश्रूषणं च स्यात् । एवमुक्त्वा बलेः सेवका आयुधानि जगृहुः ॥ १३ ॥ ते सर्वे शूलपट्टिशपाणयो भूत्वा वामनं हंतुं प्राद्रवन् ॥ १४ ॥ धावमानान् तान् दृष्ट्वा प्रहस्य विष्णुदूताः ॥ १५ ॥ ॥

नंदः सुनंदोऽथ जयो विजयः प्रबलो बलः ॥ कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट् ॥ १६ ॥ जयंतः श्रुतदेवश्च पुष्पदंतोऽथ सात्वतः ॥ सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम् ॥ १७ ॥ हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः ॥ वारयामास संरब्धान्काव्यशापमनुस्मरन् ॥ १८ ॥ हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः ॥ मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ॥ १९ ॥ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये ॥ तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ॥ २० ॥ यो नो भवाय प्रागासीदभवाय दिवौकसाम् ॥ स एव भगवानद्य वर्तते तद्विपर्ययम् ॥ २१ ॥ बलेन सचिवैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः ॥ सामादिभिरुपायैश्च कालं नात्येति वै जनः ॥ २२ ॥ भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ॥ दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदंति नः ॥ २३ ॥ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति ॥ तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ॥ २४ ॥ श्रीशुक उवाच ॥ पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः ॥ रसां निविविशू राजन्विष्णुपार्षदताडिताः ॥ २५ ॥ अथ तार्क्ष्यसुतो ज्ञात्वा विराट्प्रभुचिकीर्षितम् ॥ बबंध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतौ ॥ २६ ॥ हाहाकारो महानासीद्रोदस्योः सर्वतोदिशम् ॥ गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ॥ २७ ॥ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः ॥ नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥ २८ ॥ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर ॥ द्वाभ्यां क्रांता मही सर्वा तृतीयमुपकल्पय ॥ २९ ॥ यावत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः ॥ यावद्वर्षति पर्जन्यस्तावती भूरियं तव ॥ ३० ॥ ॥ ॥

नंदः सुनंदो जयो विजयः प्रबलो बलः कुमुदः कुमुदाक्षो विष्वक्सेनो गरुडः ॥१६॥ जयंतः श्रुतदेवः पुष्पदंतः सात्वतः एते सर्वे नागायुतबला धृतायुधाः संतो दैत्यसेनां जघ्नुः ॥१७॥ अथ बलिः स्वकान् हन्यमानान् दृष्ट्वा शुक्रशापं स्मरन् तान् वारयामास ॥१८॥ हे विप्रचित्ते, हे राहो, हे नेमे, मम वचः श्रूयताम्। यूयं मायुध्यध्वम् । किंतु निवर्तध्वम् । अयं कालोऽस्माकमनुकूलो नहि ॥१९॥ यः कालो भूतानां सुखदुःखदानाय समर्थः । तं कालं पराक्रमैर्जेतुं पुमान् समर्थो न भवति ॥२०॥ यः पूर्वं नः कल्याणाय देवानामकल्याणाय चासीत् स एव कालोऽद्य विपरीतो वर्तते ॥२१॥ अयं जनः सैन्यप्रधानबुद्धिदुर्गमंत्रादिभिः सामाद्युपायैश्च कालं नातिक्रमते ॥२२॥ हे दैत्याः, एते देवाः पूर्वं बहुशो भवद्भिर्जिताः । अधुना तेऽस्माकं जित्वा नदंति ॥२३॥ यदि दैवं प्रसीदति तर्हि तान् वयं जेष्यामः । तावद्यूयं प्रतीक्षध्वम् ॥२४॥ श्रीशुक उवाच ॥ एवं बलेर्वचः श्रुत्वा दैत्यदानवाः पार्षदैस्ताडिताः संतो रसातलं विविशुः ॥२५॥ अथ गरुडः प्रभुंचिकीर्षितं ज्ञात्वा बलिं वारुणैः पाशैः सोमाभिषवदिने बबंध ॥२६॥ तदा द्यावापृथिव्योर्महान् हाहाकार आसीत् ॥२७॥ ततः पाशैर्बद्धं नष्टकांतिं बलिं वामन आह ॥२८॥ हे बले, त्वया भूमेस्त्रीणि पदानि मे दत्तानि । तत्र तव सर्वा मही द्वाभ्यां पद्भ्यां क्रांता । तृतीयपदस्य स्थानं कल्पय ॥ २९ ॥ यावत्सूर्यः किरणैस्तपति । इंदुर्नक्ष-

---

१ अस्य सर्वस्वापहारेण ममेत्यभिमानं संत्याज्येदानीं देहस्वीकारेणाहंकारमपि त्याजयित्वा परमानुग्रहं कर्तुमिच्छति । न चानेन तुल्योऽन्यः कोऽपि सत्यप्रतिज्ञो धीरो वाऽस्तीति तद्यशःप्रख्यापनार्थं किंचित्पातयितुमपीच्छतीति प्रभोरभिप्रायं ज्ञात्वेत्यर्थः ।

त्रैः सह प्रकाशते पर्जन्यो यावद्वर्षति तावती तव भूमिः ॥३०॥ एवं तव भूर्लोक एकेन पदा क्रांतः । शरीरेणाकाशं दिशश्च व्याप्ताः । द्वितीयेन स्वर्लोकस्तव पश्यतः सतः क्रांतः ॥३१॥ तृतीयपदस्य स्थलाभावात्प्रतिश्रुतमदातुस्ते नरकवास इष्टः । अतः शुक्रेणानुमोदितः सन् नरकं विश ॥३२॥ यो याचकं प्रतिश्रुत्य न ददाति तस्य स्वर्गो दूर एव । सोऽधः पतति ॥३३॥ किंच । अभिमानिना त्वया ददामीति प्रतिश्रुत्य वंचितोऽहम् । अतः कतिचित्समा निरयं भुक्ष्व ॥३४॥ इति श्रीम० चू० अष्ट० एकविंशोऽध्यायः ॥२१॥ ॥ द्वाविंशे तु प्रसन्नः सन् प्रस्थाप्य सुतलं बलिम् । दत्वा वरान् हरिर्न्यूनं मत्वा तद्द्वारपोऽभवत् ॥१॥ श्रीशुक उवाच ॥ एवं भगवता सत्वाच्चाल्यमानोऽपि बलिर्दैन्यरहितं वच आह ॥१॥ बलिरुवाच ॥ हे भगवन्, मम प्रतिज्ञातं मिथ्या नहि । यतस्त्वया

पदैकेन मया क्रांतो भूर्लोकः खं दिशस्तनोः ॥ स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना ॥३१॥ प्रतिश्रुतमदातुस्ते निरये वास इष्यते ॥ विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः ॥ ३२ ॥ वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः ॥ प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलंभते ॥ ३३ ॥ विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना ॥ तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित्समाः ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे बलिनिग्रहो नामैकविंशोऽध्यायः ॥२१॥ ॥ श्रीशुक उवाच ॥ एवं विप्रकृतो राजन्बलिर्भगवताऽसुरः ॥ भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥ १ ॥ बलिरुवाच ॥ यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते ॥ करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥२॥ बिभेमि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ॥३॥ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितम् ॥ यं न माता पिता भ्राता सुहृदश्चादिशंति हि ॥४॥ त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः ॥ यो नोऽनेकमदांधानां विभ्रंशं चक्षुरादिशत् ॥५॥ यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः ॥ बहवो लेभिरे सिद्धिं यामुहैकांतयोगिनः ॥६॥ तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ॥ ७ ॥ पितामहो मे भवदीयसंमतः प्रह्लाद आविष्कृतसाधुवादः ॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ॥ ८ ॥ किमात्मनाऽनेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ९ ॥ ॥

वामनरूपेण भिक्षित्वा रूपांतरमाविष्कृतम् । अथापि त्वं यदि मिथ्या मन्यसे तर्हि सत्यं करोमि । मम शीर्ष्णि तृतीयं पदं कुरु ॥२॥ हे भगवन्, यथाहमपकीर्तेः सकाशाद्विभेमि तथा नरकदुःखात् पाशबंधनात् स्थानभ्रंशात्तव दंडाच्च न बिभेमि ॥३॥ श्रेष्ठैरर्पितं दंडमहं साधु मन्ये । यतो मातापित्रादयस्तं दंडं न कुर्वंति ॥४॥ त्वमसुराणां नः शत्रुच्छलेन वर्तमानो गुरुरसि । यः शौर्य वीर्याद्यनेकमदांधानामस्माकमैश्वर्यभ्रंशरूपं चक्षुर्दत्तवानसि ॥५॥ यस्मिन् त्वयि वैरानुबंधेन बहवो दैत्याः सिद्धिं प्राप्ताः ॥६॥ तेन गुरुणा त्वया निगृहीतः पाशैर्बद्धश्चाहं लज्जां व्यथां च न प्राप्नोमि ॥७॥ मम पितामहः प्रह्लादस्तव भक्तानां संमतः । स हिरण्यकशिपुना हिंसां प्रापितोऽप्येवं निश्चितवान् ॥८॥ य आयुष्यांते त्यजति तेन देहेन किम् । तथा सर्वस्वापहारिभिः पुत्रैः संसृतिहेतुभूतया जायया

च किं फलम् । केवलमायुषो व्यय एव भवति॥९॥ एवं देहादीनामसारतां निश्चित्य तव शाश्वतं चरणकमलं शरणं गतः॥१०॥ अधुनाऽहमपि तस्यैव भाग्येन बलात्त्याजितश्रीः सन् तवांतिकं प्राप्तः । यया श्रिया स्तब्धबुद्धिः पुमान् मृत्युसन्निहितमिदं जीवितमशाश्वतमिति न जानाति ॥११॥ श्रीशुक उवाच ॥ एवं बलेरुक्तवतः सतः पूर्णचंद्र इव प्रकाशमानः प्रह्लादस्तत्राजगाम ॥१२॥ तं दृष्ट्वा पाशबद्धो बलिस्तस्मै पूर्ववत् पूजां न चकार । केवलं मूर्ध्ना ननाम । किंच । स्वकृताहंकारादिरूपापराधस्य स्मरणेन स लज्जितो बभूव ॥१३॥१४॥ ततः पुलकाश्रुविह्वलः प्रह्लादः स्वपार्षदैर्युक्तं वामनं तत्रासीनं वीक्ष्य तत्समीपं गत्वा शिरसा ननाम ॥१५॥ प्रह्लाद उवाच ॥ हे भगवन्, अस्मै त्वयैवेंद्रपदं[1] यद्दत्तं तदेवाद्य हृतम् । तच्च शोभनं कृतम् । अहो त्वयैष श्रीमदाद्भ्रंशितः । अयं महान्

इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम् ॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तमः॥१०॥
अथाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः ॥ इदं कृतांतांतिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते
॥ ११ ॥ श्रीशुक उवाच ॥ तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ॥ आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥ १२ ॥ तमिंद्रसेनः
स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम् ॥ प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥ १३ ॥ तस्मै
बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ॥ ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥ १४ ॥ स
तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितम् ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥१५॥
॥ प्रह्लाद उवाच ॥ त्वयैव दत्तं पदमैंद्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम् ॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो
यच्छ्रिय आत्ममोहनात् ॥ १६ ॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय
वै नारायणायाखिललोकसाक्षिणे ॥ १७ ॥ श्रीशुक उवाच ॥ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृतांजलेः ॥ हिरण्यगर्भो
भगवानुवाच मधुसूदनम् ॥ १८ ॥ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला ॥ प्रांजलिः प्रणतोपेंद्रं बभाषेऽवाङ्मुखी नृप
॥ १९ ॥ ॥ विंध्यावलिरुवाच ॥ क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः ॥ कर्तुः प्रभोस्तव
किमस्य त आवहंति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥ २० ॥ ॥ ॥

प्रसादः कृत इत्यहं मन्ये ॥१६॥ यया श्रिया विद्वानपि मुह्यति तस्यां सत्यां कः पुमानात्मतत्त्वं यथावत्पश्यति न कोऽपि । अतः कृपया संपत्तिहारकाय सर्वसाक्षिणे नारायणाय तुभ्यं नमः ॥१७॥ श्रीशुक उवाच॥ प्रह्लादस्य शृण्वतः सतो ब्रह्मा भगवंतं किंचिद्वक्तुं प्रवृत्तः॥१८॥ तदैव विंध्यावलिरपि वक्तुं प्रवृत्ता। सा बद्धं पतिं वीक्ष्याधोमुखी प्रांजलिः सती बभाषे ॥१९॥ विंध्यावलिरुवाच ॥ हे ईश, इदं जगत्त्वया क्रीडार्थं कृतम् । तत्रान्ये कुबुद्धयः स्वाम्यं कुर्युः । ते जगत्कर्तुः प्रभोस्तव किं समर्पयंति । अतः स्वाम्याविष्कारेण मंदबुद्धिमेनं केवलं कृपया पालय ॥ २० ॥ ॥ ॥

---

[1] न ह्यैंद्रं पदमेतदीयं त्वयापहृतं किंतु स्वीयमेव पुनः स्वीकृतम् ।

ब्रह्मोवाच ॥ हे देवदेव, हृतसर्वस्वं बलिं मुंच मुंच । अयं निग्रहं नार्हति ॥२१॥ अनेन तुभ्यं भूः सर्वस्वं देहश्च समर्पितः ॥२२॥ अहो यस्य ते पादयोः सलिलमात्रं दत्वा जनः सद्गतिं प्राप्नोति तस्मै तुभ्यं बलिस्त्रिलोकीं दत्तवान् स दुःखं कथमर्हति ॥२३॥ श्रीभगवानुवाच ॥ हे ब्रह्मन्, अहं यमनुगृह्णामि तस्यार्थान् हरामि । यतो द्रव्यमत्तः पुमान् लोकं मां चावमन्यते ॥ २४ ॥ जीवात्मा निजकर्मभिर्नानायोनिषु भ्रमन् कदाचित्पौरुषीं तनुं व्रजेत् ॥ २५॥ तत्र मनुष्यशरीरे तस्य जन्मकर्मविद्यैश्वर्यधनादिभिर्यदि स्तंभो न भवेत्तर्हि स मदनुग्रह एव ज्ञातव्यः ॥ २६ ॥ कथं तर्हि ध्रुवादिभ्यः संपदो ददासीति चेत्तर्हि हे ब्रह्मन्, यो मद्भक्तः स जन्मकर्मविद्यैश्वर्यादिभिर्न मुह्यति । अतो भक्तेच्छया संपदो ददामि । अभक्तस्तु मुह्यति । अतस्तदपहाररूपमेव तस्यानुग्रहं करोमि ॥ २७॥

ब्रह्मोवाच ॥ भूतभावन भूतेश देवदेव जगन्मय ॥ मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहम् ॥२१॥ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ॥ निवेदितं च सर्वस्वमात्माऽविक्लवया धिया ॥२२॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्याम् ॥ अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् ॥२३॥ श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहम् ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥२४॥ यदाकदाचिज्जीवात्मा संसरन्निजकर्मभिः ॥ नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ॥ २५ ॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः ॥२६॥ मानस्तंभनिमित्तानां जन्मादीनां समंततः ॥ सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्परः ॥२७॥ एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः ॥ अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥२८॥ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः ॥२९॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ॥३०॥ एष मे प्रापितः स्थानं दुष्प्रापममरैरपि ॥ सावर्णेरंतरस्यायं भवितेंद्रो मदाश्रयः ॥ ३१ ॥ तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितम् ॥ यन्नाधयो व्याधयश्च क्लमस्तंद्रा पराभवः ॥ नोपसर्गा निवसतां संभवंति ममेक्षया ॥३२॥ इंद्रसेन महाराज याहि भो भद्रमस्तु ते ॥ सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥३३॥ न त्वामभिभविष्यंति लोकेशाः किमुतापरे ॥ त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ॥३४॥ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम् ॥ सदा संनिहितं वीर तत्र मां द्रक्ष्यते भवान् ॥३५॥

किंच । एष दानवेंद्रो मे मायामजैषीत् । अतः सीदन्नपि न मुह्यति ॥२८ ॥ अपिच । क्षीणधनः स्थानाद्भ्रष्टः शत्रुभिर्बद्धो ज्ञातिभिस्त्यक्तः ॥ २९ ॥ गुरुणा शप्तोऽपि सत्यं न जहौ ॥ ३०॥ एष मया देवैरपि दुष्प्रापं स्थानं प्रापितः । तदाह । सावर्णिमन्वंतरे एष मदाश्रयादिंद्रो भविता ॥३१ ॥ तावद्विश्वकर्मनिर्मितं सुतलमध्यास्ताम् । यत्राधिव्याधिक्लेशादयो न संति ॥३२॥ एवं ब्रह्माणमुक्त्वा बलिं प्रत्याह । हे बले, त्वं ज्ञातिभिः सह सुतलं याहि । तव कल्याणमस्तु ॥ ३३ ॥ तत्र लोकेशा अपि तव पराजयं न करिष्यंति । अपरे न करिष्यंतीति किमु वक्तव्यम् । त्वदाज्ञालंघिनो दैत्यान् मे चक्रं संहरिष्यति ॥३४॥ तत्र सानुगं त्वां सर्वतोऽहं रक्षिष्यामि । हे वीर, तत्र मां भवान् सदा द्रक्ष्यति ॥ ३५ ॥ ॥ ॥

तत्र दैत्यानां संगात्प्राप्तस्तवासुरो भावो मदनुभावं दृष्ट्वा सद्यो नश्यति ॥३६॥ इति श्रीम० चू०अष्ट० द्वाविंशोऽध्यायः ॥२२॥ ॥ त्रयोविंशे बलौ याते सुतलं सपितामहे । उपेंद्रेण दिवं गत्वा पूर्ववन्मोदते हरिः ॥१॥ श्रीशुक उवाच ॥ हे राजन्, एवं ब्रुवाणं भगवंतं बद्धांजलिः प्रेमाश्रुव्याप्तनेत्रो बलिर्गद्गदया गिराऽब्रवीत् ॥१॥ बलिरुवाच ॥ हे भगवन्, परमेश्वराय तुभ्यमहं वराकस्त्रिलोकीं दत्तवानित्येतदास्ताम् । प्रणामोऽपि सम्यङ् कृतः । किंतु तदर्थमुद्यममात्रं कृतम् । तेन च कर्मतपोदानादिकोटिभिरपि दुर्लभस्त्वदनुग्रहः संपादितः । अहो त्वत्प्रणामप्रभावाश्चर्यम् ॥ २॥ श्रीशुक उवाच ॥ एवमुक्त्वा बलिर्हरिं नत्वा ब्रह्माणं शिवं च नत्वा पाशैर्मुक्तः सन् दैत्यैः सह सुतलं विवेश ॥३॥ एवं भगवानिंद्राय स्वर्गं दत्वाऽदितेर्मनोरथं पूरयित्वा सकलं जगत्पालयामास ॥४॥ ततो

तत्र दानवदैत्यानां संगात्ते भाव आसुरः ॥ दृष्ट्वा मदनुभावं वै सद्यः कुंठो विनङ्क्ष्यति ॥ ३६॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे बलिवामनसंवादो नाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ श्रीशुक उवाच ॥ इत्युक्तवंतं पुरुषं पुरातनं महानुभावोऽखिलसाधुसंमतः ॥ बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत् ॥ १ ॥ ॥ बलिरुवाच ॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः ॥ यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २ ॥ ॥ श्रीशुक उवाच ॥ इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥ ३ ॥ एवमिंद्राय भगवान्प्रत्यानीय त्रिविष्टपम् ॥ पूरयित्वाऽदितेः काममशासत्सकलं जगत् ॥४॥ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम् ॥ निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥ ५ ॥ प्रह्लाद उवाच ॥ नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ॥ यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरपि वंदितांघ्रिः ॥ ६ ॥ यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः ॥ कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७॥ चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ॥ सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥ ॥ श्रीभगवानुवाच ॥ वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम् ॥ मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ९ ॥ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम् ॥ मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः ॥ १० ॥ ॥ श्रीशुक उवाच ॥ आज्ञां भगवतो राजन्प्रह्लादो बलिना सह ॥ बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः ॥ ११ ॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ॥ प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम् ॥ १२ ॥

लब्धप्रसादं पौत्रं बलिं दृष्ट्वा प्रह्लाद इदं जगाद ॥५॥ प्रह्लाद उवाच ॥ हे भगवन्, यस्त्वं नो दुर्गपालो जातोऽसि इमं प्रसादं ब्रह्मा शिवो लक्ष्मीश्च न प्रापुः ॥६॥ हे आश्रयप्रद, ब्रह्मादयो यत्पादसेवनाद्विभूतीः सेवंते तस्य ते कृपादृष्टिमार्गं वयमसुरजातयः कस्माद्धेतोः प्रापिताः । अहो आश्चर्यम् ॥ ७ ॥ सर्वज्ञस्य सर्वात्मनः सर्वदृशस्तव चेष्टितमाश्चर्यरूपम् । त्वं कल्पतरुस्वभावः सन् भक्तप्रियोऽसि ॥८ ॥ श्रीभगवानुवाच ॥ हे वत्स, प्रह्लाद तव भद्रमस्तु त्वं पौत्रेण बलिना सह सुतलं गत्वा ज्ञातीनां सुखमावह॥९॥तत्र गदापाणिं स्थितं मां त्वं नित्यं द्रक्ष्यसि॥१०॥श्रीशुक उवाच॥एवं भगवदाज्ञां गृहीत्वा बलिना सह प्रह्लादस्तथेत्युवाच॥११॥आदिपुरुषं वामनं परि-

क्रम्य प्रणम्य च तदनुज्ञातो रसातलं प्रविवेश ॥१२॥ अथ श्रीवामनो ब्रह्मवादिनां ऋत्विजां सदसि स्थितं शुक्रं जगाद ॥१३॥ हे ब्रह्मन्, शिष्यस्य यजमानस्य यज्ञे यन्न्यूनं तत्पूर्णं कुरु। यजमानं विना कथं भवेत् तत्राह। ब्राह्मणैर्दृष्टमपि न्यूनं कर्म पूर्णं भवेत्किं पुनरनुष्ठितम् ॥१४॥ शुक्र उवाच ॥ हे ईश, यस्य यज्ञपुरुषः कर्मेश्वरस्त्वं पूजनादिना संतुष्टोऽसि तस्य कर्मवैषम्यं कुतः स्यात् ॥१५॥ तव नामकीर्तनान्मंत्रतंत्रादिषु यन्न्यूनं तत्सर्वं पूर्णं भवति ॥ १६ ॥ तथापि तवाज्ञां करिष्यामि। त्वदाज्ञापालनमेव पुंसां परमं श्रेयः ॥१७॥ श्रीशुक उवाच ॥ हे नृप, शुक्रो भगवदाज्ञां स्वीकृत्य ऋत्विजैः सह यज्ञे यन्न्यूनं तत्परिपूर्णं चकार ॥१८॥ हे राजन्, एवं बलेर्महीं भिक्षित्वा भ्रात्रे इंद्राय स्वर्गं ददौ ॥१९॥ ततो ब्रह्मा देवर्षिपितृमनुकुमारशिवदक्षमरीच्यादिभिः सह ॥२०॥ कश्यपस्यादि-

अथाहोशनसं राजन्हरिर्नारायणोंऽतिके ॥ आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥१३॥ ब्रह्मन्संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ॥ यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ॥१४॥ शुक्र उवाच ॥ कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ॥ यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥१५॥ मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रमनुसंकीर्तनं तव ॥ १६ ॥ तथापि वदतो भूमन्करिष्याम्यनुशासनम् ॥ एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपालनम् ॥१७॥ श्रीशुक उवाच ॥ अभिनंद्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥१८॥ एवं बलेर्महीं राजन्भिक्षित्वा वामनो हरिः ॥ ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतम् ॥१९॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ॥ दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च ॥२०॥ कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च ॥ लोकानां लोकपालानामकरोद्वामनं पतिम् ॥२१॥ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः ॥ मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥ २२॥ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये ॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥२३॥ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनम् ॥ लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥२४॥ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥२५॥ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥२६॥ सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतम् ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥ २७ ॥ सर्वमेतन्मयाऽऽख्यातं भवतः कुलनंदन ॥ उरुक्रमस्य चरितं श्रोतॄणामघमोचनम् ॥ २८॥ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥

तेश्च प्रीत्यै सर्वेषां लोकपालादीनां पतिं वामनं चक्रे ॥२१॥ सर्वेषामीशे इंद्रे सत्यपि वेददेवधर्मयशःश्रीमंगलव्रतादीनां पालने ॥ २२ ॥ वामनमुपेंद्रं कल्पयांचक्रे। तदा सर्वाणि भूतानि मुमुदिरे ॥ २३ ॥ तत इंद्रो लोकपालैः सह स्वस्याग्रभागे स्थिते देववाह्ये विमाने वामनमुपवेश्य स्वर्गं निन्ये ॥२४॥ वामनभुजरक्षित इंद्रस्त्रिभुवनं प्राप्य मुमुदे ॥ २५ ॥ ततो ब्रह्मा शिवो भृग्वादयो मुनयः पितरः सिद्धादयश्च ॥ २६ ॥ सर्वे हरेस्तन्महत्कर्म गायंतोऽदितिं च प्रशंसंतः संतः स्वस्थानानि जग्मुः ॥ २७ ॥ हे नृप, एवं श्रोतॄणां पापहरं त्रिविक्रमचरितं मया ते कथितम् ॥ २८॥ विष्णोर्महिम्नः पारं यो गृणानो भवति

स पृथिव्या रंजांस्यपि गणिंतवान् । एवं मंत्रद्रष्टा वसिष्ठ आह ॥ २९ ॥ य इदं हरेरवतारचरितं श्रृणोति स परां गतिं याति ॥ ३० ॥ दैवे पित्र्ये मानुषे च कर्मणि क्रियमाणे सति यत्रेदं कीर्त्येत तत्कर्म सुकृतं भवति ॥ ३१ ॥ इति श्रीमद्भागवतचूर्णिकायामष्टमस्कंधे त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शार्ङ्गिणः । लीलोच्यते यतः सत्यव्रतरक्षा महार्णवे ॥ १ ॥ राजोवाच ॥ हे भगवन् , हरेराद्यां मत्स्यावतारकथां श्रोतुमिच्छामि ॥ १ ॥ किंच ॥ इदं लोकनिंद्यं मात्स्यं रूपमीश्वरेण यदर्थं धृतम् ॥ २ ॥ एतत्सर्वं यथावद्वक्तुमर्हसि ॥ ३ ॥ सूत उवाच ॥ हे शौनक, राज्ञैवं पृष्टः शुको मत्स्यरूपेण यच्चरित्रं कृतं तत्प्राह ॥४॥ श्रीशुक उवाच ॥ गोविप्रदेवसाधूनां वेदानां धर्मस्य च रक्षामिच्छन् हरिरवतारान् धत्ते ॥ ५ ॥ हरेर्निंद्यत्वं परिहरति । उच्चनीचभूतेषु नियंतृत्वेन चरन्नीश्वरो वायुरिव नोच्चनीचत्वं भजते । निर्गुणत्वात् ॥ ६ ॥ अथ गतकल्पांते ब्रह्मनिद्रानिमित्तोद्भूतो नैमित्तिको लय आसीत् । तत्र भूरादयो लोकाः समुद्रे मग्ना आसन् ॥७॥ तस्मिन् प्रलये प्राप्तनिद्रस्य ब्रह्मणो मुखतो निर्गतान् वेदान् हयग्रीवोऽसुरो जहार ॥८॥ तज्ज्ञात्वा हरिर्मात्स्यं रूपं दधार ॥९॥ तत्र कश्चित्सत्यव्रतो नाम्ना राजर्षिस्तपस्तेपे ॥१०॥ योऽस्मिन् श्वेतवाराहकल्पे विवस्वतस्तनयः श्राद्धदेव इति हरिणा मनुत्वे योजितः स एव पूर्वकल्पे सत्यव्रतः ॥११॥ एकदा कृतमालायां नद्यां जलतर्पणं कुर्वतस्तस्य सत्यव्रतस्यांजल्युदके एका शफरी प्राप्ता ॥ १२ ॥ स तां नदीतोय उत्ससर्ज ॥१३ ॥

य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन्याति परां गतिम् ॥ ३० ॥ क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ॥ यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे वामनावतारचरिते त्रयोविंशतितमोऽध्यायः ॥२३॥ ॥ राजोवाच ॥ भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मायामत्स्यविडंबनम् ॥ १ ॥ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितम् ॥ तमःप्रकृति दुर्मर्षं कर्मग्रस्त इवेश्वरः ॥२॥ एतन्नो भगवन्सर्वं यथावद्वक्तुमर्हसि ॥ उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥ ॥ सूत उवाच ॥ इत्युक्तो विष्णुरातेन भगवान्बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतम् ॥ ४ ॥ श्रीशुक उवाच ॥ गोविप्रसुरसाधूनां छंदसामपि चेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः ॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥ ६ ॥ आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ॥ ७ ॥ कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ॥ मुखतो निःसृतान्वेदान्हयग्रीवोंऽतिकेऽहरत् ॥ ८ ॥ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितम् ॥ दधार शफरीरूपं भगवान्हरिरीश्वरः ॥ ९ ॥ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ॥ नारायणपरोऽतप्यत्तपः स सलिलाशनः ॥ १० ॥ योऽसावस्मिन्महाकल्पे तनयः स विवस्वतः ॥ श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ॥ ११ ॥ एकदा कृतमालायां कुर्वतो जलतर्पणम् ॥ तस्यांजल्युदके काचिच्छफर्येकाऽभ्यपद्यत ॥ १२ ॥ सत्यव्रतोंऽजलिगतां सह तोयेन भारत ॥ उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः॥१३॥

---

१ यथा पार्थिवपरमाणुगणनमशक्यं तथा ष्विणोर्गुणगणनमप्यशक्यमित्यर्थः ।

तदा सा तं नृपं जगाद । हे दीनवत्सल, ज्ञातिघातिभ्यो यादोभ्यो भीतां मां कथं विसृजसे ॥ १४ ॥ राजा तद्दीनं वाक्यं श्रुत्वा आत्मनोऽनुग्रहार्थं प्राप्तं मत्स्यवपुर्धरं हरिमजानन् तां शफरीं कलशजले निधायाश्रमं निन्ये ॥ १५ ॥ १६ ॥ सैकरात्रेण कमंडलौ वर्धमाना नृपमाह ॥ १७ ॥ हे नृप, अहं कमंडलौ दुःखेन वस्तुं नोत्सहे । अतो मे विपुलं स्थानं कल्पय । यत्र सुखं निवसे ॥ १८ ॥ ततो राजा तं मत्स्यं मणिकस्थे जले न्यधात् । तत्रापि सा मुहूर्तेन हस्तत्रयमवर्धत ॥ १९ ॥ आह च । हे राजन्, मे एतदुदकं वस्तुं सुखकारकं नहि । अतो विपुलं स्थानं देहि । यतोऽहं त्वां शरणं गताऽस्मि ॥ २० ॥ ततस्तां गृहीत्वा सरोवरे प्राक्षिपत् । तदपि सरो व्याप्य महामत्स्योऽवर्धत ॥ २१ ॥ हे राजन्, इदं सरो मे स्वस्तये न । अतो मामशुष्के ह्रदे निधेहि

तमाह साऽतिकरुणं महाकारुणिकं नृपम् ॥ यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥ कथं विसृजसे राजन्भीतामस्मिन्सरिज्जले ॥ १४ ॥
तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम् ॥ अजानन्रक्षणार्थाय शफर्याः स मनो दधे ॥ १५ ॥ तस्या
दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम् ॥ १६ ॥ सा तु तत्रैकरात्रेण वर्धमाना
कमंडलौ ॥ अलब्ध्वात्मावकाशं वा इदमाह महीपतिम् ॥ १७ ॥ नाहं कमंडलावस्मिन्कृच्छ्रं वस्तुमिहोत्सहे ॥ कल्पयौकः
सुविपुलं यत्राहं निवसे सुखम् ॥ १८ ॥ स एनां तत आदाय न्यधादौदंचनोदके ॥ तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत ॥१९॥
न म एतदलं राजन्सुखं वस्तुमुदंचनम् ॥ पृथु देहि पदं मह्यं यत्त्वाऽहं शरणं गता ॥ २० ॥ तत आदाय सा राज्ञा क्षिप्ता
राजन्सरोवरे ॥ तदावृत्यात्मना तोयं महामीनोऽन्ववर्धत ॥ २१ ॥ नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ॥ निधेहि रक्षायोगेन
ह्रदे मामविदासिनि ॥ २२ ॥ इत्युक्तः सोऽनयन्मत्स्यं तत्र तत्राविदासिनि ॥ जलाशये संमितं तं समुद्रे प्राक्षिपज्झषम्
॥ २३ ॥ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ॥ अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥ २४ ॥ एवं विमोहितस्तेन वदता
वल्गु भारतीम् ॥ तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् ॥२५॥ नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि च ॥ यो भवान्योजनशतमह्नाऽभिव्यानशे
सरः ॥ २६ ॥ नूनं त्वं भगवान्साक्षाद्धरिर्नारायणोऽव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसाम्
॥ २७ ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २८ ॥ सर्वे लीलावतारास्ते
भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ २९ ॥ ॥ ॥

॥ २२ ॥ एवमुक्तः स यत्र यत्र जलाशये स्थापितवान् तत्र तत्र वर्धमानं तं मत्स्यं दृष्ट्वा समुद्रे प्राक्षिपत् ॥२३॥ क्षिप्यमाणो मत्स्य इदमाह । हे वीर, अत्र मां महाबला मकरादयः खादंति । इह त्यक्तुं नार्हसि ॥२४॥ एवं मोहितो राजा मत्स्यं प्राह । मत्स्यरूपेण मां मोहयन् त्वं कोऽसि ॥२५॥ एवंवीर्यो जलचरः पूर्वं मया न दृष्टो न च श्रुतः । यस्त्वं दिनेन योजनशतं सरो व्याप्तवान् ॥ २६ ॥ त्वं नूनं साक्षाद्भगवान् भूतानामनुग्रहाय जलचररूपं धृतवानसि ॥ २७ ॥ हे पुरुषश्रेष्ठ, त्वं भक्तानां गतिरात्मा चासि । अतस्तुभ्यं नमः ॥ २८ ॥ तेऽवतारा भूतानां सुखकराः । त्वया यदर्थमिदं रूपं धृतं तज्ज्ञातुमिच्छामि॥ २९ ॥

हे कमलनेत्र, देहाद्यभिमानिनामितरेषां शरणगमनं यथा मृषा भवेत्तथा तव चरणयोः शरणगमनं मृषा न भवेत् ॥ ३० ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणं सत्यव्रतं मत्स्यवपुर्हरिराह ॥ ३१ ॥ श्रीभगवानुवाच ॥ हे नृप, इत ऊर्ध्वं सप्तमेऽहनि समुद्रे त्रैलोक्यं निमज्जति ॥ ३२ ॥ तस्मिन् प्रलयोदके त्रिलोक्यां लीयमानायां सत्यां मत्प्रेरिता काचिन्नौस्त्वां प्राप्स्यति ॥ ३३ ॥ त्वं चौषधीः सर्वाणि बीजानि च गृहीत्वा सप्तर्षिभिः सह ॥३४॥ तां नावमारुह्य ऋषीणामेव तेजसैकार्णवे चरिष्यसि ॥ ३५ ॥ तत्र वायुवेगेन कंपायमानां तां नावं तत्र प्राप्तस्य मे शृंगे वासुकिना बध्नीहि ॥ ३६ ॥ अहं सप्तर्षिभिः साकं सनावं त्वां विकर्षन् यावद्ब्राह्मी निशा तावद्विचरिष्यामि ॥ ३७ ॥ तदा त्वया कृतानां प्रश्नानामुत्तरत्वेन मयोक्तं मन्महिमानं त्वं वेत्स्यसि ॥ ३८ ॥ इत्थं राजा-

न तेऽरविंदाक्ष पदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ ३० ॥ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रियम् ॥ ३१ ॥ ॥ श्रीभगवानुवाच ॥ सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकम् ॥ ३२ ॥ त्रिलोक्यां लीयमानायां संवर्तांभसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ ३३ ॥ त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ॥ सप्तर्षिभिः परिवृतः सर्वसत्वोपबृंहितः ॥ ३४ ॥ आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः ॥ एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३५ ॥ दोधूयमानां तां नावं समीरेण बलीयसा ॥ उपस्थितस्य मे शृंगे निबध्नीहि महाहिना ॥ ३६ ॥ अहं त्वामृषिभिः साकं सहनावमुदन्वति ॥ विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ॥ ३७ ॥ मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ ३८ ॥ इत्थमादिश्य राजानं हरिरंतरधीयत ॥ सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ॥ ३९ ॥ आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः ॥ निषसाद हरेः पादौ चिंतयन्मत्स्यरूपिणः ॥ ४० ॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीम् ॥ वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ४१ ॥ ध्यायन्भगवदादेशं ददृशे नावमागताम् ॥ तामारुरोह विप्रेंद्रैरादायौषधिवीरुधः ॥ ४२ ॥ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवम् ॥ स वै नः संकटादस्मादविता शं विधास्यति ॥ ४३ ॥ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ॥ एकशृंगधरो मत्स्यो हैमो नियुतयोजनः ॥ ४४ ॥ ॥ ॥ ॥ ॥

नमादिश्य हरिरंतर्दधे । स च राजा हरिणोक्तं तं कालमन्ववैक्षत ॥ ३९ ॥ अथ राजा प्रागग्रान् दर्भानास्तीर्योदङ्मुखो हरेः पादौ चिंतयन् निषसाद ॥ ४० ॥ ततो वर्षद्भिर्मेघैर्वर्धमानः समुद्रो महीं सर्वतः प्लावयन् सन् ददृशे ॥४१॥ तदा सत्यव्रतो भगवदाज्ञां ध्यायन् ताव दागतां नावं दृष्ट्वौषधिवीरुध आदाय ऋषिभिः सह तामारुरोह ॥ ४२ ॥ ततः प्रीता मुनयस्तमूचुः । हे राजन्, केशवं ध्यायस्व । स संकटान्नः कल्याणं करिष्यति ॥ ४३ ॥ ततो राज्ञा ध्यातो हरिः प्रलयार्णव एकशृंगधरो हैमो लक्षयोजनविस्तारो मत्स्यः प्रादुर्बभूव ॥ ४४ ॥ ॥ ॥

ततो राजा तस्य श्रृंगे वासुकिना नावं निबध्य हरिं तुष्टाव ॥ ४५ ॥ सत्यव्रत उवाच ॥ अनाद्यविद्यया आच्छादितज्ञानाः संसारपरिश्रमैः पीडिता जना यदृच्छया लब्धेन यदनुग्रहेण यं प्राप्नुवंति स भवानस्माकं गुरुरस्ति ॥ ४६ ॥ स्वकर्मबद्धो जनः सुखेच्छया कर्म कुरुते तथाप्यसुखं प्राप्नोति । यस्य तव सेवया तां दुष्टबुद्धिं नाशयति स गुरुर्नो हृदयग्रंथिं भिंद्यात् ॥ ४७ ॥ यस्य सेवया पुमान् मनोमलं त्यक्त्वा स्वरूपं भजते स एवेशो नो गुरुर्भूयात् ॥ ४८ ॥ अन्ये देवादयो यत्प्रसादलेशमपि कर्तुं न समर्थाः तं त्वां शरणं प्रपद्ये ॥ ४९ ॥ यथांधस्यांधोऽग्रणीस्तथाऽज्ञानिजनस्याविद्वान् गुरुः । त्वं तु सर्वेंद्रियाणां प्रकाशकः । अतः स्वगतिं बोद्धुमिच्छद्भिरस्माभिर्गुरुः कृतोऽसि ॥५० ॥ किंच ॥ अयं जनो जनस्यासतीं मतिमुपदिशति । यया संसारं

निबध्य नावं तच्छृंगे यथोक्तो हरिणा पुरा ॥ वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम् ॥४५॥ राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥४६॥ जनोऽबुधोऽयं निजकर्मबंधनः सुखेच्छया कर्म समीहतेऽसुखम् ॥ यत्सेवया तां विधुनोत्यसन्मतिं ग्रंथिं स भिन्द्याद्धृदयं स नो गुरुः ॥ ४७ ॥ यत्सेवयाग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः ॥ भजेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ॥४८॥ न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ॥ कर्तुं समेताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥ अचक्षुरंधस्य यथाऽग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः ॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥५०॥ जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः ॥ त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदम् ॥५१॥ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ॥ तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः ॥५२॥ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ॥ छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृणु स्वमोकः ॥५३॥ ॥ श्रीशुक उवाच ॥ इत्युक्तवंतं नृपतिं भगवानादिपूरुषः ॥ मत्स्यरूपी महांभोधौ विहरंस्तत्त्वमब्रवीत् ॥ ५४ ॥ पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम् ॥ सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥५५॥ अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम् ॥ नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम् ॥ ५६ ॥ अतीतप्रलयापाय उत्थिताय स वेधसे ॥ हत्वाऽसुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥ ५७ ॥ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः ॥ ५८ ॥ ॥

प्राप्नोति । त्वं तु सफलं ज्ञानमुपदिशसि । येन निजं पदं प्राप्नोति ॥५१॥ हे ईश्वर, त्वं सर्वलोकस्य गुरुः । तथापि जनोंऽधधीः सन् हृदि स्थितं त्वां न जानाति ॥ ५२ ॥ एवंभूतं त्वां शरणं प्रपद्ये । हे भगवन्, परमार्थप्रकाशकैर्वचोभिर्नो हृदयग्रंथिं छिंधि । स्वं रूपं च प्रकाशय ॥ ५३ ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणं सत्यव्रतं नृपं मत्स्यरूपी हरिः प्रलयोदके विहरन् ॥ ५४ ॥ आत्मतत्त्वरूपं मत्स्यपुराणमब्रवीत् ॥ ५५ ॥ नौकायां स्थितः स राजा ऋषिभिः सह तदश्रौषीत् ॥ ५६ ॥ ततः प्रलयांते ब्रह्मण्युत्थिते सति हरिर्हयग्रीवं हत्वा वेदानानीय ब्रह्मणे ददौ ॥ ५७॥ स तु सत्यव्रतो राजाऽस्मिन् कल्पे हरेः

प्रसादाद्वैवस्वतो मनुर्जातः ॥ ५८ ॥ यो मत्स्यरूपिणो हरेः सत्यव्रतस्य च संवादं श्रृणुते स पातकान्मुच्यते ॥ ५९ ॥ इमं हरेरवतारं दिने दिने यः कीर्तयेत् तस्य संकल्पाः सिद्धयंति । स परमां गतिं च याति ॥ ६० ॥ किंच हे राजन्, यः प्रलयोदके दैत्यं हत्वा दैत्येन ब्रह्मणो मुखेभ्यो नीतं श्रुतिगणं

सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥ ५९ ॥ अवतारो हरेर्योऽयं कीर्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिध्यंति स याति परमां गतिम् ॥ ६० ॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥ ६१ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां पारमहंस्यां वैयासिक्यामष्टमस्कंधे मत्स्यावतारचरितानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ नमो भगवते वामनरूपाय वासुदेवाय ॥ ॥ ॥

प्रत्यानीतवान् । यश्च सत्यव्रतस्य ऋषीणां च तत्वमकथयत् । तं मायामत्स्यरूपं हरिमहं नतोऽस्मि ॥ ६१ ॥ इति श्रीमद्भागवतचूर्णिकायामष्टमस्कंधे मत्स्यावतारचरितानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥

इति सचूर्णिकश्रीमद्भागवते अष्टमस्कंधः समाप्तः

अथ सचूर्णिकश्रीमद्भागवते नवमस्कंधारंभः

॥ श्रीगणेशाय नमः ॥ त्रिगुणाष्टभिरध्यायैर्वैवस्वतसुतान्वयः । नवमे कृष्णसत्कीर्तिप्रसंगाय वितन्यते ॥१॥ तत्र तु प्रथमेऽध्याये वैवस्वतसुतान्वये । सोमवंशप्रवेशोक्त्यै सुद्युम्नस्त्रीत्वमुच्यते ॥२॥ राजोवाच ॥ हे शुक, सर्वाणि मन्वंतराणि त्वयोक्तानि मया च श्रुतानि । तेषु हरेः कृतानि चरित्राणि च श्रुतानि ॥१॥ योऽसौ सत्यव्रतो नाम राजर्षिः स गतकल्पांते पुरुषसेवया ज्ञानं लब्धवान्॥२॥ स एवाद्य विवस्वतः पुत्रत्वाद्वैवस्ततो मनुः । तस्येक्ष्वाकुमुख्या दश पुत्रा इति श्रुतम्॥३॥ इदानीं तेषां वंशं वंशोद्भवानां राज्ञां चरित्राणि च श्रोतुमिच्छतां नो वद॥४॥ किंच । ये भूता ये भविष्या ये वर्तमानाश्च तेषां पुण्यकीर्तीनां राज्ञां पराक्रमान् वद ॥५॥ सूत उवाच ॥ हे शौनक, ब्रह्मवादिनां सदसि परीक्षिता पृष्टः शुक उवाच ॥ ६ ॥ श्रीशुक उवाच । हे राजन्, मानवो वंशः संक्षेपेण

ॐ नमो भगवते वासुदेवाय ॥ ॥ राजोवाच ॥ मन्वंतराणि सर्वाणि त्वयोक्तानि श्रुतानि मे ॥ वीर्याण्यनंतवीर्यस्य हरेस्तत्र
कृतानि च ॥ १ ॥ योऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ॥ ज्ञानं योऽतीतकल्पांते लेभे पुरुषसेवया ॥ २ ॥ स वै विवस्वतः
पुत्रो मनुरासीदिति श्रुतम् ॥ त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥ ३ ॥ तेषां वंशं पृथग्ब्रह्मन्वंश्यानुचरितानि च ॥
कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥ ४ ॥ ये भूता ये भविष्याश्च भवंत्यद्यतनाश्च ये ॥ तेषां नः पुण्यकीर्तीनां सर्वेषां
वद विक्रमान् ॥ ५ ॥ ॥ सूत उवाच ॥ एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् ॥ पृष्टः प्रोवाच भगवान् शुकः परमधर्मवित् ॥६॥ श्रीशुक उवाच ॥ श्रूयतां मानवो वंशः प्राचुर्येण परंतप ॥ न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥ ७ ॥ परावरेषां
भूतानामात्मा यः पुरुषः परः ॥ स एवासीदिदं विश्वं कल्पांतेऽन्यन्न किंचन ॥८॥ तस्य नाभेः समभवत्पद्मकोशो हिरण्मयः ॥
तस्मिन् जज्ञे महाराज स्वयंभूश्चतुराननः ॥९॥ मरिचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः ॥ दाक्षायण्यां ततोऽदित्यां विवस्वानभवत्सुतः ॥१०॥ ततो मनुः श्राद्धदेवः संज्ञायामास भारत ॥ श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ॥ ११ ॥ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ॥ नरिष्यंतं पृषध्रं च नभगं च कविं विभुः ॥ १२ ॥ अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान्किल ॥
मित्रावरुणयोरिष्टिं प्रजार्थमकरोत्प्रभुः ॥१३॥ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत ॥ दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता
॥१४॥ प्रेषितोऽध्वर्युणा होता ध्यायंस्तत्सुसमाहितः ॥ हविषि व्यचरत्तेन वषट्कारं गृणन्द्विजः ॥ १५ ॥ ॥

श्रूयताम् । विस्तरतो वक्तुं वर्षशतैरपि न शक्यते ॥७॥ हे राजन्, कल्पांते भूतानामात्मा नारायण एक एवासीत् ॥८॥ तस्य नाभेः स्वर्णमयं कमलं जातम् । तस्मिन् चतुर्मुखो ब्रह्मा जज्ञे ॥९॥ तस्य मनसः सकाशान्मरीचिः पुत्रो जातः । तस्य कश्यपः । तस्माद्विवस्वान् ॥१०॥ तस्मात्संज्ञायां श्राद्धदेवो मनुः । तस्माच्छ्रद्धायां दश पुत्राः ॥ ११ ॥ तेच इक्ष्वाकुः, नृगः, शर्यातिः, दिष्टः, धृष्टः, करूषकः, नरिष्यंतः, पृषध्रः, नभगः, कविश्चेति ॥ १२ ॥ एषां पुत्राणामुत्पत्तेः प्रागप्रजस्य मनोः प्रजार्थं वसिष्ठो मित्रावरुणदेवयोरिष्टिं चकार ॥ १३ ॥ तदा श्रद्धा नाम मनोः पत्नी होतारंप्रति मम कन्या भवत्विति ययाचे ॥ १४ ॥ ततोऽध्वर्युणा प्रेषितो होता तया प्रार्थितं ध्यायन्नयजत् ॥ १५ ॥ ॥ ॥ ॥

तदा होतुर्मंत्रव्यभिचारेणेला नाम कन्या जाता । मनुस्तां कन्यां दृष्ट्वा गुरुं जगाद ॥ १६ ॥ हे वसिष्ठ, इदं विपरीतं[1] किं जातम् । एवं मंत्राणामन्यथात्वं मा स्यात् । अहो कष्टम् ॥१७॥ यूयं मंत्रवेत्तारः[2] स्थ । एवं सति संकल्पितफलस्य विपरीतत्वं कुतः ॥१८॥ ततो वसिष्ठस्तद्वचो निशम्य होतुर्विपरीतं संकल्पं ज्ञात्वोवाच ॥१९॥ हे मनो, ते होतुर्व्यभिचारत[3] इदं संकल्पविपरीतं फलं जातम् । तथापि तव सुपुत्रत्वमहं स्वतेजसा साधयिष्ये ॥ २० ॥ इत्युक्त्वा वसिष्ठ इलायाः पुंस्त्वकामनया श्रीविष्णुं तुष्टाव ॥२१॥ तदा प्रसन्नो हरिरिलां कन्यामेव सुद्युम्नं पुत्रं चकार ॥ २२ ॥ स सुद्युम्न एकदाऽश्वमारुह्य प्रधानादिभिः सह मृगयां कर्तुं वनं गतः सन् ॥२३॥ धनुष्यं बाणांश्च गृहीत्वोत्तरस्यां दिशि ॥२४॥ मेरोरधस्तात्स्थितं वनं प्रविवेश । यत्रोमया सह शिवो रममाण आस्ते ॥२५॥

होतुस्तद्व्यभिचारेण कन्येला नाम साऽभवत् ॥ तां विलोक्य मनुः प्राह नातिहृष्टमना गुरुम् ॥१६॥ भगवन्किमिदं जातं कर्म वो ब्रह्मवादिनाम् ॥ विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया ॥१७॥ यूयं मंत्रविदो युक्तास्तपसा दग्धकिल्बिषाः ॥ कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥१८॥ तन्निशम्य वचस्तस्य भगवान्प्रपितामहः ॥ होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनम् ॥१९॥ एतत्संकल्पवैषम्यं होतुस्ते व्यभिचारतः ॥ तथापि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा ॥२०॥ एवं व्यवसितो राजन्भगवान्स महायशाः ॥ अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥२१॥ तस्मै कामवरं तुष्टो भगवान्हरिरीश्वरः ॥ ददाविलाऽभवत्तेन सुद्युम्नः पुरुषर्षभः ॥२२॥ स एकदा महाराज विचरन्मृगयां वने ॥ वृतः कतिपयामात्यैरश्वमारुह्य सैंधवम् ॥ २३ ॥ प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ॥ दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥ २४ ॥ स कुमारो वनं मेरोरधस्तात्प्रविवेश ह ॥ यत्रास्ते भगवान् शर्वो रममाणः सहोमया ॥ २५ ॥ तस्मिन्प्रविष्ट एवासौ सुद्युम्नः परवीरहा ॥ अपश्यत्स्त्रियमात्मानमश्वं च वडवां नृप ॥ २६ ॥ तथा तदनुगाः सर्वे आत्मलिंगविपर्ययम् ॥ दृष्ट्वा विमनसोऽभूवन्वीक्षमाणाः परस्परम् ॥ २७ ॥ ॥ राजोवाच ॥ कथमेवंगुणो देशः केन वा भगवन्कृतः ॥ प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥ २८ ॥ ॥ श्रीशुक उवाच ॥ एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ॥ दिशो वितिमिराभासाः कुर्वंतः समुपागमन् ॥ २९ ॥ तान्विलोक्यांबिका देवी विवासा व्रीडिता भृशम् ॥ भर्तुरंकात्समुत्थाय नीवीमाश्वथ पर्यधात् ॥ ३० ॥ ऋषयोऽपि तयोर्वीक्ष्य प्रसंगं रममाणयोः ॥ निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम् ॥ ३१ ॥ तदिदं भगवानाह प्रियायाः प्रियकाम्यया ॥ स्थानं यः प्रविशेदेतत्स वै योषिद्भवेदिति ॥३२॥ ॥

सुद्युम्नस्तस्मिन् प्रविष्टमात्मानं स्त्रियमश्वं च वडवां ददर्श ॥२६॥ तथा तत्प्रधानादयः सर्वे स्वदेहानां स्त्रीत्वं दृष्ट्वा परस्परं वीक्षमाणाः संतः खिन्ना बभूवुः॥२७॥ राजोवाच ॥ एवंगुणो देशः कथं जातः । केन वा कृतः । एतत्कौतुकं नो वद ॥ २८ ॥ श्रीशुक उवाच । एकदा ऋषयो गिरिशं द्रष्टुं तत्र जग्मुः ॥ २९ ॥ तान् दृष्ट्वा विवस्त्रा पार्वती लज्जिता सती पतेरुत्संगादुत्थाय वस्त्रं धृतवती ॥ ३० ॥ ऋषयोऽपि क्रीडतोस्तयोः प्रसंगं दृष्ट्वा तस्मात्स्थानान्निवृत्ताः संतो नरनारायणाश्रमं जग्मुः ॥ ३१ ॥ तदा शिवः प्रियायाः प्रियकाम्ययाऽऽह । एतत्स्थानंप्रति यः प्रविशेत् स स्त्री भवेत् ॥ ३२ ॥ ॥

---

१ पुत्रार्थं यजने कृते सति कन्या कथं जाता । २ मंत्राणामर्थस्य प्रयोगस्य च ज्ञातारः । ३ विपरीतसंकल्पेन । ४ प्रवेशमात्रेण स्त्रीत्वसंपादकः ।

तद्दिनमारभ्य पुरुषास्तद्वनं वर्जयंति। एवं प्रासंगिकमुक्त्वा प्रस्तुतमनुवर्णयति। सुद्युम्नस्य जाता सा स्त्री अनुचरीभिः सह वनाद्वनं चचार ॥३३॥ ततो बुधः स्वाश्रमसमीपे चरंतीं तां सुंदरीं स्त्रियं वीक्ष्य कामितवान् ॥३४॥ सापि चंद्रपुत्रं सुंदरं तं बुधं पतिं चकमे। ततस्तस्यां बुधः पुरूरवसं पुत्रं जनयामास ॥३५॥ एवं स्त्रीत्वं प्राप्तः सुद्युम्नः पुत्रेण सह बुधदर्शितं स्वगृहमागत्य पुनः स्वस्य पुरुषत्वप्राप्तये स्वकुलाचार्यं वसिष्ठं सस्मार॥३६॥ ततो वसिष्ठस्तस्य पुंस्त्वमिच्छन् शंकरमाराधयामास॥३७॥ स शिवो वसिष्ठाय तुष्टः सन् स्वां वाचं सत्यां कुर्वन् तत्प्रियं च कुर्वन् जगाद ॥३८॥ हे वसिष्ठ, अयं मासं पुमान् मासं स्त्री च भविता। इत्थं व्यवस्थयाऽयं सुद्युम्नः पृथ्वीं पालयतु ॥३९॥ एवं गुरोः प्रसादात्पुंस्त्वं लब्ध्वा सुद्युम्नो भूमिं पालयामास। तं प्रजा नाभ्यनंदन्[1] ॥ ४० ॥ तस्योत्कलो गयो विमलश्चैते त्रयः पुत्रा दक्षिणमार्गरक्षका बभूवुः॥४१॥ ततो भूमंडलाधिपतिः सुद्युम्नः पुरूरवसे पुत्राय राज्यं दत्वा वनं जगाम ॥४२॥ इति श्रीम० चू० नम० प्रथमोऽध्यायः ॥१॥ द्वितीये मनुपुत्राणां द्वावपुत्रौ विरागतः। करूषकादिपंचानां वंशानाह लघुक्रमात् ॥१॥ श्रीशुक उवाच ॥ एवं सुद्युम्ने गते सति श्राद्धदेवो मनुः पुत्रार्थं यमुनायां शतं वर्षाणि तपस्तेपे ॥१॥ ततो मनुरपत्यार्थं हरिमिष्ट्वा पूर्वोक्तान् दश पुत्रान् लेभे ॥२॥ तत्राष्टमः ८–पृषध्रस्तु वसिष्ठेन गुरुणाऽप्रबुद्धत्वाद्गोपालः कृतः। स रात्रावपि वीरासनव्रतः[2] सन् गाः पालयामास॥३॥एकदा निशि मेघे वर्षति सति गोशालायां व्याघ्रः प्राविशत्। तदा भीता गावो व्रजे बभ्रमुः॥४॥तदा व्याघ्र एकां जग्राह। सा भया-

तत ऊर्ध्वं वनं तद्वै पुरुषा वर्जयंति हि ॥ सा चानुचरसंयुक्ता विचचार वनाद्वनम् ॥ ३३ ॥ अथ तामाश्रमाभ्याशे चरंतीं प्रमदोत्तमाम् ॥ स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान्बुधः ॥ ३४ ॥ सापि तं चकमे सुभ्रूः सोमराजसुतं पतिम् ॥ स तस्यां जनयामास पुरूरवसमात्मजम् ॥ ३५ ॥ एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ॥ सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम ॥ ३६ ॥ स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ॥ सुद्युम्नस्याशयन्पुंस्त्वमुपाधावत शंकरम् ॥ ३७ ॥ तुष्टस्तस्मै स भगवानृषये प्रियमावहन् ॥ स्वां च वाचमृतां कुर्वन्निदमाह विशांपते ॥ ३८ ॥ मासं पुमान्स भविता मासं स्त्री तव गोत्रजः ॥ इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीम् ॥ ३९ ॥ आचार्यानुग्रहात्कामं लब्ध्वा पुंस्त्वं व्यवस्थया ॥ पालयामास जगतीं नाभ्यनदन्स्म तं प्रजाः ॥४०॥ तस्योत्कलो गयो राजन्विमलश्च सुतास्त्रयः ॥ दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ॥ ४१ ॥ ततः परिणते काले प्रतिष्ठानपतिः प्रभुः ॥ पुरूरवस उत्सृज्य गां पुत्राय गतो वनम् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे इलोपाख्याने प्रथमोऽध्यायः ॥१॥ ॥ श्रीशुक उवाच ॥ एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते ॥ पुत्रकामस्तपस्तेपे यमुनायां शतं समाः ॥१॥ ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम् ॥ इक्ष्वाकुपूर्वजान्पुत्रान्लेभे स्वसदृशान्दश ॥२॥ पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ॥ पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥ ३ ॥ एकदा प्राविशद्गोष्ठं शार्दूलो निशि वर्षति ॥ शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥ ४ ॥ एकां जग्राह बलवान्सा चुक्रोश भयातुरा ॥ तस्यास्तत्क्रंदितं श्रुत्वा पृषध्रोऽभिससार ह ॥५॥ ॥

---

[1] स्त्रीत्वे लज्जया मासं मासं निलीयावस्थानात्। [2] खड्गपाणेः सततस्तिष्ठतो जागरणं वीरासनं तदेव व्रतं यस्य सः।

तुरा चुक्रोश । तदा पृषध्रस्तद्रुदितं श्रुत्वा ॥ ५ ॥ खड्गं गृहीत्वा व्याघ्रशंकया कपिलाया गोः शिरोऽहनत् ॥ ६ ॥ व्याघ्रोऽपि छिन्नकर्णो भीतः सन् मार्गे रक्तं त्यजन् सन् निश्चक्राम ॥७॥ पृषध्रो व्याघ्रं हतं मन्यमानः प्रातःकाले स्वहतां गां दृष्ट्वा दुःखितो जातः ॥८॥ तदा वसिष्ठस्तं गुरुः पृषध्रं शशाप । हे पृषध्र, अनेन कर्मणा त्वं शूद्रो भव ॥९॥ एवं गुरुणा शप्तः स शापं प्रगृह्य ब्रह्मचर्यं मुनिप्रियं व्रतं दधार ॥ १० ॥ स भक्त्या वासुदेवे भगवति मनः समाधाय सर्वभूतसमः ॥११॥ मुक्तसंगः शांतात्मा यदृच्छयोपपन्नेनात्मनो वृत्तिं कल्पयन् ॥१२॥ ज्ञानतृप्तो जडांधबधिराकृतिः सन् महीं विचचार ॥ १३ ॥ एवंवृत्त एकदा वने भ्रमन् दावाग्निना दग्धदेहो ब्रह्म प्राप ॥१४॥ दशमः १०—कविर्विषयेषु निःस्पृहः सन् राज्यं बंधूंश्च हित्वा वनं गत्वा परं पुरुषं प्राप्तः ॥ १५ ॥ षष्ठात्

खड्गमादाय तरसा प्रलीनोडुगणे निशि ॥ अजानन्नहनद्बभ्रोः शिरः शार्दूलशंकया ॥६॥ व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राह-
तस्ततः ॥ निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥ ७ ॥ मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा ॥ अद्राक्षीत्स्वहतां बभ्रुं
व्युष्टायां निशि दुःखितः ॥८॥ तं शशाप कुलाचार्यः कृतागसमकामतः ॥ न क्षत्रबंधुः शूद्रस्त्वं कर्मणा भविताऽमुना ॥ ९ ॥
एवं शप्तस्तु गुरुणा प्रत्यगृह्णात्कृतांजलिः ॥ अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥१०॥ वासुदेवे भगवति सर्वात्मनि परेऽमले ॥
एकांतित्वं गतो भक्त्या सर्वभूतसुहृत्समः ॥११॥ विमुक्तसंगः शांतात्मा संयताक्षोऽपरिग्रहः ॥ यदृच्छयोपपन्नेन कल्पयन्वृत्तिमा-
त्मनः ॥१२॥ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः ॥ विचचार महीमेतां जडांधबधिराकृतिः ॥ १३ ॥ एवंवृत्तो वनं गत्वा
दृष्ट्वा दावाग्निमुत्थितम् ॥ तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥ १४ ॥ कविः कनीयान्विषयेषु निःस्पृहो विसृज्य राज्यं सह
बंधुभिर्वनम् ॥ निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥ १५॥ करूषान्मानवादासन्कारूषाः क्षत्रजातयः ॥
उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥ १६ ॥ धृष्टाद्धार्ष्टमभूत्क्षत्रं ब्रह्मभूयंगतं क्षितौ ॥ नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो
वसुः ॥ १७ ॥ वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता ॥ कन्या चोघवती नाम सुदर्शन उवाह ताम् ॥ १८ ॥ चित्रसेनो
नरिष्यंताद्दक्षस्तस्य सुतोऽभवत् ॥ तस्य मीढ्वांस्ततः कूर्च इंद्रसेनस्तु तत्सुतः ॥१९॥ वीतिहोत्रस्त्विंद्रसेनात्तस्य सत्यश्रवा अभूत् ॥
उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥ २० ॥ ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः ॥ कानीन इति विख्यातो जातूकर्ण्यो
महानृषिः ॥ २१ ॥ ततो ब्रह्मकुलं जातमग्निवेश्यायनं नृप ॥ नरिष्यंतान्वयः प्रोक्तो दिष्टवंशमतः शृणु ॥ २२ ॥ ॥

६—करूषात् कारूषाः क्षत्रिया जाताः । ते उत्तरदेशपालका ब्राह्मणभक्ता आसन् ॥१६॥ पंचमात् ५—धृष्टात् धार्ष्टनामकं क्षत्रियकुलं जातं । तद्बहुशो ब्राह्मणत्वं प्राप्तम् । द्वितीयस्य २—नृगस्य पुत्रः सुमतिः । ततो भूतज्योतिः तस्माद्वसुः ॥१७॥ तस्य प्रतीकः । तस्मादोघवान् पुत्र ओघवती कन्या च जाता । तां सुदर्शन उवाह । ओघवतः पुत्रोऽप्योघवान् ॥१८॥ सप्तमात् ७—नरिष्यंतात् चित्रसेनः । ततो दक्षः । तस्य मीढ्वान् । ततः कूर्चः । तत्पुत्र इंद्रसेनः ॥१९॥ इंद्रसेनात् वीतिहोत्रः । तस्य सत्यश्रवाः । तत उरुश्रवाः । तस्माद्देवदत्तः ॥२०॥ ततोऽग्निवेश्यो नाम पुत्रः । स एव कानीनो जातूकर्ण्य इति च नामभ्यां प्रसिद्धः ॥२१॥ तस्माद्ब्रह्मकुलं जातम् ।

चतुर्थो ४–दिष्टः तद्वंशं शृणु ॥ २२ ॥ दिष्टात् नाभागः । स च कर्मणा वैश्यतां प्राप्तः । तत्पुत्रो भलंदनः । तस्य वत्सप्रीतिः ॥ २३ ॥ तस्य प्रांशुः । ततः प्रमतिः । तस्य खनित्रः । तस्य चाक्षुषः । ततो विविंशतिः ॥२४॥ तस्य रंभः । ततः खनिनेत्रः । तस्य करंधमः ॥२५॥ तस्यावीक्षित् । तत्पुत्रो मरुत्तः । स चक्रवर्ती जातः । तं संवर्तो योगी अयाजयत् ॥२६॥ तस्य यज्ञ इवान्यस्य कस्यापि यज्ञो न जातः । तस्य यज्ञे सर्वं यज्ञपात्रादिकं सुवर्णमयमासीत् ॥ २७ ॥ तस्य यज्ञे सोमपानेनेंद्रो दक्षिणाभिर्ब्राह्मणा अन्ये च हर्षं प्रापुः । मरुतः परिवेष्टारो विश्वेदेवाः सभासदश्चासन् ॥ २८ ॥ मरुत्तस्य पुत्रो दमः । तस्य राज्यवर्धनः । तस्य सुधृतिः । तस्य नरः ॥२९॥ तत्पुत्रः केवलः । तस्य बंधुमान् । तस्य वेगवान् । तस्य बंधुः । तस्य तृणबिंदुः ॥ ३० ॥ तं तृणबिंदुमलंबुषाऽप्सरा भेजे । तस्यां तृणबिंदोः सकाशात् विशालः शून्यबंधुः धूम्रकेतुश्चेति त्रयः पुत्रा इडविडा कन्या च जाता ॥ ३१ ॥ सा विश्रवसमुपयेमे । विश्रवास्तस्यां कुबेरमुत्पादयामास ॥३२॥ तृणबिंदुपुत्रेण विशालेन वैशाली नगरी निर्मिता ॥३३॥ विशालाद्धेमचंद्रः । तस्य धूम्राक्षः । तस्य संयमः । तस्य कृशाश्वदेवजौ द्वौ पुत्रौ जातौ ॥३४॥ कृशाश्वात् सोमदत्तः । सोऽश्वमेधैर्भगवंतमिष्ट्वा श्रेष्ठां गतिं प्राप ॥३५॥ सोमदत्तात् सुमतिः । तस्य जनमेजयः । एते तृणबिंदुयशोधरा विशालस्य वंशे जाताः ॥३६॥ इति श्रीमद्भागवतचू० नवमस्कंधे द्वितीयोऽध्यायः ॥२॥ ॥ तृतीये मनुपुत्रस्य शर्यातेः कीर्त्यतेऽन्वयः ॥ यत्र सौकन्यमाख्यानं रैवतं च महाद्भुतम् ॥ १ ॥ श्रीशुक उवाच ॥ तृतीयः ३–शर्यातिर्मनुपुत्रः स वेदार्थतत्त्वज्ञो बभूव । य अंगिरसां सत्रे द्वितीयेऽह्नि क्रियमाणं

नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः ॥ भलंदनः सुतस्तस्य वत्सप्रीतिर्भलंदनात् ॥ २३ ॥ वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं
प्रमतिं विदुः ॥ खनित्रः प्रमतेस्तस्माच्चाक्षुषोऽथ विविंशतिः ॥२४॥ विविंशतिसुतो रंभः खनिनेत्रोऽस्य धार्मिकः ॥ करंधमो म-
हाराज तस्यासीदात्मजो नृप ॥२५॥ तस्यावीक्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् ॥ संवर्तो याजयद्यं वै महायोग्यंगिरःसुतः ॥२६॥
मरुत्तस्य यथा यज्ञो न तथाऽन्यस्य कश्चन ॥ सर्वं हिरण्मयं त्वासीद्यत्किंचिच्चास्य शोभनम् ॥ २७ ॥ अमाद्यदिंद्रः सोमेन दक्षि-
णाभिर्द्विजातयः ॥ मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥ २८ ॥ मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्धनः ॥ सुधृतिस्तत्सुतो
जज्ञे सौधृतेयो नरः सुतः ॥ २९ ॥ तत्सुतः केवलस्तस्माद्बंधुमान्वेगवांस्ततः ॥ बंधुस्तस्याभवद्यस्य तृणबिंदुर्महीपतिः ॥ ३० ॥ तं
भेजेऽलंबुषा देवी भजनीयगुणालयम् ॥ वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् ॥ ३१ ॥ तस्यामुत्पादयामास विश्रवा धनदं
सुतम् ॥ प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ॥ ३२ ॥ विशालः शून्यबंधुश्च धूम्रकेतुश्च तत्सुताः ॥ विशालो वंशकृद्राजा
वैशालीं निर्ममे पुरीम् ॥ ३३ ॥ हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः ॥ तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ॥ ३४ ॥
कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधैरिडस्पतिम् ॥ इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ॥ ३५ ॥ सौमदत्तिस्तु सुमतिस्तत्सुतो
जनमेजयः ॥ एते वैशालभूपालास्तृणबिंदोर्यशोधराः ॥ ३६ ॥ इति श्रीमद्भाग० महापुराणे नवमस्कंधे द्वितीयोऽध्यायः ॥ २ ॥
॥ श्रीशुक उवाच ॥ शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभूव ह ॥ यो वा अंगिरसां सत्रे द्वितीयमह ऊचिवान् ॥१॥ ॥

कर्मोवाच ॥ १ ॥ तस्य सुकन्या नाम कन्या आसीत् । तया सह शर्यातिर्वनशोभानिरीक्षणार्थं वनं गतः सन् च्यवनस्याश्रमं गतः ॥ २ ॥ सा सुकन्या सखीभिः सह वने वृक्षान् विचिन्वती सती वल्मीकरंध्रे खद्योताविव द्वे ज्योतिषी दृष्ट्वा ॥ ३ ॥ दैवेन प्रेरिता सा कंटकेन ते ज्योतिषी अविध्यत् । तदा ताभ्यां रुधिरं सुस्राव ॥४॥ तदैव सैनिकानां शकृन्मूत्रनिरोधो जातः । तदा राजर्षिस्तं वीक्ष्य सैनिकान् जगाद ॥ ५ ॥ हे सैनिकाः, युष्माभिश्चवनस्यापराधः कृतः किम् ॥६॥ तदा सुकन्या पितरं प्राह ॥ अजानंत्या मया द्वे ज्योतिषी कंटकेन निर्भिन्ने ॥७॥ तद्वचः श्रुत्वा शर्यातिर्जातभयः सन् वल्मीकांतर्गतं मुनिं प्रसादयामास ॥८॥ ततो राजा मुनेरभि[1]प्रायं ज्ञात्वा कन्यां मुनये दत्वा दुःखान्मुक्तः संस्तमामंत्र्य नगरं ययौ ॥९॥ ततः सुकन्या परमकोपिष्ठं पतिं प्राप्य तदभिप्रायानुरूपां सेवां कृत्वा संतोषयामास ॥१०॥ कस्मिंश्चित्समयेऽश्विनीकुमारौ च्यवनस्याश्रमं प्राप्तौ । तौ पूजयित्वा च्यवनः प्रोवाच । हे देववैद्यौ, मम तारुण्यं स्त्रीणामीप्सितं रूपं च संपादयतम् । अहं सोमपानरहितयोरपि युवयोः सोमपूर्णपात्रं दास्यामि ॥ ११ ॥ १२॥ तदा तौ बाढमित्यूचतुः । हे ऋषे, अस्मिन् सिद्धनिर्मिते ह्रदे निमज्ज ॥१३॥ इत्युक्त्वा जरयाग्रस्तदेहो मुनिरश्वि[2]भ्यां ह्रदं प्रवेशितः ॥१४॥ तदा ह्रदात्सूर्यवर्चसस्तुल्यरूपास्त्रयः पुरुषा उत्तस्थुः ॥१५॥ तान् दृष्ट्वा पतिमजानती साध्वी तावश्विनौ [3]शरणं ययौ ॥१६॥ तस्याः पातिव्रत्येन तोषितौ तौ तस्यै पतिं दर्शयित्वा ऋषिमामंत्र्य स्वर्गं ययतुः ॥१७॥

सुकन्या नाम तस्यासीत्कन्या कमललोचना ॥ तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमम् ॥२॥ सा सखीभिः परिवृता विचिन्वत्यंघ्रिपान्वने ॥ वल्मीकरंध्रे ददृशे खद्योते इव ज्योतिषी ॥३॥ ते दैवचोदिता बाला ज्योतिषी कंटकेन वै ॥ अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहु ॥४॥ शकृन्मूत्रनिरोधोऽभूत्सैनिकानां च तत्क्षणात् ॥ राजर्षिस्तमुपालक्ष्य पुरुषान्विस्मितोऽब्रवीत् ॥५॥ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् ॥ व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ॥६॥ सुकन्या प्राह पितरं भीता किंचित्कृतं मया ॥ द्वे ज्योतिषी अजानंत्या निर्भिन्ने कंटकेन वै ॥७॥ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः ॥ मुनिं प्रसादयामास वल्मीकांतर्हितं शनैः ॥८॥ तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः ॥ कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं प्रायात्समाहितः ॥९॥ सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् ॥ प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्तिभिः ॥१०॥ कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ ॥ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥११॥ ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः ॥ क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम् ॥१२॥ बाढमित्यूचतुर्विप्रमभिनंद्य भिषक्तमौ ॥ निमज्जतां भवानस्मिन्ह्रदे सिद्धविनिर्मिते ॥१३॥ इत्युक्त्वा जरया ग्रस्तदेहो धमनिसंनतः ॥ ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः ॥ १४ ॥ पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः ॥ पद्मस्रजः कुंडलिनस्तुल्यरूपाः सुवाससः ॥ १५ ॥ तान्निरीक्ष्य वरारोहा सरूपान्सूर्यवर्चसः ॥ अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥१६॥ दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ॥ ऋषिमामंत्र्य ययतुर्विमानेन त्रिविष्टपम् ॥ १७ ॥ ॥

---

[1] मुग्धेयं मम कन्या क्षंतव्यं त्वयेत्युच्यमाने कति वर्षाण्यस्या विवाहः कृतो वा नवेत्यादिवाक्यैस्तदभिप्रायं ज्ञात्वा । [2] तावपि तमपि वृद्धं गृहीत्वा प्रविष्टावित्यर्थः । [3] युवां पृथक् स्थित्वा मत्पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः ॥

ततः कालेन यज्ञं कुर्वाणः शर्यातिश्च्यवनस्याश्रमं गतः । तत्र कन्यासमीपे दिव्यं पुरुषं दृष्ट्वा ॥१८॥ खिन्नचित्तो राजा सुकन्यां प्राह ॥ १९ ॥ हे सुकन्ये, त्वयेदं किं कृतम् । त्वं लोकनमस्कृतं वृद्धं पतिं हित्वा जारं भजसे ॥२०॥ हे सतां कुलप्रसूते, तव विपरीता मतिः कथं प्राप्ता । त्वं पितुर्भर्तुश्च कुलं नरकं नयसि॥२१॥एवं ब्रुवाणं पितरं स्मयमाना सा सुकन्या प्राह ॥ हे तात, एष भृगुनंदनस्तव जामाताऽस्ति॥२२॥इत्युक्त्वा पित्रे च्यवनस्य सर्वं वृत्तं शशंस। तच्छ्रुत्वा परमप्रीतः स राजा कन्यां परिषस्वजे ॥ २३ ॥ ततश्च्यवनः शर्यातिं सोमेन याजयन् सन्नसोमपोरप्यश्विनोः सोमपूर्णपात्रं जग्राह ॥ २४ ॥ तदा क्रुद्ध इंद्रः शर्यातिं हंतुं वज्रं गृहीतवान् । तदा च्यवनः सवज्रमिंद्रस्य हस्तं स्तंभयामास ॥ २५ ॥ ततः सर्वे तद्दिनमारभ्याश्विनोः सोमभागमन्वजानन् । यौ वैद्यत्वा-

यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः ॥ ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसम् ॥ १८ ॥ राजा दुहितरं प्राह कृतपादाभिवंदनाम् ॥ आशिषश्चाप्रयुंजानो नातिप्रीतमना इव ॥ १९ ॥ चिकीर्षितं ते किमिदं पतिस्त्वया प्रलंभितो लोकनमस्कृतो मुनिः ॥ यत्त्वं जराग्रस्तमसत्यसंमतं विहाय जारं भजसेऽमुमध्वगम् ॥ २० ॥ कथं मतिस्तेऽवगताऽन्यथा सतां कुलप्रसूते कुलदूषणं त्विदम् ॥ बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः ॥ २१ ॥ एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता ॥ उवाच तात जामाता तवैष भृगुनंदनः ॥ २२ ॥ शशंस पित्रे तत्सर्वं वयोरूपाभिलंभनम् ॥ विस्मितः परमप्रीतस्तनयां परिषस्वजे ॥ २३ ॥ सोमेन याजयन्वीरं ग्रहं सोमस्य चाग्रहीत् ॥ असोमपोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥ २४ ॥ हंतुं तमाददे वज्रं सद्योमन्युरमर्षितः ॥ सवज्रं स्तंभयामास भुजमिंद्रस्य भार्गवः ॥२५॥ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ॥ भिषजाविति यत्पूर्वं सोमाहुत्या बहिष्कृतौ ॥२६॥ उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः ॥ शर्यातेरभवन्पुत्रा आनर्ताद्रेवतोऽभवत् ॥ २७ ॥ सोंऽतःसमुद्रे नगरीं विनिर्माय कुशस्थलीम् ॥ आस्थितोऽभुंक्त विषयानानर्तादीनरिंदम ॥ २८ ॥ तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमम् ॥ ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः ॥ २९ ॥ कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतम् ॥ आवर्तमाने गांधर्वे स्थितोऽलब्धक्षणः क्षणम् ॥३०॥ तदंत आद्यमानम्य स्वाभिप्रायं न्यवेदयत् ॥ तच्छ्रुत्वा भगवान्ब्रह्मा प्रहस्य तमुवाचह ॥ ३१ ॥ अहो राजन्निरुद्धास्ते कालेन हृदि ये कृताः ॥ तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ॥३२॥ कालोऽभियातस्त्रिणवचतुर्युगविकल्पितः ॥ तद्गच्छ देवदेवांशो बलदेवो महाबलः ॥ ३३ ॥ ॥ ॥

त्पूर्वं सोमाहुत्या बहिष्कृतौ ॥२६॥ अथ शर्यातेः उत्तानबर्हिः आनर्तः भूरिषेणश्चेति त्रयः पुत्रा आसन् । तत्रानर्ताद्रेवतो जातः ॥ २७ ॥ स समुद्रे कुशस्थलीं नगरीं निर्माय तत्र स्थितः सन् आनर्तादीन् देशान् बुभुजे ॥२८॥ तस्य ककुद्मिज्येष्ठं पुत्रशतं जातम् । ककुद्मी स्वां रेवतीं कन्यामादाय ॥ २९ ॥ ब्रह्माणंप्रति वरं प्रष्टुं ब्रह्मलोकं गतः । तत्र गायने प्रवर्तमाने सति क्षणं स्थित्वा॥३०॥गायनांते स्वाभिप्रायं ब्रह्मणे न्यवेदयत् । तच्छ्रुत्वा ब्रह्मा प्रहस्य जगाद॥३१॥ अहो हे राजन्, ये त्वया हृदि निश्चिता राजपुत्रास्ते सर्वे कालेन नष्टाः। तेषां पुत्रपौत्रनप्तॄणां गोत्राणि चाधुना न संति॥३२॥ तवात्र गतेन क्षणमात्रेण भूलोके सप्तविं-

शति चतुर्युगात्मकः कालो गतः॥ इदानीं भूमौ नारायणांशो बलदेवो जातोऽस्ति ॥ ३३॥ स भुवो भारावताराय स्वांशेनावतीर्णः ।तस्मा इदं कन्यारत्नं देहि । इत्यादिष्टः ककुद्मी ब्रह्माणं नमस्कृत्य स्वपुरं प्राप्तः ॥३४॥३५॥ ततो बलरामाय कन्यां दत्वा स्वयं तपस्तप्तुं नरनारायणाश्रमं जगाम ॥३६॥ इति श्रीमद्भागवतचू० नवमस्कंधे तृतीयोऽध्यायः ॥३॥ ॥ चतुर्थे मनुपौत्रस्य नाभागस्य कथोच्यते ॥ तत्सूनोश्चांबरीषस्य कृत्या प्रतिहता यतः ॥१॥ श्रीशुक उवाच ॥ हे राजन्, नवमोऽ९– मनुपुत्रो नभगः तस्य पुत्रो नाभागः । स गुरुकुले चिरकालमवसत् । तदा तस्य सर्वे भ्रातर एनं नाभागं नैष्ठिकब्रह्मचारिणं मत्वा विभागसमये तस्मै भागमप्रकल्प्य सर्वं पितृधनं विभज्य जगृहुः । पश्चाद्गुरुकुलादागतो नाभागो भ्रातॄन्प्रति पप्रच्छ ॥ १ ॥ हे भ्रातरः, मम भागः क्वास्ति । ते ऊचुः । हे नाभाग, तदा तव भागोऽस्माभिर्विस्मृतः । इदानीमयमुर्वरितः पिता ते भागः । तं त्वं गृहाण । तदा स पितरं गत्वोवाच । हे पितः, त्वां मे भाग-

कन्यारत्नमिदं राजन्नररत्नाय देहि भो ॥ भुवो भारावताराय भगवान्भूतभावनः॥३४॥अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः ॥
इत्यादिष्टोऽभिवंद्याजं नृपः स्वपुरमागतः ॥ ३५ ॥ त्यक्तं पुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ॥ सुतां दत्वानवद्यांगीं बलाय
बलशालिने ॥ बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमम् ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे तृतीयोऽध्यायः
॥ ३ ॥ ॥ श्रीशुक उवाच ॥ नाभागो नभगापत्यं यं ततं भ्रातरः कविम् ॥ यविष्ठं व्यभजन्दायं ब्रह्मचारिणमागतम् ॥ १ ॥
भ्रातरोऽभाक्त किं मह्यं भजाम पितरं तव ॥ त्वां म आर्यास्तताभाक्षुर्मा पुत्रक तदादृथाः ॥ २ ॥ इमे अंगिरसः सत्रमासतेऽद्य
सुमेधसः ॥ षष्ठं षष्ठमुपेत्याहः कवे मुह्यंति कर्मणि ॥३॥ तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः॥ ते स्वर्यंतो धनं सत्रपरि-
शेषितमात्मनः ॥ ४ ॥ दास्यंत्यथ ततो गच्छ तथा स कृतवान्यथा ॥ तस्मै दत्वा ययुः स्वर्गं ते सत्रपरिशेषितम् ॥ ५ ॥ तं
कश्चित्स्वीकरिष्यंतं पुरुषः कृष्णदर्शनः ॥ उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ॥६॥ ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः॥
स्यान्नौ ते पितरि प्रश्नः पृष्टवान्पितरं तथा ॥७॥ यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित्॥ चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति
॥ ८ ॥ नाभागस्तं प्रणम्याह तवेश किल वास्तुकम् ॥ इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये ॥ ९ ॥ ॥

त्वेन भ्रातरो ददुः । तदा पितोवाच । हे पुत्रक, तैः प्रतारणमात्रं कृतं तस्मिन्नादरं त्वं माकुरु ॥ २॥ तथापि तव जीवनोपायमुपदेक्ष्यामि । हे नाभाग, इमे आंगिरसोऽत्र सत्रं कुर्वंति । ते षष्ठे षष्ठे दिने कर्मणि मोहं प्राप्नुवंति ॥३॥ तांस्त्वं वैश्वदेवे द्वे सूक्ते शंसय । सत्रे समाप्ते सति स्वर्गं गच्छंतस्तेंऽगिरसो यज्ञशेषितं बहु धनं तुभ्यं दास्यंति ॥४॥ तच्छ्रुत्वा स तथाऽकरोत् । अंगिरसश्च यज्ञावशेषितं सर्वं धनं तस्मै दत्वा स्वर्गं ययुः ॥ ५॥ धनं ग्रहीष्यंतं तमुत्तरत आगतः श्रीरुद्र आह । हे वत्स, इदं मदीयं धनमस्ति ॥६॥ तदा नाभाग उवाच । इदमृषिभिर्मह्यं दत्तम् । तच्छ्रुत्वा रुद्र उवाच । इदं कस्य द्रव्यमिति पितरं पृच्छ । स गृहं गत्वा पितरं पृष्टवान् ॥७॥ तदा तं पिता जगाद । हे पुत्र, ऋषयो यज्ञावशिष्टं भागं दक्षमखे रुद्राय ददुः । स देवः सर्वमप्यर्हति किं पुनर्यज्ञावशिष्टमिति ॥ ८ ॥ एवं श्रुत्वा नाभागो रुद्रंप्रति गत्वा प्रणम्याह । हे ईश, यज्ञभूमिगतं सर्वं धनं तव भाग इति मे पिता प्राह । अहं त्वां शिरसा

---

१ न ह्यहं दाय इव भागसाधनमित्यर्थः ।

प्रसादये ॥९॥ तदा रुद्र उवाच । यद्यस्मात्ते पिता धर्मं जगाद । त्वमपि सत्यं भाषसे । अतस्तुष्टोऽहं तुभ्यं ज्ञानं दास्यामि ॥ १० ॥ सत्रेऽवशिष्टमिदं द्रव्यं च गृहाण । इत्युक्त्वा रुद्रोंऽतर्दधे ॥११॥ इदमाख्यानं यः सायं प्रातः स्मरति स वेदार्थज्ञो भूत्वाऽऽत्मज्ञानं प्राप्नोति ॥१२॥ अथ नाभागान्महाभागवतोंऽबरीषोऽभूत् । यं ब्रह्म[1]शापोऽपि न पस्पर्श ॥१३॥ राजोवाच ॥ हे ब्रह्मन्, तस्य राजर्षेरंबरीषस्य ब्राह्मणप्रेरितः कृत्याग्निर्नाशयितुं कथं समर्थो न बभूव । इदं श्रोतुमिच्छामि ॥१४॥ श्रीशुक उवाच ॥ महाभागोंऽबरीषः सप्तद्वीपवतीं भूमिं श्रियं च लब्ध्वा ॥१५॥ पुंसां दुर्लभमपि तद्राज्यादिकं स्वप्नसदृशं मत्वा ॥१६॥ वासुदेवे भगवति तद्भक्तेषु च सर्वात्मभावं प्राप्तः सन् ॥१७॥ श्रीकृष्णच्चरणकमलयोर्मनश्चकार । तद्गुणवर्णने वचांसि । तन्मंदिरमार्जनादिषु करौ । तत्कथाश्रवणे कर्णौ ॥१८॥ तत्स्वरूपदर्शने दृशौ । तद्भक्तांगस्पर्शेंऽगसंगम् । तदर्पिततुलस्यास्तत्पादसरोजसंबंधेन प्राप्तस्य गंधस्य ग्रहणे घ्राणं ॥१९॥ तत्क्षेत्रानुगमने पादौ । तत्पादाभिवंदने शिरः । तत्प्रसादस्वीकारे स्रक्चंदनादिसेवनेच्छां च चकार ॥२०॥ एवं स्वकर्मणां समूहं भगवत्यर्पयन् सन् भगवन्निष्ठः ब्राह्मणशिक्षया पृथ्वीं पालयामास ॥ २१ ॥ किंच । सरस्वतीतीरे वसिष्ठासितगौतमादिभिर्ऋषिभिः सांगमनुष्ठितैरश्वमेधैर्हरिमाराधयामास ॥ २२ ॥ यस्य यज्ञेषु सदस्या ऋत्विजो जनाश्च वस्त्रभूषणादीनि धृत्वा तत्र प्राप्तैर्देवैः सदृशा व्यदृश्यंत॥ २३ ॥ ॥ ॥ ॥

यत्ते पितावदद्धर्मं त्वं तु सत्यं प्रभाषसे॥ददामि ते मंत्रदृशे ज्ञानं ब्रह्म सनातनम् ॥१०॥ गृहाण द्रविणं दत्तं मत्सत्रे परिशेषितम् ॥ इत्युक्त्वांऽतर्हितो रुद्रो भगवान्सत्यवत्सलः ॥११॥ य एतत्संस्मरेत्प्रातः सायं च सुसमाहितः ॥ कविर्भवति मंत्रज्ञो गतिं चैव तथात्मनः ॥१२॥ नाभागादंबरीषोऽभून्महाभागवतः कृती ॥ नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित् ॥१३॥ राजोवाच ॥ भगवन् श्रोतुमिच्छामि राजर्षेस्तस्य धीमतः ॥ न प्राभूद्यत्र निर्मुक्तो ब्रह्मदंडो दुरत्ययः ॥१४॥ श्रीशुक उवाच ॥ अंबरीषो महाभागः सप्तद्वीपवतीं महीम् ॥ अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥१५॥ मेनेऽतिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतम् ॥ विद्वान्विभवनिर्वाणं तमो विशति यत्पुमान् ॥१६॥ वासुदेवे भगवति तद्भक्तेषु च साधुषु ॥ प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतम् ॥ १७ ॥ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुंठगुणानुवर्णने॥ करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥१८॥ मुकुंदलिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेंऽगसंगम् ॥ घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥१९॥ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने ॥ कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥ २० ॥ एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ॥ सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥२१॥ ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः ॥ ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीम् ॥२२॥ यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः ॥ तुल्यरूपाश्चानिमिषा व्यदृश्यंत सुवाससः ॥ २३ ॥ ॥

---

[1] कृत्याग्निरूपः

उत्तमश्लोकचरितं शृण्वद्भिर्यस्य प्रजाभिर्देवप्रियोऽपि स्वर्गो न प्रार्थितः । तस्य तु का वार्ता ॥ २४ ॥ अपि च । हृदि हरिं पश्यतो जनान्प्रति सिद्धानामपि दुर्लभा विषया न हर्षयंति ॥२५॥ सोंऽबरीष इत्थंभूतेन भक्तियोगेन हरिं तोषयन् सर्वान् संगान् जहौ ॥ २६ ॥ किंच । गृहस्त्रीपुत्रबंधुगजाश्वरथपदातिषु कोशादिषु च नश्वरत्वबुद्धिं चकार ॥२७॥ तस्य भक्त्या तुष्टो हरिस्तस्मै भक्तरक्षकं चक्रं ददौ ॥२८॥ स भगवद्भक्तया पत्न्या सह संवत्सरात्मकं साधनद्वादशीव्रतं दधार ॥२९॥ व्रतांते कार्तिके मासि त्रिरात्रं समुपोष्य कालिंद्यां नद्यां स्नात्वा मधुवने हरिमर्चयामास ॥ ३० ॥ तदा महाभिषेकविधिना हरिमभिषिच्य गंधपुष्पादिसर्वोपचारसमृद्ध्या पूजयामास ॥३१॥ भगवद्भक्त्या ब्राह्मणांश्च संपूज्य ॥ ३२ ॥ तेभ्यः स्वर्णश्रृंगीः रौप्यखुरा वस्त्रादिसर्वालंकारयुक्ता गाः षष्टि-

स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः ॥ शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् ॥ २४ ॥ समर्धयंति तान्कामाः स्वाराज्यपरिभाविताः ॥ दुर्लभा नापि सिद्धानां मुकुंदं हृदि पश्यतः ॥ २५ ॥ स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः ॥ स्वधर्मेण हरिं प्रीणन् संगान्सर्वान् शनैर्जहौ ॥२६॥ गृहेषु दारेषु सुतेषु बंधुषु द्विपोत्तमस्यंदनवाजिपत्तिषु ॥ अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्वकरोदसन्मतिम् ॥ २७ ॥ तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहम् ॥ एकांतभक्तिभावेन प्रीतो भृत्याभिरक्षणम् ॥ २८ ॥ आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया ॥ युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतम् ॥ २९ ॥ व्रतांते कार्तिके मासि त्रिरात्रं समुपोषितः ॥ स्नातः कदाचित्कालिंद्यां हरिं मधुवनेऽर्चयत् ॥ ३० ॥ महाभिषेकविधिना सर्वोपस्करसंपदा ॥ अभिषिच्यांबराकल्पैर्गंधमाल्यार्हणादिभिः ॥ ३१ ॥ तद्गतांतरभावेन पूजयामास केशवम् ॥ ब्राह्मणांश्च महाभागान्सिद्धार्थानपि भक्तितः ॥ ३२ ॥ गवां रुक्मविषाणीनां रूप्यांघ्रीणां सुवाससाम् ॥ पयःशीलवयोरूपवत्सोपस्करसंपदाम् ॥ ३३ ॥ प्राहिणोत्साधु विप्रेभ्यो गृहेषु न्यर्बुदानि षट् ॥ भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमम् ॥ ३४ ॥ लब्धकामैरनुज्ञातः पारणायोपचक्रमे ॥ तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् ॥ ३५ ॥ तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः ॥ ययाचेऽभ्यवहाराय पादमूलमुपागतः ॥ ३६ ॥ प्रतिनंद्य स तद्याच्ञां कर्तुमावश्यकं गतः ॥ निममज्ज बृहद्ध्यायन्कालिंदीसलिले शुभे ॥ ३७ ॥ मुहूर्तार्धावशिष्टायां द्वादश्यां पारणंप्रति ॥ चिंतयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ॥ ३८ ॥ ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ॥ यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ॥ ३९ ॥ ॥ ॥

६० कोटीः समर्प्य तेषां गृहेषु प्राहिणोत् । ततस्तान् द्विजान् स्वाद्वन्नेन भोजयित्वा ॥३३॥३४॥ प्राप्तमनोरथैस्तैरनुज्ञातः सन् पारणां कर्तुमुद्युक्तः । तदैव भगवान् दुर्वासा अतिथिः प्राप्तः ॥३५॥ नृपस्तं प्रत्युत्थानासनार्हणैः पूजयित्वा भोजनाय न्यमंत्रयत ॥३६॥ ऋषिर्नृपं तथेत्युक्त्वा माध्याह्निकं कर्तुं यमुनां गतः सन् ब्रह्म ध्यायन् जले निममज्ज ॥ ३७ ॥ पारणांप्रति मुहूर्तार्धावशिष्टायां द्वादश्यां धर्मज्ञो राजा धर्मसंकटे प्राप्ते सति ब्राह्मणैः सह चिंतयामास ॥ ३८ ॥ ब्राह्मणातिक्रमेऽधर्मरूपो दोषः । द्वादश्यां पारणे न जाते व्रतवैगुण्यरूपश्च दोषः । अतो यत्कृत्वा मे शुभं स्यात् अधर्मश्च मां न स्पृशेत्तत्किं कार्यम् ॥ ३९ ॥

एवं ब्राह्मणान् विचार्य निश्चयं करोति । हे विप्राः, केवलेन जलेनाहं व्रतसमाप्तिं करिष्ये । तदा विप्रा जलपानमशितं नाशितं च प्राहुः ॥ ४० ॥ ततो राजा
जलं प्राश्य हरिं चिंतयन् द्विजागमनं प्रत्यैक्षत ॥४१॥ दुर्वासास्तु यमुनातीरादागत्य राजचेष्टितं ज्ञात्वा ॥४२॥ क्रोधेन चलद्गात्रोऽत्यंतं बुभुक्षितश्च सन् कृतांजलिं
नृपं जगाद ॥४३॥ अहो संपत्त्या मत्तस्यास्य नृपस्याधर्मं पश्यत ॥४४॥ हेंऽबरीष, यस्त्वं मामतिथिमातिथ्येन निमंत्र्य मह्यं भोजनमदत्वा भुक्तवान्
तस्य ते फलं दर्शये ॥४५॥ इत्युक्त्वा जटामुत्पाट्य तया कालाग्निसदृशीं कृत्यां निर्मितवान् ॥४६॥ नृपो ज्वलंतीं पदा भुवं वेपयंतीमायांतीं तां कृत्यां वीक्ष्य
स्थानान्न चचाल ॥४७॥ तदा भृत्यरक्षणे भगवता पूर्वं योजितं चक्रं तां कृत्यां दग्ध्वा ॥ ४८ ॥ ऋषिमन्वधावत् । तदा दुर्वासाः स्वप्रयत्नं निष्फलं वीक्ष्य

अंभसा केवलेनाथ करिष्ये व्रतपारणम् ॥ प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ॥४०॥ इत्यपः प्राश्य राजर्षिश्चिंतयन्मनसाऽच्युतम् ॥
प्रत्याचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ॥ ४१ ॥ दुर्वासा यमुनाकूलात्कृतावश्यक आगतः ॥ राज्ञाभिनंदितस्तस्य बुबुधे
चेष्टितं धिया ॥ ४२ ॥ मन्युना प्रचलद्गात्रो भृकुटीकुटिलाननः ॥ बुभुक्षितश्च सुतरां कृतांजलिमभाषत ॥ ४३ ॥ अहो अस्य
नृशंसस्य श्रियोन्मत्तस्य पश्यत ॥ धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ॥ ४४ ॥ यो मामतिथिमायातमातिथ्येन निमंत्र्य
च ॥ अदत्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ॥ ४५ ॥ एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः ॥ तया स निर्ममे तस्मै
कृत्यां कालानलोपमाम् ॥ ४६ ॥ तामापतंतीं ज्वलतीमसिहस्तां पदा भुवम् ॥ वेपयंतीं समुद्वीक्ष्य न चचाल पदान्नृपः ॥४७॥
प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ॥ ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ॥ ४८ ॥ तदभिद्रवदुद्वीक्ष्य स्वप्रयासं
च निष्फलम् ॥ दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ॥ ४९ ॥ तमन्वधावद्भगवद्रथांगं दावाग्निरुद्धूतशिखो यथाहिम् ॥
तथानुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः ॥५०॥ दिशो नभः क्ष्मां विवरान्समुद्राँल्लोकान्सपालांस्त्रिदिवं गतः सः ॥
यतो यतो धावति तत्र तत्र सुदर्शनं दुष्प्रसहं ददर्श ॥ ५१ ॥ अलब्धनाथः स यदा कुतश्चित्संत्रस्तचित्तोऽरणमेषमाणः ॥ देवं
विरिंचं समगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसो माम् ॥ ५२ ॥ ब्रह्मोवाच ॥ स्थानं मदीयं सहविश्वमेतत्क्रीडावसाने द्विपरार्धसंज्ञे ॥
भ्रूभंगमात्रेण हि संदिधक्षोः कालात्मनो यस्य तिरो भविष्यति ॥ ५३ ॥ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ॥
सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ॥ ५४ ॥ ॥ ॥

भीतः सन् प्राणरक्षणेच्छया दिक्षु दुद्राव ॥४९॥ चक्रमपि तमन्वधावत् । तदा ऋषिः पृष्ठसंलग्नं चक्रं वीक्ष्य मेरोर्गुहां प्रवेष्टुमधावत् ॥५०॥ एवं दिशो नभो
भूमिं पातालानि समुद्रान् पालसहितान् लोकान् स्वर्गलोकं च गतः । स यतो यतो धावति तत्र तत्र सुदर्शनं ददर्श ॥ ५१ ॥ एवं सर्वत्र भ्रमित्वा रक्षकमलब्ध्वा
ब्रह्माणं शरणं गत्वाऽऽह । हे ब्रह्मन्, विष्णुचक्रतो मां त्राहि ॥५२॥ ब्रह्मोवाच ॥ हे ऋषे, ब्रह्मांडसहितमेतन्मत्स्थानं यस्य कालात्मनो भगवतो भ्रुकुटिचालनमात्रेण
द्विपरार्धकालावसाने नश्यति ॥५३॥ अहं रुद्रो दक्षादयश्च सर्वे वयं लोकहितं यथा स्यात्तथा यस्याज्ञां शिरसा वहामः । अतस्तद्भक्तद्रोहिणं

त्वां रक्षितुं न समर्थोऽहम् ॥ ५४ ॥ एवं श्रुत्वा दुर्वासाः कैलासपर्वते शिवं शरणं जगाम ॥ ५५ ॥ हे शिव, मां पाहि । तदा शिव उवाच । हे पुत्र, यस्मिन् महति ईश्वरे एतद्ब्रह्मांडसदृशान्यन्यान्यपि ब्रह्मांडान्युत्पद्यंते नश्यंति च । येषु लोकेशमानिनो वयं भ्रमामः ॥५६॥ किंच । अहं सनत्कुमारो नारदो ब्रह्मा कपिलादयः ॥५७॥ मरीच्यादयश्च यस्य मायां न विदामः ॥ ५८ ॥ तस्येश्वरस्येदं चक्रमस्माकं दुःसहमस्ति । अतस्तमेव त्वं शरणं याहि। स हरिस्ते कल्याणं करिष्यति ॥५९॥ एवमुक्तो दुर्वासा यत्र लक्ष्म्या सह हरिरास्ते तं वैकुंठलोकं ययौ ॥ ६० ॥ स चक्रोद्भवेन वह्निना तापितः सन् तत्पादमूले पतित्वाऽऽह । हे अनंत, कृतापराधं मां पाहि ॥ ६१ ॥ तव प्रतापमजानता मया तव भक्तस्य दुःखं दत्तं तस्य निष्कृतिं कुरु । तव नाम्न्युच्चारिते सति नरकस्थोऽपि प्राणी

प्रत्याख्यातो विरिंचेन विष्णुचक्रोपतापितः ॥ दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ॥५५॥ श्रीरुद्र उवाच ॥ वयं न तात प्रभवाम भूम्नि यस्मिन्परेऽन्येऽप्यजजीवकोशाः ॥ भवंति काले न भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥५६॥ अहं सनत्कुमारश्च नारदो भगवानजः ॥ कपिलोऽपांतरतमो देवलो धर्म आसुरिः ॥५७॥ मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शिनः ॥ विदाम न वयं सर्वे यन्मायां माययावृताः ॥ ५८ ॥ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ॥ तमेव शरणं याहि हरिस्ते शं विधास्यति ॥ ५९ ॥ ततो निराशो दुर्वासाः पदं भगवतो ययौ ॥ वैकुंठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥ ६० ॥ संदह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः ॥ आहाच्युतानंत सदीप्सित प्रभो कृतागसं माऽवहि विश्वभावन ॥ ६१ ॥ अजानता ते परमानुभावं कृतं मयाऽघं भवतः प्रियाणाम् ॥ विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥ ६२ ॥ श्रीभगवानुवाच ॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज ॥ साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ ६३ ॥ नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ॥ श्रियं चात्यंतिकीं ब्रह्मन्येषां गतिरहं परा ॥ ६४ ॥ ये दारागारपुत्राप्तान्प्राणान्वित्तमिमं परम् ॥ हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ ६५ ॥ मयि निर्बद्धहृदयाः साधवः समदर्शनाः ॥ वशीकुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ६६ ॥ मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् ॥ नेच्छंति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतम् ॥६७॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ॥ मदन्यत्ते न जानंति नाहं तेभ्यो मनागपि ॥६८॥ उपायं कथयिष्यामि तव विप्र शृणुष्व तत् ॥ अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ॥ साधुषु प्रहितं तेजः प्रहर्तुः कुरुतेऽशिवम् ॥६९॥ ॥

मुच्यते ॥६२॥ श्रीभगवानुवाच ॥ हे ऋषे, अहं भक्तपराधीनो भक्तजनप्रियोऽस्मि ॥६३॥ अहं मद्भक्तैर्विना आत्मानं लक्ष्मीं च नेच्छामि ॥६४॥ ये स्त्रीपुत्रगृहादीन् हित्वा मां शरणं प्राप्तास्तान् त्यक्तुमहं कथं समर्थः स्याम् ॥६५॥ मयि निर्बद्धहृदयाः साधवो भक्त्या मां वशीकुर्वंति ॥ ६६ ॥ ते मत्सेवया प्राप्तं सालोक्यादि चतुष्टयमपि नेच्छंति कुतोऽन्यदिंद्रपदादिकम् ॥ ६७ ॥ साधवो मम हृदयम् । साधूनामहं हृदयम् । मां विना तेऽन्यन्न जानंति । अहमपि तेभ्योऽन्यत्प्रियं वस्तु न जानामि ॥६८॥ हे विप्र, तवोपायं कथयामि शृणु । यत इदं दुःखं तव प्राप्तं तमंबरीषंप्रति त्वं गच्छ ॥ ६९ ॥ ॥

हे ब्रह्मन्, साधुषु प्रेरितं तेजः प्रेरणाकर्तुरनर्थं कुरुते ॥७०॥ अतो नाभागतनयंप्रति गत्वा तं क्षमापय । स तव शांतिं करिष्यति ॥७१॥ इति श्रीमद्भागवत-
चूर्णिका० नवमस्कंधे चतुर्थोऽध्यायः ॥४॥ ॥ पंचमे विष्णुचक्रं तु प्रसाद्य प्राणसंकटात् । दुर्वासा रक्षितस्तेन तथा तद्वृत्तमीर्यते ॥१॥ श्रीशुक उवाच ॥ एवं
भगवताऽऽज्ञापितो दुर्वासाश्चक्रतापितः सन् अंबरीषं प्राप्य तत्पादौ जग्राह॥१॥ तदा पादस्पर्शेन लज्जितः कृपया पीडितश्च स राजा तच्चक्रं तुष्टाव॥२॥ अंब-
रीष उवाच ॥ हे सुदर्शन, त्वं सूर्यश्चंद्रमाश्चासि । त्वं पंचमहाभूतानि शब्दादिविषया इंद्रियाणि चासि ॥ ३ ॥ हे सहस्रधार, सर्वास्त्रनाशक, सुदर्शन, तुभ्यं
नमः । त्वं विप्राय कल्याणरूपं भूयाः ॥४॥ त्वं लोकपालः त्वं धर्मः त्वं यज्ञः त्वमैश्वरं तेजः सर्वात्मा चासि ॥ ५॥ हे सुनाभ, त्वां स्तोतुं कः समर्थः मनोज-

तपो विद्या च विप्राणां निःश्रेयसकरे उभे ॥ त एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥ ७० ॥ ब्रह्मंस्तद्गच्छ भद्रं ते नाभागतनयं
नृपम् ॥ क्षमापय महाभागं ततः शांतिर्भविष्यति ॥७१॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधेंऽबरीषचरिते चतुर्थोऽध्यायः
॥ ४ ॥ ॥ श्रीशुक उवाच ॥ एवं भगवतादिष्टो दुर्वासाश्चक्रतापितः ॥ अंबरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ॥ १ ॥
तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः ॥ अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥ २ ॥ अंबरीष उवाच ॥ त्वमग्निर्भग-
वान्सूर्यस्त्वं सोमो ज्योतिषां पतिः ॥ त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेंद्रियाणि च ॥ ३ ॥ सुदर्शन नमस्तुभ्यं सहस्राराच्युत-
प्रिय ॥ सर्वास्त्रघातिन्विप्राय स्वस्ति भूया इडस्पते ॥ ४ ॥ त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् ॥ त्वं लोकपालः स-
र्वात्मा त्वं तेजः पौरुषं परम् ॥ ५ ॥ नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे ॥ त्रैलोक्यगोपाय विशुद्धवर्चसे
मनोजवायाद्भुतकर्मणे गृणे ॥ ६ ॥ त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनाम् ॥ दुरत्ययस्ते महिमा गिरां
पते त्वद्रूपमेतत्सदसत्परावरम् ॥ ७ ॥ यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोऽजित दैत्यदानवम् ॥ बाहूदरोर्वंघ्रिशिरोधराणि
वृश्चणन्नजस्रं प्रधने विराजसे ॥ ८ ॥ स त्वं जगत्त्राणखलप्रहाणये निरूपितः सर्वसहो गदाभृता ॥ विप्रस्य चास्मत्कुलदैवहेतवे
विधेहि भद्रं तदनुग्रहो हि नः ॥ ९ ॥ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः ॥ कुलं नो विप्रदैवं चेद्द्विजो भवतु विज्वरः
॥ १० ॥ यदि नो भगवान्प्रीत एकः सर्वगुणाश्रयः ॥ सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥११॥ श्रीशुक उवाच ॥ इति
संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम् ॥ अशाम्यत्सर्वतो विप्रं प्रदहद्राजयाच्ञया ॥ १२ ॥ ॥

वाय त्रैलोक्यपालकाय तुभ्यं केवलं नमस्करोमि ॥६॥ त्वत्तेजसा सूर्यादीनां प्रकाशोऽर्पितोऽस्ति ॥७॥ हे अजित, हरिणा यदा त्वं विसृष्टः तदा दैत्यदानवानां
सैन्यं प्रविश्य तेषां बाहुचरणशिरांसि भिंदन् विराजसे ॥ ८ ॥ हे जगद्रक्षक, त्वं खलानामेव प्रहारार्थं भगवता निरूपितः । अतोऽस्मत्कुलस्य भाग्यलाभाय
द्विजस्य कल्याणं कुरु । स एव मेऽनुग्रहः ॥९॥ यदि मया यज्ञादिकं कृतं दानं वा दत्तं स्वधर्मो वाऽनुष्ठितः स्यात्तर्ह्ययं द्विजो गतदुःखो भवतु ॥१०॥ यदि
मे कृतया सर्वभूतात्मभावनया भगवान् प्रीतस्यात्तर्ह्ययं द्विजो दुःखरहितो भवतु ॥११॥ श्रीशुक उवाच॥ एवं राज्ञः स्तुवतः सतो विष्णुचक्रं शांतं बभूव॥१२॥

ततश्चक्राग्नितापान्मुक्तो दुर्वासा आशिषो युंजानः सन् राजानं प्रशशंस ॥१३॥ दुर्वासा उवाच ॥ अहो भगवद्भक्तानां महत्त्वं मयाद्य दृष्टम् । यतः कृतापराधस्यापि मम कल्याणं त्वमिच्छसि ॥१४॥ यैर्हरिः स्वीकृतस्तेषां दुष्करं दुस्त्यजं वा किम् ॥१५॥ यन्नामश्रवणमात्रेण पुमान्निर्मलो भवति तस्य हरेर्दासानां किं कर्मावशिष्यते ॥१६॥ हे राजन्, त्वया ममोपर्यनुग्रहः कृतः । ममापराधं पृष्ठतः कृत्वा मे प्राणा रक्षिताः ॥१७॥ श्रीशुक उवाच । राजा ऋषेरागमनपर्यंतमकृताहारः सन्नागतस्य तस्य ऋषेश्चरणौ प्रगृह्य प्रसाद्य समभोजयत् ॥१८॥ ततो दुर्वासा आशिषो दत्वा नृपं भुज्यतामिति सादरमाज्ञां दत्तवान् ॥१९॥ दुर्वासा उवाच ॥ हे नृप, तव दर्शनस्पर्शनभाषणैरातिथ्येन चाहं प्रीतोऽस्मि ॥ २० ॥ एतत्तव शुद्धं कर्म स्वर्गे स्त्रियो गायंति । तथा तव पुण्यां कीर्तिमियं भूः

स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः ॥ प्रशशंस तमुर्वीशं युजानः परमाशिषः ॥१३॥ दुर्वासा उवाच ॥ अहो अनंतदासानां महत्त्वं दृष्टमद्य मे ॥ कृतागसोऽपि यद्राजन्मंगलानि समीहसे ॥१४॥ दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम् ॥ यैः संगृहीतो भगवान्सात्वतामृषभो हरिः ॥१५॥ यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः ॥ तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥१६॥ राजन्ननुगृहीतोऽहं त्वयातिकरुणात्मना ॥ मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः ॥१७॥ श्रीशुक उवाच ॥ राजा तमकृताहारः प्रत्यागमनकांक्षया ॥ चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥१८॥ सोऽशित्वादृतमानीतमातिथ्यं सार्वकामिकम् ॥ तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम् ॥१९॥ दुर्वासा उवाच ॥ प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै ॥ दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥२०॥ कर्मावदातमेतत्ते गायंति स्वःस्त्रियो मुहुः ॥ कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियम् ॥२१॥ श्रीशुक उवाच ॥ एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ॥ ययौ विहायसाऽऽमंत्र्य ब्रह्मलोकमहैतुकम् ॥२२॥ संवत्सरोऽत्यगात्तावद्यावता नागतो गतः ॥ मुनिस्तद्दर्शनाकांक्षो राजाऽब्भक्षो बभूव ह ॥२३॥ गते च दुर्वाससि सोंऽबरीषो द्विजोपयोगातिपवित्रमाहरत् ॥ ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च परानुभावम् ॥२४॥ एवं विधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ॥ क्रियाकलापैः समुवाह भक्तिं ययाऽऽविरिंचान्निरयांश्चकार ॥ २५ ॥ अथांबरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ॥ वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः ॥२६॥ इत्येतत्पुण्यमाख्यानमंबरीषस्य भूपतेः ॥ संकीर्तयन्ननुध्यायन्भक्तो भगवतो भवेत् ॥ २७ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधेंऽबरीषचरितं नाम पंचमोऽध्यायः ॥ ५ ॥ ॥

कीर्तयिष्यति ॥२१॥ श्रीशुक उवाच ॥ एवमुक्त्वा ऋषिस्तमामंत्र्य ब्रह्मलोकं ययौ ॥ २२ ॥ मुनिर्यावन्नागतस्तावत्संवत्सरो गतः । तावदृषिदर्शनाकांक्षी राजा जलभक्षो बभूव ॥२३॥ एवं दुर्वाससि गते सति सोंऽबरीषः स्वयं बुभुजे । एतदृषेर्विमोक्षादिकं च सर्वं भगवदनुभावं मेने ॥ २४॥ एवंविधो राजा वासुदेवे भगवति कर्माणि समर्प्य भक्तिं कुर्वन् ब्रह्मपदसहितान् भोगान् नरकतुल्यान् मत्वा ॥ २५ ॥ पुत्राणां राज्यं समर्प्य वासुदेवे मनो निवेश्य वनं गत्वा मुक्तो बभूव ॥ २६ ॥ एतत्पुण्यमाख्यानं यः कीर्तयेद्ध्यायेद्वा स भगवतो भक्तो भवेत् ॥ २७ ॥ इति श्रीमद्भागवतचू० नवमस्कंधे पंचमोऽध्यायः ॥ ५ ॥ ॥

षष्ठारंभेंऽबरीषस्य वंशमुक्त्वा ततः परम् । षष्ठाद्यष्टभिरध्यायैरिक्ष्वाकोर्वंश उच्यते ॥१॥ तत्र षष्ठे शशादादिर्मांधात्रंतो निरूप्यते । प्रसंगात्सौभरेराख्या मांधातृतनयापतेः ॥२॥ श्रीशुक उवाच ॥ अंबरीषस्य–विरूपः केतुमान् शंभुरिति त्रयः पुत्राः । तत्र विरूपात् पृषदश्वः । तस्य रथीतरः ॥१॥ सोऽप्रजः । तस्य भार्यायां प्रजार्थं प्रार्थितोंऽगिरा ऋषिः पुत्रानुत्पादयामास । ते ब्राह्मणा बभूवुः ॥२॥ एते रथीतरक्षेत्रेंऽगिरसो वीर्येण जाताः । अतो रथीतरगोत्राः संत आंगिरसनाम्ना प्रसिद्धा ब्राह्मणा अभूवन् ॥३॥ वैवस्वतस्य मनोः क्षुवतः सतो नासिकायाः सकाशात्प्रथमः–इक्ष्वाकुः पुत्रो जज्ञे । तस्य विकुक्षिनिमिदंडकाद्याः शतं पुत्रा बभूवुः ॥४॥ तेषु पंचविंशतिरार्यावर्तदेशे पूर्वभागे समुद्रपर्यंतं राजानोऽभवन् । तथा पंचविंशतिः पश्चिमदिग्भागे राजानः । मध्ये पूर्वोक्ता विकुक्षिनिमिदंडकास्त्रयः । अपरे सप्तचत्वारिंशद्दक्षिणोत्तरदिग्भागे राजानो जाताः ॥५॥ एकदेक्ष्वाकुरष्टकाश्राद्धे मांसानयनार्थं विकुक्षिंप्रत्याज्ञां चक्रे ॥ ६ ॥ स

॥ श्रीशुक उवाच ॥ विरूपः केतुमान् शंभुरंबरीषसुतास्त्रयः ॥ विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः ॥ १ ॥ रथीतरस्याप्रजस्य
भार्यायां तंतवेऽर्थितः ॥ अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥ २ ॥ एते क्षेत्रे प्रसूता वै पुनस्त्वांगिरसाः स्मृताः ॥ रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ ३ ॥ क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ॥ तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः
॥ ४ ॥ तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप ॥ पंचविंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ॥ ५ ॥ स एकदाऽष्टकाश्राद्ध इक्ष्वाकुः
सुतमादिशत् ॥ मांसमानीयतां मेध्यं विकुक्षे गच्छ मा चिरम् ॥ ६ ॥ तथेति स वनं गत्वा मृगान्हत्वा क्रियार्हणान् ॥ श्रांतो
बुभुक्षितो वीरः शशं चाददपस्मृतिः ॥७॥ शेषं निवेदयामास पित्रे तेन च तद्गुरुः ॥ चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥८॥
ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाऽभिहितं नृपः ॥ देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ॥९॥ स तु विप्रेण संवादं जापकेन समाचरन् ॥ त्यक्त्वा कलेवरं योगी स तेनावाप यत्परम् ॥१०॥ पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् ॥ शासदीजे हरिं यज्ञैः
शशाद इति विश्रुतः ॥ ११ ॥ पुरंजयस्तस्य सुत इंद्रवाह इतीरितः ॥ ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥ १२ ॥
कृतांत आसीत्समरो देवानां सह दानवैः ॥ पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥ १३ ॥ ॥

तथेत्युक्त्वा वनं गत्वा मृगान् हत्वा बुभुक्षितः सन्नेकं शशं भक्षयित्वा ॥७॥ शेषं मांसं पित्रे निवेदयामास । तदेक्ष्वाकुणा प्रेरितो वसिष्ठः प्रोक्षणकाले उच्छिष्टं मांसं ज्ञात्वा राज्ञे कथयामास ॥८॥ तदेक्ष्वाकुस्तत्पुत्रकर्म ज्ञात्वा पुत्रं देशान्निःसारयामास ॥ ९ ॥ तत इक्ष्वाकुर्वसिष्ठेन सह तत्त्वविचारं कृत्वा योगेन देहं हित्वा ब्रह्मस्वरूपं प्राप ॥ १० ॥ एवमिक्ष्वाकौ परलोकं गते सति विकुक्षिः पुनर्गृहमागत्य पृथ्वीं पालयामास । स एव शशभक्षणाच्छशाद इति नाम्ना प्रसिद्धोऽभवत् ॥ ११ ॥ तस्य पुत्रः पुरंजयः[1] इंद्रवाहः[2] ककुत्स्थ[3] इति च नामत्रयेण प्रख्यातः । तस्य कर्मभिर्नामप्रवृत्तिं शृणु ॥१२॥ पुरा देवदैत्यसंग्रामे दैत्यपराजितैर्देवैः स्वसहायार्थं प्रार्थितः स उवाच । हे देवाः, इंद्रो यदि मम वाहनं स्यात्तर्हि दैत्यान् हनिष्यामि ॥ १३ ॥ ॥ ॥

---

१ दैत्यपुरस्य जयात्पुरंजयः । २ इंद्रो वाहो यस्येतींद्रवाहः । ३ ककुदि स्थितत्वात्ककुत्स्थः ।

एवं वाहनत्वे याचित इंद्रो लज्जया तन्नांगीकुर्वन् विष्णोर्वचनान्महावृषभो बभूव ॥ १४॥ तदा शशादपुत्रो वृषभरूपेंद्रस्य स्कंधे स्थित्वा धनुर्बाणौ गृहीत्वा ॥ १५ ॥ विष्णोस्तेजसा युक्तो देवैः सह पश्चिमदिग्भागे दैत्यानां पुरं रुरोध ॥ १६ ॥ तदा दैत्यैः सह तस्य रोमहर्षणं घोरं युद्धं जातम्। तस्मिन् युद्धे तस्य संमुखे ये दैत्याः प्राप्तास्तान् बाणैरमारयत् ॥१७॥ तदा हन्यमाना दैत्याः संग्रामं विसृज्य पातालं विविशुः ॥१८॥ स शशादपुत्र एवं दैत्यान् हत्वा तेषां सर्वं धनमिंद्राय ददौ । एवं कर्मभिः पुरंजयादिनामानि प्राप्तः ॥१९॥ ततः पुरंजयादनेनाः पुत्रो जातः । तस्य पृथुः । तस्य विश्वरंधिः । तस्य चंद्रः । तस्य युवनाश्वः ॥२०॥ तस्य शावस्तः । येन शावस्ती नगरी निर्मिता । तस्य बृहदश्वः । तस्य कुवलयाश्वः ॥२१॥ स उत्तंकऋषेः प्रियं कर्तुं एकविंशतिसहस्रपुत्रैर्युक्तः

वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः ॥ वाहनत्वे वृतस्तस्य बभूवेंद्रो महावृषः ॥ १४ ॥ स संनद्धो धनुर्दिव्यमादाय विशिखान्शितान् ॥ स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥१५॥ तेजसाऽऽप्यायितो विष्णोः पुरुषस्य परात्मनः ॥ प्रतीच्यां दिशि दैत्यानां न्यरुणत्रिदशैः पुरम् ॥१६॥ तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणम् ॥ यमाय भल्लैरनयद्दैत्यान्येऽभिययुर्मृधे ॥१७॥ तस्येषुपाताभिमुखं युगांताग्निमिवोल्बणम् ॥ विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम् ॥ १८ ॥ जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये ॥ प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः ॥१९॥ पुरंजयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः ॥ विश्वरंधिस्ततश्चंद्रो युवनाश्वश्च तत्सुतः ॥ २० ॥ शावस्तस्तत्सुतो येन शावस्ती निर्ममे पुरी ॥ बृहदश्वस्तु शावस्तिस्ततः कुवलयाश्वकः ॥ २१ ॥ यः प्रियार्थमुतंकस्य धुंधुनामासुरं बली ॥ सुतानामेकविंशत्या सहस्रैरहनद्वृतः ॥ २२ ॥ धुंधुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः ॥ धुंधोर्मुखाग्निना सर्वे त्रय एवावशेषिताः ॥२३॥ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत ॥ दृढाश्वपुत्रो हर्यश्वो निकुंभस्तत्सुतः स्मृतः ॥२४॥ बर्हणाश्वो निकुंभस्य कृशाश्वोऽथास्य सेनजित् ॥ युवनाश्वोऽभवत्तस्य सोऽनपत्यो वनं गतः ॥२५॥ भार्याशतेन निर्विण्ण ऋषयोऽस्य कृपालवः ॥ इष्टिं स्म वर्तयांचक्रुरैंद्रीं ते सुसमाहिताः ॥ २६॥ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ॥ दृष्ट्वा शयानान्विप्रांस्तान्पपौ मंत्रजलं स्वयम् ॥२७॥ उत्थितास्ते निशाम्याथ व्युदकं कलशं प्रभो ॥ पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलम् ॥२८॥ राज्ञा पीतं विदित्वाथ ईश्वरप्रहितेन ते ॥ ईश्वराय नमश्चक्रुरहो दैवबलं बलम् ॥ २९ ॥ ॥

सन् धुंधुनामासुरं जघान ॥२२॥ तेन धुंधुमार इति नाम्ना प्रख्यातः । धुंधोर्मुखाग्निना तत्पुत्रा दग्धाः ॥ २३ ॥ तेषु मध्ये दृढाश्वः कपिलाश्वो भद्राश्व इति च त्रयोऽवशिष्टाः। तत्र दृढाश्वपुत्रो हर्यश्वः । तस्य निकुंभः ॥२४॥ तस्य बर्हणाश्वकृशाश्वौ द्वौ पुत्रौ । तत्र कृशाश्वस्य सेनजित् । तस्य युवनाश्वः । सोऽनपत्यो भार्याशतेन सह विरक्तः सन् वनं गतः । तस्य पुत्रार्थं तत्पत्न्यनुज्ञया ऋषय इष्टिं चक्रुः ॥ २५ ॥ २६ ॥ निशि तृषितो राजा ऋषीणां यज्ञमंडपं प्रविश्य तत्र सुप्तान् ऋषीन् दृष्ट्वा मंत्रितं जलं पत्न्यै देयं स्वयं पपौ ॥ २७ ॥ प्रातस्ते मुनयो निरुदकं कलशं दृष्ट्वा केनेदं जलं पीतमिति पप्रच्छुः ॥ २८ ॥ ततो राज्ञा पीतं ज्ञात्वाऽहो दैवबलमेव मुख्यं बलमित्युक्त्वेश्वराय नमश्चक्रुः ॥ २९ ॥ ॥ ॥ ॥

ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणम् ॥ युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥ ३० ॥ कं धास्यति कुमारोऽयं स्तन्यं रोरूयते भृशम् ॥ मां धाता वत्स मारोदीरितींद्रो देशिनीमदात् ॥३१॥ न ममार पिता तस्य विप्रदेवप्रसादतः ॥ युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ॥ ३२ ॥ त्रसद्दस्युरितींद्रोंऽग विदधे नाम तस्य वै ॥ यस्मात्रसंति ह्युद्विग्ना दस्यवो रावणादयः ॥ ३३ ॥ यौवनाश्वोऽथ मांधाता चक्रवर्त्यवनीं प्रभुः ॥ सप्तद्वीपवतीमेकः शशासाच्युततेजसा ॥ ३४ ॥ ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः ॥ सर्वदेवमयं देवं सर्वात्मकमतींद्रियम् ॥ ३५ ॥ द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः ॥ धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकम् ॥ ३६ ॥ यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति ॥ सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ॥ ३७ ॥ शशबिंदोर्दुहितरि बिंदुमत्यामधान्नृपः ॥ पुरुकुत्समंबरीषं मुचुकुंदं च योगिनम् ॥ तेषां स्वसारः पंचाशत्सौभरिं वव्रिरे पतिम् ॥ ३८ ॥ यमुनांतर्जले मग्नस्तप्यमानः परंतपः ॥ निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ॥ ३९ ॥ जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ॥ सोऽप्याह गृह्यतां ब्रह्मन्कामं कन्या स्वयंवरे ॥ ४० ॥ स विचिंत्याप्रियं स्त्रीणां जरठोऽयमसंमतः ॥ वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ॥४१॥ साधयिष्ये तथात्मानं सुरस्त्रीणामपीप्सितम् ॥ किं पुनर्मनुजेंद्राणामिति व्यवसितः प्रभुः ॥ ४२ ॥ मुनिः प्रवेशितः क्षत्रा कन्यांतःपुरमृद्धिमत् ॥ वृतश्च राजकन्याभिरेकः पंचाशता वरः ॥ ४३ ॥ तासां कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदम् ॥ ममानुरूपो नायं व इति तद्गतचेतसाम् ॥ ४४ ॥ ॥ ॥

ततः काले प्राप्ते सति युवनाश्वस्य दक्षिणां कुक्षिं भित्वा पुत्रो निर्गतः ॥३०॥ अयं पुत्रः कं धास्यतीति[1] विप्रैरुक्ते सति तस्यामिष्ठामाराधित इंद्र आह । हे वत्स, त्वं मां धाताऽसि[2] । त्वं मारोदीरिति ब्रुवन् तन्मुखे स्वतर्जनीं ददौ ॥३१॥ तस्य पिता भिन्नकुक्षिरपि विप्रदेवप्रसादतो न ममार । कालांतरे तस्मिन्नेव वने स युवनाश्वः सिद्धिं प्राप ॥३२॥ इंद्रस्तस्य पुत्रस्य नाम त्रसद्दस्युरिति चकार । यस्माद्रावणादयो दस्यवस्त्रसंति ॥३३॥ असौ मांधाता सप्तद्वीपवतीं पृथ्वीं शशास ॥३४॥ स भूरिदक्षिणैर्यज्ञैर्विष्णुमीजे ॥३५॥ कथंभूतम् । द्रव्यमंत्रविधियज्ञयजमानर्त्विग्देशकालादिकमेतत्सर्वं यत्स्वरूपमस्ति तम् ॥ ३६ ॥ यावत्पर्यंतं सूर्यः प्रकाशयति तत्सर्वं मांधातुः क्षेत्रमुच्यते ॥३७॥ स मांधाता शशबिंदोः कन्यायां बिंदुमत्यां भार्यायां पुरुकुत्सं अंबरीषं मुचुकुंदमिति त्रीन् पुत्रान् पंचाशत्कन्याश्चोत्पादयामास । ताः सर्वाः सौभरिं पतिं वव्रिरे ॥३८॥ एकदा सौभरिर्यमुनांतर्जले मत्स्यराजस्य मैथुनं वीक्ष्य तत्सुखे जातेच्छः सन् मांधातारं नृपंप्रति गत्वैकां कन्यामयाचत । तदा राजा सौभरिं वृद्धं दृष्ट्वा प्राह । हे ऋषे, स्वयंवरे या कन्या त्वां वृणीयात्तां गृहाण ॥३९॥४०॥ तच्छ्रुत्वा ऋषिः स्वमनसि जगाद । अहं वृद्धः कंपमानशिरा अस्मि । अतो राज्ञैवमुक्तम् ॥ ४१ ॥ तस्मादहं देवस्त्रीणामपीप्सितं स्वरूपं साधयिष्यामि किं पुनर्मनुष्यस्त्रीणाम् ॥ ४२ ॥ इति निश्चित्य तथा रूपं धृतवान् । ततो राजानुज्ञया द्वारपालेन कन्यांतःपुरे प्रवेशितः । तदा सर्वाभिः स एक एव वरो वृतः ॥४३॥ तस्मिन्नासक्तचित्तानां

---

[1] पास्यति । [2] अनयोक्त्यैव तस्य मांधातेति नाम प्रवृत्तम् ।

तासां ममायं पतिर्योग्यो न तवेति मिथः कलिरभूत् ॥ ४४ ॥ ततः स सौभरिर्बहुमूल्यशय्यासनवस्त्रभूषणस्नानानुलेपभक्ष्यपदार्थपुष्पमालादिभिः सुशोभितः सन् ताभिः स्त्रीभिः सह स्वतपःसामर्थ्येन निर्मितेषु गृहेषु तथा नानोपवनेषु तथा सौगंधिककमलयुक्तेषु सरस्सु रेमे ॥४५॥ ४६ ॥ तदा मांधाता सौभरेर्गृहस्थाश्रमं वीक्ष्य विस्मितः सन् गर्वं जहौ ॥ ४७ ॥ मुनिरेवं गृहेषु सुखैर्विषयभोगादीन् सेवमानोऽपि नातुष्यत् ॥ ४८ ॥ स कदाचित् मनसा मत्स्यसंगादुत्पन्नां स्वतपोहानिं दृष्ट्वा प्राह ॥४९॥ अहो तपस्विनो मे विनाशं पश्यत । यतो जलचरप्रसंगाच्चिरं धृतं तपः प्रच्यावितम् ॥५०॥ मुमुक्षुर्गृहस्थाश्रमिणां संगं त्यजेत् । एकश्चरन् रहसि भगवति चित्तं युंजीत ॥ ५१ ॥ अहो अहं जले मत्स्यसंगाद्धेतोः पंचाशद्भार्यासंबंधवानासम् । ततः पुत्रैः पंचसहस्रसर्गरूप आसम् । तथापि

स बह्वृचस्ताभिरपारणीयतपःश्रियानर्घ्यपरिच्छदेषु ॥ गृहेषु नानोपवनामलांभःसरस्सु सौगंधिककाननेषु ॥४५॥ महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ॥ स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्विजभृंगबंदिषु ॥४६॥ यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः ॥ विस्मितः स्तंभमजहात्सार्वभौमश्रियान्वितः ॥४७॥ एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः ॥ सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ॥४८॥ स कदाचिदुपासीन आत्मापह्नवमात्मनः ॥ ददर्श बह्वृचाचार्यो मीनसंगसमुत्थितम् ॥४९॥ अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ॥ अंतर्जले वारिचरप्रसंगात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥५०॥ संगं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि ॥ एकश्चरन्रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ॥५१॥ एकस्तपस्व्यहमथांभसि मत्स्यसंगात्पंचाशदासमुत पंचसहस्रसर्गः ॥ नांतं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥५२॥ एवं वसन्गृहे कालं विरक्तो न्यासमास्थितः ॥ वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥५३॥ तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्षणमात्मवान् ॥ सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥५४॥ ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिम् ॥ अन्वीयुस्तत्प्रभावेन अग्निं शांतमिवार्चिषः ॥ ५५ ॥ इति श्रीमद्भागवते म० न० स्कंधे सौभर्याख्याने षष्ठोऽध्यायः ॥६॥ ॥ श्रीशुक उवाच ॥ मांधातुः पुत्रप्रवरो योंऽबरीषः प्रकीर्तितः ॥ पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः ॥ हारीतस्तस्य पुत्रोऽभून्मांधातृप्रवरा इमे ॥१॥ नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः ॥ तया रसातलं नीतो भुजगेंद्रप्रयुक्तया ॥२॥

मनोरथानामंतं न व्रजामि ॥५२॥ एवं गृहे वसन् प्राप्तवैराग्यः स सौभरिर्वनं जगाम । तदा तत्पत्न्योऽप्यनुययुः ॥ ५३ ॥ तत्र वने स ऋषिस्तीव्रं तपस्तप्त्वाऽग्निभिः सहात्मानं ब्रह्मणि युयोज ॥५४॥ तदा ताः स्त्रियः पत्युर्मोक्षरूपां गतिं वीक्ष्य सहगमनविधिना तद्गतिं प्रापुः ॥५५॥ इति श्रीमद्भागवतचू० नवमस्कंधे षष्ठोऽध्यायः ॥६॥ ॥ मांधातुरन्वयः प्रोक्तः सप्तमे यत्र गीयते । पुरुकुत्सस्य चाख्यानं हरिश्चंद्रस्य चोत्तमम् ॥ १ ॥ श्रीशुक उवाच ॥ मांधातुर्यः पुत्रोंऽबरीषः कथितः स पितामहेन युवनाश्वेन पुत्रत्वेन स्वीकृतः । तस्य पुत्रो यौवनाश्वः । तस्य हारीतः । एते त्रयो[१] मांधातृगोत्रप्रवराः ॥ १ ॥ अथ मांधातृपुत्रो

---

[१] अंबरीषयौवनाश्वहारीताः ।

यः पुरुकुत्सस्तस्मै सर्पैः स्वभगिनी नर्मदा दत्ता। तया स रसातलं नीतः सन् तत्र गंधर्वान् जघान ॥ २ ॥ ततो नागास्तस्मै वरं ददुः। हे पुरुकुत्स, ये तव चरितं नाम च ग्रहीष्यंति तेषां सर्पभयं न स्यात् ॥३॥ तस्य पुरुकुत्सस्य पुत्रस्त्रसद्दस्युः। तस्याऽनरण्यः। तस्य हर्यश्वः। तस्याऽरुणः। तस्य निबंधनः ॥४॥ तस्य सत्यव्रतः। स त्रिशंकुरिति विश्रुतः। स पितुः शापात् चांडालतां प्राप्तोऽपि विश्वामित्रप्रभावेन सशरीरः स्वर्गं गतः। ततो देवैरधःशिराः पातितोऽपि विश्वामित्रेण बलात्स्तंभितः। सोऽद्यापि दिवि दृश्यते ॥ ५ ॥ ६ ॥ त्रिशंकोः पुत्रो हरिश्चंद्रः। यन्निमित्तं विश्वामित्र[3]वसिष्ठयोराडीबकयोः पक्षिणोः सतोर्बहुकालं युद्धं बभूव ॥ ७ ॥ स हरिश्चंद्रोऽनपत्यो नारदोपदेशतो वरुणं शरणं गत्वा मे पुत्रो जायतांम् ॥८॥ तेनैव त्वां यक्ष्य इति ययाचे। वरुणस्तथास्त्वित्युक्तवान्। ततो रोहितो नाम पुत्रो जातः ॥ ९ ॥ तदा वरुण एत्यानेन मां यजस्वेत्याह। तदा राजोवाच ॥ यदा पशुर्निर्गतदशदिवसः स्यात्तदा शुद्धो भवेत् ॥ १० ॥

गंधर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक् ॥ नागाल्लब्धवरः सर्पादभयं स्मरतामिदम् ॥ ३ ॥ त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य
देहकृत् ॥ हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ निबंधनः ॥ ४ ॥ तस्य सत्यव्रतः पुत्रस्त्रिशंकुरिति विश्रुतः ॥ प्राप्तश्चांडालतां शापाद्गुरोः
कौशिकतेजसा ॥ ५ ॥ सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ॥ पातितोऽवाक्शिरा देवैस्तेनैव स्तंभितो बलात् ॥ ६ ॥
त्रैशंकवो हरिश्चंद्रो विश्वामित्रवसिष्ठयोः ॥ यन्निमित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकम् ॥ ७ ॥ सोऽनपत्यो विषण्णात्मा नारदस्यो-
पदेशतः ॥ वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ॥८॥ यदि वीरो महाराज तेनैव त्वां यजे इति ॥ तथेति वरुणेनास्य पुत्रो
जातस्तु रोहितः ॥ ९ ॥ जातः सुतो ह्यनेनांग मां यजस्वेति सोऽब्रवीत् ॥ यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ॥१०॥
निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् ॥ दंताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति ॥ ११ ॥ जाता दंता यजस्वेति स
प्रत्याहाथ सोऽब्रवीत् ॥ यदा पतंत्यस्य दंता अथ मेध्यो भवेदिति ॥१२॥ पशोर्निपतिता दंता यजस्वेत्याह सोऽब्रवीत् ॥ यदा
पशोः पुनर्दंता जायंतेऽथ पशुः शुचिः ॥१३॥ पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ सांनाहिको यदा राजन्राजन्योऽथ
पशुः शुचिः ॥ १४ ॥ इति पुत्रानुरागेण स्नेहयंत्रितचेतसा ॥ कालं वंचयता तं तमुक्तो देवस्तमैक्षत ॥ १५ ॥ ॥

दशदिवसनिर्गमे सति वरुण आगत्य यजस्वेत्याह। राजा तमब्रवीत्। यदा पशोर्दंता जायेरन् तदा मेध्यो भवेत् ॥११॥ दंतेषु जातेषु वरुण आगत्य यजस्वेत्याह। राजा तमब्रवीत्। यदा दुग्धदंताः पतिष्यंति तदा मेध्यो भवेत् ॥ १२ ॥ दंतेषु पतितेषु वरुण आगत्य यजस्वेत्याह। तदा नृप आह। यदा पुनर्दंता भवेयुस्तदा पशुर्मेध्यो भवेत् ॥ १३ ॥ पुनर्दंतेषु जातेषु वरुण आगत्य यजस्वेत्याह। राजा तमाह। यदा युद्धयोग्यः स्यात्तदा मेध्यो भवेत् ॥ १४ ॥ एवं पुनः पुना राजा पुत्रस्नेहेन कालं वंचयामास। वरुणस्तं तं कालं प्रत्यैक्षत ॥ १५ ॥ ॥ ॥

---

[1] नर्मदया रसातलनयनादिकम्। [2] परिणीयमानविप्रकन्याहरणात्क्रुद्धस्य पितुः। [3] विश्वामित्रो राजसूयदक्षिणाच्छलेन हरिश्चंद्रसर्वस्वमपहृत्य यातयामास। तच्छ्रुत्वा कुपितो वसिष्ठो विश्वामित्रं त्वमाडी भवेति शशाप। सोऽपि त्वं बको भवेति वसिष्ठं शशाप। तयोश्च युद्धमभूदिति।

ततो रोहितः पितुश्चिकीर्षितं ज्ञात्वा प्राणरक्षणाय धनुर्गृहीत्वा वनं जगाम ॥१६॥ तज्ज्ञात्वा वरुणो राज्ञि महोदरं विदधे । तदा रोहितः पितरं जलोदरग्रस्तं श्रुत्वा ग्राममेयाय । तदेंद्रो मार्गे तं प्रतिषिध्य प्राह ॥१७॥ हे रोहित, तीर्थक्षेत्रसेवनैर्भूमेः पर्यटनं पुण्यम् । तच्छ्रुत्वा सोऽपि वने एकं वर्षमवसत् ॥१८॥ एवं द्वितीये तृतीये चतुर्थे पंचमे च वर्षे इंद्रो वृद्धब्राह्मणो भूत्वा रोहितं न्यषेधत् ॥१९॥ षष्ठसंवत्सरस्यांते पितरमतिशयेन वरुणग्रस्तं श्रुत्वा पुरींप्रति गच्छन् रोहितः स्वमरणनिवृत्त्यर्थं मार्गेऽजीगर्तद्विजस्य त्रिषु पुत्रेषु मध्यमं शुनःशेपं पुत्रं क्रीत्वा गृहमागतः ॥२०॥ तं पित्रे दत्वा ववंदे ।ततो हरिश्चंद्रो मुक्तोदरः सन् पुरुषमेधेन ॥२१॥ वरुणादीन् देवानयजत् । तस्मिन् यज्ञे विश्वामित्रो होताऽभवत् ॥२२॥ जमदग्निरध्वर्युः। वसिष्ठो ब्रह्मा । अयास्यो मुनिरुद्गाता चाभवन्।

रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितम् ॥ प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत ॥ १६ ॥ पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम् ॥
रोहितो ग्राममेयाय तमिंद्रः प्रत्यषेधत ॥ १७॥ भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः ॥ रोहितायादिशच्छक्रः सोऽप्यरण्येऽवसत्समाम्
॥ १८ ॥ एवं द्वितीये तृतीये चतुर्थे पंचमे तथा ॥ अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा ॥ १९ ॥ षष्ठं संवत्सरं तत्र चरित्वा
रोहितः पुरीम् ॥ उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतम् ॥ २० ॥ शुनःशेपं पशुं पित्रे प्रदाय समवंदत ॥ ततः पुरुषमेधेन हरिश्चंद्रो
महायशाः ॥२१॥ मुक्तोदरोऽयजद्देवान्वरुणादीन्महत्कथः॥ विश्वामित्रोऽभवत्तस्मिन्होता चाध्वर्युरात्मवान् ॥२२॥ जमदग्निरभूद्ब्रह्मा
वसिष्ठोऽयास्यसामगः ॥ तस्मै तुष्टो ददाविंद्रः शातकौंभमयं रथम् ॥ २३ ॥ शुनःशेपस्य माहात्म्यमुपरिष्टात्प्रचक्ष्यते ॥ सत्यसारां
धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥ २४ ॥ विश्वामित्रो भृशं प्रीतो ददावविहतां गतिम् ॥ मनः पृथिव्यां तामद्भिस्तेजसाऽपोऽनिलेन
तत् ॥२५॥ खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि॥ तस्मिन् ज्ञानकलां ध्यात्वा तयाऽज्ञानं विनिर्दहन् ॥२६॥ हित्वा तां स्वेन भावेन
निर्वाणसुखसंविदा ॥ अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबंधनः ॥२७॥ इति श्री० म० हरिश्चंद्रोपाख्यानं नाम सप्तमोऽध्यायः ७
श्रीशुक उवाच ॥ हरितो रोहितसुतश्चंपस्तस्माद्विनिर्मिता ॥ चंपापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥ १ ॥ भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि
बाहुकः ॥ सोऽरिभिर्हृतभू राजा सभार्यो वनमाविशत् ॥ २ ॥ ॥ ॥

तस्मिन् यज्ञे तुष्ट इंद्रस्तस्मै हरिश्चंद्राय सौवर्णं रथं ददौ ॥२३॥ शुनःशेपस्य माहात्म्यमग्रे[1] वक्ष्यामि ॥२४॥ सभार्यस्य हरिश्चंद्रस्य धैर्यं दृष्ट्वा प्रीतो विश्वामित्रस्तस्मै ज्ञानं ददौ । तेन हरिश्चंद्रो मनो भूमौ धारयन् तां जले जलं तेजसि तेजो वायौ ॥ २५ ॥ वायुमाकाशे तदहंकारेऽहंकारं महत्तत्वे एकीकुर्वन् तस्मिन् ज्ञानांशं ध्यात्वा तेनाज्ञानं दहन् ॥२६॥ तज्ज्ञानं च हित्वा मुक्तबंधनः सन् स्वस्वरूपेण तस्थौ ॥२७॥ इति श्रीम० चू० नवम० सप्तमोऽध्यायः ॥७॥ अष्टमे रोहितस्योक्तो वंशो यत्राभवन्नृपः । सगरः कपिलाक्षेपाग्निर्दग्धा यस्य सूनवः ॥१॥ श्रीशुक उवाच ॥ रोहितस्य पुत्रो हरितः । तस्य चंपः । येन चंपा नगरी निर्मिता । तस्य सुदेवः । तस्य विजयः ॥ १ ॥ तस्य भरुकः । तस्य वृकः । तस्य बाहुकः । स शत्रुभिर्हृतराज्यः सन् सभार्यो वनं गत्वा ॥ २ ॥ ॥

---

[1] विश्वामित्रसुताख्यानप्रसंगेन ।

कालेन मृतः । तदाऽग्निं प्रवेष्टुकामां तस्य भार्यामौर्वो ऋषिः सगर्भां ज्ञात्वा निवारितवान् ॥ ३ ॥ तज्ज्ञात्वाऽस्यै सपत्नीभिरन्नेन सह विषं दत्तम् । तेन विषेण सह सा पुत्रं सुषुवे ॥४॥ स सगरनामा सार्वभौमो राजा बभूव । यस्य पुत्रैः सागरः कृतः । किंच । य और्वऋषिवचसा तालजंघान् यवनान् हैहयान् बर्बरांश्च हत्वा ॥५॥ कांश्चिच्च और्वगुरुवाक्येनाहत्वा मुंडितान् अर्धमुंडितान् श्मश्रुधरान् छिन्नावयवान् विरूपान् नग्नांश्च चक्रे ॥६॥७॥ स और्वऋषिणोपदिष्टयोगेनाश्वमेधैर्हरिमयजत। तस्य यज्ञ इंद्रोऽश्वं जहार ॥८॥ तदा राज्ञः सुमतेर्भार्यायाः षष्टिसहस्राणि पुत्राः पितुराज्ञया हयमन्वेषमाणाः संतः समंतान्महीं न्यखनन् ॥९॥तत ऐशान्यां दिशि कपिलाश्रमेऽश्वं ददृशुः। अहो एषोऽश्वहरश्चौरो मीलितलोचन आस्ते ॥१०॥ एष पापो हन्यतां हन्यताम् । इत्युक्त्वोदायुधास्ते कपिलं

वृद्धं तं पंचतां प्राप्तं महिष्यनुमरिष्यती ॥ और्वेण जानताऽऽत्मानं प्रजावंतं निवारिता ॥ ३ ॥ आज्ञायास्यै सपत्नीभिर्गरो दत्तोंऽधसा सह॥ सह तेनैव संजातः सगराख्यो महायशाः॥४॥ सगरश्चक्रवर्त्यासीत्सागरो यत्सुतैः कृतः॥ यस्तालजंघान्यवनान् शकान्हैहयबर्बरान् ॥५॥ नावधीद्गुरुवाक्येन चक्रे विकृतवेषिणः ॥ मुंडान् श्मश्रुधरान्कांश्चिन्मुक्तकेशार्धमुंडितान् ॥६॥ अनंतर्वाससः कांश्चिदबहिर्वाससोऽपरान् ॥ सोऽश्वमेधैरयजत सर्ववेदसुरात्मकम् ॥ ७ ॥ और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम् ॥ तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः ॥ ८ ॥ सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः ॥ हयमन्वेषमाणास्ते समंतान्न्यखनन्महीम् ॥ ९ ॥ प्रागुदीच्यां दिशि हयं ददृशुः कपिलांतिके ॥ एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥ १० ॥ हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः ॥ उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥ ११ ॥ स्वशरीराग्निना तावन्महेंद्रहृतचेतसः ॥ महद्व्यतिक्रमहता भस्मसादभवन्क्षणात् ॥ १२ ॥ न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्वधामनि ॥ कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ॥ १३ ॥ यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययम् ॥ भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः ॥ १४ ॥ योऽसमंजस इत्युक्तः स केशिन्या नृपात्मजः ॥ तस्य पुत्रोंऽशुमान्नाम पितामहहिते रतः ॥ १५ ॥ असमंजस आत्मानं दर्शयन्नसमंजसम् ॥ जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः ॥ १६ ॥ आचरन्गर्हितं लोके ज्ञातीनां कर्म विप्रियम् ॥ सरय्वां क्रीडतो बालान्प्रास्यदुद्वेजयन् जनम् ॥१७॥ ॥ ॥

हंतुमभिययुः । तदा मुनिर्नेत्रोन्मीलनं चकार ॥११॥ तदा कपिलापराधेन हतप्रायाणां तेषामेव शरीरादुत्पन्नेनाग्निना ते सर्वे क्षणाद्भस्मसादभवन् ॥ १२ ॥ केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयंति तदसंगतम् । यतः शुद्धसत्वमूर्तौ कपिले क्रोधरूपस्तमोगुणः कथं स्यात् ॥ १३ ॥ येन सांख्यशास्त्रमयी दृढा नौका प्रवर्तिता । यया मुमुक्षुः संसारसमुद्रं तरति । तस्य शत्रुमित्रादिभेददृष्टिः कुतः स्यात् । न स्यादेव ॥१४॥ सगरस्यान्यस्यां केशिन्यां भार्यायामसमंजस इति पुत्रो जातः । तस्यांशुमान् ॥ १५ ॥ असमंजसस्तु पूर्वजन्मनि योगी सन् संगाद्धेतोर्योगाच्चालितः । अत इदानीं जातिस्मरः सन् संगपरिहाराय लोके आत्मानमसमंजसं दर्शयन् ॥ १६ ॥ लोकविप्रियं कर्माचरत् । एकदा सरयूनदीतीरे क्रीडतो बालान् सरय्वां प्राक्षिपत् ॥ १७ ॥ ॥

एवं वृतः परित्यक्तः पित्रा स्नेहमपोह्य वै ॥ योगैश्वर्येण बालांस्तान्दर्शयित्वा ततो ययौ ॥ १८ ॥ अयोध्यावासिनः सर्वे बालकान्पुनरागतान् ॥ दृष्ट्वा विसिस्मिरे राजन्राजा चाप्यन्वतप्यत ॥ १९ ॥ अंशुमांश्चोदितो राज्ञा तुरंगान्वेषणे ययौ ॥ पितृव्यखातानुपथं भस्मांति ददृशे हयम् ॥ २० ॥ तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजम् ॥ अस्तौत्समाहितमनाः प्रांजलिः प्रणतो महान् ॥ २१ ॥ अंशुमानुवाच ॥ न पश्यति त्वां परमात्मनोऽजनो न बुध्यतेऽद्यापि समाधियुक्तिभिः ॥ कुतोऽपरे तस्य मनःशरीरधीविसर्गसृष्टा वयमप्रकाशाः ॥ २२ ॥ ये देहभाजस्त्रिगुणप्रधाना गुणान्विपश्यंत्युत वा तमश्च ॥ यन्मायया मोहितचेतसस्ते विदुः स्वसंस्थं न बहिःप्रकाशाः ॥ २३ ॥ तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः ॥ सनंदनाद्यैर्मुनिभिर्विभाव्यं कथं विमूढः परिभावयामि ॥ २४ ॥ प्रशांतमायागुणकर्मलिंगमनामरूपं सदसद्विमुक्तम् ॥ ज्ञानोपदेशाय गृहीतदेहं नमामहे त्वां पुरुषं पुराणम् ॥ २५ ॥ त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु ॥ भ्रमंति कामलोभेर्ष्यामोहविभ्रांतचेतसः ॥ २६ ॥ अद्य नः सर्वभूतात्मन्कामकर्मेंद्रियाशयः ॥ मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥ २७ ॥ श्रीशुक उवाच ॥ इत्थं गीतानुभावस्तं भगवान्कपिलो मुनिः ॥ अंशुमंतमुवाचेदमनुगृह्य धिया नृप ॥ २८ ॥ श्रीभगवानुवाच ॥ अश्वोऽयं नीयतां वत्स पितामहपशुस्तव ॥ इमे च पितरो दग्धा गंगांऽभोऽर्हंति नेतरत् ॥ २९ ॥ तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ॥ सगरस्तेन पशुना क्रतुशेषं समापयत् ॥ ३० ॥ ॥ ॥ ॥

तदा जनास्तद्राज्ञे कथयामासुः । राजा तच्छ्रुत्वा पुत्रस्नेहं त्यक्त्वा तं देशान्निःसारयामास । तदा असमंजसो योगबलेन मृतान् बालान् दर्शयित्वा वनं ययौ ॥ १८ ॥ सर्वेऽयोध्यावासिनः पुनरागतान् बालान् दृष्ट्वा विसिस्मिरे । राजा चाप्यन्वतप्यत ॥ १९ ॥ राज्ञाऽश्वान्वेषणे प्रेरितोंऽशुमान् पितृव्यखातमार्गेणैशानीं दिशं गत्वा भस्मसमीपेऽश्वं ददृशे ॥ २० ॥ तत्रासीनं कपिलाख्यं भगवंतं दृष्ट्वा प्रणम्यैकाग्रमनास्तुष्टाव ॥ २१ ॥ अंशुमानुवाच ॥ हे कपिल, ब्रह्मापि समाध्यादिनापि त्वां परमेश्वरमद्यापि न पश्यति न जानाति च । तत्सृष्टेषु देवतिर्यङ्नराणां सर्गेषु सृष्टा अर्वाचीनाः कुतस्त्वां पश्येयुः । तत्रापि वयमज्ञाः कुतः पश्याम ॥ २२ ॥ देहभाजस्त्वन्मायामोहिताः संतः स्वस्मिन् स्थितमपि त्वां न विदुः ॥ २३ ॥ तं शुद्धज्ञानमूर्तिं सनकादिमुनिभिर्विचिंत्यं त्वां मूढोऽहं कथं विचारयामि ॥ २४ ॥ हे प्रशांत, ज्ञानोपदेशाय गृहीतदेह पुराणपुरुष त्वा केवलं नमाम ॥ २५ ॥ कामलोभादिभिर्भ्रांतचित्ता नरा मायारचिते लोके सत्यबुद्ध्या गृहादिषु भ्रमंति ॥ २६ ॥ हे भगवन्, अद्य तव दर्शनान्मे दृढो मोहपाशश्छिन्नः । अतः कृतार्थोऽस्मि ॥ २७ ॥ श्रीशुक उवाच ॥ तदा प्रसन्नः कपिलो बुद्ध्याऽनुगृह्य तमाह ॥ २८ ॥ श्रीकपिल उवाच ॥ हे वत्स, तव पितामहस्य यज्ञपशुरयमश्वो नीयताम् । इमे दग्धास्ते पितृव्या गंगाजलमर्हंति ॥ २९ ॥ इति श्रुत्वा तं परिक्रम्य शिरसा प्रणम्य यज्ञाश्वमानयत् । सगरस्तेन पशुना यज्ञशेषं समापयत् ॥ ३० ॥ ॥

---

१ अत्र गंगा आगता चेत्तर्हि तस्या जलस्पर्शेनैषामुद्धारो भविष्यतीत्यर्थः ।

ततः सगरो राज्यमंशुमति न्यस्य मुक्तबंधनः सन्नौर्वगुरूपदिष्टमार्गेण परमां गतिं लेभे ॥३१॥ इति श्रीमद्भागवतचूर्णिकायां नवमस्कंधे अष्टमोऽध्यायः ॥ ८ ॥

॥ नवमेंऽशुमतो वंशः खट्वांगावधि वर्ण्यते । गंगां भूतलमानिन्ये यस्य पौत्रो भगीरथः ॥१॥ श्रीशुक उवाच ॥ अंशुमान् गंगानयनकाम्यया तपः कुर्वन् कालेन मृतः ॥१॥ तत्पुत्रो दिलीपस्तद्वत्तपः कुर्वन् मृत्युं प्राप्तः । तत्पुत्रो भगीरथो महत्तपस्तेपे ॥२॥ तदा तंप्रति गंगा आत्मानं दर्शयित्वा जगाद । हे भगीरथ, अहं ते प्रसन्ना वरदाऽस्मि । एवं गंगयोक्तो राजा स्वाभिप्रायं तस्यै शशंस ॥ ३ ॥ तच्छ्रुत्वा गंगा प्राह । हे नृप, गगनात्पृथ्वीतले पतंत्या मम वेगं कश्चिद्धारयिष्यति किम् । अन्यथाहं भूतलं भित्वा रसातलं यास्ये ॥४॥ किंच । अहं भूमौ नागमिष्यामि । यतो नरा मयि स्वपापं क्षालयंति तदहं कुत्र त्यजामि ।

राज्यमंशुमति न्यस्य निस्पृहो मुक्तबंधनः ॥ और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमाम् ॥ ३१ ॥ इति श्रीमद्भागवते महा॰ नव॰ सगरोपाख्यानेऽष्टमोऽध्यायः ॥८॥ ॥ श्रीशुक उवाच ॥ अंशुमांश्च तपस्तेपे गंगानयनकाम्यया ॥ कालं महांतं नाशक्नोत्ततः कालेन संस्थितः ॥१॥ दिलीपस्तत्सुतस्तद्वदशक्तः कालमेयिवान् ॥ भगीरथस्तस्य पुत्रस्तेपे स सुमहत्तपः ॥२॥ दर्शयामास तं देवी प्रसन्ना वरदास्मि ते ॥ इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ॥३॥ कोऽपि धारयिता वेगं पतंत्या मे महीतले ॥ अन्यथा भूतलं भित्त्वा नृप यास्ये रसातलम् ॥४॥ किं चाहं न भुवं यास्ये नरा मय्यामृजंत्यघम् ॥ मृजामि तदघं कुत्र राजंस्तत्र विचिंत्यताम् ॥ ५ ॥ भगीरथ उवाच ॥ साधवो न्यासिनः शांता ब्रह्मिष्ठा लोकपावनाः ॥ हरंत्यघं तेंऽगसंगात्तेष्वास्ते ह्यघभिद्धरिः ॥ ६ ॥ धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् ॥ यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तंतुषु ॥ ७ ॥ (इति तस्य वचः श्रुत्वा गंगा तं पुनरब्रवीत् ॥ प्रसादय महेशानं धारणार्थं मदंभसाम् ॥ १ ॥) इत्युक्त्वा स नृपो देवं तपसा तोषयच्छिवम् ॥ कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ॥ ८ ॥ तथेति राज्ञाऽभिहितं सर्वलोकहितः शिवः ॥ दधारावहितो गंगां पादपूतजलां हरेः ॥ ९ ॥ भगीरथः स राजर्षिर्निन्ये भुवनपावनीम् ॥ यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते ॥ १० ॥ रथेन वायुवेगेन प्रयांतमनुधावती ॥ देशान्पुनंती निर्दग्धानासिंचत्सगरात्मजान् ॥११॥ यज्जलस्पर्शमात्रेण ब्रह्मदंडहता अपि ॥ सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥१२॥ भस्मीभूतांगसंगेन स्वर्याताः सगरात्मजाः ॥ किं पुनः श्रद्धया देवीं ये सेवंते धृतव्रताः ॥ १३ ॥

तद्विषयो विचारो भवता कार्यः ॥५॥ भगीरथ उवाच ॥ हे गंगे, साधवः स्वकीयांगसंगेन ते पापं हरिष्यंति । तेषां हृदये पापहर्ता हरिरस्ति ॥६॥ शिवश्च ते प्रवाहवेगं धारयिष्यति । यस्मिन्निदं जगदोतप्रोतमस्ति ॥७॥ (इति राज्ञो वचः श्रुत्वा तं गंगाऽब्रवीत् । त्वं मद्वेगधारणार्थं शंकरं प्रसन्नं कुरु ॥ १ ॥) इति श्रुत्वा स तपसा शिवं तोषयामास । शिवश्च स्वल्पकालेन तस्य प्रसन्नोऽभूत् ॥८॥ स नृपोक्तं सर्वं श्रुत्वा तथेत्युक्त्वा गंगां दधार ॥९॥ भगीरथो यत्र पितॄणां देहा भस्मीभूताः पतिता स्तत्र भुवनपावनीं गंगां निन्ये ॥१०॥ वायुवेगेन रथेन गच्छंतं नृपं पश्चाद्धावंती सा देशान् पुनंती सती सगरपुत्रानासिंचत् ॥ ११ ॥ यस्या जलस्पर्शमात्रेण कपिले कृतापराधेन दग्धा अपि सगरपुत्राः स्वर्गं ययुः ॥ १२ ॥ ये तु श्रद्धया गंगां सेवंते ते स्वर्गं गच्छंतीति किमु वक्तव्यम् ॥ १३ ॥

हे नृप, गंगाया यन्माहात्म्यं कथितं तदाश्चर्यं न । यतः सा गंगा भगवच्चरणप्रसूता भुक्तिदात्र्यप्यस्ति ॥ १४ ॥ यस्मिन् भगवति मुनयो मनो निवेश्य मुक्तिं प्राप्ताः ॥१५॥ भगीरथस्य श्रुतः पुत्रः । तस्य नाभः । तस्य सिंधुद्वीपः । तस्याऽयुतायुः॥१६॥ तस्य ऋतुपर्णः । यो नलाय द्यूतशास्त्रहृदयं दत्वा तस्मादश्वविद्यां प्राप्तः । तत्पुत्रः सर्वकामः ॥१७॥ तस्य सुदासः । तस्य सौदासः । यं मित्रसहं[१] कल्माषपादं चाहुः ॥ स वसिष्ठशापाद्राक्षसः स्वकर्मणा औरसपुत्ररहितश्च जातः ॥१८॥ राजोवाच ॥ सौदासस्य गुरोः शापः किंनिमित्तः एतत्कथ्यताम् ॥१९॥ श्रीशुक उवाच ॥ एकदा सौदासो मृगयार्थं भ्रमन् कंचिद्राक्षसं जघान । तस्य भ्राता पलाय्य गतः ॥२०॥ स राज्ञा कृतं भ्रातृवधं चिंतयन् पाचकरूपो भूत्वा तद्गृहे वर्तमानः सन्नेकदा भोक्तुकामाय वसिष्ठाय नरमांसं पक्त्वा ददौ

न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ॥ अनंतचरणांभोजप्रसूताया भवच्छिदः ॥१४॥ संनिवेश्य मनो यस्मिन् श्रद्धया मुनयोऽमलाः ॥ त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम् ॥१५॥ श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् ॥ सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥१६॥ ऋतुपर्णो नलसखो योऽश्वविद्यामयान्नलात् ॥ दत्वाऽक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः ॥१७॥ ततः सुदासस्तत्पुत्रो मदयंतीपतिर्नृप ॥ आहुर्मित्रसहं यं वै कल्माषांघ्रिमुत क्वचित् ॥ वसिष्ठशापाद्रक्षोऽभूदनपत्यः स्वकर्मणा ॥१८॥ राजोवाच ॥ किंनिमित्तो गुरोः शापः सौदासस्य महात्मनः ॥ एतद्वेदितुमिच्छामः कथ्यतां न रहो यदि ॥१९॥ श्रीशुक उवाच ॥ सौदासो मृगयां किंचिच्चरन्रक्षो जघान ह ॥ मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥ २० ॥ स चिंतयन्नघं राज्ञः सूदरूपधरो गृहे ॥ गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् ॥ २१ ॥ परिवेक्ष्यमाणं भगवान्विलोक्याभक्ष्यमंजसा ॥ राजानमशपत्क्रुद्धो रक्षो ह्येवं भविष्यसि ॥ २२ ॥ रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकम् ॥ सोऽप्यपोंऽजलिनाऽऽदाय गुरुं शप्तुं समुद्यतः ॥२३॥ वारितो मदयंत्याऽपो रुशतीः पादयोर्जहौ ॥ दिशः खमवनिं सर्वं पश्यन् जीवमयं नृपः ॥२४॥ राक्षसं भावमापन्नः पादे कल्माषतां गतः ॥ व्यवायकाले ददृशे वनौको दंपती द्विजौ ॥२५॥ क्षुधार्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थवत् ॥ न भवान्राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥२६॥ मदयंत्याः पतिर्वीर नाधर्मं कर्तुमर्हसि ॥ देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजम् ॥ २७ ॥ देहोऽयं मानुषो राजन्पुरुषस्याखिलार्थदः ॥ तस्मादस्य वधो वीर सर्वार्थवध उच्यते ॥ २८ ॥ ॥

॥२१॥ वसिष्ठस्तन्मनुष्यमांसमभक्ष्यं विलोक्य क्रुद्धः सन् राजानं राक्षसो भविष्यसीति शशाप ॥२२॥ ततो राक्षसकृतं तन्नरमांसपरिवेषणं विदित्वा द्वादशवार्षिकं शापं चक्रे । तदा राजा स्वांजलौ जलं गृहीत्वा गुरुं शप्तुं प्रवृत्तः ॥२३॥ तदा तत्पत्न्या मदयंत्या निवारितः । ततस्तत्तीक्ष्णं शापोदकं पृथिव्यादिकं सर्वं जीवमयं पश्यन् स्वपादयोर्जहौ॥२४॥ततो राक्षसधर्मं प्राप्तः स राजा पादे कल्माषतां प्राप्तः। स एकदा वने मैथुनासक्तौ वनवासिनौ स्त्रीपुरुषौ तपस्विनौ दृष्ट्वा ॥२५॥ क्षुधार्तो राजा तन्मिथुनस्थं विप्रं जगृहे । तदा तत्पत्नी जगाद । भवान् राक्षसो न । किंतु इक्ष्वाकूणां वंशजोऽसि ॥२६॥ हे वीर, त्वं मदयंत्याः पतिः अधर्मं कर्तुं नार्हसि । पुत्रकामाया मे अपूर्णरतिं पतिं देहि ॥२७॥ हे राजन्, अयं मानुषो देहः सर्वपुरुषार्थदः । तद्वधे सर्वपुरुषार्थवधो भवति ॥ २८ ॥

---

[१] मित्रस्य कलत्रस्य वाचः सहनान्मित्रसहः।

एष हि ब्राह्मणो विद्वांस्तपःशीलगुणान्वितः ॥ आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् ॥ सर्वभूतात्मभावेन भूतेष्वंतर्हितं गुणैः ॥ २९ ॥ सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद्विभो ॥ कथमर्हति धर्मज्ञ वधं पितुरिवात्मजः ॥३०॥ तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ॥ कथं वधं यथा बभ्रोर्मन्यते सन्मतो भवान् ॥३१॥ यद्ययं क्रियते भक्षस्तर्हि मां खाद पूर्वतः ॥ न जीविष्ये विना येन क्षणं च मृतकं तथा ॥३२॥ एवं करुणभाषिण्या विलपंत्या अनाथवत् ॥ व्याघ्रः पशुमिवाखादत्सौदासः शापमोहितः ॥ ३३ ॥ ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् ॥ शोचंत्यात्मानमूर्वीशमशपत्कुपिता सती ॥३४॥ यस्मान्मे भक्षितः पाप कामार्तायाः पतिस्त्वया ॥ तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ॥ ३५ ॥ एवं मित्रसहं शप्त्वा पतिलोकपरायणा ॥ तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ॥३६॥ विशापो द्वादशाब्दांते मैथुनाय समुद्यतः ॥ विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ॥ ३७ ॥ तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाऽप्रजाः ॥ वसिष्ठस्तदनुज्ञातो मदयंत्यां प्रजामधात् ॥ ३८ ॥ सा वै सप्तसमा गर्भमबिभ्रन्न व्यजायत ॥ जघ्नेऽश्मनोदरं तस्याः सोऽश्मकस्तेन कथ्यते ॥३९॥ अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ॥ नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ॥४०॥ ततो दशरथस्तस्मात्पुत्र ऐडविडस्ततः ॥ राजा विश्वसहो यस्य खट्वांगश्चक्रवर्त्यभूत् ॥४१॥ यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः ॥ मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ॥४२॥ न मे ब्रह्मकुलात्प्राणाः कुलदैवान्न चात्मजाः ॥ न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ॥४३॥ न बाल्येऽपि मतिर्मह्यमधर्मे रमते क्वचित् ॥ न पश्यामुत्तमश्लोकादन्यत्किंचन वस्त्वहम् ॥४४॥

अयं तु द्विजः शीलगुणान्वितो महापुरुषमाराधयितुमिच्छुः ॥ २९ ॥ सोऽयं ब्रह्मर्षिश्रेष्ठो राजर्षिश्रेष्ठाद्भवतो वधं कथमर्हति ॥ ३० ॥ हे धर्मज्ञ, अपापस्य ब्रह्मवादिनस्तस्य वधं त्वं कथं साधु मन्यसे ॥ ३१ ॥ यदीमं त्वं भक्षयितुमेवेच्छसि तर्हि त्वं मां पूर्वं खाद । तेन विनाहं क्षणमपि न जीविष्ये ॥३२॥ एवं तस्याः सकरुणं भाषिण्याः अनाथवद्विलपंत्याश्च सत्या व्याघ्रः पशुमिव सौदासस्तं चखाद ॥ ३३ ॥ सा स्त्री राक्षसेन भक्षितं पतिं वीक्ष्य कुपिता सती प्राह ॥ ३४ ॥ हे पाप, कामार्ताया मे पतिर्यतस्त्वया भक्षितस्तस्मात्स्त्रीसंगकाले त्वं मरिष्यसि ॥ ३५ ॥ एवं सौदासं शप्त्वा तदस्थीनि गृहीत्वाऽग्नौ प्रविश्य भर्तुर्गतिं गता ॥ ३६ ॥ राजा द्वादशवर्षांते शापरहितः सन् गृहे गत्वा मैथुनायोद्युक्तः । तदा ब्राह्मणीशापं विज्ञाय महिष्या निवारितः ॥ ३७ ॥ ततः प्रभृति स राजा स्त्रीसुखं तत्याज । तेन कर्मणा अप्रजो जातः । ततो राजाज्ञया वसिष्ठो मदयंत्यां गर्भमधात् ॥ ३८ ॥ सा सप्तवर्षाणि गर्भं दधार । ततो वसिष्ठस्तस्या उदरमश्मना जघान । तेन कारणेनोत्पन्नः पुत्रोऽश्मकः कथ्यते ॥ ३९ ॥ अश्मकस्य मूलकः पुत्रः । यः स्त्रीभिः स्ववेषं दत्वा परशुरामाद्रक्षितः । अतो नारीकवच इति नामांतरं प्राप्तः । स निःक्षत्रे सति क्षत्रियवंशस्य मूलकोऽभवत् ॥ ४० ॥ तस्य दशरथः । तस्यैडविडः । तस्य विश्वसहः । तस्य खट्वांगः ॥ ४१ ॥ यो देवैः प्रार्थितो दैत्यानवधीत् । तस्य प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते स खट्वांगो मुहूर्तमात्रमायुर्ज्ञात्वा विमानेन स्वपुरं प्राप्य भगवति मनः संदधे ॥४२॥ तद्दर्शयति । मम ब्राह्मणकुलात्प्राणपुत्रस्त्रीराज्यादयोऽपि नातिप्रियाः ॥ ४३ ॥ मे बुद्धिः कदाप्यधर्मे न रमते । विष्णुं विनाऽन्यद्वस्त्वहं न पश्यामि ॥ ४४ ॥ ॥

मह्यं देवैर्वरो दत्तः तमहं न वृणे ॥४५॥ ये देवास्तेऽपि स्वहृदिस्थं हरिं न पश्यंति। अपरे न पश्यंतीति किमु वक्तव्यम् ॥४६॥ अतो भगवद्भावनया विषयेषु संगं हित्वा तं भगवंतमहं शरणं प्रपद्ये ॥४७॥ इति बुद्ध्या निश्चित्य देहाद्यभिमानरूपमज्ञानं हित्वा भगवद्भक्त्या यं वासुदेव इति गृणंति तं स्वस्वरूपभूतं हरिं प्राप्तः ॥४८॥४९॥ इति श्रीम०चू०नव०नवमोऽध्यायः ॥९॥ ॥ दशमे प्राह खट्वांगवंशे श्रीरामसंभवम्। तच्चरित्रं च लंकेशं हत्वाऽयोध्यागमावधि ॥१॥ श्रीशुक उवाच॥ खट्वांगाद्दीर्घबाहुः[1]। तस्य रघुः। तस्याजः। तस्य दशरथः ॥१॥ तस्य देवैः प्रार्थितो हरिरंशेन रामलक्ष्मणभरतशत्रुघ्ना इति चतुर्धा पुत्रत्वं प्राप्तः ॥२॥ तस्य चरित्रं

देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ॥ न वृणे तमहं कामं भूतभावनभावनः ॥ ४५ ॥ ये विक्षिप्तेंद्रियधियो देवास्ते स्वहृदि स्थितम् ॥ न विंदंति प्रियं शश्वदात्मानं किमुतापरे ॥ ४६ ॥ अथेशमायारचितेषु संगं गुणेषु गंधर्वपुरोपमेषु ॥ रूढं प्रकृत्यात्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥४७॥ इति व्यवसितो बुद्ध्या नारायणगृहीतया ॥ हित्वान्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥४८॥ यत्तद्ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितम् ॥ भगवान्वासुदेवेति यं गृणंति हि सात्वताः ॥४९॥ इति श्रीम० महा० नव० सूर्यवंशानुवर्णने नवमोऽध्यायः ॥९॥ ॥ श्रीशुक उवाच ॥ खट्वांगाद्दीर्घबाहुश्च रघुस्तस्मात्पृथुश्रवाः ॥ अजस्ततो महाराजस्तस्माद्दशरथोऽभवत् ॥१॥ तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः ॥ अंशांशेन चतुर्धाऽगात्पुत्रत्वं प्रार्थितः सुरैः ॥२॥ रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ॥ तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः ॥ श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥३॥ गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरींद्रानुजाभ्याम् ॥ वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा रोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोशलेंद्रोऽवतान्नः ॥४॥ विश्वामित्राध्वरे येन मारीचाद्या निशाचराः ॥ पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुंगवाः ॥५॥ यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतम् ॥ आदाय बालगजलील इवेक्षुयष्टिं सज्जीकृतं नृप विकृष्य बभंज मध्ये ॥६॥ जित्वानुरूपगुणशीलवयोंऽगरूपां सीताभिधां श्रियमुरस्यभिलब्धमानाम् ॥ मार्गे व्रजन्भृगुपतेर्व्यनयत्प्ररूढं दर्पं महीमकृत यस्त्रिरराजबीजाम् ॥ ७ ॥ यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ॥ राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसंगः ॥ ८ ॥ ॥

वाल्मीकिप्रमुखैर्ऋषिभिर्भूरि वर्णितं त्वया च मुहुः श्रुतं तथापि संक्षेपतः कथ्यमानं शृणु ॥३॥ यः श्रीरामः पितुः सत्यपालनार्थं राज्यं त्यक्त्वा वनं विवेश। यस्य मार्गश्रमः सुग्रीवलक्ष्मणाभ्यां दूरीकृतः।शूर्पणख्या विरूपकरणात्क्रुद्धेन रावणेन सीतायां हृतायां यःक्रुद्धः सन् समुद्रे सेतुं बद्ध्वा रावणादीन् जघान। स श्रीरामो नः संरक्षतु ॥४॥ किंच। यो विश्वामित्रस्य यज्ञे मारीचादीन् राक्षसान् जघान॥५॥यः सीतास्वयंवरे वाहकानां त्रिभिः शतैरुपनीतं शैवं धनुरिक्षुदंडमिव लीलया गृहीत्वा सज्जीकृतं तद्विकृष्य मध्ये बभंज ॥६॥ ततो गुणशीलवयोरूपादियुतां सीतानाम्नीं लक्ष्मीं जित्वा मार्गे व्रजन् परशुरामस्य गर्वं दूरीकृतवान् ॥७॥ततोऽयोध्यां प्राप्य राज्याभि-

---

[1] स एव दिलीप इत्युक्तः।

षेक समये विघ्नकर्त्र्याः कैकेय्या निमित्तेन पितुराज्ञया राज्यं हित्वा सीतालक्ष्मणसहितो वनं ययौ ॥८॥ ततः शूर्पणखाया रूपं विरूपं कृत्वा तस्याः खरत्रिशिरदूषणबंधुप्रमुखान् चतुर्दशसहस्रं राक्षसान् हत्वा दंडकारण्य उवास ॥९॥ ततः सीतां हरिष्यता रावणेन निसृष्टं स्वर्णहरिणरूपं मारीचं जघान॥१०॥ रावणेनासमक्षं सीतायां नीतायां सत्यां तद्वियोगेन दुःखितो रामः स्त्रीसंगिनां दुःखं दर्शयन् लक्ष्मणेन सह वने चचार॥११॥तत्र जटायुषं पुत्र इव दग्ध्वा ततः कबंधं राक्षसं हत्वा सुग्रीवादिभिः सख्यं विधाय वालिनि हते सति वानरैः सीतास्थितिं ज्ञात्वा तैः सह समुद्रतीरं जगाम॥१२॥ तत्र त्रिरात्रमुपवासेन प्रतीक्षितोऽपि समुद्रो यदा नोपस्थितस्तदा रामक्रोधेन भीतः सन् मूर्तिमान् भूत्वा पूजासाहित्यं शिरसि गृहीत्वा रामसमीप आगत्य जगाद ॥१३॥ हे भूमन्, वयं

रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्यबंधून् ॥ जघ्ने चतुर्दशसहस्रमपारणीयकोदंडपाणिरटमान उवास कृच्छ्रम् ॥९॥ सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते दशकंधरेण ॥ जघ्नेऽद्भुतैणवपुषाऽऽश्रमतोऽपकृष्टो मारीचमाशु विशिखेन यथा कमुग्रः ॥ १० ॥ रक्षोऽधमेन वृकवद्विपिनेऽसमक्षं वैदेहराजदुहितर्यपयापितायाम् ॥ भ्रात्रा वने कृपणवत्प्रियया वियुक्तः स्त्रीसंगिनां गतिमिति प्रथयंश्चचार ॥ ११ ॥ दग्ध्वात्मकृत्यहतकृत्यमहन्कबंधं सख्यं विधाय कपिभिर्दयितागतिं तैः ॥ बुद्ध्वाथ वालिनि हते प्लवगेंद्रसैन्यैर्वेलापगात्समनुजोऽजभवार्चितांघ्रिः ॥ १२ ॥ यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरो भयगीर्णघोषः ॥ सिंधुः शिरस्यर्हणं परिगृह्य रूपी पादारविंदमुपगम्य बभाष एतत् ॥ १३ ॥ न त्वां वयं जडधियोऽनुविदाम भूमन्कूटस्थमादिपुरुषं जगतामधीशम् ॥ यत्सत्वतः सुरगणा रजसः प्रजेशा मन्योश्च भूतपतयः स भवान्गुणेशः ॥ १४ ॥ कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीरपत्नीम् ॥ बध्नीहि सेतुमिह ते यशसो वितत्यै गायंति दिग्विजयिनो यमुपेत्य भूपाः ॥ १५ ॥ बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपींद्रकरकंपितभूरुहांगैः ॥ सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लंकां विभीषणदृशाऽऽविशदग्रदग्धाम् ॥ १६ ॥ सा वानरेंद्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटंका ॥ निर्भज्यमानधिषणध्वजहेमकुंभशृंगाटका गजकुलैर्ह्रदिनीव घूर्णा ॥ १७ ॥ रक्षःपतिस्तदवलोक्य निकुंभकुंभधूम्राक्षदुर्मुखसुरांतनरांतकादीन् ॥ पुत्रं प्रहस्तमतिकायविकंपनादीन्सर्वानुगान्समहिनोदथ कुंभकर्णम् ॥ १८ ॥ तां यातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखङ्गदुर्गाम् ॥ सुग्रीवलक्ष्मणमरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिरन्वितोऽगात् ॥ १९ ॥ ॥ ॥

जडधिय आदिपुरुषं त्वां न विदामः॥१४॥ त्वं मे जलमाक्रम्य यथेच्छं याहि । तथा रावणं हत्वा पत्नीं प्राप्नुहि । हे वीर, इदं मे जलं ते यद्यपि प्रतिबंधकं न भवति तथापि स्वयशोविस्ताराय सेतुं बध्नीहि ॥ १५ ॥ रामस्तद्वाक्यमभिनंद्य समुद्रे पर्वतशिखरैः सेतुं बद्ध्वा सुग्रीवनीलहनुमदादिभिः सह विभीषणेन दर्शितां लंकां प्रविवेश ॥ १६ ॥ तदा सा लंका वानरेंद्रसैन्यैः प्रकंपिता बभूव ॥ १७ ॥ तदृष्ट्वा रावणो निकुंभकुंभधूम्राक्षदुर्मुखसुरांतकादीन् सर्वानुगान् इंद्रजितं पुत्रं कुंभकर्णं भ्रातरं च युद्धाय प्राहिणोत् ॥१८ ॥ तदा खङ्गशूलधनुःशक्तितोमरादिभिर्युक्तां राक्षससेनां दृष्ट्वा रामः सुग्रीवलक्ष्मणहनुमद्गं-

धमादननीलादिभिः सह युद्धाय जगाम ॥१९॥ ततोऽगदाद्याः सेनापतयो वृक्षपर्वतगदाबाणै रावणसैन्यं जघ्नुः ॥ २० ॥ रावणः स्वसैन्यनाशं दृष्ट्वा क्रुद्धः सन् पुष्पकविमानमारुह्य रामसमीपं जगाम । उत च इंद्रप्रेरितेन मातलिना आनीते रथे विराजमानं रामं तीक्ष्णैर्बाणैर्जघान ॥२१॥ तदा रामस्तमाह । हे राक्षसपुरीषप्राय, त्वं मेऽसमक्षं भार्यां हृतवान् । अतो निंद्यकर्मकर्तुस्तेऽद्य काल इवाहं तत्फलं दर्शयामि ॥२२॥ एवं बहुधा निर्भर्त्स्य धनुषि संधितं बाणं मुमोच । तेन तद्धृदयं बिभेद । स दशमुखै रुधिरं वमन् लोके हाहेति जल्पति सति विमानान्न्यपतत् ॥ २३॥ ततो मंदोदर्याद्याः सहस्रशः स्त्रियो लंकाया निष्क्रम्य रुदत्यः ॥२४॥ तत्रैत्य स्वस्वपतीनालिंग्य रुरुदुरूचुश्च ॥२५॥ हे रावण, हे नाथ, वयं हताः स्मः । त्वद्विहीना लंका कं शरणं यायात् ॥२६॥ भवान् काम-

तेऽनीकपा रघुपतेरभिपत्य सर्वे द्वंद्वं वरूथमिभपत्तिरथाश्वयोधैः ॥ जघ्नुर्द्रुमैर्गिरिगदेषुभिरंगदाद्याः सीताभिमर्शहतमंगलरावणेशान् ॥ २० ॥ रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार रामम् ॥ स्वःस्यंदने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥ २१ ॥ रामस्तमाह पुरुषादपुरीष यन्नः कांतासमक्षमसतापहृता श्ववत्ते ॥ त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल इव कर्तुरलंघ्यवीर्यः ॥ २२ ॥ एवं क्षिपन्धनुषि संधितमुत्ससर्ज बाणं स वज्रमिव तद्धृदयं बिभेद ॥ सोऽसृग्वमन्दशमुखैर्न्यपतद्विमानाद्धाहेति जल्पति जने सुकृतीव रिक्तः ॥ २३ ॥ ततो निष्क्रम्य लंकाया यातुधान्यः सहस्रशः ॥ मंदोदर्या समं तस्मिन्प्ररुदत्य उपाद्रवन् ॥ २४ ॥ स्वान्स्वान्बंधून्परिष्वज्य लक्ष्मणेषुभिरर्दितान् ॥ रुरुदुः सुस्वरं दीना घ्नंत्य आत्मानमात्मना ॥ २५ ॥ हा हताः स्म वयं नाथ लोकरावण रावण ॥ कं यायाच्छरणं लंका त्वद्विहीना परार्दिता ॥ २६ ॥ नैवं वेद महाभाग भवान्कामवशं गतः ॥ तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥२७॥ कृतैषा विधवा लंका वयं च कुलनंदन ॥ देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥ २८ ॥ श्रीशुक उवाच ॥ स्वानां विभीषणश्चक्रे कोशलेंद्रानुमोदितः ॥ पितृमेधविधानेन यदुक्तं सांपरायिकम् ॥ २९ ॥ ततो ददर्श भगवानशोकवनिकाश्रमे ॥ क्षामां स्वविरहव्याधिं शिंशपामूलमास्थिताम् ॥ ३० ॥ रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकंपत ॥ आत्मसंदर्शनाह्लादविकसन्मुखपंकजाम् ॥३१॥ आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ॥ विभीषणाय भगवान्दत्वा रक्षोगणेशताम् ॥ ३२ ॥ लंकामायुश्च कल्पांतं ययौ चीर्णव्रतः पुरीम् ॥ अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ ३३ ॥ ॥ ॥

वशं गतः सन् सीतायास्तेजोऽनुभावं न वेद । येनेमां दशां प्राप्तः ॥२७॥ हे कुलनंदन, त्वया लंका वयं च विधवाः कृताः । देहो गृध्राणां भक्ष्यः कृत इत्यादिविलापं चक्रुः ॥२८॥ श्रीशुक उवाच ॥ विभीषणः श्रीरामानुज्ञया स्वानामौर्ध्वदेहिकं चक्रे ॥२९॥ ततो रामोऽशोकवनिकाश्रमे शिंशिपावृक्षमूले स्थितां कृशां वियोगदुःखयुक्तां दीनां भार्यां वीक्ष्य दयां चकार ॥३०॥३१॥ ततो रामः सीतां गृहीत्वा लक्ष्मणसुग्रीवहनुमदादिभिः सह पुष्पकविमानमारुरोह । तदा रामो विभीषणाय लंकाधिपत्यं कल्पांतमायुश्च दत्वा तेन सह मार्गे इंद्रादिभिरर्पितैः पुष्पैर्विकीर्यमाणो ब्रह्मादिभिश्च स्तूयमानः सन् स्वपुरीं ययौ ॥ ३२ ॥ ३३ ॥

तदा गोमूत्रपक्वयवान्नभोजनं जटिलं वल्कलांबरं भूमिशायिनं भरतं श्रुत्वा रामो दुःखं प्राप ॥३४॥३५॥ भरत आगतं रामं श्रुत्वा पादुके शिरसि धृत्वा पौरामात्यपुरोहितैः सह ॥३६॥ नंदिग्रामाद्गीतवादित्रशब्दैर्ब्रह्मघोषैः ॥३७॥ रथाश्वगजपदातिभिर्वेश्याभिर्भृत्यैश्च सह ॥३८॥ छत्रचामरादीनि राजचिन्हानि गृहीत्वा। रामसमीपं गत्वा पादुके पुरतः स्थापयित्वा प्रेम्णा पादयोः पपात ॥३९॥ रामस्तं चिरमालिंग्य नेत्रोदकैः स्नापयामास ॥४०॥ ततो लक्ष्मणसीताभ्यां सह रामस्तत्र प्राप्तेभ्यो विप्रेभ्यः कुलवृद्धेभ्यश्च नमश्चक्रे । प्रजाश्च रामं नमश्चक्रुः॥४१॥चिरागतं रामं वीक्ष्य पुष्पवृष्टिं कुर्वंतो जना ननृतुः ॥४२॥ भरतः पादुकेऽगृह्णात् । विभी-

उपगीयमानचरितः शतधृत्यादिभिर्मुदा ॥ गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलांबरम् ॥ ३४ ॥ महाकारुणिकोऽतप्यज्जटिलं स्थंडिलेशयम् ॥ भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ ३५ ॥ पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम् ॥ नंदिग्रामात्स्वशिबिराद्गीतवादित्रनिःस्वनैः ॥ ३६ ॥ ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ॥ स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै रथैः ॥३७॥ सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ॥ श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः ॥ ३८ ॥ पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च ॥ पादयोर्न्यपतत्प्रेम्णा प्रक्लिन्नहृदयेक्षणः ॥ पादुके न्यस्य पुरतः प्रांजलिर्बाष्पलोचनः ॥३९॥ तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः ॥ ४० ॥ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः ॥ तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ ४१ ॥ धुन्वंत उत्तरासंगान्पतिं वीक्ष्य चिरागतम् ॥ उत्तराः कोशला माल्यैः किरंतो ननृतुर्मुदा ॥ ४२ ॥ पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे ॥ विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥ ४३ ॥ धनुर्निषंगान् शत्रुघ्नः सीता तीर्थकमंडलुम् ॥ अबिभ्रदंगदः खड्गं हैमं चर्मर्क्षराण्नृप ॥४४॥ पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च बंदिभिः ॥ विरेजे भगवान्राजन्ग्रहैश्चंद्र इवोदितः ॥ ४५ ॥ भ्रातृभिर्नंदितः सोऽपि सोत्सवां प्राविशत्पुरीम्॥प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् ॥४६॥ गुरून्वयस्यावरजान्पूजितः प्रत्यपूजयत् ॥ वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ॥४७॥ पुत्रान्स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः ॥ आरोप्यांकेऽभिषिंचंत्यो बाष्पौघैर्विजहुः शुचः ॥ ४८ ॥ जटा निर्मुच्य विधिवत्कुलवृद्धैः समं गुरुः ॥ अभ्यषिंचद्यथैवेंद्रं चतुःसिंधुजलादिभिः ॥ ४९ ॥ एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलंकृतः ॥ स्वलंकृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥ ५० ॥ अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः ॥ प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः ॥ जुगोप पितृवद्रामो मेनिरे पितरं च तम् ॥ ५१ ॥ ॥

षणश्चामरं, सुग्रीवो व्यजनं, हनुमान् श्वेतं छत्रं, शत्रुघ्नो धनुर्निषंगान्, सीता तीर्थकमंडलुं, अंगदः खड्गं, जांबवान् चर्म चागृह्णात्॥४३॥४४॥एवंविधो रामो बंदिभिः स्तूयमानः पुष्पकविमानस्थो ग्रहैश्चंद्र इव रेजे ॥४५॥ तत उत्सवसहितामयोध्यानगरीं प्रविश्य ॥४६॥ राजभवनं गत्वा कैकेय्याद्याः स्वमातॄर्ननाम । सीता लक्ष्मणश्च तथैव नमश्चक्रतुः ॥४६॥४७॥ मातरस्तान् पुत्रानंकमारोप्य प्रेमाश्रुभिः सिंचंत्यः शोकं जहुः ॥४८॥ ततो वसिष्ठः कुलवृद्धैः सह रामस्य जटा निर्मुच्य चतुःसमुद्रजलै रामं सिंहासनेऽभ्यषिंचत्॥४९॥ एवं कृताभिषेकः सुवासा राजचिह्नैरलंकृतो रामो भ्रातृभिर्भार्यया च सह बभौ॥५०॥तदा भरतेन प्रणिपत्य प्रसादितः स श्री-

य ः सिंहासनमग्रहीत् । ततः स्वधर्मनिरताः प्रजाः पितृवत्पालयामास । प्रजास्तं रामं पितरं मेनिरे ॥५१॥ रामे राज्ञि सति त्रेतायां वर्तमानायामपि कृतयुगसमः कालोऽभवत्॥५२॥ वनानि नद्यो गिरयो वर्षाणि द्वीपाः समुद्राः। एते सर्वे कामदुघा आसन्। प्रजानामाधिव्याधिजराग्लानिशोकभयक्लेशा नाभवन्। रामराज्येऽनिच्छतां मृत्युश्च नासीत् ॥५३॥५४॥ राम एकपत्नीव्रतधरो राजर्षिः । स्वयं गृहस्थाश्रमधर्मं लोकान् शिक्षयन्नाचरत् ॥५५॥ रामाभिप्रायज्ञा सीता प्रेम्णा शीलेन नम्रत्वादिगुणैश्च भर्तुर्मनो जहार ॥ ५६ ॥ इति श्रीमद्भागवतचूर्णिकायां नवमस्कंधे दशमोऽध्यायः ॥ १० ॥ ॥ ततश्चैकादशेऽयोध्यामावसन्ननुजैः सह । यज्ञादि यच्चकारेशो रामस्तदनुवर्ण्यते ॥१॥ श्रीशुक उवाच ॥ भगवान् रामो यज्ञैरात्मना सर्वदेवमयमात्मानमीजे ॥१ ॥ तत्र यज्ञे होत्रे पूर्वां दिशं ददौ ।

त्रेतायां वर्तमानायां कालः कृतसमोऽभवत् ॥ रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ॥ ५२ ॥ वनानि नद्यो गिरयो वर्षाणि द्वीपसिंधवः ॥ सर्वे कामदुघा आसन्प्रजानां भरतर्षभ ॥ ५३ ॥ नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ॥ मृत्युश्चानिच्छतां नासीद्रामे राजन्यधोक्षजे ॥ ५४ ॥ एकपत्नीव्रतधरो राजर्षिचरितः शुचिः ॥ स्वधर्मं गृहमेधीयं शिक्षयन्स्वयमाचरत् ॥ ५५ ॥ प्रेम्णाऽनुवृत्त्या शीलेन प्रश्रयावनता सती ॥ धिया ह्रिया च भावज्ञा भर्तुः सीताहरन्मनः ॥ ५६॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे रामचरिते दशमोऽध्यायः ॥ १० ॥ ॥ श्रीशुक उवाच ॥ भगवानात्मनात्मानं राम उत्तमकल्पकैः ॥ सर्वदेवमयं देवमीज आचार्यवान्मखैः ॥ १ ॥ होत्रेऽददाद्दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः ॥ अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥२॥ आचार्याय ददौ शेषां यावती भूस्तदंतरा ॥ मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥ ३ ॥ इत्ययं तदलंकारवासोभ्यामवशेषितः ॥ तथा राज्ञ्यपि वैदेही सौमंगल्यावशेषिता ॥४॥ ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतम् ॥ प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥५॥ अप्रत्तं नस्त्वया किं नु भगवन्भुवनेश्वर ॥ यन्नोंऽतर्हृदयं विश्य तमो हंसि स्वरोचिषा ॥६॥ नमो ब्रह्मण्यदेवाय रामायाकुंठमेधसे ॥ उत्तमश्लोकधुर्याय न्यस्तदंडार्पितांघ्रये ॥ ७ ॥ कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः ॥ चरन्वाचोऽशृणोद्रामो भार्यामुद्दिश्य कस्यचित् ॥८॥ नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ॥ स्त्रीलोभी बिभृयात्सीतां रामो नाहं भजे पुनः ॥९॥ इति लोकाद्बहुमुखाद्दुराराध्यादसंविदः ॥ पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ॥ १० ॥ ॥

ब्रह्मणे दक्षिणाम् । अध्वर्यवे पश्चिमाम् । सामगायोत्तरां ददौ ॥२॥ तासां दिशां मध्ये यावती भूस्तामाचार्याय ददौ । इदं सर्वं ब्राह्मण एवार्हतीति मन्यमानः ॥३॥ वस्त्रोपवस्त्राभ्यां शेषितः । तथा सीतापि मंगलसूत्रावशेषिता ॥४॥ ते ऋत्विजो रामस्य वात्सल्यं वीक्ष्य प्रीताः संतस्तस्मै सर्वं प्रत्यर्प्योचुः ॥५॥ हे भगवन्, त्वयास्माकं किं नु न दत्तम् । त्वं नो हृदयं प्रविश्याज्ञानं नाशयसि ॥६॥ तस्मै ब्रह्मण्यदेवाय रामाय तुभ्यं नमः ॥ ७ ॥ कदाचिल्लोकवृत्तं जिज्ञासू रामो रात्र्यां गूढश्चरन् कस्यचित्पुंसो भार्यामुद्दिश्य वाचं शुश्राव ॥ ८ ॥ हे स्त्रि, परवेश्मगां दुष्टां त्वामहं न पालयामि । स्त्रीलोभी रामः सीतां पालयतु । अहं तु पुनस्त्वां न सेवे ॥९॥ इति लोकापवादाद्भीतेन रामेण त्यक्ता सा सीता गर्भवती सती शनैर्वाल्मीकेराश्रमं प्राप्ता ॥ १० ॥ ॥

अंतर्वत्न्यागते काले यमौ सा सुषुवे सुतौ ॥ कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ॥ ११ ॥ अंगदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ॥ तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥ १२ ॥ सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ॥ गंधर्वान्कोटिशो जघ्ने भरतो विजये दिशाम् ॥ १३ ॥ तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ॥ शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ॥ हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥१४॥ मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता ॥ ध्यायंती रामचरणौ विवरं प्रविवेश ह ॥ १५ ॥ तच्छ्रुत्वा भगवान्रामो रुंधन्नपि धिया शुचः ॥ स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः ॥ १६ ॥ स्त्रीपुंप्रसंग एतादृक्सर्वत्र त्रासमावहः ॥ अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥१७॥ तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः ॥ त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥ १८ ॥ स्मरतां हृदि विन्यस्य विद्धं दंडककंटकैः ॥ स्वपादपल्लवं राम आत्मज्योतिरगात्ततः ॥ १९ ॥ नेदं यशो रघुपतेः सुरयाच्ञया च लीलातनोरधिकसाम्यविमुक्तधाम्नः ॥ रक्षोवधो जलधिबंधनमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः ॥ २० ॥ यस्यामलं नृपसदस्सु यशोऽधुनापि गायंत्यघघ्नमृषयो दिगिभेंद्रपट्टम् ॥ तं नाकपालवसुपालकिरीटजुष्टपादांबुजं रघुपतिं शरणं प्रपद्ये ॥२१॥ स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा ॥ कोशलास्ते ययुः स्थानं यत्र गच्छंति योगिनः ॥ २२ ॥ पुरुषो रामचरितं श्रवणैरुपधारयन् ॥ आनृशंस्यपरो राजन्कर्मबंधैर्विमुच्यते ॥ २३ ॥ राजोवाच ॥ कथं स भगवान् रामो भ्रातॄन्वा स्वयमात्मनः ॥ तस्मिन्वा तेऽन्ववर्तंत प्रजाः पौराश्च ईश्वरे ॥२४॥ ॥ श्रीशुक उवाच ॥ अथादिशद्दिग्विजये भ्रातॄंस्त्रिभुवनेश्वरः ॥ आत्मानं दर्शयन्स्वानां पुरीमैक्षत सानुगः ॥ २५ ॥ ॥

ततः प्रसूतिकाले कुशलवौ द्वौ पुत्रौ सुषुवे । तयोर्जातकर्मादिसंस्कारान् मुनिश्चक्रे ॥११॥ अंगदश्चित्रकेतुश्च लक्ष्मणस्य पुत्रौ । तक्षपुष्कलौ भरतस्य पुत्रौ ॥१२॥ सुबाहुश्रुतसेनौ शत्रुघ्नस्य पुत्रौ । भरतो दिग्विजये कोटिशो गंधर्वान् हत्वा ॥१३॥ तदीयं धनं राज्ञे निवेदयामास । शत्रुघ्नो मधोः पुत्रं लवणराक्षसं हत्वा मधुवने मथुरां नाम नगरीं चक्रे ॥१४॥ सीता वाल्मीकिसमीपे पुत्रौ स्थापयित्वा रामचरणौ ध्यायंती सती भूमेर्विवरं प्रविवेश ॥१५॥ तच्छ्रुत्वा रामो बुद्ध्या शोकं रुंधन्नपि तद्गुणान् स्मरन् तद्वियोगं न सेहे । एवं स्त्रीपुरुषप्रसंगः सर्वत्र त्रासकररोऽस्ति॥१७॥ तत ऊर्ध्वं रामोब्रह्मचर्यं धारयन् त्रयोदशसहस्रवर्षाण्यग्निहोत्रं जुहाव॥१८॥ ततो भक्तानां हृदि स्वचरणकमलं स्थापयित्वा स्वधाम प्रत्यगात् ॥१९॥ किं च । रामस्य सेतुबंधनं रावणवधादिकं कविभिराश्चर्यमिव वर्णितमपि यंशः स्तुतिर्न भवति । यस्य प्रभावेणेतरेषां केषामपि प्रभावोऽधिकः समश्च नास्ति तस्य शत्रुवधे वानराः सहायाः । अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तथैवेदमपि ॥२०॥ यस्य रामस्य यशो युधिष्ठिरादीनां सदसि मार्कंडेयादयो वर्णयंति तं रघुपतिमहं शरणं प्रपद्ये ॥२१॥ स रामो यैः स्पृष्टो दृष्टोऽनुगतो वा ते कोशलदेशवासिनो जना अपि यत्र योगिनो गच्छंति तत्स्थानं ययुः ॥२२॥ हे राजन्, पुरुषो रामचरित्रं श्रृण्वन् कर्मबंधाद्विमुच्यते ॥२३॥ राजोवाच ॥ हे शुक, स रामः स्वयं तृषु कथमवर्तत । तथा तस्मिन् रामे ते भ्रातरः प्रजाश्च कथमवर्तंत तद्वद ॥ २४ ॥ श्रीशुक उवाच ॥ श्रीरामः सिंहासनस्वीकारानंतरं भ्रातॄन् दिग्विज-

य आदिशत् । ततः सेवकैः सहायोध्यां पुरीं ददर्श ॥२५॥ कथंभूतां ताम् । गंधोदकैः सिक्तमार्गाम् ॥२६॥ प्रासादपुरद्वारसभादिषु स्थापितैः स्वर्णकलशैः पताकाभिश्च शोभिताम् ॥२७॥ फलवृंदयुक्तैः पूगवृक्षैः कदलीस्तंभैरादर्शैः स्रग्भिस्तोरणैश्च मंडिताम् ॥२८॥ ततः पुरजना अर्हणपाणयस्तं राममुपेयुः । आशीर्वादं च ददुः । हे राम, पुरा वराहरूपेण त्वयोद्धृतामिमां पृथ्वीं पाहि ॥२९॥ ततः प्रजाश्चिरागतं पतिं विलोक्य हर्म्याण्यारुह्य पुष्पैरवाकिरन् ॥ ३०॥ अथ रामः स्वगृहं विवेश। कथं भूतम् । रत्नादिकोशैराढ्यम् । अमौल्यपरिच्छदम् ॥ ३१ ॥प्रवालादीनां द्वारैर्वैदूर्यस्तंभपंक्तिभिः मरकतभूमिभिः स्फटिकभित्तिभिश्च मंडितम् ॥३२॥ मालाभिः पताकाभिर्वस्त्रमणिमुक्ताफलादिभिश्च रमणीयभोगसाधनैर्युक्तम् ॥३३॥ धूपदीपपुष्पादिभिर्वस्त्रालंकारयुक्तैः स्त्रीपुंसैश्च शोभितम् ॥ ३४॥

आसिक्तमार्गां गंधोदैः करिणां मदसीकरैः ॥ स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥२६॥ प्रासादगोपुरसभाचैत्यदेवगृहादिषु ॥ विन्यस्तहेमकलशैः पताकाभिश्च मंडिताम् ॥२७॥ पूगैः सवृंतै रंभाभिः पट्टिकाभिः सुवाससाम् ॥ आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥२८॥ तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ॥ आशिषो युयुजुर्देव पाहीमां प्राक् त्वयोद्धृताम् ॥२९॥ ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ॥ आरुह्य हर्म्याण्यरविंदलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ॥ ३० ॥ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ॥अनंताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥३१॥ विद्रुमोदुंबरद्वारैर्वैदूर्यस्तंभपंक्तिभिः ॥ स्थलैर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः ॥३२॥ चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः ॥ मुक्ताफलैश्चिदुल्लासैः कांतकामोपपत्तिभिः ॥३३॥ धूपदीपैः सुरभिभिर्मंडितं पुष्पमंडनैः ॥ स्त्रीपुंभिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥३४॥ तस्मिन्स भगवान्रामः स्निग्धया प्रिययेष्टया ॥ रेमे स्वाराम धीराणामृषभः सीतया किल ॥३५॥ बुभुजे च यथाकालं कामान्धर्ममपीडयन् ॥ वर्षपूगान्बहून्नृणामभिध्याताङ्घ्रिपल्लवः ॥३६॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे श्रीरामोपाख्यान एकादशोऽध्यायः ॥ ११ ॥ श्रीशुक उवाच ॥ कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ॥ पुंडरीकोऽथ तत्पुत्रः क्षेमधन्वाऽभवत्ततः ॥१॥ देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ॥ ततो बलस्थलस्तस्माद्वज्रनाभोऽर्कसंभवः ॥ २ ॥ खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः ॥ ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥ ३ ॥ शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद्यतः ॥ योगं महोदयमृषिर्हृदयग्रंथिभेदकम् ॥ ४ ॥ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततोऽभवत् ॥ सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः ॥५॥ ॥

एतादृशे गृहे श्रीरामः सीतया सह रेमे ॥ ३५ ॥ यथाकालं बहुवर्षसमूहान् विषयभोगांश्च बुभुजे ॥ ३६ ॥ इति श्री० चू० नव० एकादशोऽध्यायः ॥ ११ ॥ द्वादशे रामपुत्रस्य कुशस्यान्वय उच्यते । एवमिक्ष्वाकुपुत्रस्य शशादस्येरितोऽन्वयः ॥१॥ श्रीशुक उवाच ॥ रामपुत्रस्य कुशस्यातिथिः पुत्रः । तस्य निषधः । तस्य नभः, तस्य पुंडरीकः । तस्य क्षेमधन्वा ॥१॥ तस्य देवानीकः । तस्य पारियात्रः । तस्य बलः । तस्य स्थलः । तस्य वज्रनाभः ॥२॥ तस्य खगणः । तस्य विधृतिः । तस्य हिरण्यनाभः । स जैमिनिशिष्यो योगाचार्यो जातः ॥३॥ यस्माद्याज्ञवल्क्योऽध्यात्मयोगं प्राप ॥ ४॥ हिरण्यनाभस्य पुष्यः । तस्य ध्रुवसंधिः । तस्य

सुदर्शनः । तस्याग्निवर्णः । तस्य शीघ्रः । तस्य मरुः ॥५॥ यो मरुर्योगसिद्धः सन् कलापग्रामे स्थित्वा कलेरंते नष्टं सूर्यवंशं पुनर्भावयिष्यति॥६॥ तत्पुत्रः प्रसुश्रुतः ।
तस्य संधिः । तस्यामर्षणः । तस्य महस्वान् । तस्य विश्वसाह्वः ॥७॥तस्य प्रसेनजित् । तस्य तक्षकः । तस्य बृहद्बलः । यस्तव पित्राऽभिमन्युना युद्धे
हतः ॥८॥ एते इक्ष्वाकुवंशे भूपा अतीताः । अनागतान् शृणु । बृहद्बलस्य बृहद्रणः॥९॥ तस्योरुक्रियः । तस्य वत्सवृद्धः । तस्य प्रतिव्योमः । तस्य भानुः ।
तस्य दिवाकः ॥१०॥ तस्य सहदेवः । तस्य बृहदश्वः । तस्य भानुमान् । तस्य प्रतीकाश्वः । तस्य सुप्रतीकः ॥११॥ तस्य मरुदेवः । तस्य सुनक्षत्रः । तस्य
पुष्करः । तस्यांतरिक्षः । तस्य सुतपाः । तस्यामित्रजित् ॥१२॥ तस्य बृहद्राजः । तस्य बर्हिः । तस्य कृतंजयः । तस्य रणंजयः । तस्य संजयः ॥ १३ ॥ तस्य

योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः ॥ कलेरंते सूर्यवंशं नष्टं भावयिता पुनः ॥६॥ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः ॥
महस्वांस्तत्सुतस्तस्माद्विश्वसाह्वोऽन्वजायत ॥७॥ ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः॥ ततो बृहद्बलो यस्तु पित्रा
ते समरे हतः ॥८॥ एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ॥ बृहद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥९॥ उरुक्रियस्ततस्तस्य
वत्सवृद्धो भविष्यति ॥ प्रतिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥१०॥ सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान् ॥
प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ॥११॥ भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः ॥ तस्यांतरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥१२॥
बृहद्राजस्तु तस्यापि बर्हिस्तस्मात्कृतंजयः ॥ रणंजयस्तस्य सुतः संजयो भविता ततः ॥१३॥ तस्माच्छाक्योऽथ
शुद्धोदो लांगलस्तत्सुतः स्मृतः ॥ ततः प्रसेनजित्तस्मात्क्षुद्रको भविता ततः ॥१४॥ रणको भविता तस्मात्सुरथस्तनयस्ततः ॥
सुमित्रो नाम निष्ठांत एते बार्हद्बलान्वयाः ॥१५॥ इक्ष्वाकूणामयं वंशः सुमित्रांतो भविष्यति ॥ यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति
वै कलौ ॥१६॥इति श्रीमद्भागवते महापुराणे नवमस्कंधे इक्ष्वाकुवंशवर्णनं नाम द्वादशोऽध्यायः ॥१२॥ ॥ श्रीशुक उवाच ॥
निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजम् ॥ आरभ्य सत्रं सोऽप्याह शक्रेण प्राग्वृतोऽस्मि भोः ॥१॥ तं निर्वर्त्यागमिष्यामि तावन्मां
प्रतिपालय ॥ तूष्णीमासीद्गृहपतिः सोऽपींद्रस्याकरोन्मखम् ॥२॥ निमिश्चलमिदं विद्वान्सत्रमारभतात्मवान् ॥ ऋत्विग्भिरपरैस्तावन्नागमद्यावता
गुरुः ॥३॥ शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः ॥ अशपत्पतताद्देहो निमेः पंडितमानिनः ॥ ४ ॥ ॥

शाक्यः । तस्य शुद्धोदः । तस्य लांगलः । तस्य प्रसेनजित् । तस्य क्षुद्रकः ॥१४॥ तस्य रणकः । तस्य सुरथः । तस्य सुमित्रः ॥१५॥ अयमिक्ष्वाकूणां वंशः
सुमित्रांतो भविष्यति । यतस्तं राजानं प्राप्य कलौ संस्थां प्राप्स्यति ॥ १६ ॥ इति श्रीमद्भागवतचूर्णिकायां नवमस्कंधे द्वादशोऽध्यायः ॥ १२ ॥ ॥
इक्ष्वाकोरेव पुत्रस्य निमेर्वंशस्त्रयोदशे । वर्ण्यते जज्ञिरे यत्र ब्रह्मज्ञा जनकादयः ॥१॥ श्रीशुक उवाच ॥ इक्ष्वाकुपुत्रो निमिः । स यज्ञमारभ्य वसिष्ठमृत्विक्त्वे
वव्रे । तदा वसिष्ठ आह । अहं शक्रेण प्राक् वृतोऽस्मि ॥१॥ तं यज्ञं कृत्वा आगमिष्यामि । तावन्मां प्रतीक्षस्व । तदा निमिस्तूष्णीमासीत् । वसिष्ठोऽपींद्रस्य
यज्ञं चकार ॥२॥ निमिरिदं जीवितमस्थिरं ज्ञात्वा यावद्गुरुर्नागतस्तावदपरैर्ऋत्विग्भिर्यज्ञं प्रारेभे॥३॥वसिष्ठ इंद्रस्य यज्ञं समाप्य तत्रागतः सन्निमेरन्यायं वीक्ष्य

पंडितमानिनो निमेर्देहः पतत्विति शशाप ॥४॥ तदा निमिर्लोभाद्धर्ममजानतस्तवापि देहः पतत्विति गुरवे प्रतिशापं ददौ ॥५॥ ततो निमिः स्वदेहं तत्याज । वसिष्ठोऽपि स्वदेहं त्यक्त्वा पूर्वमुर्वशीदर्शनान्मित्रावरुणयोः स्खलितं रेतस्ताभ्यां कुंभे निषिक्तमासीत् । तदाश्रयान्मित्रावरुणयोः पुत्रत्वेन पुनर्जातः ॥६ ॥ मुनयो निमेर्देहं तैलादिसुगंधवस्तुषु स्थापयित्वा यज्ञे प्राप्तान् देवान् जगदुः॥७॥ हे देवाः, यदि भवंतः प्रसन्नाः तर्हि राज्ञो देहो जीवतु। तदा देवैस्तथेत्युक्ते सति निमिर्जीवन् सन् जगाद। मम देहबंधनं माभूत् ॥८॥ वियोगभयकातरा मुनयो यस्य देहस्य योगं न वांछंति॥९॥ अतो दुःखशोकभयावहं देहमहं न धारयिष्ये ॥१०॥ देवा ऊचुः । हे मुनयः, विदेहो देहिनां नेत्रेषून्मेषणनिमेषाभ्यां लक्षितः सन् वसतु। एवं सति युष्माभिः प्रार्थितं जीवितं भवेद्देहबंधश्च न भवेत्॥११॥

निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने ॥ तवापि पतताद्देहो लोभाद्धर्ममजानतः ॥५॥ इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः ॥ मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ॥६॥ गंधवस्तुषु तद्देहं निधाय मुनिसत्तमाः ॥ समाप्ते सत्रयागेऽथ देवानूचुः समागतान् ॥७॥ राज्ञो जीवतु देहोऽयं प्रसन्नाः प्रभवो यदि ॥ तथेत्युक्ते निमिः प्राह मा भून्मे देहबंधनम् ॥८॥ यस्य योगं न वांछंति वियोगभयकातराः ॥ भजंति चरणांभोजं मुनयो हरिमेधसः ॥९॥ देहं नावरुरुत्सेऽहं दुःखशोकभयावहम् ॥ सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥१०॥ देवा ऊचुः ॥ विदेह उष्यतां कामं लोचनेषु शरीरिणाम् ॥ उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः ॥११॥ अराजकभयं नृणां मन्यमाना महर्षयः॥ देहं ममंथुः स्म निमेः कुमारः समजायत॥१२॥ जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः॥मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥१३॥ तस्मादुदावसुस्तस्य पुत्रोऽभून्नंदिवर्धनः ॥ ततः सुकेतुस्तस्यापि देवरातो महीपते ॥१४॥ तस्माद्बृहद्रथस्तस्य महावीर्यः सुधृतिपिता ॥ सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ॥१५॥ मरोः प्रतीपकस्तस्माज्जातः कृतिरथो यतः ॥ देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः॥१६॥ कृतिरातस्ततस्तस्मान्महारोमाथ तत्सुतः॥ स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥१७॥ ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम् ॥ सीता सीराग्रतो जाता तस्मात्सीरध्वजः स्मृतः ॥१८॥ कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः ॥ धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥१९॥ कृतध्वजात्केशिध्वजः खांडिक्यस्तु मितध्वजात् ॥ कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥२०॥ खांडिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजाद्द्रुतः ॥ भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः ॥२१॥

ततो ऋषयोऽराजके नृणां भयं मत्वा निमेर्देहं ममंथुः । तदा कुमारः समजायत ॥१२॥ स जन्मना जनकः विदेहाज्जातो वैदेहः मथनाज्जातोऽतो मिथिलश्चाभूत् । येन मिथिला नगरी निर्मिता ॥१३॥ तस्मादुदावसुः पुत्रः । तस्य नंदिवर्धनः । तस्य सुकेतुः । तस्य देवरातः॥१४॥तस्य बृहद्रथः। तस्य महावीर्यः । तस्य सुधृतिः। तस्य धृष्टकेतुः । तस्य हर्यश्वः । तस्य मरुः॥१५॥ तस्य प्रदीपकः । तस्य कृतिरथः । तस्य देवमीढः । तस्य विश्रुतः । तस्य महाधृतिः ॥१६॥ तस्य कृतिरातः । तस्य महारोमा । तस्य स्वर्णरोमा। तस्य ह्रस्वरोमा॥१७॥ तस्य सीरध्वजः। तस्य यज्ञार्थं महीं कर्षतः सतो लांगलाग्रात् सीता जाता। अत एव सीरध्वज इति तस्य नामाभूत्॥१८॥ तस्मात्कुशध्वजः । तस्य धर्मध्वजः । तस्य कृतध्वजमितध्वजौ द्वौ पुत्रौ॥१९॥तत्र कृतध्वजस्य केशिध्वजः मितध्वजस्य खांडिक्यः । केशिध्वजस्य भानुमान् ।

तस्य शतद्युम्नः ॥२०॥२१॥ तस्य शुचिः। तस्य सनद्वाजः। तस्य ऊर्ध्वकेतुः। तस्याजः। तस्य पुरुजित् ॥२२॥ तस्यारिष्टनेमिः। तस्य श्रुतायुः। तस्य सुपार्श्वकः। तस्य चित्ररथः। तस्य क्षेमधिः ॥२३॥ तस्य समरथः। तस्य सत्यरथः। तस्योपगुरुः। तस्योपगुप्तः ॥२४॥ तस्य वस्वनंतः। तस्य युयुधः। तस्य सुभाषणः। तस्य श्रुतः। तस्य जयः। तस्य विजयः। तस्य ऋतः ॥२५॥ तस्य शुनकः। तस्य वीतहव्यः। तस्य धृतिः। तस्य बहुलाश्वः। तस्य कृतिः। तस्य महावशी॥२६॥ हे राजन्, एते राजान आत्मविद्यानिपुणा मैथिला याज्ञवल्क्यादियोगेश्वराणां प्रसादेन गृहेष्वपि द्वंद्वैर्मुक्ता आसन्॥२७॥ इति श्री॰ चू॰ नव॰ त्रयोदशोऽध्यायः ॥१३॥ ॥चतुर्दशादिभिः सोमवंशमाह समासितः। यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः ॥१॥ चतुर्दशे गुरोः पत्न्यां तारायां सोमजाद्बुधात्। जातश्चैलः

शुचिस्तत्तनयस्तस्मात्सनद्वाजस्ततोऽभवत् ॥ ऊर्ध्वकेतुः सनद्वाजादजोऽथ पुरुजित्सुतः॥२२॥अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ॥ ततश्चित्ररथो यस्य क्षेमधिर्मिथिलाधिपः ॥२३॥ तस्मात्समरथस्तस्य सुतः सत्यरथस्ततः ॥ आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः ॥२४॥ वस्वनंतोऽथ तत्पुत्रो युयुधो यत्सुभाषणः ॥ श्रुतस्ततो जयस्तस्माद्विजयोऽस्माद्दतः सुतः ॥२५॥ शुनकस्तत्सुतो जज्ञे वीतहव्यो धृतिस्ततः ॥ बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी ॥२६॥ एते वै मैथिला राजन्नात्मविद्याविशारदाः ॥ योगेश्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपि ॥२७॥ इतिश्री॰ महा॰ नव॰ निमिवंशानुवर्णनं नाम त्रयोदशोऽध्यायः ॥१३॥ ॥ श्रीशुक उवाच ॥ अथातः श्रूयतां राजन्वंशः सोमस्य पावनः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः ॥ १ ॥ सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् ॥ जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः ॥२॥ तस्य दृग्भ्योऽभवत्पुत्रः सोमोऽमृतमयः किल ॥ विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ॥३॥ सोऽयजद्राजसूयेन विजित्य भुवनत्रयम् ॥ पत्नीं बृहस्पतेर्दर्पात्तारां नामाहरद्बलात् ॥४॥ यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ॥ नात्यजत्तत्कृते जज्ञे सुरदानवविग्रहः ॥५॥ शुक्रो बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपम् ॥ हरो गुरुसुतं स्नेहात्सर्वभूतगणावृतः ॥६॥ सर्वदेवगणोपेतो महेंद्रो गुरुमन्वगात् ॥ सुरासुरविनाशोऽभूत्समरस्तारकामयः ॥७॥ निवेदितोऽथांगिरसा सोमं निर्भर्त्स्य विश्वकृत् ॥ तारां स्वभर्त्रे प्रायच्छदंतर्वत्नीमवैत्पतिः ॥ ८ ॥ ॥

षडुर्वश्यामायुर्मुख्यानजीजनत् ॥२॥ श्रीशुक उवाच ॥ हे राजन्, अथ सोमस्य पवित्रो वंशः श्रूयताम्। यस्मिन्नैलादयो भूपाः कीर्त्यंते ॥१॥ आदौ नारायणस्य नाभिकमलाद्ब्रह्मा आसीत्। तस्यात्रिः पुत्रः ॥२॥ तस्यानंदाश्रुभ्योऽमृतमयश्चंद्रः पुत्रो जातः। स ब्राह्मणौषधिनक्षत्रगणानां ब्रह्मणा पतिः कल्पितः ॥३॥ स चंद्रो भुवनत्रयं जित्वा राजसूयेन हरिमयजत्। स बृहस्पतेस्तारां नाम भार्यां बलादहरत्॥४॥ यदा बृहस्पतिना याचितश्चंद्रस्तां तारां न ददौ। तदा तत्कृते देवदैत्ययोः संग्रामो जज्ञे॥५॥तदा बृहस्पतेर्द्वेषाद्दैत्यैः सह शुक्रश्चंद्रसहायोऽभूत्। सर्वभूतगणैः सह शिवश्च स्वगुरुसुतं बृहस्पतिमग्रहीत् ॥६॥ देवैः सहित इंद्रो गुरुसहायोऽभूत्। तस्मिन् तारानिमित्ते युद्धे देवदैत्ययोर्नाशो जातः ॥७॥ तदांऽगिरसा प्रार्थितो ब्रह्मा सोमं निर्भर्त्स्य तारां गुरवे ददौ। गुरुर्गर्भवतीं तां

---

१ अंगिरसः सकाशात्प्राप्तविद्यो हर इति प्रसिद्धिः।

ज्ञात्वा जगाद ॥८॥ हे दुष्टबुद्धे, परैः स्थापितं गर्भं शीघ्रं त्यज त्यज । अहं संतानार्थ्यस्मि । अतस्त्वां भस्मसान्न कुर्याम् ॥९॥ ततो लज्जिता तारा सुवर्णसदृशं कुमारं तत्याज । तस्मिन् कुमारे बृहस्पतिसोमाविच्छां कृत्वा ॥१०॥ ममायं पुत्रो न तवेत्युच्चैर्विवादं चक्रतुः । तदा देवैर्ऋषिभिश्च पृष्टा तारा किमपि नोवाच ॥११॥ तदा कुमारः कुपितः सन् मातरं प्राह । हे दुष्टवृत्ते, किं न वदसि । स्वपापं मे शीघ्रं वद ॥१२॥ तदा ब्रह्मा तां रहसि पप्रच्छ । सा शनैः सोमस्य पुत्र इत्याह । तदा सोमस्तं जग्राह ॥ १३ ॥ ब्रह्मा तस्य बुध इति नाम चक्रे । येन पुत्रेण चंद्रो गंभीरया बुद्ध्या हर्षं प्राप ॥ १४ ॥ ततो बुधादिलायां पुरूरवा जज्ञे॥१५॥ उर्वशी इंद्रसभायां नारदेन गीतान् यस्य रूपगुणौदार्यादीन् श्रुत्वा कामेन पीडिता सती तत्समीपं जगाम॥१६॥सा मित्रावरुणयोः शापा-

त्यज त्यजाशु दुष्प्रज्ञे मत्क्षेत्रादाहितं परैः ॥ नाहं त्वां भस्मसात्कुर्यां स्त्रियं सांतानिकः सति ॥ ९ ॥ तत्याज व्रीडिता तारा कुमारं कनकप्रभम् ॥ स्पृहामांगिरसश्चक्रे कुमारे सोम एव च ॥ १० ॥ ममायं न तवेत्युच्चैस्तस्मिन्विवदमानयोः ॥ प्रपच्छुर्ऋषयो देवा नैवोचे व्रीडिता तु सा ॥ ११ ॥ कुमारो मातरं प्राह कुपितोऽलीकलज्जया ॥ किं न वोचस्यसद्वृत्ते आत्मावद्यं वदाशु मे ॥ १२ ॥ ब्रह्मा तां रह आहूय समप्राक्षीच्च सांत्वयन् ॥ सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥ १३ ॥ तस्यात्मयोनिरकृत बुध इत्यभिधां नृप ॥ बुद्ध्या गंभीरया येन पुत्रेणापोडुराण्मुदम् ॥ १४ ॥ ततः पुरूरवा जज्ञे इलायां य उदाहृतः ॥ तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥ १५ ॥ श्रुत्वोर्वशींद्रभवने गीयमानान्सुरर्षिणा ॥ तदंतिकमुपेयाय देवी स्मरशरार्दिता ॥ १६ ॥ मित्रावरुणयोः शापादापन्ना नरलोकताम् ॥ निशम्य पुरुषश्रेष्ठं कंदर्पमिव रूपिणम् ॥ १७ ॥ धृतिं विष्टभ्य ललना उपतस्थे तदंतिके ॥ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ॥ उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥ १८ ॥ राजोवाच ॥ स्वागतं ते वरारोहे आस्यतां करवाम किम् ॥ संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥ १९ ॥ उर्वश्युवाच ॥ कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुंदर ॥ यदंगांतरमासाद्य च्यवते ह रिरंसया ॥ २० ॥ एतावुरणकौ राजन्न्यासौ रक्षस्व मानद ॥ संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥ २१ ॥ घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वाऽन्यत्र मैथुनात् ॥ विवाससं तत्तथेति प्रतिपेदे महामनाः ॥ २२ ॥ अहो रूपमहो भावो नरलोकविमोहनम् ॥ को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥ २३ ॥ तया स पुरुषश्रेष्ठो रमयंत्या यथाऽर्हतः ॥ रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥ २४ ॥ ॥

न्मनुष्यधर्मं प्राप्ता। अतो मदनमिव रूपिणं पुरूरवसं श्रुत्वा ॥१७॥ धैर्यं धृत्वा पुरूरवःसमीपं तस्थौ । स तां विलोक्य मोहितः सन् जगाद ॥ १८ ॥ पुरूरवा उवाच ॥ हे उर्वशि,तव स्वागतम्। आस्यताम्। तव किं प्रियं करवाम। त्वं मया सह रमस्व ॥१९॥ उर्वश्युवाच ॥ हे सुंदर, कस्या मनस्त्वयि न सज्जेत। तथापि मम भाषाबंधान् त्वमंगीकरोषि चेत्तर्ह्यहमत्र वत्स्यामि ॥२०॥ हे राजन् , एतौ मम मेषौ निक्षेपरूपौ त्वं रक्षस्व ॥२१॥ हे वीर,मम भक्ष्यं घृतं स्यात्। मैथुनादन्यत्र वस्त्रहीनं त्वां न द्रक्ष्ये। तत्तथेति राजांऽगीकृत्य जगाद ॥२२॥ हे उर्वशि, अतिसुंदरीं नरलोकविमोहनां स्वयमागतां त्वां को न सेवेत ॥२३॥ ततस्तया सह स पुरूरवा चैत्ररथादिषु

देवोद्यानेषु यथेच्छं रेमे ॥ २४ ॥ किंच । तया सह रममाणो बहूनहर्गणान् मुमुदे ॥ २५ ॥ इंद्रः स्वभवन एकदोर्वशीमपश्यन् सन् तामानेतुं गंधर्वान् प्रेषयामास ॥ २६ ॥ ते गंधर्वा मध्यरात्र एत्य राजनि न्यस्तौ उर्वश्या मेषौ जहुः ॥ २७ ॥ उर्वशी नीयमानयोस्तयोः पुत्रयोराक्रंदितं श्रुत्वा जगाद । अहं नपुंसकेन निंद्येन त्वया नाथेन हतास्मि ॥ २८ ॥ यस्य तव विश्वासादहं नष्टा चौरैर्हृतपुत्रा च जाता ॥ २९ ॥ (अतो मद्गात्रे वेष्टितौ बाहू मुंच मुंच । दूरमपसर । त्वं कातरः अतिलंपटोऽसि ॥ १ ॥) इति वाग्बाणैर्विद्धो राजा खड्गं गृहीत्वा रात्रौ नग्न एवाभ्यद्रवत् ॥ ३० ॥ गंधर्वास्तं दृष्ट्वा मेषौ विसृज्य विद्युत इव प्रकाशं चक्रुः । तदा मेषावादायायांतं नग्नं तं दृष्ट्वा सोर्वशी नियमभंगान्निर्जगाम ॥ ३१ ॥ राजापि शयने तामदृष्ट्वा विह्वलः शोचन्नुन्मत्तवन्महीं ब-

रममाणस्तया देव्या पद्मकिंजल्कगंधया ॥ तन्मुखामोदमुषितो मुमुदेऽहर्गणान्बहून् ॥२५॥ अपश्यन्नुर्वशीमिंद्रो गंधर्वान्समनोदयत् ॥ उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥ २६ ॥ त उपेत्य महारात्रे तमसि प्रत्युपस्थिते ॥ उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥ २७ ॥ निशम्याक्रंदितं देवी पुत्रयोर्नीयमानयोः ॥ हतास्म्यहं कुनाथेन नपुंसा वीरमानिना ॥ २८ ॥ यद्विश्रंभादहं नष्टा हृतापत्या च दस्युभिः ॥ यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥ २९ ॥ (मुंच मुंचाश्वपसर बाहू मद्गात्रवेष्टितौ ॥ अतीव कातरो ह्या त्वं मायया योऽतिलंपटः ॥ १ ॥) इति वाक्सायकैर्विद्धः प्रतोत्रैरिव कुंजरः ॥ निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद्रुषा ॥ ३० ॥ ते विसृज्योरणौ तत्र व्यद्योतंत स्म विद्युतः ॥ आदाय मेषावायांतं नग्नमैक्षत सा पतिम् ॥ ३१ ॥ ऐलोऽपि शयने जायामपश्यन्विमना इव ॥ तच्चित्तो विह्वलः शोचन्बभ्रामोन्मत्तवन्महीम् ॥ ३२ ॥ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः ॥ पंच प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥ ३३ ॥ अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ॥ मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥ ३४ ॥ सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया ॥ खादंत्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥ ३५ ॥ उर्वश्युवाच ॥ मा मृथाः पुरुषोऽसि त्वं मा स्म त्वाऽद्युर्वृका इमे ॥ क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥ ३६ ॥ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ॥ घ्नंत्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥ ३७॥ विधायालीकविश्रंभमज्ञेषु त्यक्तसौहृदाः ॥ नवं नवमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः ॥ ३८ ॥ संवत्सरांते हि भवानेकरात्रं मयेश्वर ॥ वत्स्यत्यपत्यानि च ते भविष्यंत्यपराणि भोः ॥ ३९ ॥ ॥ ॥ ॥

भ्राम ॥३२॥ स बहुकालेन कुरुक्षेत्रे तां दृष्ट्वोवाच ॥३३॥ अहो जाये तिष्ठ तिष्ठ । त्वं मां त्यक्तुं नार्हसि ॥३४॥ हे देवि, अयं मे सुंदरो राजदेहस्त्वया त्यक्तः। अतोऽत्र मृत्वा पतिष्यंति । तत एनं वृका गृध्राश्च खादंति ॥३५॥ उर्वश्युवाच ॥ हे राजन्, त्वं पुरूरवा असि धैर्यं धारय । मा म्रियस्व । स्त्रियः स्वभावतः क्रूरास्तासां सख्यं क्वापि स्थिरं नास्ति ॥ ३६ ॥ स्त्रियो निर्दयाः साहसप्रियाः ता अल्पार्थेऽपि पतिं भ्रातरं वा घ्नंति ॥ ३७ ॥ अज्ञेषु कपटेन विश्वासं दर्शयित्वा स्नेहशून्या व्यभिचारिण्यो नवं नवं पतिमिच्छंति । अतस्त्वं मम सख्यं त्यज ॥ ३८ ॥ हे नृप, प्रतिसंवत्सरांते एकरात्रं मया सह त्वमत्र वत्स्यसि । तदा

तव कन्याः पुत्राश्च भविष्यंति ॥३९॥ राजा तां गर्भवतीं ज्ञात्वा स्वपुरं ययौ । पुनर्वर्षांते तत्र कुरुक्षेत्रे गत्वा॥४०॥तया सहैकरात्रं रेमे अथोर्वशी तं प्राह ॥४१॥ हे राजन्, त्वं गंधर्वान् भज । ते तुष्टा मां तुभ्यं दास्यंति । ततः स तथा चक्रे गंधर्वास्तस्मा उर्वशीनामिकामेकामग्निस्थालीं ददुः । स तामुर्वशीं मत्वा वने विचरन् पश्चादग्निस्थालीयमिति बुबुधे ॥४२॥ ततस्तां स्थालीं वने स्थापयित्वा गृहं गतः । ततस्त्रेतायां संप्रवृत्तायां तन्मनसि कर्मबोधकं वेदत्रयं प्रादुरभूत् ॥४३॥ पुना राजा तत्स्थालीस्थानं गत्वा तत्र शमीगर्भमश्वत्थं दृष्ट्वा तेन द्वे अरणी कृत्वोर्वशीलोककाम्यया ॥४४॥ अधरारणिमुर्वशीमुत्तरारणिमात्मानमुभयोर्मध्यकाष्ठं यत्तत्पुत्रं च ध्यायन् ममंथ ॥४५॥ मंथनादग्निरुत्पन्नः । स राज्ञा पुत्रत्वे कल्पितः ॥४६॥ तत उर्वशीलोकमिच्छन् तेनाग्निना भगवंतं हरिमयजत ॥४७॥

अंतर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरम् ॥ पुनस्तत्र गतोऽब्दांत उर्वशीं वीरमातरम् ॥४०॥ उपलभ्य मुदा युक्तः समुवास तया निशाम् ॥ अथैनमुर्वशी प्राह कृपणं विरहातुरम् ॥४१॥ गंधर्वानुपधावेमांस्तुभ्यं दास्यंति मामिति ॥ तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ॥ उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन्वने ॥ ४२ ॥ स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि ॥ त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्तत ॥४३॥ स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः ॥ तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥४४॥ उर्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तराम् ॥ आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ॥४५॥ तस्य निर्मंथनाज्जातो जातवेदा विभावसुः ॥ त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥४६॥ तेनायजत यज्ञेशं भगवंतमधोऽक्षजम् ॥ उर्वशीलोकमन्विच्छन्सर्वदेवमयं हरिम् ॥४७॥ एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ॥ देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च॥४८॥ पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप ॥ अग्निना प्रजया राजा लोकं गांधर्वमेयिवान् ॥४९॥ इति श्रीम० महा० नव० ऐलोपाख्याने चतुर्दशोऽध्यायः ॥१४॥ श्रीशुक उवाच ॥ ऐलस्य चौर्वशीगर्भात्षडासन्नात्मजा नृप ॥ आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥१॥ श्रुतायोर्वसुमान्पुत्रः सत्यायोश्च श्रुतंजयः ॥ रयस्य सुत एकश्च जयस्य तनयोऽमितः ॥२॥ भीमस्तु विजयस्याथ कांचनो होत्रकस्ततः ॥ तस्य जह्नुः सुतो गंगां गंडूषीकृत्य योऽपिबत् ॥ जह्नोस्तु पूरुस्तत्पुत्रो बलाकश्चात्मजोऽजकः ॥३॥

पुरा कृतयुगे एकः प्रणव एव वेदः । देवो नारायण एक एव । अग्निश्च लौकिक एक एव । वर्णश्च हंसो नामैक एव ॥४८॥ हे नृप,त्रेतामुखे पुरूरवस एव वेदत्रयी जाता । राजा तेनाग्निना पुत्रेण गांधर्वं लोकं प्राप ॥ ४९ ॥ इति श्रीमद्भागवतचूर्णिका० नवस्कंधे चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ततः पंचदशे गाधिरैलपुत्रान्वयेऽजनि । यद्दौहित्रसुतो रामः कार्तवीर्यमहन् रुषा ॥ १ ॥ श्रीशुक उवाच ॥ पुरूरवस उर्वशीगर्भात् षट् पुत्रा आसन् । ते च—आयुः श्रुतायुः सत्यायुः रयः विजयः जयश्चेति ॥ १ ॥ तत्र श्रुतायोर्वसुमान् पुत्रः । सत्यायोः श्रुतंजयः । रयस्यैकसंज्ञः । जयस्यामितः ॥ २ ॥ विजयस्य भीमः । तस्य कांचनः । तस्य होत्रकः । तस्य जह्नुः । यो गंगां गंडूषीकृत्य पपौ । जह्नोः पूरुः पुत्रः । तस्य बलाकः । तस्याजकः ॥ ३ ॥ ॥

---

१ अनेन कथनेन तयाहं गर्भिण्यस्मीति सूचितम् ।

तस्य कुशः । कुशस्य चत्वारः पुत्राः । ते च–कुशांबुः मूर्तयः वसुः कुशनाभश्चेति । कुशांबुपुत्रो गाधिः॥४॥तस्य सत्यवती नाम्नी कन्या जाता । तां भृगुकुलोत्पन्नो ऋचीकोऽयाचत । गाधिरयोग्यं वरं मत्वा ऋचीकं जगाद ॥५॥ हे ऋषे, एकतः श्यामकर्णानां सहस्रं मौल्यं दीयताम्। इदमपि मे कन्यायाः पर्याप्तं नहि ॥६॥ एवमुक्तो ऋषिस्तन्मतं ज्ञात्वा वरुणादश्वानानीय गाधये दत्वा सत्यवतीमुपयेमे॥७॥ स ऋचीकः पत्न्याश्वश्र्वा च पुत्रकामनया प्रार्थितः सन् चरुं श्रपयित्वा स्नातुं गतः ॥८॥ यावत्स्नात्वा मुनिर्नागत स्तावत्पुत्र्याः सत्यवत्याश्चरुं [1]श्रेष्ठं मत्वा तया मात्रा सत्यवती याचिता सती स्व[2]चरुं मात्रे प्रादात् । मातुश्[3]चरुं स्वयमभक्षयत् ॥ ९ ॥ मुनिरागत्य तद्विज्ञाय पत्नीं प्राह । हे सत्यवति, त्वयाऽतिनिंद्यं कृतम् । अतस्तव पुत्रो घोरो दंडधरो भविष्यति । तव भ्राता च

ततः कुशः कुशस्यापि कुशांबुर्मूर्तयो वसुः ॥ कुशनाभश्च चत्वारो गाधिरासीत्कुशांबुजः ॥४॥ तस्य सत्यवतीं कन्यामृचीकोऽयाचत द्विजः ॥ वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ॥५॥ एकतः श्यामकर्णानां हयानां चंद्रवर्चसाम् ॥ सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम् ॥६॥ इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणांतिकम् ॥ आनीय दत्त्वा तानश्वानुपयेमे वराननान् ॥७॥ स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया ॥ श्रपयित्वोभयैर्मंत्रैश्चरुं स्नातुं गतो मुनिः ॥ ८॥ तावत्सत्यवती मात्रा स्वचरुं याचिता सती ॥ श्रेष्ठं मत्वा तया यच्छन्मात्रे मातुरदत्स्वयम् ॥ ९ ॥ तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः ॥ घोरो दंडधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ॥१०॥ प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः॥ अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् ॥११॥ सा चाभूत्सुमहापुण्या कौशिकी लोकपावनी ॥ रेणोः सुतां रेणुकां वै जमदग्निरुवाह याम् ॥१२॥ तस्यां वै भार्गवऋषेः सुता वसुमदादयः ॥ यवीयान्जज्ञ एतेषां राम इत्यभिविश्रुतः॥१३॥यमाहुर्वासुदेवांशं हैहयानां कुलांतकम्॥त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम्॥१४॥दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् ॥ रजस्तमोवृतमहन्फल्गुन्यपि कृतेंऽहसि ॥ १५॥ राजोवाच ॥ किं तदंहो भगवतो राजन्यैरजितात्मभिः ॥ कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥ १६ ॥ श्रीशुक उवाच ॥ हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः ॥ दत्तं नारायणस्यांशमाराध्य परिकर्मभिः ॥ १७ ॥ बाहून्दशशतं लेभे दुर्धर्षत्वमरातिषु ॥ अव्याहतेंद्रियौजःश्रीतेजोवीर्ययशोबलम् ॥ १८ ॥ ॥

ब्रह्मज्ञो भविष्यति॥१०॥ तत एवं माभूदिति सत्यवत्या प्रार्थितो ऋषिः प्राह । एवं चेत्पौत्रो घोरो भविष्यति । ततो जमदग्निरभूत् ॥११॥ सा सत्यवती कौशिकीनाम्नी नदी जाता । जमदग्नी रेणोः सुतां रेणुकामुवाह॥१२॥तस्यां तस्य वसुमदादयः पुत्रा अभवन् । तेषां कनिष्ठो रामः॥१३॥ यं वासुदेवांशं वदंति । य एकविंशतिवारं पृथ्वीं निःक्षत्रियां चक्रे॥१४॥किंच । यः क्षत्रेण महापापे कृते भुवो भारभूतं दुष्टं क्षत्रं नाशयामास॥१५॥ राजोवाच ॥ हे ब्रह्मन्, राजभिस्तस्य रामस्यापराधः कः कृतः । येन क्षत्रियाणां कुलं वारंवारं परशुरामेण नाशितम् ॥ १६ ॥ श्रीशुक उवाच ॥ हे नृप, हैहयानामधिपः सहस्रार्जुनो नाम आसीत् । स दत्तात्रेयं पूजादिभिराराध्य ॥१७॥ बाहूनां सहस्रं शत्रुषु दुर्धर्षत्वं तेजो वीर्यं यशो बलम् ॥ १८ ॥ ॥

---

[1] भार्यायां भर्तुः स्नेहाधिक्यात् । [2] ब्राह्ममंत्राभिमंत्रितम् । [3] क्षात्रमंत्राभिमंत्रितम् ।

योगेश्वरत्वमणिमादिसिद्धियुक्तमैश्वर्यं च लेभे ॥१९॥ एकदा स स्त्रीभिः सह नर्मदानद्या जले क्रीडन् सन् भुजैर्नदीं रुरोध ॥२०॥ तदा दिग्विजयाय निर्गतो रावणो माहिष्मत्या नगर्याः समीपे नर्मदातीरे देवपूजां कुर्वन् जलैः प्लावितं स्वदेवमंदिरं दृष्ट्वा तद्वीर्यं न सेहे ॥२१॥ तदा क्रीडंतं तं जेतुं प्रवृत्तो रावणस्तेनार्जुनेन स्त्रीणां समक्षं धृत्वा माहिष्मत्यां निरुद्धः । पुनरवज्ञया मुक्तश्च ॥२२॥ सोऽर्जुन एकदा मृगयां विचरन् जमदग्नेराश्रमं जगाम ॥२३॥ जमदग्निः कामधेन्वा आश्रयेण ससैन्यस्य तस्य राज्ञ आतिथ्यं चक्रे ॥२४॥ तदा स वीर आत्मैश्वर्यादतिशयितमृषेरैश्वर्यं दृष्ट्वा धेन्वां साभिलाषो भूत्वा तेनातिथ्येन नातुष्यत् ॥२५॥ ततस्तेन दर्पाद्धेनुं हर्तुं प्रेरिता दूताः सवत्सां क्रंदतीं तां धेनुं बलान्माहिष्मतीं निन्युः ॥२६॥ अथार्जुने गते सति राम आश्रममेत्य तत्तस्य दुष्टचित्तत्वं श्रुत्वा सर्प इव चुक्रोध ॥२७॥ ततो घोरं परशुं सतूणं धनुश्चर्म च गृहीत्वा तत्पश्चादन्वधावत् ॥ २८ ॥ तदा पुरीं विशन् अर्जुनो धनुर्धरं परश्वधायुधं मृगचर्मांबरं जटाधरं रामं वीक्ष्य ॥२९॥ तं जेतुं सप्तदशाक्षौहिणीः प्रेरितवान् । ताः सेना भगवान् राम एक एवानाशयत् ॥३०॥ परचक्रनाशको रामः परशुना यान् यान् प्रहरति ते ते सैनिकाश्छिन्नभुजोरुकंधरा हतसूतवाहना भूमौ निपेतुः ॥३१॥ तदार्जुनो रुधिरौघकर्दमे युद्धे रामपरशुबाणैर्निपतितं सैन्यं दृष्ट्वा रुषाऽऽगत्य ॥३२॥ स्वयं पंचशतेषु धनुःषु युगपद्बाणान् संदधे । तदा रामः स्वबाणैस्तानि धनूंषि चिच्छेद ॥३३॥ पुनरर्जुनो युद्धे स्वहस्तैः पर्वतान् वृक्षांश्च

योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः ॥ चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥१९॥ स्त्रीरत्नैरावृतः क्रीडन्रेवांभसि मदोत्कटः ॥
वैजयंतीं स्रजं बिभ्रद्रुरोध सरितं भुजैः ॥२०॥ विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः ॥ नामृष्यत्तस्य तद्वीर्यं वीरमानी दशाननः
॥२१॥ गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः ॥ माहिष्मत्यां संनिरुद्धो मुक्तो येन कपिर्यथा ॥२२॥ स एकदा तु मृगयां वि-
चरन्विपिने वने ॥ यदृच्छयाश्रमपदं जमदग्नेरुपाविशत् ॥२३॥ तस्मै स नरदेवाय मुनिरर्हणमाहरत् ॥ ससैन्यामात्यवाहाय हवि-
ष्मत्या तपोधनः ॥२४॥ स वीरस्तत्र तद्दृष्ट्वा आत्मैश्वर्यातिशायनम् ॥ तन्नाद्रियताग्निहोत्र्यां साभिलाषः स हैहयः ॥२५॥ हविर्धानी-
मृषेर्दर्पान्नरान्हर्तुमचोदयत् ॥ ते च माहिष्मतीं निन्युः सवत्सां क्रंदतीं बलात् ॥२६॥ अथ राजनि निर्याते राम आश्रम आगतः ॥
श्रुत्वा तत्तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥२७॥ घोरमादाय परशुं सतूणं चर्म कार्मुकम् ॥ अन्वधावत दुर्धर्षो मृगेंद्र इव यूथ-
पम् ॥२८॥ तमापतंतं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधम् ॥ ऐणेयचर्मांबरमर्कधामभिर्युतं जटाभिर्ददृशे पुरीं विशन् ॥२९॥
अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः ॥ अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवानसूदयत्
॥३०॥ यतो यतोऽसौ प्रहरत्परश्वधो मनोऽनिलौजाः परचक्रसूदनः ॥ ततस्ततश्छिन्नभुजोरुकंधरा निपेतुरुर्व्यां हतसूतवाहनाः ॥३१॥
दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे रणाजिरे रामकुठारसायकैः ॥ विवृक्णचर्मध्वजचापविग्रहं निपातितं हैहय आपतद्रुषा ॥३२॥ अथार्जुनः
पंचशतेषु बाहुभिर्धनुष्षु बाणान्युगपत्स संदधे ॥ रामाय रामोऽस्त्रभृतां समग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समम् ॥ ३३ ॥ पुनः
स्वहस्तैरचलान्मृधेऽङ्घ्रिपानुत्क्षिप्य वेगादभिधावतो युधि ॥ भुजान्कुठारेण कठोरनेमिना चिच्छेद रामः प्रसभं त्वहेरिव ॥ ३४ ॥

प्रगृह्य वेगेन राममधावत् । ततो रामः परशुना तद्भुजान् शिरश्च चिच्छेद ॥३४॥ एवं सहस्रार्जुने हते सति दशसहस्रं तत्पुत्रा भयाद्दुद्रुवुः ॥३५॥ रामः सवत्सां धेनुं गृहीत्वा स्वाश्रमं प्राप्य पित्रे तां दत्वा ॥३६॥ स्वकृतं कर्म कथयामास । तच्छ्रुत्वा जमदग्निरभाषत ॥३७॥ हे राम, हे महाबाहो, भवान् पापमकार्षीत् । यत्सर्वदेवमयं राजानं वृथाऽवधीत् ॥३८॥ वयं ब्राह्मणाः क्षमया पूज्यतां गताः । यया क्षमया ब्रह्मा श्रेष्ठं ब्रह्मपदं प्राप॥३९॥ क्षमया ब्रह्मतेजः सूर्यप्रभेव शोभते । क्षमिणां भगवान् हरिस्तुष्यति ॥४०॥ राज्याभिषेकं प्राप्तस्य राज्ञो वधो ब्रह्मवधादपि महत्तरः । अतस्त्वं भगवंतं चित्ते कृत्वा तीर्थसेवया तत्पापं नाशय ॥४१॥ इति श्री॰चू॰नव॰पंचदशोऽध्यायः॥१५॥ ॥ षोडशेऽथार्जुनसुतैर्जमदग्नौ हते मुहुः । रामात् क्षत्रवधः प्रोक्तो विश्वामित्रस्य चान्वयः॥१॥

कृत्तबाहोः शिरस्तस्य गिरेः शृंगमिवाहरत् ॥ हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ॥३५॥ अग्निहोत्रीमुपावर्त्य सवत्सां परवीरहा ॥ समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्पयत्॥३६॥ स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च ॥ वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥३७॥ राम राम महाबाहो भवान्पापमकारषीत् ॥ अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ॥३८॥ वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः ॥ यया लोकगुरुर्देवः पारमेष्ठ्यमगात्पदम् ॥३९॥ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा ॥ क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥४०॥ राज्ञो मूर्धावसिक्तस्य वधो ब्रह्मवधाद्गुरुः ॥ तीर्थसंसेवया चांहो जह्यंगाच्युतचेतनः॥४१॥ इति श्रीमद्भा॰महा॰नवमस्कंधे पंचदशोऽध्यायः॥१५॥ ॥ श्रीशुक उवाच॥पित्रोपशिक्षितो रामस्तथेति कुरुनंदन॥ संवत्सरं तीर्थयात्रां चरित्वाऽऽश्रममाव्रजत् ॥१॥ कदाचिद्रेणुका याता गंगायां पद्ममालिनम् ॥ गंधर्वराजं क्रीडंतमप्सरोभिरपश्यत ॥२॥ विलोकयंती क्रीडंतमुदकार्थं नदीं गता॥ होमवेलां न सस्मार किंचिच्चित्ररथस्पृहा ॥ ३ ॥ कालात्ययं तं विलोक्य मुनेः शापविशंकिता ॥ आगत्य कलशं तस्थौ पुरोधाय कृतांजलिः ॥ ४ ॥ व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् ॥ घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ॥५॥ रामः संचोदितः पित्रा भ्रातॄन्मात्रा सहावधीत् ॥ प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ॥६॥ वरेण च्छंदयामास प्रीतः सत्यवतीसुतः ॥ वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ॥ ७ ॥ ॥

श्रीशुक उवाच ॥ एवं पित्रोपशिक्षितो रामः संवत्सरपर्यंतं तीर्थयात्रां चरित्वा पुनराश्रमं प्राप्तः ॥ १॥ कदाचित् रेणुका जलार्थं गंगां गता । तत्राप्सरोभिः सह क्रीडंतं चित्ररथं गंधर्वं दृष्ट्वा ॥ २ ॥ तस्मिन् गंधर्वे किंचित् स्पृहावती सती होमवेलां न सस्मार ॥ ३ ॥ ततः कालातिक्रमं ज्ञात्वा मुनेः शापशंकिता सती गृहं प्राप्य मुनेरग्रे कलशं निधाय कृतांजलिस्तस्थौ ॥ ४ ॥ तदा मुनिस्तस्या मानसं व्यभिचारं ज्ञात्वा कुपितः सन् जगाद । हे पुत्राः, एतां पापां मारयत । एवमुक्तास्ते मातृवधं न चक्रुः ॥५॥ तदा आज्ञातिलंघिनां भ्रातॄणां मातुश्च वधे पित्रा प्रेरितो रामः पितुः प्रभावज्ञः[1] सन् मात्रा सह भ्रातॄन् जघान ॥ ६ ॥ तदा प्रसन्नो जमदग्निर्वरं वृणीष्वेत्याह । रामोऽपि निहतानां जीवितं वधेऽस्मृतिं च वव्रे ॥ ७ ॥ ॥ ॥

---

[1] यदि न हन्यां तर्हि मामपि हंतुं समर्थः । यदि हन्यां तर्हि मयि संतुष्टः संस्तानपि जीवयितुं समर्थ इति जानन्नित्यर्थः ।

तदा ते निद्रासमाप्ताविव कुशलिन उत्तस्थुः । रामः पितुस्तपोवीर्यं जानन् सुहृद्वधं चक्रे ॥८॥ अथ येऽर्जुनस्य दशसहस्रं पुत्रास्ते पितुर्वधं स्मरंतः संतः सुखं न लेभिरे ॥९॥ त एकदाऽऽश्रमतः सभ्रातरि रामे वनं गते सति वैरं साधयंतस्तस्याश्रमं प्राप्य ॥१०॥ होमशालायां समाधिस्थं जमदग्निं दृष्ट्वा जघ्नुः॥११॥ तदा कृपणया राममात्रा याच्यमाना अपि दुष्टास्ते जमदग्नेः शिर उत्कृत्य निन्युः॥१२॥ तदा शोकार्ता रेणुका हे राम, हे राम, हे तातेत्युच्चैश्चुक्रोश॥१३॥ रामस्तच्छ्रुत्वाऽऽश्रमं प्राप्य पितरं हतं ददर्श ॥१४॥ तदा शोकमोहितो राम आह । हा तात, हे धर्मिष्ठ, अस्मान् त्यक्त्वा भवान् स्वर्गं गतः ॥१५॥ एवं विलप्य पितुर्देहं भ्रातृषु नि-

उत्तस्थुस्ते कुशलिनो निद्रापाय इवांजसा ॥ पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ॥ ८ ॥ येऽर्जुनस्य सुता राजन्स्मरंतः स्वपितुर्वधम् ॥ रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ॥ ९ ॥ एकदाऽऽश्रमतो रामे सभ्रातरि वनं गते ॥ वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् ॥ १० ॥ दृष्ट्वाऽग्न्यगार आसीनमावेशितधियं मुनिम् ॥ भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥ ११ ॥ याच्यमानाः कृपणया राममात्रातिदारुणाः ॥ प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबंधवः ॥ १२ ॥ रेणुका दुःखशोकार्ता निघ्नंत्यात्मानमात्मना ॥ राम रामेहि तातेति विचुक्रोशोच्चकैः सती ॥१३॥ तदुपश्रुत्य दूरस्था हा रामेत्यार्तवत्स्वनम् ॥ त्वरयाऽऽश्रममासाद्य ददृशे पितरं हतम् ॥१४॥ तद्दुःखरोषामर्षार्तिशोकवेगविमोहितः॥ हा तात साधो धर्मिष्ठ त्यक्त्वास्मान्स्वर्गतो भवान्॥१५॥ विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् ॥ प्रगृह्य परशुं रामः क्षत्रांताय मनो दधे ॥ १६ ॥ गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियम् ॥ तेषां स शीर्षभी राजन्मध्ये चक्रे महागिरिम् ॥ १७ ॥ तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहाम् ॥ हेतुं कृत्वा पितृवधं क्षत्रेऽमंगलकारिणि ॥ १८ ॥ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ॥ स्यमंतपंचके चक्रे शोणितोदान् ह्रदान्नव ॥ १९ ॥ पितुः कायेन संधाय शिर आदाय बर्हिषि ॥ सर्वदेवमयं देवमात्मानमयजन्मखैः ॥ २० ॥ ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम् ॥ अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् ॥ २१ ॥ अन्येभ्योऽवांतरदिशः कश्यपाय च मध्यतः ॥ आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परम् ॥ २२ ॥ ततश्चावभृथस्नानविधूताशेषकिल्बिषः ॥ सरस्वत्यां महानद्यां रेजे व्यभ्र इवांशुमान् ॥ २३ ॥ स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणम् ॥ ऋषीणां मंडले सोऽभूत्सप्तमो रामपूजितः ॥ [illegible] ॥

धाय परशुं गृहीत्वा क्षत्रांताय मनो दधे ॥१६॥ ततो रामो माहिष्मतीं पुरीं गत्वा तेषामधमानां राज्ञां मस्तकैः पुर्या मध्ये महापर्वतं चक्रे ॥१७॥ तद्रक्तेन घोरां नदीं च चक्रे । एवं पितृवधं हेतुं कृत्वा ॥ १८ ॥ एकविंशतिवारं[1] निःक्षत्रियां पृथ्वीं कृत्वा स्यमंतपंचके रक्तजलान् नव ह्रदान् चक्रे ॥१९॥ ततः पितुर्मस्तकं गृहीत्वा पितुः शरीरेण संधाय सर्वदेवमयमात्मानं यज्ञैरयजत ॥२०॥ तदा होत्रे पूर्वां दिशं ददौ । ब्रह्मणे दक्षिणां अध्वर्यवे पश्चिमां उद्गात्रे उत्तरां ॥२१॥ अन्येभ्यो विदिशः कश्यपाय मध्यमं प्रदेशमुपद्रष्ट्रे आर्यावर्तं[2] च ददौ॥२२॥ततः सरस्वत्यामवभृथस्नानेन गतपापः सन् सूर्य इव रेजे ॥२३॥ एवं जमदग्निर्देहं लब्ध्वा रामपूजितः सन्

---

[1] रेणुकया दुःखावेशादेकविंशतिवारमुरस्ताडनं कृतं ततो रामस्तावत्कृत्वः क्षत्रमुत्सादितवानिति प्रसिद्धिः । [2] विंध्याचलहिमालचलयोर्मध्यमं भूमिप्रदेशम् ।

ऋषीणां मंडले सप्तम ऋषिरभूत् ॥ २४ ॥ आगामिमन्वंतरे रामोऽपि सप्तर्षिष्वेकतमो वेदप्रवर्तक ऋषिर्भविष्यति ॥२५॥ हे राजन्, स रामोऽद्यापि सिद्धगंधर्वचारणैर्गीयमानचरितो महेंद्रपर्वत आस्ते ॥२६॥ एवं श्रीहरिर्भृगुवंशेऽवतीर्य भुवो भारं जहार ॥२७॥ गाधे राज्ञस्तु महातेजा विश्वामित्रोऽभवत् । यस्तपसा क्षत्रियत्वं हित्वा ब्रह्मतेजो लेभे ॥२८॥ तस्यैकशतं पुत्रा आसन् । ते सर्वे नाम्ना मधुच्छंदसः ॥ २९ ॥ विश्वामित्रोऽजीगर्तस्य मध्यमं पुत्रं शुनःशेपं पुत्रत्वेन स्वीकृत्य स्वपुत्रानाह । हे पुत्राः, भवद्भिरेष पुत्रो ज्येष्ठः प्रकल्प्यताम् ॥३०॥ यो हरिश्चंद्रमखे विक्रीतः पशुर्देवादीन् स्तुत्वा पाशबंधान्मुक्तः॥३१॥ यश्च देवयजने देवै रक्षितः स शुनःशेपो भार्गवोऽपि गाधेर्वंशेषु देवरात इति नाम्ना ख्यातो भवतु ॥३२॥ एतद्विश्वामित्रवचो ये ज्येष्ठाः पंचाशत् ५० पुत्रास्ते नांगीकृतवंतः । तदा क्रुद्धो विश्वामित्रो म्लेच्छा भवतेति तान् शशाप ॥३३॥ ततः कनिष्ठान् पंचाशत् ५० पुत्रानाह । हे पुत्राः, अयं पुत्रो भवद्भिर्ज्येष्ठः प्रकल्प्यताम् । तदा ते तं शुनःशेपं ज्येष्ठं चक्रुः ॥३४॥ तदा विश्वामित्रस्तान् सुतानाह । हे पुत्राः, ये यूयं मे मानं कृत्वा मां पुत्रवंतं कृतवंतस्ते यूयं पुत्रवंतो भविष्यथ॥३५॥ हे कुशिकाः, एष देवरातो यतो मत्पुत्रोऽतः कौशिक एव । अतो यूयं तमनुगच्छत । हे राजन्, विश्वामित्रस्यान्येऽष्टकहारीतजयादयः पुत्रा आसन् ॥३६॥ एवं कौशिकगोत्रं नानाप्रकारं भूत्वा प्रवरांतरं प्राप्तम् ॥३७॥ इति श्री० चू० नव० षोडशोऽध्यायः ॥ १६ ॥ [illegible] ॥ आयोः सप्तदशे त्वैलज्येष्ठपुत्रस्य पंचसु ।

जामदग्न्योऽपि भगवान्रामः कमललोचनः ॥ आगामिन्यंतरे राजन्वर्तयिष्यति वै बृहत् ॥ २५ ॥ आस्तेऽद्यापि महेंद्राद्रौ न्यस्तदंडः प्रशांतधीः ॥ उपगीयमानचरितः सिद्धगंधर्वचारणैः ॥ २६ ॥ एवं भृगुषु विश्वात्मा भगवान्हरिरीश्वरः ॥ अवतीर्य परं भारं भुवोऽहन्बहुशो नृपान् ॥ २७ ॥ गाधेरभून्महातेजाः समिद्ध इव पावकः ॥ तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥ २८ ॥ विश्वामित्रस्य चैवासन्पुत्रा एकशतं नृप ॥ मध्यमस्तु मधुच्छंदा मधुच्छंदस एव ते ॥२९॥ पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवम् ॥ आजीगर्तं सुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥ ३० ॥ यो वै हरिश्चंद्रमखे विक्रीतः पुरुषः पशुः ॥ स्तुत्वा देवान्प्रजेशादीन्मुमुचे पाशबंधनात् ॥ ३१ ॥ यो रातो देवयजने देवैर्गाधिषु तापसः ॥ देवरात इति ख्यातः शुनःशेपः स भार्गवः ॥ ३२ ॥ ये मधुच्छंदसो ज्येष्ठाः कुशलं मेनिरे न तत् ॥ अशपत्तान्मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः ॥ ३३ ॥ स होवाच मधुच्छंदाः सार्धं पंचाशता ततः ॥ यन्नो भवान्संजानीते तस्मिंस्तिष्ठामहे वयम् [illegible] ॥ ज्येष्ठं मंत्रदृशं चक्रुस्त्वामन्वंचो वयं स्म हि ॥ विश्वामित्रः सुतानाह वीरवंतो भविष्यथ ॥ ये मानं मेऽनुगृह्णंतो वीरवंतमकर्त माम् ॥ ३५ ॥ एष वः कुशिका वीरो देवरातस्तमन्वित ॥ अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥ ३६ ॥ एवं कौशिकगोत्रं तु विश्वामित्रैः पृथग्विधम् ॥ प्रवरांतरमापन्नं तद्धि चैवं प्रकल्पितम् ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे षोडशोऽध्यायः ॥१६॥ ॥ श्रीशुक उवाच ॥ यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः ॥ नहुषः क्षत्रवृद्धश्च रजी रंभश्च वीर्यवान् ॥ १ ॥ ॥

---

१ एके शप्ता एकेऽनुगृहीता अन्यस्तु पुत्रत्वेन स्वीकृत इत्येवम् ।

सुतेषु क्षत्रवृद्धादिचतुर्णां वंशवर्णनम् ॥१॥ श्रीशुक उवाच ॥ यः पुरूरवसः पुत्र आयुस्तस्य पंच पुत्रा आसन् । तेच–नहुषः क्षत्रवृद्धः रजी रंभः अनेनाश्चेति
॥१॥ तत्र क्षत्रवृद्धस्य सुहोत्रः । तस्य त्रयः पुत्राः ॥२॥ काश्यः कुशः गृत्समदश्चेति । तत्र गृत्समदात् शुनकः । तस्य शौनकः ॥३॥ काश्यात् काशिः पुत्रः ।
तस्य राष्ट्रः । तस्य दीर्घतमाः । तस्य धन्वंतरिः । स आयुर्वेदप्रवर्तको वासुदेवांशोऽभूत् । तस्य केतुमान् । तस्य भीमरथः ॥४॥५॥ तस्य दिवोदासः । तस्य द्युमान् ।
स एव ‘द्युमान्’ प्रतर्दनः शत्रुजित् ऋतध्वजः कुवलयाश्व इति च नामचतुष्टयेनोक्तः । तस्य द्युमतोऽलर्कादयः पुत्राः ॥ ६ ॥ तत्रालर्कः षट्षष्टिसहस्र
६६००० वर्षाणि पृथ्वीं बुभुजे ॥७॥ अलर्कस्य संततिर्नाम पुत्रः । तस्य सुनीथः । तस्य सुकेतनः । तस्य धर्मकेतुः । तस्य सत्यकेतुः ॥ ८ ॥ तस्य धृष्टकेतुः ।

अनेना इति राजेंद्र शृणु क्षत्रवृधोऽन्वयम् ॥ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः ॥ २ ॥ काश्यः कुशो गृत्समद इति
गृत्समदादभूत् ॥ शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ॥३॥ काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता ॥ धन्वंतरिर्दैर्घतम
आयुर्वेदप्रवर्तकः ॥ ४ ॥ यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः ॥ तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ॥ ५ ॥
दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः ॥ स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः ॥ तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः
॥ ६ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ नालर्कादपरो राजन्मेदिनीं बुभुजे युवा ॥ ७ ॥ अलर्कात्संततिस्तस्मात्सुनीथोऽथ
सुकेतनः ॥ धर्मकेतुसुतस्तस्मात्सत्यकेतुरजायत ॥ ८ ॥ धृष्टकेतुः सुतस्तस्मात्सुकुमारः क्षितीश्वरः ॥ वीतिहोत्रस्य
भर्गोऽतो भार्गभूमिरभून्नृपः ॥ ९ ॥ इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः ॥ रंभस्य रभसः पुत्रो गंभीरश्चाक्रियस्ततः
॥ १० ॥ तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ॥ शुद्धस्ततः शुचिस्तस्मात्त्रिककुद्धर्मसारथिः ॥ ११ ॥ ततः शांतरयो
जज्ञे कृतकृत्यः स आत्मवान् ॥ रजेः पंचशतान्यासन्पुत्राणाममितौजसाम् ॥ १२ ॥ देवैरभ्यर्थितो दैत्यान्हत्वेंद्रायाददाद्दिवम्
॥ इंद्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः ॥ १३ ॥ आत्मानमर्पयामास प्रह्लादाद्यरिशंकितः ॥ पितर्युपरते पुत्रा याचमानाय
नो ददुः ॥१४ ॥ त्रिविष्टपं महेंद्राय यज्ञभागान्समाददुः ॥ गुरुणा हूयमानेऽग्नौ बलभित्तनयान्रजेः ॥ १५ ॥ अवधीद्भ्रंशितान्मार्गान्न
कश्चिदवशेषितः ॥ कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ॥ १६॥ ॥

तस्य सुकुमारः । तस्य वीतिहोत्रः । तस्य भर्गः । तस्य भार्गभूमिः ॥९॥ इमे काशेर्वंशजा नृपाः । अथायुःपुत्रस्य रंभस्य रभसो नाम पुत्रः । तस्य गंभीरः ।
तस्याक्रियः॥१०॥ तस्य स्त्रियां ब्रह्मकुलं जज्ञे । आयुःपुत्रस्यानेनसः शुद्धो नाम पुत्रो जातः। तस्य शुचिः । तस्य त्रिककुत् । तस्य धर्मसारथिः ॥११॥ तस्य
शांतरयः। तस्य वंशो नास्ति । अथायोःपुत्रस्य रजेः पंचशतं पुत्रा बभूवुः॥१२॥ यो रजिर्देवैः प्रार्थितः सन् दैत्यान् हत्वेंद्राय स्वर्गं ददौ । इंद्रस्तस्मै पुनः स्वर्गं
दत्वा तं नत्वा ॥१३॥ प्रह्लादाद्यरिशंकितः सन् आत्मानमपि समर्पयामास । तस्मिन् रजौ मृते सति तत्पुत्रा याचमानायेंद्राय स्वर्गं न ददुः॥ १४ ॥ तदा तेषां
बुद्धिभ्रंशाय बृहस्पतिना मारणप्रयोगेणाग्नौ हूयमाने सति इंद्रो रजेः पुत्रान् जघान । न कश्चिदवशिष्टः। क्षात्रवृद्धस्य कुशस्य प्रतिर्नामपुत्रः । तस्य संजयः ।

तस्य जयः ॥१५॥१६॥ तस्य कृतः । तस्य हर्यवनः । तस्य सहदेवः । तस्य हीनः । तस्य जयसेनः ॥१७॥ तस्य संकृतिः । तस्य जयः । तस्य क्षत्रधर्मा । अथ नहुषवंशं श्रृणु ॥१८॥ इति श्रीम० चू० नव० सप्तदशोऽध्यायः॥१७॥ ॥ अष्टादशे ययातेस्तु नाहुषस्य कथोच्यते । यस्य पंचसु पुत्रेषु कनीयानग्रहीज्जराम् ॥१॥ श्रीशुक उवाच ॥ नहुषस्य यतिः ययातिः संयातिः आयतिः वियतिः कृतिश्चेति पंच पुत्रा बभूवुः॥१॥ तत्र यतिः पित्रा दत्तं राज्यं नैच्छत् । यतस्तत्परिणामवित् ॥२॥ अतः पितरि नहुषे इंद्राण्या अभिलाषादगस्त्यादिभिर्द्विजैः स्वर्गाद्भ्रंशयित्वाऽजगरत्वं प्रापिते सति तद्द्वितीयपुत्रो ययातिर्नृपोऽभवत् ॥ ३ ॥ स चतुर्दिक्षु कनिष्ठभ्रातॄनाज्ञापितवान् । ततः काव्यस्य वृषपर्वणश्च कन्याभ्यां कृतदारः सन् पृथिवीं जुगोप ॥४॥ राजोवाच ॥ हे ब्रह्मन् ,काव्यो ब्रह्मर्षिर्ययातिस्तु क्षत्रियः । एवं सति प्रतिलोमको विवाहः कथं जातः । तत्कथ्यताम् ॥५॥ श्रीशुक उवाच ॥ एकदा वृषपर्वणः शर्मिष्ठा नाम कन्या सहस्रसखीभिर्देवयान्या च युता सती॥६॥ पुष्पितद्रुमव्याप्ते पुरोद्याने विजहार ॥७॥ ताः सर्वास्तीरे वस्त्राणि स्थापयित्वा जलाशये मिथः सिंचंत्यो विजहुः॥८॥ तदा गौर्या सह वृषभस्थितं गच्छंतं शिवं दृष्ट्वा लज्जिताः सत्यस्ताः कन्याः सरस उत्तीर्य वस्त्राणि पर्यधुः ॥९॥ तदाऽजानती शर्मिष्ठा देवयान्या वस्त्रं स्वकीयं मत्वा पर्यधात् । तदा कुपिता देवयानी जगाद ॥१०॥ अहो अस्या दास्या अयोग्यं कर्म निरीक्ष्यताम् । अस्मद्धार्यं वस्त्रमियं दासी धृतवती । यज्ञे हविः शुनीव ॥ ११ ॥ यैर्ब्राह्मणैरिदं जगत्तपोबलेन सृष्टम् । लोके वेदमार्गश्च दर्शितः । ये परमात्मनो मुखम् । यान् द्विजान् देवा हरिरपि स्तुवते ॥१२॥१३॥ ॥

ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः ॥ सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः ॥१७॥ संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः ॥ क्षत्रवृद्धान्वया भूपाः श्रृणु वंशं च नाहुषात् ॥ १८ ॥ इति श्रीम० महा० नव० चंद्रवंशानुवर्णने सप्तदशोऽध्यायः ॥१७॥

श्रीशुक उवाच ॥ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः॥ षडिमे नहुषस्यासन्निंद्रियाणीव देहिनः ॥१॥ राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणामवित् ॥ यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ॥२॥ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः॥ प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ॥३॥ चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः ॥ कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥४॥ राजोवाच ॥ ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबंधुश्च नाहुषः ॥ राजन्यविप्रयोः कस्माद्विवाहः प्रतिलोमकः ॥५॥ श्रीशुक उवाच ॥ एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्यका ॥ सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥ ६ ॥ देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले ॥ व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ॥७॥ ता जलाशयमासाद्य कन्याः कमललोचनाः ॥ तीरे न्यस्य दुकूलानि विजह्रुः सिंचतीर्मिथः ॥८॥ वीक्ष्य व्रजंतं गिरिशं सह देव्या वृषस्थितम् ॥ सरसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥ ९ ॥ शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् ॥ स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥१०॥ अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसांप्रतम् ॥ अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥ यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये ॥ धार्यते यैरिह ज्योतिः शिवः पंथाश्च दर्शितः ॥१२॥ यान्वंदंत्युपतिष्ठंते लोकनाथाः सुरेश्वराः ॥ भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥ १३ ॥ ॥

तत्रापि वयं भृगवः । अपि च । अस्याः पिता वृषपर्वा मत्पितुः शिष्यः । तस्येयं कन्या शर्मिष्ठा शूद्रो वेदमिव मम वस्त्रं धृतवती ॥१४॥ एवं शपंतीं गुरुपुत्रीं सर्पिणीव क्रुद्धा शर्मिष्ठाऽभाषत ॥१५॥ हे भिक्षुकि, आत्मवृत्तमज्ञात्वा किं बहु कत्थसे । पित्रा सह त्वमुदरनिर्वाहार्थं श्वानवदस्माकं गृहान् किं न प्रतीक्षसे॥१६॥ एवंविधैर्दुष्टवाक्यैर्देवयानीं निर्भर्त्स्य तस्या वस्त्रमादाय तां कूपे प्रक्षिप्य शर्मिष्ठा स्वगृहं जगाम ॥१७॥ तस्यां गतायां ययातिर्वने मृगयां चरन् तृषाक्रांतः सन् यदृच्छया तत्र कूपतीरं प्राप्य कूपे पतितां नग्नां तां दृष्ट्वा ॥१८॥ तस्यै स्वमुत्तरीयं वस्त्रं दत्वा स्वपाणिना तस्याः पाणिं गृहीत्वा कृपया तामुज्जहार ॥ १९ ॥ तदा देवयानी प्रेमवाण्या तमाह । हे राजन्, त्वया मे पाणिर्गृहीतः ॥२०॥ अतोऽन्यः पतिर्मे मा भूत् । एष ईश्वरकृत एव संबंधो न मनुष्यकृतः ॥२१॥ हे ययाते, बृहस्पतेः पुत्रस्य कचस्य[1] शापान्मे ब्राह्मणः पतिर्न भविता ॥२२॥ ययातिरशास्त्रीयमपि दैवप्रापितं तज्ज्ञात्वा तस्यां सकामं स्वं मनश्च ज्ञात्वा तस्या वाक्यमंगीकृतवान् ॥२३॥ अथ राजनि गते सति देवयानी रुदती सती शर्मिष्ठया कृतं सर्वं पित्रे न्यवेदयत्॥२४॥तदा शुक्रः पौरोहित्यं निंदन् देवयान्या सह नगरान्निर्ययौ ॥२५॥ वृषपर्वा तं ज्ञात्वा पथि गुरुं शिरसा प्रणम्य प्रसादयन् पादयोः पतितः ॥२६॥ क्षणार्धक्रोधः शुक्रः शिष्यं प्राह । हे वृषपर्वन्, मे कन्याया इच्छा पूर्णा क्रियताम् ॥२७॥ दैत्येन तथेत्युक्ते सति देवयानी प्राह । अहं पित्रा दत्ता सती यत्र गमिष्यामि तत्र सखीसहिता शर्मिष्ठा मम दास्यं कर्तुमनुयातु॥२८॥

वयं तत्रापि भृगवः शिष्योऽस्या नः पिताऽसुरः ॥ अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती ॥ १४ ॥ एवं शपंतीं शर्मिष्ठा गुरु-
पुत्रीमभाषत ॥ रुषा श्वसंत्युरंगीव धर्षिता दष्टदच्छदा ॥१५॥ आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि ॥ किं न प्रतीक्षसेऽस्माकं
गृहान्बलिभुजो यथा ॥१६॥ एवंविधैः सुपरुषैः क्षिप्त्वाऽऽचार्यसुतां सतीम् ॥ शर्मिष्ठा प्राक्षिपत्कूपे वास आदाय मन्युना ॥१७॥
तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ॥ प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ १८ ॥ दत्वा स्वमुत्तरं वासस्तस्यै
राजा विवाससे ॥ गृहीत्वा पाणिना पाणिमुज्जहार दयापरः॥१९॥ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ॥राजंस्त्वया गृहीतो मे
पाणिः परपुरंजय ॥ २० ॥ हस्तग्राहो परो मा भूद्गृहीतायास्त्वया हि मे ॥ एष ईशकृतो वीर संबंधो नौ न पौरुषः ॥ २१ ॥
यदिदं कूपलग्नाया भवतो दर्शनं मम ॥ न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ॥ कचस्य बार्हस्पत्यस्य शापाद्यमशपं पुरा
॥ २२ ययातिरनभिप्रेतं दैवोपहृतमात्मनः ॥ मनस्तु तद्गतं बुद्ध्वा प्रतिजग्राह तद्वचः ॥ २३ ॥ गते राजनि सा वीरे तत्र स्म
रुदती पितुः ॥ न्यवेदयत्ततः सर्वमुक्तं शर्मिष्ठया कृतम् ॥ २४॥ दुर्मना भगवान्काव्यः पौरोहित्यं विगर्हयन् ॥ स्तुवन्वृत्तिं च
कापोतीं दुहित्रा स ययौ पुरात् ॥ २५ ॥ वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् ॥ गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि
॥ २६ ॥ क्षणार्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः ॥ कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥ तथेत्यवस्थिते
प्राह देवयानी मनोगतम् ॥ पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥ २८ ॥ ॥

---

[1] बृहस्पतेः पुत्रः कचः शुक्रान्मृतसंजीवनीं विद्यामध्यगात् । तदा च शुक्रकन्या देवयानी तं पतिमिच्छितवती । स च गुरुपुत्री मम पूज्येति न तामुदवहत् । ततश्च कुपिता सती तवेयं विद्या निष्फला भवत्विति तं शशाप । स च तव ब्राह्मणः पतिर्न भवेदिति तां शशाप ।

तदा शर्मिष्ठा स्वानां संकटं वीक्ष्य देवयानीसंतोषे च महत्कार्यं वीक्ष्य स्त्रीसहस्रेण सह दासवद्देवयानीं पर्यचरत्॥२९॥ततः शुक्रः कन्यां ययातये दत्वा जगाद। हे राजन्, शर्मिष्ठायास्तल्पे त्वं नोपगच्छेः ॥३०॥ ततः कदाचिच्छर्मिष्ठा देवयानीं पुत्रवतीं दृष्ट्वा रहसि तमेव पतिं वव्रे ॥३१॥ शर्मिष्ठयाऽपत्यार्थं याचितो ययातिर्धर्ममवेक्ष्य शुक्रवचश्च स्मरन् दैवप्राप्तं संगमभ्यपद्यत । न कामतः॥३२॥देवयानी यदुं तुर्वसुं च प्रासूत । शर्मिष्ठा द्रुह्युं अनुं पूरुं च प्रासूत ॥३३॥ शर्मिष्ठाया भर्तुः सकाशाद्गर्भसंभवं विज्ञाय देवयानी क्रोधेन पितुर्गेहं ययौ ॥३४॥ तदा ययातिः प्रियामनुगतः सन् वचोभिस्तां सांत्वयन्नपि प्रसादयितुं न शशाक ॥३५॥ततः शुक्रः कन्याया वचः श्रुत्वा क्रुद्धः सन् जगाद। हे अनृतपूरुष, त्वां विरूपकरणी जरा प्राप्नोतु॥३६॥ययातिरुवाच ॥ हे ब्रह्मन् तव दुहितरि कामै-

स्वानां तत्संकटं वीक्ष्य तदर्थस्य च गौरवम् ॥ देवयानीं पर्यचरत्स्त्रीसहस्रेण दासवत् ॥२९॥ नाहुषाय सुतां दत्वा सह शर्मिष्ठयोशना ॥ तमाह राजन् शर्मिष्ठामाधास्तल्पे न कर्हिचित् ॥ ३० ॥ विलोक्यौशनसीं राजन् शर्मिष्ठा सप्रजां क्वचित् ॥ तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥ ३१ ॥ राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् ॥ स्मरन् शुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥ ३२ ॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत ॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥ गर्भसंभवमासुर्या भर्तुर्विज्ञाय मानिनी ॥ देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ॥ ३४ ॥ प्रियामनुगतः कामी वचोभिरुपमंत्रयन् ॥ न प्रसादयितुं शेके पादसंवाहनादिभिः ॥ ३५ ॥ शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष ॥ त्वां जरा विशतां मंद विरूपकरणी नृणाम् ॥ ३६ ॥ ययातिरुवाच ॥ अतृप्तोऽस्म्यद्य कामानां ब्रह्मन्दुहितरि स्म ते ॥ व्यत्यस्यतां यथाकामं वयसा योऽभिधास्यति ॥ ३७ ॥ इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत ॥ यदो तात प्रतीच्छेमां जरां देहि निजं वयः ॥ ३८ ॥ मातामहकृतां वत्स न तृप्तो विषयेष्वहम् ॥ वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥ ३९ ॥ यदुरुवाच ॥ नोत्सहे जरसा स्थातुमंतरा प्राप्तया तव ॥ अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥ ४० ॥ तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ॥ प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥ ४१ ॥ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकम् ॥ न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ॥४२॥ पूरुरुवाच ॥ को नु लोके मनुष्येंद्र पितुरात्मकृतः पुमान् ॥ प्रतिकर्तुं क्षमो यस्य प्रसादाद्विंदते परम् ॥ ४३ ॥ ॥

रहमद्याप्यतृप्तोऽस्मि । तदा शुक्र उवाच । हे राजन्, यस्ते जरां ग्रहीष्यति तस्य वयसा त्वं यथेच्छं भोगान् भुंक्ष्व ॥३७॥ एवं जराया व्यवस्थां लब्ध्वा राजा ज्येष्ठं पुत्रं यदुमुवाच । हे यदो, इमां जरां त्वं गृहाण निजं तारुण्यं वयश्च मे देहि ॥ ३८ ॥ हे वत्स, तव वयसाहं कतिपयाः समा रंस्ये ॥ ३९ ॥ ॥ यदुरुवाच ॥ हे तात,विषयसुखमभुक्त्वाहं जरया स्थातुं नोत्सहे ॥ ४० ॥ एवमेव तुर्वसुः द्रुह्युः अनुश्चापि पितरं प्रत्याचख्युः। यतस्तेऽनित्ये यौवने नित्यबुद्धयः ॥ ४१ ॥ तदा राजा वयसा न्यूनं गुणैरधिकं पूरुं जगाद । हे वत्स, ज्येष्ठबंधुवत्त्वं नेति वक्तुं नार्हसि॥ ४२ ॥ पूरुरुवाच ॥ हे तात, पितुराज्ञां लोके को न मन्यते । यस्य प्रसादादैहिकं पारलौकिकं च सुखं प्राप्नोति ॥ ४३ ॥ ॥ ॥

यः पुत्रः पितुश्चिंतितं कुर्यात्स उत्तमः। यः पित्रोक्तं कुरुते स मध्यमः। योऽश्रद्धया कुरुते सोऽधमः। यश्चोक्तेऽपि न कुरुते स पुत्रो विष्ठातुल्यः ॥४४॥ इत्युक्त्वा पितुर्जरां जगृहे। ययातिरपि तस्य तारुण्येन सप्तद्वीपस्थाः प्रजाः पितृवत्पालयन् विषयान् बुभुजे ॥४५॥४६॥ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः पतेः प्रीतिं चकार ॥४७॥ ययातिर्भूरिदक्षिणैर्यज्ञैः सर्वदेवमयं हरिमयजत ॥ ४८ ॥ यस्मिन् हरौ व्योम्नि मेघपंक्तिरिव विश्वं विरचितमस्ति ॥४९ ॥ तं वासुदेवं हृदि विन्यस्य निष्कामतया हरिमयजत ॥५०॥ एवं वर्षसहस्रपर्यंतं सार्वभौमो राजा ययातिरिंद्रियैर्विषयान् भुंजानोऽपि नातृप्यत् ॥५१॥ इति श्री० चू० नव० अष्टादशोऽध्यायः॥१८॥ ऊनविंशे ययातिः स्वं चेष्टितं नन्वजोपमम्। देवयानीं समाश्राव्य विरक्तो मुक्तिमाप्तवान्॥१॥ श्रीशुक उवाच॥ स ययातिरित्थं स्त्रीलंपटः

उत्तमश्चिंतितं कुर्यात्प्रोक्तकारी तु मध्यमः ॥ अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥४४॥ इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ॥ सोऽपि तद्वयसा कामान्यथावज्जुजुषे नृप॥४५॥ सप्तद्वीपपतिः सम्यक् पितृवत्पालयन्प्रजाः॥ यथोपजोषं विषयाञ्जुजुषेऽव्याहतेंद्रियः ॥४६॥ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ॥ प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः॥४७॥ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः॥ सर्वदेवमयं देवं सर्ववेदमयं हरिम्॥४८॥ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः॥ नानेव भाति नाभाति स्वप्नमायामनोरथः॥४९॥ तमेव हृदि विन्यस्य वासुदेवं गुहाशयम्॥ नारायणमणीयांसं निराशीरयजत्प्रभुम्॥५०॥ एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखम्॥ विदधानोऽपि नातृप्यत्सार्वभौमः कदिंद्रियैः॥ ५१ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां नवमस्कंधेऽष्टादशोऽध्यायः ॥१८॥ ॥ श्रीशुक उवाच ॥ स इत्थमाचरन्कामान्स्त्रैणोपह्नवमात्मनः॥ बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥ १ ॥ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ॥ धीरा यस्यानुशोचंति वने ग्रामनिवासिनः ॥ २ ॥ बस्त एको वने कश्चिद्विचिन्वन्प्रियमात्मनः ॥ ददर्श कूपे पतितां स्वकर्मवशगामजाम् ॥ ३ ॥ तस्या उद्धरणोपायं बस्तः कामी विचिंतयन् ॥ व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ॥ ४ ॥ सोत्तीर्य कूपात्सुश्रोणी तमेव चकमे किल ॥ तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कांतकामिनीः ॥ ५ ॥ पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ॥ स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः ॥ रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥ ६ ॥ तमेव प्रेष्ठतमया रममाणमजान्यया ॥ विलोक्य कोपसंविग्ना नामृष्यद्बस्तकर्म तत् ॥ ७ ॥ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् ॥ इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ॥८॥ ॥

कामानुपभुंजानो विरक्तः सन् देवयान्यै एतां गाथामगायत ॥१॥ हे भार्गवि, मत्सदृशेनाचरिताममूं गाथां त्वं शृणु॥२॥ कश्चिद्बस्तो वने विचरन् कूपे पतितां स्वकर्माधीनामजां ददर्श ॥३॥ स कामी बस्तस्तस्या उद्धरणोपायं चिंतयन् स्वशृंगेण कूपतीरमृद्धृत्य तामुज्जहार॥४॥ सा कूपान्निर्गत्य तमेव पतिं चकमे। तया वृतं रतिसमर्थं तं वीक्ष्यान्या बह्व्योऽजा अपि तं वव्रुः॥५॥ स एको बह्वीनां रतिवर्धनस्ताभिः सह रेमे॥६॥ततः कूपलब्धाऽजाऽन्ययाऽजया सह रमंतं तं दृष्ट्वा॥७॥ तं त्यक्त्वा दुःखिता सती आत्मनः स्वामिनंप्रति ययौ ॥ ८ ॥ ॥ ॥ ॥

---

१ संसारे।

सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम् ॥ कुर्वन्निडबिडाकारं नाशक्नोत्पथि संधितुम् ॥९॥ तस्यास्तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा ॥ लंबंतं वृषणं भूयः संदधेऽर्थाय योगवित् ॥१०॥ संबद्धवृषणः सोऽपि ह्यजया कूपलब्धया ॥ कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥ ११ ॥ तथाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः ॥ आत्मानं नाभिजानामि मोहितस्तव मायया ॥१२॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ॥ न दुह्यंति मनःप्रीतिं पुंसः कामहतस्य ते ॥१३॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १४ ॥ यदा न कुरुते भावं सर्वभूतेष्वमंगलम् ॥ समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥१५॥ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ॥ तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत्॥१६॥मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ॥बलवानिंद्रियग्रामो विद्वांसमपि कर्षति ॥१७॥ पूर्णं वर्षसहस्रं मे विषयान्सेवतोऽसकृत्॥ तथापि चानुसवनं तृष्णा तेषूपजायते ॥१८॥ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ॥ निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह॥१९॥दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संविशेत् ॥ संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक्॥२०॥ इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः॥ दत्वा स्वां जरसं तस्मादाददे विगतस्पृहः॥२१॥दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुम् ॥ प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरम् ॥२२॥ भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशाम् ॥ अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥२३॥

सोऽपि स्त्रैणो बस्त इडबिडाकारं[1] कुर्वन् तां प्रसादयितुं नाशक्नोत् ॥ ९ ॥ तत्र सोऽजास्वामी तस्य बस्तस्य वृषणमच्छिनत् । पुनर्बस्तप्रार्थनया लंबंतं तस्य वृषणं कार्यार्थं संदधे ॥ १० ॥ ततः सोऽपि कूपलब्धयाऽजया बहुकालं रेमे । सोऽद्यापि न तुष्यति ॥ ११ ॥ हे देवयानि, तथैवाहं भवत्याः प्रेमबद्धस्तव मायया मोहितश्च सन् आत्मनः स्वार्थं न जानामि ॥ १२ ॥ ये पृथिव्यां व्रीहयो यवाः सुवर्णं पशवः स्त्रियश्च तदिदं सर्वं विषयवासनाग्रस्तस्य पुंसो मनसस्तृप्तिं कर्तुं न समर्थम् ॥ १३ ॥ यतो विषयोपभोगेन कामो न शाम्यति । किं त्वधिकं वर्धते । यथा घृतेनाग्निः ॥ १४॥ यदा तु पुंसः समदृष्टित्वं भवेत्तदा तस्य सर्वा दिशः सुखमया भवंति॥१५॥ या तृष्णा विषयसेवनेनातिवृद्धस्यापि न जीर्यते। तां दुःखदां तृष्णां सुखेच्छुः शीघ्रं त्यजेत् ॥१६॥ स्त्रीसंनिधानं तु सर्वथा त्याज्यम् । मात्रा भगिन्या कन्ययापि एकांतासनो न भवेत् । बलवानिंद्रियग्रामो विद्वांसमप्याकर्षति ॥१७॥ विषयान् सेवतो मम वर्षसहस्रं पूर्णमासीत् । तथापि तेषु विषयेषु पुनस्तृष्णा जायते ॥१८॥ अतस्तां तृष्णां त्यक्त्वा ब्रह्मणि मनः स्थापयित्वा द्वंद्वरहितो[2] निरहंकारश्च सन् वने मृगैः सह चरिष्यामि ॥ १९ ॥ यो दृष्टश्रुतान् विषयान् मिथ्याभूतान् ज्ञात्वा तेष्वासक्तो न भवेत्स आत्मद्रष्टा भवति ॥ २० ॥ एवं ययातिर्देवयानीमुक्त्वा पूरवे तदीयं वयो दत्वा ततः स्वां जरामाददे ॥२१॥ ततः पूर्वस्यां दिशि द्रुह्युं दक्षिणस्यां यदुं पश्चिमायां तुर्वसुमुत्तरस्यां अनुं च स्थापयित्वा॥२२॥ सर्वभूमंडलस्य राज्ये पूरुमभिषिच्य तस्य वशेऽग्रजान् कृत्वा वनं ययौ ॥ २३ ॥ ॥ ॥ ॥

---

१ बस्तजातिशब्दम् । २ सुखदुःखादिरहितः ।

ततः स सहस्रवर्षपर्यंतं सेवितमिंद्रियसुखं क्षणेन त्यक्त्वा ॥ २४ ॥ मुक्तसमस्तसंगः सन् आत्मसाक्षात्कारेण त्रिगुणात्मकं लिंगशरीरं निरस्य वासुदेवे भगवति भक्तिं कुर्वन् मोक्षरूपां गतिं लेभे ॥२५॥ देवयान्यपि तां गाथां श्रुत्वा तमात्मनः परिहासमिव मत्वा ॥२६॥ राजनि गते सति ईश्वरतंत्राणां पतिपुत्रादिसुहृदां सहवासं प्रभोर्मायया स्वप्नवद्रचितं ज्ञात्वा ॥२७॥ सर्वत्र संगं त्यक्त्वा सर्वभूतनिवासाय भगवते वासुदेवाय तुभ्यं नम इति नमनादिभिः कृष्णे मनो निवेश्य संसारान्मुक्ता बभूव॥२८॥२९॥ इति श्री० चू० नव० एकोनविंशोऽध्यायः ॥१९॥ ॥ विंशे पितृप्रसादाप्तराजासनमहोन्नतेः। पूरोर्वंशे हि दौष्यंतेर्भरतस्येर्यते यशः॥१॥ श्रीशुक उवाच ॥ हे नृप, पूरोर्वंशं कथयामि । यत्र त्वं जातोऽसि । तथा यत्र राजर्षयो ब्रह्मवंश्याश्च जज्ञिरे॥१॥ पूरोः पुत्रो जनमेजयः ।

आसेवितं वर्षपूगान्षड्वर्गं विषयेषु सः ॥ क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥२४॥ स तत्र निर्मुक्तसमस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः ॥ परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः॥२५॥ श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः॥ स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितम् ॥२६॥ सा संनिवासं सुहृदां प्रपायामिव गच्छताम् ॥ विज्ञायेश्वरतंत्राणां मायाविरचितं प्रभोः ॥२७॥ सर्वत्र संगमुत्सृज्य स्वप्नौपम्येन भार्गवी ॥ कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः ॥२८॥ नमस्तुभ्यं भगवते वासुदेवाय वेधसे ॥ सर्वभूताधिवासाय शांताय बृहते नमः ॥२९॥ इति श्रीम०भ०नव०एकोनविंशोऽध्यायः॥१९॥ ॥ श्रीशुक उवाच ॥ पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत॥ यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥१॥ जन्मेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः ॥ प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥२॥ तस्य सुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः॥ संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥३॥ ऋतेयुस्तस्य कुक्षेयुः स्थंडिलेयुः कृतेयुकः ॥ जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः॥४॥ दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ॥ घृताच्यामिंद्रियाणीव मुख्यस्य जगदात्मनः ॥५॥ ऋतेयो रंतिभारोऽभूत्त्रयस्तस्यात्मजा नृप ॥ सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥६॥ तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजातयः ॥ पुत्रोऽभूत्सुमते रैभ्यो दुष्यंतस्तत्सुतो मतः ॥७॥ दुष्यंतो मृगयां यातः कण्वाश्रमपदं गतः ॥ तत्रासीनां स्वप्रभया मंडयंतीं रमामिव ॥८॥ विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ॥ बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥९॥ तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः ॥ पप्रच्छ कामसंतप्तः प्रहसन् श्लक्ष्णया गिरा ॥ १० ॥ ॥

तस्य प्रचिन्वान् । तस्य प्रवीरः । तस्य नमस्युः । तस्य चारुपदः ॥ २ ॥ तस्य सुद्युः । तस्य बहुगवः । तस्य संयातिः । तस्याहंयातिः । तस्य रौद्राश्वः ॥ ३ ॥ रौद्राश्वाद्घृताच्यामप्सरसि दश पुत्रा बभूवुः । तेच–ऋतेयुः कुक्षेयुः स्थंडिलेयुः कृतेयुः जलेयुः संततेयुः धर्मेयुः सत्येयुः व्रतेयुः वनेयुश्चेति ॥४॥५॥ ऋतेयोः पुत्रो रंतिभारः । तस्य पुत्रास्त्रयः–सुमतिः ध्रुवः अप्रतिरथश्चेति । अप्रतिरथस्य कण्वः ॥६॥ तस्य मेधातिथिः तस्य प्रकण्वाद्या ब्राह्मणा बभूवुः । सुमतेः पुत्रो रैभ्यः । तस्य दुष्यंतः ॥ ७ ॥ स कदाचित् मृगयां यातः सन् कण्वऋषेराश्रमस्थानं गतः । तत्रासीनां स्वकांत्याऽऽश्रमं शोभयंतीम् ॥ ८ ॥ स्त्रियं दृष्ट्वा मुमुहे । तद्दर्शनेन हर्षितः कामसंतप्तश्च सन् मधुरया वाण्या तां बभाषे ॥ ९ ॥ १० ॥ ॥ ॥

हे कमलपत्राक्षि, त्वं का कस्यासि । निर्जने वने तव किं चिकीर्षितम्॥११॥अहं त्वां निश्चयेन राजकन्यां जानामि । यतः पूरुवंशजानां चित्तमधर्मे क्वचिदपि
न रमते॥१२॥ शकुंतलोवाच ॥ हे राजन्, अहं विश्वामित्रस्य कन्या मेनकायां जाता । स्वर्गं गच्छंत्या तया वने त्यक्ताऽस्मि । अतो राजकन्यैवाहम् । एतत्सर्वं
भगवान् कण्वो वेद । हे वीर, ते किं करवाम ॥ १३ ॥ हे कमलपत्राक्ष, त्वयात्र स्थीयताम् । नः अर्हणं च गृह्यताम् । अत्र नीवाराः संति तान् भुज्यताम् ।
रोचते चेत्तर्ह्यत्रोष्यताम् ॥ १४ ॥ दुष्यंत उवाच ॥ हे सुंदरि, विश्वामित्रवंशे जातायास्तवेदं योग्यम् । राजकन्याः स्वयोग्यं वरं वृणते ॥ १५ ॥ तदा
तया तथेत्युक्ते सति राजा गांधर्वविधिना[1] तामुपयेमे॥१६॥ ततोऽमोघवीर्यो राजर्षिस्तस्यां वीर्यमादधे।सोऽन्यदिने स्वपुरं गतः। सा कालेन पुत्रमसूत ॥१७॥
तस्य कुमारस्य कण्वो जातकादिसंस्कारान् चक्रे । स बालः सिंहान् बध्वा वने क्रीडति स्म॥१८॥ शकुंतला तं पराक्रमिणं पुत्रमादाय भर्तुः समीपं जगाम॥१९॥

का त्वं कमलपत्राक्षि कस्यासि हृदयंगमे ॥ किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥११॥ व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे
॥ नहि चेतः पौरवाणामधर्मे रमते क्वचित् ॥१२॥शकुंतलोवाच ॥ विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ॥ वेदैतद्भगवान्कण्वो
वीर किं करवाम ते ॥१३॥ आस्यतां ह्यरविंदाक्ष गृह्यतामर्हणं च नः ॥ भुज्यतां संति नीवारा उष्यतां यदि रोचते॥१४॥दुष्यंत उवाच॥
उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये ॥ स्वयं हि वृणते राज्ञां कन्यकाः सदृशं वरम्॥१५॥ओमित्युक्ते यथाधर्ममुपयेमे शकुंतलाम् ॥
गांधर्वविधिना राजा देशकालविभागवित् ॥ १६ ॥ अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे ॥ श्वोभूते स्वपुरं यातः कालेनासूत
सा सुतम् ॥ १७ ॥ कण्वः कुमारस्य वने चक्रे समुचिताः क्रियाः ॥ बद्ध्वा मृगेंद्रांस्तरसा क्रीडति स्म स बालकः ॥ १८ ॥ तं दुरत्ययविक्रांतमादाय
प्रमदोत्तमा ॥ हरेरंशांशसंभूतं भर्तुरंतिकमागमत् ॥ १९ ॥ यदा न जगृहे राजा भार्यापुत्रावनिंदितौ ॥ शृण्वतां सर्वभूतानां
खे वागाहाशरीरिणी ॥ २० ॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥ भरस्व पुत्रं दुष्यंत माऽवमंस्थाः शकुंतलाम्
॥२१॥ रेतोऽधाः पुत्रो नयति नरदेव यमक्षयात् ॥ त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला ॥२२॥ पितर्युपरते सोऽपि चक्रवर्ती
महायशाः॥महिमा गीयते तस्य हरेरंशभुवो भुवि॥२३॥चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः॥ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः
॥२४॥पंचपंचाशता मेध्यैर्गंगायामनु वाजिभिः॥सामंतेयं पुरोधाय यमुनायामनु प्रभुः॥अष्टसप्ततिमेध्याश्वान्बबंध प्रददद्वसु॥२५॥

राजा भार्यां पुत्रं च यदा न जगृहे तदा सर्वेषां शृण्वतां सतामाकाशवाण्युवाच ॥२०॥ माता आधारपात्रम् । पितुरेव पुत्रः पित्रोत्पादितः पुत्रः पितुरेव स्वरूपम् ।
अतो हे दुष्यंत, त्वं पुत्रं भरस्व[2] । शकुंतलाया अवमानं मा कुरु॥२१॥किंच । पुत्रो नरकात् पितरं तारयति । अस्य त्वं पिता । शकुंतला सत्यमाह । इत्युक्ते दुष्यंतो भार्यां
पुत्रं च स्वीकृतवान् ॥२२॥ ततो दुष्यंते कालेन मृते सति स भरतश्चक्रवर्ती बभूव । तस्य महिमा ऋग्वेदे गीयते॥२३॥ यस्य दक्षिणहस्ते चक्रचिह्नं पादयोः
कमलचिह्नम् । स भरत एकदा सामंतेयनामकमृषिं पुरोहितं कृत्वा गंगातीरे उत्पत्तिस्थानात्समुद्रतीरपर्यंतमेकस्य पुरत एक इत्येवंप्रकारेण पंचपंचाशता
५५ अश्वमेधैर्हरिमीजे । तथा यमुनातीरे उत्पत्तिस्थानात्समुद्रतीरपर्यंतं अष्टसप्तति७८ मेध्यानश्वान् बबंध[3] ॥ २४ ॥ २५ ॥ ॥

---

[1] परस्परं संकेतपूर्वकेण विधिना । [2] अनेन तस्य भरतनाम निरुक्तम् । [3] तावद्भिरश्वमेधैर्हरिमयजतेत्यर्थः ।

भरतस्य हि दौष्यंतेरग्निः साचीगुणे चितः ॥ सहस्रं बद्धशो यस्मिन्ब्राह्मणा गा विभेजिरे ॥ २६ ॥ त्रयस्त्रिंशच्छतं ह्यश्वान्बद्ध्वा विस्मापयन्नृपान् ॥ दौष्यंतिरत्यगान्मायां देवानां गुरुमाययौ ॥२७॥ मृगान् शुक्लदतः कृष्णान्हिरण्येन परीवृतान् ॥ अदात्कर्मणि मष्णारे नियुतानि चतुर्दश ॥२८॥ भरतस्य महत्कर्म न पूर्वे नापरे नृपाः ॥ नैवापुर्नैव प्राप्स्यंति बाहुभ्यां त्रिदिवं यथा ॥२९॥ किरातहूणान्यवनानन्ध्रान्कंकान्कशान् शकान् ॥ अब्रह्मण्यान्नृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिलान् ॥३०॥ जित्वा पुराऽसुरा देवान्ये रसौकांसि भेजिरे ॥ देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ॥३१॥ सर्वकामान्दुदुहतुः प्रजानां तस्य रोदसी ॥ समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत् ॥ ३२ ॥ स सम्राड् लोकपालाख्यमैश्वर्यमधिराट्श्रियम् ॥ चक्रं चास्खलितं प्राणान्मृषेत्युपरराम ह ॥ ३३ ॥ तस्यासन्नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसंमताः ॥ जघ्नुस्त्यागभयात्पुत्रान्नानुरूपा इतीरिते ॥ ३४ ॥ तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ॥ मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ॥ ३५ ॥ अंतर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः ॥ प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥ ३६ ॥ तं त्यक्तुकामां ममतां भर्तृत्यागविशंकिताम् ॥ नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ॥ ३७ ॥ मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते ॥ यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३८ ॥ ॥

दौष्यंतेर्भरतस्योत्तमगुणवति देशेऽग्निश्चितोऽभवत् । यस्मिन्नग्निचयनस्थाने सहस्रं ब्राह्मणा भरतेन दत्ता गाः प्रत्येकं बद्वं बद्वं विभज्य जगृहुः ॥२६ ॥ ततश्च भरतो नृपान् विस्मापयन् त्रयस्त्रिंशतं शतानि ३३०० अश्वान् बद्ध्वा देवानां वैभवमत्यगात् ॥२७॥ ततश्च मष्णारनामके कर्मणि सुवर्णालंकाराच्छादितान् चतुर्दश लक्षाणि गजान् ददौ ॥२८॥ हे राजन्, भरतस्य महत् कर्म पूर्वे नृपा नाकुर्वन् । अपरे च न करिष्यंति ॥ २९ ॥ अथ भरतो दिग्विजये किरातहूणान् यवनानंध्रान् कंकान् कशान् शकान् ब्राह्मणभक्तिशून्यान् नृपांश्च जघान ॥३०॥ तथा यैरसुरैर्देवान् जित्वा तत्स्त्रियः पाताले नीतास्तानसुरान् हत्वा ताः स्त्रिय आनीय देवेभ्यो ददौ ॥३१॥॥ भरतस्य राज्ये स्वर्गभूमी प्रजानामिच्छितान् पदार्थान् ददतुः । स सप्तविंशतिसहस्रं संवत्सरान् राज्यं चक्रे ॥३२॥ ततः स सर्वमैश्वर्यं प्राणादिकं च मिथ्याभूतमिति विचार्योपरराम ॥३३॥ तस्य तिस्रः पत्न्य आसन् । ता भर्त्रा पुत्रा मत्सदृशा न भवंतीत्युक्ते सति व्यभिचारशंकयाऽस्मान् भर्ता त्यक्ष्यतीति भयात् पुत्रान् हतवत्यः ॥३४॥ तदा नष्टे वंशे सति पुत्रार्थं मरुत्स्तोमेन यज्ञेन यजतो भरतस्य प्रसन्ना मरुतो भरद्वाजं नाम पुत्रं ददुः ॥३५॥ मरुतां भरद्वाजपुत्रप्राप्तिप्रकारमाह । गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां चौर्येण मैथुनाय कदाचित्प्रवृत्तो बृहस्पतिस्तदा गर्भस्थेन पुत्रेण द्वितीयगर्भस्यावकाशाभावादाक्रोशपूर्वकं वारितः । ततः क्रुद्धो बृहस्पतिस्त्वमंधो भवेति तं गर्भं शप्त्वा बलाद्वीर्यं न्यषिंचत् । ततो बृहस्पतेः शापाद्गर्भस्थो दीर्घतमा अंधो बभूव । तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं सद्य एव कुमारोऽभवत् ॥ ३६ ॥ तदा भर्तृत्यागविशंकया पुत्रं त्यक्त्वा यांतीं ममतां बृहस्पतिः प्राह ॥३७॥ हे मूढे, इमं पुत्रं त्वं भर । यतो मम तव चायं पुत्रोऽस्ति । एवमुक्ता ममता तं प्राह । हे बृहस्पते त्वमिमं पोषय । यतो

---

१ एकबद्वसंख्या-बद्वं चतुरशीत्यग्रे सहस्राणि त्रयोदश १३०८४ । एवं सहस्रं बद्वानि गा ब्राह्मणेभ्यो दत्ता इत्यर्थः । २ तावंतोऽश्वमेधान् कृत्वेत्यर्थः ।

द्वाभ्यामन्यायतो जातः । अतो नाहमेकाकिनी भरामि । एवमुक्त्वा विवदमानौ तौ ममताबृहस्पती पुत्रं त्यक्त्वा यातौ । ततो हेतोरयं भरद्वाजः ॥३८॥ स मरुद्भिः पोषितः । सोऽयं तैर्भरतवंशे वितथे सति दत्तः । अतो वितथो नाम जातः ॥३९॥ इति श्रीमद्भागवतचूर्णि० नव० विंशोऽध्यायः ॥२०॥ एकविंशे तु दौष्यंतेः सुतस्यान्वय उच्यते । रंतिदेवाजमीढादेर्यत्र कीर्तिः प्रतन्यते ॥१॥ श्रीशुक उवाच ॥ वितथस्य सुतो मन्युः । तस्य पंच पुत्राः—१ बृहत्क्षत्रः २ जयः ३ महावीर्यः ४ नरः ५ गर्गश्चेति । तत्र ४नरात् संकृतिः ॥१॥ तस्य गुरुः रंतिदेवश्चेति द्वौ पुत्रौ । रंतिदेवस्य यश इह लोके परलोके च गीयते॥ २ ॥ अयाचितवृत्तेः निष्किंचनस्य धीरस्य सकुटुंबस्य दुःखिनो लब्धं लब्धं ददतः ॥३॥ तस्य रंतिदेवस्य कदाचिज्जलपानमप्यकुर्वतः सतोऽष्टचत्वारिंशत्४८ दिनानि व्यतीयुः । एकोनपंचाशत्तमे दिने प्रातस्तस्य केनचित् घृतं पायसं संयावं जलं च दत्तम् ॥ ४ ॥ ततः क्षुत्तृड्भ्यां जातवेपथोर्भोक्तुकामस्य तस्य ब्राह्मणोऽतिथिरागमत् ॥ ५ ॥ स सर्वत्र हरिं पश्यन्नतिथये श्रद्धयान्नं ददौ । स द्विजो भुक्त्वा ययौ ॥६॥ अवशिष्टमन्नं कुटुंबाय विभज्य भोक्तुकामस्य सतोऽन्यः शूद्रोऽतिथिरागमत् । राजा तस्मा अन्नं ददौ ॥७॥ शूद्रे गते श्वभिर्वेष्टितोऽन्योऽतिथिरागत्य तमाह । हे राजन्, सगणाय क्षुधार्ताय मेऽन्नं दीयताम् ॥८॥ तदा राजा तस्मै बहुमानपुरःसरं श्वभ्यश्च शेषमन्नं दत्वा नमश्चक्रे ॥ ९ ॥ तत एकस्यैव तृप्तिकरं जलमवशिष्टम् । तत्पास्यतः सत एकः पुल्कस आगत्य जलं देहीति ययाचे ॥१०॥ तस्य तां दीनां वाणीं निशम्य कृपया पीडित इदमाह ॥ ११ ॥ ईश्वरादणिमाद्यष्टसमृद्धियुक्तां गतिं मोक्षमप्यहं नेच्छामि । किंतु । अखिलजीवानां दुःखं तत्तद्भोक्तृरूपेणांतःस्थितः सन् प्राप्तुमिच्छामि । येन ते सुखिनो भवंति ॥१२॥ दीनस्य प्राणिनो जीवनहेतोर्जलस्यार्पणान्मे क्षुधातृषादयः सर्वे गताः ॥१३॥

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजम् ॥ व्यसृजन्मरुतोऽबिभ्रन्दत्तोऽयं वितथेऽन्वये ॥३९॥ इति श्रीम०म०नव०विंशोऽध्यायः॥२०॥
श्रीशुक उवाच ॥ वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः ॥ महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥१॥ गुरुश्च रंतिदेवश्च
संकृतेः पांडुनंदन ॥ रंतिदेवस्य हि यश इहामुत्र च गीयते॥२॥ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ॥ निष्किंचनस्य धीरस्य
सकुटुंबस्य सीदतः ॥३॥ व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ॥ घृतपायससंयावं तोयं प्रातरुपस्थितम् ॥४॥ कृच्छ्रप्राप्तकुटुंबस्य
क्षुत्तृड्भ्यां जातवेपथोः ॥ अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत्॥५॥ तस्मै संव्यभजत्सोऽन्नमादृत्य श्रद्धयान्वितः॥
हरिं सर्वत्र संपश्यन्स भुक्त्वा प्रययौ द्विजः ॥६॥ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते ॥ विभक्तं व्यभजत्तस्मै वृषलाय
हरिं स्मरन् ॥७॥ याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः ॥ राजन्मे दीयतामन्नं सगणाय बुभुक्षते ॥८॥ स आदृत्यावशिष्टं यद्बहुमानपुरस्कृतम् ॥
तच्च दत्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥९॥ पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम् ॥ पास्यतः पुल्कसोऽभ्यागादपो
देह्यशुभस्य मे ॥१०॥ तस्य तां करुणां वाचं निशम्य विपुलश्रमाम् ॥ कृपया भृशसंतप्त इदमाहामृतं वचः ॥ ११ ॥ न
कामयेऽहं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा ॥ आर्तिं प्रपद्येऽखिलदेहभाजामंतःस्थितो येन भवंत्यदुःखाः ॥१२॥ क्षुत्तृट्श्रमो
गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः ॥ सर्वे निवृत्ताः कृपणस्य जंतोर्जिजीविषोर्जीवजलार्पणान्मे ॥ १३ ॥ ॥

एवमुक्त्वा स्वयं पिपासया म्रियमाणोऽपि तस्मै जलं ददौ ॥१४॥तदा तस्य फलदा ब्रह्मविष्णुमहेश्वराः स्वं स्वं रूपं दर्शयांचक्रुः ॥१५॥ स तेभ्यो नमस्कृत्य निःसंगः सन् वासुदेवे भगवति भक्त्या केवलं नमस्कृत्य स्थितः । न तु तान् किमपि याचितवान् ॥१६॥ तदा ईश्वरालंबनं चित्तं कुर्वत ईश्वरातिरिक्तफलांतरानपेक्षस्य च तस्य गुणमयी माया स्वप्नवदात्मन्येव लीना बभूव ॥१७॥ ततो रंतिदेवसमागमेन तमनुसरंतः सर्वे जना नारायणपरा योगिनोऽभवन् ॥१८॥ अथ मन्युसुतस्य ५–गर्गस्य शिनिः पुत्रः । तस्य गार्ग्यः । तस्माद्ब्राह्मणकुलं जातम् । ३– महावीर्यस्य दुरितक्षयः । तस्य त्रय्यारुणिः कविः ॥१९॥ पुष्करारुणिश्चेति त्रयः पुत्रास्ते द्विजत्वं प्राप्ताः । अथ मन्युसुतस्य १–बृहत्क्षत्रस्य पुत्रो हस्ती । येन हस्तिनापुरं निर्मितम् ॥ २० ॥ हस्तिनस्त्रयः पुत्राः–, अजमीढः

इति प्रभाष्य पानीयं म्रियमाणः पिपासया ॥ पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः ॥ १४ ॥ तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् ॥ आत्मानं दर्शयांचक्रुर्मायाविष्णुविनिर्मिताः ॥ १५ ॥ स वै तेभ्यो नमस्कृत्य निःसंगो विगतस्पृहः ॥ वासुदेवे भगवति भक्त्या चक्रे नमः परम् ॥१६॥ ईश्वरालंबनं चित्तं कुर्वतोऽनन्यराधसः ॥ माया गुणमयी राजन्स्वप्नवत्प्रत्यलीयत ॥१७॥ तत्प्रसंगानुभावेन रंतिदेवानुवर्तिनः ॥ अभवन्योगिनः सर्वे नारायणपरायणाः ॥१८॥ गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत ॥ दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः ॥१९॥ पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ॥ बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरम् ॥२०॥ अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ॥ अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥२१॥ अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः ॥ बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥२२॥ तत्सुतो विशदस्तस्य सेनजित्समजायत ॥ रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः ॥२३॥ रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः ॥ पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ॥२४॥ स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥ स योगी गवि भार्यायां विष्वक्सेनमधात्सुतम् ॥२५॥ जैगीषव्योपदेशेन योगतंत्रं चकार ह ॥ उदक्स्वनस्ततस्तस्माद्भल्लादो बार्हदीषवाः ॥२६॥ यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ॥ नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् ॥२७॥ सुपार्श्वात्सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः ॥ कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट् ॥२८॥

२ द्विमीढः ३ पुरुमीढश्चेति । तत्राजमीढस्य प्रियमेधादयो द्विजा बभूवुः॥२१॥ अजमीढस्य द्वितीयः पुत्रो बृहदिषुः । तस्य बृहद्धनुः। तस्य बृहत्कायः । तस्य जयद्रथः ॥२२॥ तस्य विशदः । तस्य सेनजित् । तस्य चत्वारः पुत्राः– रुचिराश्वः दृढहनुः काश्यः वत्सश्चेति ॥२३॥ तत्र रुचिराश्वात्पारः। तस्य पुत्रौ द्वौ। पृथुसेनो नीपश्चेति । तत्र नीपस्य पुत्रशतं जातम्॥२४॥स एव नीपः शुक[1]कन्यायां कृत्व्यां ब्रह्मदत्तं पुत्रं जनयामास । स ब्रह्मदत्तः सरस्वत्यां भार्यायां विष्वक्सेनं पुत्रमधात्॥२५॥स एव ब्रह्मदत्तो जैगीषव्योपदेशेन योगतंत्रं चकार। विष्वक्सेनादुदक्स्वनः। तस्य भल्लादः । एते बृहदिषोर्वंशे जाताः॥२६॥अथ २–द्विमीढाद्यवीनरः । तस्य कृतिमान् । तस्य सत्यधृतिः । तस्य दृढनेमिः । तस्य सुपार्श्वकः ॥२७॥ तस्य सुमतिः । तस्य सन्नतिमान् । तस्य कृती । स हिरण्य-

---

[1] यद्यपि शुक उत्पत्त्यैव विमुक्तसंगो निर्गतस्तथापि विरहातुरमनुयांतं व्यासं दृष्ट्वा स छायाशुकं निर्माय गतवान् । तस्य छायाशुकस्यैव गार्हस्थ्यादिव्यवहारः ।

नाभाद्योगं प्राप्य ॥ २८ ॥ प्राच्यसाम्नां षट् संहिता विभज्य शिष्यानध्यापितवान् । कृतिनो नीपः । तस्योग्रायुधः । तस्य क्षेम्यः । तस्य सुवीरः । तस्य रिपुंजयः ॥ २९ ॥ तस्य बहुरथः । ३–पुरुमीढोऽप्रजः । १–अजमीढस्य तृतीयवंशमाह । अजमीढान्नलिन्यां नीलः । तस्य शांतिः ॥ ३० ॥ तस्य सुशांतिः । तस्य पुरुजः । तस्यार्कः । तस्य भर्म्याश्वः । तस्य पंच पुत्राः–॥ ३१ ॥ मुद्गलः यवीनरः बृहदिषुः कांपिल्यः संजयश्चेति । तदा भर्म्याश्वः प्राह । इमे ये मुद्गलादयः पंच पुत्रास्ते पंचानां देशानां रक्षणायालम् । तेन कारणेन ते पंचालसंज्ञका आसन् । तत्र मुद्गलाद्ब्रह्मकुलं जातम् । तच्च मुद्गलगोत्रसंज्ञकम्॥३२॥ ॥३३॥ तदाह । मुद्गलाद्दिवोदासः पुत्रोऽहल्या कन्या चेति द्वयं जातम् । तत्राहल्यायां गौतमाच्छतानंदो जातः ॥ ३४ ॥ तस्य शतानंदस्य सत्यधृतिः । तस्य शरद्वान् । तस्योर्वशीदर्शनाच्छरस्तंबे रेतः पपात । तस्मात्पुत्रः कन्या चेति द्वयं जातम्। तद्द्वयं मृगयां चरन् शंतनुर्दृष्ट्वा कृपया जग्राह । तत्र पुरुषः कृपः।

संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः ॥ तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः ॥२९॥ ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् ॥ नलिन्यामजमीढस्य नीलः शांतिः सुतस्ततः ॥३०॥ शांतेः सुशांतिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् ॥ भर्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः ॥३१॥ यवीनरो बृहदिषुः कांपिल्यः संजयः सुताः ॥ भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि ॥३२॥ विषयाणामलमिमे इति पंचालसंज्ञिताः ॥ मुद्गलाद्ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ॥३३॥ मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् ॥ अहल्या कन्यका यस्यां शतानंदस्तु गौतमात् ॥३४॥ तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ॥ शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ॥ ३५ ॥ शरस्तंबेऽपतद्रेतो मिथुनं तदभूच्छुभम् ॥ तद्दृष्ट्वा कृपयाऽगृह्णाच्छंतनुर्मृगयां चरन् ॥ कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ॥३६॥ इति श्रीम॰भ॰नव॰एकविंशोऽध्यायः ॥२१॥ ॥ श्रीशुक उवाच॥ मित्रेयुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप ॥ सुदासः सहदेवोऽथ सोमको जंतुजन्मकृत् ॥ १ ॥ तस्य पुत्रशतं तेषां यवीयान्पृषतः सुतः ॥ द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥२॥ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पंचालका इमे॥ योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ॥ ३ ॥ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः ॥४॥ सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथ ततः कृती॥ वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ॥५॥ कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ॥ बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ॥६॥

कन्या कृपी । सा द्रोणपत्नी अभवत् ॥३५॥३६॥ इति श्री॰ चू॰ नव॰ एकविंशोऽध्यायः ॥२१॥ द्वाविंशे तु दिवोदासवंशमुक्त्वाथ वर्णिताः । ऋक्षवंशे जरासंधपार्थदुर्योधनायादयः॥१॥श्रीशुक उवाच॥ दिवोदासान्मित्रेयुः। तस्य च्यवनः । तस्य सुदासः । तस्य सहदेवः तस्य सोमकः॥१॥ तस्य शतं पुत्रा बभूवुः। तेषु जंतुर्ज्येष्ठः। पृषतः कनिष्ठः। तत्र पृषतस्य द्रुपदः। तस्य द्रौपदी कन्या धृष्टद्युम्नादयश्च पुत्राः॥२॥ धृष्टद्युम्नाद्धृष्टकेतुः। इमे पंचालसंज्ञाकाः॥१–अजमीढस्य चतुर्थं वंशमाह। अजमीढस्य ऋक्षः । तस्य संवरणः ॥ ३ ॥ तस्य तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः। तस्य चत्वारः पुत्राः– परीक्षित् सुधनुः जह्नुः निषधाश्वश्चेति ॥४॥ तत्र सुधनुषः सुहोत्रः। तस्य च्यवनः। तस्य कृती। तस्योपरिचरो वसुः। तस्य पुत्रा बृहद्रथकुशांबमत्स्यप्रत्यग्रचेदिपाद्याः। ते सर्वे चेदिपनामकाः। तत्र बृहद्र-

थात्कुशाग्रः । तस्य ऋषभः ॥५॥६॥ तस्य सत्यहितः । तस्य पुष्पवान् । तस्य जहुः । बृहद्रथाद्द्वितीयभार्यायां द्वे शकले जाते ॥ ७ ॥ ते मात्रा बहिस्त्यक्ते । ते जीव जीवेति क्रीडंत्या जरया राक्षस्या चाभिसंधिते स जरासंधो जातः ॥८॥ तस्य सहदेवः । तस्य सोमापिः । तस्य श्रुतश्रवाः । कुरुपुत्रो यः परीक्षित् सोऽनपत्यो जातः । कुरुपुत्रस्य जह्नोः सुरथः ॥ ९ ॥ तस्य विदूरथः । तस्य सार्वभौमः । तस्य जयसेनः । तस्य राधिकः । तस्यायुतः ॥ १० ॥ तस्य क्रोधनः । तस्य देवातिथिः । तस्य ऋष्यः । तस्य दिलीपः । तस्य प्रतीपः ॥ ११ ॥ तस्य त्रयः पुत्राः—देवापिः शंतनुः बाह्लीकश्चेति । तत्र देवापिः पितृराज्यं त्यक्त्वा वनं गतः ॥ १२ ॥ ततः शंतनू राजाऽभवत् । स शंतनुः कराभ्यां यं यं जीर्णं स्पृशति स स यौवनं प्राप्नोति ॥१३॥ तस्य राज्ये यदा द्वादश वर्षाणि देवो न ववर्ष ॥ १४ ॥ तदा शंतनुस्तत्कारणं विप्रान् पप्रच्छ । तदा ब्राह्मणैरुक्तः । हे राजन्, त्वं परिवेत्ता[1] असि । अतस्तद्दोषपरिहारार्थमग्रजाय राज्यं देहि ।

जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः ॥ अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ॥ ७ ॥ ते मात्रा बहिरुत्सृष्टे जरया
चाभिसंधिते ॥ जीव जीवेति क्रीडंत्या जरासंधोऽभवत्सुतः ॥८॥ ततश्च सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः ॥ परीक्षिदनपत्योऽभूत्सुरथो
नाम जाह्नवः ॥९॥ ततो विदूरथस्तस्मात्सार्वभौमस्ततोऽभवत् ॥ जयसेनस्तत्तनयो राधिकोऽतोऽयुतो ह्यभूत् ॥१०॥ ततश्च
क्रोधनस्तस्माद्देवातिथिरमुष्य च ॥ ऋष्यस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ॥११॥ देवापिः शंतनुस्तस्य बाह्लीक इति चात्मजाः
॥ पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥१२॥ अभवच्छंतनू राजा प्राङ्महाभिषसंज्ञितः ॥ यं यं कराभ्यां स्पृशति
जीर्णं यौवनमेति सः ॥१३॥ शांतिमाप्नोति चैवाग्र्यां कर्मणा तेन शंतनुः ॥ समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥१४॥
शंतनुर्ब्राह्मणैरुक्तः परिवेत्ता त्वमग्रभुक् ॥ राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥१५॥ एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् ॥
तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥१६॥ वेदवादातिवादान्वै तदा देवो ववर्ष ह ॥ देवापिर्योगमास्थाय कलापग्राममाश्रितः
॥१७॥ सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥१८॥ शलश्च शंतनोरासीद्गंगायां
भीष्म आत्मवान् ॥ सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥१९॥ वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ॥ शंतनोर्दाशकन्यायां
जज्ञे चित्रांगदः सुतः ॥२०॥ विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः ॥ यस्यां पराशरात्साक्षादवतीर्णो हरेः कला ॥२१॥

ततो वृष्टिः स्यात् ॥ १५ ॥ इत्याकर्ण्य शंतनुर्वनं गत्वा ज्येष्ठं त्वं राज्यं कुर्विति प्रार्थितवान् । तत्प्रार्थनात्पूर्वमेव शंतनोः प्रधानेन प्रेषितैर्विप्रैर्वेदाद्भ्रंशितः स देवापिर्वेदनिंदापराणि वचनान्यब्रवीत् ॥ १६ ॥ ततस्तस्य पातित्येन राज्यानर्हत्वे जाते शंतनोर्दोषाभावादिंद्रो ववर्ष । देवापिर्योगमास्थाय कलापग्राम आस्ते ॥ १७ ॥ स कलौ सोमवंशे नष्टे सति कृतादौ स्थापयिष्यति । बाह्लीकात्सोमदत्तः । तस्य पुत्रास्त्रयः—भूरिः भूरिश्रवाः ॥ १८ ॥ शलश्चेति । शंतनोर्गंगायां भीष्म आसीत् । स महाभागवतः ॥ १९ ॥ येन युद्धे परशुरामोऽपि तोषितः । शंतनोर्दाशकन्यायां[2] सत्यवत्यां चित्रांगदो विचित्रवीर्यश्च जज्ञाते ॥ २० ॥ तत्र चित्रांगदश्चित्रांगदेन गंधर्वेण युद्धे हतः । सत्यवत्यां शंतनुपरिग्रहात्पूर्वं पराशराद्धरेरंशो व्यासो जातः ॥ २१ ॥ ॥ ॥

---

[1] ज्येष्ठे भ्रातरि स्थिते यो राज्यं करोति सोऽपि परिवेत्ता । [2] उपरिचरस्य वसोर्वीर्येण मत्स्यगर्भादुत्पन्ना दाशैः कैवर्तैः पालिताऽतो दाशकन्येति प्रसिद्धा तस्यां सत्यवत्याम् ।

ततोऽहं शुको जातोऽस्मि । स व्यासः पैलादीन् शिष्यान् हित्वा ॥२२॥ मह्यं पुत्रायेदं भागवतमाह । विचित्रवीर्यः काशिराजसुते भीष्मेण स्वयंवराद्बलादानीते
अंबिकांबालिके उवाह । तयोरासक्तचित्तः सन् संतत्युत्पत्तेः पूर्वमेव क्षयरोगेण मृतः ॥२३॥२४॥ अप्रजस्य तस्य भ्रातुः पत्न्योर्मात्रोक्तो व्यासोंऽबिकायां धृत-
राष्ट्रमंबालिकायां पांडुं दास्यां विदुरं च जनयामास ॥२५॥ धृतराष्ट्राद्गांधार्यां दुर्योधनादिकं पुत्रशतं दुःशला कन्या च जाता ॥२६॥ वने किंदमऋषेः शापात्
स्त्रीसंगे प्रतिबंधयुक्तस्य पांडोः कुंत्यां धर्मवाय्विंद्रेभ्यो युधिष्ठिरभीमार्जुनाख्यत्रयः पुत्रा जाताः ॥२७॥ माद्र्यामश्विनीकुमाराभ्यां नकुलसहदेवौ जातौ । द्रौपद्यां
पंचभ्यः पांडवेभ्यः पंच पुत्रा अभवन् ॥२८॥ तत्र युधिष्ठिरात्प्रतिविंध्यो भीमाच्छ्रुतसेनोऽर्जुनाच्छ्रुतकीर्तिर्नकुलाच्छतानीकः ॥२९॥ सहदेवाच्छ्रुतकर्मा । तथा-

वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम् ॥ हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः ॥२२॥ मह्यं पुत्राय शांताय परं गु-
ह्यमिदं जगौ ॥ विचित्रवीर्योऽथोवाह काशिराजसुते बलात् ॥२३॥ स्वयंवरादुपानीते अंबिकांबालिके उभे ॥ तयोरासक्तहृदयो
गृहीतो यक्ष्मणा मृतः ॥२४॥ क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ॥ धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् ॥ २५ ॥
गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप ॥ तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥२६॥ शापान्मैथुनरुद्धस्य पांडोः कुंत्यां
महारथाः ॥ जाता धर्मानिलेंद्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥ २७ ॥ नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः ॥ द्रौपद्यां पंच पंचभ्यः
पुत्रास्ते पितरोऽभवन् ॥२८॥ युधिष्ठिरात्प्रतिविंध्यः श्रुतसेनो वृकोदरात् ॥ अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥ २९ ॥
सहदेवसुतो राजन् श्रुतकर्मा तथाऽपरे ॥ युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ॥३०॥ भीमसेनाद्धिडिंबायां काल्यां सर्वगतस्ततः ॥
सहदेवात्सुहोत्रं तु विजयाऽसूत पार्वती ॥३१॥ करेणुमत्यां नकुलो निरमित्रं तथार्जुनः ॥ इरावंतमुलूप्यां वै सुतायां बभ्रुवाहनन् ॥
मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ॥३२॥ तव तातः सुभद्रायामभिमन्युरजायत ॥ सर्वातिरथजिद्वीर उत्तरायां ततो भवान्
॥३३॥ परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा ॥ त्वं च कृष्णानुभावेन सजीवो मोचितोंऽतकात् ॥३४॥ तवेमे तनयास्तात जनमे-
जयपूर्वकाः ॥ श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ॥३५॥ जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् ॥ सर्पान्वै सर्पया-
गाग्नौ स होष्यति रुषान्वितः ॥३६॥ कावषेयं पुरोधाय तुरं तुरगमेधयाट् ॥ समंतात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ॥३७॥

न्यस्त्रीषु–धर्मात्पौरव्यां देवकः । भीमसेनाद्धिडिंबायां घटोत्कचः । भीमात्काल्यां सर्वमतः । सहदेवात् विजयायां सुहोत्रः ॥ ३० ॥ ३१ ॥ नकुलात्करेणुमत्यां
निरमित्रः । अर्जुनादुलूप्यां नागकन्यायामिरावान् । तथा मणिपूरपतेः सुतायां चित्रांगदायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनः । अतः सोऽर्जुनपुत्रः सन्नपि
मणिपूरपतेः पुत्रः ॥ ३२ ॥ अर्जुनात्सुभद्रायां सर्वातिरथिनां जेता ते तातोऽभिमन्युः । तस्मात्त्वं जातोऽसि ॥ ३३ ॥ अश्वत्थाम्नो ब्रह्मास्त्रतेजसा क्षीणेषु
कुरुषु श्रीकृष्णानुभावेन त्वं मृत्योः प्रमोचितोऽसि ॥ ३४ ॥ तवेमे चत्वारः पुत्राः–जनमेजयः श्रुतसेनो भीमसेन उग्रसेनश्चेति ॥ ३५ ॥ जनमेजयस्तक्षका-
न्मरणं प्राप्तं त्वां श्रुत्वा सर्पसत्रं करिष्यति ॥३६॥ ततो भुवं जित्वा कावषेयं तुरसंज्ञं पुरोहितं कृत्वाऽश्वमेधैर्यक्ष्यति ॥ ३७ ॥ ॥ ॥

तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन् ॥ अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ॥३८॥ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ॥ असीमकृष्णस्तस्यापि निमिचक्रस्तु तत्सुतः ॥३९॥ गजाह्वये हृते नद्या कौशांब्यां साधु वत्स्यति ॥ उक्तस्ततश्चित्ररथस्तस्मात्कविरथः सुतः ॥४०॥ तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः ॥ सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ॥ ४१ ॥ परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः॥नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति॥४२॥तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः॥ शतानीकाद्दुर्दमनस्तस्यापत्यं बहीनरः॥४३॥ दंडपाणिर्निमिस्तस्य क्षेमको भविता नृपः॥ ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः ॥ ४४ ॥ क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ अथ मागधराजानो भवितारो वदामि ते ॥ ४५ ॥ भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ॥ ततो युतायुस्तस्यापि निरमित्रोऽथ तत्सुतः ॥४६॥ सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ॥ ततः सृतंजयाद्विप्रः शुचिस्तस्य भविष्यति ॥४७॥ क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः ॥ द्युमत्सेनोऽथ सुमतिः सुबलोजनिता ततः ॥४८॥ सुनीथः सत्यजिदथ विश्वजिद्यद्रिपुंजयः॥ बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥४९॥ इति श्रीम० महापुरा० नव० द्वाविंशोऽध्यायः ॥२२॥ ॥ श्रीशुक उवाच ॥ अनोः सभानरश्चक्षुः परोक्षश्च त्रयः सुताः॥ सभानरात्कालनरः सृंजयस्तत्सुतस्ततः ॥१॥ जनमेजयस्तस्य पुत्रो महाशीलो महामनाः ॥ उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ २ ॥ ॥

जनमेजयस्य पुत्रः शतानीकः । स याज्ञवल्क्यादृग्वेदयजुःसामान्यधीत्य याज्ञवल्क्यशौनककृपाचार्येभ्योऽनुक्रमात्क्रियाज्ञानमात्मज्ञानमस्त्रज्ञानं च प्राप्स्यति ॥ ३८ ॥ शतानीकस्य सहस्रानीकः पुत्रः । तस्याश्वमेधकः । तस्याऽसीमकृष्णः । तस्य निमिचक्रः ॥ ३९ ॥ स निमिचक्रो हस्तिनापुरे गंगया हृते सति कौशांब्यां वत्स्यति । तस्य पुत्रश्चित्ररथः । तस्य कविरथः ॥ ४० ॥ तस्य वृष्टिमान् । तस्य सुषेणः । तस्य सुनीथः । तस्य नृचक्षुः । तस्य सुखीनलः ॥ ४१ ॥ तस्य परिप्लवः । तस्य सुनयः । तस्य मेधावी । तस्य नृपंजयः । तस्य दूर्वः । तस्य तिमिः ॥ ४२ ॥ तस्य बृहद्रथः । तस्य सुदासः । तस्य शतानीकः । तस्य दुर्दमनः । तस्य बहीनरः ॥ ४३ ॥ तस्य दंडपाणिः । तस्य निमिः । तस्य क्षेमकः । अयं ब्रह्मक्षत्रस्य वंशः कलौ क्षेमकं राजानं प्राप्य कलियुगे समाप्तिं प्राप्स्यति । अथ ये भाविनो मागधराजानस्तांस्ते वदामि ॥ ४४ ॥ ४५ ॥ पूर्वोक्तस्य जरासंधपुत्रस्य सहदेवस्य मार्जारिः । तस्य श्रुतश्रवाः । तस्यायुतायुः । तस्य निरमित्रः ॥ ४६ ॥ तस्य सुनक्षत्रः । तस्य बृहत्सेनः । तस्य कर्मजित् । तस्य सृतंजयः । तस्य शुचिनामको विप्रः ॥ ४७ ॥ तस्य क्षेमः । तस्य सुव्रतः । तस्य धर्मसूत्रः । तस्य शमः । तस्य द्युमत्सेनः । तस्य सुमतिः । तस्य सुबलः ॥ ४८ ॥ तस्य सुनीथः । तस्य सत्यजित् । तस्य विश्वजित् । तस्य रिपुंजयः । बृहद्रथस्य वंशजा एते राजानः सहस्रं संवत्सरपर्यंतं भाव्याः ॥४९॥ इति श्रीमद्भागवतचूर्णिकायां नवमस्कंधे द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ त्रयोविंशे त्वनोर्द्रुह्योस्तुर्वसोश्चान्वयः क्रमात् । यदोश्च वंशोऽनुक्रांतो यावज्ज्यामघसंभवः ॥१॥ श्रीशुक उवाच ॥ ययातिपुत्रस्यानोस्त्रयः पुत्राः– सभानरः चक्षुः परोक्षश्चेति । तत्र सभानरात् कालनरः । तस्य सृंजयः ॥१॥ तस्य जनमेजयः । तस्य महाशीलः । तस्य महामनाः । तस्योशीनरस्तितिक्षुश्चेति द्वौ पुत्रौ ॥ २ ॥

उशीनरस्य चत्वारः पुत्राः—शिबिः वनः शमिः दक्षश्चेति । शिबेश्चत्वारः पुत्राः—वृषादर्भः सुवीरः भद्रः कैकेयश्चेति । उशीनरभ्रातुस्तितिक्षो रुशद्रथः । तस्य हेमः । तस्य सुतपाः । तस्य बलिः ॥३॥४॥ बलेर्भार्यायामुतथ्यपुत्राद्दीर्घतमसोंऽगः वंगः कलिंगः सुह्मः पुंड्रः अंध्रश्चेति षट् पुत्राः ॥ ५ ॥ एते स्वस्वनाम्ना षट् देशान् चक्रुः । अंगात् खनपानः । तस्य दिविरथः । तस्य धर्मरथः । तस्य चित्ररथः । स एव रोमपाद इति प्रख्यातः । तस्मै मित्रो दशरथः शांतां स्वकन्यां ददौ । तामृष्यश्रृंग उवाह ॥ ६ ॥ ७ ॥ रोमपाददेशेऽवर्षणे जाते सति ऋष्यश्रृंगो नगरमेष्यति चेत्तर्हि वृष्टिर्भविष्यति तत्कृतया पुत्रकामेष्ट्या च राजा पुत्रवान् भविष्यतीति विप्रैरुक्ते सति राजाज्ञया स्त्रियस्तमृष्यश्रृंगं नाट्यसंगीतादिभिर्मोहयित्वा रोमपादनगरमानिन्युः ॥ ८ ॥ स हरिणीसुत ऋष्यश्रृंग इंद्रस्येष्टिं कृत्वा चित्ररथाय प्रजामदात् । दशरथोऽपि तेन ऋष्यश्रृंगेण पुत्रकामेष्टिं कारयित्वा रामलक्ष्मणादिप्रजां लेभे ॥९॥ रोमपादाच्चतुरंगः । तस्य पृथुलाक्षः । तस्य त्रयः

शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः ॥ वृषादर्भः सुवीरश्च मद्रः कैकेय आत्मजाः ॥३॥ शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ॥ ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥४॥ अंगवंगकलिंगाद्याः सुह्मपुंड्रांध्रसंज्ञिताः ॥ जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥५॥ चक्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते ॥ खनपानोंऽगतो जज्ञे तस्माद्दिविरथस्ततः ॥६॥ सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजः ॥ रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥ शांतां स्वकन्यां प्रायच्छदृष्यश्रृंग उवाह ताम् ॥७॥ देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतम् ॥ नाट्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ॥८॥ स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥ प्रजामदाद्दशरथो येन लेभेऽप्रजः प्रजाः ॥९॥ चतुरंगो रोमपादात्पृथुलाक्षस्तु तत्सुतः ॥ बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः ॥ १० ॥ आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥ विजयस्तस्य संभूत्यां ततो धृतिरजायत ॥११॥ ततो धृतव्रतस्तस्य सत्कर्माऽधिरथस्ततः ॥ योऽसौ गंगातटे क्रीडन्मंजूषांतर्गतं शिशुम् ॥१२॥ कुंत्याऽपविद्धं कानीनमनपत्योऽकरोत्सुतम् ॥ वृषसेनः सुतस्तस्य कर्णस्य जगतीपतेः ॥१३॥ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ आरब्धस्तस्य गांधारस्तस्य धर्मसुतो धृतः ॥१४॥ धृतस्य दुर्मनास्तस्मात्प्रचेताः प्राचेतसं शतम् ॥ म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ॥१५॥ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥ त्रिभानुस्तत्सुतोऽस्यापि करंधम उदारधीः ॥१६॥ मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥ दुष्यंतः स पुनर्भेजे स्वं वंशं राज्यकामुकः ॥१७॥

पुत्राः—बृहद्रथः बृहत्कर्मा बृहद्भानुश्चेति ॥ १० ॥ तत्र बृहद्रथाद्बृहन्मनाः । तस्य जयद्रथः । तस्य विजयः । तस्य धृतिः ॥ ११ ॥ तस्य धृतव्रतः । तस्य सत्कर्मा । तस्याधिरथः । स गंगातटे क्रीडन् कुंत्याः कन्यावस्थायां जातं तया च त्यक्तं मंजूषांतर्गतं यं सुतं चकार स कर्णः । तस्य वृषसेनः ॥ १२ ॥ १३ ॥ अथ ययातिपुत्रस्य द्रुह्योर्वंशं श्रृणु । द्रुह्योर्बभ्रुः । तस्य सेतुः । तस्यारब्धः । तस्य गांधारः । तस्य धर्मः । तस्य धृतः ॥ १४ ॥ तस्य दुर्मनाः । तस्य प्रचेताः । तस्य शतं पुत्रा म्लेच्छपतयो बभूवुः ॥ १५ ॥ अथ ययातिपुत्रस्य तुर्वसोः पुत्रो वह्निः । तस्य भर्गः । तस्य भानुमान् । तस्य त्रिभानुः । तस्य करंधमः ॥१६॥ तस्य मरुतः । सोऽपुत्रः सन् पूरुवंशजं दुष्यंतं पुत्रत्वेनाग्रहीत् । स दुष्यंतः पुनः स्वं पूरुवंशं भेजे ॥ १७ ॥ ॥

हे राजन्, ययातेर्ज्येष्ठपुत्रस्य यदोः पुण्यं वंशं वर्णयामि ॥१८॥ नरस्तं वंशं श्रुत्वा सर्वपापैः प्रमुच्यते । यत्र मनुष्याकृतिर्भगवान् श्रीकृष्णोऽवतीर्णः ॥१९॥ यदोश्चत्वारः पुत्राः—सहस्रजित् क्रोष्टा नलो रिपुश्चेति । तत्र सहस्रजितः शतजित् । तस्य त्रयः पुत्राः—महाहयो वेणुहयो हैहयश्चेति ॥२०॥२१॥ तत्र हैहयस्य धर्मः । तस्य नेत्रः । तस्य कुंतिः । तस्य सोहंजिः । तस्य महिष्मान् । तस्य भद्रसेनकः ॥२२॥ तस्य द्वौ पुत्रौ । दुर्मदो धनकश्चेति । धनकस्य चत्वारः पुत्राः-कृतवीर्यः कृताग्निः कृतवर्मा कृतौजाश्चेति ॥२३॥ कृतवीर्यस्य सहस्रार्जुनः । स सप्तद्वीपेश्वरोऽभवत् । स दत्तात्रेयाद्योगसिद्धिं प्राप ॥ २४ ॥ तस्य गतिं यज्ञदानतपोयोगादिभिरन्ये नृपा न यास्यंति ॥२५॥ यः पंचाशीतिसहस्रं८५००० वर्षाणि सप्तद्वीपवत्याः पृथिव्या राज्यं कृत्वा विषयसुखं बुभुजे ॥ २६ ॥ तस्य

ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ॥ वर्णयामि महापुण्यं सर्वपापहरं नृणाम् ॥१८॥ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ यत्रावतीर्णो भगवान्परमात्मा नराकृतिः ॥१९॥ यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः ॥ चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः ॥२०॥ महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥२१॥ धर्मस्तु हैहयसुतो नेत्रः कुंतेः पिता ततः ॥ सोऽहंजिरभवत्कुंतेर्महिष्मान्भद्रसेनकः ॥२२॥ दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः ॥ कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥२३॥ अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् ॥ दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः ॥२४॥ न नूनं कार्तवीर्यस्य गतिं यास्यंति पार्थिवाः ॥ यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः ॥२५॥ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः ॥ अनष्टवित्तस्मरणो बुभुजेऽक्षय्यषड्वसु ॥२६॥ तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे ॥ जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥२७॥ जयध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत् ॥ क्षत्रं यत्तालजंघाख्यमौर्वतेजोपसंहृतम् ॥२८॥ तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ॥ तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं यतः कुलम् ॥२९॥ माधवा वृष्णयो राजन्यादवाश्चेति संज्ञिताः ॥ यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ॥३०॥ श्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः ॥ शशबिंदुर्महायोगी महाभोजो महानभूत् ॥३१॥ चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ॥ तस्य पत्नीसहस्राणां दशानां सुमहायशाः ॥३२॥ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ॥ तेषां तु षट् प्रधानानां पृथुश्रवस आत्मजः ॥३३॥ धर्मो नामोशना तस्य हयमेधशतस्य याट् ॥ तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु ॥ पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ॥३४॥

पुत्रसहस्रेषु मध्ये पंचैवोर्वरिताः । ते च-जयध्वजः शूरसेनः वृषभः मधुः ऊर्जितश्चेति ॥२७॥ जयध्वजात्तालजंघः । तस्य पुत्रशतम् । तत्सगरेणोपसंहृतम् ॥२८॥ तेषां वीतिहोत्रो ज्येष्ठः । अथ मधोर्वृष्णिज्येष्ठं पुत्रशतमासीत् । मधोर्वृष्णेर्यदोश्च हेतोरिदं कुलं माधवं वार्ष्णेयं यादवं चेति संज्ञामाप । यदुपुत्रस्य क्रोष्टोर्वृजिनवान् पुत्रः ॥२९॥३०॥ तस्य श्वाहिः । तस्य रुशेकुः । तस्य चित्ररथः । तस्य शशबिंदुः । स महायोगी महाभोगवांश्चाभूत् ॥ ३१ ॥ तस्य संनिधौ चतुर्दश महारत्नान्यासन् । स स्वस्य दशसहस्रस्त्रीषु प्रत्येकं लक्षं लक्षमित्येवं पुत्राणां दशलक्षसहस्राणि जनयामास । तेषु पृथुश्रवाः पृथुकीर्तिः पृथुयशा इत्यादयः षण्मुख्याः ॥ ३२ ॥ ३३ ॥ तत्र पृथुश्रवसो धर्मः । तस्योशनाः । तस्य रुचकः । तस्य पुत्राः पंच—पुरुजित् रुक्मः रुक्मेषुः पृथुः ज्यामघश्चेति ॥ ३४ ॥ ॥

---

१ गजः अश्वः रथः स्त्री बाणः निधिः पुष्पं वस्त्रं वृक्षः शक्तिः पाशः मणिः छत्रं विमानं चेति चतुर्दश ।

ज्यामघोऽप्रजः । तस्य शैब्या स्त्री । स एकदा शत्रुभवनाद्भोज्यां नाम कन्यामानीतवान् ॥३५॥ रथस्थां तां दृष्ट्वा शैब्या प्राह । हे वंचक, केयं मत्स्थानं रथं स्थापिता ॥ ३६ ॥ इति श्रुत्वा भयाज्ज्यामघस्तवेयं स्नुषेत्याह । तदा सा विस्मयवती सती पतिं प्राह । अहं वंध्याऽसपत्नी चास्मि । अतो मम स्नुषा कथं युज्यते ॥ ३७ ॥ तदातिभयव्याकुल आह । हे राज्ञि, त्वं यं पुत्रं जनयिष्यसि तस्येयमुपयुज्यते । तदा विश्वेदेवाः पितरश्च राज्ञः स्त्रीभयात्प्राणसंकटं विलोक्य दयायुक्ताः संतस्तथेत्यन्वमोदंत ॥ ३८ ॥ ततो देवताप्रसादेन शैब्या गर्भमधात् । सा काले कुमारं सुषुवे । स कुमारो विदर्भस्तामानीतां कन्यामुपयेमे ॥ ३९ ॥ भार्यावश्यास्तु ये केचिद्भविष्यंत्यथवा मृताः । तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभून्नृपः ॥१॥ इति श्रीमद्भागव० नव०त्रयोविंशोऽध्यायः ॥ २३ ॥

ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् ॥ नाविंदच्छत्रुभवनाद्भोज्यां कन्यामहारषीत् ॥३५॥ रथस्थां तां निरीक्ष्याह शैब्या पतिममर्षिता ॥ केयं कुहक मत्स्थानं रथमारोपितेति वै ॥ ३६॥ स्नुषा तवेत्यभिहिते स्मयंती पतिमब्रवीत् ॥ अहं वंध्याऽसपत्नी च स्नुषा मे युज्यते कथम् ॥ ३७ ॥ जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते ॥ अन्वमोदंत तद्विश्वेदेवाः पितर एव च ॥३८॥ शैब्या गर्भमधात्काले कुमारं सुषुवे शुभम् ॥ स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे यदुवंशानुवर्णने त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ श्रीशुक उवाच ॥ तस्यां विदर्भोऽजनयत्पुत्रौ नाम्ना कुशक्रथौ ॥ तृतीयं रोमपादं च विदर्भकुलनंदनम् ॥ १ ॥ रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ॥ उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृप ॥ २ ॥ क्रथस्य कुंतिः पुत्रोऽभूद्धृष्टिस्तस्याथ निर्वृतिः ॥ ततो दशार्हो नाम्नाऽभूत्तस्य व्योमः सुतस्ततः ॥ ३ ॥ जीमूतो विकृतिस्तस्य तस्य भीमरथः सुतः ॥ ततो नवरथः पुत्रो जातो दशरथस्ततः ॥४॥ करंभिः शकुनेः पुत्रो देवरातस्तदात्मजः ॥ देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ॥ ५ ॥ पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः ॥ भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोंऽधकः ॥ ६ ॥ सात्वतस्य सुताः सप्त महाभोजश्च मारिष ॥ भजमानस्य निम्लोचिः किंकिणो धृष्टिरेव च ॥७॥ एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः ॥ शताजिच्च सहस्राजिदयुताजिदिति प्रभो ॥ ८ ॥ ॥

चतुर्विंशे विदर्भस्य पुत्रत्रयसमुद्भवाः । वंशा नानामुखाः प्रोक्ता रामकृष्णोद्भवावधि ॥१॥ श्रीशुक उवाच ॥ हे नृप, स विदर्भस्तस्यां भोज्यायां कुशं क्रथं रोमपादं चेति त्रीन् पुत्रान् जनयामास ॥ १ ॥ तत्र रोमपादाद्बभ्रुः । तस्य कृतिः । तस्य कुशिकः । तस्य चेदिः । तस्य दमघोषादयः पुत्राः ॥ २ ॥ अथ क्रथस्य कुंतिः । तस्य धृष्टिः । तस्य निर्वृतिः । तस्य दशार्हः । तस्य व्योमः ॥३॥ तस्य जीमूतः । तस्य विकृतिः । तस्य भीमरथः । तस्य नवरथः । तस्य दशरथः ॥४॥ तस्य शकुनिः । तस्य करंभिः । तस्य देवरातः । तस्य देवक्षत्रः । तस्य मधुः। तस्य कुरुवशः । तस्यानुः॥५॥तस्य पुरुहोत्रः । तस्यायुः । तस्य सात्वतः। तस्य सप्त पुत्राः-भजमानः भजिः दिव्यः वृष्णिः देवावृधः अंधकः महाभोजश्चेति॥६॥ तत्र भजमानस्य त्रयः पुत्राः-निम्लोचिः किंकिणः धृष्टिश्चेति ॥७॥ अन्यस्यां पत्न्यां त्रयः पुत्राः-

---

१ देवताप्रसादेन षोडश दिनेषु षोडशवर्षाकृतिर्भूत्वेत्यर्थः ।

शताजित् सहस्राजित् अयुताजिच्चेति ॥८॥ अथ देवावृधाद्बभ्रुः । स बभ्रुर्मनुष्येषु श्रेष्ठः देवावृधस्तु देवतुल्यः ॥ ९ ॥ तयोर्बभ्रुदेवावृधयोरुपदेशेन पंचषष्ठ्यधिकचतुर्दशसहस्राणि १४०६५ पुरुषा मोक्षं प्राप्ताः । अथ महाभोजवंशे भोजनामका राजान आसन् ॥१०॥११॥ अथ सात्वतपुत्रस्य वृष्णेर्द्वौ पुत्रौ । सुमित्रोः युधाजिच्च ।युधाजितो द्वौ पुत्रौ । शिनिरनमित्रश्च । तत्रानमित्रान्निम्नः॥१२॥ तस्य द्वौ पुत्रौ । सत्राजितः प्रसेनश्च। अनमित्रसुतोऽन्यः शिनिः । तस्य सत्यक ॥ १३ ॥ तस्य युयुधानः। तस्य जयः । तस्य कुणिः। तस्य युगंधरः। अनमित्रस्यापरः पुत्रो वृष्णिः ॥१४॥ वृष्णेरन्यौ पुत्रौ। श्वफल्कश्चित्ररथश्च । खफल्काद्गांदिन्यां द्वादश पुत्राः॥१५॥ अक्रूरः आसंगः सारमेयः मृदुरः मृदुविद्गिरिः धर्मवृद्धः सुकर्मा क्षेत्रोपेक्षः अरिमर्दनः शत्रुघ्नः गंधमादः प्रतिबाहुश्चेति । तेषां भगिनी

बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठंत्यमू ॥ यथैव शृणुमो दूरात्संपश्यामस्तथांतिकात् ॥ ९ ॥ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ पुरुषाः पंचषष्टिश्च षट्सहस्राणि चाष्ट च ॥१०॥ येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ महाभोजोऽपि धर्मात्मा भोजा आसंस्तदन्वये ॥ ११ ॥ वृष्णेः सुमित्रः पुत्रोऽभूद्युधाजिच्च परंतप ॥ शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ॥ १२ ॥ सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतौ ॥ अनमित्रसुतो योऽन्यः शिनिस्तस्याथ सत्यकः ॥ १३ ॥ युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ॥ युगंधरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः ॥१४॥ श्वफल्कश्चित्ररथश्च गांदिन्यां च श्वफल्कतः॥ अक्रूरप्रमुखा आसन्पुत्रा द्वादश विश्रुताः ॥ १५ ॥ आसंगः सारमेयश्च मृदुरो मृदुविद्गिरिः ॥ धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः ॥१६॥ शत्रुघ्नो गंधमादश्च प्रतिबाहुश्च द्वादश ॥ तेषां स्वसा सुचीराख्या द्वावक्रूरसुतावपि ॥ १७ ॥ देववानुपदेवश्च तथा चित्ररथात्मजाः ॥ पृथुर्विदूरथाद्याश्च बहवो वृष्णिनंदनाः ॥१८॥ कुकुरो भजमानश्च शुचिः कंबलबर्हिषः ॥ कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः ॥ १९ ॥ कपोतरोमा तस्यानुः सखा यस्य च तुंबुरुः ॥ अंधको दुंदुभिस्तस्मा दरिद्योतः पुनर्वसुः ॥ २० ॥ तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ ॥ देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ २१ ॥ देववानुपदेवश्च सुदेवो देववर्धनः ॥ तेषां स्वसारः सप्तासन्धृतदेवादयो नृप ॥२२॥ शांतिदेवोपदेवा च श्रीदेवा देवरक्षिता ॥ सहदेवा देवकी च वसुदेव उवाह ताः ॥ २३ ॥ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूस्तथा ॥ राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥ २४ ॥ ॥

सुचीरानाम्नी ॥१६॥१७॥ अक्रूरस्य द्वौ पुत्रौ-देववानुपदेवश्चेति । श्वफल्कभ्रातुश्चित्ररथस्य पृथुः पुत्रः । अन्ये च विदूरथाद्या बहवो जाताः ॥ १८॥ सात्वतंपुत्रस्यांधकस्य चत्वारः पुत्राः-कुकुरः भजमानः शुचिः कंबलबर्हिषश्चेति । तत्र कुकुरस्य वह्निः तस्य विलोमा ॥१९॥ तस्य कपोतरोमा। तस्यानुः । तस्यांधकः॥ तस्य दुंदुभिः । तस्यारिद्योतः । तस्य पुनर्वसुः ॥२०॥ तस्याहुकः। आहुकी कन्या च। आहुकस्य द्वौ पुत्रौ। देवक उग्रसेनश्चेति । देवकस्य चत्वारः पुत्राः– ॥ २१ ॥ देववान् उपदेवः सुदेवः देववर्धनश्चेति । तेषां सप्त भगिन्यः– ॥२२॥ धृतदेवा शांतिदेवा उपदेवा श्रीदेवा देवरक्षिता सहदेवा देवकी चेति । एताः सवा वसुदेव उवाह ॥२३॥ उग्रसेनस्य नव पुत्राः-कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूः राष्ट्रपालः सृष्टिः तुष्टिमांश्चेति ॥ २४ ॥ ॥ ॥

एषां पंचभगिन्यः– कंसा कंसवती कंका शूरभूः राष्ट्रपालिका चेति । एतावसुदेवानुजानां देवभागादीनां स्त्रियः ॥ २५ ॥ अथांधकपुत्रस्य भजमानस्य विदूरथः । तस्य शूरः । तस्य भजमानः । तस्य शिनिः । तस्य स्वयंभोजः । तस्य हृदीकः॥२६॥ तस्य चत्वारः पुत्राः-देवबाहुः शतधनुः कृतवर्मा देवमीढश्चेति । देवमीढस्य शूरः ॥ २७ ॥ शूरस्य मारिषायां पत्न्यां दशपुत्राः-वसुदेवः देवभागः । देवश्रवाः आनकः सृंजयः श्यामकः कंकः शमीकः वत्सकः वृकश्चेति । वसुदेवजन्मनि देववादिता आनका दुंदुभयश्च नेदुः ॥२८॥२९॥ अतस्तमानकदुंदुभिं हरेः स्थानं वदंति । शूरस्य कन्याः पंच-पृथा श्रुतदेवा श्रुतकीर्तिः श्रुतश्रवा राजाधिदेवी चेति ॥३०॥ शूरोऽप्रजस्य कुंतेः पृथां ददौ ॥३१॥ सा पृथैकदा गृहागतं दुर्वाससं पूजनादिना तोषयामास । ततो दुर्वाससः सा देवाना-

कंसा कंसवती कंका शूरभू राष्ट्रपालिका ॥ उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥२५॥ शूरो विदूरथादासीद्भजमानः सुतस्ततः ॥ शिनिस्तस्मात्स्वयंभोजो हृदीकस्तत्सुतो मतः ॥२६॥ देवबाहुः शतधनुः कृतवर्मेति तत्सुताः ॥ देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥ २७ ॥ तस्यां स जनयामास दश पुत्रानकल्मषान् ॥ वसुदेवं देवभागं देवश्रवसमानकम् ॥ २८ ॥ सृंजयं श्यामकं कंकं शमीकं वत्सकं वृकम् ॥ देवदुंदुभयो नेदुरानका यस्य जन्मनि ॥२९॥ वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिम् ॥ पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ॥ ३० ॥ राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः ॥ कुंतेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥ ३१ ॥ साऽऽप दुर्वाससो विद्यां देवहूतीं प्रतोषितात् ॥ तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिम् ॥३२॥ तदैवोपागतं देवं वीक्ष्य विस्मितमानसा ॥ प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥३३॥ अमोघं दर्शनं देवि आधत्से त्वयि चात्मजम् ॥ योनिर्यथा न दुष्येत कर्ताऽहं ते सुमध्यमे ॥३४॥ इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः ॥ सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥३५॥ तं साऽत्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती ॥ प्रपितामहस्तामुवाह पांडुर्वै सत्यविक्रमः ॥ ३६ ॥ श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् ॥ यस्यामभूद्दंतवक्र ऋषिशप्तो दितेः सुतः ॥ ३७॥ कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविंदत ॥ संतर्दनादयस्तस्यां पंचासन्कैकयाः सुताः ॥३८॥ राजाधिदेव्यामावंत्यौ जयसेनोऽजनिष्ट ह ॥ दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥ ३९ ॥ शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः ॥ देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ॥४०॥ ॥

माह्वानहेतुं विद्यां प्राप । ततो विद्यापरीक्षार्थं सा सूर्यस्याह्वानं चक्रे ॥ ३२ ॥ तदाऽऽगतं सूर्यं दृष्ट्वाह । हे देव, मया परीक्षार्थं विद्या योजिता । अतो याहि ममापराधं क्षमस्व ॥ ३३॥ तदा सूर्य आह । हे देवि, मम दर्शनं व्यर्थं न भवति । अतो योनिर्यथा न दुष्येत्तथा त्वयि पुत्रं दधे ॥ ३४ ॥ एवमुक्त्वा तस्यां गर्भमाधाय सूर्यो दिवं गतः । ततः सद्यः कुमारो जज्ञे ॥३५॥ पृथा लोकभयात्तं नदीतोये तत्याज । तां पृथां पांडुरुवाह ॥ ३६ ॥ कारूषो वृद्धशर्मा श्रुतदेवायां दंतवक्रं जनयामास ॥३७॥ कैकेयो धृष्टकेतुः श्रुतकीर्त्यां संतर्दनादीन् पंच पुत्रान् जनयामास ॥ ३८ ॥ जयसेनो राजाधिदेव्यां विंदानुविंदावजनिष्ट । चेदिराजो दमघोषः श्रुतश्रवसि शिशुपालं जनयामास ॥ ३९ ॥ अथ वसुदेवभ्रातॄणां वंशमाह । देवभागात्कंसायां चित्रकेतुबृहद्बलौ द्वौ पुत्रौ जातौ॥ ४० ॥

देवश्रवसः कंसवत्यां सुवीर इषुमांश्चेति द्वौ पुत्रौ । आनकात्कंकायां सत्यजित् पुरुजिच्चेति द्वौ पुत्रौ ॥ ४१ ॥ सृंजयाद्राष्ट्रपाल्यां वृषदुर्मर्षणादयः पुत्राः । श्यामकाच्छूरभूम्यां हरिकेशहिरण्याक्षौ जातौ ॥४२॥ वत्सकान्मिश्रकेश्यामप्सरसि वृकादयः पुत्रा जाताः । वृकाद्दुर्वाक्ष्यां तक्षपुष्करशालादयः पुत्राः॥४३॥ शमीकात् सुदामन्यां सुमित्रार्जुनपालादयः । कंकात् कर्णिकायां ऋतुधामो जयश्च ॥४४॥ वसुदेवस्य पौरवी रोहिणी भद्रा मदिरा रोचना इला देवकी चेति सप्तपत्न्य आसन् ॥ ४५ ॥ वसुदेवो रोहिण्यां बलं गदं सारणं दुर्मदं विपुलं ध्रुवं कृतादींश्च जनयामास ॥ ४६ ॥ वसुदेवात्पौरव्यां सुभद्रो भद्रवाहो दुर्मदो भद्रो भूताद्याश्च द्वादश पुत्रा अभवन् ॥ ४७ ॥ वसुदेवस्य मदिरायां नंदः उपनंदः कृतकः शूराद्याश्च जाताः । वसुदेवाद्भद्रायां केशी जातः ॥ ४८ ॥ तथा

कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ॥ कंकायामानकाज्जातः सत्यजित्पुरुजित्तथा ॥४१॥ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् ॥ हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ॥४२॥ मिश्रकेश्यामप्सरसि वृकादीन्वत्सकस्तथा ॥ तक्षपुष्करशालादीन्दुर्वाक्ष्यां वृक आदधे ॥४३॥ सुमित्रार्जुनपालादीन् शमीकात्तु सुदामिनी ॥ कंकश्च कर्णिकायां वै ऋतधामजयावपि ॥४४॥ पौरवी रोहिणी भद्रा मदिरा रोचना इला ॥ देवकीप्रमुखा आसन्पत्न्य आनकदुंदुभेः ॥४५ ॥ बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् ॥ वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥ ४६ ॥ सुभद्रो भद्रवाहश्च दुर्मदो भद्र एव च ॥ पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥ ४७ ॥ नंदोपनंदकृतकशूराद्या मदिरात्मजाः ॥ कौशल्या केशिनं त्वेकमसूत कुलनंदनम् ॥ ४८ ॥ रोचनायामतो जाता हस्तहेमांगदादयः ॥ इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ॥४९॥ विपृष्ठो धृतदेवायामेक आनकदुंदुभेः ॥ शांतिदेवात्मजा राजन् श्रमप्रतिश्रुतादयः ॥५०॥ राजानः कल्पवर्षाद्या उपदेवासुता दश ॥ वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः ॥५१॥ देवरक्षितया लब्धा नव चात्र गदादयः ॥ वसुदेवः सुतानष्टावादधे सहदेवया ॥५२॥ पुरुविश्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव ॥ वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् ॥५३॥ कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः॥ ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरम् ॥५४॥अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल ॥ सुभद्रा च महाभागा तव राजन्पितामही ॥५५॥ यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः ॥ तदा तु भगवानीश आत्मानं सृजते हरिः ॥५६॥ नह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ॥ आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः॥५७॥

रोचनायां हस्तहेमांगदादयो जाताः । तथेलायामुरुवल्कादयो जाताः ॥ ४९ ॥ धृतदेवायां विपृष्ठः । शांतिदेवायां श्रमप्रतिश्रुतादयः ॥ ५० ॥ उपदेवायां कल्पवर्षाद्या दश पुत्रा अभवन् । तथा श्रीदेवायां वसुहंससुवंशाद्याः षट् पुत्रा जाताः॥५१॥देवरक्षितायां गदादयो नव । तथा सहदेवायां पुरुविश्रुतादयोऽष्टौ । वसुदेवाद्देवक्यामष्ट पुत्राः ॥ ५२ ॥ ५३ ॥ ते च–कीर्तिमान् सुषेणः भद्रसेनः ऋजुः संमर्दनः भद्रः संकर्षणश्चेति सप्त ॥५४॥ अष्टमस्तु स्वयमेव हरिर्जातः । सुभद्रानाम्नी कन्या च जाता । हे राजन्, सा तव पितामही ॥ ५५ ॥ यदा यदेह धर्मक्षयः पापवृद्धिश्च भवति तदा तदा हरिरवतारं धारयति ॥५६ ॥ हे राजन्, ईश्वरस्यात्ममायाविनोदं विना जन्मनः कर्मणो वा कारणं न संभवति ॥ ५७ ॥ ॥ ॥

यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ॥ अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥ ५८ ॥ अक्षौहिणीनां पतिभिरसुरैर्नृपलांछनैः ॥ भुव आक्रम्यमाणाया अभाराय कृतोद्यमः ॥ ५९ ॥ कर्माण्यपरिमेयाणि मनसाऽपि सुरेश्वरैः ॥ सह संकर्षणश्चक्रे भगवान्मधुसूदनः ॥ ६० ॥ कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ॥ अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥ ६१ ॥ यस्मिन्सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ॥ श्रोत्रांजलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥ ६२॥ भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः ॥ श्लाघनीयेहितः शश्वत्कुरुसृंजयपांडुभिः ॥ ६३ ॥ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ॥ नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ॥६४॥ यस्याननं मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासम् ॥ नित्योत्सवं न ततृपुर्दृशिभिः पिबंत्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥६५॥ जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः ॥ उत्पाद्य तेषु पुरुषः क्रतुभिः समीज आत्मानमात्मनिगमं प्रथयन्जनेषु ॥६६॥ पृथ्व्याः स वै गुरुभरं क्षपयन्कुरूणामंतः समुत्थकलिना युधि भूपचम्वः ॥ दृष्ट्या विधूय विजये जयमुद्विघोष्य प्रोच्योद्धवाय च परं समगात्स्वधाम ॥ ६७ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टादशसाहस्र्यां नवमस्कंधे श्रीसूर्यसोमवंशानुकीर्तने यदुवंशानुकीर्तनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

॥ समाप्तोऽयं नवमः स्कंधः ॥ यदुकुलभूषणं श्रीकृष्णं नंनम्यामहे ॥

यस्य मायाचेष्टितं जीवस्योत्पत्तिस्थितिलयाय भवति । यस्यानुग्रहो जीवानां संसारनिवृत्त्या मोक्षप्राप्तये भवति ॥ ५८ ॥ तस्यावतारो दुष्टैराक्रम्यमाणाया भूमेर्भारपरिहाराय जातः ॥ ५९ ॥ स हरी रामेण सह भुवो भारावताराय देवैरप्यतर्क्याणि कर्माणि चक्रे ॥ ६० ॥ किंच । कलौ जनिष्यमाणानां भक्तानामनुग्रहाय दुःखशोकादिनाशकं पुण्यं यशो विस्तारितवान् ॥ ६१ ॥ यस्य यशसः श्रवणेन जनः कर्मवासनां धुनोति ॥ ६२ ॥ भोजवृष्ण्यंधकादिभिः कुरुसृंजयपांडुभिश्च वर्णनीयचरित्रो हरिर्हास्यावलोकनोदारवाक्यैः पराक्रमलीलया स्वमूर्त्या च मनुष्यलोकं रमयामास ॥६३ ॥६४॥ यस्य सुंदरहास्ययुक्तं मकराकारकुंडलादिभिर्भूषितं मुखं दृष्टिभिः पिबंत्यो नरा नार्यश्च तृप्ता न बभूवुः ॥ ६५ ॥ श्रीकृष्णचरित्रं संक्षेपेण वर्णयति । आदौ निजचतुर्भुजरूपेण जातः पश्चान्मनुष्याकारः सन् पितृगृहाद्गोकुलं गतः । तत्र व्रजवासिनां मनोरथान् परिपूर्य रिपून् हत्वा दारान् कृत्वा तासु पुत्रशतान्युत्पाद्य जनेषु स्वकीयं वेदमार्गं विस्तारयन् यज्ञैरात्मानमीजे ॥ ६६ ॥ तथा कौरवपांडवमध्ये उत्पन्नकलहनिमित्तेन भुवो महांतं भारं क्षपयन् युद्धे राज्ञां सेनाः स्वदृष्ट्या प्रणाश्यार्जुनेन जितमित्येवमर्जुनस्य जयघोषं कृत्वोद्धवाय तत्त्वज्ञानमुपदिश्य स्वधाम जगाम ॥ ६७ ॥ इति श्रीमद्भागवतचूर्णिकायां नवमस्कंधे श्रीसूर्यसोमवंशानुकीर्तने यदुवंशानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभं भवतु ॥ ॥

इति सचूर्णिकश्रीमद्भागवते नवमस्कंधः समाप्तः

स्मृत्वा प्रारुदत् ॥ १४ ॥ तदा समदु[illegible]ोऽक्रूरो विदुरश्च तां कुंतीं तत्पुत्रोत्पत्तिहेतुभिः सांत्वयामासतुः ॥ १५ ॥ ततोऽक्रूरो मथुरां गच्छन् सन्
[illegible] गत्वा सुहृन्मध्ये सौहृदाद्रामकृष्ण[illegible]भिर्यदुक्तं तदवदत् ॥ १६ ॥ अक्रूर उवाच ॥ भो भो धृतराष्ट्र, भ्रातरि पांडौ मृते सति संप्रति त्वं सिं-
[illegible]स्थितोऽसि ॥ १७ ॥ स त्वं धर्मेण पृथ्वीं पालयन् प्रजाश्च शीलेन रंजयन् पांडवेषु स्वपुत्रेषु च समत्वेन वर्तमानः सन् श्रेयः कीर्तिं च प्राप्स्यसि ॥१८॥
अन्यथा त्वाचरन् इह महद्दुःखं परत्र नरकं च यास्यसे । अतस्त्वं स्वपुत्रेषु पांडवेषु च समत्वेन वर्तस्व ॥ १९ ॥ किंच । हे राजन्, अत्र लोके कस्यापि
जीवात्मनः केनापि पुत्रादिना किंबहुनाऽतिप्रियेण स्वदेहेनापि नित्यं सम्यक् स्थितिर्नास्ति । स्त्रीपुत्रादिभिर्नास्तीति किमु वक्तव्यम् ॥ २० ॥ यतोऽयं जंतु-

समदुःखसुखोऽक्रूरो विदुरश्च महायशाः ॥ सांत्वयामासतुः कुंतीं तत्पुत्रोत्पत्तिहेतुभिः ॥१५॥ यास्यन्राजानमभ्येत्य विषमं पुत्र-
लालसम् ॥ अवदत्सुहृदां मध्ये बंधुभिः सौहृदोदितम् ॥१६॥ अक्रूर उवाच ॥ भो भो वैचित्रवीर्य त्वं कुरूणां कीर्ति[illegible] ॥ भ्रा-
तर्युपरते पांडावधुनाऽऽसनमास्थितः ॥१७॥ धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रंजयन् । वर्तमानः समः स्वेषु श्रेयः कीर्ति[illegible]
॥१८॥ अन्यथा त्वाचरँल्लोके गर्हितो यास्यसे तमः ॥ तस्मात्समत्वे वर्तस्व पांडवेष्वात्मजेषु च ॥१९॥ नेह चात्यंतसं[illegible] कर्हि-
चित्केनचित्सह ॥ राजन्स्वेनापि देहेन किमु जायात्मजादिभिः ॥२०॥ एकः प्रसूयते जंतुरेक एव प्रलीयते ॥ एकोऽनुभुंक्ते सु-
कृतमेक एव च दुष्कृतम् ॥२१॥ अधर्मोपचितं वित्तं हरंत्यन्येऽल्पमेधसः ॥ संभोजनीया[illegible]र्जलानीव जलौकसः ॥ २२ ॥ पु-
ष्णाति यानधर्मेण स्वबुद्ध्या तमपंडितम् ॥ तेऽकृतार्थं प्रहिण्वंति प्राणा रायः सुतादयः ॥[illegible]॥ स्वयं किल्बिषमादाय तैस्त्यक्तो
नार्थको वेदः ॥ असिद्धार्थो विशत्यंधं स्वधर्मविमुखस्तमः ॥ २४ ॥ तस्माल्लोकमिमं राज[illegible]प्नमायामनोरथम् ॥ वीक्ष्यायम्या-
त्मनाऽऽत्मानं समः शांतो भव प्रभो ॥२५॥ धृतराष्ट्र उवाच ॥ [illegible] वाचं दानपते भवान् ॥ तथाऽन[illegible] तृ-
प्यामि मर्त्यः प्राप्य यथाऽमृतम् ॥[illegible]त्रानुरागविषमे विद्युत्सौदामन[illegible]था
॥ २७ ॥ ईश्वरस्य विधिं को नु [illegible] यदोः कुले ॥ २८ ॥

रेक एव प्रसूयते नश्यति च । पुण्यं [illegible]ये हरंति ॥ २२ ॥ किंच, अधर्मेण यान् पुष्णाति
ते प्राणाः पुत्रादयो धनानि च तं त्यजं[illegible] ॥ २४ ॥ तस्मात् हे राजन्, त्वमिमं लोकं स्व-
प्नमायामनोरथवदनित्यं वीक्ष्य बुद्ध्या म[illegible] अक्रूर, यथा त्वं वदसि तथाऽनया तव वा-
ण्याहं न तृप्या[illegible]मर्त्योऽमृतं प्राप्य यथ[illegible] चंचले च मे हृदि विद्युल्लतेव स्थिरतां
न प्रा[illegible] ॥ २७ ॥ किंच । भूभारनाश[illegible]८ ॥ [illegible] ॥

---

१ तवैते पुत्रा धर्मवाय्विंद्रेभ्यो जाता म[illegible]

मायये [illegible] क

थाभिप्राय [illegible] अनु

[illegible] ययेद

॥ श्री [illegible] । इ

[illegible] त

हंस्यां संहितायां दशमस्कंधे

शशंस ॥ २१ [illegible] ॥ इति श्रीमद्भागवतचूर्णि

श्रीशुक उवाच ॥ एवं धृतराष्ट्र-

त्सर्वं धृतराष्ट्रचेष्टितं रामकृष्णाभ्यां

वहारतंत्रसंसारचक्र [illegible]

नर्यदुपुरीमगमत् [illegible]

त श्रीमद्भाग [illegible] ष्टाद्दशम [illegible]

॥

४९ ॥ [illegible] ॥ श्रीकृष्णार्पणमस्तु

अथ सचूर्णिकश्रीमद्भागवते दशमस्कंधारंभः

॥ श्रीगणेशाय नमः ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितम् । श्रीकृष्णाख्यं परं धाम जगद्धाम नमाम तत् ॥१॥ कृता नवतिरध्याया दशमे कृष्णकीर्तये ॥ तत्र तु प्रथमे कंसः स्वमृत्युं देवकीसुतात् । श्रुत्वा भीतोऽवधीत्तस्याः षड्गर्भानिति वर्ण्यते॥२॥रानोवाच ॥ हे शुकाचार्य, भवता सोमसूर्ययोर्वंशविस्तारः कथितः । उभयवंशोद्भूतानां राज्ञां परमाद्भुतं चरित्रं च कथितम् ॥१॥ अधुना धर्मशीलस्य यदोर्वंशेऽवतीर्णस्य विष्णोश्चरित्राणि नः कथय ॥ २ ॥ यदुवंशेऽवतीर्य भगवान् यानि कर्माणि कृतवान् तानि नो विस्तराद्वद ॥३॥ हे शुक, मुक्तैर्मुमुक्षुभिर्विषयिभिश्च सेव्यमानाद्धरिगुणानुवादादात्मघातिनं विना कः पुमान् विरज्येत न कोऽपि ॥४॥ किंच ॥ मम पितामहाः पांडवा भीष्मादिरूपैर्जलचरैर्दुस्तरं कौरवसैन्यसमुद्रं वत्सपदमिवात्यल्पं कृत्वा कृष्णरूपनौकयाऽतरन् ॥५॥ किंच । अश्वत्थाम्नो ब्रह्मास्त्रेण दग्धं मे शरीरं, शरणं गताया मे मातुः कुक्षिं गतः सन् चक्रं गृहीत्वा यो ररक्ष ॥ ६ ॥ सर्वप्राणिनामंतः पुरुषरूपेण बहिश्च कालरूपेण मुक्तिं संसारं च ददतस्तस्य हरेश्चरित्राणि वद ॥७॥ किंच । त्वया नवमस्कंधे रामो रोहिणीपुत्रः प्रोक्तः । तस्यैव च पुनर्देवक्या गर्भसंबंधः प्रोक्तः । स देहांतरं विना कुतो घटते ॥८॥ मुकुंदः पितुर्गृहं त्यक्त्वा गोकुलं कुतो गतः । तथा नंदादिगोपैः सह क्व वासं कृतवान् ॥९ ॥ गोकुले मथुरायां च वसन् किमकरोत् । मातुर्भ्रातरं कंसं साक्षात्कथं जघान ॥ १० ॥ हरिर्मनुष्यदेहमाश्रित्य कति वर्षाणि द्वारकायामवात्सीत् । तस्य कति पत्न्यो बभूवुः ॥ ११ ॥ अन्यच्च सर्वं कृष्णचरितं त्वं श्रद्धापूर्वकं श्रवणेच्छोर्मे वक्तुमर्हसि ॥ १२ ॥ हे शुक, एषा क्षुधा उदकमपि त्यक्तवंतं मां न बाधते । यतस्त्वत्तो हरिकथामृतं पिबामि ॥ १३ ॥ ॥ ॥ ॥ ॥

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः ॥ राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥ १ ॥ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ॥ तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥ २ ॥ अवतीर्य यदोर्वंशे भगवान्भूतभावनः ॥ कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् ॥ ३॥ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात् ॥ क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ॥ ४ ॥ पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः ॥ दुरत्ययं कौरवसैन्यसागरं कृत्वाऽतरन्वत्सपदं स्म यत्प्लवाः ॥ ५ ॥ द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवान[illegible] ॥ जुगोप कुक्षिंगत आत्तचक्रो मातुश्च मे यः शरणं गतायाः॥६॥ वीर्याणि तस्याखिलदेहभाजामंतर्बहिः पूरुषकालरूपैः ॥ प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ॥ ७ ॥ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया ॥ देवक्या गर्भसंबंधः कुतो देहांतरं विना ॥८॥ कस्मान्मुकुंदो भगवान्पितुर्गेहाद्व्रजं गतः ॥ क्व वासं ज्ञातिभिः सार्धं कृतवान्सात्वतां पतिः ॥ ९ ॥ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः ॥ भ्रातरं चावधीत्कंसं मातुरद्धाऽतदर्हणम् ॥ १०॥ देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः ॥ यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥११ ॥ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितम् ॥ वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतम् ॥१२॥ नैषाऽतिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते ॥ पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतम् ॥१३॥

॥ सूत उवाच ॥ हे शौनक, एवं प्रश्नं श्रुत्वा शुको राज्ञः संमानं कृत्वा श्रीकृष्णचरित्रं वक्तुं प्रारंभं कृतवान्॥१४॥श्रीशुक उवाच ॥ हे राजन्, तव बुद्धिः सम्यक् निश्चिता । यतो वासुदेवकथायां ते निष्ठायुक्ता प्रीतिर्जाता ॥१५॥ वासुदेवकथाप्रश्नो वक्तारं पृच्छकं श्रोतृंश्च पुनाति ॥ १६ ॥ हे नृप, इयं भूमिर्गर्विष्ठानां नृपरूपदैत्यानां यानि बहूनि सैन्यानि तेषां बहुना भारेण पीडिता सती अश्रुमुखी गौर्भूत्वा ब्रह्माणं शरणं गत्वा तस्मै स्वकीयं दुःखं जगाद ॥ १७॥१८॥ ब्रह्मा तच्छ्रुत्वा तया देवैः शंकरेण च सह क्षीरसमुद्रतीरं ययौ ॥१९॥ तत्र गत्वा समाहितः सन् जगन्नाथं पुरुषं पुरुषसूक्तेन तुष्टाव ॥२०॥ ततो ब्रह्मा समाधावाकाशवाणीं श्रुत्वा समाधिं विसर्ज्य देवानुवाच । हे देवाः, यूयं मया समाधौ श्रुतामीश्वरस्य वाणीं शृणुत । तथैव शीघ्रं क्रियताम् ॥२१॥ईश्वरेणास्मत्प्रार्थनात्पूर्वमेव भूमेर्दुःखं ज्ञातम् । भवद्भिर्यादवेषु स्वांशैरुपजन्यताम् ॥२२॥ भगवान् वसुदेवगृहे जनिष्यते । तस्य प्रियं कर्तुं युष्माकं स्त्रियोऽपि संभवंतु ॥ २३ ॥ (ऋषयोऽपि दुग्धदानमिषेण कृष्णं तर्पयितुं गवादिरूपिणः कल्पंताम्॥१॥) किंच । सहस्रमुखः शेषो हरेः प्रियं कर्तुमादौ भविष्यति॥२४॥तथा विष्णोर्मायापि भगवदाज्ञया कार्यार्थे यशोदायां संभविष्यति ॥२५॥ श्रीशुक उवाच॥ एवं ब्रह्मा देवानाज्ञाप्य पृथिवीं च समाश्वास्य सत्यलोकं जगाम ॥२६॥ हे नृप, पुरा यदुपतिः शूरसेनो

॥ सूत उवाच ॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातम् ॥ प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥ १४ ॥ श्रीशुक उवाच ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥ १५ ॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि ॥ वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥१६ ॥ भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ॥ आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १७॥ गौर्भूत्वाऽश्रुमुखी खिन्ना क्रंदंती करुणं विभोः ॥ उपस्थितांऽतिके तस्मै व्यसनं स्वमवोचत ॥ १८ ॥ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह ॥ जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥ १९ ॥ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ॥ पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥ २० ॥ गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ॥ गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम् ॥ २१ ॥ पुरैव पुंसाऽवधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ॥ स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥२२ ॥ वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः ॥ जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः ॥ २३ ॥ (ऋषयोऽपि तदादेशात् कल्पंतां पशुरूपिणः ॥ पयोदानमुखेनापि कृष्णं तर्पयितुं सुराः ॥ १ ॥) वासुदेवकलानंतः सहस्रवदनः स्वराट् ॥ अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥ २४ ॥ विष्णोर्माया भगवती यया संमोहितं जगत् ॥ आदिष्टा प्रभुणांऽशेन कार्यार्थे संभविष्यति ॥ २५ ॥ ॥ श्रीशुक उवाच ॥ इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः ॥ आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ॥ २६ ॥ शूरसेनो यदुपतिर्मथुरामावसन्पुरीम् ॥ माथुरान् शूरसेनांश्च विषयान्बुभुजे पुरा ॥ २७ ॥ ॥

---

१ देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थे ।

राजधानी ततः साऽभूत्सर्वयादवभूभुजाम् ॥ मथुरा भगवान्यत्र नित्यं संनिहितो हरिः ॥२८॥ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः ॥ देवक्या सूर्यया सार्धं प्रयाणे रथमारुहत् ॥ २९ ॥ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया ॥ रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः ॥ ३० ॥ चतुःशतं पारिबर्हं गजानां हेममालिनाम् ॥ अश्वानामयुतं सार्धं रथानां च त्रिषट्शतम्॥३१॥ दासीनां सुकुमारीणां द्वे शते समलंकृते ॥ दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ॥ ३२॥ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयः समम् ॥ प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलम् ॥ ३३ ॥ पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् ॥ अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ॥ ३४ ॥ इत्युक्तः स खलः पापो भोजानां कुलपांसनः ॥ भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत् ॥ ३५ ॥ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम् ॥ वसुदेवो महाभाग उवाच परिसांत्वयन् ॥ ३६ ॥ वसुदेव उवाच ॥ श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः ॥ स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ॥ ३७ ॥ मृत्युर्जन्मवतां वीर देहेन सह जायते ॥ अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३८ ॥ देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः ॥ देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥ ३९ ॥ व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति ॥ यथा तृणजलूकैवं देही कर्मगतिं गतः ॥ ४०॥ स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः ॥ दृष्टश्रुताभ्यां मनसाऽनुचिंतयन्प्रपद्यते तत्किमपि ह्यपस्मृतिः ॥ ४१ ॥ ॥

मथुरायां वसन् माथुरान् शूरसेनांश्च देशान् पालयामास ॥२७॥ ततः सा मथुरा राजधानी बभूव । यत्र हरिर्नित्यं सांनिध्यं प्राप्नोति ॥२८॥ तस्यां कदाचित्कृतोद्वाहो वसुदेवो देवक्या भार्यया सह स्वगृहप्रवेशार्थं रथमारुरोह ॥ २९ ॥ तदा कंसो भगिन्याः प्रियं कर्तुं हयानां रश्मीन् जग्राह ॥ ३०॥ तदा देवको देवक्यै प्रयाणसमये गजानां चतुःशतं४०० अश्वानां पंचदशसहस्रं१५००० रथानामष्टादशशतं१८०० दासीनां शतद्वयं२०० च पारिबर्हं ददौ ॥ ३१ ॥ ॥३२॥ तदा वरवध्वोर्मंगलकारकाणि शंखतूर्यमृदंगादिवाद्यानि नेदुः॥३३॥ततो मार्गे हयरश्मिग्राहिणं कंसं रे रे कंसेति संबोध्याकाशवाणी जगाद । हे मूर्ख, त्वं यां भगिनीं वहसे अस्या अष्टमो गर्भस्त्वां हनिष्यति ॥३४॥ इत्युक्तः स दुष्टः खड्गं गृहीत्वा भगिनीं हंतुं केशबंधे जग्राह ॥३५॥ तदा वसुदेवः क्रूरं निर्लज्जं तं कंसं सांत्वयन्[1] जगाद॥३६॥ वसुदेव उवाच । हे कंस, त्वं शूरैर्वर्णनीयगुणोऽसि । अतो भवान् विवाहपर्वणि भगिनीं कथं हन्यात्॥३७॥मरणभयेन हन्मीति चेत्तर्हि हे वीर, देहधारिणां देहेन सह मृत्युरुत्पद्यते। सोऽद्य वा वर्षशतांते वा निश्चयेन भवति । अतस्तन्निवृत्तये पापाचरणं न योग्यम् ॥ ३८ ॥ देहे मरणोन्मुखे जाते सति जीवः कर्मवशात्प्रथमं देहांतरं प्राप्य पश्चात्पूर्वदेहं त्यजति ॥३९॥ यथा तृणजलूका स्वदेहस्य पुरोभागेन तृणांतरं धृत्वा पश्चात्पूर्वं तृणं त्यजति तथा जीवोऽपि ॥ ४०॥ यथा मनोरथाविष्टचित्तो मनुष्यो दृष्टश्रुताभ्यां जनितसंस्कारेण मनसा स्वप्ने जाग्रद्दृष्टश्रुतसदृशं मनुष्यादिदेहं पश्यति क्षणांतरे च तदेवाहमिति मन्यते । ततश्च जाग्रद्देहाद्गतस्मृतिर्भवति । तथा जीवो देहांतरं प्राप्य प्राक्तनशरीरे नष्टस्मृतिर्भवति ॥ ४१ ॥ ॥

---

[1] स्तुत्या कृपाविषयत्वेन साममार्गेण च संबोधयन् ।

कर्मणा प्रेरितं जीवस्य मनो मायया रचितेषु देवमनुष्यादिदेहेषु यं यं देहं चिंतयति तत्र तत्रासौ जीवः तमेवाहमिति मन्यमानस्तेन सह जायते ॥४२॥ हे कंस, यथा घटेषु प्रतिबिंबितं चंद्रादिज्योतिर्वायुवेगेन कंपादियुक्तं दृश्यते तथा मायारचितेषु देहेष्वसौ पुरुषः प्रेम्णा प्रविष्टः सन् तत्तदभिमानं करोति ॥४३॥ अत आत्मनः कल्याणमिच्छन् कस्यचिदपि द्रोहं नाचरेत् ॥४४॥ हे कंस, एषा तव भगिनी देवकी काष्ठमयी स्त्रीव स्वरक्षणं कर्तुमसमर्थाऽस्ति। त्वं च दीनवत्सलोऽसि। अत इमां हंतुं नार्हसि ॥४५॥ श्रीशुक उवाच ॥ एवमुपदिश्यमानोऽपि कंसः स्वयं दारुणान् राक्षसाननुसृतः सन् स्वसुर्वधान्न निवृत्तः ॥४६॥ तदा वसुदेवस्तस्याग्रहं ज्ञात्वा देवक्या मृत्युं वंचयितुमिदं निश्चितवान् ॥४७॥ यावद्बुद्धिबलोदयस्तावद्बुद्धिमता पुरुषेण मृत्युर्दूरीकर्तव्यः। यदि न निवर्तेत तर्हि देहिनो-

यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु ॥ गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ॥४२॥ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ॥ एवं स्वमायारचितेष्वसौ पुमान्गुणेषु रागानुगतो विमुह्यति ॥४३॥ तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः ॥ आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयम् ॥ ४४ ॥ एषा तवानुजा बाला कृपणा पुत्रिकोपमा ॥ हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सलः ॥ ४५ ॥ श्रीशुक उवाच ॥ एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः ॥ न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ॥ ४६ ॥ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः ॥ प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४७ ॥ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयम् ॥ यद्यसौ न निवर्तेत नापराधोऽस्ति देहिनः ॥ ४८ ॥ प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमाम् ॥ सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ॥४९॥ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया ॥ उपस्थितो निवर्तेत निवृत्तः पुनरापतेत् ॥५०॥ अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ॥ एवं हि जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥ एवं विमृश्य तं पापं यावदात्मनिदर्शनम् ॥ पूजयामास वै शौरिर्बहुमानपुरःसरम् ॥ ५२ ॥ प्रसन्नवदनांभोजो नृशंसं निरपत्रपम् ॥ मनसा दूयमानेन विहसन्निदमब्रवीत् ॥ ५३ ॥ वसुदेव उवाच ॥ नह्यस्यास्ते भयं सौम्य यद्वै साऽऽहाशरीरवाक् ॥ पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमुत्थितम् ॥ ५४ ॥ ॥

ऽपराधो नास्ति ॥४८॥ अत एवं करिष्यामि । मृत्युरूपिणे कंसाय पुत्रसमर्पणं कृत्वेमां मोचये । यदि च मे सुता जायेरन् तदा यद्भावि तद्भवतु । तावत्पर्यंतं यद्ययं म्रियेत तदा न किंचिदन्याय्यम् ॥४९॥ [illegible] विपर्ययो वा किं न स्यात्। दैवस्य गतिरतर्क्याऽस्ति ॥५०॥ यथाग्नेः काष्ठवियोगसंयोगयोरदृष्टतोऽन्यन्निमित्तं नास्ति। एवं जं[illegible]र्योऽस्ति ॥५१॥ श्रीशुक उवाच ॥ वसुदेव एवं विचार्य बहुमानपुरःसरं तं सत्कृत्य ॥५२॥ तस्य विश्वासार्थं प्रसन्नमुखकमलो भूत्वा विह[illegible]॥ वसुदेव उवाच। हे कंस, तवाकाशवाण्या यथोक्तं तथैव मया निश्चयः कृतोऽस्ति। अस्याः सकाशात्तु ते भयं नास्त्येव। अस्याः पुत्रे[illegible]स्याः सर्वानपि पुत्रांस्तेऽहं समर्पयिष्यामि ॥ ५४ ॥ ॥

---

१ अन्योन्यधर्माध्यासाद्यथा देहादिधर्माः कार्श्यादय आत्मनि प्रतीयंते एवमात्मधर्माः प्रेमास्पदत्वादयोऽपि देहादिषु प्रतीयंते। राजसूकरदेहयोर्विशेषाभावाद्यर्थो मृत्युप्रतीकारः।

श्रीशुक उवाच ॥ ततः कंसो वसुदेववाक्यस्थां युक्तिं जानन् भगिनीवधान्निवृत्तः । वसुदेवोऽपि कंसं प्रशस्य स्वगृहं विवेश ॥ ५५ ॥ अथ प्रसूतिकाले प्राप्ते देवक्यष्टौ पुत्रान् सुषुवे ॥५६॥ तत्र प्रथमजं की[illegible]हीत्वा सत्याश्रितो वसुदेवो दुःखेन कंसाय ददौ ॥५७॥ हे नृप, सत्यप्रतिज्ञानां साधूनां दुःसहं किम् । तथा भगवानेवं तत्त्वं नान्यदिति जानतां ज्ञानिनां [illegible] किमपेक्षितम् ॥५८॥ कंसस्तदा वसुदेवस्य तत्पुत्रानयनं सुखदुःखयोः समत्वं च दृष्ट्वा तुष्टः सन्निदं जगाद ॥ ५९ ॥ हे वसुदेव, अयं ते [illegible]स्मान्मे भयं नास्ति । युवयोरष्टमाद्गर्भान्मे मृत्युराकाशवाण्या कथितोऽस्ति ॥ ६० ॥ तदा तथेत्युक्त्वा सुतं गृहीत्वा वसुदेवो ययौ । तथापि [illegible]ते न मेने ॥६१॥ तस्मिन् समये नारदः सभायामेत्य कंसमेकांते जगाद । हे कंस, गोकुले

श्रीशुक उवाच ॥ स्वसुर्वधान्निववृते कंसस्तद्वा[illegible]रवित् ॥ वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद्गृहम् ॥५५॥ अथ काल उपावृत्ते देवकी सर्वदेवता ॥ पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् ॥५६॥ कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः ॥ अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ॥ ५७ ॥ किं दुःसहं नु साधूनां विदुषां किमपेक्षितम् ॥ किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनाम् ॥५८॥ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिम् ॥ कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत् ॥५९॥ प्रतियातु कुमारोऽयं नह्यस्मादस्ति मे भयम् ॥ अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल ॥६०॥ तथेति सुतमादाय ययावानकदुंदुभिः ॥ नाभ्यनंदत तद्वाक्यमसतोऽविजितात्मनः ॥६१॥ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः ॥ वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥६२॥ सर्वे वै देवताप्राया उभयोरपि भारत ॥ ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ॥ ६३ ॥ एतत्कंसाय भगवान् शशंसाभ्येत्य नारदः ॥ भूमेर्भारायमाणानां दैत्यानां च वधोद्यमम् ॥६४॥ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति ॥ देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ॥ ६५ ॥ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ॥ जातं जातमहन्पुत्रं तयोरजनशंकया ॥६६॥ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥६७॥ आत्मानमिह संजातं जानन्प्राग्विष्णुना हतम् ॥ महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ ६८ ॥ उग्रसेनं च पितरं यदुभोजांधकाधिपम् ॥ स्वयं निगृह्य बुभुजे शूरसेनान्महाबलः ॥ ६९ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे श्रीकृष्णावतारोपक्रमे प्रथमोऽध्यायः ॥१॥

ये नंदाद्या गोपास्तथा यशोदाद्यास्तत्स्त्रियः तथा मथुरायां वसुदेवाद्या ये वृष्णयो देवक्याद्यास्तत्स्त्रियश्च ॥ ६२ ॥ ते सर्वे देवताप्रायाः संति ॥ ६३ ॥ तैर्देवैश्च भूमेर्भारायमाणानां देवानां वधोद्योगः कृतोऽस्ति । एवं श्रावयित्वा नारदो ययौ ॥ ६४ ॥ ततः कंसो यदून् देवान् मत्वा तथा देवक्या गर्भसंभूतं विष्णुं स्ववधार्थं जातं मत्वा॥६५॥ वसुदेवं देवकीं च गृहे शृंखलैर्बध्वा तयोर्जातं जातं पुत्रं जघान॥६६॥हे राजन्, प्राणपोषका राजानो मातृपितृभ्रातृसुहृदादीनपि घ्नंति । अन्येषां का कथा ॥६७॥ किंच । पूर्वं विष्णुना हतं कालनेमिरूपं आत्मानं जानन् स कंसो यदुभिः सह विरोधं चकार ॥६८॥ ततः स्वपितरमप्युग्रसेनं स्वयं निगृह्य राज्यं बुभुजे ॥ ६९ ॥ इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वार्धे प्रथमोऽध्यायः ॥ १ ॥ ॥ ॥

---

१ ब्रह्मदेवद्वारा भगवत्प्रार्थनां कारयित्वेत्यर्थः ।

द्वितीये कंसघाताय देवक्या गर्भगो हरिः । ब्रह्मादिभिः स्तुतः सा च सांत्वितेति निरूप्यते ॥१॥ श्रीशुक उवाच ॥ हे राजन्, जरासंधाश्रयवान् कंसः प्रलंबबकचाणूरतृणावर्ताघासुरमुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैर्बाणभौमादिभिश्च सह यादवानां दुःखं ददौ ॥१॥२॥ तदा ते यादवाः पीडिताः संतः कुरुपांचालकैकयशाल्वविदर्भनिषधादीन् देशान् विविशुः ॥३॥ केचिदक्रूरादयो बांधवाः कंसाज्ञामनुसरंतः संतः सेवकधर्मेण स्थिताः । एवं देवक्याः षट्सु बालेषु हतेषु सत्सु ॥४॥ यच्छेषनामकं विष्णोस्तेजस्तद्देवक्या हर्षशोक[1]प्रदः सप्तमो गर्भो बभूव ॥५॥ भगवानपि यादवानां कंसजं भयं ज्ञात्वा योगमायामाज्ञापितवान् ॥६॥ हे देवि, त्वं गोकुलं गच्छ । तत्र वसुदेवस्त्री रोहिणी वसति ॥७॥ तस्या उदरे देवकीजठरस्थितं मे शेषाख्यं तेजः स्थापय ॥८॥ ततोऽहं परिपूर्णरूपेण देवक्याः

॥ श्रीशुक उवाच ॥ प्रलंबबकचाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ॥ यदूनां कदनं चक्रे बली मागधसंश्रयः ॥२॥ ते पीडिता निविविशुः कुरुपांचालकेकयान् ॥ शाल्वान्विदर्भान्निषधान्विदेहान्कोसलानपि ॥ ३ ॥ एके तमनुरुंधाना ज्ञातयः पर्युपासते ॥ हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ ४ ॥ सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते ॥ गर्भो बभूव देवक्या हर्षशोकविवर्धनः ॥ ५ ॥ भगवानपि विश्वात्मा विदित्वा कंसजं भयम् ॥ यदूनां निजनाथानां योगमायां समादिशत् ॥ ६ ॥ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतम् ॥ रोहिणी वसुदेवस्य भार्याऽऽस्ते नंदगोकुले ॥ अन्याश्च कंससंविग्ना विवरेषु वसंति हि ॥ ७ ॥ देवक्या जठरे गर्भं शेषाख्यं धाम मामकम् ॥ तत्संनिकृष्य रोहिण्या उदरे संनिवेशय ॥ ८ ॥ अथाहमंशभागेन देवक्याः पुत्रतां शुभे ॥ प्राप्स्यामि त्वं यशोदायां नंदपत्न्यां भविष्यसि ॥ ९ ॥ अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीम् ॥ धूपोपहारबलिभिः सर्वकामवरप्रदाम् ॥ १० ॥ नामधेयानि कुर्वंति स्थानानि च नरा भुवि ॥ दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥ ११ ॥ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च ॥ माया नारायणीशानी शारदेत्यंबिकेति च ॥ १२ ॥ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि ॥ रामेति लोकरमणाद्बलं बलवदुच्छ्रयात् ॥ १३ ॥ संदिष्टैवं भगवता तथेत्योमिति तद्वचः ॥ प्रतिगृह्य परिक्रम्य गां गता तत्तथाऽकरोत् ॥ १४ ॥ गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया ॥ अहो विस्रंसितो गर्भ इति पौरा किचुक्रुशुः ॥ १५ ॥ ॥ ॥

पुत्रतां प्राप्स्यामि । त्वं च नंदस्त्रियां यशोदायां भविष्यसि ॥९॥ एवं मदाज्ञापालने कृते सति सर्वमनोरथपूरणकर्त्रीं त्वां मनुष्या भूमौ धूपदीपनैवेद्यादिभिः पूजयिष्यंति ॥१०॥ तथा ते देवालयानि बध्नंति । दुर्गा भद्रकाली विजया वैष्णवी ॥११॥ कुमुदा चंडिका कृष्णा नारायणीत्यादीनि ते नामानि च प्रसिद्धानि कुर्वंति॥१२॥तथा त्वया देवकीगर्भाकर्षणात्त्वं संकर्षणमिति लोकरमणाद्राममिति बलाधिक्याद्बलमिति च वदंति॥१३॥एवं हरिणाऽऽज्ञापिता सा माया तामाज्ञामंगीकृत्य तं प्रदक्षिणीकृत्य गोकुलं गत्वा तथा चकार ॥१४॥ एवं योगमायया देवक्या गर्भे रोहिण्या उदरंप्रति नीते सति पुरवासिनो जना अहो देवक्या

---

[1] आनंदरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधरणदृष्टया शोक इति ।

गर्भो विस्रस्त इति विचु[1]क्रुशुः ॥१५॥ अथ भक्तानामभयदो भगवानानंदरूपेण वसुदेवमनस्या[2]विर्बभूव ॥१६॥ ततो वसुदेवो भगवतः श्रीमूर्तिं धारयन् सूर्य इव तेजस्वी कंसादीनां पराभवितुमशक्यश्च बभूव॥१७॥ ततः शुद्धसत्वा देवकी वसुदेवेन वैधं[3]दीक्षयार्पितं सर्वात्मकं भगवत्तेजो मनसैव दधार। पूर्वदिशा चंद्रमिव ॥१८॥ तदा सा देवकी सर्वजगन्निवासस्य श्रीहरेर्निवासभूता सत्यप्यत्यंतं न रेजे। यतः कंसगृहे रुद्धा। यथा घटादिषु रुद्धा दीपज्वाला न शोभते तद्वत्॥१९॥ तदा स्वकांत्या गृहं प्रकाशयंतीं तां दृष्ट्वा कंस आह। अहो मे प्राणहरो यो हरिः स ध्रुवमस्याः कुक्षौ स्थितोऽस्ति। यत इयं पूर्वमेवं कांतिमती नासीत्॥२०॥ स मम वधे पराक्रमं करिष्यत्येव। अतस्तस्मिन्नद्य मया किं करणीयम्। इयं हन्यतामिति चेत्तर्हिं भगिन्या गर्भिण्याः स्त्रिया वधो यशः संपत्तिमायुष्यं च

भगवानपि विश्वात्मा भक्तानामभयंकरः ॥ आविवेशांशभागेन मन आनकदुंदुभेः ॥ १६ ॥ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः ॥ दुरासदोऽतिदुर्धर्षो भूतानां संबभूव ह ॥ १७ ॥ ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी ॥ दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनंदकरं मनस्तः ॥१८॥ सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे ॥ भोजेंद्रगेहेऽग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती ॥ १९ ॥ तां वीक्ष्य कंसः प्रभया जितांतरां विरोचयंतीं भवनं शुचिस्मिताम् ॥ आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥ २०॥ किमद्य तस्मिन्करणीयमाशु मे यदर्थतंत्रो न विहंति विक्रमम् ॥ स्त्रियाः स्वसुर्गुरुमत्या वधोऽयं यशः श्रियं हंत्यनुकालमायुः ॥ २१ ॥ स एष जीवन्खलु संपरेतो वर्तेत योऽत्यंतनृशंसितेन ॥ देहे मृते तं मनुजाः शपंति गंता तमोंऽधं तनुमानिनो ध्रुवम् ॥ २२ ॥ इति घोरतमाद्भावात्सन्निवृत्तः स्वयं प्रभुः ॥ आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबंधकृत् ॥ २३ ॥ आसीनः संविशंस्तिष्ठन्भुंजानः पर्यटन्महीम् ॥ चिंतयानो हृषीकेशमपश्यत्तन्मयं जगत्॥२४॥ ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः॥देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयन् ॥२५॥ सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ॥ सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥ २६ ॥ एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पंचविधः षडात्मा ॥ सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः ॥ २७ ॥ ॥ ॥

नाशयति॥२१॥ किं च। अतिक्रूरतया यो वर्तते स जीवन्नपि मृतः स्यात्। किं च। तं जीवंतमेव मनुजाः श[4]पंति। स च मरणानंतरं नरकं गच्छति ॥२२॥ एवं विचार्य कंसोऽतिभयंकराद्देवकीवधसंकल्पान्निवृत्य हरेर्जन्म प्रतीक्षन्नास्ते स्म ॥२३॥ किंच। आसीनः शयानो भुंजानो भूमौ पर्यटंश्च एवं सर्वावस्थासु हरिं चिंतयानः स कंसः सर्वमपि जगत्तन्मयं ददर्श ॥२४॥ एकदा ब्रह्मा शिवश्च देवैर्ऋषिभिश्च सह कंसबंदिगृह आगत्य देवकीगर्भस्थं भगवंतं तुष्टुवुः ॥२५॥ हे हरे, सत्यसंकल्पं भूतभविष्यवर्तमानकालत्रयेऽपि सत्यरूपं त्वां वयं शरणं प्रपन्नाः स्मः ॥ २६ ॥ किंच। हे कृष्ण, अस्य संसारवृक्षस्य प्रकृतिराश्रयः। सुखदुःखे द्वे

---

[1] न तु तद्विदुरित्यर्थः। [2] जीवानामिव भगवतो न धातुसंबध इत्यर्थः। [3] यथा कूर्मः स्वापत्यानां ध्यानमात्रेण पोषणं करोति तथा त्वं ध्यानमात्रेण परमेश्वरं भजस्वेत्युपदेशो वैधदीक्षेति कुलार्णवे प्रसिद्धम्। [4] दुर्वाक्यैर्धिक्कुर्वंति।

फले । सत्वरजस्तमांसि त्रीणि मूलानि । धर्मार्थकाममोक्षाश्चत्वारो रसाः । त्वक्चर्ममांसरुधिरमेदोमज्जास्थिरूपाः सप्त धातवस्त्वच[illegible]भूतमनोबुद्ध्यहंकाराख्या
अष्ट शाखाः । नव द्वाराणि छिद्राणि । दश प्राणाः पर्णानि च संति । अस्मिन् वृक्षे जीवेश्वरौ द्वौ पक्षिणौ स्तः ॥ २७ ॥ एवंभू[illegible]क्षस्योत्पत्तिपालननाशकर्ता
त्वमेवासि । त्वन्मायया मोहितचित्तास्त्वामेव ब्रह्मादिरूपेण नानाविधं पश्यंति ॥ २८ ॥ एवंभूतस्त्वं सर्वलोकानां क्षेमाय साधूनां सुखकराणि खलानां नाश-
कराणि च सात्विकानि रूपाणि बिभर्षि ॥२९॥ हे कमलनेत्र, त्वयि सत्वमूर्तौ समाधिना चित्तं स्थापयित्वा विवेकिनः पुरुषास्त्वत्पादनौकाश्रयणेन भवसमुद्रं
वत्सपदतुल्यं कुर्वंति ॥३०॥ हे स्वप्रकाश, तव भक्ता भवसमुद्रं स्वयमुत्तीर्य त्वद्भक्तिमार्गसंप्रदायरूपां नौकां लोकतरणार्थमत्र स्थापयित्वा पारं याताः ॥३१॥

त्वमेक एवास्य सतः प्रसूतिस्त्वं संनिधानं त्वमनुग्रहश्च ॥ त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये
॥ २८ ॥ बिभर्षि रूपाण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य ॥ सत्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः ख-
लानाम् ॥ २९ ॥ त्वय्यंबुजाक्षाखिलसत्वधाम्नि समाधिनावेशितचेतसैके ॥ त्वत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवा-
ब्धिम् ॥ ३० ॥ स्वयं समुत्तीर्य सुदुस्तरं द्युमन्भवार्णवं भीममदभ्रसौहृदाः ॥ भवत्पदांभोरुहनावमत्र ते निधाय याताः सदनु-
ग्रहो भवान् ॥ ३१ ॥ येऽन्येऽरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः॥ आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोऽना-
दृतयुष्मदंघ्रयः ॥ ३२ ॥ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः ॥ त्वयाभिगुप्ता विचरंति निर्भया
विनायकानीकपमूर्धसु प्रभो ॥ ३३ ॥ सत्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां श्रेय उपायनं वपुः ॥ वेदक्रियायोगतपःस-
माधिभिस्तवार्हणं येन जनः समीहते ॥ ३४ ॥ सत्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम् ॥ गुणप्रकाशैरनु-
मीयते भवान्प्रकाशते यस्य च येन वा गुणः ॥ ३५ ॥ न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः ॥ मनो-
वचोभ्यामनुमेयवर्त्मनो देव क्रियायां प्रतियंत्यथापि हि ॥ ३६ ॥ ॥ ॥

हे हरे, ये पुरुषा मुक्ता वयमित्यभिमानवंतस्त्वत्पादसेवां न कुर्वंति ते बहुजन्मतपसा मोक्षसन्निहितं पदम्[1]आरुह्यापि ततोऽधः[2] पतंति ॥ ३२ ॥ तव भक्तास्तु
विघ्नानां मूर्धसु पदं दत्वा[3] निर्भयाः संतो जीवन्मुक्तस्थित्या विचरंति ॥३३॥ हे प्रभो, जगतः पालनार्थं जीवानां कर्मफलदानार्थं च त्वं शुद्धसत्वात्मकं शरीरं
धारयसि । तेन जनस्तव चतुराश्रमधर्मैराराधनं करोति ॥३४॥ हे पालक, इदं तव वपुर्न भवेच्चेत्तर्ह्यज्ञाननिवर्तकमपरोक्षज्ञानं न भवेत् । यतो बुद्ध्यादीनां
प्रकाशकैर्लक्षणैर्भवान् सर्वसाक्षी केवलमनुमीयते न तु साक्षात्क्रियते । शुद्धसत्ववपुषि त्वयि सेव्यमाने तु त्वत्प्रसादेन स्वरूपसाक्षात्कारो भवति ॥३५॥ हे देव,
सर्वसाक्षिणस्तव नामरूपे गुणजन्म[4]कर्मभिर्निरूपणयोग्ये न भवतः[5] । अथापि भक्ता उपासनादिलक्षणे कर्मणि त्वां साक्षात्पश्यंति ॥ ३६ ॥ ॥

---

[1] सत्कुलजन्मतपःश्रुतादि प्राप्यापीत्यर्थः । [2] विघ्नैः पराभूयंते । [3] विघ्नान् जित्वेत्यर्थः । [4] गुणा भक्तवात्सल्यादयः । जन्मानि रामकृष्णादीनि । कर्माणि रावणवधादीनि तैः । [5] साक्षिणस्तव मनोवचसोरगोचरत्वादित्यर्थः ।

हे कृष्ण, तव नामानि रूपाणि च श्रृण्वन् उच्चारयन् चिंतयंश्च सन् यस्त्वच्चरणकमलयोश्चित्तं स्थापयति स पुनः संसाराय योग्यो न भवति ॥ ३७ ॥ हे हरे, अस्या भूमेर्भारस्तव जन्मनैव दूरीकृतप्राय एवास्ति एतद्दिष्ट्या । किंच । तव वज्रांकुशादिचिह्नयुक्तैः कोमलैः पदैश्चिह्नितां पृथ्वीं वयं द्रक्ष्यामः ॥३८॥ हे कृष्ण, जन्मरहितस्य ते जन्मनः कारणं क्रीडां विना न तर्कयामः ॥ ३९ ॥ हे ईश, मत्स्यकूर्मनृसिंहवराहादियोनिषु त्वमवतारं धृत्वा त्रैलोक्यमस्मांश्च यथा पासि तथाऽधुनापि पाहि । पृथिव्या भारं च हर । हे यादवश्रेष्ठ, तुभ्यं वंदनं कुर्मः ॥ ४० ॥ अथ देवकीं वदंति । हे मातः, षड्गुणैश्वर्यसंपन्नो भगवान् परमेश्वर एवास्माकमुत्कर्षार्थं ते कुक्षिं प्राप्तोऽस्ति । अतो मुमूर्षोः कंसात्ते भयं मा भूत् । तव पुत्रो यादवानां रक्षणकर्ता भविष्यति ॥४१॥ श्रीशुक उवाच ॥ हे राजन्,

श्रृण्वन्गृणन्संस्मरयंश्च चिंतयन्नामानि रूपाणि च मंगलानि ते ॥ क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेता न भवाय कल्पते ॥३७॥ दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोऽपनीतस्तव जन्मनेशितुः ॥ दिष्ट्यांकितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकंपिताम् ॥३८॥ न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ॥ भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि ॥ ३९ ॥ मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः ॥ त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते ॥४०॥ दिष्ट्यांऽब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः ॥ माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ॥४१॥ श्रीशुक उवाच ॥ इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ॥ ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवम् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे गर्भगतविष्णोर्ब्रह्मादिकृतस्तुतिर्नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीशुक उवाच ॥ अथ सर्वगुणोपेतः कालः परमशोभनः ॥ यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकम् ॥ १ ॥ दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् ॥ मही मंगलभूयिष्ठपुरग्रामव्रजाकरा ॥ २ ॥ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः ॥ द्विजालिकुलसंनादस्तबका वनराजयः ॥ ३ ॥ ववौ वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः ॥ अग्नयश्च द्विजातीनां शांतास्तत्र समिंधत ॥ ४ ॥ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहाम् ॥ जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दिवि ॥ ५ ॥ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्धचारणाः ॥ विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ॥ ६ ॥ ॥ ॥

एवं स्तुत्वा देवा ब्रह्मशंकरौ पुरस्कृत्य स्वर्गं ययुः ॥४२॥ इति श्रीम० दश० पूर्वार्धे द्वितीयोऽध्यायः ॥ २ ॥ ॥ तृतीये निजरूपेण संभूतस्तु हरिः स्वयम् । पितृभ्यां संस्तुतो नीतः पित्रा भीतेन गोकुलम् ॥१ ॥ श्रीशुक उवाच । अथ यदा सर्वगुणोपेतः कालो बभूव । यस्मिन् काले ग्रहाद्यानुकूल्ययुक्तं रोहिणीनक्षत्रमासीत् ॥१॥ यदा च दिशः प्रसेदुः । निर्मलनक्षत्रोदयं चाकाशमासीत् । पुत्रोत्साहादिसहितनगरग्रामादियुक्ता पृथ्वी जाता ॥२॥ प्रसन्नजला नद्यः कमलशोभिनो ह्रदाश्च तथा पक्षिभिर्भ्रमरैश्च नादिता वनपंक्तय आसन् ॥३॥ सुखस्पर्शो वायुर्ववौ । विप्राणां शांता अग्नयः प्रदीप्ता बभूवुः ॥४॥ यदा च साधूनां मनांसि प्रसन्नानि जातानि । यस्मिंश्चासन्नप्रसवे काले प्राप्ते सति दिवि दुंदुभयो नेदुः ॥५॥ किन्नरगंधर्वा जगुः । सिद्धचारणास्तुष्टुवुः । विद्याधर्योऽप्स-

रसश्च ननृतुः ॥६॥ मुनयो देवाश्च पुष्पाणि ववृषुः । मेघाः समुद्रगर्जनामनु मंदं मंदं जगर्जुः ॥७॥ तदा निबिडतमोयुक्ते मध्यरात्रिसमये प्राच्यां दिशि पूर्णचं-
द्र इव देवक्यां सर्वात्मा विष्णुः प्रादुर्बभूव ॥८॥ तं कमलनेत्रं चतुर्भुजं शंखचक्रगदाधरं श्रीवत्सलांछनं कौस्तुभकंठं पीतांबरं मेघवच्छ्यामवर्णम् ॥९॥ किरी-
टकुंडलकांत्या स्फुरत्केशं कटिसूत्रबाहुभूषणकंकणादिभिर्विरोचमानमद्भुतं बालकं वसुदेवो ददर्श ॥ १०॥ तदा श्रीहरिर्मे पुत्रो जात इति विस्मयेन प्रफुल्लित-
नेत्रो वसुदेवो हर्षयुक्तः सन् द्विजेभ्यो [1]मनसा दशसहस्रं गा दत्तवान् ॥११॥ ततः स वसुदेवः स्वतेजसा सूतिकागृहं प्रकाशयंतं तं बालकमयं परमेश्वर इति
निश्चित्य कृतांजलिर्भूत्वा तुष्टाव ॥१२॥ वसुदेव उवाच ॥ हे ईश, भवान् प्रकृतेः परः केवलानुभवानंदस्वरूपः सर्वबुद्धिद्रष्टाऽपि मया प्रत्यक्षतो ज्ञातोऽसि

मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः ॥ मंदं मंदं जलधरा जगर्जुरनुसागरम् ॥७॥ निशीथे तमउद्भूते जायमाने जनार्दने ॥
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ॥ आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ॥८॥ तमद्भुतं बालकमंबुजेक्षणं चतु-
र्भुजं शंखगदार्युदायुधम् ॥ श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगम् ॥९॥ महार्हवैदूर्यकिरीटकुंडलत्विषा परि-
ष्वक्तसहस्रकुंतलम् ॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥१०॥ स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलो-
क्यानकदुंदुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम् ॥११॥ अथैनमस्तौदवधार्य पूरुषं परं न-
तांगः [illegible]तांजलिः ॥ स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् ॥१२॥ वसुदेव उवाच ॥ विदितोऽसि भग-
वान्साक्षात्पुरुषः प्रकृतेः परः ॥ केवलानुभवानंदस्वरूपः सर्वबुद्धिदृक् ॥१३॥ स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् ॥ तदनु त्वं
ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥१४ ॥ यथेमेऽविकृता भावास्तथा ते विकृतैः सह ॥ नानावीर्याः पृथग्भूता विराजं जनयंति हि
॥१५॥ संनिपत्य समुत्पाद्य दृश्यंतेऽनुगता इव ॥ प्रागेव विद्यमानत्वान्न तेषामिह संभवः ॥१६॥ एवं भवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यै-
र्गुणैः सन्नपि तद्गुणाग्रहः ॥ अनावृतत्वाद्बहिरंतरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः ॥१७॥ य आत्मनो दृश्यगुणेषु सन्निति
व्यवस्यते स्वव्यतिरेकतोऽबुधः ॥ विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥१८॥ त्वत्तोऽस्य जन्मस्थिति-
संयमान्विभो वदंत्यनीहादगुणादविक्रियात् ॥ त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यंते गुणैः ॥ १९ ॥ ॥

१३॥ स सच्चिदानंदरूप एव त्वं स्वमाययेदं सृष्ट्वा तस्मिन्नप्रविष्टोऽपि प्रविष्ट इव भाव्यसे॥१४॥यथा महत्तत्वादीनि तत्त्वानि षोडशविकारैः सहैकत्र मिलित्वा॥
ब्रह्मांडमुत्पाद्य ॥१५॥ तत्र प्रविष्टानीव दृश्यंते । न पुनः प्रविष्टानि । प्रागेव विद्यमानत्वात् ॥१६॥ एवं त्वं शब्दादिविषयैः सह वर्तमानोऽपि सर्वद्रष्टाऽसि ।
अत इंद्रियैर्न [2]गृह्यसे । स त्वं मया विदितोऽसीति मे भाग्यम् ॥१७॥ यः पुमानात्मव्यतिरिक्तं देहादिकमेव वस्तुबुद्ध्या स्वीकरोति स मूढः ॥१८॥ हे विभो,
निर्गुणादेव त्वत्तो जगत उत्पत्तिस्थितिसंहारान् वदंति । एतत्त्वयि न विरुद्धम् । यतस्त्वदाश्रितैर्गुणैः कुर्वद्भिः सद्भिस्त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते । यथा

---

[1] कंसनिगृहीतस्य प्रत्यक्षदानासंभवात् । [2] यथा चक्षुषा फलादिगते रूपे गृहीते सत्यपि तद्गतस्य रसादेर्ग्रहणं नास्ति एवमिंद्रियैर्विषयग्रहणेऽपि त्वद्ग्रहणं नास्तीति ।

भृत्यकृत्यं राजनीति ॥१९॥ एवंभूतस्त्वं त्रैलोक्यपालनार्थं मायया शुक्लवर्णं बिभर्षि । तथोत्पत्तये रक्तवर्णं नाशाय कृष्णवर्णं च बिभर्षि ॥२०॥ अपि च ॥ हे विभो, अधुना त्वमस्य लोकस्य रक्षणार्थं मम गृहेऽवतीर्णोऽसि। स त्वं नृपसंज्ञकैर्दैत्यैरितस्ततश्चाल्यमानाः सेनाः संहरिष्यसि॥२१॥ एवं सत्यपि त्वया सावधेन भाव्यम् । यतः स खलः कंस आवयोर्गृहे भावि त्वज्जन्म श्रुत्वा तव षट् अग्रजानवधीत् । स सेवकैः कथितं तवावतारं श्रुत्वा हस्ते शस्त्रं गृहीत्वाऽधुनैवागमिष्यति ॥२२॥ श्रीशुक उवाच ॥ हे नृप, अथ देवकी चतुर्भुजादिलक्षणयुक्तं पुत्रं दृष्ट्वा कंसाद्भीता सती तं तुष्टाव ॥ २३ ॥ देवक्युवाच ॥ हे भगवन्, वेदा यं निर्गुणं वस्तु वदंति स एव बुद्ध्यादीनां प्रकाशकः साक्षाद्विष्णुस्त्वमसि ॥२४॥ महाप्रलयकालेऽस्मिन् लोके नष्टे सति यस्त्वमेक एवावशिष्यसे । एवंभूतस्य तव भयशंका नास्ति ॥२५॥ हे प्रकृतिप्रवर्तक, प्रलयहेतुर्योऽयं निमेषादिः संवत्सरांतः काल एनं प्रलयावधिभूतस्य तव लीलामाहुः। तं त्वां निर्भयस्थानमहं शरणं व्रजामि ॥२६॥ हे आद्य, अयं मर्त्यो मृत्युसर्पाद्भीतः सन् कुत्रापि निर्भयं स्थानं न प्राप । ततः केनापि भाग्योदयेन त्वच्चरणकमलं प्राप्य स्वस्थः शेते । मृत्युश्चास्मादपैति ॥२७॥ स त्वं कंसाद्भीतानस्मान् रक्ष । इदं तव ध्यानास्पदमैश्वरं स्वरूपं मांसदृष्टीनां प्रत्यक्षं मा कृथाः ॥२८॥ हे कृष्ण, असौ पापः कंसो मयि तव जन्म जातमिति मा जानीयात्। यतस्तस्मादहं बिभेमि ॥२९॥ हे विश्वात्मन्, त्वं शंखचक्रगदापद्मयुक्तमिदं चतुर्भुजं रूपमुपसंहर ॥ ३० ॥ किंच । हे ईश, यस्त्वं प्रलयांते इदं विश्वं यथावकाशं स्वशरीरे बिभर्षि । स एव त्वं मे गर्भगोऽभूः । इदं मनुष्यलोकस्योपहासास्पदं स्यादत इदं रूपमुपसंहर ॥ ३१ ॥

स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ॥ सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये
॥ २० ॥ त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर ॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे
चमूः ॥ २१ ॥ अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर ॥ स तेऽवतारं पुरुषैः समर्पितं श्रुत्वाऽधुनैवाभिसरत्युदायुधः ॥ २२ ॥ श्रीशुक उवाच ॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणम् ॥ देवकी तमुपाधावत्कंसाद्भीता शुचिस्मिता
॥ २३ ॥ देवक्युवाच ॥ रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारम् ॥ सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥२४॥ नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु ॥ व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते
शेषसंज्ञ [illegible] ॥ योऽयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वम् ॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥२६॥ मर्त्यो मृत्युव्यालभीतः पलायन्लोकान्सर्वान्निर्भयं नाध्यगच्छत् ॥ त्वत्पादाब्जं प्राप्य यदृच्छयाऽद्य स्वस्थः शेते
मृत्युरस्मादपैति ॥ २७ ॥ स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान्भृत्यवित्रासहाऽसि ॥ रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं
मांसदृशां कृषीष्ठाः ॥ २८ ॥ जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन ॥ समुद्विजे भवद्धेतोः कंसादहमधीरधीः ॥ २९ ॥
उपसंहर विश्वात्मन्नदो रूपमलौकिकम् ॥ शंखचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् ॥३०॥ विश्वं यदेतत्स्वतनौ निशांते यथावकाशं
पुरुषः परो भवान् ॥ बिभर्ति सोऽयं मम गर्भगोऽभूदहो नृलोकस्य विडंबनं हि तत् ॥ ३१ ॥ ॥

अथ चतुर्भुजरूपेण प्राकट्ये कारण श्रीभगवानुवाच । हे मातः, स्वायंभुवमन्वंतरे इतः पूर्वं तृतीये जन्मनि त्वं पृश्निर्नाम आसीः। तदाऽयं वसुदेवः सुतपानामासीत् ॥३२॥ तदा युवां ब्रह्माज्ञया सृष्ट्यर्थं परमं तपः कृतवंतौ ॥३३॥ तदा वृष्टिवातोष्णादिकालधर्मान् सहमानौ गतमनोमलौ ॥३४॥ गलितपर्णवायुभोजनौ मत्तो मनोरथपूरणेच्छया मदाराधनं कृतवंतौ ॥३५॥ एवं तीव्रं तपो युवयोः कुर्वतोः सतोर्दिव्यमानेन द्वादशसहस्रवर्षाणि व्यतीयुः ॥ ३६ ॥ तदा युवयोः परितुष्टोऽहममुना चतुर्भुजेन शरीरेण प्रादुर्भूतोऽस्मि ॥३७॥ ततो वरो व्रियतामिति मयोक्ते युवाभ्यां मत्सदृशः पुत्रो वरो वृतः ॥ ३८ ॥ तदा विषयभोगरहितौ युवां देवमायया मोहितौ भूत्वा मत्तो मोक्षं न वव्राथे ॥ ३९ ॥ तदा तथास्त्वित्युक्त्वा मयि गते सति युवां प्राप्तमनोरथौ भूत्वा ग्राम्यान् विषयान् भुक्तवंतौ

॥ श्रीभगवानुवाच ॥ त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति ॥ तदाऽयं सुतपा नाम.प्रजापतिरकल्मषः ॥ ३२ ॥ युवां वै ब्रह्मणाऽऽदिष्टौ प्रजासर्गे यदा ततः ॥ संनियम्येंद्रियग्रामं तेपाथे परमं तपः ॥३३॥ वर्षवातातपहिमघर्मकालगुणाननु ॥ सहमानौ श्वासरोधविनिर्धूतमनोमलौ ॥३४॥ शीर्णपर्णानिलाहारावुपशांतेन चेतसा ॥ मत्तः कामानभीप्संतौ मदाराधनमीहतुः ॥३५॥ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करम् ॥ द्रिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ॥ ३६ ॥ तदा वां परितुष्टोऽहममुना वपुषाऽनघे ॥ तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ॥३७॥ प्रादुरासं वरदराड् युवयोः कामदित्सया ॥ व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥३८॥ अजुष्टग्राम्यविषयावनपत्यौ च दंपती ॥ न वव्राथेऽपवर्गं मे मोहितौ देवमायया ॥३९॥ गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतम् ॥ ग्राम्यान्भोगानभुंजाथां युवां प्राप्तमनोरथौ ॥४०॥ अदृष्ट्वाऽन्यतमं लोके शीलौदार्यगुणैः समम् ॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥४१॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ॥ उपेंद्र इति विख्यातो वामनत्वाच्च वामनः ॥४२॥ तृतीयेऽस्मिन्भवेऽहं वै तेनैव वपुषाथ वाम् ॥ जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥४३॥ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ॥ नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जायते ॥४४॥ युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् ॥ चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं पराम् ॥४५॥ (यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय ॥ मन्मायामानयाशु त्वं यशोदागर्भसंभवाम् ॥ ४६ ॥) श्रीशुक उवाच ॥ इत्युक्त्वाऽसीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥ ४७ ॥ ॥

॥४०॥ लोके मत्सदृशमन्यमदृष्ट्वाऽहमेव पृश्निगर्भ इति नाम्ना युवयोः पुत्रोऽभवम् ॥ ४१ ॥ ततोऽन्यजन्मनि तयोरेव युवयोरदितिकश्यपरूपेण जातयोः सतोरहं वामनरूपेण युवयोः पुत्र आसम् ॥४२॥ अधुना युवयोस्तृतीये जन्मन्यपि तेनैव चतुर्भुजरूपेणाहं जातोऽस्मि । हे सति, एवं मे वचः सत्यं जातम् ॥४३॥ किंच । पूर्वजन्मस्मरणायेदं रूपं मया दर्शितम् । अन्यथा मनुष्यशरीरेण मद्विषयं ज्ञानं नोत्पद्यते । अतः परं त्वदिच्छया बालकोऽपि भविष्यामि ॥ ४४ ॥ हे पितरौ, युवां पुत्रभावेन ब्रह्मभावेन वा मां चिंतयंतौ संतौ मद्गतिं यास्यथः ॥४५॥ (हे वसुदेव, यदि त्वं कंसाद्बिभेषि तर्हि मां गोकुलं नय । यशोदागर्भसंभवां मन्मायां चात्र शीघ्रमानय) ॥४६॥ श्रीशुक उवाच । एवं हरिरुक्त्वा तयोः पित्रोः पश्यतोः सतोः सद्यो योगमायया प्राकृतः शिशुर्बभूव ॥४७॥

ततो वसुदेवो भगवदाज्ञया सुतं गृहीत्वा यदा बहिर्गंतुमिच्छितवान् तदैव योगमाया यशोदायाः कन्यारूपेणोत्पन्ना बभूव॥ ४८ ॥ तया जाग्रतामपि द्वारपालानामिंद्रियवृत्तीराकृष्य तेषु चित्रवत्स्थापितेषु सत्सु तथा पुरवासिषु जनेषु शायितेषु सत्सु महद्भिः कपाटैर्लोहकीलकशृंखलैश्चोद्घाटयितुमशक्या अपि सर्वा द्वारः ॥४९॥ कृष्णवाहे वसुदेवे प्राप्ते सति स्वत एव विवृताः । तदैव मंदगर्जितः पर्जन्यो ववर्ष । तदैव शेषः फणाभिर्जलं निवारयन् वसुदेवपृष्ठतो जगाम ॥५०॥ तदेंद्रे वर्षति सति यमुना गंभीरजलपूरवेगोत्थिताभिर्लहरीभिः फेनव्याप्ता तथाऽतिभयंकरावर्तशतैर्व्याप्तापि रामस्य समुद्र इव मार्गं ददौ ॥ ५१ ॥ ततो वसुदेवो गोकुलं गत्वा मायया सुप्तान् गोपान् ज्ञात्वा यशोदाशयने सुतं निधाय तत्सुतां गृहीत्वा पुनः स्वगृहान् ययौ ॥ ५२ ॥ ततस्तां कन्यां देवकीशयने निधाय पादयोर्निगडं बध्वा पूर्ववत्तस्थौ ॥५३॥ नंदपत्नी यशोदा च निद्रया गतस्मृतिः किंचिदपत्यं जातमिति बुबुधे। न खलु कन्या पुत्रो वा जात इति। यतो यो-

ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ॥ यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाऽजनि नंदजायया ॥४८॥ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ ॥ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ॥४९॥ ताः कृष्णवाहे वसुदेव आगते स्वयं व्यवर्यंत यथा तमो रवेः ॥ ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद्वारि निवारयन्फणैः ॥५०॥ मघोनि वर्षत्यसकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला ॥ भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रियः पतेः॥५१॥नंदव्रजं शौरिरुपेत्य तत्र तान् गोपान्प्रसुप्तानुपलभ्य निद्रया ॥ सुतं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ॥५२॥ देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकाम् ॥ प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ॥५३॥ यशोदा नंदपत्नी च जातं परमबुध्यत॥ न तल्लिंगं परिश्रांता निद्रयापगतस्मृतिः॥५४॥इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे कृष्णजन्मनि तृतीयोऽध्यायः ॥३॥ श्रीशुक उवाच॥ बहिरंतःपुरद्वारः सर्वाः पूर्ववदावृताः ॥ ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥१॥ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् ॥ आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥२॥ स तल्पात्तूर्णमुत्थाय कालोऽयमिति विह्वलः ॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्धजः ॥ ३ ॥ तमाह भ्रातरं देवी कृपणा करुणं सती ॥ स्नुषेयं तव कल्याण स्त्रियं मा हंतुमर्हसि ॥ ४ ॥ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः ॥ त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयताम् ॥ ५ ॥ ॥

गमायया मोहिता जाता ॥५४॥ इति श्रीम० चू० दश० पूर्वा० तृतीयोऽध्यायः ॥ ३ ॥ ॥ चतुर्थे चंडिकावाक्यमाकर्ण्यातिभयाकुलः । दुर्मंत्रिभिर्हितं मेने कंसो बालादिहिंसनम् ॥१ ॥ श्रीशुक उवाच ॥ ततो नगरस्य बहिरंतर्द्वारः शृंखलादिना पूर्ववदावृताः । ततो द्वारपाला बालध्वनिं श्रुत्वोत्थिताः संतः॥ १ ॥ ते तूर्णं राजमंदिरे गत्वा कंसाय तद्देवक्या अष्टमगर्भस्य जन्म कथयामासुः ॥२॥ अथ कंसः शय्यायास्त्वरयोत्थाय मुक्तकेशः सन् त्वरया सूतिकागृहं जगाम ॥ ३ ॥ तदा तं कंसं देवकी दीनवाण्या जगाद । हे भ्रातः, इयं कन्या तव स्नुषा भवितुं योग्या । एनां त्वं हंतुं नार्हसि ॥ ४ ॥ किंच । हे कंस, त्वया अस्माकं बहवः पुत्रा हताः । अधुना मम विश्रांत्यर्थं एका पुत्रिका दी म् ॥ ५ ॥ ॥ ॥

अहं ते कनिष्ठा भगिनी हतसुता दीनाऽस्मि । अतो हे भ्रातः, इमां चरमां कन्यां मे दातुमर्हसि ॥६॥ श्रीशुक उवाच ॥ एवं रुदत्या तया दीनवद्याचितः कंसस्तां निर्भर्त्स्य तस्या हस्तात्कन्यामाकृष्य जग्राह ॥७॥ ततः कंसस्तां चरणयोर्गृहीत्वा शिलोपरि बलेनापोथयत् ॥ ८ ॥ सा तद्धस्तादुत्पत्य सद्यो गगने गत्वा तत्र देवी भूत्वा आयुधसहिताष्टभुजा ददृशे ॥९॥ तथा दिव्यगंधपुष्पमालावस्त्रालंकारैर्भूषिता धनुःशूलबाणचर्मखड्गशंखचक्रगदाधरा ॥१०॥ बलिं समर्पयद्भिः सिद्धचारणगंधर्वादिभिः स्तूयमाना च सती जगाद ॥११॥ हे मंद, मया हतया किं फलम् । तव पूर्वशत्रुस्त्वां हंतुं यत्र क्वापि जातोऽस्ति । त्वं वृथा दीनान् शिशून् मा हिंसीः ॥१२॥ एवं प्रभाष्य सा देवी वाराणस्यादिबहुस्थानेषु बहुनामभिः प्रसिद्धा बभूव ॥१३॥ कंसस्तयोक्तं श्रुत्वा विस्मितः सन् देवकीं वसुदेवं

नन्वहं ते ह्यवरजा दीना हतसुता प्रभो ॥ दातुमर्हसि मंदाया अंगेमां चरमां प्रजाम् ॥६॥ श्रीशुक उवाच ॥ उपगुह्यात्मजामेवं रुदत्या दीनदीनवत् ॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥ ७ ॥ तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुताम् ॥ अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ॥ ८ ॥ सा तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं गता ॥ अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ॥९॥ दिव्यस्रगंबरालेपरत्नाभरणभूषिता ॥ धनुःशूलेषुचर्मासिशंखचक्रगदाधरा ॥ १० ॥ सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः ॥ उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥ ११ ॥ किं मया हतया मंद जातः खलु तवांतकृत् ॥ यत्र क्व वा पूर्वशत्रुर्मा हिंसीः कृपणान्वृथा ॥१२॥ इति प्रभाष्य तं देवी माया भगवती भुवि ॥ बहुनामनिकेतेषु बहुनामा बभूव ह ॥ १३ ॥ तयाऽभिहितमाकर्ण्य कंसः परमविस्मितः॥ देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् ॥१४॥ अहो भगिन्यहो भाम मया वां बत पाप्मना ॥

-पत्यं

पुरुषाद इवापत्यं बहवो हिंसिताः सुताः ॥१५॥ स त्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः ॥ काँल्लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन् ॥१६॥ दैवमप्यनृतं वक्ति न मर्त्या एव केवलम् ॥ यद्विश्रंभादहं पापः स्वसुर्निहतवान् शिशून् ॥ १७ ॥ मा शोचतं महाभागावात्मजान्स्वकृतं भुजः॥ जंतवो न सदैकत्र दैवाधीनास्तदाऽऽसते॥१८॥ भुवि भौमानि भूतानि यथा यांत्यपयांति च ॥ नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥१९॥ यथाऽनेवंविदो भेदो यत आत्मविपर्ययः ॥ देहयोगवियोगौ च संसृतिर्न निवर्तते ॥ २० ॥ तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि ॥ माऽनुशोच यतः सर्वः स्वकृतं विंदतेऽवशः ॥ २१ ॥ ॥

च शृंखलाबंधाद्विमुच्य नम्रो भूत्वा जगाद ॥१४॥ हे भगिनि देवकि, हे भगिनीपते वसुदेव, राक्षसः स्वापत्यमिव मया युवयोर्बहवः पुत्रा हिंसिताः॥ १५॥ सोऽहं निर्दयः सन् ब्रह्महेव श्वसन् कान् लोकान् गमिष्यामि तन्न ज्ञायते ॥१६॥ किंच । दैवमपि मिथ्या वदति । न केवलं मनुष्या एव मिथ्या वदंति । यत आकाशवाण्या विश्वासादहं निर्दयो भूत्वा तव शिशून् हतवान् ॥१७॥ अतो युवां स्वारब्धकर्मभोक्तॄन् पुत्रान्प्रति मा शोचतम् । यतो जंतवो दैवाधीनाः संत एकत्र सदा न तिष्ठंति ॥१८॥ किंच । यथाऽऽधारभूतायां भूमौ घटादय उत्पद्यंते नश्यंति च न भूमिस्तथाऽऽधारभूते आत्मनि देहा एवोत्पद्यंते नश्यंति च नात्मा ॥१९॥ एवमजानतः पुंसो देहे आत्मबुद्धिर्भवति । तया पुत्रादिभेदः । भेदाच्च देहयोगवियोगौ भवतः । ततश्च संसारो न निवर्तते ॥२०॥ अतो हे भद्रे, मया मारितानपि

पुत्रान् त्वं मानुशोच । यतः प्राणी पराधीनः सन् स्वप्रारब्धं भुंक्ते ॥ २१ ॥ यावज्जनोऽहं हतोऽस्मि हंता चास्मीत्यभिमानं धारयति तावन्मरणेन दुःखं मारणेन पापं च प्राप्नोति ॥२२ ॥ तस्माद्धे दीनवत्सलाः, मम दुष्टचित्तत्वं क्षमध्वम् । एवमुक्त्वाऽश्रुमुखः कंसो देवकीवसुदेवयोः पादावग्रहीत् ॥ २३ ॥ तत आत्मप्रेम दर्शयन् तौ श्रृंखलाबंधान्मोचयामास ॥२४॥ ततः पश्चात्तापयुक्तस्य कंसस्य सतो देवकी रोषं व्यसृजत् । वसुदेवश्च रोषं त्यक्त्वा तं जगाद ॥ २५ ॥ हे कंस, अज्ञानादहंकारबुद्धिस्ततः स्वपरभेदस्ततः शोकहर्षभयद्वेषलोभादियुक्ता जना भूत्वा देवदैत्यादिनिमित्तैः परस्परं मारयंतमीश्वरं न पश्यंतीति त्वं यथा वदसि तथैवास्ति ॥ २६ ॥ २७ ॥ श्रीशुक उवाच ॥ एवं देवकीवसुदेवाभ्यां भाषितः कंसस्तदाज्ञां गृहीत्वा गृहं विवेश ॥२८॥ ततस्तस्यां रात्र्यां गतायां परेद्युः

यावद्धतोऽस्मिहंताऽस्मीत्यात्मानं मन्यते स्वदृक् ॥ तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥२२॥ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् ॥ २३ ॥ मोचयामास निगडाद्विश्रब्धः कन्यकागिरा ॥ देवकीं वसुदेवं च दर्शयन्नात्मसौहृदम् ॥ २४ ॥ भ्रातुः समनुतप्तस्य क्षांतरोषा च देवकी ॥ व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह ॥२५॥ एवमेतन्महाभाग यथा वदसि देहिनाम् ॥ अज्ञानप्रभवाऽहंधीः स्वपरेति भिदा यतः ॥ २६ ॥ शोकहर्षभयद्वेषलोभमोहमदान्विताः ॥ मि[illegible]ंतं न पश्यंति भावैर्भावं पृथग्दृशः ॥ २७ ॥ श्रीशुक उवाच ॥ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः ॥ देवकीवसुदेवाभ्यामनुज्ञातोऽविशद्गृहम् ॥ २८ ॥ तस्यां रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः ॥ तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया ॥ २९ ॥ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः ॥ देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ॥ ३० ॥ एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु ॥ अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ॥ ३१ ॥ किमुद्यमैः करिष्यंति देवाः समरभीरवः ॥ नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥ ३२ ॥ अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः ॥ जिजीविषव उत्सृज्य पलायनपरा ययुः ॥ ३३ ॥ केचित्प्रांजलयो दीना न्यस्तशस्त्रा दिवौकसः ॥ मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ॥ ३४ ॥ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान् ॥ हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः ॥३५॥ किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः ॥ रहोजुषा किं हरिणा शंभुना वा वनौकसा ॥ किमिंद्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता ॥ ३६ ॥ ॥ ॥

मिथो

कंसो मंत्रिण आहूय योगमाययोक्तं सर्वं तेभ्यः कथयामास ॥२९॥ तत्कंसवचः श्रुत्वा ते देवशत्रवस्तं जगदुः ॥३०॥ हे भोजेंद्र, एवं चेत्तर्हि नगरग्रामगोकुलादिषु स्थितान् अनिर्दशान्निर्दशांश्च शिशून् अद्य वयं हनिष्यामः ॥३१॥ तव धनुष्यमौर्वीशब्दैर्भीतचित्ता देवा उद्योगैः किं करिष्यंति न किमपि ॥ ३२ ॥ तव बाणैर्हन्यमाना देवाः संग्रामं त्यक्त्वा पलायनं चक्रुः ॥३३॥ तत्र केचित्प्रांजलयो दीना बभूवुः । केचिन्मुक्तकच्छशिखा भूत्वा भीताः स्म इति वादिनो बभूवुः ॥ ३४ ॥ त्वं तु विस्मृतशस्त्रास्त्रान् विरथान् भयातुरान् विमुखांश्च देवान् न हंसि ॥ ३५ ॥ एतावता निर्भयदेशे शूरैर्देवैः किम् । तथा सर्वस्याप्यंतः प्रविष्टेन

---

१ क्वचिदपि बहिरदृष्टेनेत्यर्थः ।

विष्णुना किम् । पुरुषप्रवृत्तिरहित[1]वनस्थितेन शंभुना वा किम् । अल्पवीर्येणेंद्रेण तपः कुर्वता ब्रह्मणा वा किम् ॥३६॥ तथापि शत्रुत्वाद्देवा नोपक्ष्या इति वयं मन्महे । अतो देवानां मूलोत्पाटनेऽस्माकमाज्ञां देहि॥३७॥ हे कंस, यथा शरीरे समुपेक्षितो रोगो बद्धमूलः सन् निवर्तयितुं न शक्यते । एवं शत्रुरपि बद्धमूलः सन् जेतुं न शक्यते ॥३८॥ हे प्रभो, देवानां मूलं विष्णुः । तस्य मूलं धर्मः । धर्मस्य मूलं वेदगोविप्रतपोयज्ञाः ॥३९॥ तस्मात्सर्वप्रकारेण तपस्विनो विप्रान् हविर्दुघा गाश्च हनिष्यामः ॥४०॥ किंच ॥ विप्र-गो-देव-वेद-तपः-सत्य-शम-दमादयो हरेर्मूर्तयः ॥ ४१ ॥ स हरिः सर्वदेवानामीश्वरः । विष्णुमूला एव रुद्रब्रह्मादिसर्वे देवाः । अतो ऋषीणां वध एव विष्णोर्वधोपायः ॥४२॥ श्रीशुक उवाच ॥ एवं दुर्मतिः कंसो दुर्मंत्रिभिः सह विचार्य कालपाशेन वेष्टितः सन्

तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ॥ ततस्तन्मूलखनने नियुंक्ष्वास्माननुव्रतान् ॥ ३७ ॥ यथामयोंऽगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम् ॥ यथेंद्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ॥ ३८ ॥ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः॥ तस्य च ब्रह्मगोविप्रास्तपोयज्ञाः सदक्षिणाः॥३९॥ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः॥ तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ॥४०॥ विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः॥ श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥४१॥ स हि सर्वसुराध्यक्षो ह्यसुरद्विड् गुहाशयः॥ तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ॥ अयं वै तद्वधोपायो यदृषीणां विहिंसनम् ॥४२॥ श्रीशुक उवाच ॥ एवं दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः॥ ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः॥४३॥ संदिश्य साधुलोकस्य कदने कदनप्रियान् ॥ कामरूपधरान्दिक्षु दानवान्गृहमाविशत् ॥४४॥ ते वै रजःप्रकृतयस्तमसा मूढचेतसः॥ सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥४५॥ आयुः श्रियं यशो धर्मं लोकानाशिष एव च ॥ हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥४६॥ इति श्रीम० महा० दश० पूर्वा० चतुर्थोऽध्यायः ॥४॥ श्रीशुक उवाच ॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ॥ आहूय [illegible]न्दैवज्ञान्स्नातः शुचिरलंकृतः ॥१॥ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै ॥ कारयामास विधिवत्पितृदेवार्चनं तथा ॥ २ ॥ धेनूनां नियुते प्रादाद्विप्रेभ्यः समलंकृते ॥ तिलाद्रीन्सप्त रत्नौघशातकौंभांबरावृतान् ॥ ३ ॥ ॥

विप्रान्

ब्राह्मणहिंसां हितं मेने ॥४३॥ ततो दैत्यान् साधुजनानां नाशार्थमाज्ञाप्य गृहं ययौ ॥४४॥ ततः समीपं प्राप्तमृत्यवस्ते दैत्याः साधूनां द्वेषमाचेरुः ॥ ४५ ॥ साधूनां द्वेषः पुरुषस्य आयुष्यं संपत्तिं यशः धर्मं सर्वाणि कल्याणानि च हंति ॥४६॥ इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वा० चतुर्थोऽध्यायः॥ ४ ॥ पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवम् । गत्वाथ मथुरां प्राप वसुदेवागमोत्सवम् ॥ १ ॥ श्रीशुक उवाच ॥ अथ पुत्रे उत्पन्ने सति जाताह्लाद उदारचित्तो नंदः स्नातः सन् ज्योतिर्विदो विप्रानाहूय ॥१॥ तैः पुण्याहं वाचयित्वा पुत्रस्य जातकर्म तथा पितृदेवानां नांदीश्राद्धादिना पूजनं कारयामास ॥२॥ ततो नंदो विप्रेभ्यो धेनूनां लक्षद्वयं तथा वस्त्ररत्नयुतान् सप्त तिलपर्वतान् ददौ ॥ ३ ॥ ॥ ॥

---

[1] इलावृतनामकवनस्थितेन ।

कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया ॥ शुध्यंति दानैः संतुष्ट्या द्रव्याण्यात्माऽऽत्मविद्यया ॥ ४ ॥ सौमंगल्यगिरो विप्राः सूतमागधबंदिनः ॥ गायकाश्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ॥ ५ ॥ व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणै ६ ॥ गावो वृषा वत्सतरा हरिद्रातैलरूषिताः ॥ विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ॥ ७ ॥ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥ ८ ॥ गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम् ॥ आत्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ॥ ९ ॥ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥ १० ॥ गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः ॥ नंदालयं सबलया व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ॥ ११ ॥ ता आशिषः प्रयुंजानाश्चिरं पाहीति बालके ॥ हरिद्राचूर्णतैलाद्भिः सिंचंत्यो जनमुज्जगुः ॥ १२ ॥ अवाद्यंत विचित्राणि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरेऽनंते नंदस्य व्रजमागते ॥ १३ ॥ गोपाः परस्परं हृष्टा दधिक्षीरघृतांबुभिः ॥ आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः ॥ १४ ॥ नंदो महामनास्तेभ्यो वासोऽलंकारगोधनम् ॥ सूतमागधबंदिभ्यो येऽन्ये विद्योपजीविनः ॥१५ ॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ॥ विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥ रोहिणी च महाभागा नंदगोपाभिनंदिता ॥ व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता ॥ १७ ॥ ॥

यतः कालेन भूम्यादि शुद्ध्यति । स्नानेन देहादि । दानेन द्रव्यादि । संस्कारैर्गर्भादि। तपसेंद्रियादि । संतुष्ट्या मनः। आत्मविद्यया जीवात्मा च शुद्ध्यति ॥४॥ ततो विप्रा आशीर्वादं ददुः । सूतमागधबंदिनस्तुष्टुवुः । गायका जगुः । भेरीदुंदुभयो नेदुः ॥ ५ ॥ ततो गोकुलं संमार्जितानि संसिक्तानि द्वाराणि अंगणानि गृहमध्यानि च यस्मिंस्तथाभूतं विचित्रध्वजपताकामालातोरणादिभिर्भूषितं चाभूत् ॥६॥ तदा गावो वृषा वत्साश्च हरिद्रातैललिप्ता विचित्रधातुमयूरपिच्छपुष्पमालावस्त्रसुवर्णादिभिर्भूषिता बभूवुः ॥७॥ गोपा अमूल्यवस्त्राभरणैर्भूषिताः संतो नानोपायनपाणयो नंदगृहमाययुः ॥८॥ गोप्यो यशोदायाः पुत्रोत्पत्तिं श्रुत्वा वस्त्रालंकारादिभिरात्मानं भूषयित्वा ॥९॥ पृथुश्रोण्यश्चलत्कुचाश्च सत्यो बलिभिः सह नंदगृहं त्वरितं जग्मुः ॥१०॥ तदा नंदगृहं गच्छंत्यश्चित्रांबराः पथि केशपाशच्युतपुष्पवर्षाः सकंकणास्ता गोप्यो विरेजुः ॥ ११ ॥ ततस्तत्र गत्वा बालके त्वं चिरकालं गोकुलं रक्षेत्याद्याशीर्वादान् प्रयुंजानाः सत्यो हरिद्राचूर्णतैलजलैः परस्परं सिंचंत्यो हरिगीतान्युच्चैर्जगुः ॥१२॥ एवं कृष्णे नंदगोकुलमागते सति गीतवाद्यादिना महोत्साहः प्रवृत्तः ॥१३॥ तदा गोपा हृष्टा भूत्वा परस्परं दधिक्षीरघृतांबुभिः सिंचंतो नवनीतैर्लिंपंतश्च संतस्तानि च दध्यादीनि मिथश्चिक्षिपुः ॥१४॥ अथ नंदस्तेभ्यः सूतमागधबंदिभ्यश्च तथा येऽन्ये गीतवाद्यादिविद्योपजीविनस्तेभ्यश्च वस्त्रालंकारगोधनैरिच्छितवस्तुसमर्पणैश्च यथायोग्यं सत्कृतवान् ॥ १५ ॥ १६ ॥ तदा नंदेन सत्कृता[1] रोहिणी च दिव्यवस्त्रालंकारादिभिर्भूषिता सती तत्रागतानां गोपिकादीनां सत्कारार्थं व्यचरत् ॥ १७ ॥ ॥ ॥ ॥

---

[1] तवात्रागमनयोगान्मम पुत्रो जातः । त्वं महाभाग्यवत्यसीत्यादिना सत्कृता ।

तद्दिनमारभ्य नंदस्य गोकुलं सर्वसमृद्धियुक्तं लक्ष्म्याः क्रीडास्थानं चाभूत् ॥१८॥ हे राजन्, एकदा नंदो गोकुलसंरक्षणार्थं गोपान् स्थापयित्वा कंसस्य प्रतिवर्षं देयं करं दातुं मथुरां गतः ॥१९॥ तदा वसुदेवो नंदमागतं श्रुत्वा राज्ञे दत्तकरं च ज्ञात्वा तस्य दर्शनार्थं तस्य वसतिस्थानं ययौ ॥२०॥ नंदस्तमागतं वसुदेवं दृष्ट्वोत्थाय प्रीतः सन् दोर्भ्यामालिंगितवान् ॥२१॥ ततस्तेन पूजितः कुशलं पृष्टश्च वसुदेवः सुखासीनो भूत्वेदमाह ॥ २२ ॥ हे भ्रातः, वयोवृद्धस्य तवाधुना पुत्रो जात इति मया श्रुतं तत्समीचीनं जातम् ॥२३॥ किंच । अत्र संसारचक्रे वर्तमानो भवान् मे प्राप्त एतद्दिष्ट्या । यतः प्रियस्य दर्शनं दुर्लभम् ॥२४॥ यथा नद्या ओघेन नीयमानानां तृणादीनामेकत्र स्थितिर्न घटते तथा विचित्रकर्मणां प्रियाणामेकत्र वासो न घटते ॥२५॥ हे नंद, यत्र त्वं गोपैः सहित आस्से तद्बृहद्वनं नाम

तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥१८॥ गोपान्गोकुलरक्षायां निरूप्य मथुरां गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥१९॥ वसुदेव उपश्रुत्य भ्रातरं नंदमागतम् ॥ ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनम् ॥२०॥ तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतम् ॥ प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः ॥२१॥ पूजितः सुखमासीनः पृष्ट्वाऽनामयमादृतः ॥ प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते ॥ २२ ॥ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥ २३ ॥ दिष्ट्या संसारचक्रेऽस्मिन्वर्तमानः पुनर्भवः ॥ उपलब्धो भवानद्य दुर्लभं प्रियदर्शनम् ॥ २४ ॥ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् ॥ ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥२५॥ कच्चित्पशव्यं निरुजं भूर्यंबुतृणवीरुधम् ॥ बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः॥ २६ ॥ भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे ॥ तातं भवंतं मन्वानो भवद्भ्यामुपलालितः ॥२७॥ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावितः ॥ न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥२८॥ नंद उवाच ॥ अहो ते देवकीपुत्राः कंसेन बहवो हताः ॥ एकाऽवशिष्टाऽवरजा कन्या सापि दिवं गता ॥२९॥ नूनं ह्यदृष्टनिष्ठोऽयमदृष्टपरमो जनः ॥ अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति ॥३०॥ वसुदेव उवाच ॥ करो वै वार्षिको दत्तो राज्ञे दृष्टा वयं च वः ॥ नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले ॥३१॥ श्रीशुक उवाच ॥ इति नंदादयो गोपाः प्रोक्तास्ते शौरिणा ययुः ॥ अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलम् ॥३२॥

इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे नंदवसुदेवसंगमो नाम पंचमोऽध्यायः ॥ ५ ॥ ॥

वनं कुशलं कच्चित् ॥२६॥ हे भ्रातः, मम सुतो मात्रा सह त्वां तातं मन्वानो गोकुले सुखी आस्ते कच्चित् ॥२७॥ हे नंद, पुरुषस्य बंधून्प्रति संपादितो यस्त्रिवर्गः स तेषु बंधुषु क्लिश्यमानेषु सत्सु सुखाय न कल्पते ॥२८॥ नंद उवाच ॥ अहो हे वसुदेव, तव पुत्राः कंसेन बहवो हताः । एका कन्याऽवशिष्टा सापि स्वर्गं गता ॥२९॥ हे भ्रातः, पुरुषस्य पुत्रादिसुखप्रदं दैवं यदा हीयते तदैव ते पुत्रादयो नश्यंति । यदा च दैवमनुकूलं भवति तदा वियुक्तानपि पुत्रादीन् पुनः संगमयति । अतस्त्वया दुःखं न भावनीयम् ॥३०॥ वसुदेव उवाच ॥ हे नंद, त्वया राज्ञे वार्षिकः करो दत्तः । युष्माभिर्वयं च दृष्टाः । अतोऽत्र बहुकालं न स्थातव्यम् । यतो गोकुले उत्पाताः संति ॥३१॥ श्रीशुक उवाच ॥ ततो नंदादयो गोपा वसुदेवोक्तं श्रुत्वा तमनुज्ञाप्य शकटैर्गोकुलं ययुः ॥३२॥ इति श्री० दश० पू० पंचमोऽध्यायः ॥५॥

षष्ठे सख्युर्गिरा नंदो व्रजं गच्छन् मृतां पथि । दृष्ट्वा तु राक्षसीं तस्या मृत्युं श्रुत्वाऽथ विस्मितः॥१॥श्रीशुक उवाच ॥ अथ नंदो वसुदेवस्य भाषणं न मिथ्या भविष्यतीति चिंतयन् मार्गे हरिं शरणं जगाम॥१॥ एतर्हि कंसेन प्रेषिता बालघातिनी पूतनाराक्षसी नगरग्रामगोकुलादिषु बालकान् घ्नंती सती चचार॥२॥ हे नृप, यत्र हरेः श्रवणकीर्तनादीनि न संति तत्रैव राक्षसादीनां शक्तिः प्रवर्तते । तदा साक्षात्तस्मिन् हरौ का राक्षसभयशंका । न कापि ॥३॥ सा राक्षसी पूतना एकदा स्त्रीवेषं धृत्वा गोकुले प्राविशत् ॥ ४ ॥ तां केशबंधसंसक्तमल्लिकापुष्पां कृशोदरीं रमणीयवस्त्रां कर्णभूषणकांत्या शोभितमुखाम् ॥५॥ सुंदरहास्यकटाक्षावलोकनादिभिर्व्रजौकसां मनो मोहयंतीं पतिदर्शनार्थं प्राप्तां लक्ष्मीमिव गोप्यो मेनिरे ॥६॥ ततः शिशून् विचिन्वती सा पूतना प्रारब्धयोगेन नंदगृहे

॥ श्रीशुक उवाच ॥ नंदः पथि वचः शौरेर्न मृषेति विचिंतयन् ॥ हरिं जगाम शरणमुत्पातागमशंकितः ॥ १ ॥ कंसेन प्रहिता घोरा पूतना बालघातिनी ॥ शिशूंश्चचार निघ्नंती पुरग्रामव्रजादिषु ॥ २ ॥ न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु ॥ कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि ॥३॥ सा खेचर्येकदोपेत्य पूतना नंदगोकुलम् ॥ योषित्त्वा माययाऽऽत्मानं प्राविशत्कामचारिणी ॥ ४ ॥ तां केशबंधव्यतिषक्तमल्लिकां बृहन्नितंबस्तनकृच्छ्रमध्यमाम् ॥ सुवाससं कंपितकर्णभूषणत्विषोल्लसत्कुंतलमंडिताननाम् ॥ ५ ॥ वल्गुस्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसाम् ॥ अमंसतांभोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिम् ॥ ६ ॥ बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नंदगृहेऽसदंतकम् ॥ बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि ॥ ७ ॥ विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः ॥ अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ ८ ॥ तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यांतरा कोशपरिच्छदासिवत् ॥ वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी ह्यतिष्ठताम् ॥ ९ ॥ तस्मिंस्तनं दुर्जरवीर्यमुल्बणं घोरांकमादाय शिशोर्ददावथ ॥ गाढं कराभ्यां भगवान्प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत् ॥ १० ॥ सा मुंच मुंचालमिति प्रभाषिणी निष्पीड्यमानाऽखिलजीवमर्मणि ॥ विवृत्य नेत्रे चरणौ भुजौ मुहुः प्रस्विन्नगात्रा क्षिपती रुरोद ह ॥ ११ ॥ तस्याः स्वनेनातिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा ॥ रसा दिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वज्रनिपातशंकया ॥ १२ ॥ ॥

दुष्टनाशकं बालं तल्पे शयानं ददर्श ॥ ७ ॥ तदा हरिर्बालकमारिकां तां ज्ञात्वापि निमीलितनेत्र आस । सा तं बालं गृहीत्वांऽकमारोपयत् ॥८॥ तदा निर्दयचित्तामपि मातुरिव प्रियचेष्टितां तां पूतनां निरीक्षमाणे तत्कांत्या चकिते च यशोदारोहिण्यावतिष्ठताम् । तां न निवारितवत्यौ ॥ ९ ॥ ततः सा घोरा बालकमंके निवेश्य तस्मै दुर्जरविषयुक्तं स्तनं ददौ । अथ क्रुद्धो भगवान् तं स्तनं हस्ताभ्या दृढं प्रपीड्य तस्याः प्राणैः सह पपौ ॥ १० ॥ तदा सर्वमर्मसु वेदनायुक्ता सा मुंच मुंचेति भाषिणी सती नेत्रे विवृत्य चरणौ च क्षिपंती घर्मव्याप्ता सती रुरोद ॥ ११ ॥ तस्याः शब्देन सपर्वता भूमिश्चकंप । सप्तपातालानि दिशश्च प्रतिध्वनियुक्ता बभूवुः ॥ तदा सर्वे जना वज्रपातशंकया भूमौ पेतुः ॥ १२ ॥ ॥ ॥ ॥ ॥

निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि ॥ प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप
॥ १३ ॥ पतमानोऽपि तद्देहस्त्रिगव्यूत्यंतरद्रुमान् ॥ चूर्णयामास राजेंद्र महदासीत्तदद्भुतम् ॥ १४ ॥ ईषामात्रोऽग्रदंष्ट्रास्यं गिरिकंदरनासिकम् ।
॥ गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजम् ॥ १५ ॥ अंधकूपगभीराक्षं पुलिनारोहभीषणम् ॥ बद्धसेतुभुजोर्वंघ्रिशून्यतोयह्रदोदरम् ॥ १६ ॥
संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरम् ॥ पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥ १७ ॥
बालं च तस्या उरसि क्रीडंतमकुतोभयम् ॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः ॥ १८ ॥ यशोदारोहिणीभ्यां ताः समं
बालस्य सर्वतः ॥ रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः ॥ १९ ॥ गोमूत्रेण स्नापयित्वा पुनर्गोरजसाऽर्भकम् ॥ रक्षां चक्रुश्च
शकृता द्वादशांगेषु नामभिः ॥ २० ॥ गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक् ॥ न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत
॥ २१ ॥ अव्यादजोंऽघ्रि मणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः ॥ हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं
मुखमुरुक्रम ईश्वरः कम् ॥ २२ ॥ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसी मधुहाऽजनश्च ॥ कोणेषु शंख उरुगाय
उपर्युपेंद्रस्ताक्ष्यर्ः क्षितौ हलधरः पुरुषः समंतात् ॥ २३ ॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु ॥ श्वेतद्वीपपतिश्चित्तं
मनो योगेश्वरोऽवतु ॥ २४ ॥ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः ॥ क्रीडंतं पातु गोविंदः शयानं पातु माधवः ॥ २५ ॥
व्रजंतमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः ॥ भुंजानं यज्ञभुक् पातु सर्वग्रहभयंकरः ॥ २६ ॥ ॥

इत्थं सा राक्षसी गतप्राणा सती मुखं विवृत्त्य केशचरणभुजान् प्रसार्य स्वेन राक्षसीरूपेण स्थिता सती वज्रेण ताडितो वृत्रासुर इव गोकुले पपात ॥१३॥ पतमानोऽपि तद्देहः षट्क्रोशमध्यवर्तिनो वृक्षान् चूर्णीचकार ॥१४॥ ततस्तत्कलेवरं गिरिकंदरनासिकं आरक्तप्रसृतकेशम् ॥ १५ ॥ अंधकूपवद्गंभीरनेत्रं जलहीनह्रदवदुदरयुक्तं सेतुबंधवत्प्रसृतभुजोरुचरणयुक्तं च दृष्ट्वा गोपा गोप्यश्च तत्रसुः ॥१६॥१७॥ ततस्तस्या उरसि क्रीडंतं बालं दृष्ट्वा गोप्यस्तत्रैत्य तं जगृहुः ॥१८॥ ततो यशोदारोहिणीभ्यां सह ता गोप्यो बालस्यांगेषु गोपुच्छभ्रमणादिभी रक्षणविधिं चक्रिरे ॥१९॥ ततस्तं गोप्यो गोमूत्रेण स्नापयित्वा गोरजसा गोमयेन च तस्य ललाटादिषु द्वादशांगेषु केशवादिद्वादशभिर्नामभी रक्षणविधिं चक्रिरे ॥२०॥ ततो गोप्य आचम्य स्वावयवेष्वेकादशबीजानां न्यासं कृत्वा बालकेऽपि तं न्यासं चक्रुः ॥२१॥ तमाह । हे कृष्ण, अजस्तव चरणौ रक्षतु। मणिमान् तव जानुनी पातु । यज्ञस्तवोरू पातु । अच्युतः कटितटं पातु। हयशिरा उदरं पातु । केशवो हृदयं पातु । ईश उरस्थलं पातु । इनः कंठं पातु । विष्णुर्भुजौ पातु । उरुक्रमो मुखं पातु । ईश्वरः शिरः पातु ॥ २२ ॥ तथा दिक्षु रक्षणविधिमकुर्वन् । तमाह। गदाधरो हरिः पश्चादस्तु । चापधरो मधुसूदनो दक्षिणेऽस्तु। खड्गधरोऽजनो वामेऽस्तु। शंखधर उरुगायश्चतुष्कोणेषु रक्षतु। उपेंद्र उपरि रक्षतु। ताक्ष्योंऽधो रक्षतु। हलधर आसमंतात्पातु॥२३॥ हृषीकेश इंद्रियाणि पातु। नारायणः प्राणान् रक्षतु। श्वेतद्वीपपतिश्चित्तं रक्षतु। योगेश्वरो मनो रक्षतु॥ २४॥ पृश्निगर्भो बुद्धिं रक्षतु । भगवानहंकारं रक्षतु । गोविंदः क्रीडंतं पातु । माधवः शयानं रक्षतु ॥२५॥ वैकुंठो व्रजंतं रक्षतु । श्रीपतिरासीनं रक्षतु । यज्ञभुक् भुं-

जानं रक्षतु ॥२६॥ तथा डाकिन्यो यातुधान्यो भूतप्रेतपिशाचादयः तथा कोटरा रेवती ज्येष्ठा पूतनादयोऽपस्मारादिरोगाः ॥२७॥२८॥ तथा ये स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ते सर्वे विष्णोर्नामग्रहणान्नश्यंतु ॥२९॥ श्रीशुक उवाच ॥ एवं गोपीभिः कृतरक्षणं सुतं यशोदा स्तनं पाययित्वा शाययामास ॥३०॥ तावन्नंदादयोगोपा गोकुलमेत्य पूतनादेहं दृष्ट्वा विस्मिता बभूवुः आहुश्च ॥ ३१ ॥ अहो नूनं वसुदेवो ऋषिर्जातः । यतः स यदाह सोऽयमुत्पातो दृष्टः ॥३२॥ ततो गोपाः परशुभिः पूतनादेहस्य खंडानि कृत्वा दूरे क्षिप्त्वा तानि च काष्ठवेष्टितानि कृत्वा न्यदहन् ॥३३॥ तस्माद्दह्यमानाद्देहादगुरुतुल्यो धूम उत्पन्नः ॥३४॥ एवं सा राक्षसी जिघांसयापि हरये स्तनं दत्वा सद्गतिं प्राप ॥ ३५ ॥ किं पुनः श्रद्धया भक्त्या कृष्णस्य प्रियं कुर्वन् सद्गतिं प्राप्नोतीति वक्तव्यम् ॥ ३६ ॥

डाकिन्यो यातुधान्यश्च कूष्मांडा येऽर्भकग्रहाः ॥ भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥२७॥ कोटरा रेवती ज्येष्ठा पूतनामातृकादयः ॥ उन्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः ॥२८॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये ॥ सर्वे नश्यंतु ते विष्णोर्नामग्रहणभीरवः ॥ २९ ॥ श्रीशुक उवाच ॥ इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम् ॥ पापयित्वा स्तनं माता संन्यवेशयदात्मजम् ॥ ३० ॥ तावन्नंदादयो गोपा मथुराया व्रजं गताः ॥ विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ॥ ३१ ॥ नूनं बतर्षिः संजातो योगेशो वा समास सः ॥स एव दृष्टो ह्युत्पातो यदाहानकदुंदुभिः ॥३२॥ कलेवरं परशुभिश्छित्त्वा तत्ते व्रजौकसः ॥ दूरे क्षिप्त्वाऽवयवशो न्यदहन्काष्ठवेष्टितम् ॥ ३३ ॥ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः ॥ उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥ पूतना लोकबालघ्नी राक्षसी रुधिराशना ॥ जिघासयापि हरये स्तनं दत्त्वाप सद्गतिम् ॥ ३५ ॥ किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ॥ यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ॥३६॥ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः॥ अंगं यस्याः समाक्रम्य भगवानपिबत्स्तनम् ॥ ३७ ॥ यातुधान्यपि सा स्वर्गमवाप जननीगतिम् ॥ कृष्णभुक्तस्तनक्षीरा किमु गावो नु मातरः ॥ ३८ ॥ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलम् ॥ भगवान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥३९ ॥ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम् ॥ न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ॥ ४० ॥ कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः ॥ किमिदं कुत एवेति वदंतो व्रजमाययुः ॥ ४१ ॥ ते तत्र वर्णितं गोपैः पूतनागमनादिकम् ॥ श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ॥ ४२ ॥ नंदः स्वपुत्रमादाय प्रेत्यागतमुदारधीः ॥ मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ॥ ४३ ॥ ॥

भक्तहृदये स्थिताभ्यां पद्भ्यां यस्याः शरीरमाक्रम्य भगवान् स्तनं पपौ ॥ ३७ ॥ सा राक्षस्यपि मातुः प्राप्तुं योग्यं स्वर्गं प्राप । तदा कृष्णेन यासां स्तनपानं प्रेम्णा कृतं ता गावो मातरश्च स्वर्गं प्राप्नुवंतीति किमु वक्तव्यम् ॥ ३८ ॥ तर्हि यासां दुग्धानि मोक्षदो भगवान् पपौ तासां कृष्णे पुत्रस्नेहं कुर्वंतीनां गोगोपीनां अज्ञानसंभवः संसार एव पुनः प्राप्तुं योग्यो न भवति ॥३९॥४०॥ गोपास्तु चिताधूमस्य सुगंधमाघ्राय किमिदमिति वदंतो गोकुलमाययुः ॥ ४१ ॥ ततस्ते गोपैर्वर्णितं पूतनाऽऽगमनादिकं तस्या मृत्युं शिशोः कुशलं च श्रुत्वा विस्मिता आसन् ॥४२॥ ततो नंदः स्वपुत्रं प्रेत्यागतमिव गृहीत्वा मूर्ध्न्यवघ्राय परमं

हर्षं लेभे॥४३॥हे नृप, यः पुरुषः श्रद्धया एतत्पूतनामोक्षरूपं श्रीकृष्णस्य बालचरितं श्रृणुयात्स गोविंदे प्रीतिं लभते॥४४॥इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वार्धे षष्ठोऽध्यायः ॥६॥ ॥ उत्क्षिपन् शकटं व्योम्नि तृणावर्तमधः क्षिपन् । दर्शयन् विश्वमास्ये च कृष्णः क्रीडति सप्तमे॥१॥राजोवाच ॥ हे ब्रह्मन्, भगवान् मत्स्याद्यवतारैर्यानि यानि चरितानि करोति तानि तानि नः कर्णसुखानि मनोवेधकानि च भवंति ॥१॥ हे शुक, यच्चरितं श्रृण्वतः पुंसो मनोग्लानिर्गच्छति । चित्तशुद्धिर्हरौ भक्तिर्भगवद्भक्तसख्यं च भवंति तद्धरेश्चरितं मे वद ॥२॥ अथ अन्यदपि कृष्णस्य बालचरितं मे वद ॥३॥ श्रीशुक उवाच ॥ हे नृप, एकदा कृष्णस्यांगपरिवर्तनसमये करणीये उत्सवाभिषेके तथा तस्मिन्नेव दिने जन्मनक्षत्रयोगे च सति मिलितानां स्त्रीणां मध्ये यशोदा सुगंधतैललेपनादिना

य एतत्पूतनामोक्षं कृष्णस्याभर्कमद्भुतम् ॥ शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिम् ॥४४॥इतिश्रीमद्भा०महा०दशम ०षष्ठोऽध्यायः ॥ ६ ॥ राजोवाच ॥ येन येनावतारेण भगवान्हरिरीश्वरः ॥ करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो ॥ १ ॥ यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्वं च शुध्यत्यचिरेण पुंसः ॥ भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत् ॥ २ ॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम् ॥ मानुषं लोकमासाद्य तज्जातिमनुरुंधतः ॥ ३ ॥ श्रीशुक उवाच ॥ कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषिताम् ॥ वादित्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती ॥ ४ ॥ नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः ॥ ५ ॥ औत्थानिकौत्सुक्यमना मनस्विनी समागतान्पूजयती व्रजौकसः ॥ नैवाश्रृणोद्वै रुदितं सुतस्य सा रुदंस्तनार्थी चरणावुदक्षिपत् ॥ ६ ॥ अधःशयानस्य शिशोरनोऽल्पकप्रवालमृद्वंघ्रिहतं व्यवर्तत ॥ विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम् ॥ ७ ॥ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः ॥ नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ॥ (इति ब्रुवंतोऽतिविवादमोहिता जनाः समंतात्परिवव्रुरार्तवत्) ॥८॥ ऊचुरव्यवसितमतीन्गोपान्गोपीश्च बालकाः ॥ रुदताऽनेन पादेन क्षिप्तमेतन्न संशयः ॥ ९ ॥ न ते श्रद्दधिरे गोपा बालभाषितमित्युत ॥ अप्रमेयं बलं तस्य बालकस्य न ते विदुः ॥१०॥ रुदंतं सुतमादाय यशोदा ग्रहशंकिता ॥ कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥११॥ ॥ ॥

वाद्यगीतादिभिः सह कृष्णस्याभिषेचनं चकार ॥४॥ ततो यशोदाऽन्नदानादिना पूजितैर्विप्रैः कृतस्वस्त्ययनं पुत्रं प्राप्तनिद्रं ज्ञात्वा शकटाधः प्रेंखे शायितवती ॥५॥ ततः सा तस्मिन्नुत्सवे प्राप्तानां गोपीनां संमानं कुर्वती सती कृष्णरोदनं ना श्रृणोत् । तदा स्तनपानार्थी कृष्णः पादावूर्ध्वं चालितवान् ॥ ६ ॥ ततः शकटाधःशयानस्य शिशोः पादताडितं तच्छकटं विध्वस्तनानारसकुप्यपात्रं भूत्वा न्युब्जं पपात ॥७॥ ततो यशोदाद्या गोप्यो नंदादयो गोपाश्च तदद्भुतं दृष्ट्वा शकटं कथं विपरीतं पपात । (इति ब्रुवंतः संतः शकटमासमंतात्परिवव्रुः)॥८॥तदा तत्र खेलंतो बालका अनेन रुदता कृष्णेन स्वचरणप्रहारेणेदं पातितमित्याहुः ॥९॥ तद्बालभाषितं गोपादयः सत्यं न मेनिरे । यतो बालस्याप्रमेयं बलं ते न विदुः ॥१०॥ ततो यशोदा रुदंतं शिशुं गृहीत्वा ग्रहपीडाशंकिता भूत्वा

विप्रैः कृताशीर्वचनं तं पुत्रं स्तनमपाययत् ॥११॥ ततो गोपैः शकटं पूर्ववत् स्थापितम् । ततो विप्रा ग्रहादिहोमं कृत्वा शकटं दध्यक्षतादिभिः पूजयामासुः ॥१२॥ किंच । ये विप्रा मिथ्याभाषणहिंसादंभादिरहितास्तेषामाशिषो व्यर्था न भवेयुरित्यभिप्रेत्य नंदगोपः पुत्रं स्वपुरतो गृहीत्वा विप्रद्वारा ऋग्यजुःसामवेदमंत्राभिमंत्रितजलैरभिषेच्य ॥१३॥१४॥ स्वस्त्ययनं वाचयित्वा पुत्रोदयार्थं विप्रेभ्यः षड्रसयुक्तमन्नं सर्वगुणयुक्ता गाश्च प्रादात् । ततस्ते विप्रा आशिषो युयुजुः ॥१५॥१६॥ ताविप्रैरुक्ता आशिषो निष्फलाः कदाचिदपि न भवंति ॥१७॥ अथैकदा यशोदा स्वोत्संगे स्थितं सुतं लालयंती सती शिशोर्भारं वोढुं न सेहे ॥१८॥ ततो यशोदा विस्मिता सती तं भुवि निधाय तत्कल्याणार्थमीश्वरं ध्यात्वा गृहकर्मसु प्रवृत्ता ॥१९॥ तावत्कंसप्रेरितस्तृणावर्तनामा दैत्यश्चक्रवातस्वरूपेणागत्य गोकुलं

पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदम् ॥ विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः ॥ १२ ॥ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः ॥ न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥ १३ ॥ इति बालकमादाय सामग्र्यजुरुपाकृतैः ॥ जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥ १४ ॥ वाचयित्वा स्वस्त्ययनं नंदगोपः समाहितः ॥ हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणम् ॥ १५ ॥ गावः सर्वगुणोपेता वासःस्रग्रुक्ममालिनीः ॥ आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुंजत ॥ १६ ॥ विप्रा मंत्रविदो युक्तास्तैर्याः प्रोक्तास्तथाऽऽशिषः ॥ ता निष्फला भविष्यंति न कदाचिदपि स्फुटम् ॥ १७ ॥ एकदा रोहमारूढं लालयंती सुतं सती ॥ गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् ॥ १८ ॥ भूमौ निधाय तं गोपी विस्मिता भारपीडिता ॥ महापुरुषमादध्यौ जगतामास कर्मसु ॥ १९ ॥ दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रणोदितः ॥ चक्रवातस्वरूपेण जहारासीनमर्भकम् ॥ २० ॥ गोकुलं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणुभिः ॥ ईरयन्सुमहाघोरशब्देन प्रदिशो दिशः ॥२१॥ मुहूर्तमभवद्गोष्ठं रजसा तमसाऽऽवृतम् ॥ सुतं यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः ॥ २२ ॥ नापश्यत्कश्चनात्मानं परं चापि विमोहितः ॥ तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः ॥ २३ ॥ इति खरपवनचक्रपांसुवर्षे सुतपदवीमबलाऽविलक्ष्य माता ॥ अतिकरुणमनुस्मरंत्यशोचद्भुवि पतिता मृतवत्सका यथा गौः ॥ २४ ॥ रुदितमनु निशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ॥ रुरुदुरनुपलभ्य नंदसूनुं पवन उपारतपांसुवर्षवेगे ॥ २५ ॥ तृणावर्तः शांतरयो वात्यारूपधरोऽहरन् ॥ कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभारभृत् ॥ २६ ॥ तमश्मानं मन्यमान आत्मनो गुरुमत्तया ॥ गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकम् ॥२७॥ ॥ ॥ ॥

रजोभिर्व्यापयन् दिशश्च घोरशब्देन नादयन्नासीनं शिशुमाकाशे नीतवान् ॥ २० ॥ २१ ॥ तदा मुहूर्तपर्यंतं गोकुलं रजस्तमोभ्यां व्याप्तमभूत् । तदा यशोदा यत्र सुतं न्यस्तवती तत्र नापश्यत् ॥२२॥ तदा तृणावर्तोत्पादितधूल्या पीडितो जनः कोप्यात्मानं परं च नापश्यत् ॥२३॥ एवं वायुचक्राद्रजोवृष्टौ जातायां सत्यां यशोदा सुतमार्गं न ज्ञात्वा मृतवत्सा गौरिव भुवि निपत्य शुशोच ॥२४॥ ततः पांसुवृष्टियुक्ते वायौ शांते सति यशोदाया रोदनं श्रुत्वा तत्रागता अश्रुपूर्णमुख्यो गोप्यस्तदनु रुरुदुः ॥२५॥ स दैत्यः कृष्णं हरन् आकाशं गतोऽपि ततः परं जडं जातं कृष्णं गृहीत्वा मथुरां गंतुं नाशक्नोत् ॥२६॥ स कृष्णं पर्वतप्रायं मन्यमानः

कृष्णेन गले धृतश्च सन् तं त्यक्तुं नाशक्नोत् ॥२७॥ किंच । गलग्रहणान्निश्चेष्टो बहिर्निर्गतलोचनो दैत्यो गतप्राणः सन् बालेन सह व्रजे शिलायां पपात ॥२८॥ तदा आकाशाच्छिलायां पतितं विशीर्णावयवं दैत्यं रुदत्यः स्त्रियो दृष्ट्वा ॥२९॥ तस्योरसि लंबमानं कृष्णं च दृष्ट्वा तं शीघ्रं गृहीत्वा यशोदायै समर्प्य गोप्यो गोपाश्च लब्धमनोरथा भूत्वा हर्षं प्रापुराहुश्च ॥३०॥ अहो एष बालो दैत्येन मृत्युं प्रापितोऽपि पुनः प्राप्तः । अन्ये तानाहुः । हिंस्रः स्वपापेनैव मृतः । साधुस्तु सर्वत्र समदृष्ट्या भयान्मुच्यते ॥३१॥ किंच । अस्माभिस्तपःपूजनादि किं कृतम् । यतो मृतोऽपि बालो हर्षयन् पुनः प्राप्तः ॥३२॥ एवं बहून्यद्भुतानि नंदो दृष्ट्वा पुनः पुनर्वसुदेवभाषणं सत्यमिति मानयामास ॥३३॥ अथैकदा यशोदा सुतं स्वांकमारोप्य स्तनं पाययामास ॥ ३४ ॥ तदा पीतप्रायस्तनस्य तस्य

गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ॥ अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे ॥२८॥ तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालम् ॥ पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः समेताः ॥२९॥ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लंबमानम् ॥ तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तम् ॥ गोप्यश्च गोपाः किल नंदमुख्या लब्ध्वा पुनः प्रापुरतीव मोदम् ॥३०॥ अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः ॥ हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते ॥ ३१ ॥ किं नस्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तमुत भूतसौहृदम् ॥ यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधून्प्रणयन्नुपस्थितः ॥३२॥ दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने ॥ वसुदेववचो भूयो मानयामास विस्मितः ॥३३॥ एकदाऽर्भकमादाय स्वांकमारोप्य भामिनी ॥ प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥३४॥ पीतप्रायस्य जननी सा तस्य रुचिरस्मितम् ॥ मुखं लालयती राजन् जृंभतो ददृशे इदम् ॥३५॥ खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि॥३६॥ सा वीक्ष्य विश्वं सहसा राजन्संजातवेपथुः ॥ संमील्य मृगशावाक्षी नेत्रे आसीत्सुविस्मिता ॥३७॥ इति श्रीमद्भा० म० द० पू० तृणावर्तमोक्षो नाम सप्तमोऽध्यायः॥७॥ ॥ श्रीशुक उवाच ॥ गर्गः पुरोहितो राजन्यदूनां सुमहातपाः ॥ व्रजं जगाम नंदस्य वसुदेवप्रचोदितः ॥१॥ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः ॥ आनर्चाधोक्षजधिया प्रणिपातपुरःसरम् ॥ २ ॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिम् ॥ नंदयित्वाऽब्रवीद्ब्रह्मन्पूर्णस्य करवाम किम् ॥३॥

जृंभतः सतो मुखं लालयंती सती तत्रेदं जगद्ददृशे ॥३५॥ तदाह । आकाशं स्वर्गं भूमिं ज्योतिश्चक्रं दिशः सूर्यचंद्राग्निवायुवरुणान् द्वीपपर्वतनदीर्वनानि चराचराणि भूतानि॥३६॥हे राजन्, एवं सा विश्वं वीक्ष्य भयात्कंपयुक्ता सती नेत्रे निमील्य विस्मिता आसीत् ॥३७॥ इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वा० सप्तमोऽध्यायः ॥ ७ ॥ ॥ अष्टमे नामकर्मास्य बालक्रीडाकुतूहले । मृद्भक्षणादियोगे च विश्वरूपं निरूप्यते ॥१॥ श्रीशुक उवाच ॥ हे राजन्, वसुदेवेन पुत्रयोर्नामकरणार्थं प्रेरितो यादवपुरोहितो गर्गो नंदस्य गोकुलं जगाम ॥ १ ॥ नंदस्तं दृष्ट्वोत्थाय कृतांजलिः सन् ईश्वरबुद्ध्या पूजयामास ॥ २॥ एवं कृतातिथ्यं मुनिं स जगाद । हे ब्रह्मन्, पूर्णमनोरथस्य तव वयं किं करवाम ॥ ३ ॥ ॥ ॥ ॥

त्वादृशां महतां स्वाश्रमादन्यत्र गमनं न स्वार्थं किंतु गृहस्थाश्रमिणां कल्याणार्थं भवति ॥४॥ किंच । त्वया अतींद्रियज्ञानसाधनं ज्योतिःशास्त्रं कृतम् । येन पुमान् भूतं भविष्यं च फलं वेत्ति ॥५॥ त्वं ब्रह्मविदां श्रेष्ठोऽसि । अतो मे पुत्रयोर्नामकर्मादिसंस्कारान् कर्तुमर्हसि । यतो ब्राह्मणः सर्वेषां गुरुरस्ति ॥ ६ ॥ गर्ग उवाच ॥ हे नंद, अहं यदूनामाचार्य इति सदा विख्यातोऽस्मि । मया संस्कारे कृते तव पुत्रं कंसो देवकीसुतमिति कल्पयेत् ॥ ७ ॥ किंच । पापबुद्धिः कंसो देवकीकन्यावचः श्रुत्वा देवक्या अष्टमो गर्भः स्त्री भवितुं नार्हतीति चिंतयन् तव वसुदेवस्य च सख्यं ज्ञात्वाऽत्रागत्य यदि पुत्रं हनिष्यति तर्ह्यस्माकं महानन्यायः स्यात् ॥८॥९॥ नंद उवाच ॥ हे नंद, त्वमेकांते मामकैरप्यलक्षितः सन् स्वस्तिवाचनपूर्वकं अनयोः पुत्रयोर्द्विजातिसंस्कारं कुरु ॥ १० ॥ श्रीशुक

महद्विचलनं नृणां गृहिणां दीनचेतसाम् ॥ निःश्रेयसाय भगवन्कल्पते नान्यथा क्वचित्॥४॥ ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतींद्रियम् ॥ प्रणीतं भवता येन पुमान्वेद परावरम्॥५॥ त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान्कर्तुमर्हसि ॥ बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ॥६॥ गर्ग उवाच ॥ यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा ॥ सुतं मया संस्कृतं ते मन्यते देवकीसुतम्॥७॥ कंसः पापमतिः सख्यं तव चानकदुंदुभेः ॥ देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥८॥ इति संचिंतयन् श्रुत्वा देवक्या दारिकावचः॥ अपि हंता गताशंकस्तर्हि तन्नोऽन्यो भवेत् ॥९॥ नंद उवाच ॥ अलक्षितोऽस्मिन्रहसि मामकैरपि गोव्रजे ॥ कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकम् ॥१०॥ श्रीशुक उवाच ॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् ॥ चकार नामकरणं गूढो रहसि बालयोः ॥११॥ गर्ग उवाच ॥ अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः॥ आख्यास्यते राम इति बलाधिक्याद्बलं विदुः॥ यदूनामपृथग्भावात्संकर्षणमुशंत्युत ॥१२॥ आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥१३॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥१४॥ बहूनि संति नामानि रूपाणि च सुतस्य ते॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १५ ॥ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ ॥ १६ ॥ पुरानेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥१७॥ ॥

उवाच ॥ एवं प्रार्थितो गर्गः स्वस्य कर्तुमिष्टं बालयोर्नामकरणं रहसि चकार ॥११॥ गर्ग उवाच ॥ हे नंद, अयं रोहिणीपुत्रो गुणैः सुहृदो रमयन् राम इत्याख्यास्यते । इमं बलाधिक्याद्बलं यदूनामपृथग्भावात्संकर्षणं च वक्ष्यंति ॥१२॥ किंच । अस्य पुत्रस्य शुक्लो रक्तः पीतश्चेति त्रयो वर्णाः पुरा कृतयुगादावासन् । इदानीं तु कृष्णतां गतः । अतः कृष्ण इत्येकं नाम स्यात् ॥१३॥ किंच । अयं तवात्मजः पूर्वं वसुदेवस्य क्वचिज्जातः । अतो वासुदेव इति वदंति ॥१४॥ अस्य गुणे[2]कर्मानुरूपाणि नामानि बहूनि संति । तानि सर्वाणि अहं न वेद्मि । जना अपि न विदुः ॥१५॥ अयं कृष्णो वः कल्याणं करिष्यति । अनेन च सर्वदुःखानि यूयमनायासेन तरिष्यथ ॥१६॥ किंच । पुरा वेनराज्ञि मृते सति चौरपीडिताः साधवोऽनेन रक्ष्यमाणाः संतश्चौरान् जिग्युः ॥ १७ ॥ ॥

---

१ कुतश्चिद्धेतोर्विप्रतिपद्यमानानां यादवानामन्योन्यशिक्षया सर्वैकमत्यकरणात् । २ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि । कर्मानुरूपाणि गोपतिर्गोवर्धनोद्धरण इत्यादीनि ।

तथा च ये पुरुषा अस्मिन् प्रीतिं कुर्वंति तेषां शत्रवः पराभवं न कुर्वंति ॥ १८ ॥ तस्मात् हे नंद, अयं तवात्मजो गुणैरैश्वर्येण कीर्त्या च नारायणसमः । अत एनं पालयस्व ॥१९॥ एवं नंदं कथयित्वा गर्गे स्वगृहं गते सति नंदो हर्षितः सन् आत्मानं पूर्णमनोरथं मेने ॥२०॥ ततः स्वल्पेन कालेन गोकुले रामकृष्णौ हस्तसहिताभ्यां जानुभ्यां रिंगमाणौ संतौ विजह्रतुः ॥२१॥ ततो गोकुलकर्दमेषु कटिपादभूषणनादेन हृष्टमनसौ संतौ इतस्ततो गच्छंतं जनं त्रिचतुराणि पदान्यनुगम्य भीतवद्यशोदारोहिण्योः समीपमाजग्मतुः ॥ २२ ॥ तदा ते मातरौ तौ सुतौ हस्ताभ्यामालिंग्य मुखे स्तनं दत्वाऽल्पदशनं तयोर्मुखं वीक्ष्य मुदं ययतुः ॥२३॥ यदा तौ रामकृष्णौ स्त्रीणां दर्शनीयकुमारलीलौ जातौ तदा गोकुलमध्ये ताभ्यां धृतपुच्छैर्वत्सैरितस्तत आकृष्टौ तौ दृष्ट्वा गोप्यो हर्षिता आसन् ॥२४॥

य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः ॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥ १८ ॥ तस्मान्नंदात्मजोऽयं ते नारायणसमो गुणैः ॥ श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः ॥१९॥ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते ॥ नंदः प्रमुदितो मेन आत्मानं पूर्णमाशिषाम् ॥ २० ॥ कालेन व्रजताऽल्पेन गोकुले रामकेशवौ ॥ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः ॥ २१ ॥ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु ॥ तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंति मात्रोः ॥ २२ ॥ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगुह्य दोर्भ्याम् ॥ दत्त्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्रमोदम् ॥ २३ ॥ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः ॥ वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः ॥ २४ ॥ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुम् ॥ गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थाम् ॥ २५ ॥ कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले ॥ अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा ॥ २६ ॥ ततस्तु भगवान्कृष्णो वयस्यैर्व्रजबालकैः ॥ सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम् ॥ २७ ॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम् ॥ शृण्वत्याः किल तन्मातुरिति होचुः समागताः ॥ २८ ॥ वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः ॥ मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे स गृहकुपितो यात्युपक्रोश्य तोकान् ॥ २९ ॥ ॥

किंच । यदा तज्जनन्यौ तौ क्रीडातत्परावतिचपलौ स्वसुतौ पश्वग्निखड्गजलपक्षिकंटकेभ्यो निषेद्धुं गृहकृत्यानि च कर्तुं न शेकाते। तदा ते मातरौ गृहसौख्यस्य परां काष्ठां प्रापतुः ॥ २५ ॥ हे राजर्षे, ततः स्वल्पेन कालेन रामकृष्णौ अघृष्टजानुभिः पद्भिर्विचक्रमतुः ॥ २६ ॥ ततः कृष्णो व्रजबालकै रामेण च सह स्त्रीणां हर्षं जनयन् चिक्रीडे ॥ २७ ॥ तदा गोप्यः श्रीकृष्णस्य कौमारचापलं वीक्ष्य यशोदायाः समीपमेत्यैवं जगदुः ॥ २८ ॥ हे यशोदे, अयं कृष्णोऽकाले वत्सान् मुंचति । अथ कल्पितैश्चौर्योपायैर्दधि पयश्चात्ति । मर्कटेभ्यो ददाति च । तेषां मध्ये तृप्तत्वेन कोऽपि न भक्षयति चेत्तर्हि भांडं भिनत्ति । दध्यादेरलाभे सति गृहं दग्धं करिष्यामीति क्रुद्धः सन् बालान् रोदयित्वा याति ॥ २९ ॥ ॥ ॥

हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ॥ ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ॥३०॥ एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ॥ इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी नह्युपालब्धुमैच्छत् ॥३१॥ एकदा क्रीडमानास्ते रामाद्या गोपदारकाः ॥ कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥३२॥ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी ॥ यशोदा भयसंभ्रांतप्रेक्षणाक्षमभाषत ॥३३॥ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः॥ वदंति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययम् ॥३४॥ नाहं भक्षितवानंब सर्वे मिथ्याऽभिशंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥३५॥ यद्येवं तर्हि व्यादेहीत्युक्तः स भवान्हरिः ॥ व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥३६॥ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः॥सादिद्वीपाब्धिभूगोलं सवाय्वग्नींदुतारकम् ॥३७॥ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च ॥ वैकारिकाणींद्रियाणि मनोमात्रा गुणास्त्रयः ॥३८॥ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदम् ॥ सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं महात्मानमवाप शंकाम् ॥३९॥ किं स्वप्न एतदुत देवमाया किंवा मदीयो बत बुद्धिमोहः ॥ अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥४०॥ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा ॥ यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदम् ॥४१॥ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती ॥ गोप्यश्च गोपाः सहगोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ॥४२॥

तथा यदा तुंगशिक्यस्थभांडेषु हस्तस्पर्शो न भवेत् तदा पीठकोलूखलाद्यैर्विधिं प्रकल्प्य तेषु छिद्रं रचयति । यदा चांधकारयुक्ते गृहे भांडानि स्थाप्यंते तदा कृष्णो धृतमणिगणं स्वांगमेवार्थप्रदीपं कृत्वा तानि पश्यति ॥ ३० ॥ यदा च रे रे चोर, इत्याक्षिप्तो भवति तदा त्वमेव चोरोऽहं गृहस्वामीति जल्पति । एवं धार्ष्ट्यानि कुरुते । तथा स्वर्चिते गृहे मूत्रपुरीषोत्सर्गादीनि कृत्वा त्वत्समीपं साधुरिवास्ते । एवं क्रुद्धानां गोपीनां वचः श्रुत्वापि यशोदा प्रहसितमुखी सती तमाक्षेप्तुं नैच्छत् ॥३१॥ अथैकदा क्रीडमाना रामादिगोपपुत्राः कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥३२ ॥ सा कृष्णं करे धृत्वा निर्भर्त्स्य भीतं तमाह ॥३३॥ हे कृष्ण, कस्मात्त्वं मृदं भक्षितवान् । एते बाला बलरामोऽपि वदति ॥३४॥ तदा कृष्ण आह । हे मातः, अहं मृदं न भक्षितवान् । एते मिथ्या वदंति। यदि सत्यगिरस्तर्हि मे मुखं समक्षं पश्य ॥३५॥ एवं चेत्तर्हि मुखं प्रसारयेति मात्रोक्ते हरिर्मुखं प्रसारितवान् ॥३६॥ ततः सा तन्मुखे विश्वं ददर्श । तदाह। स्थावरं जंगमं आकाशं दिशः पर्वतद्वीपसहितं भूर्लोकं तारागणसहितं चंद्रम् ॥३७॥ पंचमहाभूतानि इंद्रियाणि शब्दादिविषयान् गुणत्रयम् ॥३८॥ जीवकालस्वभावसहितमेतत्सर्वं जगत् पुत्रस्य विदारिते स्वल्पे मुखे दृष्ट्वा तत्र च स्वसहितं गोकुलं दृष्ट्वा शंकां प्राप्ता सत्याह ॥३९॥ अहो अयं किं स्वप्नः उत देवमाया किंवा मदीय एव कश्चिद्बुद्धिमोहः। अथवास्य ममार्भकस्य स्वाभाविकमैश्वर्यम् ॥४०॥ इत्युक्त्वा चरमं पक्षं गृहीत्वा कृष्ण ईश्वर इति निश्चित्य जगाद। यस्याश्रयेणेदं जगत्प्रतीयते तत्पदमहं प्रणतास्मि ॥४१॥ तथा यन्मायया ममासौ पतिरेष मे सुत इमा गोप्यो गोपाश्च ममैवेति कुबुद्धिर्भवति स मे गतिः स्यात् ॥ ४२ ॥ ॥

एवं ज्ञाततत्त्वायां यशोदायां सत्यां कृष्णः पुत्रस्नेहमयीं स्वमायां व्यतनोत् ॥४३॥ तथा नष्टस्मृतिर्गोपी तमंकमारोप्य पूर्ववदासीत् ॥४४॥ किंच । सा यशोदा वेदोपनिषदादिभिर्गीयमानमाहात्म्यं हरिं पुत्रमिति मेने ॥४५॥ राजोवाच ॥ हे ब्रह्मन्, नंद एवं महोदयं श्रेयः किं चकार । तथा यशोदा च । यस्याः स्तनं हरिः पपौ ॥४६॥ किंच । रामकृष्णयोर्बालचरितं तत्पितरौ देवकीवसुदेवौ न ज्ञातवंतौ । एवंविधं पुण्यं नंदयशोदाभ्यां किं कृतम् ॥४७॥ श्रीशुक उवाच ॥ हे नृप, अष्टवसूनां मध्ये द्रोणो नाम वसुर्धरानाम्न्या भार्यया सह ब्रह्मणो गोपालादिलक्षणामाज्ञां करिष्यमाणः सन् तमाह ॥ ४८ ॥ हे ब्रह्मन्, आवयोर्भुवि जातयोः सतोर्हरौ भक्तिः स्यादेवं प्रसादं कुरु ॥४९॥ ततो ब्रह्मणा तथेत्युक्तः स द्रोणो गोकुले नंद इति नाम्ना जज्ञे । तत्पत्नी च यशोदेति नाम्ना जज्ञे ॥५०॥

इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः ॥ वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥४३॥ सद्यो नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजम् ॥ प्रवृद्धस्नेहकलिलहृदयाऽऽसीद्यथा पुरा ॥४४॥ त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः ॥ उपगीयमानमाहात्म्यं हरिं सा मन्यतात्मजम् ॥४५॥ राजोवाच ॥ नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम् ॥ यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥४६॥ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितम् ॥ गायंत्यद्यापि कवयो यल्लोकशमलापहम् ॥४७॥ श्रीशुक उवाच ॥ द्रोणो वसूनां प्रवरो धरया सह भार्यया ॥ करिष्यमाण आदेशान्ब्रह्मणस्तमुवाच ह ॥४८॥ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ ॥ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ॥४९॥ अस्त्वित्युक्तः स भगवान्व्रजे द्रोणो महायशाः ॥ जज्ञे नंद इति ख्यातो यशोदा सा धराऽभवत् ॥५०॥ ततो भक्तिर्भगवति पुत्रीभूते जनार्दने ॥ दंपत्योर्नितरामासीद्गोपगोपीषु भारत ॥५१॥ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः ॥ सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥५२॥ इति श्री० म० द० पू० विश्वरूपदर्शनेऽष्टमोऽध्यायः ॥८॥

॥ श्रीशुक उवाच ॥ एकदा गृहदासीषु यशोदा नंदगेहिनी ॥ कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि ॥ १ ॥ यानि यानीह गीतानि तद्बालचरितानि च ॥ दधिनिर्मंथने काले स्मरंती तान्यगायत ॥ २ ॥ क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः ॥ रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ ॥ ३ ॥ तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः ॥ गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ॥ ४ ॥ ॥

तस्मात्पुत्रीभूते हरौ तयोर्दंपत्योर्भक्तिरासीत् ॥५१॥ कृष्णोऽपि ब्रह्मणा प्रोक्तं सत्यं कर्तुं सहरामो गोकुले वसन् स्वलीलया तेषां प्रीतिं चक्रे ॥५२॥ इति श्रीम० चू० दश० पू० अष्टमोऽध्यायः ॥८॥ ॥ नवमे पय उत्सिक्ते मत्वा गोप्यथ तत्कृतम् । विलोक्य भांडभंगादि कृष्णं दाम्ना बबंध तम् ॥१॥ श्रीशुक उवाच ॥ एकदा गृहदासीषु इतरकर्मसु नियुक्तासु सतीषु यशोदा स्वयं दधिमंथनं चकार ॥१॥ तदा पुत्रस्य यानि बालचरित्राणीह लोके गीतानि तानि स्मरंती सत्यगायत ॥ २ ॥ हे नृप, सा कटितटे सूत्रबद्धं क्षौमं वस्त्रं बिभ्रती तथा स्नेहस्नुतं स्तनयुग्मं रज्ज्वाकर्षणेन श्रमयुक्तभुजयोश्चलत्कंकणौ कर्णयोः कुंडले स्वेदयुक्तं मुखं च बिभ्रती सती दधि ममंथ ॥ ३ ॥ तदा स्तनपानकामो हरिस्तां प्राप्य दधिमंथानं धृत्वा न्यषेधत् ॥ ४ ॥ ॥

तदा सा तमंकमारोप्य सस्मितं तस्य मुखं वीक्षती सती स्तनमपाययत् । तदा चुल्ल्यां स्थापिते दुग्धे तापेनोद्रिच्यमाने सत्यतृप्तं पुत्रं हित्वा शीघ्रं तस्योत्तारणार्थं ययौ ॥५॥ तदा कृष्णः क्रुद्धः सन् मंथनपात्रं पाषाणेन भित्वांऽतर्गृहं गत्वा नवनीतमभक्षयत् ॥६॥ ततो गोपी पय उत्तार्य पुनर्मंथनस्थलमेत्य दधिभांडं भग्नं दृष्ट्वा तत्पुत्रकर्म ज्ञात्वा कृष्णं च तत्र न दृष्ट्वा जहास ॥७॥ ततः परिवर्तितस्योलूखलस्योपरि स्थितं शिक्यस्थं नवनीतं मर्कटाय ददंतं चौर्यशंकितेक्षणं कृष्णं दृष्ट्वा शनैः पृष्ठत आजगाम ॥८॥ ततः कृष्णो धृतयष्टिं यशोदां वीक्ष्योलूखलादुत्तीर्य भीतवत्पलायामास । तदा गोपी योगिनामपि तपसा तदाकारतां नीतं मनो यं न प्राप तमन्वधावत् ॥९॥ एवं कृष्णमनुगच्छंती कटिपश्चाद्भागभारेण स्तंभितगतिर्यशोदा दुःखेन तं धृतवती ॥ १० ॥ ततः कृतापराधं रुदंतं भयेन

तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखम् ॥ अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ॥५॥ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनम् ॥ भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरं गतः ॥६॥ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकम् ॥ भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥ ७ ॥ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितम् ॥ हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ॥ ८ ॥ तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्यापससार भीतवत् ॥ गोप्यन्वधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ९ ॥ अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा ॥ जवेन विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥ कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्वपाणिना ॥ उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत् ॥ ११ ॥ त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला ॥ इयेष किल तं बद्धुं दाम्नाऽतद्वीर्यकोविदा ॥ १२ ॥ न चांतर्न बहिर्यस्य न पूर्वं नापि चापरम् ॥ पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः ॥ १३ ॥ तं मत्वाऽऽत्मजमव्यक्तं मर्त्यलिंगमधोक्षजम् ॥ गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा ॥ १४ ॥ तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः ॥ द्व्यंगुलोनमभूत्तेन संदधेऽन्यच्च गोपिका ॥ १५ ॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे ॥ तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनम् ॥ १६॥ एवं स्वगेहदामानि यशोदा संदधत्यपि ॥ गोपीनां सुस्मयंतीनां स्मयंती विस्मिताऽभवत् ॥ १७ ॥ ॥ ॥

विह्वलनेत्रं सुतंप्रति भयोत्पादनार्थं हस्ते धृत्वाऽभर्त्सयत् ॥११॥ ततः सुतं भीतं ज्ञात्वा यष्टिं त्यक्त्वा तं रज्ज्वा बद्धुमैच्छत्॥१२॥ बंधनं हि परिवृतेन दाम्ना अंतरावृतस्य पूर्वापरविभागवतो व्याप्यस्य भवति । अस्य कृष्णस्य तु अंतर्बहिः पूर्वमपरं च नास्ति । अयमेव जगतः पूर्वादिको जगद्रूपश्च॥१३॥एवंभूतं भगवंतं पुत्रमिति मत्वा यशोदोलूखले दाम्ना बद्धुं प्रवृत्ता ॥१४॥ तदा बध्यमानस्य तद्दाम द्व्यंगुलोनमभूत्तदा तेनान्यद्दाम संदधे ॥१५॥ तदपि द्व्यंगुलं न्यूनं जातम् । तेनान्यदपि संदधे । तदपि द्व्यंगुलं न्यूनं जातम् ॥१६॥ एवं यशोदा स्वगृहस्थितानि दामानि संदधत्यपि तं बद्धुमसमर्था भूत्वा स्मितं कुर्वतीनां गोपीनां मध्ये स्वयमपि हसंती विस्मयमाप ॥ १७ ॥ ॥ ॥ ॥

एवं स्विन्नगात्रायाः स्वमातुः श्रमं दृष्ट्वा कृष्णः कृपया स्वबंधनयोग्य आसीत् ॥१८॥ हे नृप, ब्रह्मादिपालकसहितमिदं जगद्यस्य स्वाधीनमस्ति तेन स्ववशने कृष्णेनैवं भक्तवश्यता दर्शिता ॥ १९ ॥ मुक्तिदाद्भगवतो बंधनरूपं यं प्रसादं गोपी प्राप तं प्रसादं ब्रह्मा पुत्रोऽपि शिवः स्वात्मापि लक्ष्मीर्जायाऽपि न लेभिरे ॥२०॥ किंच । भगवान् यथा भक्तिमतां सुखेन प्राप्यस्तथा योगिनामपि न ॥२१॥ अथ कृष्णो गृहकृत्येषु यशोदायां व्यग्रायां सत्यां पूर्वं कुबेरपुत्रौ गुह्यकौ संतावपि इदानीमर्जुनवृक्षौ जातौ ददर्श ॥२२॥ हे राजन्, तौ नलकूबरमणिग्रीवनामानौ पुरा नारदशापेन मदाद्वृक्षतां प्रापितावास्तुः ॥२३॥ इति श्री० चू० दश० पू० नवमोऽध्यायः ॥९॥ ॥ दशमेऽपातयद्रिंगन्नंतरा यमलार्जुनौ । तत्रत्याभ्यां च देवाभ्यां कृष्णः स्तुत इतीर्यते॥ १ ॥ राजोवाच ॥ हे ब्रह्मन्,

स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयाऽऽसीत्स्वबंधने ॥१८॥ एवं संदर्शिता ह्यंग हरिणा भक्तवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥१९॥ नेमं विरिंचो न भवो न श्रीरप्यंगसंश्रया ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥२०॥ नायं सुखापो भगवान्देहिनां गोपिकासुतः॥ ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥२१॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ॥ अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ॥२२॥ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् ॥ नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ ॥२३॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे गोपीप्रसादो नाम नवमोऽध्यायः॥९॥ ॥ राजोवाच ॥ कथ्यतां भगवन्नेतत्तयोः शापस्य कारणम् ॥ यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः ॥ १ ॥ ॥ श्रीशुक उवाच ॥ रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ ॥ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ ॥ २ ॥ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ॥ ३ ॥ अंतः प्रविश्य गंगायामंभोजवनराजिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ॥ ४ ॥ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव ॥ अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ॥ ५ ॥ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः ॥ वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ॥ ६ ॥ तौ दृष्ट्वा मदिरामत्तौ श्रीमदांधौ सुरात्मजौ ॥ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥ ७ ॥ नारद उवाच ॥ न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः ॥ श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः ॥८॥ हन्यंते पशवो यत्र निर्दयैरजितात्मभिः॥ मन्यमानैरिमं देहमजरामृत्यु नश्वरम् ॥९॥

तयोः शापस्य कारणं यत्कर्म येन च भागवतोत्तमस्य नारदस्यापि क्रोधः प्राप्तस्तत्कथ्यताम् ॥ १ ॥ श्रीशुक उवाच ॥ हे नृप, कुबेरात्मजौ नलकूबरमणिग्रीवौ धनमदेन गर्विष्ठौ भूत्वा एकदा वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ संतौ गंगातीरस्थे कैलासोपवने गायद्भिः स्त्रीजनैः सह चेरतुः ॥ २ ॥ ३ ॥ ततस्तौ गंगामध्ये प्रविश्य युवतिभिः सह चिक्रीडतुः ॥४॥ तावद्यदृच्छया तत्र नारद आगतः सन् तौ मत्तौ जाताविति ज्ञातवान् ॥ ५ ॥ ततो नारदं दृष्ट्वा नग्नाः स्त्रियः शापभीताः सत्यो वस्त्राणि पर्यधुस्तौ गुह्यकौ न पर्यधुः ॥६॥ अथ नारदस्तौ मत्तौ दृष्ट्वा तयोरनुग्रहार्थं शापं दास्यन्निदं जगाद ॥७॥ नारद उवाच । विषयान् सेवमानस्य पुरुषस्य बुद्धिभ्रंशकः श्रीमदादन्यः सत्कुलविद्यादिजनितो मदो नास्ति । यत्र श्रीमदे स्त्री द्यूतं मद्यं चास्ति ॥८॥ तथा यत्र श्रीमदे इमं देहं स्थिरं

मत्वा निर्दयैः पुरुषैः पशवो हन्यंते ॥ ९ ॥ अयं देहो नृपसंज्ञितोऽपि अंते [1]कृमिविड्भस्मसंज्ञितो भवति । तदर्थं यो भूतद्रोग्धा स किं स्वार्थं वेद । नैव वेद ॥१०॥ अयं देहः किं स्वस्य अन्नदातुः पितुः मातुः मातामहस्य बलिनो विक्रेतुः शुनो वेति न निश्चीयते ॥ ११ ॥ एवं साधारणं देहमात्मेति मत्वा दुर्जनान् विहाय को विद्वान् जंतून् हंति न कोऽपि॥१२॥ किंच। श्रीमदांधस्य पुरुषस्य परमौषधं दारिद्र्यम् । यतो दरिद्रः सन्नात्मवद्भूतानि पश्यति ॥१३॥ यथा कंटकविद्धशरीरस्तां व्यथां जंतोर्नेच्छति तथाऽविद्धकंटकः पुरुषोऽन्यव्यथां न जानाति ॥१४॥ एवं दरिद्रः पुमान् सर्वमदैर्मुक्तः सन् यदृच्छया कष्टं प्राप्नोति तदेव तस्य तपः ॥१५॥ क्षुधया कृशदेहस्यान्नकांक्षिणो दरिद्रस्य पुंस इंद्रियाणि च शुष्यंति । हिंसापि निवर्तते ॥१६॥ किंच दरिद्रस्यैव साधुसमागमो। भवति। ततः स शुद्ध्यति ॥१७॥ ननु साधूनामपि धनिकः प्रियः स्यान्न दरिद्र इति तत्राह । साधूनां धनगर्वितैः पुंभिः किं कर्तव्यं न किमपि ॥१८॥ अतोऽनयोः श्रीमदांधयोर्नलकूबरमणिग्रीवयोरज्ञानजं मदं हरिष्यामि ॥१९॥ यत इमौ लोकपालपुत्रौ भूत्वाऽप्यात्मानं वस्त्रहीनं न जानीतः॥२०॥ अतः कंचित्कालपर्यंतं वृक्षतां गच्छताम् । तत्रापि मत्प्रसादेन स्मृतिः स्यात् ॥ २१ ॥ किंच । इमौ दिव्यशतवर्षे गते हरेः सांनिध्यं प्राप्य पुनर्देवत्वं लब्ध्वा मदनुग्र[illegible]ब्धभक्ती भविष्यतः ॥ २२ ॥ श्रीशुक उवाच ॥ एवमुक्त्वा नारदो नारायणाश्रमं गतः । ततस्तौ नलकूबरमणिग्रीवौ गोकुले यमलार्जुनौ बभूवतुः ॥ २[illegible] ॥ हे नृप, कृष्ण एवं नारदवचः सत्यं कर्तुं यत्र तावास्तां तत्र शनैर्जगाम ॥ २४ ॥ ॥ ॥ ॥

देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितम् ॥ भूतधृक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥१०॥ देहः किमन्नदातुः स्वं निषेक्तुर्मातु-
रेव च ॥ मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ॥११॥ एवं साधारणं देहमव्यक्तप्रभवाप्ययम् ॥ को विद्वानात्मसात्कृत्वा
हंति जंतूनृतेऽसतः ॥१२॥ असतः श्रीमदांधस्य दारिद्र्यं परमंजनम् ॥ आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥१३॥ यथा कंटक-
विद्धांगो जंतोर्नेच्छति तां व्यथाम् ॥ जीवसाम्यं गतो लिंगैर्न तथाऽविद्धकंटकः ॥१४॥ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह ॥
कृच्छ्रं यदृच्छयाऽऽप्नोति तद्धि तस्य परं तपः ॥१५॥ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः ॥ इंद्रिय[illegible]शुष्यंति हिंसापि वि-
निवर्तते ॥१६॥ दरिद्रस्यैव युज्यंते साधवः समदर्शिनः ॥ सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति ॥[illegible] साधूनां समचित्तानां
मुकुंदचरणैषिणाम् ॥ उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः ॥१८॥ तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदां[illegible] ॥ तमोमदं हरि-
ष्यामि स्त्रैणयोरजितात्मनोः ॥१९॥ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ ॥ न विवाससमात्मानं वि[illegible]ः सुदुर्मदौ ॥२०॥

अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः॥ स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥२१॥ वासुदेवस[illegible]यं लब्ध्वा दि-
व्यशरच्छते ॥ वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः ॥२२॥ श्रीशुक उवाच ॥ एवमुक्त्वा स देवर्षिर्गतो ना[illegible]श्रमम् ॥ न-
लकूबरमणिग्रीवावासतुर्यमलार्जुनौ ॥२३॥ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः ॥ जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ॥२४॥

---

[1] श्वादिभिर्भक्षितो विष्ठासंज्ञितो दग्धो भस्मसंज्ञितोऽन्यदा कृमिसंज्ञितः ।

किंच । नारदो मेऽतिप्रियः अतस्तदुक्तं साधयिष्यामीति मनसि निधाय ॥२५॥ कृष्णस्तयोर्यमलार्जुनयोर्मध्यतो निर्ययौ । कृष्णस्य प्रवेशमात्रेणोलूखलं तिर्यग्गतम् ॥२६॥ तदाकर्षयता कृष्णेनोत्पाटितमूलबंधौ तौ चंडशब्दं कृत्वा पेततुः ॥२७॥ ततः स्वकांत्या दिशः प्रकाशयंतौ नलकूबरमणिग्रीवौ स्वस्वरूपं प्राप्य कृष्णं नत्वा बद्धांजली संतौ जगदतुः ॥२८॥ हे कृष्ण, हे महायोगिन्, त्वमाद्यः पुरुषोऽसि । स्थूलसूक्ष्मात्मकमिदं विश्वं तव स्वरूपमस्तीति ब्रह्मविदो जानंति ॥२९॥ हे भगवन्, सर्वभूतानां ये देहेंद्रियादयस्तेषां रक्षकः कालश्च त्वमेवासि ॥३०॥ किंच । महत्तत्वं प्रकृतिः पुरुषश्च त्वमेव ॥३१॥ दृश्यत्वेन वर्तमानैर्बुद्ध्यहंकारादिभिस्त्वं न गृह्यसे । जीवाद्युत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं त्वां ज्ञातुं कोऽर्हति ॥३२॥ एवंभूताय भगवते वासुदेवाय ब्रह्मणे तुभ्यं नमः ॥३३॥

देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ ॥ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥२५॥ इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ ॥ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् ॥२६॥ बालेन निष्कर्षयताऽन्वगुलूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबंधौ ॥ निष्पेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ ॥२७॥ तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः ॥ कृष्णं प्रणम्य शिरसाऽखिललोकनाथं बद्धांजली विरजसाविदमूचतुः स्म ॥२८॥ कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः ॥ व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ॥२९॥ त्वमेकः सर्वभूतानां देहास्वात्मेंद्रियेश्वरः ॥ त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ॥३०॥ त्वं महान्प्रकृतिः सूक्ष्मा रजःसत्वतमोमयी ॥ त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ॥३१॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ॥ कोन्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ॥३२॥ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे ॥ आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥ ३३ ॥ यस्यावतारा ज्ञायंते शरीरेष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ॥३४॥ स भवान्सर्वलोकस्य भवाय विभवाय च ॥ अवतीर्णोऽंशभागेन सांप्रतं पतिराशिषाम् ॥३५॥ नमः परमकल्याण नमः परममंगल ॥ वासुदेवाय शांताय यदूनां पतये नमः ॥३६॥ अनुजानीहि नौ भूमंस्तवानुचरकिंकरौ ॥ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ॥३७॥ वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः ॥ स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥३८॥ श्रीशुक उवाच ॥ इत्थं संकीर्तितस्ताभ्यां भगवान्गोकुलेश्वरः ॥ दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥३९॥ श्रीभगवानुवाच ॥ ज्ञातं मम पुरैवैतदृषिणा करुणात्मना ॥ यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ॥४०॥

अशरीरिणो यस्यावतारा मत्स्यादिशरीरेषु ज्ञायंते ॥ ३४ ॥ स त्वं सर्वलोकस्योत्कर्षाय मोक्षाय च सांप्रतमवतीर्णोऽसि ॥ ३५ ॥ हे परमकल्याण, हे परममंगल, शांताय यादवानां पतये वासुदेवाय तुभ्यं नमः ॥३६॥ हे कृष्ण, कुबेरपुत्रौ नौप्रति स्वस्थानं गंतुमाज्ञां देहि । आवयोस्त्वद्दर्शनं नारदस्यानुग्रहादासीत् ॥३७॥ हे हरे, स्वस्थानं गतयोरावयोर्वाणी तव गुणानुकथनेऽस्तु । कर्णौ तव कथायाम् । हस्तौ तव पूजायाम् । मनस्तव पादयोः स्मरणे । शिरस्तव निवासभूतजगत्प्रणामेऽस्तु । दृष्टिश्च त्वन्मूर्तीनां सतां दर्शनेऽस्तु ॥३८॥ श्रीशुक उवाच ॥ एवं तयोर्वाक्यं श्रुत्वा दाम्नोलूखले बद्धः कृष्णस्तौ प्रत्याह ॥३९॥ श्रीभगवानुवाच ॥ हे गुह्यकौ, मयैतन्नारद-

शापादि पुरैव ज्ञातम् ॥४०॥ साधूनां दर्शनाद्बंधो न भवेत् । सूर्यस्य दर्शनान्नेत्रयोर्यथा बंधो न भवेत्तद्वत् ॥ ४१ ॥ अतो युवां मत्परौ संतौ स्वस्थानं गच्छतम् । युवयोर्मयि भक्तिर्जातैवास्ति सैव संसारनिवृत्तिकरी ॥४२॥ श्रीशुक उवाच ॥ हे नृप, ततस्तौ नलकूबरमणिग्रीवौ कृष्णं पुनःपुनर्नत्वा परिक्रम्यामंत्र्य चोत्तरां दिशं जग्मतुः ॥४३॥ इति श्रीम० चू० दश० पूर्वा० दशमोऽध्यायः ॥१०॥ ॥ एकादशे समागत्य वृंदावनमथार्भकैः । वत्सान् पालयतानेन हतौ वत्सबकासुरौ ॥१॥ श्रीशुक उवाच ॥ हे राजन्, ततो नंदादयो गोपाः पततोर्वृक्षयोः शब्दं श्रुत्वा वज्रपातो जात इति भयशंकिताः संतस्तत्राजग्मुः ॥ १ ॥ तत्र भुवि पतितौ वृक्षौ दृष्ट्वा तत्पतनकारणं न ज्ञात्वा बभ्रमुः ॥२॥ तावदुलूखलं विकर्षंतं दाम्ना बद्धं बालं दृष्ट्वा कस्य राक्षसादेरिदं कर्मेत्याहुः ॥३॥ तदा तत्रस्था बाला उलूखलं विकर्षता वृक्षयोर्मध्यगतेनानेन कृष्णेन वृक्षौ पातितौ । ताभ्यां निर्गतौ दिव्यौ पुरुषावपि वयं दृष्टवंत इत्यूचुः ॥ ४ ॥ तद्बालवचस्ते केचित्ताकिंका गोपा न जगृहुरेव । केचित्संदेहयुक्तचित्ता बभूवुः ॥५॥ तत्रोलूखले दाम्ना बद्धं सुतं दृष्ट्वा प्रहसद्वदनो नंदस्तं मुमोच ॥६॥ अथ कृष्णो गोपीभिः करतालादिना प्रोत्साहितः सन् नृत्यति स्म । कदाचित्प्रशंसितः संस्तद्वशो भूत्वोद्गायति स्म ॥७॥ क्वचित्केनचिदिदमानयेति कृताज्ञः सन् पीठकोन्मानपादुकं केवलं बिभर्ति । हस्तचालनं च कुरुते ॥८॥ एवं भगवान् कृष्ण आत्मनो भक्तवश्यतां दर्शयन् बालचेष्टितैर्गोकुलस्य हर्षमुवाह ॥ ९ ॥ (कदाचिद्यशोदया भो कृष्ण, फलानि गृहाणेत्युक्तः सन् सर्वफलप्रदो भगवान् फलार्थी भूत्वा हस्ताभ्यां धान्यमाददे ॥ १० ॥ यदा च फलविक्रेत्र्या गलिते धान्ये तस्य करद्वयं फलैः पूरितं तदा फलभांडं रत्नैः पूर्णमभवत् ॥ ११ ॥ ॥ ॥ ॥

साधूनां समचित्तानां सुतरां मत्कृतात्मनाम् ॥ दर्शनान्नो भवेद्बंधः पुंसोऽक्ष्णोः सवितुर्यथा ॥ ४१ ॥ तद्गच्छतं मत्परमौ नलकूबर सादनम् ॥ संजातो मयि भावो वामीप्सितः परमोऽभवः ॥४२॥ श्रीशुक उवाच ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ॥ बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तराम् ॥४३॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे नारदशापो नाम दशमोऽध्यायः ॥१०॥ श्रीशुक उवाच ॥ गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवम् ॥ तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः ॥१॥ भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ ॥ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणम् ॥२॥ उलूखलं विकर्षंतं दाम्ना बद्धं च बालकम् ॥ कस्येदं कुत आश्चर्यमुत्पात इति कातराः ॥३॥ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलम् ॥ विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ॥४॥ न ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् ॥ बालस्योत्पाटनं तर्वोः केचित्संदिग्धचेतसः ॥५॥ उलूखलं विकर्षंतं दाम्ना बद्धं स्वमात्मजम् ॥ विलोक्य नंदः प्रहसद्वदनो विमुमोच ह ॥६॥ गोपीभिः स्तोभितोऽनृत्यद्भगवान्बालवत्क्वचित् ॥ उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयंत्रवत् ॥७॥ बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकम् ॥ बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ॥८॥ दर्शयंस्तद्विदां लोक आत्मनो भृत्यवश्यताम् ॥ व्रजस्योवाह वै हर्षं भगवान्बालचेष्टितैः ॥९॥ (क्रीणीहि भो फलानीति श्रुत्वा सत्वरमच्युतः ॥ फलार्थी धान्यमादाय ययौ सर्वफलप्रदः ॥१०॥ फलविक्रयिणी तस्य च्युतधान्यं करद्वयम् ॥ फलैरपूरयद्रत्नैः फलभांडमपूरि च ॥११॥

अथ कदाचिद्रोहिणी सरित्तीरगतं कृष्णं रामं चाजुहाव ॥ १२ ॥ एवमाहूतावपि कृष्णरामौ क्रीडासक्ततया यदा नागतौ तदा रोहिणी तयोरानयनार्थं यशोदां प्रेषितवती ॥१३॥ तदा पुत्रस्नेहस्नुतस्तनी सा यशोदा सहाग्रजं बालैः सह दीर्घं कालं क्रीडंतं कृष्णमाह्वयति स्म ॥१४॥ हे कृष्ण, हे कमलाक्ष, हे तात, एहि स्तनं पिब । विहारैरलम् । क्रीडित्वा त्वं श्रांतोऽसि ॥१५॥ रामंप्रति वदति । हे राम कुलनंदन, कृष्णेन सह त्वमागच्छ । प्रातरेव कृताहारस्त्वमधुना भोक्तुमर्हसि ॥१६॥ हे कृष्ण, भोक्ष्यमाणो व्रजाधिपस्त्वां प्रतीक्षते । अत आगत्यावयोः प्रियं विधीयताम् । हे बालकाः, यूयं स्वस्वगृहान् यात ॥१७॥ हे कृष्ण, त्वं धूल्या मलिनदेहो जातोऽसि अतः स्नानं कुरु । अद्य भवतो जन्मनक्षत्रमस्ति । अतो विप्रेभ्यो गाः देहि ॥१८॥ हे राम, तव वयस्यान् मातृमृष्टान् स्वलंकृतांश्च पश्य । त्वमपि स्नात्वा भुक्त्वा स्वलंकृतश्च भूत्वा विहर ॥ १९ ॥ हे राजन्, स्नेहनिबद्धमना यशोदा ब्रह्मादिमुकुटमणिं भगवंतं सुतं मत्वा सरामं तं हस्ते गृहीत्वा स्ववाटं नीतवती ॥२०॥) गोपवृद्धा व्रजे महोत्पाताननुभूय एकदा सर्वे मिलित्वा गोकुलस्य हितकृत्यं विचारयामासुः ॥२१॥ नत्र ज्ञानवयोधिक उपनंदनामा गोप आह ॥२२॥ हे गोपाः, अस्माभिरितो बृहद्वनाच्छीघ्रमन्यत्र गंतव्यम् । अत्र बालानां नाशहेतव उत्पाता आयांति ॥ २३ ॥ कथंचिद्बालघ्न्या राक्षस्या अयं कृष्णो मुक्तः । तथ, हरेः प्रसादाच्छकटं च तदुपरि नापतत् ॥२४॥ तथा तृणावर्तेनायमाकाशं नीतः । ततः शिलायां पतितोऽपि दैवै रक्षितः ॥ २५ ॥ किंच । वृक्षयोर्मध्यं प्राप्याप्यसौ बालोऽन्यो वा न मृतः । इदमीश्वरेण रक्षणं कृतम् ॥२६॥ अतो यावदन्य औत्पातिकोऽनर्थो व्रजे न भ-

सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् ॥ रामं च रोहिणी देवी क्रीडंतं बालकैर्भृशम् ॥१२॥ नोपेयातां यदाऽऽहूतौ क्रीडासंगेन पुत्रकौ ॥ यशोदां प्रेषयामास रोहिणी पुत्रवत्सलाम् ॥१३॥ क्रीडंतं सा सुतं बालैरतिवेलं सहाग्रजम् ॥ यशोदाऽजोहवीत्कृष्णं पुत्रस्नेहस्नुतस्तनी ॥१४॥ कृष्ण कृष्णारविंदाक्ष तात एहि स्तनं पिब ॥ अलं विहारैः क्षुत्क्षांतः क्रीडाश्रांतोऽसि पुत्रक ॥१५॥ हे रामागच्छ ताताशु सानुजः कुलनंदन ॥ प्रातरेव कृताहारस्तद्भवान्भोक्तुमर्हति ॥१६॥ प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः ॥ एह्यावयोः प्रियं धेहि स्वगृहान्यात बालकाः ॥१७॥ धूलिधूसरितांगस्त्वं पुत्र मज्जनमावह ॥ जन्मर्क्षमद्य भवतो विप्रेभ्यो देहि गाः शुचिः ॥१८॥ पश्य पश्य वयस्यांस्ते मातृमृष्टान्स्वलंकृतान् ॥ त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः ॥१९॥ इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप ॥ हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयम् ॥२०॥) गोपवृद्धा महोत्पाताननुभूय बृहद्वने ॥ नंदादयः समागम्य व्रजकार्यममंत्रयन् ॥२१॥ तत्रोपनंदनामाऽऽह गोपो ज्ञानवयोधिकः ॥ देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः ॥२२॥ उत्थातव्यमितोऽस्माभिर्गोकुलस्य हितैषिभिः ॥ आयांत्यत्र महोत्पाता बालानां नाशहेतवः ॥२३॥ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ ॥ हरेरनुग्रहान्नूनमनश्चोपरि नापतत् ॥२४॥ चक्रवातेन नीतोऽयं दैत्येन विपदं वियत् ॥ शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः ॥२५॥ यन्न म्रियेत द्रुमयोरंतरं प्राप्य बालकः ॥ असावन्यतमो वापि तदप्यच्युतरक्षणम् ॥ २६ ॥ यावदौत्पातिकोऽरिष्टो व्रजं नाभिभवेदितः ॥ तावद्बालानुपादाय यास्यामोऽन्यत्र सानुगाः ॥ २७ ॥

वेत्तावदितो बालान् गृहीत्वान्यत्र यास्यामः ॥२७॥ इतः समीपं वृंदावनं नाम वनं गोपगोपीगवां सेव्यं पवित्रपर्वततृणलतायुक्तं वर्तते ॥ २८ ॥ तत्र भवतां यदि रोचते तर्ह्यद्यैव वयं यास्यामः । शकटान् नियुंक्त । गोधनानि पुरतो यांतु ॥२९॥ एतच्छ्रुत्वा गोपाः साध्वित्युक्त्वा स्वान् स्वान् शकटसमूहान् संयोज्य शकटेषु गृहसाहित्यानि तथा वृद्धबालस्त्रियो निधाय [illegible]ष्याः ॥३०॥३१॥ गोधनानि पुरस्कृत्य शृंगाणि पूरयंतस्तूर्यघोषेण पुरोहितैः सह ययुः ॥३२॥ तदा सुवस्त्रालंकारादिधारिण्यो गोप्यः शकटारूढाः सत्यः कृष्ण[illegible] ॥३३॥ तथा यशोदारोहिण्यावेकं शकटमारुह्य कृष्णरामाभ्यां सह रेजतुः ॥३४॥ एवं ग्रीष्मादिसर्वकालेष्वपि सुखावहं वृंदावनं प्रविश्य [illegible]रर्धचंद्रवद्वसतिस्थानं चक्रुः ॥३५॥ किंच । वृंदावनं गोवर्धनं यमुनापुलिनानि च दृष्ट्वा रामकृष्ण-

वनं वृंदावनं नाम पशव्यं नवकाननम् ॥ गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधम् ॥२८॥ तत्तत्राद्यैव यास्यामः शकटान्युंक्त मा चिरम् ॥ गोधनान्यग्रतो यांतु भवतां यदि रोचते ॥२९॥ तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः ॥ व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिच्छदाः ॥३०॥ वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानि च ॥ अनस्स्वारोप्य गोपाला यत्ता आत्तशरासनाः ॥३१॥ गोधनानि पुरस्कृत्य शृंगाण्यापूर्य सर्वतः ॥ तूर्यघोषेण महता ययुः सहपुरोहिताः ॥३२॥ गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः ॥ कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवाससः ॥३३॥ तथा यशोदारोहिण्यावेकं शकटमास्थिते ॥ रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ॥३४॥ वृंदावनं संप्रविश्य सर्वकालसुखावहम् ॥ तत्र चक्रुर्व्रजावासं शकटैरर्धचंद्रवत् ॥३५॥ वृंदावनं गोवर्धनं यमुनापुलिनानि च ॥ वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ॥३६॥ एवं व्रजौकसां प्रीतिं यच्छंतौ बालचेष्टितैः ॥ कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ॥३७॥ अविदूरे व्रजभुवः सह गोपालदारकैः ॥ चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ॥३८॥ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ॥ क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रिमगोवृषैः ॥३९॥ वृषायमाणौ नर्दंतौ युयुधाते परस्परम् ॥ अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृतौ यथा ॥४०॥ कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः ॥ वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥४१॥ तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः ॥ दर्शयन्बलदेवाय शनैर्मुग्ध इवासदत् ॥४२॥ गृहीत्वाऽपरपादाभ्यां सहलांगूलमच्युतः ॥ भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितम् ॥ स कपित्थैर्महाकायः पात्यमानैः पपात ह ॥ ४३ ॥ ॥

योः परमो हर्ष आसीत् ॥३६॥ एवं बालचेष्टितैर्व्रजौकसां प्रीतिं दत्वा कालेन तौ वत्सपालौ बभूवतुः ॥ ३७ ॥ अथ कौमारलीलां निरूपयति । ततस्तौ व्रजभुवः समीपे गोपबालैः सह वत्सान् चारयामासतुः ॥ ३८ ॥ क्वचिद्वेणुं वादयतः तथा क्षेपणैर्बिल्वामलकादीनि क्षिपतः । क्वचित्किंकिणीयुक्तपादैरामलकादीनि ताडयतः । क्वचित् कृत्रिमगोवृषैः[1] सह स्वयं वृषायमाणौ नर्दंतौ[2] संतौ मिथो युयुधाते । किंच । हंसमयूरादीन् जंतून् शब्दैरनुकृत्य चेरतुः ॥३९॥४०॥ कदाचिद्बालैः सह वत्सांश्चारयतोः सतोस्तयो रामकृष्णयोर्[illegible] ॥४१॥ तं वत्सरूपिणं वत्ससमूहगतं वीक्ष्य कृष्णो रामं दर्शयित्वा तत्समीपं गत्वा ॥४२॥ तं सलांगूलं पश्चात्पादयोर्धृत्वा भ्रामयित्वा भ्रामणमात्रेण गतप्राणं तं कपित्थवृक्षाग्रे प्राहिणोत् । तदा स महाकायो भूत्वा कपित्थफलैः सह पपात ॥४३॥

---

[1] वत्सपाला एव द्वित्राः कंबलादिपिहिता वृषरूपमनुकुर्वंत तैः सह । [2] तदनुकारिशब्दान् कुर्वंतौ ।

तं वीक्ष्य बालाः कृष्णं प्रशंसुः साध्वित्यूचुः । देवाश्च पुष्पवृष्टिं चक्रुः ॥ ४४ ॥ (गोप्यश्च हतं वत्सासुरं श्रुत्वा विस्मिता जाताः) एवं तौ वत्सपालौ भूत्वा सप्रातराशौ वत्सांश्चारयंतौ संतौ विचेरतुः ॥४५॥ अथैकदा सर्वे बालाः स्वं स्वं वत्सकुलमादाय जलसमीपं गत्वा जलं पाययित्वा स्वयं च जलं पपुः ॥४६॥ तत्र ते बाला गिरेः श्रृंगमिव स्थितमेकं पक्षिणं ददृशुः ॥४७॥ हे राजन्, स बको नामाऽसुरः सहसाऽऽगत्य तीक्ष्णतुंडेन कृष्णं जग्रास ॥४८॥ ततो बकेन ग्रस्तं कृष्णं दृष्ट्वा रामं विना सर्वे बाला मूर्छिता बभूवुः ॥४९॥ ततस्तालुमूलेऽग्निवद्दहंतं तं कृष्णं दैत्यो ववाम। ततस्तं पुनस्तुंडेन हंतुं प्रवृत्तः ॥५०॥ तावत्कृष्णस्तं

तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ॥ देवाश्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ॥४४॥ (वत्सासुरं हतं श्रुत्वा व्रजे गोप्यश्च विस्मिताः ॥) तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ॥ सप्रातराशौ गोवत्सांश्चारयंतौ विचेरतुः ॥ ४५ ॥ स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा ॥ गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलम् ॥४६॥ ते तत्र ददृशुर्बाला महासत्वमवस्थितम् ॥ तत्रसुर्वज्रनिर्भिन्नं गिरेः शृंगमिव च्युतम् ॥४७॥ स वै बको नाम महानसुरो बकरूपधृक् ॥ आगत्य सहसा कृष्णं तीक्ष्णतुंडोऽग्रसद्बली ॥४८॥ कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ॥ बभूवुरिंद्रियाणीव विना प्राणं विचेतसः ॥४९॥ तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं जगद्गुरोः ॥ चच्छर्द सद्योऽतिरुषाऽक्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ॥५०॥ तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः ॥ पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसाम् ॥ ५१ ॥ तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादिभिः ॥ समीडिरे चानकशंखसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ॥ ५२ ॥ मुक्तं बकास्यादुपलभ्य बालका रामादयः प्राणमिवैंद्रियो गणः ॥ स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ॥५३॥ श्रुत्वा तद्विस्मिता गोपा गोप्यश्चातिप्रियादृताः ॥ प्रेत्यागतमिवौत्सुक्यादैक्षंत तृषितेक्षणाः ॥ ५४ ॥ अहो बतास्य बालस्य बहवो मृत्यवोऽभवन् ॥ अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयम् ॥५५॥ अथाप्यभिभवंत्येनं नैव ते घोरदर्शनाः ॥ जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत् ॥५६॥ अहो ब्रह्मविदां वाचो नासत्याः संति कर्हिचित् ॥ गर्गो यदाह भगवानन्वभावि तथैव तत् ॥५७॥ इति नंदादयो गोपाः कृष्णरामकथां मुदा ॥ कुर्वंतो रममाणाश्च नाविंदन्भववेदनाम् ॥ ५८ ॥ ॥

चंच्वोर्दोर्भ्यां धृत्वा बालेषु पश्यत्सु सत्सु लीलया ददार ॥५१॥ तदा बकारिं कृष्णं देवाः पुष्पैर्ववृषुः । आनकशंखनादैश्च सह स्तवैस्तुष्टुवुः ॥ ५२ ॥ एवं बकमुखान्मुक्तं कृष्णं प्राप्य रामादयः प्रीताः संतो व्रजमेत्य तत्कर्म जगुः ॥५३॥ गोप्यो गोपाश्च तच्छ्रुत्वा विस्मिता भूत्वा तृषितेक्षणाः संतस्तं कृष्णं दृष्ट्वोचुः ॥५४॥ अहो अस्य बालस्य बहवो मृत्यवः प्राप्ताः तथापि तेषामेवानिष्टमासीत् ॥५५॥ भयंकरास्ते दैत्याः कृष्णजिघांसया प्राप्याग्नौ पतंगवत्स्वयमेव नश्यंति ॥ ५६ ॥ अहो ब्रह्मविदां वाचः कदापि मृषा न भवंति । यतो गर्गो[1] यदाह तत्तथैव जातम् ॥५७॥ एवं नंदादयो गोपाः कृष्णरामकथां कुर्वंतः संतः संसारवेदनां ना-

---

[1] तस्मान्नंदात्मजोऽयं ते नारायणसमो गुणैरित्यादि ।

एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ॥५९ ॥ इति श्रीम० म० दश० पू० वत्सबकवधो नामैकादशोऽध्यायः ॥११॥ श्रीशुक उवाच ॥ क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्सपान् ॥ प्रबोधयन् शृंगरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः ॥१॥ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः ॥ स्वान्स्वान्सहस्रोपरिसंख्ययान्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा ॥२॥ कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान् ॥ चारयंतोऽर्भलीलाभिर्विजह्रुस्तत्र तत्र ह ॥३॥ फलप्रवालस्तबकसुमनःपिच्छधातुभिः ॥ काचगुंजामणिस्वर्णभूषिता अप्यभूषयन् ॥४॥ मुष्णंतोऽन्योन्यशिक्यादीन्ज्ञातानाराच्च चिक्षिपुः ॥ तत्रत्याश्च पुनर्दूराद्धसंतश्च पुनर्ददुः ॥ ५ ॥ यदि दूरं गतः कृष्णो वनशोभेक्षणाय तम् ॥ अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे ॥६॥ केचिद्वेणून्वादयंतो ध्मांतः शृंगाणि केचन ॥ केचिद्भृंगैः प्रगायंतः कूजंतः कोकिलैः परे ॥७॥ विच्छायाभिः प्रधावंतो गच्छंतः साधु हंसकैः ॥ बकैरुपविशंतश्च नृत्यंतश्च कलापिभिः ॥८॥ विकर्षंतः कीशबालानारोहंतश्च तैर्द्रुमान् ॥ विकुर्वंतश्च तैः साकं प्लवंतश्च पलाशिषु ॥९॥ साकं भेकैर्विलंघंतः सरित्प्रस्रवसंप्लुताः ॥ विहसंतः प्रतिच्छायाः शपंतश्च प्रतिस्वनान् ॥१०॥ इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ॥ मायाश्रितानां नरदारकेण साकं विजह्रुः कृतपुण्यपुंजाः ॥११ ॥ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यः ॥ स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमतो व्रजौकसाम् ॥ १२ ॥

विंदन् ॥५८॥ एवं कृष्णरामौ कौमारैः क्रीडनैर्निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिश्च व्रजे कौमारावस्थां जहतुः ॥५९॥ इति श्री० चू० दश० एकादशः ॥११॥

॥ द्वादशे तु महासर्पवपुर्धरमघासुरम् । वत्सपालगिलं क्रुद्धो गलेऽहन्निति वर्ण्यते ॥१॥ श्रीशुक उवाच ॥ कदाचित्कृष्णः प्रातरुत्थाय वने प्रथमं भोजनं कर्तुं शृंगशब्देन बालान् प्रबोध्य वत्सान् पुरस्कृत्य निर्गतः ॥१॥ ततः कृष्णेन सह सहस्रशो बालाः सहस्राधिकसंख्यायुतान् वत्सान् पुरस्कृत्य शृंगवेत्रवेणून् गृहीत्वा ययुः ॥२॥ ततस्ते कृष्णस्य वत्सैः सह स्ववत्सान् मेलयित्वा चारयंतः संतो बाललीलाभिस्तत्र तत्र स्थलेषु विजह्रुः ॥३॥ ततस्ते पूर्वं मातृभिः काचगुंजारत्नसुवर्णादिभिर्भूषिता अपि आत्मानं फलपल्लवपिच्छधातुभिर्भूषयांचक्रुः ॥ ४ ॥ किंच । अन्योन्यशिक्यादीन् मुष्णंतो गोपैर्ज्ञातानि तानि दूरं चिक्षिपुः । पुनरानीय ददुश्च ॥५॥ कृष्णो वनशोभावलोकनाय यदि दूरं गतो भवेत्तदा कृष्णमहं पूर्वमिति संस्पृश्य रेमिरे ॥६॥ केचिद्गोपाला वेणून् वादयंतः केचिच्छृंगाणि वादयंतः केचिद्भृंगवद्गायंतः कोकिलवच्च कूजंतः ॥७॥ केचित्पक्षिच्छायाभिर्धावंतः हंसैः सह गच्छंतः बकैः सहोपविशंतः मयूरैः सह नृत्यंतः ॥८॥ केचिद्वृक्षशाखासु लंबमानान् वानरपुच्छान् विकर्षंतः केचित्तत्पुच्छैर्वृक्षानारोहंतः केचिद्दंतदर्शनादिना वानरैः सह विकारान् कुर्वंतः ॥९॥ केचिन्मंडूकवद्विलंघंतः प्रतिबिंबानि हसंतः प्रतिध्वनीन् शपंतश्च संतो रेमिरे ॥१०॥ एवं ते गोपालाः मनुष्यपुत्रतया प्रतीयमानेन परब्रह्मणा श्रीकृष्णेन सह विजह्रुः । अहो तेषां भाग्यम् ॥ ११ ॥ यस्य पादरेणुर्योगिभिरपि दुष्प्रापः स एवेश्वरो येषां संमुखे स्वयं स्थितस्तेषां व्रजौकसां भाग्यं किं वर्ण्यते ॥ १२ ॥ ॥

---

१ निलीय स्थितस्यान्येन तच्छोधनं निलायनम् ।

अथ तेषां क्रीडनं न सहमानोऽघासुर आगमत् ॥१३॥ पूतनाबकयोः कनिष्ठबंधुः सोऽघासुरः कृष्णप्रमुखान् बालान् दृष्ट्वाऽयं कृष्णो मे भ्रातृभगिन्योर्नाशकर्ता । अतस्तयोर्द्वयोः स्थाने एनं वत्सतत्पालसहितं हनिष्यामि ॥ १४॥ किंच । एतेषु बालेषु मृतेषु सत्सु पुत्रप्राणा गोकुलवासिनः सर्वे मृततुल्या भविष्यंति ॥१५॥ इति निश्चित्य योजनदीर्घं पर्वतवत्स्थूलं गुहावत्प्रसारितमुखमाजगरं शरीरं धृत्वा सर्ववत्सवत्सपालग्रसनेच्छया तेषां मार्गे शयनं कृतवान् ॥१६॥ कथंभूतः सः । भूमावधरोष्ठो यस्य मेघेषूर्ध्वोष्ठो यस्य दर्याविवौष्ठप्रांतौ यस्य पर्वतशिखरवद्दंष्ट्रा यस्य विस्तीर्णमार्गवज्जिह्वा यस्य सः ॥ १७ ॥ एवंभूतं दैत्यं दृष्ट्वा तं च वृंदावनशोभेति भ्रांत्या मत्वा वत्सपालाः प्रसारिताजगरमुखसादृश्येनोत्प्रेक्षितवंतः ॥१८ ॥ तदाह । अहो मित्राणि गदत । एतत्पुरोगतं वनं म-

अथाघनामाऽभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः ॥ नित्यं यदंतर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥१३॥ दृष्ट्वार्भकान्कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः ॥ अयं तु मे सोदरनाशकृत्तयोर्द्वयोर्ममैनं सबलं हनिष्ये ॥१४॥ एते यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौकसः ॥ प्राणे गते वर्ष्मसु का नु चिंता प्रजाऽसवः प्राणभृतो हि ये ते ॥१५॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाममहाद्रिपीवरम् ॥ धृत्वाऽद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया खलः ॥१६॥ धराधरोष्ठो जलदोत्तरोष्ठो दर्याननांतो गिरिशृंगदंष्ट्रः ॥ ध्वांतांतरास्यो वितताध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः ॥१७॥ दृष्ट्वा तं तादृशं सर्वे मत्वा वृंदावनश्रियम् ॥ व्यात्ताजगरतुंडेन ह्युत्प्रेक्षंते स्म लीलया ॥१८॥ अहो मित्राणि गदत सत्वकूटं पुरःस्थितम् ॥ अस्मत्संग्रसनव्यात्तव्यालतुंडायते न वा ॥१९॥ सत्यमर्ककरारक्तमुत्तराहनुवद्घनम् ॥ अधराहनुवद्रोधस्तत्प्रतिच्छाययाऽरुणम् ॥२०॥ प्रतिस्पर्धेते सृक्किभ्यां सव्यासव्ये नगोदरे ॥ तुंगशृंगालयोऽप्येतास्तद्दंष्ट्राभिश्च पश्यत ॥२१॥ आस्तृतायाममार्गोऽयं रसनां प्रति गर्जति ॥ एषामंतर्गतं ध्वांतमेतदप्यंतराननम् ॥ २२ ॥ दावोष्णखरवातोऽयं श्वासवद्भाति पश्यत ॥ तद्दग्धसत्वदुर्गंधोऽप्यंतरामिषगंधवत् ॥२३॥ अस्मान्किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनंक्ष्यति ॥ क्षणादनेनेति बकार्युशन्मुखं वीक्ष्योद्धसंतः करताडनैर्ययुः ॥२४॥ इत्थं मिथोऽतथ्यमतज्ज्ञभाषितं श्रुत्वा विचिंत्येत्य मृषा मृषायते ॥ रक्षो विदित्वाखिलभूतहृत्स्थितः स्वानां निरोद्धुं भगवान्मनो दधे ॥२५॥ तावत्प्रविष्टास्त्वसुरोदरांतरं परं न गीर्णाः शिशवः सवत्साः ॥ प्रतीक्षमाणेन बकारिवेशनं हतस्वकांतस्मरणेन रक्षसा ॥ २६ ॥

हाप्राणिसदृशं दृश्यते न वा । अस्मद्ग्रसनाय प्रसारितसर्वमुखवद्भासते न वा ॥१९॥ सत्यं सत्यम् । सूर्यकिरणैरारक्तं मेघमूर्ध्वोष्ठवत्पश्यत । तत्प्रतिच्छायां चाधरोष्ठवत्पश्यत ॥२०॥ एते सव्यासव्ये गुहे ओष्ठप्रांतसदृशौ दृश्येते । एता उच्चशिखरपंक्तयस्तस्य दंष्ट्रासदृशा दृश्यंते ॥२१॥ अयं दीर्घो मार्गो जिह्वावद्भाति ॥२२॥ दावाग्निनोष्णोऽयं वायुस्तस्य श्वासवद्भाति पश्यत । तत्र दवाग्निना दग्धप्राणिनां दुर्गंधोऽपि तदुदरगतमांसगंधवद्भाति पश्यत ॥२३॥ अयं किमस्मान् प्रविष्टान् ग्रसिष्यति । एवं चेदनेन कृष्णेन क्षणाद्बकवन्नाशं प्राप्स्यति । एवं परस्परमुक्त्वा कृष्णमुखं दृष्ट्वा करताडनं कुर्वंतः संतोंऽतर्मुखं विविशुः ॥ २४ ॥ श्रीकृष्णो बालभाषणं श्रुत्वाऽयं राक्षस इति ज्ञात्वा गोपान् वारयितुं यावन्मनो दधे । तावत्ते तदुदरं प्रविष्टाः । तथापि कृष्णप्रवेशं प्रतीक्षमाणेन तेन ते न गि-

लिताः ॥२५॥२६॥ ततः कृष्णो दैवेन मृत्योर्जठराग्निघासान् स्वहस्तान्निःसृतान् तान् दृष्ट्वा विस्मितः सन् ॥ २७ ॥ एषां प्रविष्टानां मरणमस्याजगरस्य च जीवनं यथा न स्यात्तथा निश्चयं कृत्वा सर्वज्ञो हरिरजगरमुखं विवेश ॥२८॥ तदा मेघांतरिता देवा हाहेति चुक्रुशुः । राक्षसा हर्षं प्रापुः ॥ २९॥ कृष्णस्तच्छ्रुत्वा वत्सवत्सपालसहितमात्मानं चूर्णीकर्तुमिच्छोस्तस्य कंठे ववृधे ॥३०॥ ततो निरुद्धमार्गस्य तस्य देहांतरगतो वायुर्ब्रह्मरंध्रं निर्भिद्य बहिर्निर्गतः ॥३१॥ तेनैव सर्वेषु प्राणेषु बहिर्गतेषु सत्सु मृतान् वत्सवत्सपालान् स्वकीयया दृष्ट्योत्थाप्य तैर्युक्तः कृष्णो मुखाद्बहिर्निर्ययौ ॥ ३२ ॥ ततस्तद्देहोत्थितं तेज आकाशे स्थितं सत् कृष्णनिर्गमं प्रतीक्ष्य देवानां पश्यतां सतां कृष्णे विवेश ॥ ३३॥ तदा देवाः पुष्पवृष्टिं चक्रुः । अप्सरसो ननृतुः । गंधर्वा जगुः । विद्याधरा वाद्यानि वादयामासुः । वसिष्ठादयो विप्राः स्तुतिं चक्रुः । पार्षदगणा जयजयेति शब्दैः सत्कारं चक्रुः ॥३४॥ तान् वाद्यगीतस्तुत्यादीनां शब्दान् सत्यलोके ब्रह्मा श्रुत्वा तत्रागतः सन् कृष्णस्य महिमानं दृष्ट्वा विस्मयं प्राप ॥३५॥ हे राजन्, तदाजगरं चर्म शुष्कं सद्वृंदावने व्रजवासिनां बहुकालपर्यंतं क्रीडार्थं महाबिलमासीत् ॥ ३६ ॥ हे नृप, एतत्स्वाना[1]मघासुरस्य च मोक्षणं कृष्णस्य पंचमवर्षकृतं कर्म बाला व्रजमागत्य षष्ठे वर्षे अद्यैतज्जातमित्यूचुः ॥३७॥ हे नृप, यस्य स्पर्शेनाघासुरोऽपि क्षीणपापो भूत्वैकरूपतां प्राप तस्य मायया मनुष्यपुत्रत्वं स्वीकृतवतः कृष्णस्यैतदाश्चर्यं न ॥ ३८ ॥ ॥ ॥

तान्वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान्स्वकरादवच्युतान् ॥ दीनांश्च मृत्योर्जठराग्निघासान्घृणार्दितो दिष्टकृतेन विस्मितः ॥ २७ ॥ कृत्यं किमत्रास्य खलस्य जीवनं न वा अमीषां च सतां विहिंसनम् ॥ द्वयं कथं स्यादिति संविचिंत्य तज्ज्ञात्वाऽविशत्तुंडमशेषदृग्घरिः ॥ २८ ॥ तदा घनच्छदा देवा भयाद्धाहेति चुक्रुशुः ॥ जहृषुर्ये च कंसाद्याः कौणपास्त्वघबांधवाः ॥ २९ ॥ तच्छ्रुत्वा भगवान्कृष्णस्त्वव्ययः सार्भवत्सकम् ॥ चूर्णीचिकीर्षोरात्मानं तरसा ववृधे गले ॥३०॥ ततोऽतिकायस्य निरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः ॥ पूर्णोऽतरंगे पवनो निरुद्धो मूर्धन्विनिष्पाट्य विनिर्गतो बहिः ॥ ३१ ॥ तेनैव सर्वेषु बहिर्गतेषु प्राणेषु वत्सान्सुहृदः परेतान् ॥ दृष्ट्या स्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुंदो भगवान्विनिर्ययौ ॥३२॥ पीनाहिभोगोत्थितमद्भुतं महज्ज्योतिः स्वधाम्ना ज्वलयद्दिशो दश ॥ प्रतीक्ष्य खेऽवस्थितमीशनिर्गमं विवेश तस्मिन्मिषतां दिवौकसाम् ॥ ३३ ॥ ततोऽतिहृष्टाः स्वकृतोऽकृतार्हणं पुष्पैः सुरा अप्सरसश्च नर्तनैः ॥ गीतैः सुगा वाद्यधराश्च वाद्यकैः स्तवैश्च विप्रा जयनिःस्वनैर्गणाः ॥ ३४ ॥ तदद्भुतस्तोत्रसुवाद्यगीतिकाजयादिनैकोत्सवमंगलस्वनान् ॥ श्रुत्वा स्वधाम्नोऽत्यज आगतोऽचिराद्दृष्ट्वा महीशस्य जगाम विस्मयम् ॥३५॥ राजन्नाजगरं चर्म शुष्कं वृंदावनेऽद्भुतम् ॥ व्रजौकसां बहुतिथं बभूवाक्रीडगह्वरम् ॥ ३६ ॥ एतत्कौमारजं कर्म हरेरात्माहिमोक्षणम् ॥ मृत्योः पौगंडके बाला दृष्ट्वोचुर्विस्मिता व्रजे ॥३७॥ नैतद्विचित्रं मनुजार्भमायिनः परावराणां परमस्य वेधसः ॥ अघोऽपि यत्स्पर्शनधौतपातकः प्रापात्मसाम्यं त्वसतां सुदुर्लभम् ॥ ३८ ॥ ॥

---

[1] स्वानां मृत्योर्मोक्षणमघासुरस्य च संसारान्मोक्षणमित्यर्थः ।

यस्य मूर्तेः प्रतिमा सकृन्मनसि स्थापिता सती प्रह्लादादिभ्य आत्मगतिं ददौ । स एव भगवान् यस्य मुखं प्रविष्टस्तस्याघासुरस्य मोक्षो जात इदं किमाश्चर्यम् ॥३९॥ सूत उवाच । हे शौनक, एवमाश्चर्यकरं कृष्णचरित्रं श्रुत्वा राजा पुनः पप्रच्छ ॥४०॥ राजोवाच ॥ हे ब्रह्मन्, कौमारे[1] कृतं कर्म बालाः पौगंडके कथमूचुः ॥४१॥ अत्रास्माकं महत्कौतुकं वर्तते । तद्ब्रूहि ॥ इयं नूनं हरेर्मायैव भवति । अन्यथैतन्न घटते ॥४२॥ किंच । वयं क्षत्रबंधवो[2]ऽपि धन्याः । यतस्त्वत्तः कृष्णकथामृतं पिबामः ॥ ४३ ॥ सूत उवाच ॥ हे शौनक, इत्थं पृष्टः शुकः प्रश्नस्मारितेन भगवता हृतसर्वेंद्रियत्वेन समाधिस्थो भूत्वा पुनः कथंचिल्लब्धबाह्यज्ञानः सन् शनैस्तं राजानं प्रत्याह ॥४४॥ इति श्रीमद्भागवतचूर्णिका० दशमस्कंधे पूर्वा०द्वादशोऽध्यायः ॥१२॥ ॥ त्रयोदशेऽहरद्ब्रह्मा वत्सान् पालांश्च मा-

सकृद्यदंगप्रतिमांऽतराहिता मनोमयी भागवतीं ददौ गतिम् ॥ स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायोंऽतर्गतो हि किं पुनः ॥३९॥ सूत उवाच ॥ इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रम् ॥ पप्रच्छ भूयोऽपि तदेव पुण्यं वैयासकिं यन्निगृहीतचेताः ॥४०॥ राजोवाच ॥ ब्रह्मन्कालांतरकृतं तत्कालीनं कथं भवेत् ॥ यत्कौमारे हरिकृतं जगुः पौगंडकेऽर्भकाः ॥४१॥ तद्ब्रूहि मे महायोगिन्परं कौतूहलं गुरो ॥ नूनमेतद्धरेरेव माया भवति नान्यथा ॥४२॥ वयं धन्यतमा लोके गुरोऽपि क्षत्रबंधवः ॥ यत्पिबामो मुहुस्त्वत्तः पुण्यं कृष्णकथामृतम् ॥४३॥ सूत उवाच ॥ इत्थं स्म पृष्टः स तु बादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियः ॥ कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तम ॥ ४४ ॥ इति श्रीमद्भा० महा दश० पूर्वार्धे द्वादशोऽध्यायः ॥१२॥

॥ श्रीशुक उवाच ॥ साधु पृष्टं महाभाग त्वया भागवतोत्तम ॥ यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः ॥१॥ सतामयं सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि ॥ प्रतिक्षणं नव्यवदच्युतस्य यत्स्त्रिया विटानामिव साधु वार्ता ॥२॥ शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥३॥ तथाघवदनान्मृत्यो रक्षित्वा वत्सपालकान् ॥ सरित्पुलिनमानीय भगवानिदमब्रवीत् ॥४॥ अहोऽतिरम्यं पुलिनं वयस्याः स्वकेलिसंपन्मृदुलाच्छवालुकम् ॥ स्फुटत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलम् ॥५॥ अत्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः ॥ वत्साः समीपेऽपः पीत्वा चरंतु शनकैस्तृणम् ॥६॥

यया । तदा तत्सर्वरूपोऽब्दं कृष्णः पूर्ववदाचरत् ॥ १ ॥ श्रीशुक उवाच ॥ हे भागवतोत्तम, त्वया साधु पृष्टम् । यतो मुहुर्हरिकथां शृण्वन्नपि त्वं पुनः तां कथां नवीनामिव करोषि ॥१॥ सारग्राहिणां सतां भगवत्कथा प्रतिक्षणं नवीनवद्भवति अयं तेषां स्वभाव एवास्ति । यथा स्त्रीलंपटानां पुंसां कामिन्या विलासवार्ता प्रतिक्षणं नवीनवद्भवति तद्वत् ॥२॥ तस्मात् हे नृप, इदं गुह्यमपि वदामि । त्वमेकाग्रमनाः शृणुष्व ॥३॥ तथाघासुरमुखाद्वत्सान्बालांश्च रक्षित्वा ततस्तान् यमुनातीर आनीय कृष्ण इदमाह ॥४॥ हे बालाः, इदं यमुनातटं रम्यम् । कोमलस्वच्छवालुकम् । प्रफुल्लितकमलसुगंधेनाकृष्टानां भ्रमराणां पक्षिणां च नादप्रतिध्वनिना लसद्भिर्वृक्षैर्व्याप्तमस्ति ॥५॥ अतोऽस्माभिरत्र भोक्तव्यम् । अस्माकं भोजनवेला गताऽतो वयं क्षुधापीडिताः स्मः ॥६॥ ॥

---

१ कौमारं पंचमाब्दांतं पौगंडं दशमावधि । कैशोरमापंचदशाद्यौवनं तु ततः परमिति । २ ब्राह्मणापराधेन क्षत्रियाधमा अपि ।

किंच । एते वत्सा जलं पीत्वा समीपे तृणं चरंतु ॥६॥ ततस्तथेत्युक्त्वा बाला वत्सानां जलं पाययित्वा तान् कोमलतृणे देशे संरुद्ध्य स्वस्वशिक्यानि मुक्त्वा कृष्णेन सह बुभुजुः ॥७॥ तदा कृष्णस्य सर्वतः संमुखा अर्भका बहुपंक्तिमंडलैः स्थिताः संतो विरेजुः ॥८॥ तत्र केचित्पुष्पैः केचित्पुष्पदलैः पर्णैः फलैः शिग्भिः शिलादिभिश्च पात्राणि कृत्वा ॥९॥ सर्वे स्वस्वभोज्यरुचिं मिथो दर्शयंतो हसंतो हासयंतश्च संतः श्रीकृष्णसहिता बुभुजुः ॥१०॥ तदोदरवस्त्रयोर्मध्ये वेणुं धारयन् वामकक्षे शृंगवेत्रे, वामकरे दध्योदनकवलं, अंगुलिसंधिषु बिल्वाम्रादिफलानि च धारयन् मित्राणि च हासयन् स्वर्गस्थे देवजने आश्चर्येण पश्यति सति बाललीलां कुर्वन् यज्ञभोक्ता भगवान् कृष्णो वत्सपालमध्यस्थः सन् बुभुजे ॥११॥ हे नृप, एवं बालेषु भुंजानेषु वत्सास्तृणलोभेन दूरं वनमध्ये विविशुः

तथेति पाययित्वार्भा वत्सनारुध्य शाद्वले ॥ मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा ॥७॥ कृष्णस्य विष्वक्पुरुराजिमंडलैरभ्याननाः फुल्लदृशो व्रजार्भकाः ॥ सहोपविष्टा विपिने विरेजुश्छदा यथांभोरुहकर्णिकायाः ॥८॥ केचित्पुष्पैर्दलैः केचित्पल्लवैरंकुरैः फलैः ॥ शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥९॥ सर्वे मिथो दर्शयंतः स्वस्वभोज्यरुचिं पृथक् ॥ हसंतो हासयंतश्चाभ्यवजह्रुः सहेश्वराः ॥१०॥ बिभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु ॥ तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलिः ॥११॥ भारतैवं वत्सपेषु भुंजानेष्वच्युतात्मसु ॥ वत्सास्त्वंतर्वने दूरं विविशुस्तृणलोभिताः ॥१२॥ तान्दृष्ट्वा भयसंत्रस्तानूचे कृष्णोऽस्य भीभयम् ॥ मित्राण्याशान्मा विरमतेहानेष्ये वत्सकानहम्॥१३॥इत्युक्त्वाद्रिदरीकुंजगह्वरेष्वात्मवत्सकान् ॥ विचिन्वन्भगवान्कृष्णः सपाणिकवलो ययौ ॥१४॥ अंभोजन्मजनिस्तदंतरगतो मायार्भकस्येशितुर्द्रष्टुं मंजु महित्वमन्यदपि तद्वत्सानितो वत्सपान् ॥ नीत्वान्यत्र कुरूद्वहांतरदधात्खेऽवस्थितो यः पुरा दृष्ट्वाघासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयम् ॥१५॥ ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् ॥ उभावपि वने कृष्णो विचिकाय समंततः ॥१६॥ क्वाप्यदृष्ट्वांतर्विपिने वत्सान्पालांश्च विश्ववित् ॥ सर्वं विधिकृतं कृष्णः सहसाऽवजगाम ह॥१७॥ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च ॥ उभयायितमात्मानं चक्रे विश्वकृदीश्वरः॥१८॥ यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषांबरम् ॥ यावच्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोऽङ्गवदजः सर्वस्वरूपो बभौ ॥ १९ ॥

॥१२॥ तदा भीतान् गोपान् कृष्ण आह । हे सखायः, भोजनान्मा विरमत । वत्सानहमानेष्ये ॥ १३ ॥ एवमुक्त्वा कृष्णोऽद्रिगुहाकुंजेषु संकटस्थानेषु च वत्सान् विचिन्वन् सपाणिकवलो ययौ ॥ १४॥ तदा यो ब्रह्मा पूर्वं कृष्णस्याघासुरमोक्षणं दृष्ट्वा परं विस्मयं प्राप्तः स ब्रह्मा श्रीकृष्णस्यान्यमपि सुंदरं महिमानं द्रष्टुं वनात्तस्य वत्सान् भोजनस्थानाद्वत्सपालांश्चान्यत्र मायाशये नीत्वा स्वयं तिरो बभूव ॥१५॥ ततः कृष्णो वने वत्सानदृष्ट्वा यमुनातटे बालांश्चादृष्ट्वा वने तान् मृगयन् ॥१६॥ वत्सान् वत्सपांश्च क्वापि न दृष्ट्वा सर्वं ब्रह्मकृतं ज्ञात्वा ॥ १७॥ कृष्णो वत्सवत्सपालमातॄणां ब्रह्मणश्च हर्षं कर्तुं वत्सानां गोपालानां च स्वरूपं दधार ॥ १८ ॥ तदेवाह । वत्सपानां वत्सानां च यावच्छरीरप्रमाणं, यावत्करचरणादिकं, यावंति यष्टिशृंगवेणुदलशिक्यानि, यावंति वस्त्राभरणानि, यावंति

गुणस्वभावनामस्वरूपवयांसि, यावच्च क्रीडादिकं तावद्रूपः कृष्णो बभौ । तदा सर्वं विष्णुमयं जगदिति या वाणी सा प्रत्यक्षा बभूव ॥ १९ ॥ एवं सर्वात्मा कृष्ण आत्मरूपान् वत्सान् स्वात्मरूपैर्गोपबालैर्निवार्यात्मरूपैर्विहारैश्च क्रीडन् व्रजं प्रविवेश ॥ २० ॥ तत्तद्वत्सान् पृथक् नीत्वा तत्तद्गोशालायां स्थापयित्वा तत्तद्गृहं प्रविवेश ॥२१॥ तदा तन्मातरो वेणुनादं श्रुत्वोत्थाय पुत्रान्मत्वा परं ब्रह्मैव दोर्भिरालिंग्य स्नेहस्नुतं स्तनं पाययामासुः॥२२॥एवं नित्यवत्कृष्णः स्वाचरितैर्मातॄः प्रहर्षयन् सायंकाले ताभिर्मातृभिर्मज्जनमर्दनलेपालंकारवस्त्रतिलकाशनादिभिर्लालितः ॥ २३ ॥ गावो गोष्ठं प्राप्य स्वस्ववत्सान् लिहंत्यः संत्यो हुंकारं कृत्वा पयोऽपाययन् ॥ २४ ॥ हे नृप, गोगोपीनामस्मिन् वत्सपुत्ररूपे श्रीकृष्णे स्नेहाधिक्यं[1] विना मातृभावः पूर्ववदासीत् । गोगोपीष्वपि हरेर्बालत्वं

स्वयमात्माऽऽत्मगोवत्सान्प्रतिवार्यात्मवत्सपैः ॥ क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद्व्रजम् ॥२०॥ तत्तद्वत्सान्पृथङ्नीत्वा तत्तद्गोष्ठे निवेश्य सः ॥ तत्तदात्माऽभवद्राजंस्तत्तत्सद्म प्रविष्टवान् ॥ २१ ॥ तन्मातरो वेणुरवत्वरोत्थिता उत्थाप्य दोर्भिः परिरभ्य निर्भरम् ॥ स्नेहस्नुतस्तन्यपयःसुधाऽऽसवं मत्वा परं ब्रह्म सुतानपाययन् ॥ २२ ॥ ततो नृपोन्मर्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः ॥ संलालितः स्वाचरितैः प्रहर्षयन्सायं गतो यामयमेन माधवः ॥२३॥ गावस्ततो गोष्ठमुपेत्य सत्वरं हुंकारघोषैः परिहूतसंगतान् ॥ स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहंत्यः स्रवदौधसं पयः ॥२४॥ गोगोपीनां मातृतास्मिन्सर्वा स्नेहर्धिकां विना ॥ पुरोवदास्वपि हरेस्तोकता मायया विना ॥ २५ ॥ व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् ॥ शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत् ॥ २६ ॥ इत्थमात्माऽऽत्मनाऽऽमानं वत्सपालमिषेण सः ॥ पालयन्वत्सपो व[illegible]वनगोष्ठयोः ॥२७॥ एकदा चारयन्वत्सान्सरामो वनमाविशत् ॥ पंचषासु त्रियामासु हायनापूरणीष्वजः ॥ २८ ॥ [illegible]च्चरतो गावो वत्सानुपव्रजम् ॥ गोवर्धनाद्रिशिरसि चरंत्यो ददृशुस्तृणम् ॥२९॥ दृष्ट्वाथ तत्स्नेहवशोऽस्मृतात्मा सगोत्र[illegible]पदुर्गमार्गः ॥ द्विपात्ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुंकृतैरास्नुपया जवेन ॥ ३० ॥ समेत्य गावोऽधोवत्सान्वत्सवत्योऽप्यपा[illegible] गिलंत्य इव चांगानि लिहंत्यः स्वौधसं पयः ॥ ३१ ॥ गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना ॥ दुर्गाध्वकृच्छ्रतोऽभ्येत्य [illegible]र्ददृशुः सुतान् ॥ ३२ ॥ ॥

मायया[2] विना पूर्ववदासीत् ॥२५॥ तदाह । व्रजौकसां स्वबालेषु स्नेहवल्ली नित्यं वर्षपर्यंतं निःसीम [illegible]धे ॥२६॥ एवं कृष्णो वत्सवत्सपालमिषेण वर्षपर्यंतं वनगोष्ठयोः क्रीडितवान् ॥२७॥ किंचिदूनवर्षपर्यंतं रामस्यापि मोह आसीदित्याह । एकदा स रामः कृष्णो वर्षस्य पंचसु षट्सु वा रात्रिषु न्यूनासु सतीषु वनं विवेश ॥ २८ ॥ ततो गोवर्धनशिखरे चरंत्यो गावो व्रजसमीपे चरतो वत्सान् ददृशुः ॥ २९ ॥ ततः स गोसमूहो वत्समोहेन रक्षकानगणयित्वा दुर्गममार्गेण मुखानि पुच्छानि चोन्नमय्य स्रवत्पया हुंकारेण द्रुतं व्रजसमीपं जगाम ॥३०॥ ततो गावो वत्सान् प्राप्यांगानि गिलंत्य इव लिहंत्यः पुनः प्रसूता अपि पूर्ववत्सेभ्यो दुग्धमपाययन् ॥ ३१ ॥ ततो गोपा गवां रोधनप्रयत्नस्य निष्फलत्वेन जातक्रोधा अतिदुःखमार्गेण तत्रैत्य गोवत्सैः सह सुतान् दृष्ट्वा ॥ ३२ ॥

---

[1] स्नेहाधिक्यं त्विदानीं विशेष इत्यर्थः । [2] ममेयं माताहमस्याः पुत्र इति मोहं विनेत्यर्थः ।

क्रोधहीना भूत्वा प्रेमातिशयेन दोर्भिः पुत्रानालिंग्य मूर्धानमवघ्राय परमां मुदं प्रापुः॥ ३३ ॥ तत[illegible]त्रेभ्यः सकाशात्पुनः कृच्छ्रेण शनैर्निवृत्ता आसन् ॥३४॥ रामो गवां मुक्तस्तनेष्वपि वत्सेषु प्रेमवृद्धेरतिशयं दृष्ट्वा तत्कारणमजानन्नचिंतयत् ॥३[illegible]हो व्रजस्य प्रेम यथा पूर्वं सर्वात्मनि कृष्ण आसीत्तथा धुना स्वतोकेष्वपि वर्धते किमेतदद्भुतम् । ममाप्येतेषु[1] वत्सवत्सपालेष्वपूर्वं प्रेम वर्धते एत[illegible]॥३६॥इयं माया देवानां मनुष्याणां दैत्यानां वा । न केषामपि । यतो मामपि मोहयति अत इयं कृष्णस्यैव ॥३७॥ एवं संचिंत्य रामो वत्सान् ब[illegible]दृष्ट्या सर्वान् कृष्णरूपान् ददर्श ॥३८॥ ततः कृष्णं दृष्ट्वा जगाद । हे कृष्ण, एते तावद्वत्सा ऋषीणामंशाः पालास्तु देवानामंशा इत्यहं वेद्मि । अ[illegible] त्वमेव भासि एतत्कथं तद्विविच्य कथय ।

तदीक्षणोत्प्रेमरसाप्लुताशया जातानुरागा गतमन्यवोऽर्भकान् ॥ उदुह्य दोर्भिः परि[illegible] घ्राणैरवापुः परमां मुदं ते ॥३३॥
ततः प्रवयसो गोपास्तोकाश्लेषसुनिर्वृताः ॥ कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः[illegible] व्रजस्य रामः प्रेमर्धेर्वीक्ष्यौत्कंठ्यमनुक्षणम् ॥
मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिंतयत् ॥ ३५ ॥ किमेतदद्भुतमिव वा[illegible]त्मनि ॥ व्रजस्य सात्मनस्तोकेष्वपूर्वं
प्रेम वर्धते ॥३६॥ केयं वा कुत आयाता दैवी वा नार्युतासुरी ॥ प्रायो मा[illegible] भर्तुर्नान्या मेऽपि विमोहिनी ॥३७॥
इति संचिंत्य दाशार्हो वत्सान्सवयसानपि ॥ सर्वानाचष्ट वैकुंठं चक्षुषा वयुनेन [illegible]८ ॥ नैते सुरेशा ऋषयो न चैते त्वमेव
भासीश भिदाश्रयेऽपि ॥ सर्वं पृथक्त्वं निगमात्कथं वदेत्युक्तेन वृत्तं प्रभुणा बलोऽवैत् ॥ ३९ ॥ तावदेत्यात्मभूरात्ममानेन त्रुट्यनेहसा ॥
पुरोवदब्दं क्रीडंतं ददृशे सकलं हरिम् ॥४०॥ यावंतो गोकुले बालाः सवत्साः सर्व एव हि ॥ मायाशये शयाना मे
नाद्यापि पुनरुत्थिताः॥४१॥ इत एतेऽत्र कुत्रत्या मन्मायामोहितेतरे ॥ तावंत एव तत्राब्दं क्रीडंतो विष्णुना समम्॥४२॥एवमेतेषु
भेदेषु चिरं ध्यात्वा स आत्मभूः ॥ सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंचन ॥ ४३ ॥ एवं संमोहयन्विष्णुं विमोहं विश्वमोहनम् ॥
स्वयैव माययाजोऽपि स्वयमेव विमोहितः ॥ ४४ ॥ तम्यां तमोवन्नैहारं खद्योतार्चिरिवाहनि ॥ महतीतरमायैश्यं
निहंत्यात्मनि युंजतः ॥४५॥ तावत्सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् ॥ व्यदृश्यंत घनश्यामाः पीतकौशेयवाससः ॥४६॥

तदा कृष्णेन संक्षेपेणोक्तं सर्वं वृत्तांतं बलो ज्ञातवान् ॥ ३९ ॥ अथ ब्रह्मा आत्मनो मानेन त्रुटिमात्रेण कालेन तत्रैत्य पूर्ववत् वत्सपालैः सह क्रीडंतं हरिं दृष्ट्वा व्यतर्कयत् ॥४०॥ अहो एते वत्सा बालाश्च मम मायाशये शयाना नाद्याप्युत्थिताः ॥ ४१ ॥ किंच । अत्र वने मन्मायामोहितेभ्य इतरे कृष्णेन सह क्रीडंत एते कुत्रत्याः ॥ ४२ ॥ एवं चिरं ध्यात्वा ब्रह्मा सत्याः के कतरे चासत्या इति ज्ञातुं समर्थो नासीत् ॥ ४३॥ यथा दिवसे खद्योतकांतिः किंचिदपि प्रकाशं न करोति । किं तु सूर्यकांत्या परावृत्य खद्योतस्यैव तेजोहीनत्वं संपादयति एवं विश्वमोहनं विष्णुं मोहयितुं प्रवृत्तो ब्रह्मा स्वया मायया स्वयमेव मोहं प्राप ॥४४॥४५॥ तावद्ब्रह्मणः पश्यतः सतः सर्वे वत्साः पालाश्च घनश्यामाः पीतांबरधराः ॥ ४६ ॥ ॥ ॥

---

[1] मम कृष्ण इवैतेषु प्रेमवृद्धिकारणं नास्तीत्यर्थः ।

चतुर्भुजाः शंखचक्रगदापद्मधराः किरीटकुंडलवनमालाधराः ॥४७॥ श्रीवत्सलांछनबाहुभूषणादिलक्षिताः नूपुरकटिसूत्रांगुलीयकैः शोभिताः ॥४८॥ तुलसीनवमालादिभिरापादमस्तकं पूर्णाः॥४९॥चंद्रकिरणवद्धवलस्मितयुक्तैः कटाक्षावलोकनैः स्वभक्तमनोरथानां रजःसत्वगुणाभ्यां स्रष्टार इव पालका इव च व्यदृश्यंत ॥५०॥ब्रह्मादिस्तंबपर्यंतैश्चराचरैर्नृत्यगीताद्यनेकसत्कारैः पृथक् पृथगुपासिताः॥५१॥ तथाऽणिमाद्यष्टैश्वर्यैर्मायाऽविद्यादिशक्तिभिर्महदादिभिश्चतुर्विंशतिभिस्तत्वैश्च तथा कालस्वभावसंस्कारादिभिः सर्वैर्मूर्तिमद्भिरुपासिताः ॥५२॥५३॥ ततस्ताः सर्वा उपास्यमूर्तयः सत्यरूपा ज्ञानरूपा अनंताः सदैकरूपाः सर्वप्रकाशकब्रह्मरूपाश्च व्यदृश्यंत । एवं ब्रह्मा एकदैव सर्वान् ददर्श ॥५४॥ ५५ ॥ ततो ब्रह्माऽत्याश्चर्येण चकितः सन् दृष्टिमंतर्मुखां कृत्वा भगवन्मूर्तीनां तेजसा स्तब्धेंद्रि-

चतुर्भुजाः शंखचक्रगदाराजीवपाणयः ॥ किरीटिनः कुंडलिनो हारिणो वनमालिनः ॥४७॥ श्रीवत्सांगददोरत्नकंबुकंकणपाणयः ॥ नूपुरैः कटकैर्भाताः कटिसूत्रांगुलीयकैः॥ ४८ ॥ आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः ॥ कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः ॥४९॥ चंद्रिकाविशदस्मेरैः सारुणापांगवीक्षितैः ॥ स्वकार्थानामिव रजःसत्वाभ्यां स्रष्टृपालकाः ॥५०॥ आत्मादिस्तंबपर्यंतैर्मूर्तिमद्भिश्चराचरैः ॥ नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिताः ॥५१॥ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः ॥ चतुर्विंशतिभिस्तत्वैः परीता महदादिभिः॥५२॥कालस्वभावसंस्कारकामकर्मगुणादिभिः॥स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः॥५३॥ सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः ॥ अस्पृष्टभूरिमाहात्म्या अपि ह्युपनिषद्दृशाम्॥५४॥एवं सकृद्ददर्शाजः परब्रह्मात्मनोऽखिलान् ॥ यस्य भासा सर्वमिदं विभाति सचराचरम् ॥५५॥ ततोऽतिकुतुकोद्वृत्य स्तिमितैकादशेंद्रियः ॥ तद्धाम्नाऽभूदजस्तूष्णीं पूर्देव्यंतीव पुत्रिका ॥५६॥ इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ ॥ अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा सपदि परमोऽजाजवनिकाम् ॥ ५७॥ ततोऽर्वाक्प्रतिलब्धाक्षः कः परेतवदुत्थितः ॥ कृच्छ्रादुन्मील्य वै दृष्टीराचष्टेदं सहात्मना ॥५८॥ सपद्येवाभितः पश्यन्दिशोऽपश्यत्पुरः स्थितम् ॥ वृंदावनं जनाजीव्यद्रुमाकीर्णं समाप्रियम्॥५९॥ यत्र नैसर्गदुर्वैराः सहासन्नृमृगादयः ॥ मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम् ॥६०॥ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंतमगाधबोधम् ॥ वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट॥६१॥ दृष्ट्वा त्वरेण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदंडमिवानिपात्य ॥ स्पृष्ट्वा चतुर्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभिषेकम् ॥ ६२ ॥ ॥

यः सन् व्रजाधिष्ठात्र्या देवतायाः समीपे चतुर्मुखी कृतकप्रतिमेव तूष्णीं बभूव ॥५६॥ हे नृप,एवं ब्रह्मदेवे किमिदमिति मुह्यति सति श्रीकृष्णः स्वमायारूपां तिरस्करिणीमपसारितवान्॥५७॥ ततो ब्रह्मा यथा मृतः कथंचित्पुनरुत्तिष्ठति तथोत्थाय नेत्राण्युन्मील्य स्वदेहेन सहेदं जगदवलोकितवान्॥५८॥ ततः सर्वतः पश्यन् पुरः स्थितं वृंदावनं ददर्श ॥५९॥ तदेवाह । यत्र वने मनुष्याः सिंहादयोऽपि मित्राणीवैकत्र तिष्ठंति ॥६०॥ तत्र गोपबालकनाट्यं धृत्वा पूर्ववद्वत्सान् सखींश्च सर्वतः शोधयंतं सपाणिकवलं ब्रह्मरूपं कृष्णं ब्रह्मा ददर्श ॥ ६१ ॥ एवं दृष्ट्वा हंसवाहनाद्भुव्यवतीर्य कृष्णं दंडवन्नत्वा चतुर्मुकुटाग्रैस्तच्चरणद्वयं

स्पृष्ट्वा तदुपरि आनंदाश्रुजलैरभिषेकं कृतवान् ॥ ६२ ॥ ततो ब्रह्मोत्थायोत्थाय श्रीकृष्णस्य पूर्वदृष्टं महित्वं स्मृत्वा पुनः पुनः कृष्णपादयोश्चिरं पतन्नास्ते स्म ॥६३॥ ततः शनैरुत्थाय नेत्रे विमृज्य श्रीकृष्णं वीक्ष्य नम्रकंधरः कृतांजलिर्भयेन कंपमानश्च सन् गद्गदया वाचा तुष्टाव॥६४॥ इति श्रीमद्भागव० दशमपूर्वा० त्रयोदशोऽध्यायः ॥१३॥ ॥ चतुर्दशेऽद्भुतं दृष्ट्वा पूर्वागंतुकनिश्चयम् । अनीशः कर्तुमस्तौषीत्कृष्णं ब्रह्मा विमोहितः ॥१ ॥ ब्रह्मोवाच ॥ हे स्तुत्य, मेघश्यामाय पीतांबराय गुंजाभिः कृतकर्णभूषणाय वनपुष्पमालाधारिणे मयूरपिच्छमुकुटाय कवलवेत्रश्रृंगवेणुभिः शोभिताय कोमलचरणाय तुभ्यं नमः ॥ १ ॥ हे देव, अतिसुलभतया प्रकाशितस्याप्यस्य तव स्वरूपस्य महिमानं ज्ञातुमहमन्यो वा कोऽपि न समर्थः । तदा केवलसुखानुभवमात्रस्य निर्गुणस्वरूपस्य तव

उत्थायोत्थाय कृष्णस्य चिरस्य पादयोः पतन् ॥ आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ॥ ६३ ॥ शनैरथोत्थाय विमृज्य लोचने मुकुंदमुद्वीक्ष्य विनम्रकंधरः ॥ कृतांजलिः प्रश्रयवान्समाहितः सवेपथुर्गद्गदयैलतेलया ॥ ६४ ॥ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजाय ॥१॥ अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि ॥ नेशे महि त्ववसितुं मनसांतरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः ॥ २ ॥ ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्ताम् ॥ स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलोक्याम् ॥ ३ ॥ श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये ॥ तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥ ४॥ पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ॥ विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेंऽजोऽच्युत ते गतिं पराम् ॥ ५ ॥ तथापि भूमन्महिमाऽगुणस्य ते विबोद्धुमर्हत्यमलांतरात्मभिः ॥ अविक्रियात्स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा ॥ ६ ॥ गुणात्मनस्तेऽपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेऽस्य ॥ कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः खे मिहिका द्युभासः ॥ ७ ॥ तत्तेऽनुकंपां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकम् ॥ हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ ८ ॥ ॥ ॥

महिमानं ज्ञातुं कः समर्थो भवेन्न कोऽपि ॥२॥ तस्माद्धे अजित, ज्ञाने प्रयत्नं हित्वा स्वस्थान एव स्थिताः संतः कर्णमार्गप्राप्तां त्वत्कथां प्रेम्णा श्रुत्वा ये जीवंति तैस्त्वं जितोऽसि ॥३॥ हे विभो, ये चतुर्विधपुरुषार्थसाधनरूपां ते भक्तिं हित्वा ज्ञानप्राप्तये यत्नं कुर्वंति तेषां क्लेश एवावशिष्यते । यथा तुषकंडणकारिणां क्लेश एव फलं तद्वत् ॥४॥ हे व्यापक, पुरा बहवोऽपि योगिनोऽष्टांगयोगैर्ज्ञानमप्राप्य पश्चात्कथाश्रवणादिना प्राप्तया भक्त्यैवात्मानं ज्ञात्वा सुखेन ते परां गतिं प्राप्ताः ॥५॥ हे विभो, तथापि गुणातीतस्य तव महिमा जितेंद्रियैः पुरुषैः कदाचिज्ज्ञातुं योग्यो भवति ॥६ ॥ जगत्पालनाय बहुगुणाविष्कारेणावतीर्णस्य तव गुणानां प्रमाणं कर्तुं के समर्थाः न केऽपि ॥७॥ तस्मात्तव कृपा कदा भविष्यतीति प्रतीक्षन् स्वकर्मफलमनासक्ततया भुंजानो देहवाङ्मनोभिस्तव

श्रवणादिभक्तिं च कुर्वन् यो जीवेत स मुक्तिं प्राप्नोति ॥८॥ एवं स्तुत्वा स्वापराधं निवेदयति । हे ईश, मम दुर्जनत्वं पश्य । यतः सर्वमोहके त्वयि स्वमायां प्रसार्य तवैश्वर्यं द्रष्टुमहमिच्छितवान् । एवं कर्तुं त्वय्यहं कियान् । न किंचित् ॥९॥ अतो हे अच्युत, त्वत्तोऽन्यमीश्वरमात्मानं मन्यमानस्य मेऽपराधं क्षमस्व ॥१०॥ हे देव, प्रकृतिमहत्तत्वाहंकारपंचभूतरूपैरावरणैर्वेष्टितो यो ब्रह्मांडघटः स एव सप्तवितस्तिप्रमाणो देहो यस्य सोऽहं क्व । ईदृग्विधासंख्यब्रह्मांडरूपपरमाणुपरिभ्रमणार्थं गवाक्षा इव रोमंरध्राणि यस्य तस्य तव महिमा च क्व ॥११॥ अपिच । हे ईश, गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुरपराधाय भवति किम् । नैव भवति । अतः सर्वस्य कुक्षिगतत्वात्तन्मध्यगतस्य ममाप्यपराधं मातृवत्क्षमस्व ॥१२॥ प्रलयकालीनसमुद्रे स्थितस्य नारायणस्य नाभिकमलाद्ब्रह्मा जात इति वाक् तावन्मिथ्या न । हे ईश, अहं त्वत्तो नोत्पन्नोऽस्मि किम् । अपि तु त्वत्त एवोत्पन्नोऽस्मि ॥१३॥ तर्हि नारायणपुत्रः स्यास्त्वं तत्र मम किं प्राप्तं तत्राह । त्वं सर्वदेहिनामात्मा सर्वसाक्षी नारायणो नासि किम् । अस्येव । ननु देशकालवस्तुपरिच्छेदरहितस्य मे कथं जलाश्रयनारायणत्वं तत्राह । तज्जलस्थितं तव नारायणस्वरूपं सत्यं न । किंतु मायैव ॥ १४ ॥ यदि तत्सत्यं तर्हि कमलनालमार्गेणांतःप्रविश्य संवत्सरशतं विचिन्वतापि मया तत्र किमिति न दृष्टम् । ततस्तपःकरणानंतरं हृदि किमिति सुदृष्टम् । अतो मायैव ॥ १५ ॥ हे मायानिवर्तक, अत्रैवावतारे त्वया बहिः स्फुटस्य प्रपंचस्य स्वोदरमध्ये यशोदायाः प्रदर्शनेन मायात्वं प्रकटीकृतमस्ति ॥ १६ ॥ ननु बहिः स्थितस्य जगतोंऽतर्जठरे प्रतिबिंबं पतितमिति चेत्तर्हि प्रतिबिंबं बाह्याद्विलोमतया प्रतीयते । न तु तदस्ति । तव चादर्शस्थानीयस्य त्वयि प्रतीतिर्न स्यात्सापि जाता । अतः सा मायैव ॥ १७ ॥ ममापि त्वया मायात्वं दर्शितम् । तदाह । त्वमादावेकोऽसि । ततो वत्सास्तत्पालाश्चासि । ततस्ते यावं-

पश्येश मेऽनार्यमनंत आद्ये परात्मनि त्वय्यपि मायिमायिनि ॥ मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियानैच्छमिवार्चिरग्नौ ॥९॥
अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः ॥ अजावलेपांधतमोंऽधचक्षुष एषोऽनुकंप्यो मयि नाथवानिति
॥ १० ॥ काहं तमोमहदहंखचराग्निवार्भूसंवेष्टितांडघटसप्तवितस्तिकायः ॥ क्वेदृग्विधाऽविगणितांडपराणुचर्यावाताध्वरोमविवरस्य
च ते महित्वम् ॥ ११ ॥ उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजागसे ॥ किमस्तिनास्तिव्यपदेशभूषितं तवास्ति
कुक्षेः कियदप्यनंतः ॥ १२ ॥ जगत्त्रयांतोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् ॥ विनिर्गतोऽजस्त्विति वाङ् न वै
मृषा किंत्वीश्वर त्वन्न विनिर्गतोऽस्मि ॥ १३ ॥ नारायणस्त्वं नहि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी ॥ नारायणोंऽगं
नरभूजलायनात्तच्चापि सत्यं न तवैव माया ॥१४॥ तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव ॥ किंवा सुदृष्टं हृदि मे
तदैव किं नो सपद्येव पुनर्व्यदर्शि ॥१५॥ अत्रैव मायाधमनावतारे ह्यस्य प्रपंचस्य बहिः स्फुटस्य ॥ कृत्स्नस्य चांतर्जठरे जनन्या
मायात्वमेव प्रकटीकृतं ते ॥ १६ ॥ यस्य कुक्षाविदं सर्वं सात्मं भाति यथा तथा ॥ तत्त्वय्यपीह तत्सर्वं किमिदं मायया विना
॥ १७ ॥ अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शितमेकोऽसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि ॥ तावंतोऽसि
चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावंत्येव जगंत्यभूस्तदमितं ब्रह्माऽद्वयं शिष्यते ॥ १८ ॥ ॥

तस्तावंतश्चतुर्भुजास्तावंत्येव जगंति चाभूः । अंते त्वमेक एवावशिष्टोऽसि ॥१८॥ हे ईश, तव स्वरूपमजानतां त्वं स्वातंत्र्येण मायां विस्तार्य भासि । कथम् । जगत्सृष्टौ ब्रह्मेव । पालने विष्णुरिव । संहारे रुद्र इव च भासि ॥ १९ ॥ हे रक्षक, देवर्षिमनुष्यतिर्यक्षु वामनपरशुरामरामवराहरूपेण तव जन्म दुष्टानां मदनिग्रहाय साधूनामनुग्रहाय च जातम् ॥२०॥हे व्यापक, हे भगवन्, हे परमात्मन्, हे योगेश्वर, यदा त्वं योगमायां विस्तार्य क्रीडसि तदा तव लीलाः क्व कथं कदा कति चेति त्रैलोक्ये को वेत्ति न कोऽपि । अतस्तव योगमायावैभवमचिंत्यमस्ति ॥२१॥ तस्मादिदं जगन्नित्यसुखबोधरूपे त्वयि त्वत्सत्तया अनित्यमपि नित्यवत्। असुखमपि सुखवत् । अचेतनमपि चेतनवत् भासते ॥२२ ॥ किंच । त्वं एकः सत्यः आत्मा आद्यः पुराणः पुरुषः नित्यः पूर्णः अक्षरोऽमृतोऽनंतो

अजानतां त्वत्पदवीमनात्मन्यात्माऽऽत्मना भासि वितत्य मायाम् ॥ सृष्टाविवाहं जगतो विधान इव त्वमेषोंऽत इव त्रिनेत्रः ॥१९॥
सुरेष्वृषिष्वीश तथैव नृष्वपि तिर्यक्षु यादस्स्वपि तेऽजनस्य ॥ जन्मासतां दुर्मदनिग्रहाय प्रभो विधातः सदनुग्रहाय च ॥ २० ॥ को
वेत्ति भूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्याम् ॥ क्व वा कथं वा कति वा कदेति विस्तारयन्क्रीडसि योगमायाम् ॥२१॥
तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ॥ त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यदपि यत्सदिवाभाति
॥२२॥ एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः॥ नित्योऽक्षरोऽजस्रसुखो निरंजनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः
॥२३॥ एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते ॥ गुर्वर्कलब्धोपनिषत्सुचक्षुषा ये ते तरंतीव भवानृतांबुधिम्
॥२४॥ आत्मानमेवात्मतयाऽविजानतां तेनैव जातं निखिलं प्रपंचितम् ॥ ज्ञानेन भूयोऽपि च तत्प्रलीयते रज्ज्वामहेर्भोगभवाभवौ
यथा ॥२५॥ अज्ञानसंज्ञौ भवबंधमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात् ॥ अजस्रचित्यात्मनि केवले परे विचार्यमाणे
तरणाविवाहनी ॥२६॥ त्वामात्मानं परं मत्वा परमात्मानमेव च ॥ आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताऽज्ञता ॥२७॥ अंतर्भवेऽनंत
भवंतमेव ह्यतत्त्यजंतो मृगयंति संतः ॥ असंतमप्यंत्यहिमंतरेण संतं गुणं तं किमुयंति संतः ॥ २८ ॥ अथापि ते देव
पदांबुजद्वयप्रसादलेशानुगृहीत एव हि ॥ जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन् ॥२९॥ तदस्तु मे
नाथ स भूरिभागो भवेऽत्रवाऽन्यत्र तु वा तिरश्चाम् ॥ येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवम् ॥ ३० ॥

ज्योतिर्निरंजनश्चासि ॥२३॥ एवंभूतं त्वां गुरोर्लब्धेन ज्ञानचक्षुषा ये पश्यंति त एव संसारसमुद्रं तरंति ॥२४॥ आत्मस्वरूपमजानतामेव पुंसामज्ञानेन प्रपंचो भवति स पुनरात्मस्वरूपज्ञानेन लीयते । यथा रज्जोरज्ञानेन भासितः सर्पो रज्जुज्ञानेन निवर्तते तद्वत् ॥२५॥ अतोऽज्ञानसंज्ञावेव बंधमोक्षौ स्तः । तौ च अखंडानंदानुभवरूपे आत्मनि विचार्यमाणे सति नाशं प्राप्नुतः ॥२६॥ हे प्रभो, त्वय्यात्मनि देहादिमध्यस्य देहादावात्मानं चाध्यस्य देहे नष्ट आत्मा बहिर्मृग्यत इत्याश्चर्यम्। नहि गृहे नष्टं वस्तु वने मृग्यते ॥२७॥ अतो विवेकिनस्त्वां चिज्जडात्मके शरीर एव जडं त्यजंतः संतो मृगयंति । तस्मात्त्वत्स्वरूपज्ञानेनैव मुक्तिर्भवति ॥२८॥ अथापि हे देव, तव चरणकमलद्वयप्रसादलेशेनानुगृहीत एव पुमान् तव महिम्नस्तत्त्वं जानाति नान्यः॥ २९॥ तस्मात् हे नाथ, अत्र ब्रह्मज-

न्मनि कर्मवशात्प्राप्तायां तिर्यग्योनौ वा तदेव मम भूरिभाग्यं प्राप्नोतु । येन भाग्येन त्वद्भक्तानां मध्ये यः कश्चिदपि भक्तो भूत्वा तव चरणकमलमत्यर्थं सेवेय ॥३०॥ हे कृष्ण, व्रजस्था गावो गोप्यश्चातिधन्याः । यासां स्तन्यं वत्सानां पुत्राणां च स्वरूपेण प्रतिक्षणं तृप्यता त्वया पीतम् । यस्य तव तृप्तये सर्वेऽपि यज्ञा अद्यापि न शक्ताः ॥३१॥ अहो नंदगोपव्रजौकसां महद्भाग्यम् । येषां परमानंदं पूर्णं ब्रह्म मित्रमस्ति ॥ ३२ ॥ एषां भाग्यमहिमा तावदास्ताम् । मनोबुद्ध्यहंकारचक्षुरादींद्रियाधिष्ठातारो वयं त्रयोदश देवा अपि भूरिभाग्याः । यत एषां गोकुलवासिनामिंद्रियरूपैः पानपात्रैश्चतुर्दशस्य चित्ताधिष्ठातुर्वासुदेवस्य तेऽमृततुल्यं चरणकमलमकरंदं मुहुः [1]पिबामः ॥३३॥ तस्मात् हे नाथ, अत्र लोके तत्रापि गोकुले कृमिकीटादेरपि जन्म मे भवतु । यस्मिन् जन्मनि गोकुलवासिनां मध्ये यस्य कस्यापि चरणरजोऽभिषेको मदुपरि स्यात् । येषां गोकुलवासिनां सर्वमायुष्यमपि त्वमेव जातोऽसि ॥३४॥ हे देव, भवान् एषां व्रजवा-

अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा ॥ यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि न चालमध्वराः ॥३१॥ अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसाम् ॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम्॥३२॥एषा तु भाग्यमहिमाऽच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः ॥ एतद्धृषीकचषकैरसकृत्पिबामः शर्वादयोंऽघ्र्युदजमध्वमृतासवं ते ॥ ३३ ॥ तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि कतमांघ्रिरजोभिषेकम् ॥ यज्जीवितं तु निखिलं भगवान्मुकुंदस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥ ३४ ॥ एषां घोषनिवासिनामुत भवान्किं देव रातेति नश्चेतो विश्वफलात्फलं त्वदपरं कुत्राप्ययन्मुह्यति ॥ सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥ ३५ ॥ तावद्रागादयः स्तेनास्तावत्कारागृहं गृहम् ॥ तावन्मोहोंऽघ्रिनिगडो यावत्कृष्ण न ते जनाः ॥ ३६ ॥ प्रपंचं निष्प्रपंचोऽपि विडंबयसि भूतले ॥ प्रपन्नजनतानंदसंदोहं प्रथितुं प्रभो ॥ ३७ ॥ जानंत एव जानंतु किं बहूक्त्या न मे प्रभो ॥ मनसो वपुषो वाचो वैभवं तव गोचरः ॥ ३८ ॥ अनुजानीहि मां कृष्ण सर्वं त्वं वेत्सि सर्वदृक् ॥ त्वमेव जगतां नाथो जगदेतत्तवार्पितम् ॥ ३९ ॥ ॥

सिनां सर्वफलात्मकादात्मस्वरूपादन्यत्फलं किं दास्यतीति मे मनो विचारं कुर्वत् सत् मुह्यति । यतो भक्तवेषानुकरणमात्रेण पूतनापि कुलसहिता त्वत्स्वरूपं प्राप्ता । येषां तु गृहधनस्त्रीपुत्रप्राणांतःकरणानि त्वदर्थमेव संति तेषामपि तदेव फलं त्वं दास्यसि चेत्तर्हि तदतीवाल्पम् । अतो भवानेषां भक्त्या ऋणीवास्ते ॥ ३५ ॥ हे कृष्ण, यावत्त्वद्भक्ता न जातास्तावदेव तेषां विवेकधैर्यादिधनस्य रागलोभादयश्चौरा भवंति । तथा गृहमपि तेषां तावदेव कारागृहं भवति । मोहोऽपि तावदेव पादशृंखला स्यात् । त्वद्भक्तानां तु रागादयोऽपि मोचका एव ॥३६॥ किंच। हे प्रभो, शरणागतजनानामानंदं विस्तारयितुं निष्प्रपंचोऽपि त्वं प्रपंचं विस्तारयसि ॥३७॥ एवमादित आरभ्य भगवत्स्वरूपस्य दुर्ज्ञेयत्वमुक्तम् । केचित्तु जानीम इति स्थितास्तानुपहसन्नाह । हे प्रभो, त्वां ये जानंति त एव जानंतु । मम तु मनसः देहस्य वाचश्च तव वैभवं विषयो [2]न भवति ॥ ३८ ॥ हे कृष्ण, मां सत्यलोकं गंतुमाज्ञां देहि । त्वमेव सर्वं वेत्सि । त्वमेव जगतां

---

[1] यदा प्रत्येकमिंद्रियाभिमानिनो वयं कीर्तिसौंदर्यसौगंध्याद्येकदेशसेविनोऽपि कृतार्थास्तदा सर्वैरिंद्रियैः सर्वसेविनामेतेषां किं वर्ण्यते भाग्यमिति । [2] तेषामधिकारात्परतस्त्वद्वैभवमित्यर्थः ।

नाथोऽसि । अत इदं जगत् मे शरीरं च तवार्पितम् ॥३९॥ हे श्रीकृष्ण, यादवकुलकमलप्रीतिदातृत्वेन हे सूर्योपम, भूमिदेवब्राह्मणपशुसमुद्रस्य वृद्धिकरत्वेन हे चंद्रोपम, हे सूर्यादीनामपि पूज्य, भगवन्, कल्पपर्यंतं तुभ्यं नमः ॥४०॥ श्रीशुक उवाच ॥ ब्रह्मा कृष्णमेवं स्तुत्वा त्रिः परिक्रम्य चरणयोर्नत्वा च सत्यलोकं ययौ ॥४१॥ तदा कृष्णो ब्रह्माणमनुज्ञाप्य पूर्वमेव ब्रह्मणाऽऽनीय वने स्थापितान् वत्सान् यथापूर्वस्थापितगोपबालं यमुनातटमानिन्ये॥ ४२ ॥ हे नृप, एवं कृष्णं विनैकस्मिन् वर्षे गते सत्यपि ते बालाः क्षणार्धं मेनिरे । यतः कृष्णमायामोहिताः॥४३॥ यया मायया मोहितं जगत् पुनः पुनरात्मानमपि विस्मरति ॥४४॥ ततस्ते वत्सपाला ऊचुः । हे कृष्ण, त्वं शीघ्रमागतः । त्वया विनैकोऽपि कवलोऽस्माभिर्न भुक्तः । त्वमत्र स्वस्थान एहि । इतः परं स्वस्थतया

श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् ॥ उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्पमार्कमर्हन्भगवन्नमस्ते ॥ ४० ॥ श्रीशुक उवाच ॥ इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः ॥ नत्वाऽभीष्टं जगद्धाता स्वधाम प्रत्यपद्यत
॥ ४१ ॥ ततोऽनुज्ञाप्य भगवान्स्वभुवं प्रागवस्थितान् ॥ वत्सान्पुलिनमानिन्ये यथापूर्वसखं स्वकम् ॥ ४२ ॥ एकस्मिन्नपि
यातेऽब्दे प्राणेशं चांतरात्मनः ॥ कृष्णमायाऽऽहता राजन्क्षणार्धं मेनिरेऽर्भकाः॥४३॥ किं किं न विस्मरंतीह मायामोहितचेतसः ॥
यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मृतात्मकम् ॥ ४४ ॥ ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा ॥ नैकोऽप्यभोजि कवल एहीतः
साधु भुज्यताम् ॥ ४५ ॥ ततो हसन्हृषीकेशोऽभ्यवहृत्य सहार्भकैः ॥ दर्शयंश्चर्माजगरं न्यवर्तत वनाद्व्रजम् ॥४६॥ बर्हप्रसूननवधातुविचित्रितांगः प्रोद्दामवेणुदलश्रृंगरवोत्सवाढ्यः॥ वत्सान्गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम्॥४७॥
अघानेन महाव्यालो यशोदानंदसूनुना ॥ हतोऽविता वयं चास्मादिति बाला व्रजे जगुः ॥ ४८ ॥ राजोवाच ॥ ब्रह्मन्परोद्भवे
कृष्णे इयान्प्रेमा कथं भवेत् ॥ योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥ ४९ ॥ श्रीशुक उवाच ॥ सर्वेषामपि भूतानां नृप
स्वात्मैव वल्लभः ॥ इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥ ५० ॥ तद्राजेंद्र यथा स्नेहः स्वस्वकात्मनि देहिनाम्॥ न तथा ममतालंबिपुत्रवित्तगृहादिषु ॥ ५१ ॥ देहात्मवादिनां पुंसामपि राजन्यसत्तम ॥ यथा देहः प्रियतमस्तथा नह्यनु ये च तम् ॥ ५२ ॥
देहोऽपि ममताभाक्चेत्तर्ह्यसौ नात्मवत्प्रियः ॥ यज्जीर्यत्यपि देहेऽस्मिन् जीविताशा बलीयसी ॥५३॥ ॥

भुज्यताम् ॥४५॥ ततः कृष्णः प्रहस्य तैः सह भुक्त्वाऽऽजगरं चर्म दर्शयन् वनाद्व्रजं न्यवर्तत ॥ ४६ ॥ तदा मयूरपिच्छैः पुष्पैर्गैरिकादिधातुभिर्विचित्रितांगः श्रृंगवेणू वादयन् व्रजं प्राविशत् ॥४७॥ ततो बाला एवमूचुः । अघानेन महासर्पो हतः । तस्मादस्माकं रक्षणं च कृतम् ॥४८॥ राजोवाच ॥ हे ब्रह्मन्, व्रजवासिनां स्वपुत्रेभ्योऽप्यधिकः प्रेमा परोद्भवे कृष्णे कथं जात इदं कथ्यताम् ॥४९॥ श्रीशुक उवाच ॥ हे नृप, सर्वेषामपि प्राणिनां स्वात्मैवातिप्रियः । इतरे द्रव्यपुत्राद्यास्तत्सुखसाधनत्वेनैव प्रिया न स्वतः ॥५०॥ तस्मात्स्वात्मनि यथा सर्वेषां प्रीतिस्तथा ममतास्पदेषु पुत्रवित्तादिषु न ॥ ५१ ॥ किंच । देहात्ममानिनामपि पुंसां यथा देहः प्रियतमस्तथा तमनुसृत्य स्थिताः पुत्रादयो न प्रियाः ॥५२॥ देहोऽपि ममतास्पदं चेत्तर्ह्यप्यसावात्मवत्प्रियो न। यतो मरणोन्मुखेऽपि देहे

जीविताशा बलीयसी ॥५३॥ तस्मादात्मा सर्वेषामपि प्रियतमः । तदर्थमेव सकलं प्रियम् ॥५४॥ हे नृप, त्वमेनं कृष्णं सर्वात्मानं जानीहि । स जगद्धितायात्र मायया देहवानिवाभाति । अतोऽत्र सर्वेषां प्रीतिर्जाता ॥५५॥ वस्तुतो जानतां पुंसां चराचरमिदं जगत्कृष्णरूपं भाति ॥५६॥ सर्वेषामपि पदार्थानां कृष्ण एव कारणम् । अतः श्रीकृष्णव्यतिरिक्तं किं वस्तु तन्निरूप्यताम् ॥५७ ॥ हे नृप, ये कृष्णचरणकमलनौकामाश्रितास्तेषां भवसमुद्रो वत्सपदतुल्यो भवति ॥ ५८ ॥ एवं त्वया यत् पृष्टं तत्सर्वं कथितम् ॥५९ ॥ इदं कृष्णस्य गोपबालैः सह क्रीडनमघासुरमोक्षणं वनभोजनं वत्सवत्सपालरूपधारणं ब्रह्मकृतस्तवनं च यः शृणोत्युच्चारयति वा स सर्वपुरुषार्थान् प्राप्नोति ॥६०॥ एवं रामकृष्णौ कौमारैः क्रीडनैर्व्रजे क्रीडंतौ संतौ कौमारं वयो जहतुः ॥६१॥ इति श्रीमद्भाग०चूर्णि०दश०

तस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनाम् ॥ तदर्थमेव सकलं जगदेतच्चराचरम् ॥ ५४ ॥ कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ॥ जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥५५॥ वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च ॥ भवद्रूपमखिलं नान्यद्वस्त्विह किंचन॥५६॥ सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः ॥ तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम्॥५७॥ समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः ॥ भवांबुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषाम् ॥५८॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया ॥ यत्कौमारे हरिकृतं पौगंडे परिकीर्तितम् ॥५९ ॥ एतत्सुहृद्भिश्चरितं मुरारेरघार्दनं शाद्वलजेमनं च ॥ व्यक्तेतरद्रूपमजोर्वभिष्टवं शृण्वन् गृणन्नेति नरोऽखिलार्थान् ॥६०॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ॥६१॥ इति श्री०म०दश०पू० ब्रह्मस्तुतिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ ततश्च पौगंडवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ ॥ गाश्चारयंतौ सखिभिः समं पदैर्वृंदावनं पुण्यमतीव चक्रतुः ॥ १ ॥ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः ॥ पशून्पुरस्कृत्य पशव्यमाविशद्विहर्तुकामः कुसुमाकरं वनम् ॥ २ ॥ तन्मंजुघोषालिमृगद्विजाकुलं महन्मनःप्रख्यपयःसरस्वता ॥ वातेन जुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ॥३॥ स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृशच्छिखान्वीक्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥ ४ ॥ श्रीभगवानुवाच ॥ अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणम् ॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतम् ॥ ५ ॥

पूर्वार्धे चतुर्दशोऽध्यायः ॥१४॥ ॥ ततः पंचदशे धेनुपालनं धेनुकार्दनम् । कालियक्ष्वेडतो गोपरक्षणं च निरूप्यते॥१॥ श्रीशुक उवाच ॥ ततः पौगंडवयःश्रितौ तौ रामकृष्णौ गवां पालने नंदादिगोपानां संमतौ जातौ । तदा गोपैः सह गाश्चारयंतौ संतौ स्वपादचिह्नैर्वृंदावनं पुण्यतमं चक्रतुः॥१॥ एकदा श्रीकृष्णो बलरामादिभिः सह वेणुं वादयन् पशूनां हितं वृंदावनं प्रविवेश ॥२॥ तद्वनं भ्रमरमृगपक्षिभिर्व्याप्तं कमलगंधवायुना सेवितं दृष्ट्वा तत्र रंतुं कृष्णो मनो दधे ॥३॥ ततः स आरक्तपल्लवश्रिया फलपुष्पभारेण स्वपादयोः स्पृशच्छिखाग्रान् वृक्षान् दृष्ट्वा हसन्निव कृष्णो रामं जगाद ॥४॥ श्रीभगवानुवाच ॥ हे राम, एते वृक्षाः स्वशाखाभिः पुष्पफलादिपूजासाहित्यं गृहीत्वा तव चरणकमलं येन पापेनात्मनस्तरुजन्म कृतं तस्य पापस्य नाशाय नमंति ॥ ५ ॥ ॥

एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायंत आदिपुरुषानुपदं भजंते ॥ प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेऽपि न जहत्यनघात्मदैवम् ॥ ६ ॥ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन ॥ सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान्हि सतां निसर्गः ॥ ७ ॥ धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः ॥ नद्योऽद्रयः खगमृगाः सदयावलोकैर्गोप्योंऽतरेण भुजयोरपि यत्स्पृहा श्रीः ॥८॥ श्रीशुक उवाच ॥ एवं वृंदावनं श्रीमत्कृष्णः प्रीतमनाः पशून् ॥ रेमे संचारयन्नद्रेः सरिद्रोधस्सु सानुगः ॥९॥ क्वचिद्गायति गायत्सु मदांधालिष्वनुव्रतैः ॥ उपगीयमानचरितः स्रग्वी संकर्षणान्वितः॥ १० ॥ क्वचिच्च कलहंसानामनुकूजति कूजितम् ॥ अभिनृत्यति नृत्यंतं बर्हिणं हासयन्क्वचित् ॥ ११ ॥ मेघगंभीरया वाचा नामभिर्दूरगान्पशून् ॥ क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ॥ १२ ॥ चकोरक्रौंचचक्राह्वभारद्वाजांश्च बर्हिणः ॥ अनुरौति स्म सत्वानां भीतवद्व्याघ्रसिंहयोः ॥ १३ ॥ क्वचित्क्रीडापरिश्रांतं गोपोत्संगोपबर्हणम् ॥ स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः ॥१४॥ नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः ॥ गृहीतहस्तौ गोपालान्हसंतौ प्रशशंसतुः ॥१५॥ क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्शितः ॥ वृक्षमूलाश्रयः शेते गोपोत्संगोपबर्हणः ॥१६॥ पादसंवाहनं चक्रुः केचित्तस्य महात्मनः ॥ अपरे हतपाप्मानो व्यजनैः समवीजयन् ॥१७॥ अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः ॥ गायंति स्म महाराज स्नेहक्लिन्नधियः शनैः ॥१८॥ एवं निगूढात्मगतिः स्वमायया गोपात्मजत्वं चरितैर्विडंबयन् ॥ रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः ॥१९॥ श्रीदामा नामा गोपालो रामकेशवयोः सखा ॥ सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् ॥२०॥

किंच । एते भ्रमरास्तव यशो गायंति । अत इमे प्रायो ऋषिगणा वने गुप्तमपि त्वां न त्यजंति ॥६॥ हे राम, एते मयूरा नृत्यंति । तथैता हरिण्यो गोप्य इव दृष्ट्वा ते प्रियं कुर्वंति । तथा कोकिला गृहं प्राप्ताय तुभ्यं वाग्भिः सत्कुर्वंति । अत एते वनस्था अपि धन्याः ॥७॥ हे राम, इयं भूमिस्तृणलताश्च तव पादस्पर्शाद्धन्याः । वृक्षलताश्च तव नखस्पर्शाद्धन्याः । पर्वतमृगपक्षिणस्तव कृपावलोकैर्धन्याः । गोप्यश्च तव वक्षस्थलस्यालिंगनेन धन्याः ॥८॥ श्रीशुक उवाच ॥ एवं वृंदावनं स्तुत्वा प्रीतः श्रीकृष्णो गोवर्धनसमीपवर्तिनदीतटेषु पशून् चारयन् रेमे ॥९॥ क्वचिद्भ्रमरेषु गायत्सु बलरामेण सह स्वयं गायति ॥१०॥ क्वचिद्धंसकूजितमनुकूजति । क्वचिन्नृत्यंतं मयूरमभिनृत्यति ॥११॥ क्वचिन्मेघगंभीरया वाचा दूरगान्पशून् आह्वयति ॥ १२ ॥ क्वचिच्चकोरक्रौंचचक्रवाकादीनां शब्दानुकृत्य रौति । क्वचिद्व्याघ्रसिंहाभ्यां भयं प्राप्य पशुषु पलायमानेषु सत्सु स्वयमपि भीतवत्पलायते ॥ १३ ॥ क्वचित्क्रीडाश्रांतं रामं स्वयं चरणशुश्रूषणादिभिर्विगतश्रमं करोति ॥१४॥ क्वचिन्नृत्यतो गायतो गोपान् रामकृष्णौ प्रशशंसतुः ॥१५॥ क्वचित्कृष्णः पत्रशय्यासु गोपोत्संगे कृतोपबर्हणः सन् वृक्षमूले शेते ॥१६॥ तदा केचिद्गोपास्तस्य पादसंवाहनं चक्रुः ॥ अपरे पल्लवादिभिर्निर्मितव्यजनैर्वीजयंति ॥१७॥ अन्ये तु तस्य कृष्णस्यानुरूपाणि गायंति ॥१८॥ एवं कृष्णो मायया स्वरूपमाच्छाद्य स्वाचरणैर्गोपपुत्रत्वं विडंबयन् । ग्राम्यैर्गोपैः सह ग्राम्यवद्रेमे ॥१९॥ तदा रामकृष्णयोर्मित्रं श्रीदामा नाम गोपालस्तथा सुबलस्तोककृष्णा-

दयो गोपा रामकृष्णसमीपमेत्य प्रेम्णेदं जगदुः ॥२०॥ हे राम, हे कृष्ण, इतः समीपे तालवृक्षपंक्तिभिर्व्याप्तमेकं महद्वनं वर्तते ॥ २१ ॥ तत्र बहूनि फलानि परिपक्कानि संति । तथापि तानि धेनुकासुरेण रुद्धानि संति ॥२२॥ स तु गर्दभरूपधारी दैत्योऽन्यैर्ज्ञातिभिः सह तत्रास्ते ॥ २३ ॥ स मनुष्यादीन् भक्षयति । तस्मात्तद्वनं मनुष्यपशुपक्ष्यादिभिर्वर्जितमस्ति ॥२४॥ तत्र स्थितानां फलानामेष गंधो वाति पश्य ॥२५॥ हे कृष्ण, तानि नः प्रयच्छ । अस्माकं तद्भक्षणे वांछा जातास्ति । हे राम, यदि तेऽस्मद्वचो रोचते तर्हि तेषामानयनार्थं गम्यताम् ॥ २६ ॥ एवं गोपवचः श्रुत्वा रामकृष्णौ सखिप्रियार्थं गोपैः सह तत्र जग्मतुः ॥२७॥ ततो बलरामस्तद्वनं प्रविश्य बाहुभ्यां तालान् कंपयन् फलानि पातयामास ॥२८॥ तदा फलानां पततां शब्दं श्रुत्वा धेनुकासुरो भूतलं कंपयन्नधावत् ॥२९॥ स बलराममेत्य पश्चात्पादाभ्यां वक्षसि निहत्य गर्दभजातिशब्दं कृत्वा परितोऽधावत् ॥३०॥ पुनरेत्य बलसंमुखं स्वपुच्छं कृत्वा बलं हंतुं पश्चिमपादौ प्राक्षिपत् ॥३१॥ तावद्बलस्तमेकेन हस्तेन पादयोर्धृत्वा भ्रामयित्वा च मृतं तं तालशिरसि चिक्षेप ॥ ३२ ॥ तेन ताडितस्तालः पार्श्वस्थं तालवृक्षं कंपयन् तदुपरि पतित्वा भग्नः । सोऽन्यं सोऽप्यपरं कंपयन् तदुपरि पतित्वा भग्नः ॥३३॥ एवं खरदेहताडिताः सर्वे ताला महावातप्रेरिता इव चकंपिरे ॥३४॥ अनंते भगवति जगदीश्वरे एतदाश्चर्यं न ॥ ३५ ॥ ततो धेनुकस्य सर्वे ज्ञातयो रामकृष्णौप्रति अभ्यद्रवन् ॥ ३६ ॥ आगच्छतस्तांस्तान् रामः कृष्णश्च तत्पश्चात्पादेषु

राम राम महाबाहो कृष्ण दुष्टनिबर्हण ॥ इतोऽविदूरे सुमहद्वनं तालालिसंकुलम् ॥ २१ ॥ फलानि तत्र भूरीणि पतितानि पतंति च ॥ संति किंत्ववरुद्धानि धेनुकेन दुरात्मना ॥ २२ ॥ सोऽतिवीर्योऽसुरो राम हे कृष्ण खररूपधृक् ॥ आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः ॥ २३ ॥ तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्रहन् ॥ न सेव्यते पशुगणैः पक्षिसंघैर्विवर्जितम् ॥ २४ ॥ विद्यंतेऽभुक्तपूर्वाणि फलानि सुरभीणि च ॥ एष वै सुरभिर्गंधो विषूचीनोऽवगृह्यते ॥ २५ ॥ प्रयच्छ तानि नः कृष्ण गंधलोभितचेतसाम् ॥ वांछास्ति महती राम गम्यतां यदि रोचते ॥ २६ ॥ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया ॥ प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू ॥ २७ ॥ बलः प्रविश्य बाहुभ्यां तालान्संपरिकंपयन् ॥ फलानि पातयामास मतंगज इवौजसा ॥ २८ ॥ फलानां पततां शब्दं निशम्यासुररासभः ॥ अभ्यधावत्क्षितितलं सनगं परिकंपयन् ॥२९॥ समेत्य तरसा प्रत्यग्द्वाभ्यां पद्भ्यां बलं बली ॥ निहत्योरसि काशब्दं मुंचन्पर्यसरत्खलः ॥३०॥ पुनरासाद्य संरब्ध उपक्रोष्टा पराक् स्थितः ॥ चरणावपरौ राजन्बलाय प्राक्षिपद्रुषा ॥ ३१ ॥ स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना ॥ चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितम् ॥ ३२ ॥ तेनाहतो महातालो वेपमानो बृहच्छिराः ॥ पार्श्वस्थं कंपयन्भग्नः स चान्यं सोऽपि चापरम् ॥ ३३ ॥ बलस्य लीलयोत्सृष्टखरदेहहताहताः ॥ तालाश्चकंपिरे सर्वे महावातेरिता इव ॥ ३४ ॥ नैतच्चित्रं भगवति ह्यनंते जगदीश्वरे ॥ ओतप्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ॥३५॥ ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये ॥ क्रोष्टारोऽभ्यद्रवन्सर्वे संरब्धा हतबांधवाः ॥ ३६ ॥ तांस्तानापततः कृष्णो रामश्च नृप लीलया ॥ गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ॥ ३७ ॥ ॥ ॥

धृत्वा तालवृक्षाग्रे प्राहिणोत् ॥ ३७ ॥ तदा गतप्राणैर्दैत्यदेहैः फलैस्तालाग्रैश्च व्याप्ता मही रराज ॥३८॥ एवं रामकृष्णयोर्महत्कर्म दृष्ट्वा देवाः पुष्पवृष्टिं चक्रुः । गंधर्वा जगुः । ऋषयस्तुष्टुवुः ॥३९॥ ततस्तस्मिन् वने गोपास्तालफलानि भक्षयामासुः । पशवश्च तृणं चेरुः ॥ ४० ॥ ततः सरामः कृष्णो गोपैः स्तूयमानः सन् व्रजमाजगाम ॥४१॥ तदा वेणुं क्वणंतं गोरजोव्याप्तेषु केशेषु बद्धमयूरपिच्छपुष्पं रुचिरावलोकनहास्ययुतं कृष्णं दृष्ट्वा गोप्यः संमुखं जग्मुः ॥४२॥ ततः कृष्णमुखसंबंधि मधु नेत्ररूपैर्भृंगैः पीत्वा दिनोद्भवं वियोगजं तापं जहुः । ततस्तासां सविनयकटाक्षमोक्षरूपं संमानं गृहीत्वा व्रजं विवेश ॥४३॥ अथ यशोदारोहिण्यौ तयोरिच्छानुरूपं भोजनवस्त्रादिकं ददतुः ॥४४॥ ततो रामकृष्णौ मज्जनोन्मर्दनादिभिर्गतश्रमौ संतौ सुंदरे वस्त्रे परिधाय ॥ ४५ ॥ मात्रा आनीतं

फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः ॥ रराज भूः सतालाग्रैर्घनैरिव नभस्तलम् ॥३८॥ तयोस्तत्सुमहत्कर्म निशम्य विबुधादयः ॥ मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ॥ ३९ ॥ अथ तालफलान्यादन्मनुष्या गतसाध्वसाः ॥ तृणं च पशवश्चेरुर्हतधेनुककानने ॥४०॥ कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः ॥ स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत् ॥४१॥ तं गोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासम् ॥ वेणुं क्वणंतमनुगैरनुगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ॥ ४२ ॥ पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं जहुर्विरहजं व्रजयोषितोऽह्नि ॥ तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपांगमोक्षम् ॥ ४३ ॥ तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले ॥ यथाकामं यथाकालं व्यधत्तां परमाशिषः ॥ ४४ ॥ गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः ॥ नीवीं वसित्वा रुचिरां दिव्यस्रग्गंधमंडितौ ॥४५॥ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ ॥ संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे ॥४६॥ एवं स भगवान्कृष्णो वृंदावनचरः क्वचित् ॥ ययौ राममृते राजन्कालिंदीं सखिभिर्वृतः ॥४७॥ अथ गावश्च गोपाश्च निदाघातपपीडिताः ॥ दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितम् ॥ ४८ ॥ विषांभस्तदुपस्पृश्य दैवोपहतचेतसः ॥ निपेतुर्व्यसवः सर्वे सलिलांते कुरूद्वह ॥ ४९ ॥ वीक्ष्य तान्वै तथाभूतान्कृष्णो योगेश्वरेश्वरः ॥ ईक्षयामृतवर्षिण्या स्वनाथान्समजीवयत् ॥ ५० ॥ ते संप्रतीतस्मृतयः समुत्थाय जलांतिकात् ॥ आसन्सुविस्मिताः सर्वे वीक्षमाणाः परस्परम् ॥ ५१ ॥ अन्वमंसत तद्राजन् गोविंदानुग्रहेक्षितम् ॥ पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ॥ ५२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे धेनुकवधो नाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ ॥

स्वाद्वन्नं भक्षित्वा शय्यायां सुखं सुषुपतुः॥४६॥ एकदा श्रीकृष्णो रामं विना गोभिर्गोपैश्च सह जलप्राशनार्थं यमुनां गतः ॥ ४७ ॥ अथ गोपा गावश्च निदाघोष्मपीडितास्तृषार्ता भूत्वा विषदूषितं तस्या यमुनाया जलं पपुः ॥४८॥ तदा ते विषजलप्राशनाद्गतप्राणाः संतो जलसमीपे निपेतुः ॥ ४९ ॥ तान् स्वभक्तान् योगेश्वरः कृष्णोऽमृतदृष्ट्या जीवयामास ॥५०॥ ततस्ते जलांतिकादुत्थाय परस्परं वीक्ष्य विस्मिता आसन् ॥५१॥ हे राजन्, ते विषं पीत्वा मृतस्यात्मनः पुनरुत्थानं कृष्णस्यानुग्रहदृष्ट्यवलोकनेन जातमित्यमंसत ॥ ५२ ॥ इति श्रीमद्भागवतचूर्णि० दश० पूवार्धे पंचदशोऽध्यायः ॥ १५ ॥ ॥

षोडशे कालियस्योक्तो निग्रहो यमुनाह्रदे । तत्पत्नीभिः स्तुतेनाथ कृष्णेनानुग्रहः कृतः ॥१॥ श्रीशुक उवाच ॥ हे राजन् , कृष्णः कालियसर्पेण दूषितां यमुनां दृष्ट्वा तस्याः शुद्धिमिच्छन् तस्मात् स्थानात्कालियं निःसारितवान् ॥१॥ राजोवाच ॥ हे ब्रह्मन्, भगवानगाधे जले स्थितं कालियं कथं न्यगृह्णात्। किंच। सोऽजलचरोऽपि कथं जलेऽवात्सीत् तत्कथ्यताम् ॥२॥ हे ब्रह्मन्, कृष्णस्य चरितामृतं जुषन् कस्तृप्येत ॥ ३ ॥ श्रीशुक उवाच ॥ हे नृप, कालिंद्यां कालियस्य ह्रदो विषाग्निना पच्यमानजल आसीत् । यस्मिन्नुपरि गच्छंतः पक्षिणो मृत्वा पतंति ॥ ४ ॥ किंच । यस्य तीरस्थाः स्थावरजंगमजीवा अंबुकणयुक्तेन विषजलतरंगवायुना स्पृष्टा म्रियंते ॥ ५ ॥ तस्मिन् ह्रदे स्थितं तीव्रवेगं कालियं सर्पं दृष्ट्वा तेन दुष्टां नदीं च दृष्ट्वा परिकरं बद्ध्वा कंदंबमारुह्य बाहुं करतलेनाहत्य

॥ श्रीशुक उवाच ॥ विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः ॥ तस्या विशुद्धिमन्विच्छन्सर्पं तमुदवासयत् ॥ १ ॥ ॥ राजोवाच ॥ कथमंतर्जलेऽगाधे न्यगृह्णाद्भगवानहिम् ॥ स वै बहुयुगावासं यथासीद्विप्र कथ्यताम् ॥ २ ॥ ब्रह्मन्भगवतस्तस्य भूम्नः स्वच्छंदवर्तिनः ॥ गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ॥ ३ ॥ श्रीशुक उवाच ॥ कालिंद्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना ॥ श्रप्यमाणपया यस्मिन्पतंत्युपरिगाः खगाः ॥ ४ ॥ विप्रुष्मता विषोदोर्मिमारुतेनाभिमर्शिताः॥ म्रियंते तीरगा यस्य प्राणिनः स्थिरजंगमाः ॥ ५ ॥ तं चंडवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ॥ कृष्णः कदंबमधिरुह्य ततोऽतितुंगमास्फोट्य गाढरशनो न्यपतद्विषोदे ॥ ६ ॥ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः ॥ पर्यक्प्लुतो विषकषायविभीषणोर्मिर्धावन्धनुःशतमनंतबलस्य किं तत् ॥ ७ ॥ तस्य ह्रदे विहरतो भुजदंडघूर्णवार्घोषमंग वरवारणविक्रमस्य ॥ आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः ॥ ८ ॥ तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यम् ॥ क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य मर्मसु रुषा भुजया चच्छाद ॥ ९ ॥ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्ताः ॥ कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥ गावो वृषा वत्सतर्यः क्रंदमानाः सुदुःखिताः ॥ कृष्णे न्यस्तेक्षणा भीता रुदत्य इव तस्थिरे ॥ ११ ॥ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः ॥ उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥ ॥ ॥

विषोदे पपात ॥६॥ ततः स ह्रदः कृष्णनिपातवेगेन चतुःशतहस्तपर्यंतं परितः प्रसृतः ॥ अनंतबलस्य श्रीकृष्णस्यैतदाश्चर्यं न ॥७॥ ततो ह्रदे क्रीडतः श्रीकृष्णस्य भुजदंडताडितजलघोषं श्रुत्वा ततः स्वगृहपराभवं दृष्ट्वा तदसहमानः कालियः कृष्णसमीपमाजगाम ॥८॥ ततो घनश्यामं सुकुमारं पीतांबरधरं निर्भयं क्रीडंतं कृष्णं दृष्ट्वा मर्मस्थानेषु संदश्य देहेन तमवेष्टयत् ॥९॥ तत्कालियवेष्टनं दृष्ट्वा गोपा अतिशोकभयैर्मूर्छिताः संतो यमुनातीरे निपेतुः॥ १० ॥ तदा गावो वृषभा वत्सा वत्सतर्यश्च कृष्णेऽर्पितेक्षणा रुदत्य इव तस्थिरे ॥११॥ अथ गोकुले भयसूचका भूकंपोल्कापातनेत्रस्फुरणादय उत्पाता बभूवुः ॥१२॥ ॥

---

१ भाविना श्रीकृष्णचरणस्पर्शभाग्येन स एकस्तत्तीरे न शुष्कः । अमृतमाहरता गरुडेनाक्रांतत्वादिति च पुराणांतरम् ।

तान् दृष्ट्वा नंदादिगोपा रामं विना गाश्चारयितुं गतं कृष्णं ज्ञात्वा ॥ १३ ॥ तैर्दुष्टचिह्नैः कृष्णस्य निधनं ज्ञात्वा कृष्णप्राणा गोपाः शोकदुःखभयातुरा जाताः ॥१४॥ ततः सर्वे आबालवृद्धा गोपाः स्त्रियश्च कृष्णदर्शनलालसाः संतो गोकुलान्निर्जग्मुः ॥ १५ ॥ तदा भीतान् तान् दृष्ट्वा बलः प्रहस्य कृष्णप्रभावज्ञः सन् किंचिदपि नोवाच ॥१६॥ ततस्ते कृष्णं मृगयंतो भगवत्पदैः सूचितमार्गेण यमुनातीरं जग्मुः॥१७॥ तदा ते गोपा मार्गे गवां पदानां मध्ये मध्ये कृष्णस्य ध्वजयवांकुशवज्रादिचिह्नयुतानि पदानि वीक्ष्य त्वरया ययुः ॥१८॥ ततस्तत्र ह्रदे सर्पेण वेष्टितं कृष्णं यमुनातीरे मूर्छितान् गोपान् क्रंदमानान् पशूंश्च दृष्ट्वा परमोहेन मूर्छां प्रापुः ॥१९॥ तदा गोप्यश्च कृष्णासक्तमनसः सत्यः सर्पेण प्रियतमे श्रीकृष्णे ग्रस्ते सति दुःखिता भूत्वा श्रीकृष्णरहितं त्रैलोक्यं शून्यं ददृशुः

तानालक्ष्य भयोद्विग्ना गोपा नंदपुरोगमाः ॥ विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतम् ॥ १३ ॥ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः ॥ तत्प्राणास्तन्मनस्कास्ते दुःखशोकभयातुराः ॥ १४ ॥ आबालवृद्धवनिताः सर्वेऽग पशुवृत्तयः ॥ निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्शनलालसाः ॥ १५ ॥ तांस्तथा कातरान्वीक्ष्य भगवान्माधवो बलः ॥ प्रहस्य किंचिन्नोवाच प्रभावज्ञोऽनुजस्य सः ॥ १६ ॥ तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः ॥ भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटम् ॥ १७ ॥ ते तत्र तत्राब्जयवांकुशाशनिध्वजोपपन्नानि पदानि विश्पतेः ॥ मार्गे गवामन्यपदांतरांतरे निरीक्षमाणा ययुरंग सत्वराः ॥१८॥ अंतर्ह्रदे भुजगभोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयांते ॥ गोपांश्च मूढधिषणान्परितः पशूंश्च संक्रंदतः परमकश्मलमापुरार्ताः ॥१९॥ गोप्योऽनुरक्तमनसो भगवत्यनंते तत्सौहृदस्मितविलोकगिरः स्मरंत्यः ॥ ग्रस्तेऽहिना प्रियतमे भृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकम् ॥ २० ॥ ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः ॥ तास्ता व्रजप्रियकथाः कथयंत्य आसन्कृष्णाननेऽर्पितदृशो मृतकप्रतीकाः ॥ २१ ॥ कृष्णप्राणान्निर्विशतो नंदादीन्वीक्ष्य तं ह्रदम् ॥ प्रत्यषेधत्स भगवान्रामः कृष्णानुभाववित् ॥२२॥ इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः ॥ आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरंगबंधात् ॥ २३ ॥ तत्प्रथ्यमानवपुषा व्यथितात्मभोगस्त्यक्त्वोन्नमय्य कुपितः स्वफणान्भुजंगः ॥ तस्थौ श्वसन् श्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुकमुखो हरिमीक्षमाणः ॥ २४ ॥ तं जिह्वया द्विशिखया परिलेलिहानं द्वे सृक्किणी ह्यतिकरालविषाग्निदृष्टिम् ॥ क्रीडन्नमुं परिससार यथा खगेंद्रो बभ्राम सोऽप्यवसरं प्रसमीक्षमाणः ॥ २५ ॥ ॥

॥२०॥ तदा गोप्यः श्रीकृष्णसमीपं गंतुं यमुनाह्रदे प्रविष्टां यशोदां धृत्वा कृष्णमुखेऽर्पितदृशः कृष्णकथाः कथयंत्यश्च सत्यो मृततुल्या आसन् ॥ २१ ॥ तथा कृष्णप्राणान् ह्रदं प्रविशतो नंदादीन् गोपान् वीक्ष्य रामः प्रत्यषेधत् ॥२२॥ एवमनन्यगतिमात्महेतोर्दुःखितं गोकुलं दृष्ट्वा कृष्णो मुहूर्तं स्थित्वा कालियबंधान्निर्गतः ॥२३॥ ततो हरेर्विस्तीर्यमाणदेहेन व्यथितदेहः कालियस्तं त्यक्त्वा क्रुद्धः सन् फणा उन्नमय्य श्वसन् कृष्णमीक्षमाणस्तस्थौ ॥ २४ ॥ ततो हरिस्तं द्विशिखजिह्वया सृक्किणी लिहंतं दृष्ट्वा क्रीडन् सन् परितस्तं बभ्राम । सर्पोऽपि कृष्णं दंशयितुमवसरं प्रतीक्षमाणो बभ्राम ॥ २५ ॥ ॥

एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरस्स्वधिरूढ आद्यः ॥ तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादांबुजोऽखिलकलादिगुरुर्ननर्त ॥ २६ ॥ तं नर्तुमुद्यतमवेक्ष्य तदा तदीयगंधर्वसिद्धसुरचारणदेववध्वः ॥ प्रीत्या मृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥ २७ ॥ यद्यच्छिरो न नमतेंऽग शतैकशीर्ष्णस्तत्तन्ममर्द खरदंडधरोंऽघ्रिपातैः ॥ क्षीणायुषो भ्रमत उल्बणमास्यतोऽसृङ्नस्तो वमन्परमकश्मलमाप नागः ॥ २८ ॥ तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्समुन्नमति निःश्वसतो रुषोच्चैः ॥ नृत्यन्पदानुनमयन्दमयांबभूव पुष्पैः प्रपूजित इवेह पुमान्पुराणः ॥ २९ ॥ तच्चित्रतांडवविरुग्णफणातपत्रो रक्तं मुखैरुरु वमन्नृप भग्नगात्रः ॥ स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम ॥ ३० ॥ कृष्णस्य गर्भजगतोऽतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रकम् ॥ दृष्ट्वाहिमाद्यमुपसेदुरमुष्य पत्न्य आर्ताः श्लथद्वसनभूषणकेशबंधाः ॥ ३१ ॥ तास्तं सुविग्नमनसोऽथ पुरस्कृतार्भाः कायं निधाय भुवि भूतपतिं प्रणेमुः ॥ साध्व्यः कृतांजलिपुटाः शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः ॥ ३२ ॥ नागपत्न्य ऊचुः ॥ न्याय्यो हि दंडः कृतकिल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय ॥ रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन् ॥ ३३ ॥ अनुग्रहोऽयं भवतः कृतो हि नो दंडोऽसतां ते खलु कल्मषापहः ॥ यद्दंदशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव संमतः ॥ ३४ ॥ तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन ॥ धर्मोऽथ वा सर्वजनानुकंपया यतो भवांस्तुष्यति सर्वजीवः ॥ ३५ ॥ कस्यानुभावोऽस्य न देव विद्महे तवांघ्रिरेणुस्पर्शाधिकारः ॥ यद्वांछया श्रीर्ललनाऽचरत्तपो विहाय कामान्सुचिरं धृतव्रता ॥ ३६ ॥ ॥ ॥

एवंभ्रमणेन हतबलमुन्नतांसं तमानम्य तन्मस्तकेषु श्रीकृष्णो नतर्त॥२६॥ तदा कृष्णं नृत्यं कर्तुमुद्युक्तं दृष्ट्वा गंधर्वसिद्धचारणादयो मृदंगादिवाद्यैर्गीतैः पुष्पवृष्टिनैवेद्यस्तुतिभिश्च तं सेवितवंतः ॥२७॥ तदैकशतमस्तकस्य तस्य यद्यच्छिरो न नमति तत्तत्स्वचरणपातैर्ममर्द । तदा स नागो नासाविवरेभ्यो मुखतश्च रक्तं वमन् मूर्छां प्राप ॥२८॥ एवं कृतेऽपि तस्य यद्यच्छिरः समुन्नमति तत्तत्कृष्णः पुनर्नृत्यत्पादाघातेन नमयन् दमयांबभूव । तदा हृष्टैर्गंधर्वादिभिः शेषासनः पुराणपुरुष इव यशोदानंदनः पुष्पैः पूजित आसीत् ॥ २९ ॥ हे नृप, तस्य विचित्रतांडवेन भग्नफणच्छत्रः स मुखै रक्तं वमन् तं पुराणपुरुषं भगवंतं स्मृत्वा तं मनसा शरणं जगाम ॥३०॥ एवं गर्भजगतः कृष्णस्य भारेणाक्रांतं पादताडनेन भग्नफणातपत्रं पतिं दृष्ट्वा तत्पत्न्यो दुःखिता विस्रंसमानभूषणकेशबंधाः पुरस्कृतबालकाः कृतांजलिपुटाश्च भूत्वा भर्तुर्मोक्षार्थं भुवि देहं निपात्य कृष्णं प्रणेमुः ॥३१॥३२॥ नागपत्न्य ऊचुः ॥ हे कृष्ण, दंशनादिना कृतापराधेऽस्मिन् सर्पे त्वया कृतोऽयं दंडो योग्योऽस्ति । यतस्तवावतारो दुष्टदमनार्थमस्ति ॥३३॥ हे कृष्ण, यतोऽस्य जन्मांतरगतपापेन सर्पत्वं दृश्यतेऽतस्तत्पापनाशकोऽयं दंडोऽस्मदनुग्रहार्थमेव त्वया कृतः ॥ ३४ ॥ अनेन सर्पेण पूर्वजन्मनि किं तपः कृतम् । धर्मो वा आचरितः । येन भवांस्तुष्यति ॥ ३५ ॥ ब्रह्मादयोऽपि तपआदिना यस्याः प्रसादमिच्छंति सा लक्ष्मीरपि त्वच्चरणस्पर्शाधिकारवांछया तप आचरत् । स चरणस्पर्शोऽस्य कालियस्य जातः । स कस्य पुण्यकर्मणः प्रभा-

वस्तद्वयं न विद्महे ॥३६॥ ये त्वत्पादरजः प्रपन्नास्ते सार्वभौमं राज्यं स्वर्गलोकं ब्रह्मलोकमणिमाद्यैश्वर्यं मोक्षं च नेच्छंति ॥ ३७ ॥ हे नाथ, एवंभूतं त्वत्पादरज एष प्रयत्नं विना प्राप । अहो अस्य महद्भाग्यम् ॥३८॥ अतोऽचिंत्यैश्वर्याय परमात्मनेऽनंतशक्तये ब्रह्मणे ते नमः ॥३९॥४०॥ तथा कालशक्त्याश्रयाय सृष्ट्यादिसमयानां साक्षिणे विश्वरूपाय विश्वस्योपद्रष्ट्रे च ते नमः ॥४१॥४२॥ अनंताय सूक्ष्माय नानावादाननुसरते[1] ते नमः ॥ ४३ ॥ प्रत्यक्षादिप्रमाणानां मूलाय वेदात्मकनिःश्वासाय ते नमः ॥४४॥ संकर्षणाय वासुदेवाय प्रद्युम्नाय अनिरुद्धाय एवं चतुर्मूर्तये कृष्णाय तुभ्यं नमः ॥ ४५ ॥ मनोबुद्ध्यहंकाराणां

न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजः प्रपन्नाः ॥ ३७ ॥
तदेष नाथाप दुरापमन्यैस्तमोजनिः क्रोधवशोऽप्यहीशः ॥ संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्विभवः समक्षः ॥ ३८ ॥
नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ भूतावासाय भूताय पराय परमात्मने ॥ ३९ ॥ ज्ञानविज्ञाननिधये ब्रह्मणेऽनंतशक्तये ॥
अगुणायाविकाराय नमस्ते प्राकृताय च ॥४०॥ कालाय कालनाभाय कालावयवसाक्षिणे ॥ विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे
॥ ४१ ॥ भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने ॥ त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ॥४२॥ नमोऽनंताय सूक्ष्माय कूटस्थाय
विपश्चिते ॥ नानावादानुरोधाय वाच्यवाचकशक्तये ॥४३॥ नमः प्रमाणमूलाय कवये शास्त्रयोनये ॥ प्रवृत्ताय निवृत्ताय निगमाय
नमो नमः ॥ ४४ ॥ नमः कृष्णाय रामाय वसुदेवसुताय च ॥ प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ ४५ ॥ नमो
गुणप्रदीपाय गुणात्मच्छादनाय च ॥ गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥४६॥ अव्याकृतविहाराय सर्वव्याकृतसिद्धये ॥ हृषीकेश
नमस्तेऽस्तु मुनये मौनशीलिने ॥ ४७ ॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः ॥ अविश्वाय च विश्वाय तद्द्रष्ट्रेऽस्य च
हेतवे ॥४८॥ त्वं ह्यस्य जन्मस्थितिसंयमान्प्रभो गुणैरनीहोऽकृत कालशक्तिधृक् ॥ तत्तत्स्वभावान्प्रतिबोधयन्सतः समीक्षयाऽमोघविहार
ईहसे ॥ ४९ ॥ तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः ॥ शांताः प्रियास्ते ह्यधुनाऽवितुं सतां
स्थातुश्च ते धर्मपरीप्सयेहतः ॥ ५० ॥ अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः ॥ क्षंतुमर्हसि शांतात्मन्मूढस्य त्वामजानतः
॥ ५१ ॥ अनुगृह्णीष्व भगवन्प्राणांस्त्यजति पन्नगः ॥ स्त्रीणां नः साधु शोच्यानां पतिः प्राणः प्रदीयताम् ॥ ५२ ॥ ॥

प्रकाशकाय । तथापि तेषां मनआदीनामगोचराय तुभ्यं नमः॥४६॥ अतर्क्यमहिम्ने आत्मारामाय परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः ॥४७॥४८॥ हे प्रभो, त्वं वस्तुतो निरिच्छोऽपि गुणैर्विश्वस्योत्पत्त्यादीन् कुर्वन् जीवानां संस्काररूपेण सतो घोरादीन् स्वभावान् प्रतिबोधयंश्च सन्नमोघविहारः क्रीडसि ॥ ४९ ॥ एवंभूतस्य तव त्रिलोक्यां शांता अशांतास्तनवः संति । तत्राधुना शांतानां सतां रक्षणार्थमवतीर्णोऽसि ॥५०॥ तथापि हे भगवन्, तामसत्वात्त्वामजानतोऽस्य कालियस्यापराधः सकृत्त्वया स्वामिना सोढव्यः । हे शांतात्मन्, अयं नागः प्राणांस्त्यजति अत इममनुगृहाण । शोच्यानां स्त्रीणां नः पतिरूपः प्राणो

---

[1] अस्ति नास्ति सर्वज्ञः किंचिज्ज्ञो बद्धो मुक्त एकोऽनेक इत्यादयो नानावादास्ताननुसरतीति तस्मै ।

दीयताम् ॥५१॥५२॥ किंच । अस्माकं तव दासीनां यत्कर्तव्यं तत्कथय । यतस्त्वदाज्ञाकरः पुमान् सर्वभय कृ प्रमुच्यते ॥ ५३ ॥ श्रीशुक उवाच ॥ एवं नागपत्नीभिः स्तुतः कृष्णोंऽघ्रिप्रहारैर्भग्नशिरसं मूर्छितं सर्पं विससर्ज ॥ ५४ ॥ ततः शनैः प्राप्तेंद्रियप्राणः स कालियः कृतांजलिः सन् हरिमाह ॥ ५५ ॥ कालिय उवाच ॥ हे कृष्ण, वयमुत्पत्त्यैव खलास्तामसा दीर्घक्रोधाः स्मः । हे नाथ, प्राणिनां स्वभावो दुस्त्यजोऽस्ति ॥५६॥ हे ईश, त्वयैव नानास्वभावादियुक्तमिदं जगत्सृष्टमस्ति ॥ ५७ ॥ हे भगवन्, तत्र जगति वयमतिक्रोधाः सर्पाः । अतो ब्रह्मादिभिरपि दुस्त्यजां त्वन्मायां त्वदनुग्रहं विना कथं त्यजामः ॥ ५८ ॥ यतो मायात्यागे त्वं कारणमतोऽनुग्रहं निग्रहं वा यन्मन्यसे तद्विधेहि ॥५९॥ श्रीशुक उवाच ॥ एवं सर्पवचः श्रुत्वा कृष्ण आह । हे सर्प, त्वयात्र यमुनाह्रदे न स्थेयम् । त्वं स्वज्ञातिपुत्रस्त्रीभिः सह समुद्रं शीघ्रं याहि । यत इयं नदी गोभिर्नृभिश्च सेव्यते ॥ ६० ॥ किंच । यः पुमान् तुभ्यं जातमेतंन्मच्छासनं स्मरेत् सायं प्रातर्वा कीर्तयेत्स सर्वेभ्यो भयं नाप्नुयात् ॥ ६१ ॥ योऽत्र मम क्रीडास्थाने ह्रदे स्नात्वा जलैर्देवादींस्तर्पयेत् उपोष्य वा मामर्चेत् स सर्वपापैः प्रमुच्यते ॥ ६२ ॥ त्वं तु यस्य भयाद्रमणकं द्वीपं हित्वा एतं ह्रदं प्राप्तः स गरुडो मत्पादलांछितं त्वां न भक्षयिष्यति ॥ ६३ ॥ ॥ श्रीशुक उवाच ॥ एवं कृष्णेनोक्तः कालियस्तत्स्त्रियश्च तं कृष्णं दिव्यवस्त्रालंकारादिभिर्दिव्यगंधानुलेपनैः कमलमालया च पूजयामासुः ॥ ६४ ॥ ६५ ॥ एवं जगन्नाथं संपूज्य प्रदक्षिणीकृत्याभिवाद्य च तस्याज्ञया ॥ ६६ ॥ ॥ ॥

विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया ॥ यच्छ्रद्धयाऽनुतिष्ठन्वै मुच्यते सर्वतो भयात् ॥ ५३ ॥ श्रीशुक उवाच ॥ इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः ॥ मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ॥ ५४ ॥ प्रतिलब्धेंद्रियप्राणः कालियः शनकैर्हरिम् ॥ कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः ॥५५ ॥ कालिय उवाच ॥ वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः ॥ स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ॥ ५६ ॥ त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनम् ॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृति ॥ ५७ ॥ वयं च तत्र भगवन्सर्पा जात्युरुमन्यवः ॥ कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयम् ॥ ५८ ॥ भवान्हि कारणं तत्र सर्वज्ञो जगदीश्वरः ॥ अनुग्रहं विग्रहं वा मन्यसे तद्विधेहि नः ॥ ५९ ॥ श्रीशुक उवाच ॥ इत्याकर्ण्य वचः प्राह भगवान्कार्यमानुषः ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरम् ॥ स्वज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यते नदी ॥ ६० ॥ य एतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनम् ॥ कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ॥ ६१ ॥ योऽस्मिन्स्नात्वा मदाक्रीडे देवादींस्तर्पयेज्जलैः ॥ उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ॥ ६२ ॥ द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः ॥ यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितम् ॥ ६३ ॥ श्रीशुक उवाच ॥ एवमुक्तो भगवता कृष्णेनाद्भुतकर्मणा ॥ तं पूजयामास मुदा नागपत्न्यश्च सादरम् ॥ ६४ ॥ दिव्यांबरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः ॥ दिव्यगंधानुलेपैश्च महत्योत्पलमालया ॥ ६५ ॥ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजम् ॥ ततः प्रीतोऽभ्यनुज्ञातः परिक्रम्याभिवंद्य तम् ॥ ६६ ॥ ॥ ॥

कालियः स्त्रीपुत्रसुहृद्भिः सह रमणकं द्वीपं जगाम । तदैव सा यमुना भगवदनुग्रहान्निर्विषाऽभवत् ॥ ६७ ॥ इति श्रीम०दश० पूर्वा० कालियनिर्यापणं नाम
षोडशोऽध्यायः ॥१६॥ ॥ नागं सप्तदशे नागालयं तं निरयापयत् । बंधून् स्वदुःखतः श्रांतान् सुप्तांस्तत्र दवाददपात् ॥ १ ॥ राजोवाच ॥ हे ब्रह्मन्, कालियो
नागस्थानं रमणकं द्वीपं कस्मात्कारणात्तत्याज। तेनैवैकेन गरुडस्य किमप्रियं कृतम् ॥१॥ श्रीशुक उवाच ॥ गरुडस्य भक्ष्यैः सर्पजनैः स्वबाधापरिहाराय
वृक्षमूले प्रतिमासं गरुडायैकैकनागसहितो बलिरुपकल्पित आसीत् ॥ २ ॥ ते सर्वे नागाः पर्वणि पर्वणि स्वं स्वं भागं गरुडाय स्वरक्षणार्थं प्रयच्छंति ॥ ३ ॥
विषपराक्रमदर्पव्याप्तः कालियस्तु गरुडं तुच्छीकृत्य तस्मै स्वभागं न ददौ किंतु अन्यैर्दत्तं तद्बलिं स्वयं बुभुजे ॥४॥ तच्छ्रुत्वा क्रुद्धो गरुडः कालियं हंतुं तत्समीपमागतः ॥५॥

सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह ॥ तदैव साऽमृतजला यमुना निर्विषाऽभवत्॥ अनुग्रहाद्भगवतः क्रीडामानुषरूपिणः ॥६७॥
इति श्रीम० म० दश० पू० कालियनिर्यापणं नाम षोडशोऽध्यायः ॥ १६ ॥ राजोवाच ॥ नागालयं रमणकं कस्मात्तत्याज कालियः ॥
कृतं किंवा सुपर्णस्य तेनैकेनासमंजसम् ॥१॥ श्रीशुक उवाच ॥ उपहार्यैः सर्पजनैर्मासि मासीह यो बलिः॥ वानस्पत्यो
महाबाहो नागानां प्राङ्निरूपितः ॥२॥ स्वं स्वं भागं प्रयच्छंति नागाः पर्वणि पर्वणि ॥ गोपीथायात्मनः सर्वे सुपर्णाय महात्मने
॥३॥ विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ॥ कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिम् ॥४॥ तच्छ्रुत्वा कुपितो राजन्भगवान्
भगवत्प्रियः ॥ विजिघांसुर्महावेगः कालियं समुपाद्रवत् ॥५॥ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादुच्छ्रितनैकमस्तकः॥ दद्भिः
सुपर्णं व्यदशद्ददायुधः करालजिह्वोच्छ्वसितोग्रलोचनः ॥६॥ तं तार्क्ष्यपुत्रः स निरस्य मन्युमान्प्रचंडवेगो मधुसूदनासनः ॥ पक्षेण
सव्येन हिरण्यरोचिषा जघान कद्रूसुतमुग्रविक्रमः ॥७॥ सुपर्णपक्षाभिहतः कालियोऽतीव विह्वलः ॥ ह्रदं विवेश कालिंद्यास्तदगम्यं
दुरासदम् ॥८॥ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितम् ॥ निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत् ॥ ९ ॥ मीनान्सुदुःखितान्दृष्ट्वा
दीनान्मीनपतौ हते ॥ कृपया सौभरिः प्राह तत्रत्यक्षेममाचरन्॥१०॥अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति ॥
सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहम् ॥११॥ तं कालियः परं वेद नान्यः कश्चन लेलिहः ॥ अवात्सीद्गरुडाद्भीतः कृष्णेन च
विवासितः ॥ १२ ॥ कृष्णं ह्रदाद्विनिष्क्रांतं दिव्यस्रग्गंधवाससम् ॥ महामणिगणाकीर्णं जांबूनदपरिष्कृतम् ॥ १३ ॥ ॥

तमागतं दृष्ट्वोज्जृंभितफण उग्रलोचनः कालियो विषायुधः सन् दंतैर्गरुडं ददंश ॥६॥ तदा प्रचंडवेगो गरुडः क्रुद्धः सन् सव्यपक्षेण तं
जघान ॥७॥ तदा तत्पक्षताडितः कालियो विह्वलः सन् तेन गरुडेनागम्यं यमुनाह्रदं विवेश ॥८॥ तदगम्यत्वे कारणमाह। तत्रैकदा गरुडो भक्ष्यमेकं महामत्स्यं
सौभरिणा निवारितोऽपि बलादहरत् ॥ ९ ॥ ततः स ऋषिर्मीनपतौ हते सति दुःखितान् मीनान् दृष्ट्वा तत्रस्थानां निर्भयत्वं संपादयन् गरुडमुद्दिश्याह
॥१०॥ अत्र यदि गरुड एत्य मत्स्यान् खादति तर्हि सद्यो मरिष्यति । एतत्सत्यं ब्रवीमि ॥११॥ हे नृप, तदेतत्कारणं कालियो वेद । अन्यः कोऽपि सर्पो न
वेद । अतः स गरुडाद्भीतः सन् तत्रागत्य स्थितः । ततस्तस्मात्कृष्णेन निष्कासितः ॥१२॥ ततो ह्रदान्निर्गतं ष्णं दिव्यगंधवाससं स्वर्णालंकृतं दृष्ट्वा ॥१३॥

गोपा उत्थायानंदपूर्णमनसः संतस्तमालिंगयामासुः ॥१४॥ यशोदा रोहिणी नंदो गोप्यो गोपाश्च कृष्णं प्राप्य प्राप्तमनोरथा आसन् ॥१५॥ रामश्च तमालिंग्य जहास । गावो वृषा वत्साश्च परमं हर्षं लेभिरे ॥१६॥ ततः सभार्या विप्रा नंदं गत्वोचुः । हे नंद, तव सुतः सर्पग्रस्तोऽपि मुक्तः । एतद्दिष्ट्या ॥१७॥ अतो विप्रेभ्यो दानं देहि । ततो नंदः प्रीतः सन् सुवर्णं गाश्च ब्राह्मणेभ्यो ददौ ॥ १८ ॥ तदा यशोदाऽपि कृष्णं परिष्वज्यांकमारोप्य प्रेमाश्रूणि मुमोच ॥ १९ ॥ हे नृप, सर्वे व्रजवासिनो गावश्च तस्मिन् कालियमर्दनदिवसे रात्रौ क्षुधातृषाव्याप्ताः संतो यमुनातीर ऊषुः ॥२०॥ तदा शुष्कवनोत्पन्नो दावाग्निः सुप्तं व्रजजनं निशीथे सर्वतो व्याप्य दग्धुमुपचक्रमे ॥२१॥ ततस्ते दह्यमाना जना उत्थाय मायामनुष्यं कृष्णं शरणं गत्वाऽऽहुः ॥२२॥ हे कृष्ण, हे कृष्ण, हे राम,

उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः ॥ प्रमोदनिभृतात्मानो गोपाः प्रीत्याभिरेभिरे ॥ १४ ॥ यशोदा रोहिणी नंदो गोप्यो गोपाश्च कौरव ॥ कृष्णं समेत्य लब्धेहा आसँल्लब्धमनोरथाः ॥१५॥ रामश्चाच्युतमालिंग्य जहासास्यानुभाववित् ॥ नगा गावो वृषा वत्सा लेभिरे परमां मुदम् ॥ १६ ॥ नंद विप्राः समागत्य गुरवः सकलत्रकाः ॥ ऊचुस्ते कालियग्रस्तो दिष्टया मुक्तस्तवात्मजः ॥ १७ ॥ देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे ॥ नंदः प्रीतमना राजन् गाः सुवर्णं तदादिशत् ॥ १८ ॥ यशोदापि महाभागा नष्टलब्धप्रजा सती ॥ परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः ॥ १९ ॥ तां रात्रिं तत्र राजेंद्र क्षुत्तृड्भ्यां श्रमकर्षिताः ॥ ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः ॥ २० ॥ तदा शुचिवनोद्भूतो दावाग्निः सर्वतो व्रजम् ॥ सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे ॥ २१ ॥ तत उत्थाय संभ्रांता दह्यमाना व्रजौकसः ॥ कृष्णं ययुस्ते शरणं मायामनुजमीश्वरम् ॥२२॥ कृष्ण कृष्ण महाभाग हे रामामितविक्रम ॥ एष घोरतमो वह्निस्तावकान्ग्रसते हि नः ॥ २३ ॥ सुदुस्तरान्नः स्वान्पाहि कालाग्नेः सुहृदः प्रभो ॥ न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयम् ॥ २४ ॥ इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः ॥ तमग्निमपिबत्तीव्रमनंतोऽनंतशक्तिधृक् ॥ २५ ॥ इति श्रीम० महा० दशम० पूर्वार्धे दावाग्निमोचनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः ॥ अनुगीयमानो न्यविशद्व्रजं गोकुलमंडितम् ॥ १ ॥ व्रजे विक्रीडतोरेवं गोपालच्छद्ममायया ॥ ग्रीष्मो नामर्तुरभवन्नातिप्रेयान्शरीरिणाम् ॥ २ ॥ स च वृंदावनगुणैर्वसंत इव लक्षितः ॥ यत्रास्ते भगवान्साक्षाद्रामेण सह केशवः ॥ ३ ॥ यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकम् ॥ शश्वत्तच्छीकरर्जीषद्द्रुममंडलमंडितम् ॥ ४ ॥

एषोऽतिभयंकरोऽग्निस्त्वन्मित्राण्यस्मान् ग्रसते ॥२३॥ अतो मृत्युरूपादस्मादग्नेर्नः पाहि । त्वच्चरणं त्यक्तुं वयं न शक्नुमः ॥२४॥ इत्थं स्वजनव्याकुलत्वं दृष्ट्वा कृष्णस्तमग्निं पपौ ॥२५॥ इति श्रीम० दश० पूर्वा० सप्तदशोऽध्यायः ॥१७॥ अष्टादशे ततो ग्रीष्मे वसंतगुणलक्षिते । अघातयद्बलेनालं प्रलंबं लीलया हरिः॥१॥ श्रीशुक उवाच ॥ ततः प्रातःकाले कृष्णो ज्ञातिभिर्गीयमानः सन् व्रजं विवेश ॥१॥ एवं मायया गोपालत्वं स्वीकृत्य रामकृष्णयोर्गोकुले क्रीडतोः सतोर्जीवानां नातिप्रियो ग्रीष्मऋतुः प्राप्तः ॥२॥ स च वृंदावनगुणैर्वसंत इव लक्षितः । यत्र वृंदावने रामः कृष्णश्च तिष्ठतः॥३॥ तस्य वसंतसाम्यमाह । यत्र ग्रीष्मे निर्झरनादेन गत-

झिल्लीशब्दं वृंदावनं भवति । निर्झराणामंबुकणैर्ये स्निग्धा वृक्षास्तेषां मंडलैः शोभितम् ॥ ४ ॥ यत्र वने कोमलतृणप्रदेशे मंदसुगंधशीतलवायुना वनस्थितानां ग्रीष्मकालीनसूर्यकिरणोत्पन्नस्तापो न बाधते ॥५॥ यत्र चातिप्रखरा अपि सूर्यकिरणा भूमेरार्द्रतां न हरंति ॥ ६ ॥ एवंभूतं पुष्पितं मृगपक्षिभिर्नादितं मयूरभ्रमरैर्गीतं वृंदावनं दृष्ट्वा ॥७॥ क्रीडां कर्तुमिच्छन् कृष्णो रामगोपालगोधनैर्युक्तः सन् वेणुं वादयन् तद्वनं विवेश ॥८॥ ततः पल्लवमयूरपिच्छपुष्पमालागैरिकादिभिः कृतभूषणा रामादयो गोपा ननृतुर्युयुधुर्जगुश्च ॥९॥ तदा कृष्णस्य नृत्यतः सतः केचिज्जगुः । केचिद्वेणुहस्ततालशृंगाण्यवादयन् । अपरे प्रशशंसुः ॥१०॥ एवं गोपजातिगुप्ता देवा गोपालरूपा भूत्वा रामकृष्णयोः स्तुतिं चक्रुः ॥ ११ ॥ तदा काकपक्षधरौ तौ रामकृष्णौ भ्रामणोल्लंघनास्फोटनविकर्षणैर्बाहु-

सरित्सरःप्रस्रवणोर्मिवायुना कह्लारकंजोत्पलरेणुहारिणा ॥ न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोऽतिशाद्वले ॥५॥ अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समंततः ॥ न यत्र चंडांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृह्णते ॥६॥ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजम् ॥ गायन्मयूरभ्रमरं कूजत्कोकिलसारसम् ॥७॥ क्रीडिष्यमाणस्तत्कृष्णो भगवान्बलसंयुतः ॥ वेणुं विरणयन्गोपैर्गोधनैः संवृतोऽविशत् ॥८॥ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः॥९॥ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् ॥ वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे ॥१०॥ गोपजातिप्रतिच्छन्ना देहा गोपालरूपिणः ॥ ईडिरे कृष्णरामौ च नटा इव नटं नृप ॥११॥ भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः ॥ चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् ॥१२॥ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् ॥ शशंसतुर्महाराज साधुसाध्विति वादिनौ ॥१३॥ क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया ॥१४॥ क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः ॥ कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया ॥१५॥ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ॥ नद्यद्रिद्रोणिकुंजेषु काननेषु सरस्सु च ॥१६॥ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः ॥ गोपरूपी प्रलंबोऽगादसुरस्तज्जिहीर्षया ॥ १७ ॥ तं विद्वानपि दाशार्हो भगवान्सर्वदर्शनः ॥ अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् ॥१८॥ तत्रोपाहूय गोपालान्कृष्णः प्राह विहारवित् ॥ हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथम् ॥ १९ ॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ॥ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे ॥ २० ॥

युद्धेन च चिक्रीडतुः ॥१२॥ क्वचिदन्येषु नृत्यत्सु स्वयं गायकौ वादकौ भूत्वा साध्विति प्रशशंसतुः ॥ १३ ॥ क्वचित् बिल्वैः कुंभवृक्षफलैरामलकमुष्टिभिरस्पृश्यत्वेन नेत्रबंधादिना च चिक्रीडतुः । क्वचिन्मृगाणां पक्षिणां च चेष्टया ॥१४॥ क्वचित् भेकप्लुतिभिः दोलालंबनेन नृपलीलया च चिक्रीडतुः ॥ १५ ॥ एवं तौ क्रीडाभिर्वने नदीपर्वतकुंजवनसरोवरेषु च चेरतुः ॥१६॥ एकदा गोपैः सह तद्वने तयोः पशून् चारयतोः सतोस्तयोर्हर्तुमिच्छया गोपरूपी प्रलंबासुरः प्राप्तः ॥१७॥ तदा भगवान् तं जानन्नपि तद्वधोपायं विचिंत्य तेन सह सख्यं कर्तुं गोपानन्वमोदत ॥१८॥ ततः कृष्णो गोपानाहूयाह । हे गोपाः, वयं सर्वे यथायोग्यं वयोबलाद्यनुरूपं द्वंद्वशो भूत्वा विहरिष्यामः ॥१९॥ तत्र गोपा रामकृष्णौ नायकौ चक्रुः । तत्र केचित्कृष्णपक्षीया अन्ये च रामपक्षीया आसन्॥२०॥

ततो वाह्यवाहकलक्षणाः क्रीडा आचेरुः ॥ यासु क्रीडासु जेतार आरोहंति । पराजिताश्च वहंति ॥ २१ ॥ एवं वहंतो बाह्यमानाश्च गोपा गोधनं चारयंतः संतो भांडीरकनामकवटस्य समीपं जग्मुः ॥ २२ ॥ यदा रामपक्षीयाः श्रीदामवृषभादयः क्रीडायां जयिनो जातास्तदा कृष्णपुरोगमास्तानूहुः ॥ २३ ॥ तत्र श्रीकृष्णः श्रीदामानमुवाह । भद्रसेनो वृषभं प्रलंबो रामम् ॥२४॥ ततः स दैत्यः कृष्णमसह्यं मत्वा रामं वहन् मर्यादातः परं दूरं शीघ्रमगात् ॥२५॥ ततः पर्वतवज्जडं जातं रामं वहन् स यदा कुंठितगतिर्जातस्तदा गोपरूपं त्यक्त्वा स्वं दैत्यरूपमास्थितः सन् विद्युद्युक्तो मेघ इव बभौ ॥२६॥ तत आकाशेऽतिवेगेन गच्छंतमग्निसदृशदृष्टिं ज्वालासदृशकेशं तं दृष्ट्वा रामः किंचित्त्रास ॥ २७ ॥ अथ प्राप्तस्मृतिर्निर्भयो राम आत्मानं हरंतं दैत्यं रुषा दृढमुष्टिना शिरसि जघान ॥२८॥

आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ॥ यत्रारोहंति जेतारो वहंति च पराजिताः ॥२१॥ वहंतो वाह्यमानाश्च चारयंतश्च गोधनम् ॥ भांडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः ॥ २२ ॥ रामसंघट्टिनो यर्हि श्रीदामवृषभादयः ॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥ २३ ॥ उवाह कृष्णो भगवान् श्रीदामानं पराजितः ॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतम् ॥२४॥ अविषह्यं मन्यमानः कृष्णं दानवपुंगवः ॥ वहन्द्रुततरं प्रागादवरोहणतः परम् ॥ २५ ॥ तमुद्वहन्धरणिधरेंद्रगौरवं महासुरो विगतरयो निजं वपुः ॥ स आस्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपतिवाडिवांबुदः ॥ २६ ॥ निरीक्ष्य तद्वपुरलमंबरे चरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकम् ॥ ज्वलच्छिखं कटककिरीटकुंडलत्विषाद्भुतं हलधर ईषदत्रसत् ॥ २७ ॥ अथागतस्मृतिरभयो रिपुं बलो विहाय सार्थमिव हरंतमात्मनः ॥ रुषाऽहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा ॥ २८ ॥ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन्रुधिरमपस्मृतोऽसुरः ॥ महारवं व्यसुरपतत्समीरयन् गिरिर्यथा मघवत आयुधाऽऽहतः ॥ २९ ॥ दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना ॥ गोपाः सुविस्मिता आसन्साधुसाध्विति वादिनः ॥ ३० ॥ आशिषोऽभिगृणंतस्तं प्रशशंसुस्तदर्हणम् ॥ प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः ॥ ३१ ॥ पापे प्रलंबे निहते देवाः परमनिर्वृताः ॥ अभ्यवर्षन्बलं माल्यैः शशंसुः साधुसाध्विति ॥३२॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे प्रलंबवधो नामाष्टादशोऽध्यायः ॥ १८ ॥

॥ श्रीशुक उवाच ॥ क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः ॥ स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरम् ॥ १ ॥ ॥

ततो दैत्यस्तदैव भग्नमस्तको भूत्वा मुखाद्रक्तं वमन् महाशब्दं च कुर्वन् गतप्राणो भूत्वा वज्रहतो गिरिरिव पपात ॥ २९ ॥ एवं रामेण निहतं प्रलंबं दृष्ट्वा साधु साध्विति वादिनो गोपा विस्मिता आसन् ॥ ३० ॥ अपि च । प्रेत्यागतमिव तं राममालिंग्य प्रेमविह्वलचित्ताः संतो हे राम, त्वं चिरंजीवेत्याशीर्वादान् दत्वा प्रशशंसुः ॥३१॥ एवं पापे प्रलंबे निहते सति संतुष्टा देवा रामं पुष्पैरभ्यवर्षन् साधु साध्विति प्रशशंसुश्च ॥ ३२ ॥ इति श्रीमद्भागवतचू० दशमस्कंधे पूर्वा० अष्टादशोऽध्यायः ॥ १८ ॥ ॥ ऊनविंशे निविष्टं तु गोपगोकुलमच्युतः । मुंजारण्यमरण्याग्ने ररक्ष तन्निपानतः ॥ १ ॥ श्रीशुक उवाच ॥ हे नृप, क्रीडासक्तेषु गोपेषु तद्गावः स्वैरं चरंत्यस्तृणलोभेन दूरं गह्वरं विविशुः ॥ १ ॥ ॥ ॥ ॥

अजा गावो महिष्यश्च वनाद्वनं विशंत्यो दावेन तृषिताः क्रंदंत्योऽत्युच्छ्रितघनतृणविशेषारण्यं विविशुः॥२॥ ततः कृष्णरामादयो गोपाः पशून् अदृष्ट्वा तन्मार्गं विचिन्वंतोऽपि न विदुः ॥३॥ ततस्तासां खुरैश्चिह्नितैर्भूप्रदेशैर्दंतैश्छिन्नैश्च तृणैर्गवां मार्गमनुलक्ष्य जग्मुः ॥४॥ ततस्ते गोपा मुंजारण्ये क्रंदमानं स्वगोधनं प्राप्य तृषिताः श्रांताश्च संतस्ततः संन्यवर्तयन् ॥५॥ तदा कृष्णेन मेघगंभीरया वाचाऽऽहूतास्ता गावः स्वनामशब्दं श्रुत्वा प्रतिनेदुः ॥६॥ तदैव तस्मिन् वने सर्वतः प्रसृतो दावाग्निर्वायुना वृद्धिं गतः सन् स्थावरजंगमानां क्षयकर्ता प्रादुरभूत् ॥ ७ ॥ तदा तं सर्वतः प्राप्तं दावाग्निं दृष्ट्वा भीता गोपा गावश्च सबलं कृष्णमूचुः ॥ ८ ॥ हे कृष्ण हे कृष्ण, हे राम, दावाग्निना दह्यमानान् शरणागतान्नो युवां त्रातुमर्हथः ॥९॥ हे कृष्ण, त्वद्बांधवा दुःखं प्राप्तुं नार्हंति । वयं हि त्वन्नाथास्त्व-

अजा गावो महिष्यश्च निर्विशंत्यो वनाद्वनम् ॥ इषीकाटवीं निर्विविशुः क्रंदंत्यो दावतर्षिताः ॥ २ ॥ तेऽपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा ॥ जातानुतापा न विदुर्विचिन्वंतो गवां गतिम् ॥ ३ ॥ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवाम् ॥ मार्गमन्वगमन्सर्वे नष्टाजीव्या विचेतसः ॥ ४ ॥ मुंजाटव्यां भ्रष्टमार्गं क्रंदमानं स्वगोधनम् ॥ संप्राप्य तृषिताः श्रांतास्ततस्ते संन्यवर्तयन् ॥ ५ ॥ ता आहूता भगवता मेघगंभीरया गिरा ॥ स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ॥ ६ ॥ ततः समंताद्वनधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसाम् ॥ समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजंगमान्महान् ॥ ७ ॥ तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः ॥ ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ॥ ८ ॥ कृष्ण कृष्ण महावीर हे रामामितविक्रम ॥ दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्हथः ॥ ९ ॥ नूनं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुम् ॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः ॥ १० ॥ श्रीशुक उवाच ॥ वचो निशम्य कृपणं बंधूनां भगवान्हरिः ॥ निमीलयत मा भैष्ट लोचनानीत्यभाषत ॥ ११ ॥ तथेति मीलिताक्षेषु भगवानग्निमुल्बणम् ॥ पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत् ॥ १२ ॥ ततश्च तेऽक्षीण्युन्मील्य पुनर्भांडीरमापिताः ॥ निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ॥ १३ ॥ कृष्णस्य योगवीर्यं तद्योगमायानुभावितम् ॥ दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरेऽमरम् ॥ १४ ॥ गाः संनिवर्त्य सायाह्ने सहरामो जनार्दनः ॥ वेणुं विरणयन्गोष्ठमगाद्गोपैरभिष्टुतः ॥ १५ ॥ ॥ ॥

त्सेवकाः स्मः ॥ १० ॥ श्रीशुक उवाच ॥ हे नृप, बंधूनां दीनं वचः श्रुत्वा कृष्ण आह । हे गोपा मा भैष्ट । यूयं नेत्राणि निमीलयत ॥ ११ ॥ तथेत्युक्त्वा मीलिताक्षेषु तेषु सत्सु श्रीकृष्णो दावाग्निं पीत्वा तान्[1] दुःखादमोचयत् ॥ १२ ॥ ततश्च ते गोपा नेत्राण्युन्मील्य पुनर्भांडीरवटं प्रापिताः संतो हरेः कर्म ज्ञात्वा विस्मिता आसन् ॥ १३ ॥ ततस्ते गोपाः कृष्णस्य दावाग्निप्राशनरूपं सामर्थ्यं तस्माद्दावाग्नेरात्मनो मोक्षणं च दृष्ट्वा तं कृष्णं देवं मेनिरे ॥ १४ ॥ ततः सायाह्ने सरामः कृष्णो गोपैः स्तुतः सन् गाः परावर्त्य वेणुं वादयन् व्रजं विवेश ॥ १५ ॥ ॥ ॥

---

[1] गव्हरप्रवेशक्षुधातृषाश्रमादिजनिताद्दुःखात् ।

तदा गोपीनां कृष्णदर्शने परमानंद आसीत् । कृष्णं विना यासां क्षणं युगशतमिवाभवत् ॥ १६ ॥ इति श्रीमद्भा० दश० पूर्वार्धे एकोनविंशोऽध्यायः ॥१९॥ विंशे प्रावृट्शरच्छोभावर्णनेन वनोचिताः । प्रावृट्क्रीडा निरूप्यंते गोपरामयुजो हरेः ॥ १ ॥ श्रीशुक उवाच ॥ अथ गोपा दावाग्नेरात्मनो मोक्षं प्रलंबवधं च कृष्णरामयोरद्भुतं कर्म स्त्रीभ्य आचख्युः ॥१॥ वृद्धगोपा गोप्यश्च तच्छ्रुत्वा कृष्णरामौ देवश्रेष्ठौ मेनिरे ॥ २॥ ततः सर्वप्राण्युत्पत्तिहेतुर्मेघप्राप्त्याऽऽकाशं क्षोभितं कुर्वाणो वर्षर्तुः प्राप्तः ॥३॥ तदा विद्युद्गर्जनादियुक्तैर्मेघैराकाशं गुणैर्व्याप्तं ब्रह्मेव शुशोभ ॥४॥ सूर्योऽष्टौ मासान् पीतं यद्भूमेर्जलं तन्मोक्तुमारेभे ॥ ५ ॥ किंच । मेघा जगतो जीवनं जलं कृपालवो जना इव मुमुचुः ॥६॥ तदा ग्रीष्मर्तुना कृशा भूमिः पर्जन्येन पुष्टा जाता । यथा काम्यतपसो नरस्य देहस्तपसः

गोपीनां परमानंद आसीद्गोविंददर्शने ॥ क्षणं युगशतमिव यासां येन विनाभवत् ॥ १६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे दावाग्निपानं नामैकोनविंशोऽध्यायः ॥१९॥ ॥ श्रीशुक उवाच ॥ तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः ॥ गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च ॥ १ ॥ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः ॥ मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥ २ ॥ ततः प्रावर्तत प्रावृट् सर्वसत्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥ ३ ॥ सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ॥ ४ ॥ अष्टौ मासान्निपीतं यद्भूम्याश्चोदमयं वसु ॥ स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ॥ ५ ॥ तडित्वंतो महामेघाश्चंडश्वसनवेपिताः ॥ प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव ॥ ६ ॥ तपःकृशा देवमीढा आसीद्वर्षीयसी मही ॥ यथैव काम्यतपसस्तनुः संप्राप्य तत्फलम् ॥ ७ ॥ निशामुखेषु खद्योऽतास्तमसा भांति न ग्रहाः ॥ यथा पापेन पाखंडा नहि वेदाः कलौ युगे ॥८॥ श्रुत्वा पर्जन्यनिनदं मंडूका व्यसृजन्गिरः ॥ तूष्णीं शयानाः प्राग्यद्वद्ब्राह्मणा नियमात्यये॥९॥ आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः॥ पुंसो यथाऽस्वतंत्रस्य देहद्रविणसंपदः ॥१०॥ हरिता हरिभिः शष्पैरिंद्रगोपैश्च लोहिता ॥ उच्छिलींध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ॥ ११ ॥ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः ॥ धनिनामुपतापं च दैवाधीनमजानताम् ॥१२॥ जलस्थलौकसः सर्वे नववारिनिषेवया ॥ अबिभ्रद्रुचिरं रूपं यथा हरिनिषेवया ॥१३॥ सरिद्भिः संगतः सिंधुश्चुक्षुभे श्वसनोर्मिमान् ॥ अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा ॥ १४ ॥

फलरूपान् विषयान् प्राप्य पुष्टो भवति तद्वत् ॥ ७ ॥ रात्रिषु खद्योता भांति ग्रहा न भांति । यथा कलौ पापेन पाखंडा भांति वेदा न भांति तद्वत् ॥ ८ ॥ पर्जन्यशब्दं श्रुत्वा मंडूकाः शब्दांश्चक्रुः। यथा नित्यकर्मावसाने गुरुशब्दं श्रुत्वा तच्छिष्या अधीयंते तद्वत् ॥ ९ ॥ पूर्वशुष्का अपि क्षुद्रनद्य उन्मार्गवाहिन्य आसन् । यथेंद्रियतृप्तिपरतंत्रस्य पुंसो द्रव्यादिसंपदः कुमार्गेण गच्छंति तद्वत् ॥ १० ॥ हरिततृणैरारक्तकीटैश्च हरिता रक्ता च जाता भूमी राज्ञां सेनासंपदिवाभृ ॥ ११ ॥ क्षेत्राणि धान्यसंपत्तिभिः कर्षकाणां हर्षं ददुः । वृष्टिर्दैवाधीनेत्यजानतां धनिनामुपतापं च ददुः ॥ १२ ॥ सर्वे प्राणिनो नवोदकसेवनेन सुंदरं स्वरूपं दधुः । यथा हरिसेवया भक्ताः ॥१३॥ नदीभिः संगतः समुद्रः क्षोभं प्राप । यथाऽपक्वयोगिनश्चित्तं कामवासनायुक्तं सत् क्षुभ्यति तद्वत् ॥१४॥

पर्वता धाराभिर्हन्यमाना अपि न विव्यथुः । यथा व्यसनैः पराभूता अपि भक्ता न व्यथंति तद्वत्॥१५॥ मार्गास्तृणैः संछन्नाः संतः संदिग्धा आसन् । द्विजैरनभ्यस्ताः [illegible]तयो तथा संशययुक्ता भवंति तद्वत् ॥१६॥ मेघेषु विद्युतः स्थैर्यं न चक्रुः । पुरुषेषु जारिण्यः स्त्रिय इव ॥ १७ ॥ आकाशे मौर्वींरहितमपींद्रधनुष्यमशोभत । प्रपंचे निर्गुणः पुरुषो यथा शोभते तद्वत् ॥१८॥ मेघैराच्छादितश्चंद्रो न रराज। अहंकारेणावृतो जीव इव ॥१९॥ मेघप्राप्त्या हर्षिता मयूराः प्रतिनादं चक्रुः । यथा गृहे खिन्नाः पुरुषा भक्तसमागमे आनंदं प्राप्नुवंति तद्वत् ॥२०॥ वृक्षा मूलैर्जलं पीत्वा पुष्टा आसन् । यथा तपसा कृशा नराः पुनर्विषयसेवया पुष्टा भवंति तद्वत् ॥२१॥ किंच । पंककंटकादियुक्ततीरेषु सरःसु चक्रवाकादयः पक्षिणोऽवसन् । अशांतकृत्येषु गृहेषु विषयासक्ताः पुरुषा यथा

गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः ॥ अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ॥१५॥ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः ॥ नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ॥१६॥ लोकबंधुषु मेघेषु विद्युतश्चलसौहृदाः ॥ स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥१७॥ धनुर्वियति माहेंद्रं निर्गुणं च गुणिन्यभात् ॥ व्यक्ते गुणव्यतिकरे गुणवान्पुरुषो यथा ॥ १८ ॥ न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः ॥ अहंमत्या भासितया स्वभासा पुरुषो यथा ॥ १९ ॥ मेघागमोत्सवा हृष्टाः प्रत्यनंदन् शिखंडिनः ॥ गृहेषु तप्ता निर्विण्णा यथाऽच्युतजनागमे ॥ २० ॥ पीत्वापः पादपाः पद्भिरासन्नानात्ममूर्तयः ॥ प्राक् क्षामास्तपसा श्रांता यथा कामानुसेवया ॥२१॥ सरस्स्वशांतरोधस्तु न्यूषुरंगापि सारसाः॥ गृहेष्वशांतकृत्येषु ग्राम्या इव दुराशयाः॥२२॥ जलौघैर्निरभिद्यंत सेतवो वर्षतीश्वरे॥पाखंडिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥२३॥ व्यमुंचन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः॥ यथाशिषो विश्पतयः काले काले द्विजेरिताः ॥ २४ ॥ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजंबुमत् ॥ गोगोपालैर्वृतो रंतुं सबलः प्राविशद्धरिः॥२५॥ धेनवो मंदगामिन्य ऊधोभारेण भूयसा॥ ययुर्भगवताऽऽहूता द्रुतं प्रीत्या स्नुतस्तनीः ॥२६॥ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः ॥ जलधारा गिरेर्नादानासन्ना ददृशे गुहाः ॥ २७ ॥ क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति ॥ निर्विश्य भगवान्रेमे कंदमूलफलाशनः ॥ २८ ॥ दध्योदनं समानीतं शिलायां सलिलांतिके ॥ संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः ॥ २९ ॥ शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणम् ॥ तृप्तान्वृषान्वत्सतरान्गाश्च स्वोधोभरश्रमाः ॥ ३० ॥ ॥

वसंति तद्वत् ॥२२॥ पर्जन्ये वर्षति सति जलौघैर्नदीनां तटमर्यादा अभिद्यंत । कलौ पांखंडिनां दुष्टवादैर्वेदमार्गा यथा भिद्यंते तद्वत् ॥ २३ ॥ मेघा भूतेभ्यो जलं व्यमुंचन् । यथा राजानो दानानि ददते तद्वत् ॥२४॥ एवंभूतं पक्वखर्जूरजंबुयुक्तं तद्वनं दृष्ट्वा गोगोपैर्बलरामेण च सह क्रीडितुं कृष्णस्तद्वनं प्रविवेश ॥२५॥ तदा ऊधोभारेण मंदगामिन्यो धेनवो भगवताऽऽहूताः सत्यः स्तनेभ्यो गलितदुग्धधारा ययुः ॥२६॥ तदा हरिः स्वलीलादर्शनेन प्रीताः पुलिंदीर्ददर्श । वनपंक्तयो मधुस्रवा ददर्श । गिरेः पतिता नादयुक्ता जलधारास्तन्निकटवर्तिनीर्गुहाश्च ददर्श ॥२७॥ कदाचिन्मेघे वर्षति सति कृष्णो गुहायां वृक्षकोटरे च प्रविश्य कंदमूलानि भक्षयन् सन् रेमे ॥२८॥ गृहादानीतं दध्योदनं शिलायां स्थापयित्वा बलेन गोपैश्च सह बुभुजे ॥२९॥ ततस्तृणोपरि चर्वतस्तृप्तान् वृषान् वत्सान् गाश्च

पयोधरभारश्रमाः ॥३०॥ तथा स्वप्रभावेण वृद्धिंगतां वर्षर्तुशोभां च दृष्ट्वा तस्या मानं चक्रे॥३१॥ एवं व्रजे रामकृष्णयोर्निवसतोः सतोः शरदृतुः प्राप्तः । तदा खं निरभ्रं जलं स्वच्छं वायुश्च शांतोऽभवत् ॥ ३२ ॥ शरदा जलानि स्वच्छतां प्रापुः । यथा योगसेवया भ्रष्टानां चेतांसि स्वच्छतां प्राप्नुवंति तद्वत् ॥३३॥ किंच । नभसो मेघं भूतानां सांकर्यं भुवः पंकं जलस्य मलं च शरद् नाशयामास॥ यथा चतुर्णामाश्रमिणां पापं कृष्णभक्तिर्नाशयति तद्वत् ॥३४॥ मेघाः सर्वस्वं हित्वा शुभ्रकांतयो विरेजुः । यथा पुत्रवित्तलोकेषणास्त्यक्त्वा मुनयः शोभंते तद्वत् ॥ ३५ ॥ पर्वता जलं क्वचिन्मुमुचुः क्वचिन्न मुमुचुः । यथा ज्ञानिनो ज्ञानामृतं क्वचिद्ददते क्वचिन्न ददते तद्वत् ॥ ३६ ॥ अल्पजलचराः क्षीयमाणं जलं न विदुः । यथा क्षीयमाणमायुर्मूढा नरा न जानंति तद्वत् ॥ ३७ ॥ क्षुद्रजलचरा अर्कजं तापं प्रापुः । यथा कुटुंबी दारिद्र्येण पीडितः सन् तापं प्राप्नोति तद्वत् ॥ ३८ ॥ किंच । स्थलानि शनैः शनैः कर्दमं जहुः । लताश्चापक्वतां

प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहाम् ॥ भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहिताम् ॥३१॥ एवं निवसतोस्तस्मिन्रामकेशवयोर्व्रजे ॥ शरत्समवद्व्यभ्रा स्वच्छांब्वपरुषानिला ॥ ३२ ॥ शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः ॥ भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥३३॥ व्योम्नोऽब्दं भूतशाबल्यं भुवः पंकमपां मलम् ॥ शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथाऽशुभम् ॥ ३४ ॥ सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ॥ यथा त्यक्तैषणाः शांता मुनयो मुक्तकिल्बिषाः ॥ ३५॥ गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम् ॥ यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥३६॥ नैवाविदन्क्षीयमाणं जलं गाधजलेचराः ॥ यथायुरन्वहं क्षय्यं नरा मूढाः कुटुंबिनः॥३७॥गाधवारिचरास्तापमविंदन् शरदर्कजम्॥ यथा दरिद्रः कृपणः कुटुंब्यविजितेंद्रियः॥३८॥शनैः शनैर्जहुः पंकं स्थलान्यामं च वीरुधः ॥ यथाहंममतां धीराः शरीरादिष्वनात्मसु ॥३९॥ निश्चलांबुरभूत्तूष्णीं समुद्रः शरदागमे ॥ आत्मन्युपरते सम्यङ्मुनिर्व्युपरतागमः ॥४०॥ केदारेभ्यस्त्वपोऽगृह्णन्कर्षका दृढसेतुभिः ॥ यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥४१॥ शरदर्कांशुजांस्तापान्भूतानामुडुपोऽहरत् ॥ देहाभिमानजं बोधो मुकुंदो व्रजयोषिताम् ॥ ४२ ॥ खमशोभत निर्मेघं शरद्विमलतारकम् ॥ सत्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम् ॥४३॥ अखंडमंडलो व्योम्नि रराजोडुगणैः शशी ॥ यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ॥४४॥ आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम् ॥ जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ॥४५॥

जहुः । यथा धीराः शरीरादौ ममतां त्यजंति तद्वत् ॥ ३९ ॥ किंच । समुद्रः अचंचलजलोऽभूत् । यथा त्यक्तकर्ममार्गो मुनिः शांतो भवति तद्वत् ॥ ४० ॥ शरदागमे कर्षकाः क्षेत्रेभ्यः सेतुभिर्जलं जगृहुः । यथा योगिन इंद्रियैः स्रवज्ज्ञानमिंद्रियनिरोधेन रक्षंति तद्वत् ॥ ४१ ॥ भूतानां शरत्कालीनसूर्यकिरणजं तापं चंद्रो जहार । देहाभिमानजं तापं बोधो यथा हरति तद्वत् ॥ ४२ ॥ आकाशं निर्मेघं स्वच्छनक्षत्रं शुशुभे । यथा सत्वयुक्तं चित्तं पूर्वोत्तरमीमांसा निर्णीतान् वेदार्थान् दर्शयति तद्वत् ॥ ४३ ॥ तदा पूर्णमंडलश्चंद्रो नक्षत्रैर्वृतः सन् शुशुभे । यथा कृष्णो यादवैर्वृतः सन् शोभते तद्वत् ॥४४॥ जनाः समशीतोष्णं पुष्पितवनवायुमालिंग्य तापं जहुः । कृष्णहृतचित्ता गोप्यस्तु तापं न जहुः ॥ ४५ ॥ ॥ ॥

गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाऽभवन् ॥ अन्वीयमानाः स्ववृषैः फलैरीशक्रिया इव ॥ ४६ ॥ उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना ॥ राज्ञा तु निर्भया लोका यथा दस्यून्विना नृप ॥ ४७ ॥ पुरग्रामेष्वाग्रयणैरैंद्रियैश्च महोत्सवैः ॥ बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ॥ ४८ ॥ वणिङ्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे ॥ वर्षरुद्धा यथा सिद्धाः स्वपिंडान्काल आगते ॥ ४९ ॥ इति श्रीमद्भागवते म० द० पू० शरद्वर्णनं नाम विंशतितमोऽध्यायः ॥ २० ॥ ॥ श्रीशुक उवाच ॥ इत्थं शरस्वच्छजलं पद्माकरसुगंधिना ॥ न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः ॥ १ ॥ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रम् ॥ मधुपतिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुम् ॥ २ ॥ तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम् ॥ काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥ ३ ॥ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितम् ॥ नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥ बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वैजयंतीं च मालाम् ॥ रंध्रान्वेणोरधरसुधया पूरयन्गोपवृंदैर्वृंदारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ॥ ५ ॥ इति वेणुरवं राजन्सर्वभूतमनोहरम् ॥ श्रुत्वा व्रजस्त्रियः सर्वा वर्णयंत्योऽभिरेभिरे ॥ ६ ॥ गोप्य ऊचुः ॥ अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननु विवेशयतोर्वयस्यैः ॥ वक्रं व्रजेशसुतयोरनुवेणु जुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ ७ ॥ ॥ ॥ ॥

तदा गोमृगखगस्त्रियः शरदृतुना स्वपतिभिरनुगम्यमानाः सत्यो गर्भिण्योऽभवन् ॥ ४६ ॥ सूर्योदये सति सूर्यविकासीनि कमलानि चंद्रविकासिकमलैर्विना हर्षं प्रापुः । यथा धार्मिकेण राज्ञा रक्षिता लोका दस्यून् विना हर्षं प्राप्नुवंति तद्वत् ॥४७॥ किंच । पुरग्रामव्रजेषु नवान्नप्राशनादिकैर्यज्ञैर्लौकिकैश्च महोत्सवैः पक्वधान्येन च युक्ता भूमिर्बभौ ॥४८॥ शरदृतौ प्राप्ते सति वणिजः संन्यासिनो नृपाः स्नातकाश्च वर्षाकाले एकत्र रुद्धाः संतो बहिर्निर्गम्य स्वान् स्वानर्थान् प्रपेदिरे । यथा सिद्धा आयुषा रुद्धाः संतः काले प्राप्ते देवादिदेहान् प्राप्नुवंति तद्वत् ॥४९॥ इति श्रीमद्भा० दश० पूर्वा० विंशोऽध्यायः॥२०॥ ॥ एकविंशे शरद्रम्यवृंदावनगते हरौ ॥ तद्वेणुस्वरमाकर्ण्य गोपीभिर्गीतमीर्यते ॥१॥ श्रीशुक उवाच । हे राजन्, एकदा गोगोपालसहितः कृष्णः शरत्स्वच्छजलं कमलसुगंधवायुना वातम् ॥१॥ पुष्पितवनपंक्तिषु स्थितैर्मत्तभ्रमरपक्षिभिर्नादितसरोवरनदीपर्वतयुक्तं तद्वृंदावनं प्रविश्य बलेन गोपालैश्च सह गाश्चारयन् वेणुमवादयत् ॥२॥ तत्कामोत्पत्तिकरं वेणुगीतं श्रुत्वा गोप्यः कृष्णस्य परोक्षं स्वसखीभ्योऽवर्णयन् ॥३॥ तद्वर्णयितुमारब्धवत्योऽपि कामवेगेन विक्षिप्तमनसो गोप्यो वर्णयितुं नाशकन् ॥४॥ तदा यादृशं कृष्णस्मरणं तासां मनःक्षोभकं जातं तदाह । कृष्णो मयूरपिच्छयुक्तं मुकुटं नटवत्सुंदरं शरीरं कर्णयोः कर्णिकारपुष्पं स्वर्णवत्पीतं वस्त्रं वैजयंतीं मालां च बिभ्रत् वेणो रंध्राण्यधरामृतेनापूर्य गोपैर्गीतकीर्तिः सन् वृंदावनं विवेश ॥५॥ हे नृप, एवंभूतस्य कृष्णस्य वेणुशब्दं श्रुत्वा व्रजस्त्रियो वर्णयंत्यः सत्यः पदे पदे मनसा कृष्णमालिंगितवत्यः ॥६॥ गोप्य ऊचुः ॥ हे गोप्यः, नेत्रवतां तावदिदमेव फलं नान्यत् । तत्किं तदाह । समानवयस्यैर्मित्रैः सह पशून् वने प्रवेशयतो रामकृष्णयोर्वेणुं वादयतोर्मुखं यैः पीतं तैरेव तत्प्रियदर्शनरूपं फलं सेवितं नान्यैः ॥७॥ ॥

अन्या आहुः । हे गोप्यः, आम्रपल्लवकमलमालाभिर्विचित्रवेषौ रामकृष्णौ नटश्रेष्ठाविव गोपसभायां मध्ये क्वचिद्गायमानौ विरेजतुः । अहो गोपानां पुण्यमिति ॥८॥ किंच । हे गोप्यः, अयं वेणुः किं पुण्यं कृतवान् । यतोऽस्मद्भोग्यां कृष्णाधरसुधां स्वयं भुंक्ते । किंच । यासां जलेन पुष्टस्ता नद्यः कमलमिषेण रोमांचिता लक्ष्यंते । येषां वंशे जातस्ते वृक्षा मधुधारामिषेणाश्रूणि मुमुचुः ॥ ९ ॥ हे सखि, इदं वृंदावनं भुवः कीर्तिं स्वर्गादपि विशेषेण विस्तारयति । यतः कृष्णचरणकमलाभ्यां प्राप्तशोभम् । किं च। कृष्णस्य वेणुनादं तदनु मत्तमयूरनृत्यं च दृष्ट्वान्ये मृगादयः पर्वते तत्रतत्र स्तब्धा बभूवुः ॥१०॥ अपरा आहुः । हे गोप्यः, एता हरिण्योऽज्ञा अपि धन्याः । यतो वेणुगीतं श्रुत्वा पतिभिः सह स्नेहावलोकनैः कृष्णसत्कारं कृतवत्यः ॥११॥ अन्या ऊचुः । हे गोप्यः, देवां-

चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ ॥ मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रंगे यथा नटवरौ क्व च गायमानौ ॥ ८ ॥ गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम् ॥ भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः ॥ ९ ॥ वृंदावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मि ॥ गोविंदवेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्वम् ॥१०॥ धन्याः स्म मूढमतयोऽपि हरिण्य एता या नंदनंदनमुपात्तविचित्रवेषम् ॥ आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥ ११ ॥ कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ॥ देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ १२ ॥ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबंत्यः ॥ शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविंदमात्मनि दृशाऽश्रुकलाः स्पृशंत्यः ॥ १३ ॥ प्रायो बतांब विहगा मुनयो वनेऽस्मिन्कृष्णेक्षितं तदुदितं कलवेणुगीतम् ॥ आरुह्य ये द्रुमभुजान्रुचिरप्रवालान् शृण्वंत्यमीलितदृशो विगतान्यवाचः ॥ १४ ॥ नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः ॥ आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंति पादयुगलं कमलोपहाराः ॥ १५ ॥ दृष्ट्वातपे व्रजपशून्सहरामगोपैः संचारयंतमनु वेणुमुदीरयंतम् ॥ प्रेमप्रवृद्ध उदितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषांबुद आतपत्रम् ॥ १६ ॥ पूर्णाः पुलिंद्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडितेन ॥ तद्दर्शनस्मररुजस्तृणरूषितेन लिंपंत्य आननकुचेषु जहुस्तदाधिम् ॥ १७ ॥ ॥

गनाः कृष्णं दृष्ट्वा तद्वेणुगीतं च श्रुत्वा विमानेषु देवानामुत्संगेषु स्थिता अपि मदनेन परिक्षिप्तधैर्या विगतनीव्यो मुमुहुः ॥ १२ ॥ किंच । हे गोप्यः, गावो वेणुगीतामृतमुन्नमितकर्णपुटैः पिबंत्यस्तस्थुः । तथा स्तनपाने प्रवृत्ता वत्सा मुखाद्गलितदुग्धकवलाः संतो विस्मृतस्तनपाना बभूवुः॥ १३॥ हे गोप्यः, अत्र ये पक्षिणो वृक्षशाखा आरुह्य कृष्णस्य वेणुगीतं शृण्वंति तं च निमेषरहितदृष्टिभिः पश्यंति । ते बहुधा मुनयो भवितुमर्हंति ॥१४॥ हे गोप्यः, नद्यः कृष्णगीतं श्रुत्वा कामेन भग्नवेगाः सत्य ऊर्मिभुजैः कमलान्याहरंत्यो मुरारेश्चरणयुगुलं धारयंति । अतस्ता धन्याः॥ १५ ॥ किंच । हे गोप्यः, मेघ आतपे रामगोपैः सह पशून् चारयंतं कृष्णं दृष्ट्वोदितः सन् स्ववपुषा छत्रमिव छायामकरोत् । अहो अस्य भाग्यम् ॥१६॥ हे सख्यः, एताः पुलिंद्यः कृतार्थाः । यतः श्रीकृष्णचर-

हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः ॥ मानं तनोति सहगोगणयोस्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः
॥ १८ ॥ गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ॥ अस्पंदनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ १९ ॥ एवंविधा भगवतो या वृंदावनचारिणः ॥ वर्णयंत्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ २० ॥
इति श्रीमद्भागवते महा० दशमस्कंधे पूर्वार्धे वेणुगीतं नाम एकविंशोऽध्यायः ॥ २१ ॥ ॥ श्रीशुक उवाच ॥ हेमंते प्रथमे
मासि नंदव्रजकुमारिकाः ॥ चेरुर्हविष्यं भुंजानाः कात्यायन्यर्चनव्रतम् ॥ १ ॥ आप्लुत्यांऽभसि कालिंद्या जलांते चोदितेऽरुणे ॥
कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीम् ॥ २ ॥ गंधैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः ॥ उच्चावचैश्चोपहारैः प्रवालफलतंडुलैः
॥ ३ ॥ कात्यायनि महामाये महायोगिन्यधीश्वरि ॥ नंदगोपसुतं देवि पतिं मे कुरु ते नमः ॥ इति मंत्रं जपंत्यस्ताः पूजां
चक्रुः कुमारिकाः ॥ ४ ॥ एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः ॥ भद्रकालीं समानर्चुर्भूयान्नंदसुतः पतिः ॥ ५ ॥ उषस्युत्थाय
गोत्रैः स्वैरन्योन्याबद्धबाहवः ॥ कृष्णमुच्चैर्जगुर्यांत्यः कालिंद्यां स्नातुमन्वहम् ॥ ६ ॥ नद्यां कदाचिदागत्य तीरे निक्षिप्य
पूर्ववत् ॥ वासांसि कृष्णं गायंत्यो विजह्रुः सलिले मुदा ॥ ७ ॥ भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः ॥ वयस्यैरावृतस्तत्र
गतस्तत्कर्मसिद्धये ॥ ८ ॥ तासां वासांस्युपादाय नीपमारुह्य सत्वरः ॥ हसद्भिः प्रहसन्बालैः परिहासमुवाच ह ॥९॥ अत्रागत्याबलाः
कामं स्वं स्वं वासः प्रगृह्यताम् ॥ सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्शिताः ॥ १० ॥ ॥

णकमलकुंकुमं वने गमनेन तृणेषु संलग्नं दृष्ट्वा तन्मुखस्तनेष्वालिप्य कामव्यथां जहुः । अतस्ता धन्याः ॥ १७॥ अन्या ऊचुः । हे सख्यः, अयं गोवर्धनपर्वतो
वैष्णवेषु श्रेष्ठोऽस्ति । यतः स सहगोगणयो रामकृष्णयोर्जलतृणकंदमूलगुहादिभिः संमानं करोति ॥ १८ ॥ किंच । हे सख्यः, शिरसि गोपादबंधनरज्जुवेष्टनेन
स्कंधे गोकर्षणार्थं पाशग्रहणेन शोभमानयोर्गा वने नयतो रामकृष्णयोर्वेणुनादैर्गतिमतां स्तब्धता (स्थावरधर्मः) तरूणां रोमांचो (जंगमधर्मः)इदमत्याश्चर्यम्
॥ १९ ॥ एवं हे नृप, वृंदावनचारिणः कृष्णस्यानकेक्रीडा मिथो वर्णयंत्यो गोप्यस्तन्मयतां ययुः ॥ २० ॥ इति श्रीम०द०पू०एकविंशोऽध्यायः ॥२१॥
द्वाविंशे गोपकन्यानां वस्त्राहरणलीलया । वरं दत्वा गतः कृष्णो यज्ञशालामितीर्यते ॥१॥ श्रीशुक उवाच ॥ हे राजन्, हेमंततौ मार्गशीर्षे मासे व्रजकुमारिका
हविष्यं भुंजानाः सत्यः कात्यायनीदेवीपूजनरूपं व्रतं चेरुः ॥१॥ प्रत्यहमरुणोदये यमुनाया जले स्नात्वा तत्तीरे वालुकामयीं देवीं कृत्वा॥२॥ तां गंधपुष्पपल्लवफलतंडुलधूपदीपनैवेद्यादिभिरर्चयामासुः ॥३॥ किंच । हे कात्यायनि, हे महामाये, हे देवि, नंदगोपसुतं कृष्णं मे पतिं कुरु। तुभ्यं नमः। एवं मंत्रं
जपंत्यस्ताः कन्याः पूजां चक्रुः । एवं मासपर्यंतं व्रतं चेरुः ॥ ४ ॥५ ॥ व्रतस्य पूर्वांगमाह । प्रत्यहमुषःकाल उत्थाय स्वकीयैर्नामभिः परस्परं गृहीतहस्ताः कालिंद्यां
स्नातुं यांत्य उच्चैः कृष्णं जगुः ॥६॥ एकदा नद्यां गत्वा तीरे पूर्ववद्वस्त्राणि निधाय जले विजह्रुः ॥७ ॥ तज्ज्ञात्वा योगेश्वरः कृष्णो गोपैः सह तत्रैत्य
॥८॥ तासां वस्त्राणि गृहीत्वा कदंबमारुह्य बालैः सह हसन् सन् परिहासं जगाद ॥ ९ ॥ हे अबलाः, यूयमत्र वृक्षाधोभागे आगत्य स्वं स्वं वस्त्रं गृह्यताम् ।

न मयोदितपूर्वं वा अनृतं तदिमे विदुः ॥ एकैकशः प्रतीच्छध्वं सहैवोत सुमध्यमाः ॥ ११ ॥ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः ॥ व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः ॥ १२ ॥ एवं ब्रुवति गोविंदे नर्मणा क्षिप्तचेतसः ॥ आकंठमग्नाः शीतोदे वेपमानास्तमब्रुवन् ॥ १३ ॥ माऽनयं भोः कृथास्त्वां तु नंदगोपसुतं प्रियम् ॥ जानीमोंऽग व्रजश्लाघ्यं देहि वासांसि वेपिताः ॥ १४ ॥ श्यामसुंदर ते दास्यः करवाम तवोदितम् ॥ देहि वासांसि धर्मज्ञ नोचेद्राज्ञे ब्रुवामहे ॥ १५ ॥ श्रीभगवानुवाच ॥ भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ ॥ अत्रागत्य स्ववासांसि प्रतीच्छंतु शुचिस्मिताः ॥ १६ ॥ ततो जलाशयात्सर्वा दारिकाः शीतवेपिताः ॥ पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्शिताः ॥ १७ ॥ भगवानाह ता वीक्ष्य शुद्धभावप्रसादितः ॥ स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितम् ॥ १८ ॥ यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनम् ॥ बद्ध्वांजलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमोऽधो वसनं प्रगृह्यताम् ॥ १९ ॥ इत्यच्युतेनाभिहितं व्रजाबला मत्वा विवस्त्राप्लवनं व्रतच्युतिम् ॥ तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः ॥२०॥ तास्तथाऽवनता दृष्ट्वा भगवान्देवकीसुतः ॥ वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः॥२१॥ दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः॥ वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन्प्रियसंगनिर्वृताः ॥ २२ ॥ परिधाय स्ववासांसि प्रेष्ठसंगमसज्जिताः ॥ गृहीतचित्ता नो चेलुस्तस्मिँल्लज्जायितेक्षणाः ॥ २३ ॥ तासां विज्ञाय भगवान्स्वपादस्पर्शकाम्यया ॥ धृतव्रतानां संकल्पमाह दामोदरोऽबलाः ॥ २४ ॥ ॥

अहं सत्यं कथयामि न परिहासः। यतो यूयं व्रतकृशाः स्थ ॥१०॥ मया कदापि मिथ्याभाषणं न कृतम्। तदिमे गोपा जानंति। अतोऽत्रैत्यैकैकशः सहैव वाऽऽगत्य वस्त्राणि स्वीकुरुत ॥ ११॥ हे नृप, कृष्णस्य तत्परिहासकृतं वस्त्राहरणं दृष्ट्वा गोप्यो व्रीडिताः सत्यो मिथः प्रेक्ष्य हास्यं कृत्वा जलाद्बहिर्न निर्ययुः ॥१२॥ एवं कृष्णे ब्रुवति [illegible] ताः शीतोदके आकंठमग्नाः कंपमानाः सत्यः कृष्णमूचुः ॥१३॥ तत्र काश्चिन्मोहिता ऊचुः। हे कृष्ण, त्वमन्यायं मा कृथाः। नंदपुत्रं त्वां वयं जानीमः। नः वस्त्राणि देहि। यतो वयं कंपिताः स्मः ॥१४॥ प्रौढा ऊचुः। हे श्यामसुंदर, वयं ते दास्यो भवाम। तवोदितं च करवाम। त्वं नो वस्त्राणि देहि। नोचेन्नंदाय ब्रूमहे ॥१५॥ श्रीभगवानुवाच। भवत्यो यदि मे दास्यो मदुक्तं च करिष्यथ तर्हि अत्रागत्य स्वानि स्वानि वस्त्राणि गृह्णंतु ॥१६॥ ततस्ताः पाणिभ्यां योनिमाच्छाद्य शीतेन कंपिताः सत्यो जलाद्बहिर्निर्गताः ॥ १७ ॥ ततः कृष्णस्ताः कुमारिका वीक्ष्य स्कंधे वासांसि गृहीत्वा प्रीतो मंदहास्यं कुर्वन् प्रोवाच ॥१८॥ हे अबलाः, यूयं व्रतं धृत्वा वस्त्ररहिताः स्नानं कृतवत्यस्तद्देवस्यापराधरूपं पापं जातम्। तस्य पापस्य निवृत्तये मस्तकेंऽजलिं बद्ध्वाऽधः प्रणामं कृत्वा वस्त्राणि गृह्यताम् ॥ १९ ॥ एवं कृष्णोक्तं विवस्त्रस्नानं व्रतनाशकं मत्वा व्रतपूर्तिहेतवे तमेव प्रणेमुः ॥२०॥ ततः कृष्णो नम्रास्ता दृष्ट्वा ताभ्यो वासांसि ददौ ॥२१॥ एवं कृष्णेन दृढं वंचिता लज्जया च त्याजिता वस्त्राणि चापहृतानि। तथापि तास्तं दोषदृष्ट्या नापश्यन् ॥२२॥ ततस्ताः कन्याः स्वस्ववासांसि परिधाय कृष्णसमागमेन वशीकृतास्तस्मिन् कृष्णे लज्जायितेक्षणाः सत्यस्ततः स्थानान्नोच्चेलुः ॥२३ ॥ ततस्तासां संकल्पं ज्ञात्वा भक्तवत्सलः श्रीकृष्णस्ताः

प्रत्याह ॥२४॥ हे साध्व्यः, युष्माकं संकल्पो मया ज्ञातोऽनुमोदितश्च । अतः स सत्यो भवितुमर्हति ॥२५॥ किंच। मयि स्थापितचित्तानां मनोरथः सांसारिकविषयभोगाय न कल्पते ॥२६॥ हे अबलाः, यूयं व्रजं गच्छत, आगामिनीः शरत्कालीना रात्रीर्मया सह रंस्यथ । तेन पूर्णमनोरथा भविष्यथ ॥२७ ॥ श्रीशुक उवाच । हे नृप, एवं कृष्णेनाज्ञापितास्ताः कुमारिकाः कृष्णचरणकमलं ध्यायंत्यो व्रजं ययुः ॥२८॥ अथ सबलः कृष्णो गोपैर्युक्तो गाश्चारयन् वृंदावनाद्दूरं गतः ॥२९॥ तदा ग्रीष्मर्तुकालीनसूर्यकिरणतापे छत्रवत्कृतच्छायान् वृक्षान् दृष्ट्वा कृष्णो गोपानाह ॥३०॥ हे स्तोककृष्ण, हे अंशो, हे श्रीदामान्, हे सुबलादयः, ॥३१॥ यूयमेतान् वृक्षान् पश्यत। स्वयं वातवर्षातपहिमान् सहित्वाऽस्माकं तानि वातादीनि वारयंति॥३२॥ अहो एतेषां वृक्षाणां जन्म श्रेष्ठम् । येषां याचका

संकल्पो विदितः साध्व्यो भवतीनां मदर्चनम् ॥ मयाऽनुमोदितः सोऽसौ सत्यो भवितुमर्हति ॥ २५ ॥ न मय्यावेशितधियां कामः कामाय कल्पते ॥ भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते ॥ २६ ॥ याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः ॥ यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः ॥ २७ ॥ श्रीशुक उवाच ॥ इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः ॥ ध्यायंत्यस्तत्पदांभोजं कृच्छ्रान्निर्विविशुर्व्रजम् ॥ २८ ॥ अथ गोपैः परिवृतो भगवान्देवकीसुतः ॥ वृंदावनाद्गतो दूरं चारयन्गाः सहाग्रजः ॥ २९ ॥ निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः ॥ आतपत्रायितान्वीक्ष्य द्रुमानाह व्रजौकसः ॥ ३० ॥ हे स्तोककृष्ण हे अंशो श्रीदामन्सुबलार्जुन ॥ विशालर्षभ तेजस्विन्देवप्रस्थ वरूथप ॥३१॥ पश्यतैतान्महाभागान्परार्थैकांतजीवितान् ॥ वातवर्षातपहिमान्सहंतो वारयंति नः ॥ ३२ ॥ अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ॥ सुजनस्येव येषां वै विमुखा यांति नार्थिनः ॥ ३३ ॥ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ॥ गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते ॥ ३४ ॥ एतावज्जन्मसाफल्यं देहिनामिह देहिषु ॥ प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत्सदा ॥ ३५ ॥ इति प्रवालस्तबकफलपुष्पदलोत्करैः ॥ तरूणां नम्रशाखानां मध्येन यमुनां गतः॥३६॥तत्र गाः पाययित्वाऽपः सुमृष्टाः शीतलाः शिवाः ॥ ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलम् ॥ ३७ ॥ तस्या उपवने कामं चारयंतः पशून्नृप ॥ कृष्णरामावुपागम्य क्षुधार्ता इदमब्रुवन् ॥ ३८ ॥ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे गोपीवस्त्रापहारो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

॥ गोपा ऊचुः ॥ राम राम महावीर्य कृष्ण दुष्टनिबर्हण ॥ एषा वै बाधते क्षुन्नस्तच्छांतिं कर्तुमर्हथः ॥ १ ॥ ॥ ॥

विमुखा न गच्छंति ॥३३॥ एते पत्रपुष्पफलच्छायामूलवल्कलकाष्ठैः सर्वेषां मनोरथान् पूरयंति ॥३४॥ संसारे स्थितानां प्राणिनामेतावदेव जन्मनः साफल्यम् । तदाह । प्राणैरर्थैर्बुध्या वाचा चान्येषां हितमेवाचरेत् ॥ ३५ ॥ एवं वदन् श्रीकृष्णः पल्लवपुष्पगुच्छफलपुष्पादिभिर्नम्रशाखानां तरूणां मध्येन यमुनातीरं प्राप्तः ॥३६॥ तत्र गोपा यमुनाया जलं गाः पाययित्वा स्वयमपि यथेच्छं पपुः ॥३७॥ ततो यमुनाया उपवने पशून् चारयंतः क्षुधार्ता गोपाः कृष्णरामावुपागम्येदमब्रुवन् ॥३८॥ इति श्रीम०द०पू०द्वाविंशोऽध्यायः॥२२॥त्रयोविंशे ततो गोपैरन्नयाञ्चोपदेशतः। तत्पत्न्यनुग्रहात्कृष्णो दीक्षितानन्वतापयत् ॥१॥गोपा ऊचुः ॥

हे राम, हे कृष्ण, एषा क्षुधाऽस्मान् बाधते तच्छांतिं कर्तुमर्हथः ॥१॥ श्रीशुक उवाच ॥ एवं गोपैः प्रार्थितो भगवान् कृष्णः स्वभक्ताया विप्रभार्यायाः प्रसीदन् सन्निदं जगाद ॥२॥ हे गोपाः, इतोऽविदूर एव ब्राह्मणाः स्वर्गप्राप्तीच्छया आंगिरसं नाम सत्रं कुर्वंतस्तिष्ठंति। तत्र यूयं गच्छत ॥३॥ गत्वा च मम रामस्य च नाम कथयित्वाऽस्मदर्थं यूयमन्नं याचत । तेन युष्माकं क्षुधा निवृत्ता भविष्यति ॥४॥ ततो गोपास्तत्र गत्वा विप्रान् दंडवत् नत्वा कृतांजलयो भूत्वाऽन्नमयाचंत ॥५॥ हे ब्राह्मणाः, यूयं शृणुत । श्रीकृष्णस्य रामस्य चाज्ञया प्राप्तानस्मान् जानीत ॥६॥ किंच । हे द्विजाः, इतः समीपे गाश्चारयंतौ रामकृष्णौ क्षुधितौ वर्तेते । तौ युष्मतोऽन्नमभिलषतः । अतो वः अन्नं श्रद्धा च यद्यस्ति तर्हि तयोरन्नं दीयताम् ॥७॥ ननु वयं दीक्षिता अभोज्यान्ना इति चेत्तर्हि हे विप्राः, पशुयाग-

॥ श्रीशुक उवाच ॥ इति विज्ञापितो गोपैर्भगवान्देवकीसुतः ॥ भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् ॥ २ ॥ प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः ॥ सत्रमांगिरसं नाम ह्यासते स्वर्गकाम्यया ॥ ३ ॥ तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः ॥ कीर्तयंतो भगवत आर्यस्य मम चाभिधाम् ॥ ४ ॥ इत्यादिष्टा भगवता गत्वाऽयाचंत ते तथा ॥ कृतांजलिपुटा विप्रा दंडवत्पतिता भुवि ॥५॥ हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः ॥ प्राप्तान् जानीत भद्रं वो गोपान्नो रामचोदितान् ॥ ६ ॥ गाश्चारयंतावविदूर ओदनं रामाच्युतौ वो लषतो बुभुक्षितौ ॥ तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ॥७॥ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ॥ अन्यत्र दीक्षितस्यापि नान्नमश्नन्हि दुष्यति ॥ ८ ॥ इति ते भगवद्याच्ञां शृण्वंतोऽपि न शुश्रुवुः ॥ क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः ॥९॥ देशः कालः पृथग्द्रव्यं मंत्रतंत्रर्त्विजोऽग्नयः ॥ देवता यजमानश्च ऋतुर्धर्मश्च यन्मयः ॥१०॥ तं ब्रह्म परमं साक्षाद्भगवंतमधोक्षजम् ॥ मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मेनिरे ॥११॥ न ते यदोमिति प्रोचुर्न नेति च परंतप ॥ गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ॥ १२ ॥ तदुपाकर्ण्य भगवान्प्रहस्य जगदीश्वरः ॥ व्याजहार पुनर्गोपान् दर्शयँल्लौकिकीं गतिम् ॥१३॥ मां ज्ञापयत पत्नीभ्यः ससंकर्षणमागतम् ॥ दास्यंति काममन्नं वः स्निग्धा मय्युषिता धिया ॥१४॥ गत्वाथ पत्नीशालायां दृष्ट्वाऽऽसीनाः स्वलंकृताः ॥ नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् ॥ १५ ॥ नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः ॥ इतोऽविदूरे चरता कृष्णेनेहेषिता वयम् ॥ १६ ॥ ॥

दीक्षायामग्नीषोमीयपशुहिंसनात्पूर्वमन्नभक्षणे सौत्रामणीयागे चान्नभक्षणे दोषोऽस्ति । अन्ययागे दीक्षितस्यान्नभक्षणे दोषो नास्ति । अतोऽन्नं दीयताम् ॥ ८ ॥ हे राजन्, एवं द्विजा भगवद्याच्ञां शृण्वंतोऽपि न शुश्रुवुः । यतो बालिशा अपि वयं ज्ञानवृद्धा इत्यभिमानवंतः ॥९॥ किंच । हे नृप, देशकालद्रव्यमंत्रतंत्रादि सर्वं यज्ञश्च यन्मयः ॥१०॥ तं साक्षात्परब्रह्मरूपं भगवंतं द्विजा मनुष्योऽयमिति मेनिरे ॥११॥ ततोऽन्नं दद्म इति नेति च नोचुः । ततो गोपा निराशा भूत्वा रामकृष्णयोः समीपमागत्य तथोचुः ॥१२॥ तच्छ्रुत्वा कृष्णः प्रहस्य पुनर्गोपानाह ॥१३॥ हे गोपाः, बलरामसहितं मामत्र प्राप्तं विप्रपत्नीभ्यः कथयत । ता वोऽन्नं दास्यंति ॥१४॥ ततो गोपास्तत्र गत्वा पत्नीशालायामासीनास्ता दृष्ट्वा नत्वा च जगदुः ॥१५॥ हे विप्रपत्न्यः, युष्मभ्यं नमः । नः वचांसि

शृणुत । इतोऽविदूरे प्राप्तेन कृष्णेन वयं प्रेषिताः ॥१६॥ स कृष्णो गाश्चारयन् गोपालै रामेण च सह दूरमागतः । तस्य गोपैः सह क्षुधितस्यान्नं दीयताम् ॥१७॥ ततस्ताः कृष्णं प्राप्तं श्रुत्वा शीघ्रं गंतुं जातसंभ्रमा बभूवुः ॥१८॥ ततश्चतुर्विधमन्नं गृहीत्वा नद्यः समुद्रमिव कृष्णमभिजग्मुः ॥ १९ ॥ तदा पतिभ्रातृबंधुसुतैर्निषेधिता अपि ताः कृष्णे धृतमनसः सत्यो ॥२०॥ यमुनोपवने गत्वा तत्र संचरंतं गोपैर्वृतं सरामं कृष्णं ददृशुः॥२१॥ कथंभूतं तम् । श्यामं पीतांबरधरं मित्रस्कंधे कृतहस्तमन्येन हस्तेन कमलं भ्रामयंतं प्रसन्नमुखम् ॥२२॥ ईदृशं तं दृष्ट्वा नैत्ररंध्रैरंतः प्रवेश्य चिरकालमालिंग्य संसारतापं जहुः। यथा सुषुप्तिसाक्षिणं प्राज्ञमालिंग्य तस्मिन् लयं प्राप्याहंकारवृत्तयस्तापं त्यजंति तद्वत् ॥२३॥ ततः कृष्णस्त्यक्तसर्वाशाः स्वदर्शनार्थं प्राप्तास्ता ज्ञात्वा प्रहस्याह ॥२४॥

गाश्चारयन् स गोपालैः सरामो दूरमागतः ॥ बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयताम् ॥१७॥ श्रुत्वाच्युतमुपायातं नित्यं तद्दर्शनोत्सुकाः ॥ तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः ॥ १८ ॥ चतुर्विधं बहुगुणमन्नमादाय भाजनैः ॥ अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः॥१९॥निषिध्यमानाः पतिभिर्भ्रातृभिर्बंधुभिः सुतैः॥भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः॥२०॥यमुनोपवनेऽशोकनवपल्लवमंडिते ॥ विचरंतं वृतं गोपैः साग्रजं ददृशुः स्त्रियः॥२१॥श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे ॥ विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासम् ॥२२॥ प्रायः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः ॥ अंतः प्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाऽभिमतयो विजहुर्नरेंद्र ॥ २३ ॥ तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया ॥ विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसिताननः ॥२४॥ स्वागतं वो महाभागा आस्यतां करवाम किम् ॥ यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः ॥२५॥ नन्वद्धा मयि कुर्वंति कुशलाः स्वार्थदर्शनाः॥ अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा ॥२६॥ प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ॥ यत्संपर्कात्प्रिया आसंस्ततः को न्वपरः प्रियः ॥२७॥ तद्यात देवयजनं पतयो वो द्विजातयः ॥ स्वसत्रं पारयिष्यंति युष्माभिर्गृहमेधिनः ॥२८॥ पत्न्य ऊचुः ॥ मैवं विभोऽर्हति भवान्गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलम् ॥ प्राप्ता वयं तुलसिदाम पदावसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् ॥ २९ ॥ गृह्णंति नो न पतयः पितरौ सुता वा न भ्रातृबंधुसुहृदः कुत एव चान्ये ॥ तस्माद्भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद्गतिररिंदम तद्विधेहि ॥ ३० ॥ ॥

हे स्त्रियः, वः स्वागतम् । आस्यताम् । युष्माकं वयं किं करवाम । किंच । मद्दर्शनार्थं यूयं प्राप्ताश्चेदिदं वो योग्यम् ॥२५॥ यतः स्वकीयमर्थं पश्यंतो विवेकिन आत्मनि प्रिये मयि फलाभिसंधिरहितामखंडां भक्तिं कुर्वंति ॥२६॥ यस्यात्मनः संपर्काद्देहपुत्रकलत्रधनादयः सर्वेऽपि प्रिया भवंति । तस्मादात्मनोऽन्यः कः प्रियोऽस्ति न कोऽपि ॥२७॥ अतो मद्दर्शनेन यूयं धन्याः । तस्माद्यूयं यज्ञवाटंप्रति गच्छत । युष्मत्पतयो गृहस्थाश्रमिणस्ते युष्माभिर्यज्ञं समापयिष्यंति ॥२८॥ पत्न्य ऊचुः । हे विभो, एवं क्रूरं वक्तुं त्वं नार्हसि । 'न मे भक्तः प्रणश्यतीति'स्ववाक्यं सत्यं कुरुष्व । वयं सर्वबंधून् हित्वा त्वद्दास्यार्थं प्राप्ताः। अतोऽस्मान् मा त्यज ॥२९॥ किंच। अस्मत्पतिपुत्रादयोऽस्मान्न गृह्णंति। तस्मादस्माकमन्या गतिर्मा भूदेवंभूतं त्वद्दास्यमेव देहि ॥ ३० ॥ ॥

श्रीभगवानुवाच ॥ हे स्त्रियः, पतिपुत्रादयो युष्मान्न निंदंति । देवा अपि युष्माकं मानमेव कुर्वंति ॥३१॥ किंच । अस्मिन् संसारे ममागसंगो मद्भक्तानां सुखाय स्नेहवृद्धये च न भवति । किंतु मनःसंग एव । अतो मयि मनो युंजानाः सत्यो यूयं शीघ्रं मां प्राप्स्यथ ॥३२॥ श्रीशुक उवाच । एवं कृष्णेनोक्ता विप्रपत्न्यो यज्ञवाटं पुनर्गताः । ते च पतयस्तासु दोषदृष्टिमकृत्वा ताभिः सह यज्ञं समाप्तं कृतवंतः ॥३३॥ तत्रैका भर्त्रा धृता सती यथाश्रुतं कृष्णं मनसाऽऽलिंग्य कर्मानुबंधनं देहं जहौ ॥३४॥ ततः कृष्णस्तेनान्नेन गोपान् भोजयित्वा स्वयमपि बुभुजे ॥३५॥ एवं कृष्णो मनुष्यलोकमनुकुर्वन् गोगोपगोपी रमयन् स्वयं रेमे ॥३६॥ अथ ते विप्रा रामकृष्णयोर्याञ्चां हतवंतो वयमिति स्मृत्वाऽनुतापं प्रापुः ॥ ३७॥ ततस्ते स्त्रीणां कृष्णे भक्तिं दृष्ट्वा भक्त्या हीनं स्वमात्मानं

॥ श्रीभगवानुवाच ॥ पतयो नाभ्यसूयेरन्पितृभ्रातृसुतादयः ॥ लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ॥ ३१ ॥ न प्रीतयेऽनुरागाय ह्यंगसंगो नृणामिह ॥ तन्मनो मयि युंजाना अचिरान्मामवाप्स्यथ ॥ ३२ ॥ श्रीशुक उवाच ॥ इत्युक्ता मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ॥ ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥ ३३ ॥ तत्रैका विधृता भर्त्रा भगवंतं यथाश्रुतम् ॥ हृदोपगुह्य विजहौ देहं कर्मानुबंधनम् ॥ ३४ ॥ भगवानपि गोविंदस्तेनैवान्नेन गोपकान् ॥ चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः ॥ ३५ ॥ एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमे गोगोपगोपीनां रमयन् रूपवाक्कृतैः ॥ ३६ ॥ अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहन्म नृविडंबयोः ॥३७॥ दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीम् ॥ आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥ ३८ ॥ धिग्जन्म नस्त्रिवृद्विद्यां धिग्व्रतं धिग्बहुज्ञताम् ॥ धिक्कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥३९॥ नूनं भगवतो माया योगिनामपि मोहिनी ॥ यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ॥ ४० ॥ अहो पश्यत नारीणामपि कृष्णे जगद्गुरौ ॥ दुरंतभावं योऽविध्यन्मृत्युपाशान्गृहाभिधान् ॥४१॥ नासां द्विजातिसंस्कारो न निवासो गुरावपि ॥ न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ॥ ४२ ॥ अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे ॥ भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ॥ ४३ ॥ ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया ॥ अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ॥ ४४ ॥ अन्यथा पूर्णकामस्य कैवल्याद्याशिषां पतेः ॥ ईशितव्यैः किमस्माभिरीशस्यैतद्विडंबनम् ॥ ४५ ॥

व्यगर्हयन् ॥३८॥ अहो नो जन्म धिक् । तथा व्रतं विद्यां कुलं क्रियाश्च धिक् । यतो वयं कृष्णे विमुखाः ॥ ३९ ॥ किंच । भगवन्माया योगिनामपि मोहिनी । यतो वयं नृणां गुरवोऽपि स्वार्थे मुह्यामहे ॥ ४० ॥ अहो स्त्रीणामपि गोविंदे भावं पश्यत । यो भावो गृहरूपमृत्युपाशानच्छिनत् ॥ ४१ ॥ किंच । आसां स्त्रीणामुपनयनसंस्कारो गुरौ वासस्तपः शौचं संध्योपास्त्यादि कर्मणि च न संति ॥ ४२ ॥ तथापि योगेश्वरे कृष्णे दृढा भक्तिरस्ति । सा संस्कारादियुक्तानामप्यस्माकं नास्ति । किमासां भाग्यम् ॥ ४३ ॥ किंच । कृपालुः कृष्णो गृहेच्छया मत्तानां नो गोपवाक्यैः स्मारयामास ॥ ४४ ॥ अन्यथा पूर्णकामस्य तस्यान्नयाचनया किं कार्यम् ॥ ४५ ॥ ॥ ॥ ॥

किंच । लक्ष्मीरन्यान् ब्रह्मादीन् हित्वा यं सेवते तस्यान्नयाचना केवलं जनमोहिन्यस्ति ॥४६॥ किंच । देशकालद्रव्यमंत्रतंत्रादयो धर्मो यज्ञश्च यन्मयः ॥४७॥ स एष भगवान् यदुषु जात इति श्रुत्वापि वयं तदनुसंधानं न धारयामः ॥ ४८ ॥ अहो वयं धन्याः । येषां नस्तादृशीः स्त्रियः । यासां भक्त्या नो मतिर्हरौ निश्चला जाता ॥४९॥ तस्मै भगवते कृष्णाय नमः । यन्मायामोहिता वयं कर्ममार्गेषु भ्रमामः ॥५०॥ स कृष्णः स्वमायामोहितात्मनामस्माकमपराधं क्षंतुमर्हति ॥५१॥ एवं स्वापराधमनुस्मृत्य कंसाद्भीतास्ते द्विजास्तयोर्दर्शनाय न जग्मुः ॥५२॥ इति श्रीमद्भा॰दश॰पूर्वार्धे त्रयोविंशोऽध्यायः ॥२३॥ ॥ चतुर्विंशे महेंद्रस्य मखं व्यावर्त्य हेतुभिः । कृष्णः प्रवर्तयामास गोवर्धनमखोत्सवम् ॥१॥ श्रीशुक उवाच ॥ रामेण सह कृष्णोऽपि गोकुले निवसन्नेकदेंद्रस्य यज्ञे कृतोद्योगान् गोपान् ददर्श ॥१॥ तत्सर्वं ज्ञात्वापि कृष्ण इंद्रस्य गर्वनिरासाभिप्रायेण नम्रतया नंदादीन् पप्रच्छ ॥२॥ हे पितः, कोऽयं संभ्रमो वः प्राप्तः । मखोऽयमिति चेदस्य किं फलं का देवता केनाधिकारिणा केन साधनेन साध्यते ॥३॥ एतन्मह्यं ब्रूहि । स्वपरदृष्टिशून्यानां मित्रोदासीनशत्रुरहितानां भवादृशां साधूनां गोप्यं कृत्यं किमपि नास्ति ॥४॥५॥ किंच । अयं जनो ज्ञात्वाऽज्ञात्वा च कर्माणि करोति । तत्र यथा विदुषः कर्मफलं स्यात्तथाऽविदुषो न भवेत् ॥६॥ तत्रायं कर्मयोगो भवतां किं शास्त्रविचारेण प्रवृत्तो लोकाचारप्राप्तो वा तत्कथ्यताम् ॥७॥ नंद उवाच । पर्जन्याधिपतिर्भगवानिंद्रोऽस्ति । मेघास्तु तस्यैव प्रियमूर्तयः । ते

हित्वान्यान्भजते यं श्रीः पादस्पर्शाशयाऽऽसकृत् ॥ आत्मदोषापवर्गेण तद्याच्ञा जनमोहिनी ॥४६॥ देशः कालः पृथग्द्रव्यं मंत्रतंत्रर्त्विजोऽग्नयः ॥ देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥ ४७ ॥ स एष भगवन् साक्षाद्विष्णुर्योगेश्वरेश्वरः ॥ जातो यदुष्वित्यशृण्म ह्यपि मूढा न विद्महे ॥ ४८ ॥ अहो वयं धन्यतमा येषां नस्तादृशीः स्त्रियः ॥ भक्त्या यासां मतिर्जाता अस्माकं निश्चला हरौ ॥ ४९ ॥ नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे ॥ यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु ॥ ५० ॥ स वै न आद्यः पुरुषः स्वमायामोहितात्मनाम् ॥ अविज्ञातानुभावानां क्षंतुमर्हत्यतिक्रमम् ॥ ५१ ॥ इति स्वाघमनुस्मृत्य कृष्णे ते कृतहेलनाः ॥ दिदृक्षवोऽप्यच्युतयोः कंसाद्भीता न चाचलन् ॥ ५२ ॥ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे यज्ञपत्न्युद्धरणं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ श्रीशुक उवाच ॥ भगवानपि तत्रैव बलदेवेन संयुतः ॥ अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमान् ॥ १ ॥ तदभिज्ञोऽपि भगवान्सर्वात्मा सर्वदर्शनः ॥ प्रश्रयावनतोऽपृच्छद्वृद्धान्नंदपुरोगमान् ॥२॥ कथ्यतां मे पितः कोऽयं संभ्रमो व उपागतः ॥ किं फलं कस्य चोद्देशः केन वा साध्यते मखः ॥ ३ ॥ एतद्ब्रूहि महान्कामो मह्यं शुश्रूषवे पितः ॥ नहि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ॥४॥ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषाम् ॥ उदासीनोऽरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ॥ ५ ॥ ज्ञात्वाऽज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ॥ विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत् ॥ ६ ॥ तत्र तावत्क्रियायोगो भवतां किं विचारतः ॥ अथवा लौकिकस्तन्मे पृच्छतः साधु भण्यताम् ॥ ७ ॥ नंद उवाच ॥ पर्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्तयः ॥ तेऽभिवर्षंति भूतानां प्रीणनं जीवनं पयः ॥ ८ ॥ ॥

मेघा भूतानां जीवनं जलं वर्षति ॥८॥ तमिंद्रं वयं वैश्या अन्ये च विप्रादयस्तत्कृतवृष्टिजलेन सिद्धैर्द्रव्यैः क्रतुभिर्यजंते ॥९॥ ततश्च होमशेषेणान्नादिना धर्मार्थकामसिद्ध्यर्थं जीविकां कल्पयंति । अतः पर्जन्यद्वारेंद्र एव लोकानां फलसाधकः ॥१०॥ एवं परंपराप्राप्तं धर्मं यः कामलोभद्वेषादिना त्यजेत् । स शुभं नाप्नोति ॥११॥ श्रीशुक उवाच ॥ एवं नंदस्य गोपानां च वचः श्रुत्वेंद्राय क्रोधं जनयन् कृष्णो नंदमाह ॥ १२ ॥ श्रीभगवानुवाच ॥ हे पितः, अयं जीवो जन्मांतरकृतेन कर्मणा जायते म्रियते च । तथा सुखं दुःखं भयं कल्याणं च कर्मणैव प्राप्नोति ॥१३॥ यदि च जीवानां कर्मफलदाता कश्चिदीश्वरः स्यात्तर्हि सोऽपि कर्तारं[1] भजते ॥ १४ ॥ अतः कर्मत एव फलप्राप्तिर्भवति । तस्मात्स्वस्वकर्मानुवर्तिनां भूतानां प्राक्तनं यत् कर्म तदन्यथा कर्तुमसमर्थेनेंद्रेण किं न किंचित् ॥१५॥ किंच। अयं जनः कर्मप्राप्तस्वभावाधीनः सन् स्वभावमेवानुसरति । अत इदं सर्वं जगत्स्वभावस्थमेव ॥१६॥ एतावता जीवः कर्मणोच्चनीचान् देहान् प्राप्नोति त्यजति च । तथा शत्रुमित्रोदासीनाः कर्मणैवोत्पद्यंते । अतः कर्मैव गुरुरीश्वरः ॥१७॥ तस्माज्जनः स्वभावस्थः सन् कर्मैव पूजयेत् । तदेवास्य दैवतम् ॥१८॥ किंच । जीविकासाधनहेतुभूतमेकं देवं त्यक्त्वा योऽन्यं देवं सेवते स तस्माद्देवात्कल्याणं न प्राप्नोति । दुष्टा स्त्री जारं सेवित्वा यथा तद्वत् ॥१९॥ स्ववृत्तिं वक्तुं वर्णानां वृत्तिभेदमाह। विप्रो वेदाध्ययनादिना वर्तेत । राजा भुवो रक्षया, वैश्यः कृषिवाणिज्यादिना शूद्रश्च द्विजसेवया वर्तेत ॥२०॥ तत्र वैश्यवृत्तिश्चतुर्धा– कृषिः वाणिज्यं गोरक्षणं वृद्धिजीवनं चेति । तत्र वयं गोपाः सदैव गोरक्षणवृत्तयः ॥२१॥ किंच । सत्वरजस्तमोगुणा जगतः पालनोत्पत्तिनाश-

तं तात वयमन्ये च वार्मुचां पतिमीश्वरम् ॥ द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभिर्नराः ॥ ९ ॥ तच्छेषेणोपजीवंति त्रिवर्गफलहेतवे ॥ पुंसां पुरुषकाराणां पर्जन्यः फलभावनः ॥ १० ॥ य एवं विसृजेद्धर्मं पारंपर्यागतं नरः ॥ कामाल्लोभाद्भयाद्द्वेषात्स वै नाप्नोति शोभनम् ॥ ११ ॥ श्रीशुक उवाच ॥ वचो निशम्य नंदस्य तथान्येषां व्रजौकसाम् ॥ इंद्राय मन्युं जनयन्पितरं प्राह केशवः ॥ १२ ॥ श्रीभगवानुवाच ॥ कर्मणा जायते जंतुः कर्मणैव विलीयते ॥ सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥ १३ ॥ अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणाम् ॥ कर्तारं भजते सोऽपि नह्यकर्तुः प्रभुर्हि सः ॥ १४ ॥ किमिंद्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम् ॥ अनीशेनान्यथा कर्तुं स्वभावविहितं नृणाम् ॥ १५ ॥ स्वभावतंत्रो हि जनः स्वभावमनुवर्तते ॥ स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ॥१६॥ देहानुच्चावचान् जंतुः प्राप्योत्सृजति कर्मणा ॥ शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः ॥१७॥ तस्मात्संपूजयेत्कर्म स्वभावस्थः स्वकर्मकृत् ॥ अंजसा येन वर्तेत तदेवास्य हि दैवतम् ॥ १८ ॥ आजीव्यैकतरं भावं यस्त्वन्यमुपजीवति ॥ न तस्माद्विंदते क्षेमं जारं नार्यसती यथा ॥ १९ ॥ वर्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः ॥ वैश्यस्तु वार्तया जीवेच्छूद्रस्तु द्विजसेवया ॥ २० ॥ कृषिवाणिज्यगोरक्षा कुसीदं तुर्यमुच्यते ॥ वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम् ॥२१॥ सत्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः ॥ रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत् ॥ २२ ॥ ॥

---

[1] यो यत्कर्म करोति तस्यैव पुंसस्तस्य कर्मणः फलदाता नान्यस्य कर्माकर्तुः । अतः स कर्मपरतंत्रो देवोऽजागलस्तनतुल्य इत्यर्थः ।

रजसा चोदिता मेघा वर्षंत्यंबूनि सर्वतः ॥ प्रजास्तैरेव सिध्यंति महेंद्रः किं करिष्यति ॥ २३ ॥ न नः पुरो जनपदा न ग्रामा न गृहा वयम् ॥ नित्यं वनौकसस्तात वनशैलनिवासिनः ॥ २४ ॥ तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः ॥ य इंद्रयागसंभारास्तैरयं साध्यतां मखः ॥ २५ ॥ पच्यंतां विविधाः पाकाः सूपांताः पायसादयः ॥ संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यताम् ॥ २६ ॥ हूयंतामग्नयः सम्यक् ब्राह्मणैर्ब्रह्मवादिभिः ॥ अन्नं बहुविधं तेभ्यो देयं वो धेनुदक्षिणाः ॥ २७ ॥ अन्येभ्यश्चाश्वचांडालपतितेभ्यो यथार्हतः ॥ यवसं च गवां दत्वा गिरये दीयतां बलिः ॥ २८ ॥ स्वलंकृता भुक्तवंतः स्वनुलिप्ताः सुवाससः ॥ प्रदक्षिणं च कुरुत गोविप्रानलपर्वतान् ॥ २९ ॥ एतन्मम मतं तात क्रियतां यदि रोचते ॥ अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥ ३० ॥ श्रीशुक उवाच ॥ कालात्मना भगवता शक्रदर्पं जिघांसता ॥ प्रोक्तं निशम्य नंदाद्याः साध्वगृह्णंत तद्वचः ॥३१॥ तथा च व्यदधुः सर्वं यथाऽऽह मधुसूदनः ॥ वाचयित्वा स्वस्त्ययनं तद्द्रव्येण गिरिद्विजान् ॥३२॥ उपहृत्य बलीन्सर्वानादृता यवसं गवाम् ॥ गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ॥ ३३ ॥ अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः ॥ गोप्यश्च कृष्णवीर्याणि गायंत्यः सद्विजाशिषः ॥ ३४ ॥ कृष्णस्त्वन्यतमं रूपं गोपविश्रंभणं गतः ॥ शैलोऽस्मीति ब्रुवन्भूरि बलिमादद्बृहद्वपुः ॥ ३५ ॥ तस्मै नमो व्रजजनैः स चक्रे आत्मनाऽऽत्मने ॥ अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ॥३६॥ एषोऽवजानतो मर्त्यान्कामरूपी वनौकसः ॥ हंति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवाम् ॥ ३७ ॥ ॥ ॥

हेतवः संति । तत्र रजसा जगदुत्पद्यते ॥२२॥ तथा रजसा प्रेरिता मेघा जलं समुद्रशिलादिष्वपि वर्षति । तैर्मेघैरेव प्रजा जीवंति तत्रेंद्रः किं करिष्यति॥२३॥ तथा हे नंद, अस्माकं नगराणि देशा ग्रामाश्च न संति । वयं नित्यं वनपर्वतवासिनः स्मः ॥२४॥ तस्माद्गवां ब्राह्मणानां पर्वतस्य च यज्ञ इंद्रयज्ञार्थं संपादितैः साहित्यैरेव क्रियताम् ॥२५॥ तत्र विविधाः पायसादयः मुद्गसूपांताः पाकाः पच्यंताम् । तथा संयावायूपशष्कुल्यः सर्वदोहश्च गृह्यताम् ॥ २६ ॥ तथा विप्रैरग्नयो हूयंताम् । तेभ्यो युष्माभिरन्नं धेनुसहिता दक्षिणाश्च देयाः ॥२७॥ तथान्येभ्यः श्वचांडालपतितेभ्योऽप्यन्नं देयम् । तथा गवां तृणं दत्वा पर्वताय बलिर्दीयताम् ॥२८॥ तथा यूयं सुवाससः स्वलंकृता भुक्तवंतः संतो गोविप्राग्निपर्वतान् प्रदक्षिणं कुरुत ॥२९॥ हे नंद, एतन्मम मतं यदि रोचते तर्हि क्रियताम् । अयं गोब्राह्मणपर्वतानां यज्ञः सर्वेषां मम च प्रियोऽस्ति ॥ ३० ॥ श्रीशुक उवाच । एवमिंद्रगर्वं दूरीकुर्वता कृष्णेनोक्तं श्रुत्वा नंदाद्यास्तद्वचोऽगृह्णन् ॥३१॥ तथा च कृष्णेनोक्तं सर्वं चक्रुः । तच्च । विप्रैः स्वस्तिवाचनं वाचयित्वा इंद्रयज्ञद्रव्येण पर्वताय बलिं ब्राह्मणभोजनं च कृत्वा॥३२॥अन्येभ्योऽन्नं गोभ्यश्च तृणं दत्वा गोधनानि पुरस्कृत्य शकटेष्वारुह्य स्वलंकृता नंदाद्याः कृष्णवीर्याणि गायंत्यो गोप्यश्च गिरिं प्रदक्षिणं चक्रुः ॥३३॥३४॥ तदा कृष्णो गोपविश्वासार्थं पर्वतमस्तकेऽन्यद्रूपं धृत्वाहं पर्वतोऽस्मीति ब्रुवन् बलिमभक्षयत् ॥ ३५ ॥ किंच । स कृष्णो व्रजजनैः सहात्मनाऽऽत्मने तस्मै नमस्कृत्वाऽऽह । अहो हे जनाः, पश्यत । असौ रूपवान् पर्वतोऽस्माकमनुग्रहं कृतवान् ॥३६॥ अयं पर्वतः सर्पाद्यनेकरूपाणि धृत्वा स्वावज्ञां कुर्वतो मर्त्यान् हंति । अतो गवां स्वस्य च

सुखार्थमस्मै नमस्यामः ॥३७॥ हे नृप, एवं पर्वतगोब्राह्मणयज्ञं कृत्वा सहकृष्णा गोपा व्रजं ययुः ॥३८॥ इति श्रीम० द० पूर्वा० चतुर्विंशोऽध्यायः ॥ २४ ॥ एकविंशे रुषा शक्रे व्रजनाशाय वर्षति । उद्धृत्य गिरिमासारादरक्षद्गोकुलं प्रभुः ॥ १ ॥ श्रीशुक उवाच ॥ इंद्र आत्मनः पूजां गोपैस्त्यक्तां ज्ञात्वा कृष्णनाथेभ्यस्तेभ्यो नंदादिगोपेभ्यश्चुकोप ॥१॥ तत इंद्रः प्रलयकर्तारं मेघगणं गोकुलनाशार्थं प्रेषयामास । अहमेवेश्वर इत्यभिमानेन वाक्यं चाह ॥ २ ॥ अहो गोपानां श्रीमदमाहात्म्यं पश्यत । ये गोपाः कृष्णं मनुष्यमाश्रित्य मे देवस्यापमानं चक्रुः ॥३ ॥ यथा अज्ञाः पुरुषा आत्मज्ञानरूपां विद्यां हित्वा कर्ममयैर्यज्ञैर्भवसमुद्रं तर्तुमिच्छंति ॥४॥ तथा एते गोपा अज्ञं शिशुं कृष्णमाश्रित्य मेऽपमानं चक्रुः ॥५॥ अतस्तेषां श्रीमदनाशार्थं पशूनां क्षयं कुरुत ॥६॥ अहमपि ऐरावतं गजमा-

इत्यद्रिगोद्विजमखं वासुदेवप्रणोदिताः ॥ यथा विधाय ते गोपाः सहकृष्णा व्रजं ययुः ॥ ३८ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ ॥ श्रीशुक उवाच ॥ इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप ॥ गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप सः ॥ १ ॥ गणं सांवर्तकं नाम मेघानां चांतकारिणाम् ॥ इंद्रः प्राचोदयत्क्रुद्धो वाक्यं चाहेशमान्युत ॥ २ ॥ अहो श्रीमदमाहात्म्यं गोपानां काननौकसाम् ॥ कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनम् ॥३॥ यथाऽदृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः ॥ विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवम् ॥ ४ ॥ वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनम् ॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियम् ॥ ५ ॥ एषां श्रियावलिप्तानां कृष्णेनाध्मायितात्मनाम् ॥ धुनुत श्रीमदस्तंभं पशून्नयत संक्षयम् ॥ ६ ॥ अहं चैरावतं नागमारुह्यानुव्रजे व्रजम् ॥ मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ॥ ७ ॥ श्रीशुक उवाच ॥ इत्थं मघवताऽऽज्ञप्ता मेघा निर्मुक्तबंधनाः॥ नंदगोकुलमासारैः पीडयामासुरोजसा ॥८॥ विद्योतमाना विद्युद्भिः स्तनंतः स्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ॥९॥ स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतम् ॥१०॥ अत्यासारातिवातेन पशवो जातवेपनाः ॥ गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः ॥ ११ ॥ शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः ॥ वेपमाना भगवतः पादमूलमुपाययुः ॥१२॥ कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो ॥ त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल ॥१३॥ शिलावर्षनिपातेन हन्यमानमचेतनम् ॥ निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः ॥१४॥

रुह्य नंदव्रजं हंतुं मरुद्गणनामकैर्देवैः सहागमिष्यामि ॥ ७ ॥ श्रीशुक उवाच ॥ एवमिंद्रेणाज्ञप्ता निर्मुक्तबंधना[1] मेघा हस्तिशुंडासदृशैर्धाराभिर्नंदगोकुलं पीडयामासुः ॥८॥ ततस्ते गर्जंतो विद्युद्भिर्विद्योतमानाः संतो जलोपलान् ववृषुः ॥९॥ एवं मेघेषु स्थूलधारा मुंचत्सु सत्सु जलौघैः प्लाव्यमाना भूर्निम्नमुन्नतं च नादृश्यत॥१०॥तदाऽतिवृष्ट्याऽतिवातेन च कंपिताः पशवो गोपा गोप्यश्च शीतपीडिताः संतः कृष्णं शरणं ययुः॥११॥ तत्र गावः शिरः पुत्रांश्च देहेनाच्छाद्य कृष्णपादमूलं ययुः ॥१२॥ ततो गोपादय आहुः ॥ हे कृष्ण, कृष्ण, हे भक्तवत्सल, इदं त्वन्नाथं गोकुलं कुपितादिंद्राद्रक्षितुमर्हसि ॥१३॥ ततः शिलावृष्टिपातेन ताडितं गो-

---

[1] पूर्वं ये प्रलयाभिप्रायेण बद्धा आसन् ते तदा निर्मुक्तबंधनाः कृता इत्यर्थः ।

कुलं दृष्ट्वा हरिस्तत्सर्वमिंद्रकृतं मेने ॥१४॥ कथं मेने तदाह । अस्माभिः स्वयज्ञे नाशिते सतींद्रो व्रजनाशार्थं वर्षति ॥१५॥ तत्र प्रतीकारमहं स्वसामर्थ्येन साधये । तेन चैषां लोकेशमानिनां श्रीमदं हरिष्ये ॥१६॥ यतः सात्विकानां देवानामीशा वयमिति गर्वो न युक्तः । अतो मत्त एषां मानभंगः शांतयेऽवकल्पते ॥१७॥ तस्मान्मच्छरणं व्रजं स्वसामर्थ्येन रक्षिष्यामि । अयं नियमो मया धृतोऽस्ति ॥ १८ ॥ एवमुक्त्वा कृष्ण एकहस्तेन गोवर्धनाचलमुत्कृत्य दधार । बालश्छत्राकमिव ॥१९॥ अथ कृष्ण आह । हे अंब, हे तात, हे गोपाः, यूयं सगोधनाः सर्वे यथासुखं गिरिगर्तं विशत ॥ २० ॥ मद्धस्ताद्गिरिः पतेदिति शंका न कार्या । वातवर्षभयेभ्यो युष्माकं रक्षणं मया कृतमस्ति ॥२१॥ एवं कृष्णेन विश्वासं प्रापिता गोपादयो भृत्यपुरोहितादिभिः सह गिरिगर्तं विविशुः ॥ २२ ॥

अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयम् ॥ स्वयागे निहतेऽस्माभिरिंद्रो नाशाय वर्षति ॥ १५ ॥ तत्र प्रतिविधिं सम्यगात्मयोगेन
साधये ॥ लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः ॥ १६ ॥ नहि सद्भावयुक्तानां सुराणामीशविस्मयः ॥ मत्तोऽसतां
मानभंगः प्रशमायोपकल्पते ॥१७॥ तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ॥ गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥१८॥
इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् ॥ दधार लीलया कृष्णश्छत्राकमिव बालकः ॥१९॥ अथाह भगवान्गोपान्हेंऽब तात
व्रजौकसः ॥ यथोपजोषं विशत गिरिगर्तं सगोधनाः ॥ २० ॥ न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातने ॥ वातवर्षभयेनालं तत्राणं
विहितं हि वः ॥ २१ ॥ तथा निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः ॥ यथावकाशं सधनाः सव्रजाः सोपजीविनः ॥२२॥
क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः ॥ वीक्ष्यमाणो दधावद्रिं सप्ताहं नाचलत्पदात् ॥ २३ ॥ कृष्णयोगानुभावं तं निशाम्येंद्रोऽतिविस्मितः ॥ निस्तंभो भ्रष्टसंकल्पः स्वान्मेघान्संन्यवारयत् ॥ २४ ॥ खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणम् ॥
निशाम्योपरतं गोपान्गोवर्धनधरोऽब्रवीत् ॥ २५ ॥ निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः ॥ उपारतं वातवर्षं व्युदप्रायाश्च
निम्नगाः ॥ २६ ॥ ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनम् ॥ शकटोढोपकरणं स्त्रीबालस्थविराः शनैः ॥ २७ ॥ भगवानपि
तं शैलं स्वस्थाने पूर्ववत्प्रभुः ॥ पश्यतां सर्वभूतानां स्थापयामास लीलया ॥ २८ ॥ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः
परिरंभणादिभिः ॥ गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥ २९ ॥ ॥ ॥ ॥

ततस्तैर्व्रजवासिभिः क्षुधातृषयोर्दुःखं हित्वा वीक्ष्यमाणः कृष्णः सप्तदिनपर्यंतं गोवर्धनपर्वतं दधार । स्थानाच्च नाचलत् ॥ २३ ॥ इंद्रः कृष्णस्य तद्योगसामर्थ्यं दृष्ट्वा विस्मितो भ्रष्टसंकल्पः सन् स्वान् मेघान् न्यवारयत् ॥२४॥ ततः कृष्ण आकाशं निरभ्रं वातसहितां वृष्टिं च शांतां दृष्ट्वा गोपानाह ॥ २५ ॥ हे गोपाः, सस्त्रीधनार्भका यूयमिदानीं बहिर्निर्यात । त्रासं त्यजत । वातवर्षं शांतम् । नद्यश्च स्वल्पजला जाताः ॥ २६ ॥ ततो गोपा गोधनं शकटारोपितपरिच्छदं च गृहीत्वा बहिर्निर्ययुः ॥२७॥ ततः कृष्णः सर्वेषां पश्यतां सतां पूर्ववत् स्वस्थाने गोवर्धनं स्थापयामास ॥२८॥ ततः प्रेमवेगेन पूर्णा गोपाः कृष्णमालिंगनादिभिरुपजग्मुः । गोप्यश्च स्नेहेन दध्यक्षताद्भिः कृष्णमपूजयन् श्रेष्ठाशीर्वादांश्च ददुः ॥ २९ ॥ ॥ ॥

यशोदा रोहिणी नंदो रामश्च बलिनां वरः ॥ कृष्णमालिंग्य युयुजुराशिषः स्नेहकातराः ॥ ३० ॥ दिवि देवगणाः साध्याः सिद्धगंधर्वचारणाः ॥ तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि पार्थिव ॥ ३१ ॥ शंखदुंदुभयो नेदुर्दिवि देवप्रणोदिताः ॥ जगुर्गंधर्वपतयस्तुंबुरुप्रमुखा नृप ॥३२ ॥ ततोऽनुरक्तैः पशुपैः परिश्रितो राजन्स गोष्ठं सबलोऽव्रजद्धरिः ॥ तथाविधान्यस्य कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ॥३३॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे पंचविंशोऽध्यायः ॥२५॥ ॥ श्रीशुक उवाच॥ एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्यते॥अतद्वीर्यविदः प्रोचुः समभ्येत्य सुविस्मिताः॥१॥बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै ॥ कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितम् ॥२॥ यः सप्तहायनो बालः करेणैकेन लीलया ॥ कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ॥३॥ तोकेनामीलिताक्षेण पूतनाया महौजसः ॥ पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ॥४॥ हिन्वतोऽधः शयानस्य मास्यस्य चरणावुदक् ॥ अनोऽपतद्विपर्यस्तं रुदतः प्रपदा हतम् ॥५॥ एकहायन आसीनो ह्रियमाणो विहायसा ॥ दैत्येन यस्तृणावर्तमहन्कंठग्रहातुरम् ॥६॥ क्वचिद्धैयंगवस्तैन्ये मात्रा बद्ध उलूखले ॥ गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ॥७॥ वने संचारयन्वत्सान्सरामो बालकैर्वृतः ॥ हंतुकामं बकं दोर्भ्यां मुखतोऽरिमपाटयत् ॥८॥ वत्सेषु वत्सरूपेण प्रविशंतं जिघांसया ॥ हत्वा न्यपातयत्तेन कपित्थानि च लीलया ॥९॥ हत्वा रासभदैतेयं तद्बंधूंश्च बलान्वितः ॥ चक्रे तालवनं क्षेमं परिपक्कफलान्वितम् ॥ १० ॥ प्रलंबं घातयित्वोग्रं बलेन बलशालिना ॥ अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ॥ ११ ॥

ततो यशोदा रोहिणी नंदो रामश्च कृष्णमालिंग्याशीर्वादं ददुः ॥३०॥ तदा स्वर्गे देवसाध्यसिद्धगंधर्वचारणास्तुष्टुवुः पुष्पवृष्टिं च चक्रुः ॥३१ ॥ तदा देववादिता दुंदुभयो नेदुः । गंधर्वा जगुः ॥ ३२ ॥ ततो गोपैर्वेष्टितः सरामः कृष्णो व्रजं विवेश । तमनु गोपिका गोवर्धनोद्धरणादीनि कृष्णस्य चरितानि गायंत्यो ययुः ॥३३॥ इति श्रीम० दश० पूर्वा० पंचविंशोऽध्यायः ॥२५॥ ॥ षड्विंशे विस्मितान् गोपान् कृष्णस्याद्भुतकर्मभिः । नंदो गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत् ॥१॥ श्रीशुक उवाच ॥ गोपाः कृष्णस्यैवंविधानि कर्माणि वीक्ष्य विस्मिताः संतो नंदमभिगम्योचुः ॥१॥ हे नंद, अस्य कर्माण्यद्भुतानि संति । अतोऽसौ ग्राम्येषु गोपालेषु स्वस्यायोग्यं जन्म कथमर्हति ॥२ ॥ यः सप्तवर्षात्मको बाल एकेन हस्तेन कथं गिरिं धृत्वा स्थितः । गजराट् पद्ममिव ॥३॥ तथा मीलिताक्षेण बालेन पूतनायाः स्तनः प्राणैः सह कथं पीतः ॥४॥ किंच । शकटस्याधः शयानस्य त्रिमासिकवयस ऊर्ध्वं चरणौ चालयतः पादाग्रेण हतं शकटं कथं विपर्यस्तं पतितम् ॥५॥ हे नंद, एकवर्षस्तव पुत्रस्तृणावर्तेन दैत्येनाकाशमार्गेण नीतः सन् तमेव कथं जघान ॥६॥ क्वचिन्नवनीतचौर्ये यशोदयोलूखले बद्धः सन् बाहुभ्यां रिंगन् यमलार्जुनयोर्मध्ये गत्वा तौ कथं पातयामास॥७॥एकदा वने रामगोपैर्युक्तः कृष्णो वत्सान् चारयान् तावत्प्राप्तं बकं बाहुभ्यां मुखतः कथमपाटवत् ॥८॥ तथा च वत्समध्ये प्राप्तं वत्सरूपिणं दैत्यं हत्वा कपित्थवृक्षे क्षिप्त्वा तेन कपित्थानि पातयामास ॥९॥ ततो धेनुकासुरं तद्बंधूंश्च हत्वा तालवनं निर्भयं चक्रे ॥ १० ॥ ततः प्रलंबं बलरामेण घातयित्वा दावाग्नेर्गा गोपांश्च मोचयामास ॥११॥ ॥ ॥

ततोऽतिविषं कालियं दमित्वा ह्रदान्निष्कास्य यमुनां निर्विषजलां चक्रे ॥१२॥ हे नंद, तव पुत्रे सर्वेषामस्माकं दुस्त्यजा प्रीतिः । तथास्मासु तस्यापि स्वाभाविका प्रीतिः कथमस्ति ॥१३॥ अहो अयं सप्तवर्षात्मको बालः क्व । महापर्वतधारणं च क्व ॥१४॥ नंद उवाच ॥ हे गोपाः, एनं पुत्रमुद्दिश्य गर्गो मे यदाह तद्वचः श्रूयताम् । तेन वः शंका गच्छतु ॥१५॥ तदाह । प्रतियुगं तनूर्गृह्णतोऽस्य श्वेतो रक्तः पीतश्चेति त्रयो वर्णा आसन् । इदानीं कृष्णत्वं प्राप्तः॥१६॥ किंच। अयं तव पुत्रः पूर्वं क्वचिद्वसुदेवस्य पुत्रो जातः । अतस्तज्जानंतो जना एनं वासुदेवमिति वदंति॥१७॥ अस्य गुणकर्मयोग्यानि नामानि रूपाणि च बहूनि संति तान्यहं वेद जना न विदुः ॥१८॥ एष वः कल्याणं करिष्यति । अनेन सर्वसंकटानि यूयमनायासेन तरिष्यथ ॥ १९ ॥ पुरा अराजके जाते सति चोरपीडिताः

आशीविषतमाहींद्रं दमित्वा विमदं ह्रदात् ॥ प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकाम् ॥१२॥ दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् ॥ नंद ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ॥१३॥ क्व सप्तहायनो बालः क्व महाद्रिविधारणम् ॥ ततो नो जायते शंका व्रजनाथ तवात्मजे ॥ १४ ॥ नंद उवाच ॥ श्रूयतां मे वचो गोपा व्येतु शंका च वोऽर्भके ॥ एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥१५॥ वर्णास्त्रयः किलास्यासन्गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १६ ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥१७॥ बहूनि संति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥१८॥ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ ॥१९॥ पुराऽनेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥२०॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः॥ २१ ॥ तस्मान्नंद कुमारोऽयं नारायणसमो गुणैः ॥ श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः ॥२२॥ इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते ॥ मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणम् ॥२३॥ इति नंदवचः श्रुत्वा गर्गगीतं व्रजौकसः॥ (दृष्टश्रुतानुभावास्ते कृष्णस्यामिततेजसः) ॥ मुदिता नंदमानर्चुः कृष्णं च गतविस्मयाः॥२४॥ देवे वर्षति यज्ञविप्लवरुषा वज्राश्मपर्षानिलैः सीदत्पालपशुस्त्रि आत्मशरणं दृष्ट्वाऽनुकंप्युत्स्मयन् ॥ उत्पाट्यैककरेण शैलमबलो लीलोच्छिलींध्रं यथा बिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्न इंद्रो गवाम् ॥२५॥ इति श्रीम० म० द० पूर्वार्धे षड्विंशतितमोध्यायः२६

साधवोऽनेन रक्षिताः संतश्चोरान् जिग्युः ॥२०॥ अस्मिन् कृष्णे ये प्रीतिं कुर्वंति तेषां शत्रवः पराभवं न कुर्वंति ॥२१॥ तस्मात् हे नंद, तव पुत्रो गुणैः श्रिया कीर्त्यादिना च नारायणसमः । अतो हे गोपाः, अस्य कृष्णस्य कर्मसु आश्चर्यं नहि ॥२२॥ एवं कथयित्वा गर्गे स्वगृहं गते सति अहमिमं कृष्णं नारायणांशं मन्ये ॥२३॥ एवं गर्गगीतं नंदवचः श्रुत्वा (कृष्णस्य दृष्टश्रुतसामर्थ्यास्ते) गोपा गतविस्मयाः संतः कृष्णं नंदं चानर्चुः ॥२४॥ एवमुक्त्वा श्रीशुको भगवतः प्रीतिं प्रार्थयते। स्वयज्ञनाशक्रोधेनेंद्रे वर्षति सति दुःखितं गोगोपालस्त्रीसहितं गोकुलं दृष्ट्वा दययैककरेण गोवर्धनमुत्पाट्य बालश्छत्राकमिव तं धृत्वा यो व्रजं ररक्ष स इंद्रमदनाशको गवां स्वामी श्रीकृष्णो नः प्रीयताम् ॥ २५ ॥ इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वार्धे षड्विंशोऽध्यायः ॥ २६ ॥ ॥

सप्तविंशे तदालक्ष्य कृष्णस्य प्रभवं परम् । वर्ण्यते सुरभींद्राभ्यामभिषेकमहोत्सवः॥१॥ श्रीशुक उवाच ॥ हे नृप, श्रीकृष्णेन गोवर्धनाचलं धृत्वा गोकुले रक्षिते सति स्वर्गादिंद्रो गोलोकात्सुरभिश्च कृष्णं प्रत्याजग्मतुः ॥१॥ तत इंद्रो लज्जितः सन्नेकांते कृष्णं प्राप्य तत्पादयोः शिरसा नत्वा ॥२॥ नष्टत्रिलोकेशमदः कृतांजलिः सन् कृष्णं जगाद ॥३॥ इंद्र उवाच ॥ हे कृष्ण, तव स्वरूपं शुद्धसत्वात्मकं रजोगुणतमोगुणरहितं शांतमस्ति । अतो हे सर्वज्ञ, तवायं संसारो नास्ति ॥४॥ तदाऽज्ञानकृता लोभादयः कुतः स्युः । तथापि त्वं धर्मरक्षणाय खलनिग्रहाय च तेषां मानभंगादिरूपं दंडं बिभर्षि ॥५॥ हे ईश, त्वं जगतः पिता गुरुः कालश्चासि । अतो जगदीशमानिनामस्माकं मानं विधुन्वन् लीलावतारैर्लीलां करोषि॥६॥ हे हरे, ये मत्सदृशा अज्ञास्ते भयकालेऽप्यभयं त्वां दृष्ट्वा मदं हित्वा

॥ श्रीशुक उवाच ॥ गोवर्धने धृते शैल आसाराद्रक्षिते व्रजे ॥ गोलोकादाव्रजत्कृष्णं सुरभिः शक्र एवच ॥१॥ विविक्त उपसंगम्य व्रीडितः कृतहेलनः ॥ पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥२॥ दृष्टश्रुतानुभावोऽस्य कृष्णस्यामिततेजसः ॥ नष्टत्रिलोकेशमद इंद्र आह कृतांजलिः ॥३॥ इंद्र उवाच ॥ विशुद्धसत्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कम् ॥ मायामयोऽयं गुणसंप्रवाहो न विद्यते तेऽग्रहणानुबंधः ॥४॥ कुतो नु तद्धेतव ईश तत्कृता लोभादयो येऽबुधलिंगभावाः ॥ तथापि दंडं भगवान्बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय॥५॥पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदंडः॥ हिताय स्वेच्छातनुभिः समीहसे मानं विधुन्वन् जगदीशमानिनाम् ॥६॥ ये मद्विधाज्ञा जगदीशमानिनस्त्वां वीक्ष्य कालेऽभयमाशु तन्मदम् ॥ हित्वाऽऽर्यमार्गं प्रभजंत्यपस्मया ईहा खलानामपि तेऽनुशासनम् ॥७॥ स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्तेऽविदुषः प्रभावम् ॥ क्षंतुं प्रभोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश मेऽसती ॥८॥ तवावतारोऽयमधोक्षजेह स्वयंभराणामुरुभारजन्मनाम् ॥ चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनाम् ॥९॥ नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ वासुदेवाय कृष्णाय सात्वतां पतये नमः ॥१०॥ स्वच्छंदोपात्तदेहाय विशुद्धज्ञानमूर्तये ॥ सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ ११ ॥ मयेदं भगवान्गोष्ठनाशायासारवायुभिः ॥ चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना ॥ १२ ॥ त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तंभो वृथोद्यमः ॥ ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः ॥ १३ ॥ ॥ श्रीशुक उवाच ॥ एवं संकीर्तितः कृष्णो मघोना भगवानमुम् ॥ मेघगंभीरया वाचा प्रहसन्निदमब्रवीत् ॥ १४ ॥ ॥

त्वद्भक्तिलक्षणं सन्मार्गं भजंति । अतस्तव लीलैव खलानामपि दंडरूपास्ति ॥७॥ एवंभूतस्त्वमैश्वर्यमदव्याप्तस्य ममापराधं क्षंतुमर्हसि। पुनस्त्वय्येवंभूता बुद्धिर्मे कदापि माभूत्॥८॥हे अधोक्षज, अयं तेऽवतारो भूमेर्भारभूतानां खलानां नाशाय त्वच्चरणसेवकानां साधूनामुत्कर्षाय चास्ति। अतस्त्वत्सेवकस्य मेऽपराधः क्षंतव्यः ॥९॥ एवं क्षमापयित्वा नमस्करोति । हे कृष्ण, वासुदेवाय यादवानां पतये तुभ्यं भगवते नमः॥१०॥ स्वभक्तेच्छया गृहीतदेहाय ज्ञानस्वरूपाय सर्वस्य कारणाय सर्वभूतात्मने ते नमः ॥११॥ हे भगवन्, यज्ञे नष्टे व्रजनाशार्थं मयेदमकृत्यं कृतम् । तत्सहनं कर्तव्यम् ॥१२॥ किंच । त्वयाऽनुग्रहः कृतः । तेनाहं गर्वरहितो जातोऽस्मि । अत ईश्वरं गुरुं त्वां शरणं प्राप्तः ॥१३॥ श्रीशुक उवाच ॥ एवमिंद्रेण स्तुतः कृष्णः प्रहस्य तं जगाद ॥१४॥ ॥

श्रीभगवानुवाच ॥ हे इंद्र, देवराज्येन मत्तस्य तवानुग्रहार्थं मया ते यज्ञभंगः कृतः ॥१५॥ किंच । ऐश्वर्यमदांधः पुमान् दंडपाणिं मां न पश्यति । अतो य-
स्यानुग्रहमिच्छामि तं संपद्भ्यो भ्रंशयामि ॥१६॥ हे इंद्र, तव कल्याणमस्तु । गर्वरहितैर्युष्माभिः स्वाधिकारे यथापूर्वं स्थीयतां मदाज्ञा च क्रियताम् ॥१७॥
अथ कामधेनुर्गोभिः सह गोपरूपिणमीश्वरं कृष्णं नत्वा जगाद ॥१८॥ सुरभिरुवाच ॥ हे कृष्ण, हे विश्वात्मन्, इंद्रेण हतानामप्यस्माकं लोकनाथेन त्वया
रक्षणं कृतमस्ति ॥१९॥ हे जगत्पते, त्वं नो दैवतम् । अतो गोविप्रसाधूनामभ्युदयार्थमद्य त्वमेवास्माकमिंद्रो भव ॥२०॥ किंच । ब्रह्मणा प्रेरिता वयं त्वामेवा-
स्माकमिंद्रत्वेऽभिषेक्ष्यामः ॥२१॥ श्रीशुक उवाच ॥ एवं सुरभिः कृष्णं संप्रार्थ्य स्वदुग्धेन तथेंद्र आकाशगंगाया ऐरावतशुंडोद्धृतैर्जलैः कृष्णमभ्यषिंचत् । त-

श्रीभगवानुवाच ॥ मया तेऽकारि मघवन्मखभंगोऽनुगृह्णता ॥ मदनुस्मृतये नित्यं मत्तस्येंद्रश्रिया भृशम् ॥१५॥ मामैश्वर्यश्रीमदांधो
दंडपाणिं न पश्यति ॥ तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहम् ॥१६॥ गम्यतां शक्र भद्रं वः क्रियतां मेऽनुशासनम् ॥ स्थीयतां
स्वाधिकारेषु युक्तैर्वः स्तंभवर्जितैः ॥१७॥ अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी ॥ स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वरम् ॥ १८ ॥
सुरभिरुवाच ॥ कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वसंभव ॥ भवता लोकनाथेन सनाथा वयमच्युत ॥१९॥ त्वं नः परमकं दैवं त्वं
न इंद्रो जगत्पते ॥ भवाय भव गोविप्रदेवानां ये च साधवः ॥२०॥ इंद्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा नोदिता वयम् ॥ अवतीर्णोऽसि वि-
श्वात्मन्भूमेर्भारापनुत्तये ॥२१॥ श्रीशुक उवाच ॥ एवं कृष्णमुपामंत्र्य सुरभिः पयसाऽऽत्मनः ॥ जलैराकाशगंगाया ऐरावतकरोद्धृतैः ॥२२॥
इंद्रः सुरर्षिभिः साकं नोदितो देवमातृभिः ॥ अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात् ॥२३॥ (अहमिंद्रो हि देवानां त्वं गवा-
मिंद्रतां गतः ॥ गोविंद इति लोके त्वां गास्यंति भुवि मानवाः ॥१॥) तत्रागतास्तुंबुरुनारदादयो गंधर्वविद्याधरसिद्धचारणाः ॥ ज-
गुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदान्विताः ॥२४॥ तं तुष्टुवुर्देवनिकायकेतवो व्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाः
परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन्पयोद्रुताम् ॥२५॥ नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः ॥ अकृष्टपच्यौषधयो गि-
रयो बिभ्रदुन्मणीन् ॥२६॥ कृष्णेऽभिषिक्त एतानि सत्वानि कुरुनंदन ॥ निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥२७॥ इति गोगो-
कुलपतिं गोविंदमभिषिच्य सः ॥ अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवम् ॥२८॥ इति श्रीम०म०द०पू० सप्तविंशोऽध्यायः ॥२७॥

तश्चेंद्रः कृष्णस्य गोविंद इति नाम कृतवान् ॥२२॥२३॥ (अहं देवानामिंद्रः त्वं च गवामिंद्रत्वं प्राप्तः । अतस्त्वां भुवि मानवा गोविंद इति गास्यंति ॥ १ ॥)
तदा तत्रागतास्तुंबुरुनारदादयो गंधर्वविद्याधरसिद्धचारणाश्च हरेर्यशो जगुः । देवांगना ननृतुः ॥२४॥ तदा देवमुख्याः कृष्णं स्तुत्वा पुष्पवृष्टिं चक्रुः । त्रयो
लोकाः सुखं प्रापुः । गावो दुग्धैरार्द्रां भूमिमकुर्वन् ॥२५॥ किंच । क्षीरादिरसवाहिन्यो नद्य आसन् । वृक्षा मधुस्रवा आसन् । व्रीह्याद्यौषधयः कर्षणं विनैव
पक्का अभूवन् । पर्वता बहिः प्रकटान् मणीन् धृतवंतः ॥२६॥ एवं कृष्णेऽभिषिक्ते सति स्वभावेन क्रूराण्यपि सर्पव्याघ्रादिजंतूनि निर्वैराणि जातानि ॥ २७ ॥
हे नृप, एवमिंद्रो गोगोकुलपतिं कृष्णमभिषिच्य तेनानुज्ञातो देवैः सह स्वर्गं ययौ ॥२८॥ इति श्रीमद्भागवतचू० दशमस्कंधे पूर्वार्धे सप्तविंशोऽध्यायः ॥२७॥

अष्टाविंशे ततो नंदाऽऽनयनं वरुणालयात् । वैकुंठदर्शनं चाथ गोपीनामनुवर्ण्यते ॥१॥ श्रीशुक उवाच । एकादश्यां निराहारो नंदो जनार्दनमभ्यर्च्य कलामात्रावशिष्टद्वादश्यां दैत्यवेलामज्ञात्वाऽरुणोदयात्पूर्वमेव निशि स्नातुं यमुनाजलं प्रविवेश। तदा वरुणदूतस्तं धृत्वा वरुणसमीपं निनाय ॥१॥२॥ ततो नंदमपश्यंतो गोपा हे कृष्ण, हे रामेति चुक्रुशुः । तच्छ्रुत्वा गोपानामभयं दत्वा श्रीकृष्णो वरुणांतिकं ययौ ॥३॥ ततो वरुण आगतं हरिं दृष्ट्वा तद्दर्शनाज्जातानंदस्तमर्हणैः संपूज्य जगाद ॥४॥ वरुण उवाच ॥ हे कृष्ण, अद्य मया देहसाफल्यं प्राप्तम् । हे हरे, त्वच्चरणभजनकर्तारो ये जनास्ते मोक्षं प्रापुः ॥ ५ ॥ अतस्तुभ्यं निरतिशयैश्वर्याय ब्रह्मणे परमात्मने नमः । यत्र लोकसृष्टिकरी मायाऽविद्यमानेव तिष्ठति ॥६ ॥ हे कृष्ण, अजानता मे दूतेन त्वत्पितुरत्रानयनं कृतं तत्त्वं

॥ श्रीशुक उवाच ॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ॥ स्नातुं नंदस्तु कालिंद्या द्वादश्यां जलमाविशत् ॥१॥ तं गृहीत्वाऽनयद्भृत्यो वरुणस्यासुरोंऽतिकम् ॥ अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ॥२॥ चुक्रुशुस्तमपश्यंतः कृष्ण रामेति गोपकाः ॥ भगवांस्तदुपश्रुत्य पितरं वरुणाहृतम् ॥ तदंतिकं गतो राजन्स्वानामभयदो विभुः ॥ ३ ॥ प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया ॥ महत्या पूजयित्वाऽऽह तद्दर्शनमहोत्सवः ॥४॥ वरुण उवाच ॥ अद्य मे निभृतो देहोऽद्यैवार्थोऽधिगतः प्रभो ॥ त्वत्पादभाजो भगवन्नवापुः पारमध्वनः ॥५॥ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ॥ न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥६॥ अजानता मामकेन मूढेनाकार्यवेदिना ॥ आनीतोऽयं तव पिता तद्भवान्क्षंतुमर्हति ॥७॥ ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक् ॥ गोविंद नीयतामेष पिता ते पितृवत्सल ॥८॥ श्रीशुक उवाच ॥ एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः ॥ आदायागात्स्वपितरं बंधूनां चावहन्मुदम् ॥९॥ नंदस्त्वतींद्रियं दृष्ट्वा लोकपालमहोदयम् ॥ कृष्णे च संनतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥१०॥ ते त्वौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरम् ॥ अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥ ११ ॥ इति स्वानां स भगवान्विज्ञायाखिलदृक् स्वयम् ॥ संकल्पसिद्धये तेषां कृपयैतदचिंतयत् ॥१२॥ जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः ॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥१३॥ इति संचिंत्य भगवान्महाकारुणिको हरिः ॥ दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥१४॥ सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनम् ॥ यद्धि पश्यंति मुनयो गुणापाये समाहिताः ॥ १५ ॥ ॥

क्षंतुमर्हसि ॥७॥ हे कृष्ण, सर्वसाक्षी त्वं ममाप्यनुग्रहं कर्तुमर्हसि । हे गोविंद, एष ते पिता नीयताम् ॥८॥ श्रीशुक उवाच ॥ एवं वरुणेन प्रसादितः श्रीकृष्णः स्वपितरं गृहीत्वा स्वानां हर्षं कुर्वन् गोकुलं प्राप्तः ॥९॥ नंदस्त्वदृष्टपूर्वं वरुणस्यैश्वर्यं तथा तेषां लोकपालानां कृष्णे नम्रतां च दृष्ट्वा व्रजमेत्य ज्ञातिभ्यो जगाद ॥१०॥ ततो गोपास्तमीश्वरं मत्वाऽयं कृष्णः स्वगतिं ब्रह्माख्यां नः प्रापयिष्यति किं वैकुंठं च दर्शयिष्यति किमिति संकल्पितवंतः ॥११॥ ततः सर्वज्ञः कृष्णस्तेषां संकल्पसिद्धये चिंतयामास ॥१२॥ अयं जनोऽत्र लोकेऽविद्याकामकर्मभिस्तिर्यगादियोनिषु भ्रमन् स्वीयां गतिं न वेद ॥१३॥ एवं दयालुः कृष्णो विचिंत्य स्वं ब्रह्मस्वरूपं वैकुंठलोकं च गोपानां दर्शयामास ॥१४॥ तत्र प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामास । तदाह । सत्यं ज्ञानमनंतं स्वप्रकाशं ब्रह्म दर्श-

यामास । यज्ज्ञानिनः पश्यंति ॥ १५ ॥ एवं ब्रह्महृदं कृष्णेन नीता मग्नाश्च पुनः कृष्णेनोद्धृताः. संतो वैकुंठं ददृशुः । कृष्णे निमित्ते सति यं वैकुंठं पूर्वम[1]क्रूरो दृष्टवान् ॥१६॥ तदा नंदादयो गोपास्तं वैकुंठे वेदैः स्तूयमानं कृष्णं दृष्ट्वा परमानंदेन व्याप्ताः संतो विस्मिता बभूवुः ॥१७॥ इति श्री० दश० पूर्वा० अष्टाविंशोऽध्यायः ॥२८॥ ॥ ऊनत्रिंशे तु रासार्थमुक्तिप्रत्युक्तयो हरेः । गोपीभी राससंरंभे तस्य चांतर्द्धिकौतुकम् ॥१॥ श्रीशुक उवाच ॥ हे नृप, भगवान् शरदृतौ विलसितमल्लिकापुष्पा गोपकन्याभ्यः प्रतिश्रुतास्ता रात्रीः प्राप्ता वीक्ष्य योगमायामाश्रितः सन् क्रीडां कर्तुं मनश्चक्रे ॥ १ ॥ तदा नक्षत्रराजश्चंद्रः श्रीकृष्णप्रीत्यर्थं, यथा पतिः स्वप्रियाया मुखमरुणेन कुंकुमेन विलिंपति तद्वत् पूर्वदिशाया मुखं सुखकरैः किरणैरुदयरागेणारक्तीकुर्वन् सन्नुदयं प्राप्तः ॥ २ ॥ तदा पूर्ण-

ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः ॥ ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा ॥ १६ ॥ नंदादयस्तु तं दृष्ट्वा परमानंदनिर्वृताः ॥ कृष्णं च तत्र च्छंदोभिः स्तूयमानं सुविस्मिताः ॥ १७ ॥ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धेऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥ ॥ श्रीशुक उवाच ॥ भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ॥ वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः ॥ १ ॥ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः ॥ स चर्षणीनामुदगाच्छुचो मृजन्प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणम् ॥ वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरम् ॥ ३ ॥ निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ॥ आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ॥ ४ ॥ दुहंत्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः ॥ पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ५ ॥ परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून्पयः ॥ शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योऽपास्य भोजनम् ॥ ६ ॥ लिंपंत्यः प्रमृजंत्योऽन्या अंजंत्यः काश्च लोचने ॥ व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ॥ ७ ॥ ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ॥ ८ ॥ अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ॥ कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥ ॥ ॥

मंडलं तं चंद्रं तथा तस्य कोमलकिरणै रंजितं वनं च दृष्ट्वा कृष्णः स्त्रीणां मनोहरं मधुरमगायत ॥३॥ तत्कामवर्धनं गीतं श्रुत्वा व्रजस्त्रियो मिथः स्वगमनमकथयित्वा स कृष्णो यत्रासीत्तत्र गीतध्वनिमार्गेण ययुः ॥४॥ तत्र काश्चिद्दुहंत्यो दोहं हित्वा ययुः । तथान्याश्चुल्ल्यां दुग्धमधिश्रित्य क्वाथमप्रतीक्षमाणा ययुः । काश्चित्संयावं पक्वमनुत्तार्य ययुः ॥५॥ काश्चित्परिवेषयंत्यस्तद्धित्वा ययुः । काश्चिच्छिशून् पाययंत्यस्तद्धित्वा ययुः । अन्याः पतीन् शुश्रूषंत्यस्तद्धित्वा ययुः । काश्चिदश्नंत्यो भोजनमपास्य ययुः ॥६॥ का० लिंपंत्यः का० अंगोद्वर्तनं कुर्वंत्यः का० नेत्रे अंजंत्यः का० व्यत्यस्त[2]वस्त्राभरणाः कृष्णसमीपं ययुः ॥७॥ एवं ताः पतिपितृभ्रातृभिर्वार्यमाणा अपि गोविंदाकर्षितचित्ता ययुः ॥ ८ ॥ काश्चिद्गोप्योंऽतर्गृहे पत्यादिभिः कुंठिताः सत्यो मीलितलोचना भूत्वैकाग्रतया कृष्णं

---

[1] शुकपरीक्षित्संवादात्प्रक्तनत्वाद्भूतनिर्देशः । न ह्यतर्क्यैश्वर्ये भगवति किंचिदप्यसंभावितमिति भावः । [2] व्यत्यस्तानि स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्रभूषणानि यासां ताः ।

दध्युः ॥९॥ तदा कृष्णविरहतापेन गतपापास्तथा ध्यानेन प्राप्तश्रीकृष्णालिंगनपरमसुखभोगेन क्षीणपुण्यबंधनास्ता गोप्यो जारबुध्यां संगता अपि गुणमयं देहं त्यक्त्वा सायुज्यमुक्तिं प्राप्ताः ॥१०॥११॥ राजोवाच । हे ब्रह्मन्, गोप्यः कृष्णं केवलं सुंदरं पुरुषं विदुः । ब्रह्मत्वेन न विदुः । एवं सति तासां कृष्णध्यानेन सायुज्यमुक्तिः कथं जाता तत्कथ्यताम् ॥१२॥ श्रीशुक उवाच ॥ हे नृप, एतत्पूर्वं सप्तमस्कंधे ते उक्तम् । यथा द्विषन्न[2]पि शिशुपालः सिद्धिं प्राप्तः । तदा कृष्णस्य प्रियाः तद्ध्यानादिना सिद्धिं गमिष्यंतीति किमु वक्तव्यम् ॥ १३ ॥ हे नृप, अव्ययस्य गुणनियंतुरियं प्रकट[3]ता नृणां मोक्षायैव ॥ १४ ॥ हरौ कामं क्रोधं भयं स्नेहं संबंधं सख्यं च कुर्वंतः पुरुषास्तन्मयतां प्राप्नुवंति ॥१५॥ एवं भूत ईश्वरे कृष्णे भवता विस्मयो न कार्यः ॥ यतः श्रीकृष्णादेतत्स्थावरादिकमपि विमुच्यते ॥१६॥ ततः कृष्णः प्राप्ता गोपीर्दृष्ट्वा वाग्विलासैस्ता मोहयन् जगाद ॥१७॥ श्रीभगवानुवाच ॥ हे गोप्यः, युष्माकं स्वागतम् । युष्माकं प्रियमहं किं करवाणि । व्रजस्य कुशलमस्ति कच्चित् । वः आगमनकारणं ब्रूत ॥१८॥ एषा रजनी भयंकररूपा । अस्यां व्याघ्रसिंहादयः संचरंति । अतो यूयं व्रजंप्रति यात । अत्र स्त्रीभिर्न स्थेयम् ॥१९॥ युष्मानपश्यंतो मातृपितृपुत्रभ्रातृपतयो वो मृगयंते । अतस्तेषां बंधूनां भयं माकुरुत ॥२०॥ युष्माभिः पुष्पितं चंद्रिकाकिरणैः शोभितं च वनं दृष्टम् ॥२१॥ अतो हे सत्यो यूयं शीघ्रं व्रजं यात । स्वपतीन् शुश्रूषध्वम् । युष्माकं वत्सा बालाश्च क्रंदंति तान् पाययत दुह्यत च ॥२२॥ मत्स्नेहाद्यूयं वशीकृतचित्ता भूत्वा प्राप्ताश्चेत्तर्हीदं वो योग्यम् । यतो मयि प्राणिनः प्रीतिं कुर्वंति ॥ २३ ॥ ॥

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः ॥ १० ॥ तमेव परमात्मानं जारबुद्ध्यापि संगताः ॥ जुहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ॥ ११ ॥ राजोवाच ॥ कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने ॥ गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥ श्रीशुक उवाच ॥ उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ॥ अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥ कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ॥ नित्यं हरौ विदधतो यांति तन्मयतां हि ते ॥ १५ ॥ न चैवं विस्मयः कार्यो भवता भगवत्यजे ॥ योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥ १६ ॥ ता दृष्ट्वांतिकमायाता भगवान्व्रजयोषितः ॥ अवदद्वदतां श्रेष्ठो वाचःपेशैर्विमोहयन् ॥ १७ ॥ श्रीभगवानुवाच ॥ स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥ व्रजस्यानामयं कच्चिद्ब्रूतागमनकारणम् ॥ १८ ॥ रजन्येषा घोररूपा घोरसत्वनिषेविता ॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥१९॥ मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ॥ विचिन्वंति ह्यपश्यंतो मा कृध्वं बंधुसाध्वसम् ॥२०॥ दृष्टं वनं कुसुमितं राकेशकररंजितम् ॥ यमुनानिललीलैजत्तरुपल्लवशोभितम् ॥ २१ ॥ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः ॥ क्रंदंति वत्सा बालाश्च तान्पाययत दुह्यत ॥ २२ ॥ अथवा मदभिस्नेहाद्भवत्यो यंत्रिताशयाः ॥ आगता ह्युपपन्नं वः प्रीयंते मयि जंतवः ॥ २३ ॥ ॥

---

[1] नहि वस्तुशक्तिर्बुद्धिमपेक्षते । अन्यथा मत्वापि पितामृतवदिति भावः । [2] जीवेष्वावृतं ब्रह्मत्वं कृष्णस्य तु हृषीकेशत्वादनावृतमतो न तत्र बुद्ध्यपेक्षेति । [3] न देहिसादृश्यमत्र वक्तुं युज्यत इति भावः ।

भर्तुस्तद्बंधूनां च शुश्रूषणं स्त्रीणां परमो धर्मोऽस्ति ॥२४॥ हे गोप्यः, स्वपतिर्दुष्टस्वभावो भाग्यहीनो वृद्धो रोगी निर्धनोऽपि अपातकी[1] चेत्तर्हि स्त्रीभिर्न त्याज्यः ॥२५॥ किंच । कुलीनस्त्रियाः जारसौख्यं परलोके स्वर्गनाशकं इह लोके यशोनाशकं भयसूचकं शास्त्रनिषिद्धं च ॥२६॥ मयि प्रेमवृद्धिस्तु यथा श्रवणाद्दर्शनाद्ध्यानाच्च भवति तथांगसंगेन न भवति । अतो यूयं गृहान्प्रति यात ॥२७॥ श्रीशुक उवाच ॥ एवमप्रियं कृष्णस्य वचः श्रुत्वा भग्नसंकल्पास्ता गोप्यश्चिंतां प्रापुः ॥२८॥ ततो मुखान्यधः कृत्वा पादांगुष्ठेन भुवं लिखंत्योऽश्रुभिः कुचकुंकुमानि मृजंत्यस्तूष्णीं तस्थुः ॥२९॥ ततो रोदनाश्रुपूर्णे नेत्रे विमृज्याप्रियमिव भाषमाणं कृष्णं किंचित्कोपावेशेन गद्गदगिरस्ता गोप्यो जगदुः ॥३०॥ गोप्य ऊचुः । हे विभो, त्वमेवं निष्ठुरं वक्तुं नार्हसि । यथा आदिपुरुषो मुमुक्षून् भजते

भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया ॥ तद्बंधूनां च कल्याण्यः प्रजानां चानुपोषणम् ॥ २४ ॥ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा ॥ पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २५ ॥ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् ॥ जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः ॥ २६ ॥ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ॥ न तथा संनिकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥ श्रीशुक उवाच ॥ इति विप्रियमाकर्ण्य गोप्यो गोविंदभाषितम् ॥ विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययाम् ॥ २८ ॥ कृत्वा मुखान्यवशुचः श्वसनेन शुष्यद्बिंबाधराणि चरणेन भुवं लिखंत्यः ॥ अस्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थुर्मृजंत्य उरुदुःखभराः स्म तूष्णीम् ॥ २९ ॥ प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः ॥ नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरंभगद्गदगिरोऽब्रुवतानुरक्ताः ॥ ३० ॥ गोप्य ऊचुः ॥ मैवं विभोऽर्हति भवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलम् ॥ भक्ता भजस्व दुरवग्रह मा त्यजास्मान्देवो यथादिपुरुषो भजते मुमुक्षून् ॥३१॥ यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ॥ अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा ॥ ३२ ॥ कुर्वंति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किम् ॥ तन्नः प्रसीद परमेश्वर मास्म छिंद्या आशां भृतां त्वयि चिरादरविंदनेत्र ॥ ३३ ॥ चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ॥ पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा ॥ ३४ ॥ ॥ ॥ ॥

तथा त्वत्पादमूलं प्राप्तानस्मान् त्वं भजस्व । मा त्यज ॥३१॥ पत्यादीनां सेवनं स्त्रीणां परो धर्म इति यत्त्वयोक्तं तदुपदेशस्थाने[2] ईशे त्वय्येवास्तु । यतो भवान् शरीरिणामात्मा हितकर्ताऽतिप्रियश्चासि ॥३२॥ हे कृष्ण, शास्त्रनिपुणाः पुरुषाः प्रिये त्वयि प्रीतिं कुर्वंति । दुःखदैः पतिपुत्रादिभिः किम् । अतो नः प्रसीद । त्वयि धृतामाशां मा छिंद्याः ॥ ३३ ॥ किंच । अस्मच्चित्तमेतावत्कालपर्यंतं सुखेन गृहेषु निर्विशतिस्म तत्त्वयापहृतम् । हस्तावपि यौ गृहकृत्ये निर्विशतस्तौ त्वयापहृतौ । तथा पादौ तव पादमूलात्पदमात्रमपि न चलतः । अतः कथं व्रजं यामः । किंवा करवाम ॥ ३४ ॥ ॥

---

[1] ब्रह्महत्यादिमहापापेन पतितश्चेत्तर्हि तस्य संसर्गमकृत्वा स दूरतः सेव्यः । [2] उपदेशानां शुश्रूषत्वेनोपदिश्यमानानां पत्यादीनां पदेऽधिष्ठाने ।

अतो हे कृष्ण, नः कामाग्निं त्वदधरामृतपूरेण सिंच। एवं नो चेत् तर्हि कामाग्निना विरहाग्निना च देहान् दग्ध्वा वयं योगिन इव ध्यानेन ते पदवीं प्राप्नुयामः ॥३५॥ हे हरे, लक्ष्म्या अपि दत्तानंदं तव पादतलं यदा स्पृष्टवत्यो वयं त्वया चानंदितास्तदारभ्यान्य[1]समक्षं स्थातुं न समर्थाः ॥३६॥ किंच। लक्ष्मीस्तव वक्षस्यसापत्न्यं स्थानं लब्ध्वापि तुलस्या सपत्न्या सह त्वत्पदांबुजरज इच्छति। तद्वद्वयमपि ते पादरजः प्राप्ताः ॥ ३७ ॥ हे दुःखहर, त्वं नः प्रसीद। वयं स्वगृहान् हित्वा ते चरणमूलं योगिन इव प्राप्ताः। अतो हे पुरुषरत्न, तवावलोकनेन कामसंतप्तचित्तानां नो दास्यं देहि ॥ ३८ ॥ कुटिलकेशैर्वेष्टितं हास्यावलोकनयुक्तं च तव मुखं दृष्ट्वा तथा दत्ताभयं बाहुदंडयुग्मं लक्ष्म्या अपि रतिजनकं ते वक्षस्थलं च दृष्ट्वा वयं तव दास्य एव भवामः ॥३९॥ हे कृष्ण, तव वेणुगीतमोहिता का वा स्त्री

सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निम् ॥ नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः
पदवीं सखे ते ॥ ३५ ॥ यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ॥ अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंग
स्थातुं त्वयाऽभिरमिता बत पारयामः ॥३६॥ श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम् ॥
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरजः प्रपन्नाः ॥३७॥ तन्नः प्रसीद वृजिनार्दन तेंऽघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ॥ त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यम् ॥३८॥ वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंडस्थलाधरसुधं हसितावलोकम् ॥ दत्ताभयं च भुजदंडयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥३९ ॥ का
स्त्र्यंग ते कलपदायतमूर्छितेन संमोहिताऽऽर्यचरितान्न चलेत्त्रिलोक्याम् ॥ त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः
पुलकान्यबिभ्रन् ॥४०॥ व्यक्तं भवान्व्रजभयार्तिहरोऽभिजातो देवो यथाऽऽदिपुरुषः सुरलोकगोप्ता ॥ तन्नो निधेहि करपंकजमार्तबंधो
तप्तस्तनेषु च शिरस्सु च किंकरीणाम् ॥४१॥ श्रीशुक उवाच ॥ इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥ प्रहस्य सदयं
गोपीरात्मारामोऽप्यरीरमत् ॥४२॥ ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ॥ ४३ ॥ उपगीयमान उद्गायन्वनिताशतयूथपः ॥ मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनम् ॥ ४४ ॥
नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम् ॥ रेमे तत्तरलानंदकुमुदामोदवायुना ॥ ४५ ॥ ॥ ॥

त्रैलोक्ये स्वधर्मान्न चलेत्। इदं त्रैलोक्यसुंदरं ते रूपं दृष्ट्वा गोपक्षिवृक्षमृगा अपि रोमांचान् दधुः ॥४०॥ हे हरे, त्वं व्रजभयदुःखहर आदिपुरुषो जातोऽसीति निश्चितम्। अतो नो दासीनां तप्तस्तनेषु मस्तकेषु च स्वहस्तकमलं स्थापय ॥ ४१ ॥ श्रीशुक उवाच ॥ एवं तासां पारवश्यप्रलपितं श्रुत्वाऽत्मारामोऽपि कृष्णस्ता रमयामास ॥४२॥ ततः स्वस्यावलोकनेन प्रफुल्लितमुखीभिस्ताभिर्युक्तः श्रीकृष्णो नक्षत्रैर्युक्तश्चंद्र इव शुशुभे ॥४३॥ ततो गोपीभिर्गीयमानः स्वयमपि गायन् कृष्णो वैजयंतीं मालां धृत्वा वनं शोभयन् व्यचरत् ॥४४॥ ततो गोपीभिः सह हिमवालुकं यमुनातटं प्रविश्य रेमे ॥४५॥ ॥

---

[1] तुच्छास्ते पततो न रोचंत इत्यर्थः ।

ततः कृष्णो बाहुप्रसारणेन आलिंगनेन हस्तकेशोरुस्तनानां ग्रहणेन परिहासेन नखाग्रपातेन क्रीडया अवलोकनैर्हसितैश्च गोपीनां कामं संदीपयन् ता रमयामास ॥४६॥ एवं कृष्णात्प्राप्तमानास्ता गोप्यो भुवि स्त्रीणां मध्ये आत्मानमधिकं मेनिरे ॥४७॥ ततः कृष्णस्तासां गर्वं मदं च वीक्ष्य गर्वशमनायानुग्रहाय च तत्रैवांतरधीयत ॥४८॥ इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वार्धे रासक्रीडायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणम् । उन्मत्तवन्न नियतं भ्रमंतीभिर्वने वने ॥१॥ श्रीशुक उवाच ॥ भगवत्यंतर्हिते सति सहसैव तमपश्यंत्यो गोप्योऽतप्यन् ॥१॥ ततस्ताः कृष्णस्य गत्या प्रेमहास्यावलोकनैर्भाषणैः क्रीडाभिश्चाकृष्टचित्ताः सत्यः कृष्णस्य लीलानुकरणेन चिक्रीडुः ॥ २ ॥ किंच ।कृष्णस्य गतिहास्यावलोकनादिषु तासां न केवलं चित्तान्येवैक्यं प्राप्तान्यपि तु देहा अप्यैक्यं प्राप्तास्तेन कारणेन कृष्ण इव क्रीडाविलासान् कुर्वंत्यस्ता अहमेव कृष्ण इति परस्परं निवेदयामासुः ॥३॥ तत उच्चैः कृष्णमेव गायंत्यो मत्तवदेकत्र मिलित्वा वनाद्वनं गच्छंत्यः कृष्णममृगयन् ॥ तत आकाशमिव सर्वव्यापिनं तं कृष्णं वृक्षान् पप्रच्छुः ॥४॥ हे अश्वत्थ, हे प्लक्ष, हे वट, अस्माकं मनो हृत्वा चोर इव गतः कृष्णो युष्माभिर्दृष्टः किम् ॥५॥ हे कुरबकाशोकनागपुन्नागचंपकाः, अस्माकं दर्पहरस्मितः स इतो गतः कृष्णो युष्माभिर्दृष्टः किम् ॥६॥ हे गोविंदचरणप्रिये तुलसि, भ्रमरकुलैः सह त्वां बिभ्रत् तवातिप्रियः कृष्णस्त्वया दृष्टः किम् ॥७॥ हे मालति, हे मल्लिके, हे जातियूथिके, कृष्णः करस्पर्शेन वः प्रीतिं जनयन्नितो गतः किम् ॥८॥ हे आम्रपनसबिल्वबकुलकदंबादयो वृक्षाः, यूयं यमुनातीरे स्थिताः स्थ । अतः शून्यचेतसां नः कृष्णमार्गं क-

बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः ॥ क्ष्वेल्याऽवलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमयांचकार ॥ ४६ ॥ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥ आत्मानं मेनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥ ४७ ॥ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥ प्रशमाय प्रसादाय तत्रैवांतरधीयत ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे भगवतो रासक्रीडावर्णनं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ श्रीशुक उवाच ॥ अंतर्हिते भगवति सहसैव व्रजांगनाः॥ अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥ गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥ गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ॥ असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥ गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनम् ॥ पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन् ॥ ४ ॥ दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥ नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥ कच्चित्कुरबकाशोकनागपुन्नागचंपकाः ॥ रामानुजो मानिनीनामितो दर्पहरस्मितः ॥ ६ ॥ कच्चित्तुलसि कल्याणि गोविंदचरणप्रिये ॥ सह त्वाऽलिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥ मालत्यदर्शि वः कच्चिन्मल्लिके जातियूथिके ॥ प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ॥ ८ ॥ चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः ॥ येऽन्ये परार्थभवका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥ ॥ ॥ ॥

थयत ॥९॥ हे पृथ्वि, त्वया तपः किं कृतम् । या त्वं कृष्णचरणस्पर्शेन रोमांचिता शोभसे । अतस्त्वया कृष्णो दृष्टः किम् ॥१०॥ हे हरिणि, श्रीकृष्णः स्वमुखादिभिस्तव दृशां प्रियं कुर्वन् प्रियया सह इतो गतः किम् ॥११॥ हे वृक्षाः, कृष्णः प्रियायाः स्कंधे बाहुं कृत्वा तुलसिकामोदमदांधैर्भ्रमरैरनुगम्यमानः सन् वः प्रणामस्य प्रेमावलोकनैः संमानं करोति किम् ॥१२॥ काश्चिदाहुः । हे सख्यः, एता लताःप्रति पृच्छत । यत एताः पत्युर्वृक्षस्य बाहूनालिंग्यापि रोमांचं बिभ्रति । अहो आसां भाग्यम् । एता नूनं कृष्णनखस्पृष्टाः संति ॥ १३ ॥ एवमुन्मत्तवचो गोप्यः कृष्णशोधनेनातिविह्वलाः सत्यो हरेस्तास्ता लीला अनुचक्रुः ॥१४॥ कस्याश्चित्पूतनावदाचरंत्याः काचित्कृष्णवदाचरंती स्तनं पपौ । अन्या बालवदात्मानं कृत्वा रुदती सती परां शकटाकृतिं पदा जघान

किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि ॥ अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन ॥१०॥ अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः ॥ कांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपतेरिह वाति गंधः ॥११॥ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदांधैः ॥ अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः ॥१२॥ पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः ॥ नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥१३॥ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः ॥ लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः॥१४॥ कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनम् ॥ तोकायित्वा रुदत्यन्या पदाहन् शकटायतीम् ॥१५॥ दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनाम् ॥ रिंगयामास काप्यंघ्री कर्षंती घोषनिःस्वनैः ॥१६॥ कृष्णरामायिते द्वे तु गोपायंत्यश्च काश्चन ॥ वत्सायतीं हंति चान्या तत्रैका तु बकायतीम् ॥१७॥ आहूय दूरगा यद्वत्कृष्णस्तमनुवर्ततीम् ॥ वेणुं क्वणंतीं क्रीडंतीमन्याः शंसंति साध्विति ॥ १८ ॥ कस्यांचित्स्वभुजं न्यस्य चलंत्याहापरानु ॥ कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥ मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ॥ इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेंऽबरम् ॥२०॥ आरुह्यैका पदाक्रम्य शिरस्याहापरां नृप ॥ दुष्टाहे गच्छ जातोऽहं खलानां ननु दंडधृक् ॥२१॥ तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणम् ॥ चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममंजसा ॥ २२ ॥

॥१५॥ काचित्तृणावर्तदैत्यरूपं धृत्वा कृष्णरूपामन्यां जहार । कापि चरणौ कर्षयंती रिंगयामास ॥ १६ ॥ ततो द्वे कृष्णरामरूपे अन्याश्च गोपरूपा जाताः । तत्रैका वत्सरूपधरां हंति अन्या च बकरूपधरां हंति ॥१७॥ एका कृष्णरूपं धृत्वा दूरे स्थिता गोरूपधारिणीरन्या आहूय वेणुं क्वणयति स्म । तदाऽन्यास्तां साध्विति शंसंति ॥१८॥ कस्यांचित्स्वभुजं कृत्वा चलंत्येका जगाद । अहं कृष्णो मम गतिं पश्यत ॥१९॥ काचिद्गोपी, यूयं वातवर्षाभ्यां मा भैष्ट । ततो युष्मत्संरक्षणं मया कृतम् । इत्युक्त्वा हस्तेन वस्त्रमूर्ध्वं धृतवती ॥२०॥ तदैका गोपी कृष्णरूपं धृत्वा कालियरूपिण्या गोप्याः शिरस्यारुह्य जगाद । हे दुष्टाहे, त्वमितो गच्छ गच्छ । अहं खलानां दंडकर्ता जातोऽस्मि ॥२१॥ तत्रैकाऽऽह । हे गोपाः, दावाग्निं पश्यत। नेत्राणि निमीलयत। युष्माकं कुशलमहं करोमि ॥२२॥

---

१ नहि स्वपतिसंगतावीदृक् पुलकसंभव इति भावः ।

तत्र कृष्णरूपैका गोपी यशोदारूपया गोप्या पुष्पमालयोखले (दधिभांडभेत्तारं नवनीतचोरं च त्वां बध्नामीति) बद्धा सती मुखमाच्छाद्य भयानुकरणं भेजे
॥२३॥ एवं वृक्षादीन् पृच्छमाना गोप्यो वनप्रदेशे कृष्णस्य पदानि ददृशुः ॥ २४ ॥ तत आहुः । एतानि पदानि श्रीकृष्णस्यैव । मीनध्वजकमलवज्रांकुशादिभिश्चिह्नितानि संति ॥२५॥ ततस्तैस्तैः पदैः कृष्णमार्गमन्विच्छंत्यो गोप्योऽग्रतो गत्वा तत्रान्यस्त्रियाः पदैर्युक्तानि कृष्णपदानि दृष्ट्वा दुःखिताः सत्य आहुः
॥२६॥ हे गोप्यः, कृष्णेन सह यातायाः कस्या एतानि पदानि ॥२७॥ अनयैव नूनं हरिराराधितः । यतोऽस्मान् हित्वा कृष्ण इमामेकांतस्थानमनयत् ॥२८॥
हे सख्यः, एते कृष्णपदाब्जरेणवोऽतिधन्याः । यान् ब्रह्मा शिवो लक्ष्मीश्च पापनाशार्थं मूर्धि दधुः ॥२९॥ हे सख्यः, तस्या एतानि पदानि नः क्षोभं कुर्वंति।

बद्धान्यया स्रजा काचित्तन्वी तत्र उलूखले ॥ (बध्नामि भांडभेत्तारं हैयंगवमुषं त्विति ॥) भीता सुदृक् पिधायास्यं भेजे भीतिविडंबनम्
॥२३॥ एवं कृष्णं पृच्छमाना वृंदावनलतास्तरून् ॥ व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥२४॥ पदानि व्यक्तमेतानि
नंदसूनोर्महात्मनः ॥ लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः ॥ २५ ॥ तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योऽग्रतोऽबलाः ॥ वध्वाः
पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् ॥२६॥ कस्याः पदानि चैतानि याताया नंदसूनुना ॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा
यथा ॥२७॥ अनयाऽऽराधितो नूनं भगवान्हरिरीश्वरः ॥ यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः ॥२८॥ धन्या अहो अमी आल्यो
गोविंदांघ्र्यब्जरेणवः ॥ यान्ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥२९॥ तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि यत् ॥ यैकापहृत्य
गोपीनां रहो भुंक्तेऽच्युताधरम् ॥ ३० ॥ न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः ॥ खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः
॥३१॥ (इमान्यधिकमग्नानि पदानि वहतो वधूम् ॥ गोप्यः पश्यत कृष्णस्य भाराक्रांतस्य कामिनः ॥१॥ अत्रावरोपिता कांता
पुष्पहेतोर्महात्मना ॥) अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ॥ प्रपदाक्रमणे एते पश्यताऽसकले पदे ॥३२॥ केशप्रसाधनं त्वत्र
कामिन्याः कामिना कृतम् ॥ तानि चूडयता कांतामुपविष्टमिह ध्रुवम् ॥३३॥ रेमे तया चात्मरत आत्मारामोऽप्यखंडितः ॥ कामिनां
दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मताम् ॥३४॥ इत्येवं दर्शयंत्यस्ताश्चेरुर्गोप्यो विचेतसः ॥ यां गोपीमनयत्कृष्णो विहायान्याः
स्त्रियो वने ॥ ३५ ॥ सा च मेने तदात्मानं वरिष्ठं सर्वयोषिताम् ॥ हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥ ३६ ॥

या एकैवैकांते कृष्णस्याधरं गोपीनां सर्वस्वं भुंक्ते ॥३०॥ अहो सख्यः, अत्र तस्याः पदानि न लक्ष्यंते । तेन तां कृष्णः स्कंधमारोपितवानित्यनुमीयते ॥३१॥
(हे गोप्यः, वधूं स्कंधे वहतः कृष्णस्याधिकमग्नान्यमूनि पदानि पश्यत ॥१॥ अत्र च पुष्पहेतोः कांता स्कंधादवरोपिता ॥) तथात्र तदर्थं कृष्णेन पुष्पावचयः
कृतः । यतोऽत्र पादाग्राभ्यां पृथ्वीमर्दनं दृश्यते । इमे कृष्णस्यासंपूर्णपदे पश्यत ॥३२॥ किंच । कामिना कृष्णेनात्र तस्याः केशप्रसाधनं कृतम् । तस्या इदं
कृष्णजानुमध्ये उपविष्टायाश्चिह्नं दृश्यते॥३३॥हे नृप, गोपीभिर्यथा तर्कितं तथा तया गोप्या सहात्मारामोऽपि श्रीकृष्णः कामिनां दीनत्वं स्त्रीणां दुःस्वभावं च दर्शयन्
रेमे ॥३४॥ एवं कृष्णं विचिन्वंत्यस्ता गोप्यो वने चेरुः । कृष्णोऽपि ता गोपीर्विहाय यां गोपीमेकांते निन्ये साप्यात्मानं स्त्रीणां मध्ये श्रेष्ठं मेने॥३५॥३६॥

ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥ न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥३७॥ एवमुक्तः प्रियामाह स्कंध आरुह्यतामिति ॥ ततश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत ॥३८॥ हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ॥ दास्यास्ते कृपणाया
मे सखे दर्शय संनिधिम् ॥ ३९ ॥ अन्विच्छंत्यो भगवतो मार्गं गोप्यो विदूरतः ॥ ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीम्
॥ ४० ॥ तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ॥ अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ॥ ४१ ॥ ततोऽविशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते ॥ तमः प्रविष्टमालक्ष्य ततो निववृतुः स्त्रियः ॥ ४२ ॥ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥
तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः ॥ ४३ ॥ पुनः पुलिनमागत्य कालिंद्याः कृष्णभावनाः ॥ समवेता जगुः कृष्णं तदागमनकांक्षिताः ॥४४॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पू० रासक्रीडायां कृष्णान्वेषणं नाम त्रिंशत्तमोऽध्यायः ॥३०॥
॥ गोप्य ऊचुः ॥ जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि ॥ दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥ शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ॥ सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह
किं वधः ॥ २ ॥ विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ॥ वृषमयात्मजाद्विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ॥३॥
न खलु गोपिकानंदनो भवानखिलदेहिनामंतरात्मदृक् ॥ विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले ॥ ४ ॥ ॥

ततः सा कृष्णेन सह किंचिद्दूरं गत्वा गर्विष्ठा सती कृष्णमब्रवीत् । हे कृष्ण, अहमितोऽग्रे चलितुं न शक्ता । अतो यत्र ते मनस्तत्र मां नय ॥ ३७ ॥
इत्याकर्ण्य कृष्णो मे स्कंधमारुह्यतामित्याह । ततस्तस्यां स्कंधारोहोद्यतायां स्वयमंतर्दधे । तदा साऽपि वधूरन्वतप्यत ॥ ३८ ॥ हा नाथ, हे रमण,
क्वासि क्वासि । हे सखे, तव दास्या मे संनिधिं दर्शय ॥ ३९ ॥ श्रीशुक उवाच ॥ कृष्णस्य मार्गं मृगयंत्यो गोप्यः समीपे तद्वियोगमोहितां तां सखीं ददृशुः
॥४०॥ ततस्तयोक्तं कृष्णान्मानप्राप्तिं दौरात्म्यादपमानं च श्रुत्वा विस्मयं प्रापुः ॥ ४१ ॥ ततस्तयापि सहितास्ताः सर्वाः कृष्णान्वेषणाय यावच्चंद्रप्रकाशः पतितस्तावद्वने गत्वा ततो निबिडवृक्षच्छाययांधकारव्याप्तं वनं दृष्ट्वा प्रतिनिववृतुः ॥४२॥ ततस्ताः कृष्णमनसस्तद्गुणानेव गायंत्यो गोप्यः स्वगृहाणि न सस्मरुः
॥४३॥ ततो यत्र पूर्वं श्रीकृष्णेन संगतिरासीत्तदेव यमुनातटं गत्वा कृष्णागमनमिच्छंत्यो मिलिताः सत्यः कृष्णं जगुः ॥४४॥ इति श्री० दश० पू० त्रिंशोऽध्यायः ॥ ३० ॥ एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः । कृष्णमेवानुगायंत्यः प्रार्थयंते तदागमम् ॥ १ ॥ गोप्य ऊचुः ॥ हे प्रिय, तव जन्मना गोकुलमधिकमुत्कर्षेण वर्तते । यतस्त्वमत्र जातस्तस्माल्लक्ष्मीर्गोकुलमलंकृत्य वर्तते । एवं व्रजे हर्षिते सति त्वदीया गोपिकास्त्वदर्थं धृतप्राणाः सत्यो दिक्षु त्वां विचिन्वते । अतस्त्वमस्माकं दृश्यो भव ॥१॥ अन्या आहुः । हे संभोगपते, नेत्रेणामूल्यदासीर्मारयतस्तवायं वधो न भवति किम् । किंतु भवत्येव । अतस्तव दृशाऽपहृतप्राणप्रत्यर्पणाय त्वया दृश्यताम् ॥२॥ हे श्रेष्ठ, त्वया विषमयजलप्राशनात्तथाऽघासुरात् वृष्टिवायुविद्युद्भ्योऽरिष्टासुरव्योमासुरादिभ्यश्च वयं रक्षिताः ।
अत इदानीं किमुपेक्षसे ॥ ३ ॥ अपि च । हे सखे, त्वं यशोदापुत्रो नहि । किंतु जीवानां बुद्धिसाक्षी ब्रह्मणा जगद्रक्षणार्थं प्रार्थितः सन् यदुकुले

जातोऽसि । अतस्तव भक्तोपेक्षाऽनुचिता॥४॥हे यादवश्रेष्ठ, संसारभयात्ते चरणं शरणं प्राप्तानां दत्ताभयं हस्तकमलं नः शिरसि स्थापय॥५॥हे गोकुलजनदुःखनाशक, हे वीर, सखे, तव दासीनामस्माकं स्वीकारं कुरु । आदौ तावन्मुखकमलं दर्शय॥६॥हे सखे, नमस्कारकर्तॄणां नृणां पापनाशकं पशूनामनुगमनकारि कालियफणास्वर्पितं ते चरणकमलं नः स्तनेषु कृत्वा कामं छिंधि ॥७॥ हे कमलनेत्र, तव मधुरवाण्या मुह्यंतीर्नो दासीरधरामृतेन संजीवय ॥८॥ हे हरे, तापत्रयेण तप्तानां शांतिकरं पापनाशकं श्रवणमात्रेण मंगलप्रदं तव कथामृतं ये भुवि गृणंति ते धन्याः। किं पुनर्ये त्वां पश्यंति ते धन्या इति। अतः प्रार्थयामहे त्वया दृश्यतामिति ॥९॥ हे कृष्ण, तव हास्यं प्रेमावलोकं क्रीडनं तथा रहसि सांकेतिकभाषणानि एतानि सर्वाणि हे कपट, नः क्षोभयंति ॥ १० ॥ हे सुंदर, यदा

विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ॥ करसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥ व्रजजनार्तिहन्वीर योषितां निजजनस्मयध्वंसनस्मित ॥ भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारुदर्शय ॥ ६ ॥ प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ॥ फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृंधि हृच्छयम् ॥ ७ ॥ मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ॥ विधिकरीरिमा वीर मुह्यतीरधरसीधुनाऽऽप्याययस्व नः ॥८॥ तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ॥ श्रवणमंगलं श्रीमदाततं भुवि गृणंति ते भूरिदा जनाः ॥ ९ ॥ प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमंगलम् ॥ रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयंति हि ॥ १० ॥ चलसि यद्व्रजाच्चारयन्पशून्नलिनसुंदरं नाथ ते पदम् ॥ शिलतृणांकुरैः सीदतीति नः कलिलतां मनः कांत गच्छति ॥ ११ ॥ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतम् ॥ घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥ प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि ॥ चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥ सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितम् ॥ इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥१४॥ अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ॥ कुटिलकुंतलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥ १५ ॥ पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेंऽत्यच्युतागताः ॥ गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥ ॥ ॥

त्वं व्रजात् पशून् चारयन् चलसि तदा ते पदं हे नाथ, रजःकणैस्तृणांकुरैश्च क्लिश्यतीति नो मनोऽस्वास्थ्यं प्राप्नोति । एवंभूतास्त्वद्दुःखशंकितचित्ता वयम् ॥११॥ त्वं तु सायंकाले कृष्णकुंतलैर्व्याप्तं गोरजोभिः शोभितं मुखकमलं मुहुर्दर्शयन् नो मनसि केवलं काममर्पयसि न तु संगं ददासि। अतस्त्वं कपटः ॥१२॥ अतोऽधुना कपटं विहाय हे रमण, सुखतमं ब्रह्मणा पूजितमापत्काले ध्येयं च ते चरणकमलं नः स्तनेषु कामशांतयेऽर्पय ॥१३॥ हे सखे, रतिवृद्धिकरं सुस्वरवेणुना चुंबितं तवाधरोष्ठामृतं नो देहि॥१४॥ हे कृष्ण,दिवसे यदा त्वं वनेऽटसि तदा त्वामपश्यतीनां नः क्षणार्धमपि युगवद्भवति। एवं तवादर्शने दुःखम्। तथा तव श्रीमुखं पश्यतीनां नो दृशां यः पक्ष्मकृत् ब्रह्मा सोऽप्यज्ञ एवेति तव दर्शने सुखातिशयः ॥१५॥ तस्मात् हे अच्युत, पतिपुत्रबांधवादीन् हित्वा वयं तव

गीतमोहिताः सत्यस्त्वत्समीपं प्राप्ताः स्मः । हे शठ, एवंभूताः स्त्रियो रात्रौ स्वयमागतास्त्वां विना कस्त्यजेन्न कोऽपि ॥१६ ॥ किंच । हे कृष्ण, तवैकांते भाषणं हास्ययुक्तं मुखं प्रेमावलोकनं तथा लक्ष्मीस्थानं वक्षो दृष्ट्वाऽतिस्पृहा भवति । मनश्च मुह्यति ॥ १७ ॥ हे सखे, इयं तव प्रकटता व्रजवासिनां दुःखहंत्री जगतो मंगलरूपाऽस्ति । अतोऽस्माकं स्वजनानां हृद्रोगनाशकं यदतिगोप्यमौषधं तत्कार्पण्यमकृत्वा देहि ॥१८॥ हे प्रिय, यत्तव सुकुमारं पदकमलं वयं कठोरस्तनेषु संमर्दनशंकया भीताः सत्यः शनैर्धारयेम । तेन त्वं वनेऽटसि । अतस्तत्ते चरणकमलं सूक्ष्मपाषाणादिभिर्न व्यथेत किम् । किंतु व्यथेतैवेति भवदायुषां नो बुद्धिर्मुह्यति ॥ १९ ॥ इति श्री० दश० पू० गोपीगीतं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः । तत्राविर्भूय गोपीस्ताः सांत्वयामास मानयन् ॥१॥ श्रीशुक उवाच ॥ एवमनेकधा गायंत्यो गोप्यः कृष्णदर्शने उत्सुकाः सत्य उच्चै रुरुदुः ॥१॥ तदा पीतांबरधरः

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ॥ बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥ व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलम् ॥ त्यज मनाक्क नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥ यत्ते सुजात चरणांबुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु ॥ तेनाटवीमटसि तद्व्यथते न किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ १९ ॥ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे रासक्रीडायां गोपीगीतं नामैकत्रिंशोऽध्यायः ॥३१ ॥ ॥ श्रीशुक उवाच ॥ इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा ॥ रुरुदुः सुस्वरं राजन्कृष्णदर्शनलालसाः ॥ १ ॥ तासामाविरभूच्छौरिः स्मयमानमुखांबुजः ॥ पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥ तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥ काचित्करांबुजं शौरेर्जगृहेंऽजलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चंदनभूषितम् ॥ ४ ॥ काचिदंजलिनाऽगृह्णात्तन्वी तांबूलचर्वितम् ॥ एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ॥ ५ ॥ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला ॥ घ्नंतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥ अपराऽनिमिषद्दृग्भ्यां जुषाणा तन्मुखांबुजम् ॥ आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ॥ ७ ॥ तं काचिन्नेत्ररंध्रेण हृदि कृत्य निमील्य च ॥ पुलकांग्युपगुह्यास्ते योगीवानंदसंप्लुता ॥ ८ ॥ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ॥ जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥ ॥

कामस्यापि मोहकः श्रीकृष्णस्तासां मध्य आविर्बभूव ॥ २ ॥ तं प्रियं दृष्ट्वोत्फुल्लनेत्रा गोप्यो युगपदुत्तस्थुः । यथाऽचेतने शरीरे प्राणे प्राप्ते सति करचरणादयोऽवयवा युगपत्स्वस्वव्यापारे प्रवर्तंते तद्वत् ॥३॥ तदा काचिद्गोपी कृष्णस्य हस्तकमलं हस्तद्वयेन जगृहे । काचित्तद्बाहुं स्वस्कंधे दधार ॥ ४ ॥ काचित्तस्य चर्वितं तांबूलमंजलिना जग्राह । एका तच्चरणकमलं स्तनयोर्दधार ॥५॥ एकाऽधरोष्ठं दष्ट्वा भृकुटिं वक्रीकृत्य कृष्णं कटाक्षैस्ताडयंतीवैक्षत ॥६॥ अन्याऽनिमीलिताभ्यां दृग्भ्यां तन्मुखं सेवमानापि नातृप्यत् । यथा तच्चरणं सेवंतः संतो न तृप्यंति तद्वत् ॥७ ॥ काचिन्नेत्रद्वारेण कृष्णं हृदये नीत्वा नेत्रे निमील्यालिंग्य योगीवानंदव्याप्ताऽऽस्ते स्म ॥८॥ एवं सर्वास्ता भगवद्दर्शनेन वियोगजं तापं जहुः ॥ ९ ॥ ॥ ॥

ततो गतशोकाभिर्गोपीभिर्वेष्टितः कृष्णोऽधिकं बभौ। यथा पुरुषः सत्वादिभिः शक्तिभिर्भाति तद्वत्॥१०॥ततः कृष्णस्ता आदाय कालिंद्यास्तटं प्रविश्य बभौ॥११॥ कथंभूतं तटम् ।शरत्कालीनचंद्रकिरणैर्ध्वस्तं रात्रिगतं तिमिरं यस्मिंस्तत् सुखकरं नदीतरंगैरास्तृतमृदुवालुकं च॥१२॥ततश्च ता गोप्यः पूर्णकामाः सत्यः स्वकुचकुंकुमांकितैरुत्तरीयवस्त्रैरंतर्यामिणे कृष्णायासनं रचयामासुः॥१३॥तत्रोपविष्टः कृष्णो गोपीसभागतस्ताभिः संमानितश्च सन् शुशुभे॥१४॥ततो हास्ययुक्तलीलावलोकनेन विलासयुक्तया भ्रुकुट्योपलक्षिता गोप्यः स्वांककृतयोः श्रीकृष्णचरणहस्तयोः संमर्दनेन श्रीकृष्णस्य सत्कारं कृत्वा ईषत्कुपिताः सत्यो बभाषिरे॥१५॥ गोप्य ऊचुः ।हे कृष्ण, केचिल्लोकाः भजतः प्राणिनः प्रति तद्भजनानुसारेण भजंति। केचित्तु एतद्विपरीतं[1] भजंति। केचित्तूभयविधानपि न भंजति । एतत्कथं

ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥ व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ १० ॥ ताः समादाय कालिंद्या निर्विश्य पुलिनं विभुः ॥ विकसत्कुंदमंदारसुरभ्यनिलषट्पदम् ॥ ११ ॥ शरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवम् ॥ कृष्णाया हस्ततरलाचितकोमलवालुकम् ॥ १२॥ तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथांतं श्रुतयो यथा ययुः ॥ स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे ॥ १३ ॥ तत्रोपविष्टो भगवान्स ईश्वरो योगेश्वरांतर्हृदि कल्पितासनः ॥ चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥ १४ ॥ सभाजयित्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा ॥ संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥ १५ ॥ गोप्य ऊचुः ॥ भजतोऽनुभजंत्येक एक एतद्विपर्ययम् ॥ नोभयांश्च भजंत्येक एतन्नो ब्रूहि साधु भोः ॥१६॥ श्रीभगवानुवाच ॥ मिथो भजंति ये सख्यः स्वार्थैकांतोद्यमा हि ते ॥ न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥ भजंत्यभजतो ये वै करुणाः पितरो यथा ॥ धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८॥ भजतोऽपि न वै केचिद्भजंत्यभजतः कुतः ॥ आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥१९॥ नाहं तु सख्यो भजतोऽपि जंतून्भजाम्यमीषामनुवृत्तिवृत्तये ॥ यथाऽधनो लब्धधने विनष्टे तच्चिंतयान्यन्निभृतो न वेद ॥ २० ॥ एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥ मया परोक्षं भजता तिरोहितं माऽसूयितुं माऽर्हथ तत्प्रियं प्रियाः ॥ २१ ॥ ॥

तद्ब्रूहि॥१६॥तदा गोपीनामभिप्रायं ज्ञात्वा श्रीभगवानुवाच॥ हे सख्यः, उपकारप्रत्युपकारतया ये परस्परं भजंति ते केवलं स्वार्थार्थम् । तत्र प्रेम धर्मश्च नास्ति ॥१७॥अभजतो ये भजंति ते द्विविधाः। साधवः स्नेहिनश्च । तत्र साधूनामुपदेशादिद्वारा निर्दोषो धर्मोऽस्ति । स्नेहिनां प्रेमद्वारा सुखं भवति॥१८॥ये केचिद्भजतोऽपि न भजंति।अभजतः कुतः । ते तु चतुर्विधाः । आत्मारामाः[2] आप्तकामाः[3] मूढाः[4] निर्दयाश्च॥१९॥तत्रचरमपक्षगतं निर्दयमात्मानं मन्यमाना गोपीः प्रत्याह। हे सख्यः, अहं तु एतेषां मध्ये न कोऽपि । किंतु परमकारुणिकः परमसुहृच्चास्मि । यतोऽहं भजतां निरंतरध्यानप्रवृत्त्यर्थं तान्न भजामि । एतत्सदृष्टांतमाह । यथाऽधनो लब्धधने नष्टे सति तच्चिंतयाऽन्यत्क्षुत्पिपासादिकमपि न वेत्ति तद्वत् ॥२०॥ एवं मदर्थे त्यक्तलोकवेदज्ञातीनां युष्माकं मयि निश्चलवृत्तिला-

---

[1] तद्भजनमनपेक्ष्य अभजतोऽपि भजंति । [2] अंतर्मुखदृष्टयः । [3] पूर्णकामत्वेन भोगेच्छारहिताः । [4] कृतोपकारानुसंधानरहिताः ।

भार्थं अहं गुप्तरीत्या स्थितः। अतो हे प्रियाः, प्रियं मां दोषारोपेण द्रष्टुं यूयं न योग्याः ॥२१॥ हे प्रियाः, निष्कपटतया मत्सेवां कुर्वतीनां वः प्रत्युपकारं कर्तुं चिरकालेनाप्यहं न शक्नोमि। या यूयं दुर्जयगृहशृंखलाश्छित्वा मामभजन्। तासां युष्माकं साधुकृत्येनैव तद्युष्मत्साधुकृत्यं प्रति[1]कृतं भवतु ॥ २२ ॥ इतिश्रीम० दशम० पू० द्वात्रिंशोऽध्यायः ॥३२॥ त्रयस्त्रिंशे ततो गोपीमंडलीमध्यगो हरिः। प्रियास्ता रमयामास ह्रदिनीवनकेलिभिः ॥१॥ श्रीशुक उवाच ॥ हे नृप, एवं कृष्णवचः श्रुत्वा गोप्यो वियोगजं तापं जहुः॥१॥तत्र यमुनापुलिने गोविंदोऽन्योन्यसंग्रथितबाहुभिः स्त्रीरत्नैः सह रास[2]क्रीडां प्रारभत॥२॥ ततो मंडलरूपेण स्थितानां गोपीनां द्वयोर्द्वयोर्मध्ये विष्टेन श्रीकृष्णेन सह रासोत्सवः संप्रवृत्तः। तत्र गोप्यः स्वनिकटस्थं कृष्णं मामेवायमालिंगितवानिति मन्यंते स्म। तदा स्त्रीसहितानां देवानां

न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः॥ या माऽभजन्दुर्जरगेहशृंखलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥२२॥ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे रासक्रीडायां गोपीसांत्वनं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ श्रीशुक उवाच ॥ इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ॥ जहुर्विरहजं तापं तदंगोपचिताशिषः ॥१॥ तत्रारभत गोविंदो रासक्रीडामनुव्रतैः ॥ स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥२॥ रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः ॥ योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः ॥ ३ ॥ यं मन्येरन्नभस्तावद्विमानशतसंकुलम् ॥ दिवौकसां सदाराणामौत्सुक्यापहृतात्मनाम् ॥ ४॥ ततो दुंदुभयो नेदुर्निपेतुः पुष्पवृष्टयः ॥ जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥५॥ वलयानां नूपुराणां किंकिणीनां च योषिताम्॥ स प्रियाणामभूच्छब्दस्तुमुलो रासमंडले॥ ६॥ तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः ॥ मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७॥ पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः ॥ स्विद्यन्मुख्यः कबररशनाग्रंथयः कृष्णवध्वो गायंत्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥८॥ उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः ॥ कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥ काचित्समं मुकुंदेन स्वरजातीरमिश्रिताः ॥ ९ ॥ उन्निन्ये पूजिता तेन प्रीयता साधुसाध्विति ॥ तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥ १० ॥ ॥

विमानशतसंकुलमाकाशं बभूव ॥३ ॥४॥ तदा देवैर्वादिता दुंदुभयो नेदुः। देवकृताः पुष्पवृष्टयः पेतुः। सस्त्रीका गंधर्वाः कृष्णस्य निर्मलं यशो जगुः ॥५॥ तदा रासमंडले कृष्णसहितानां स्त्रीणां वलयानां नूपुराणां किंकिणीनां च तुमुलः शब्दो बभूव ॥६॥ तत्र गोपीभिः सह कृष्णः स्वर्णमणिमध्ये नीलमणिरिव शुशुभे ॥७॥ तथा गोप्यः पादन्यासैर्हस्तचालनैर्हास्ययुक्तभ्रूविलासैश्चंचलैः कुचैः पटैश्च तथा गंडेषु चंचलैः कुंडलैश्च स्वेदयुक्तवदना भूत्वा गायंत्यः सत्यः कृष्णेन सह मेघसमूहे वि[3]द्युत इव विरेजुः॥८॥ता नृत्यंत्यो मधुरकंठ्यो रतिप्रिया गोप्य उच्चैर्जगुः। यासां गीतेन जगद्व्याप्तमासीत्॥९॥तत्र काचिद्गोपी कृष्णेन सह ष-

---

[1] युष्मत्सौशील्येनैव ममानृण्यं न तु मत्कृतप्रत्युपकारेणेत्यर्थः। [2] रासो नाम बहुनर्तकीयुक्तो नृत्यविशेषस्तां क्रीडाम्। [3] तत्र नानामूर्तिः कृष्णो मेघचक्रमिव गोप्यस्तडित इव स्वेदस्तुषार इव गीतं गर्जितमिवेति यथासंभवमूह्यम्।

ड्जादिस्वरालापगतीरुच्चारयंती सती ता गतीः कृष्णगीताभिर्गतिभिरमिश्रिताश्चकार। तदा कृष्णेन साधु साध्विति पूजिता सती तदेव गीतं पुनर्ध्रुवाख्यतालविशेषेण जगौ। तदा कृष्णस्तस्यै बहुमानं ददौ ॥ १०॥ काचिद्गोपी रासपरिश्रांता सती कृष्णस्य स्कंधं बाहुना जग्राह। एका स्वस्कंधगतं चंदनालिप्तं कृष्णबाहुमाघ्राय हृष्टरोमा सती चुचुंब ॥११॥१२॥ कस्याश्चिद्गंडे गंडं संदधत्याः कृष्णस्तांबूलचर्वितं ददौ ॥ १३॥ काचिन्नृत्यंती श्रांता सती कृष्णहस्तकमलं स्तनयोरधात् ॥१४॥ एवमन्या अपि गोप्यः कृष्णं कांतं लब्ध्वा कृष्णहस्ताभ्यां गृहीतकंठ्यः सत्यो गानं कृत्वा नानाविभ्रमैश्चिक्रीडिरे ॥ १५ ॥ ततो वादकेषु देवेषु गायकेषु च गंधर्वादिषु रसावेशेन मुह्यत्सु सत्सु। अन्यामेव वाद्यादिसंपत्तिं दर्शयन् राससंभ्रममाह। तदा गोप्यो राससभायां केशेभ्यो गलितपुष्पमालाः

काचिद्रासपरिश्रांता पार्श्वस्थस्य गदाभृतः ॥ जग्राह बाहुना स्कंधं श्लथद्वलयमल्लिका ॥ ११ ॥ तत्रैकांऽसगतं बाहुं कृष्णस्योत्पलसौरभम् ॥
चंदनालिप्तमाघ्राय हृष्टरोमा चुचुंब ह ॥ १२ ॥ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितम् ॥ गंडं गंडे संदधत्या
अदात्तांबूलचर्वितम् ॥ १३ ॥ नृत्यंती गायती काचित्कूजन्नूपुरमेखला ॥ पार्श्वस्थाऽच्युतहस्ताब्जं श्रांताधात्स्तनयोः शिवम् ॥१४॥
गोप्यो लब्ध्वाऽच्युतं कांतं श्रिय एकांतवल्लभम् ॥ गृहीतकंठ्यस्तद्दोर्भ्यां गायंत्यस्तं विजह्रिरे ॥ १५ ॥ कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियो वलयनूपुरघोषवाद्यैः ॥ गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥
एवं परिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमे रमेशो व्रजसुंदरीभिर्यथाऽर्भकः स्वप्रतिबिंबविभ्रमः ॥ १७ ॥ तदंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा ॥ नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह ॥ १८ ॥ कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ॥ कामार्दिताः शशांकश्च सगणो विस्मितोऽभवत् ॥ १९ ॥ कृत्वा तावंतमात्मानं यावतीर्गोपयोषितः ॥ रेमे स भगवांस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥ तासामतिविहारेण श्रांतानां वदनानि सः ॥ प्रामृजत्करुणः प्रेम्णा शंतमेनांग पाणिना ॥ २१ ॥ गोप्यः स्फुरत्पुरटकुंडलकुंतलत्विड्गंडश्रिया सुधितहासनिरीक्षणेन ॥ मानं दधत्य
ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥ २२ ॥ ॥ ॥

सत्यो वलयनूपुरघोषवाद्यैर्भ्रमरेषु गायकेषु सत्सु भगवता समं ननृतुः ॥ १६ ॥ एवं भगवानप्यालिंगनकरस्पर्शावलोकनविलासहासैर्गोपीभिः सह रेमे। यथा बालः स्वप्रतिबिंबैः क्रीडति तद्वत् ॥१७॥ गोप्यस्तदंगसंगहर्षेण व्याप्तेंद्रियाः सत्यः केशान् वस्त्राणि कुचपट्टिकां वा यथापूर्वं धर्तुं समर्था न बभूवुः ॥१८॥ एवं कृष्णविक्रीडितं दृष्ट्वा देवस्त्रियोऽपि कामार्दिता भूत्वा मुमुहुः। चंद्रोऽपि शुक्रमंगलादिग्रहसहितः कामार्दितः सन् विस्मितो बभूव ॥१९॥ एवमात्मारामोऽपि कृष्णो यावत्यो गोपांगनास्तावंति रूपाणि कृत्वा ताभिः सह रेमे ॥ २० ॥ ततः क्रीडया श्रमितानां गोपीनां मुखानि कृष्णः सुखकरेण स्वपाणिना प्रामृजत् ॥ २१ ॥ ततो गोप्योऽमृतायितहास्यावलोकनेन कृष्णस्य संमानं कुर्वत्यस्तस्य कर्माणि जगुः ॥ २२॥ ॥ . ॥

---

१ अनेन भगवान् स्वीयमेव सर्वकलाकौशलं सौगंध्यलावण्यमधुर्यादि च तासु संचार्य ताभिः सह रेम इति सूचितम्। २ अनेनैतत्सूचितं भवति। चंद्रेण विस्मितेन गतौ विस्मृतायां सत्यां ततः प्राक्तनाः सर्वेऽपि ग्रहास्तत्रतत्रैव तस्थुस्ततश्चातिदीर्घासु रात्रिषु यथासुखं विजह्रुरिति।

अथ जलक्रीडामाह । ततः कृष्णः श्रमं दूरीकर्तुं मालासंबंधिभिर्भ्रमरैरनुगतः सन् हस्तिनीभिर्गज इव गोपीभिः सह यमुनाया उदकं विवेश ॥२३॥ स कृष्णो गोपीभिरतिशयेन परिषिच्यमानः पुष्पवृष्टिं कुर्वद्भिर्देवैरीड्यमानश्च सन्नुदके रेमे॥२४॥ अथ वनक्रीडामाह । ततश्च कृष्णो यमुनाया उपवने भृंगाणां स्त्रीणां च गणैर्वेष्टितः सन् गजीभिर्गज हव चचार ॥२५ ॥ एवं कृष्णश्चंद्रकिरणैः शोभिताः शरत्कालीनाः सर्वा निशाः आत्मन्यवरुद्धधातुः सन् सेवितवान् ॥ २६ ॥ राजोवाच ॥ हे ब्रह्मन्, भगवान् धर्मस्थापनार्थं दुष्टानां नाशार्थं चावतीर्णः॥२७॥स धर्ममर्यादानां वक्ता कर्ता रक्षिता च सन् परस्त्रीसंभोगरूपं धर्मविरुद्धं कर्म कथं कृतवान्॥२८॥किंच । पूर्णकामोऽपि भगवान् निंद्यं कर्म केनाभिप्रायेण कृतवान् । एवं नः संशयं छिंधि॥२९॥परमेश्वरे कैमुतिकन्यायेन परिहर्तुं सामान्यतो महतां वृत्तं ॥ श्रीशुक उवाच ॥ हे नृप, [1]महतां धर्ममर्यादोल्लंघनं परस्त्रीसेवनादि साहसं च दृष्टम् । तत्तेषां तेजस्विनां दोषाय न भवति । यथा विष्ठाद्यमंगलं दहतोऽप्यग्नेस्तत्कर्म तस्य दोषाय न भवति तद्वत् ॥ ३० ॥ तथापि देहादिपरतंत्रो जन इदं शास्त्रविरुद्धं कर्म मनसाऽपि नाचरेत् । आचरंश्च यथा शिवं विनान्यो विषं भक्षयन् म्रियेत तथा नश्येत् ॥३१ ॥ किंच । महतां वचः सत्यम् । तदन्येनाचरितव्यम् । महतामाचरणं तु क्वचित्सत्यं तत्तेषां वचसा विरुद्धं न चेत्तर्हि तदन्येनाचरितव्यम् ॥ ३२ ॥ यतो निरहंकारिणां महतां धर्माचरणेन स्वार्थो नास्ति । अधर्माचरणेनानर्थश्च नास्ति । किंतु प्रारब्धकर्मक्षपणमात्रमेव तेषां तत्कृत्यं नान्यत् ॥३३॥ अतः सर्वप्राणिनां नियंतुर्हरेर्धर्माधर्माचरणाभ्यां पुण्यपापसंबंधो नास्तीति किं पुनर्वक्तव्यम् ॥ ३४ ॥

ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः सकुचकुंकुमरंजितायाः ॥ गंधर्वपालिभिरनुद्रुत आविशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥ सोंऽभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोंऽग ॥ वैमानिकैः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेंद्रलीलः ॥ २४ ॥ ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे ॥ चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः ॥ २५ ॥ एवं शशांकांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ॥ सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥ राजोवाच ॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥ अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥ स कथं धर्मसेतूनां वक्ता कर्ताऽभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनम् ॥२८॥ आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितम् ॥ किमभिप्राय एतं नः संशयं छिंधि सुव्रत ॥ २९ ॥ श्रीशुक उवाच ॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥३० ॥ नैतत्समाचरेज्जातु मनसाऽपि ह्यनीश्वरः॥ विनश्यत्याचरन्मौढ्याद्यथा रुद्रोऽब्धिजं विषम् ॥ ३१ ॥ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥ तेषां यत्स्ववचो युक्तं बुद्धिमांस्तत्समाचरेत् ॥ ३२ ॥ कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥ विपर्ययेण वाऽनर्थो निरहंकारिणां प्रभो ॥ ३३ ॥ किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसाम् ॥ ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥ ॥ ॥

---

[1] प्रजापतींद्रसोमविश्वामित्रादीनाम् ।

यत्पादपंकजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबंधाः ॥ स्वैरं चरंति मुनयोऽपि न नह्यमानास्तस्येच्छयात्तवपुषः कुत एव बंधः ॥ ३५ ॥ गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ॥ योंऽतश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥ ३६ ॥ अनुग्रहाय भूतानां मानुषं देहमास्थितः ॥ भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ॥ ३७ ॥ नासूयन्खलु कृष्णाय मोहितास्तस्य मायया ॥ मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ॥ ३८ ॥ ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः॥ अनिच्छंत्यो ययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ॥ ३९ ॥ विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद्यः ॥ भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे रासक्रीडावर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ श्रीशुक उवाच ॥ एकदा देवयात्रायां गोपाला जातकौतुकाः ॥ अनोभिरनडुद्युक्तैः प्रययुस्तेंऽबिकावनम् ॥ १ ॥ तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुम् ॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेंऽबिकाम् ॥ २ ॥ गावो हिरण्यं वासांसि मधुमध्वन्नमादृताः ॥ ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥ ३ ॥ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः ॥ रजनीं तां महाभागा नंदसुनंदकादयः ॥ ४ ॥ कश्चिन्महानहिस्तस्मिन्विपिनेऽतिबुभुक्षितः ॥ यदृच्छयाऽऽगतो नंदं शयानमुरगोऽग्रसीत् ॥ ५ ॥ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महानयम् ॥ सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥ ६ ॥ तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः ॥ ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥ ॥

किंच। यस्य चरणकमलपरागनिषेवणेन तृप्ता मुनयो मुक्तबंधनाः संतः सर्वत्र स्वेच्छया चरंति। तस्येश्वरस्येच्छया गृहीतदेहस्य बंधः कुतः स्यान्न कुतोऽपि॥३५॥ किंच। हे नृप, गोपीनां गोपानां सर्वदेहिनां च योंऽतश्चरति स सर्वसाक्षी भूतानामनुग्रहार्थं[1] मनुष्यदेह[2]मास्थितः सन् तादृशीः क्रीडा भजते। याः स्मृत्वा नरस्तत्परो भवेत्॥३६॥३७॥गोकुलवासिनः स्वस्वदारान् स्वस्वपार्श्व[3]स्थान् मत्वा तन्मायामोहिताः संतः कृष्णाय नासूयन्॥३८॥ततो गोप्यो ब्राह्मे मुहूर्ते प्राप्ते कृष्णाज्ञयाऽनिच्छंत्योऽपि गृहान् ययुः॥३९॥इदं व्रजस्त्रीभिः सह विष्णोः क्रीडितं यः शृणुयाद्वर्णयेद्वा स हरौ भक्तिं प्राप्य कामवासनामाशु त्यजति ॥ ४० ॥ इति श्रीमद्भा॰ द॰ पू॰ रासक्रीडावर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥३३॥ ॥ चतुस्त्रिंशेऽहिना ग्रस्तं नंदं हरिरमूमुचत् । विद्याध्रं चांगिरःशापाच्छंखचूडं तथाऽवधीत् ॥१॥ श्रीशुक उवाच ॥ एकदा महादेवयात्रायां जातकौतुका गोपालाः शकटैरंबिकावनं ययुः ॥ १ ॥ तत्र सरस्वत्यां नद्यां स्नात्वा शिवमंबिकां चानर्चुः ॥२॥ ततो गोपा महादेवप्रीत्यर्थं ब्राह्मणेभ्यो गोसुवर्णवस्त्रान्नानि ददुः ॥३ ॥ ततस्ते गोपाः केवलं जलं प्राश्य ब्रह्मचर्यादिव्रतधारिणः संतस्तत्र सरस्वतीनदीतीरे तां रात्रिं न्यवसन् ॥४॥ तस्मिन् वने एकोऽजगरः सर्पो बुभुक्षितः सन् तत्रागत्य शयानं नंदं जग्रास॥५॥स पादतो ग्रस्तो नंदो हे कृष्ण, कृष्ण, हे तात, सर्पो मां ग्रसते । अतः शरणागतं मां मोचयेति चुक्रोश ॥ ६ ॥ ततो गोपा नंदाक्रोशं श्रुत्वोत्थाय सर्पग्रस्तं नंदं दृष्ट्वा ज्वलितकाष्ठैः सर्पं ताडयामासुः ॥ ७ ॥

---

[1] शृंगाररसाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान् कर्तुमिति भावः । [2] न त्वस्मदादितुल्योऽस्य देहः येन दोषः स्यादिति । [3] एवंभूतैश्वर्याभावे तथा कुर्वतः पापा ज्ञेया इति भावः ।

तैस्ताडितोऽपि सर्पो नंदं नामुंचत् । तदा कृष्णस्तत्रैत्य पदा तं सर्पमस्पृशत् ॥ ८ ॥ स सर्पो भगवत्पादस्पर्शाद्गतपापः सन् सर्पशरीरं हित्वा विद्याधरपूजितं स्वरूपं भेजे ॥९॥ तदा प्रकाशयुक्तशरीरेण पुरतः स्थितं सुवर्णपुष्पमालिनं कृतप्रणामं तं कृष्णः पप्रच्छ ॥१०॥ हे सर्प, अद्भुतदर्शनस्त्वं कः । कथं वा एतां सर्पयोनिं प्राप्तः ॥११॥ सर्प उवाच । हे कृष्ण,अहं सुदर्शन इति कश्चिद्विद्याधरः स्वरूपसंपत्त्या युतः सन् विमानेन दिशो गच्छन् ॥१२॥ कुरूपान् अंगिरसऋषीन् दृष्ट्वा रूपेण गर्वितोऽहं तान् हसितवान् । तदोपसहितैस्तैः शापं दत्वेमामजगरयोनिं प्रापितः ॥१३॥ दयालुभिस्तैः शापो मेऽनुग्रहायैव दत्तः । येन शापेनाहं लोकगुरुणा त्वया पदा स्पृष्टः सन् गतपापो जातः ॥१४॥ हे दुःखनाशन, एवंभूतं त्वामहं स्वलोकं गंतुमनुज्ञां याचे ॥१५॥ हे कृष्ण, अहं तव शरणं गतोऽस्मि । हे देव, त्वं मां गंतुमाज्ञां देहि ॥१६॥ हे अच्युत, तव दर्शनाद्ब्रह्मशापमुक्तोऽहमस्मि । यन्नाम गृह्णन् पुमान् श्रोतॄनात्मानं च सद्यः पुनाति। तस्य तव पदा स्पृष्टोऽहं पवित्रो जात इत्यत्र किमाश्चर्यम् ॥१७॥ एवं कृष्णमुक्त्वा प्रदक्षिणां नमस्कारं च कृत्वा सुदर्शनः स्वर्गं गतः । नंदश्च संकटान्मोचितः ॥१८॥ गोपास्तत्कृष्णवैभवं दृष्ट्वा विस्मितचित्ताः संतस्तत्रांबिकावने कृतं नियमं समाप्य पुनर्व्रजं ययुः ॥१९॥ अथैकदा रामकृष्णौ स्त्रीणां मध्यगौ संतौ वने रात्र्यां विजह्रतुः ॥२०॥ तौ स्त्रीजनैरुपगीयमानौ मालाशोभितौ ॥२१॥ उदितचंद्रतारकं रात्रिमुखं सत्कुर्वंतौ संतौ सर्वभूतानां मनःश्रवणमंगलं गायनं चक्रतुः ॥२२॥२३॥

अलातैर्दह्यमानोऽपि नामुंचत्तमुरंगमः ॥ तमस्पृशत्पदाऽभ्येत्य भगवान्सात्वतां पतिः ॥ ८ ॥ स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ॥ भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम् ॥ ९ ॥ तमपृच्छद्धृषीकेशः प्रणतं समुपस्थितम् ॥ दीप्यमानेन वपुषा पुरुषं हेममालिनम् ॥ १० ॥ को भवान्परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥ ११ ॥ सर्प उवाच ॥ अहं विद्याधरः कश्चित्सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसंपत्त्या विमानेन चरन्दिशः ॥१२॥ ऋषीन्विरूपानंगिरसः प्राहसं रूपदर्पितः ॥ तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥ १३ ॥ शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ॥ यदहं लोकगुरुणा पदा स्पृष्टो हताशुभः ॥ १४ ॥ तं त्वाऽहं भवभीतानां प्रपन्नानां भयापहम् ॥ आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥ १५ ॥ प्रपन्नोऽस्मि महायोगिन्महापुरुष सत्पते ॥ अनुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥ १६ ॥ ब्रह्मदंडाद्विमुक्तोऽहं सद्यस्तेऽच्युत दर्शनात् ॥ यन्नाम गृह्णन्नखिलान् श्रोतॄनात्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥ १७ ॥ इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवंद्य च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः ॥ १८ ॥ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ॥ समाप्य तस्मिन्नियमं पुनर्व्रजं नृपा ययुस्तत्कथयंत आदृताः ॥ १९ ॥ कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषिताम् ॥ २० ॥ उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौ स्रग्विणौ विरजोंऽबरौ ॥ २१ ॥ निशामुखं मानयंतावुदितोडुपतारकम् ॥ मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना ॥ २२ ॥ जगतुः सर्वभूतानां मनःश्रवणमंगलम् ॥ तौ कल्पयंतौ युगपत्स्वरमंडलमूर्छितम् ॥ २३ ॥ ॥

तद्गीतं श्रुत्वा मोहिता गोप्यो गतवस्त्रं देहं नाविदन् ॥२४॥ एवं तयो रामकृष्णयोः क्रीडतोर्गायतोश्च सतोः कुबेरानुचरः शंखचूड इति नामा गुह्यकस्तत्राजगाम ॥२५॥ ततस्तयोः पश्यतोः सतोः क्रोशंतं स्त्रीजनं स निर्भयः सन् उत्तरदिशि हठात् प्रेरयामास ॥ २६ ॥ तदा कृष्णरामेति क्रोशंतं स्त्रीगणं दृष्ट्वा तौ रामकृष्णावन्वधावताम् ॥२७॥ तौ मा भैष्टेत्यभयशब्दौ शालहस्तौ संतौ तं गुह्यकाधमं शीघ्रं प्रापतुः ॥२८॥ तदा शंखचूडः कालमृत्यू इव प्राप्तौ तौ दृष्ट्वा स्त्रीगणं त्यक्त्वा जीवितेच्छया प्राद्रवत् ॥ २९ ॥ स गुह्यको यत्र यत्र धावति तत्र तत्र श्रीकृष्णस्तच्छिरोरत्नं गृहीतुमिच्छन् धावति स्म । बलस्तु स्त्रियो रक्षन् तत्रैव तस्थौ ॥३०॥ कृष्णः शंखचूडस्य समीपं गत्वा मुष्टिना चूडामणिसहितं तस्य मस्तकं जहार ॥३१॥ एवं शंखचूडं हत्वा मणिं गृहीत्वा सर्वस्त्रीणां पश्यंतीनां

गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप ॥ स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २४ ॥ एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् ॥ शंखचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २५ ॥ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनम् ॥ क्रोशंतं कालयामास दिश्युदीच्यामशंकितः ॥ २६ ॥ क्रोशंतं कृष्ण रामेति विलोक्य स्वपरिग्रहम् ॥ यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ॥ २७ ॥ मा भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ ॥ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ॥२८॥ स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ॥ विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥ २९ ॥ तमन्वधावद्गोविंदो यत्र यत्र स धावति ॥ जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन्स्त्रियो बलः ॥ ३० ॥ अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ॥ जहार मुष्टिनैवांग सहचूडामणिं विभुः ॥ ३१ ॥ शंखचूडं निहत्यैवं मणिमादाय भास्वरम् ॥ अग्रजायाददत्प्रीत्या पश्यंतीनां च योषिताम् ॥ ३२ ॥ इति श्रीमद्भागवते महा० दश० पूर्वार्धे शंखचूडवधो नाम चतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥ ॥ श्रीशुक उवाच ॥ गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ॥ कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वासरान् ॥ १ ॥ गोप्य ऊचुः ॥ वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ॥ कोमलांगुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुंदः ॥ २ ॥ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ॥ काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥ हंत चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् ॥ नंदसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥ ४ ॥ ॥ ॥ ॥

सतीना तं मणिं बलरामाय ददौ ॥३२॥ इति श्रीमद्भा० चू० दश० पूर्वार्धे शंखचूडवधो नाम चतुस्त्रिंशोऽध्यायः॥३४॥ ॥ पंचत्रिंशे वनं याते कृष्णं गोकुलयोषितः । युग्मश्लोकाः गीतेन निन्युर्दुःखेन वासरान् ॥१॥ श्रीशुक उवाच ॥ हे नृप, गोप्य एवं रात्रिषु कृष्णेन सह क्रीडित्वा दिवा कृष्णे वनं गते सति कृष्णलीला गायंत्यः सत्यो दुःखेन दिवसान् निन्युः ॥ १ ॥ गोप्य ऊचुः । हे गोप्यः, वामबाहौ कृतवामकपोलः कृष्णोऽधरोष्ठे स्थापितं कोमलांगुलिभिराश्रितसप्तस्वरच्छिद्रं वेणुं यदा वादयति ॥२॥ तदा तच्छ्रुत्वा सिद्धस्त्रियः सिद्धैः सह वर्तमाना अपि कामबाणेभ्योऽर्पितचित्ताः सत्यो मोहं प्रापुः । मोहेन विस्मृतनीव्यश्च बभूवुः । एवंभूतस्य कृष्णस्य विरहं वयं कथं सहाम ॥३॥ हे अबलाः, इदमाश्चर्यं शृणुत । अयं नंदसूनुर्दुःखितजनानां सुखकरो यदा वेणुनादं करोति ॥४॥

तदा वृषभा गावो मृगाश्च वेणुवाद्येन हृतचित्ता दंतैर्दष्टग्रासा उत्तंभितकर्णा लिखितचित्रमिवासन् । तस्य कृष्णस्य विरहं कथं सहाम ॥ ५ ॥ हे सखि, यदा
सबलः कृष्णो मयूरपिच्छधातुपल्लवैः कृतमल्लवेषः सन् वेणुनादेन गा आह्वयति ॥६॥ तदा भग्नगतयो नद्यो वायुना प्रापितं तच्चरणकमलरजो वयमिव स्पृहयंत्यः
स्थिरोदका भवंति । तस्य कृष्णस्य विर० ॥७॥ हे सखि, हरिर्गोपैर्वर्णितपराक्रमो गिरितटेषु चरंतीर्गा यदा वेणुना समाह्वयति ॥८॥ तदा वृक्षा वनलताश्च
स्वस्मिन् विष्णुं प्रकटयंत्य इव पुष्पफलाढ्याः सत्यो मधुधाराः ससृजुः स्म । तस्य कृष्णविर० ॥९॥ हे सखि, यदाऽतिसुंदरः श्रीकृष्णो भ्रमराणामुच्चैर्गीतमादेरण
श्रृण्वन् वेणुं वादयति ॥ १० ॥ तदा सरोवरस्थाः सारसहंसपक्षिणो गीतेन हृतचित्ताः संतः कृष्णसमीपमागत्य मौनं धृत्वा तं कृष्णमुपासते । तस्य

वृंदशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ॥ दंतदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥ बर्हिणस्तबक-
धातुपलाशैर्बद्धमल्लपरिबर्हविडंबः ॥ कर्हिचित्सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुंदः ॥६॥ तर्हि भग्नगतयः सरितो
वै तत्पदांबुजरजोऽनिलनीतम् ॥ स्पृहयतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ॥७॥ अनुचरैः समनुवर्णितवीर्य
आदिपूरुष इवाचलभूतिः ॥ वनचरो गिरितटेषु चरंतीर्वेणुनाह्वयति गाः स यदा हि ॥८॥ वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य
इव पुष्पफलाढ्याः॥ प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥९॥ दर्शनीयतिलको वनमालादिव्यगंधतुलसीमधुमत्तैः॥
अलिकुलैरलघुगीतमभीष्टमाद्रियन्यर्हि संधितवेणुः ॥१०॥ सरसि सारसहंसविहंगाश्चारुगीतहृतचेतस एत्य ॥ हरिमुपासत
ते यतचित्ता हंत मीलितदृशो धृतमौनाः ॥११॥ सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ॥ हर्षयन्यर्हि वेणुरवेण
जातहर्ष उपरंभति विश्वम् ॥१२॥ महदतिक्रमणशंकितचेता मंदमंदमनुगर्जति मेघः ॥ सुहृदमभ्यवर्षत्सुमनोभिश्छायया
च विदधत्प्रतपत्रम् ॥१३॥ विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः ॥ तव सुतः सति यदाऽधरबिंबे दत्तवेणुरनयत्स्वरजातीः
॥१४॥ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥ कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः
॥ १५ ॥ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवः शमयन्खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥१६॥ व्रजति
तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥ कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ १७ ॥ ॥

श्रीकृष्णस्य विरहं कथं सहाम ॥ ११ ॥ हे गोप्यः, यदा सरामः कृष्णः पर्वततटेषु वर्तमानः सन् विश्वं हर्षयन् वेणुनादेन विश्वं पूरयति ॥ १२ ॥ तदा मेघः
कृष्णस्यातिक्रमणशंकितचित्तो भूत्वा मंदं मंदं गर्जति । तथा पुष्पैर्वर्षति । छायया छत्रं च विदधाति । तस्य कृष्णस्य विरहं कथं सहाम ॥ १३ ॥ हे यशोदे,
तव सुतो नानागोपक्रीडासु निपुणः सन् यदाऽधरोष्ठेऽर्पितवेणुर्भूत्वा निषादादिस्वरालापान् प्रकटयति ॥ १४ ॥ तदा तच्छ्रुत्वा ब्रह्मशिवेंद्रमुख्या देवा
नम्रकंठचित्ताः संतस्तद्भेदाननिश्चित्य मोहं प्रापुः । तस्य कृष्णस्य विरहं कथं सहाम ॥ १५ ॥ हे सखि, श्रीकृष्णो ध्वजादिचिह्नितैः स्वचरणकमलैर्व्रजभूमेर्गवादि-
खुराक्रमणव्यथां शमयन् वेणुं च वादयन् गज इव यदा व्रजति ॥१६॥ तदा तद्विलोकनेनार्पितकामवेगा वयं वृक्षगतिं गमिताः सत्यो मोहेन केशबंधं वस्त्रं

वा न विदामः ।तस्य कृष्णस्य विर० ॥१७॥ हे अबलाः, श्रीहरिः क्वचिद्देशे गोगणनार्थं ग्रथितमणिमालाधरः सन् गोपस्य स्कंधे भुजं कृत्वा यदाऽगायत॥१८॥
तदा वेणुवादेन हृतचित्ताः कृष्णसारहरिणस्त्रियो वयमिव त्यक्तगृहाशाः सत्यः कृष्णमाश्रयंते ततश्च न निवर्तंते । तस्य कृष्णस्य विरहं० ॥१९॥ हे सखि, नंदसूनुर्गोपगोधनवेष्टितो
यदा यमुनायां क्रीडितवान् ॥२०॥ तदा वायुः सुगंधशीतलस्पर्शेन तं संमानयन् वाति । तदा च गंधर्वादिगणा वाद्यगीतपुष्पवृष्ट्यादिभिः
परित उपासत । तस्य कृष्णस्य विर० ॥२१॥ हे सख्यः, व्रजगवां हितकर्ता मार्गे ब्रह्मादिभिर्वंदितचरणः सायंकाले सर्वं गोधनमेकीकृत्य गीतवेणुः सन् ॥२२॥
खुररजोभिर्व्याप्तमालो नो नेत्राणां हर्षं प्रापयन् अयं कृष्ण आगच्छति पश्यत पश्यत ॥२३॥ किंच । हे सख्यः, श्रीकृष्णो बदरपांडुवदनः स्वर्णकुंडलकांत्या

मणिधरः क्वचिदागणयन्गा मालया दयितगंधतुलस्याः ॥ प्रणयिनोऽनुचरस्य कदांऽसे प्रक्षिपन्भुजमगायत यत्र ॥१८॥ क्वणि-
तवेणुरववंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥१९॥ कुंददाम-
कृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥२०॥ मंदवायुरुपवात्यनुकूलं
मानयन्मलयजस्पर्शेन ॥ बंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥२१॥ वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः
पथि वृद्धैः ॥ कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुरनुगेडितकीर्तिः ॥२२॥ उत्सवं श्रमरुचाऽपि दृशीनामुन्नयन्खुररजश्छुरितस्रक् ॥
दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥२३॥ मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ॥ बदरपांडुवदनो
मृदुगंडं मंडयन्कनककुंडललक्ष्म्या ॥२४॥ यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनांते ॥ मुदितवक्त्र उपयाति दुरंतं मो-
चयन्व्रजगवां दिनतापम् ॥२५॥ श्रीशुक उवाच ॥ एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः ॥ रेमिरेऽहःसु तच्चित्तास्तन्मनस्का
महोदयाः ॥२६॥ इति श्री० म० द० पू० वृंदावनक्रीडायां गोपिकायुगलगीतं नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ श्रीशुक
उवाच ॥ अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः ॥ महीं महाककुत्कायः कंपयन्खुरविक्षताम् ॥ १ ॥ रंभमाणः खरतरं पदा च
विलिखन्महीम् ॥ उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् ॥२॥ किंचित्किंचिच्छकृन्मुंचन्मूत्रयंस्तब्धलोचनः ॥ यस्य निर्ह्रादि-
तेनांग निष्ठुरेण गवां नृणाम् ॥३॥ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै ॥ निर्विशंति घना यस्य ककुद्यचलशंकया ॥४॥

शोभनं गंडस्थलं शोभयन्नस्मिन् सायंकाले व्रजगवामस्माकं च दिनतापं शमयन् समीपमायाति । एनं पश्यत ॥ २४ ॥ २५ ॥ श्रीशुक उवाच ॥ हे नृप, एवं
व्रजस्त्रियः कृष्णलीला गायंत्यो दिनेष्वपि रेमिरे ॥२६॥ इति श्रीमद्भा० चू० दश० पूर्वार्धे पंचत्रिंशोऽध्यायः ॥३५॥ ॥ षट्त्रिंशे तु हतेऽरिष्टे नारदोक्त्या बलाच्युतौ ।
वसुदेवसुतौ ज्ञात्वा कंसोऽक्रूरं समादिशत् ॥१॥ श्रीशुक उवाच ॥ हे राजन्, एवं कृष्णं प्राप्तं दृष्ट्वा व्रजस्य परमोत्सवे वर्तमाने सति तदा वृषभाकृतिररिष्टासुरः
खुरैर्विदारितां महीं कंपयन् ॥१॥ वृषभजातिशब्दं कुर्वन् पदा महीं च विदारयन् पुच्छमूर्ध्वं कृत्वा शृंगाग्रेण तटान्युत्क्षिपन् ॥२॥ किंचित् किंचित्
विष्ठां मूत्रं चोत्सृजन् गोकुलनिकटे प्राप्तः । यस्य शब्देन गवां नारीणां च गर्भा अकाले स्रवंति पतंति च । तथा यस्य स्कंधे पर्वतशंकया मेघा

---

१ आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः । अत ऊर्ध्वं प्रसूतिः स्यात् ।

तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ॥ पशवो दुद्रुवुर्भीता राजन्संत्यज्य गोकुलम् ॥ ५ ॥ कृष्ण कृष्णेति ते सर्वे गोविंदं
शरणं ययुः ॥ भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतम् ॥६॥ मा भैष्टेति गिराऽऽश्वास्य वृषासुरमुपाह्वयत् ॥ गोपालैः पशुभिर्मंद
त्रासितैः किमसत्तम ॥ ७ ॥ बलदर्पहाऽहं दुष्टानां त्वद्विधानां दुरात्मनाम् ॥ इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन्
॥ ८ ॥ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥ सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघः
क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥ अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् ॥ कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा ॥ १० ॥
गृहीत्वा शृंगयोस्तं वा अष्टादश पदानि सः ॥ प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ॥ ११ ॥ सोऽपविद्धो भगवता पुनरुत्थाय
सत्वरः ॥ आपतत्स्विन्नसर्वांगो निःश्वसन्क्रोधमूर्छितः ॥ १२ ॥ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य निपात्य
भूतले ॥ निष्पीडयामास यथार्द्रमंबरं कृत्वा विषाणेन जघान सोऽपतत् ॥ १३ ॥ असृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्च पादानवस्थितेक्षणः
॥ जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरंतो हरिमीडिरे सुराः ॥ १४ ॥ एवं कुकुद्मिनं हत्वा स्तूयमानः स्वजातिभिः
॥ विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥ १५ ॥ अरिष्टे निहते दैत्ये कृष्णेनाद्भुतकर्मणा ॥ कंसायाथाह भगवान्नारदो
देवदर्शनः ॥ १६ ॥ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च ॥ रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ॥१७॥
न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः ॥ निशम्य तद्भोजपतिः कोपात्प्रचलितेंद्रियः ॥ १८ ॥ ॥

निर्विशंति ॥३॥४॥ तं तीक्ष्णशृंगं दैत्यं दृष्ट्वा गोप्यो गोपाश्च त्रासं प्रापुः । पशवो व्रजं हित्वा दुद्रुवुः ॥५॥ तदा सर्वे गोपाः कृष्णकृष्णेति गोविंदं शरणं ययुः । भगवांश्च भयविद्रुतं व्रजं दृष्ट्वा ॥६॥ मा भैष्टेति गिराऽऽश्वास्य दैत्यमाह्वयत् । हे मंद, त्रासितैर्गोपैः पशुभिश्च किम् ॥ ७ ॥ त्वादृशानां दुष्टानां बलदर्पहाऽहमस्मि । इत्युक्त्वा करतलेन बाहुमास्फोट्य तं कोपयन् ॥८॥ सख्युः स्कंधे भुजं कृत्वा कृष्णः स्थितः । एवं कोपितो दैत्यः खुरेण भुवमुल्लिखन् क्रुद्धः सन् कृष्णमुपाद्रवत् ॥९॥ अग्रन्यस्तशृंगाग्रः स स्तब्धलोचनः कटाक्षेण वक्रं दृष्ट्वेंद्रमुक्तो वज्र इव कृष्णमधावत् ॥१०॥ ततः कृष्णस्तं शृंगयोर्धृत्वाऽष्टादश पदानि पश्चादपोवाह ॥११॥ एवमपक्षिप्तः स पुनरुत्थाय क्रोधेन निःश्वसन् कृष्णमुपाद्रवत् ॥१२॥ आगतं तं कृष्णः शृंगयोः प्रगृह्य भूतले निपात्य पदाऽऽक्रम्यार्द्रवस्त्रमिव निष्पीडयामास ॥ ततः शृंगमुत्पाट्य तेनैव तं जघान । तदा स भूमौ पपात ॥१३॥ ततः स रक्तं वमन् पादान् क्षिपन् शकृन्मूत्रं च समुत्सृजन् मृत्युं प्राप । तदा देवाः पुष्पवृष्टिं कृत्वा कृष्णं तुष्टुवुः ॥ १४ ॥ एवं दैत्यं हत्वा गोपैः स्तूयमानः सबलः कृष्णो व्रजं विवेश ॥ १५ ॥ एवं कृष्णेन दैत्ये हते सति नारदस्तद्दृष्ट्वा मथुरामेत्य कंसाय जगाद ॥ १६ ॥ हे कंस, देवक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतां जानीहि । यशोदासुतत्वेन प्रसिद्धं कृष्णं देवक्या अष्टमं पुत्रं जानीहि । रोहिणीपुत्रं रामं च देवक्याः सप्तमं पुत्रं जानीहि ॥ १७ ॥ तौ पुत्रौ भीत्या वसुदेवेन स्वमित्रस्य नंदस्य गृहे स्थापितौ । याभ्यां तवाघासुरादयः पुरुषा हताः ॥ १८ ॥ ॥ ॥ ॥

तच्छ्रुत्वा कोपात्प्रचलितेंद्रियः कंसो वसुदेवं हंतुं खड्गं जगृहे । तदा नारदेन युक्तिं[1] कथयित्वा निवारितः॥ १९ ॥ तदा कंसस्तौ स्वमृत्यू ज्ञात्वा वसुदेवं देवकीं च लोहमयैः पाशैर्बबंध । एवं कृत्वा नारदे गते कंसः केशिनमाहूय ॥२०॥ हे केशिन्, त्वया गोकुलं गत्वा रामकृष्णौ हन्येताम् । इत्युक्त्वा तं प्रेषयामास । ततः कंसो मुष्टिकचाणूरशलतोशलकादीन् ॥२१॥ अमात्यान् हस्तिपांश्चाहूयाह । भो भोश्चाणूरमुष्टिकादयः यूयं, मे वचः श्रूयताम् ॥२२॥ नंदव्रजे वसुदेवसुतावासाते । ताभ्यां मम मृत्युर्विधात्रा दर्शितः ॥२३॥ अत इह प्राप्तौ तौ भवद्भ्यां मल्ललीलया हन्येताम् । हे सेवकाः, मल्लरंगे विविधा मंचाः क्रियंताम् । तत्रोपविश्य सर्वे पौरा जानपदाश्च यथेच्छं मल्लयुद्धं पश्यंतु ॥२४॥ हे महामात्र, त्वया रंगद्वारि कुवलयापीडो गजो नीयताम् । तेन तौ मम शत्रू जहि॥२५॥

निशातमसिमादत्त वसुदेवजिघांसया ॥ निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ॥ १९ ॥ ज्ञात्वा लोहमयैः पाशैर्बबंध सह भार्यया ॥ प्रतियाते तु देवर्षौ कंस आभाष्य केशिनम् ॥ २० ॥ प्रेषयामास हन्येतां भवता रामकेशवौ ॥ ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥ २१ ॥ अमात्यान्हस्तिपांश्चैव समाहूयाऽह भोजराट् ॥ भो भो निशम्यतामेतद्वीरचाणूरमुष्टिकौ ॥ २२ ॥ नंदव्रजे किलासाते सुतावानकदुंदुभेः ॥ रामकृष्णौ ततो मह्यं मृत्युः किल निदर्शितः ॥ २३ ॥ भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया ॥ मंचाः क्रियंतां विविधा मल्लरंगपरिश्रिताः ॥ पौरा जानपदाः सर्वे पश्यंतु स्वैरसंयुगम् ॥ २४ ॥ महामात्र त्वया भद्र रंगद्वार्युपनीयताम् ॥ द्विपः कुवलयापीडो जहि तेन ममाहितौ ॥ २५ ॥ आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि ॥ विशसंतु पशून्मेध्यान्भूतराजाय मीढुषे ॥ २६ ॥ इत्याज्ञाप्यार्थतंत्रज्ञ आहूय यदुपुंगवम् ॥ गृहीत्वा पाणिना पाणिं ततोऽक्रूरमुवाच ह ॥ २७ ॥ भो भो दानपते मह्यं क्रियतां मैत्रमादृतः ॥ नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ॥ २८ ॥ अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनम् ॥ यथेंद्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ॥ २९ ॥ गच्छ नंदव्रजं तत्र सुतावानकदुंदुभेः ॥ आसाते ताविहानेन रथेनानय मा चिरम् ॥ ३० ॥ निसृष्टः किल मे मृत्युर्देवैर्वैकुंठसंश्रयैः ॥ तावानय समं गोपैर्नंदाद्यैः साभ्युपायनैः ॥ ३१ ॥ घातयिष्य इहानीतौ कालकल्पेन हस्तिना ॥ यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ॥३२॥ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान् ॥ तद्बंधून्निहनिष्यामि वृष्णिभोजदशार्हकान् ॥ ३३ ॥ ॥ ॥

किंच । चतुर्दश्यां धनुर्याग आरभ्यताम् । तत्र पशुमांसेन वरदाय रुद्राय बलिं समर्पयत॥२६॥एवमाज्ञाय कंसोऽक्रूरमाहूय स्वहस्तेन तस्य हस्तं गृहीत्वा तमाह ॥२७॥हे अक्रूर, मम मित्रकृत्यं क्रियताम् । भोजवृष्णिषु मे हितकर्ता त्वत्तोऽन्यो नास्ति ॥ २८ ॥ अतो महत्कार्यकर्तारं त्वामाश्रितोऽस्मि । यथेंद्रो वामनरूपं विष्णुमाश्रित्य स्वार्थं साधितवान्॥२९॥त्वं नंदव्रजं गच्छ । तत्र वसुदेवस्य पुत्रावासाते । ताविहानेन रथेन शीघ्रमानय ॥३०॥ ताभ्यां मम मृत्युर्देवैर्निर्मितः । अत उपायनसहितैर्नंदादिगोपैः सह ताविहानय॥३१॥ इहानीतौ तौ मृत्युतुल्येन हस्तिना घातयिष्ये । यदि तस्मान्मुक्तौ तर्हि वज्रतुल्यैर्मल्लैर्घातयिष्ये ॥३२॥ एवं तयोर्हतयोः सतोस्तद्बंधून् वसुदेवमुख्यान् यादवानहं हनिष्यामि ॥ ३३ ॥ ॥ ॥

---

[1] हते वसुदेवे रामकृष्णौ गोकुलात्पलायेतामतो वसुदेवो न हंतव्यः किंतु बंधनीयः । एवं कृते वसुदेवं मोचयितुं तावत्रागच्छेतामिति युक्तिः ।

तथा वृद्धं राज्यकामुकं मे पितरं तद्बंधुं देवकं येऽन्ये च मम शत्रवस्तानपि हनिष्यामि ॥३४॥ ततश्चेयं मही नष्टशत्रुर्भविष्यति । जरासंधो मम गुरुः । द्विविदः ॥३५॥ शंबरः नरको बाणश्चैते मम सखायः । तैरहं देवपक्षीयान्नृपान् हत्वा महीं भोक्ष्ये ॥ ३६ ॥ हे अक्रूर, एतज्ज्ञात्वा धनुर्मखावलोकनार्थं मथुराशोभां च द्रष्टुं तौ रामकृष्णौ शीघ्रमिहानय ॥३७॥ अक्रूर उवाच । हे राजन्, तवेच्छितं स्वमरणनिवर्तकं सम्यगस्ति। परंतु सिद्ध्यसिद्ध्योः समं कुर्यात् । यतः फलसाधनं दैवमेव ॥३८॥ किंच । अयं जनो दैवहतानपि मनोरथान् करोति । कृत्वा च हर्षशोकाभ्यां युज्यते । तथापि तवाज्ञामहं करोमि ॥३९॥ श्रीशुक उवाच ॥ एवमक्रूरमादिश्य मंत्रिणश्च विसृज्य कंसो गृहं विवेश । अक्रूरोऽपि स्वगृहं ययौ ॥४०॥ इति श्रीम० चू० दश० पूर्वार्धे अक्रूरसंप्रेषणं नाम षट्त्रिंशोऽध्यायः

उग्रसेनं च पितरं स्थविरं राज्यकामुकम् ॥ तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ॥ ३४ ॥ ततश्चैषा मही मित्र भवित्री नष्टकंटका ॥ जरासंधो मम गुरुर्द्विविदो दयितः सखा ॥ ३५ ॥ शंबरो नरको बाणो मय्येव कृतसौहृदाः ॥ तैरहं सुरपक्षीयान्हत्वा भोक्ष्ये महीं नृपान् ॥ ३६ ॥ एतज्ज्ञात्वाऽऽनय क्षिप्रं रामकृष्णाविहार्भकौ॥ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियम् ॥ ३७ ॥ अक्रूर उवाच ॥ राजन्मनीषितं सध्यक्‌ तव स्वावद्यमार्जनम् ॥ सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलसाधनम् ॥ ३८ ॥ मनोरथान्करोत्युच्चैर्जनो दैवहतानपि ॥ युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ॥ ३९ ॥ श्रीशुक उवाच ॥ एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः ॥ प्रविवेश गृहं कंसस्तथाऽक्रूरः स्वमालयम् ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धेऽक्रूरसंप्रेषणं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ श्रीशुक उवाच ॥ केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः ॥ सटाव धूताभ्रविमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः ॥ १ ॥ (विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहांबुदोपमः ॥ दुराशयः कंसहितं चिकीर्षुर्व्रजं स नंदस्य जगाम कंपयन् ॥ १ ॥) तं त्रासयंतं भगवान्स्वगोकुलं तद्धेषितैर्वालविघूर्णितांबुदम् ॥ आत्मानमाजौ मृगयंतमग्रणीरुपाह्वयत्स व्यनदन्मृगेंद्रवत् ॥ २ ॥ स तं निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः ॥ जघान पद्भ्यामरविंदलोचनं दुरासदश्चंडजवो दुरत्ययः ॥ ३ ॥ तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः ॥ सावज्ञमुत्सृज्य धनुःशतांतरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ॥ ४ ॥ ॥ ॥

॥३६॥ ॥ सप्तत्रिंशे हते केशिन्यच्युतो भावि कर्मभिः । नारदेन स्तुतः क्रीडन् व्योमासुरमथावधीत् ॥१॥ श्रीशुक उवाच । हे नृप, कंसप्रेरितः केशी तु अश्वरूपधरः खुरैर्महीं विदारयन् सटाभिरितस्ततः क्षिप्तैर्मेघैर्विमानैश्च व्याप्तमाकाशं कुर्वन् विश्वं च भीषयन्॥ १॥(विशालनेत्रो नीलमहाघनोपमः स केशी कंसहितं चिकीर्षुः सन् नंदस्य व्रजं जगाम ॥१॥) तदा कृष्णो गोकुलं शब्दैस्त्रासयंतमात्मानं युद्धार्थं मृगयंतं च तं दैत्यं दृष्ट्वा पुरतो भूत्वा तं स्वसमीपमाजुहाव । तच्छ्रुत्वा स दैत्यः सिंह इव ननाद ॥२॥ ततः केशी कृष्णं दृष्ट्वा मुखेन खं पिबन्निव मुखं विवृत्य संमुखमाजगाम । ततः पश्चात्पद्भ्यां कृष्णं जघान ॥ ३ ॥ तद्धननं वंचयित्वा कृष्णो रुषा तं दोर्भ्यां पादयोर्धृत्वा भ्रामयित्वा धनुःशतांतरे त्यक्त्वा तथैव स्थितो बभूव ॥ ४ ॥ ॥

पुनः सावधानः स उत्थाय मुखं प्रसार्य कृष्णंप्रति प्राद्रवत् । कृष्णोऽपि तन्मुखे दक्षिणभुजं बिले सर्पमिव प्रवेशयामास ॥५॥ ततश्चर्वणाय कृष्णभुजस्पार्शिनस्तस्य
दंता निपेतुः । तद्देहगतः कृष्णबाहुश्च जलोदररोग इव ववृधे ॥६॥ एवं वर्धमानेन कृष्णबाहुना रुद्धवायुः स दैत्यश्चरणान् क्षिपन् भ्रमितनेत्रो लेंडं
विसृजन् गतप्राणो भूत्वा भूमौ पपात ॥७॥ ततः कृष्णः पक्वकर्कटिकाफलवद्विदीर्णात्तस्य देहाद्भुजमाकृष्य पुष्पवृष्टिं कुर्वद्भिर्देवैः स्तुतो बभूव ॥८॥ ततो भगवद्भक्तो
नारद एत्य कृष्णमेकांते बभाषे ॥९॥ हे कृष्ण, हे योगेश्वर, हे जगदीश्वर, हे वासुदेव, हे प्रभो, ॥१०॥ हे ईश, त्वं सर्वभूतानामात्मा साक्षी असि

स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसापतद्धरिम् ॥ सोऽप्यस्य वक्रे भुजमुत्तरं स्मयन्प्रवेशयामास यथोरगं बिले
॥५॥ दंता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशो यथा ॥ बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ॥६॥
समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् ॥ प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेंडं विसृजन्क्षितौ व्यसुः ॥७॥
तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः ॥ अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनवर्षैर्दिविषद्भिरीडितः ॥८॥ देवर्षिरुपसंगम्य
भागवतप्रवरो नृप ॥ कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत ॥९॥ कृष्ण कृष्णाप्रमेयात्मन्योगेश जगदीश्वर ॥ वासुदेवा-
[illegible]ास सात्वतां प्रवर प्रभो ॥१०॥ त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम् ॥ गूढो गुहाशयः साक्षी महापुरुष ईश्वरः
॥११॥ आत्मनाऽऽत्माश्रयः पूर्वं मायया ससृजे गुणान् ॥ तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥१२॥ स त्वं भूधरभूतानां दैत्यप्रमथरक्षसाम् ॥
अवतीर्णो विनाशाय सेतूनां रक्षणाय च ॥१३॥ दिष्ट्या ते निहतो दैत्यो लीलयाऽयं हयाकृतिः ॥ यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवम् ॥ १४ ॥
चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनम् ॥ कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ॥१५॥
तस्यानु शंखयवनमुराणां नरकस्य च ॥ पारिजातापहरणमिंद्रस्य च पराजयम् ॥१६॥ उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणम् ॥
नृगस्य मोक्षणं पापाद्द्वारकायां जगत्पते ॥ १७ ॥ स्यमंतकस्य च मणेरादानं सह भार्यया ॥ मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः ॥ १८ ॥
पौंड्रकस्य वधं पश्चात्काशिपुर्याश्च दीपनम् ॥ दंतवक्रस्य निधनं चैद्यस्य च महाक्रतौ
॥ १९ ॥ यानि चान्यानि वीर्याणि द्वारकामावसन्भवान् ॥ कर्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि ॥ २० ॥ ॥

॥११॥ भवान् मायया पूर्वं गुणान् ससर्ज । तैर्गुणैरिदं विश्वं सृजसि रक्षसि संहरसि च ॥१२॥ स त्वं दैत्यप्रमथरक्षसां नाशाय धर्ममर्यादानां च रक्षणायावतीर्णोऽसि
॥१३॥ हे कृष्ण, अयमश्वाकृतिर्दैत्यस्त्वया लीलया हत एतद्दिष्ट्या । यस्य शब्देन त्रस्ता देवाः स्वर्गं त्यजंति॥१४॥ किंच । अद्यैवात्र गोकुलेऽक्रूर एष्यति ।
त्वं श्वो मथुरां गंतासि । परश्वो हस्तिनं चाणूरं मुष्टिकमन्यान् मल्लान् कंसं च त्वया निहतं द्रक्ष्यामि ॥१५॥ तदनंतरं च पंचजनकालयवनादीनां वधं पारिजातापहरणमिंद्रपराजयं
॥१६॥ वीरकन्यानामुद्वाहं पापान्नृगस्य मोक्षणम् ॥१७॥ जांबवत्या सह स्यमंतकमणेर्ग्रहणं महाकालपुरादानीय ब्राह्मणस्य मृतपुत्रप्रदानं
च द्रक्ष्यामि ॥१८॥ ततः पौंड्रकवधं वाराणस्या दहनं दंतवक्रनिधनं राजसूये यज्ञे शिशुपालस्य नाशं॥१९॥ तथा यानि चान्यानि चरित्राणि द्वारकायां

वसन् त्वं करिष्यसि तान्यहं द्रक्ष्यामि ॥२०॥ अथ भूभारं हरतः कालरूपस्यार्जुनसारथेस्तवाक्षौहिणीनां निधनं द्रक्ष्यामि ॥२१॥ एवं विज्ञाप्य नमस्करोति । हे कृष्ण, केवलं ज्ञानैकमूर्तिं स्वरूपस्थित्यैव प्राप्तसर्वमनोरथं सत्यसंकल्पं स्वकीयया चैतन्यशक्त्या नित्यनिवृत्तमायागुणप्रवाहं निरतिशयैश्वर्यं भगवंतं त्वां शरणं व्रजेम ॥२२॥ किंच । ईश्वरं क्रीडार्थं स्वीकृतमनुष्यदेहं यदुवृष्णिसात्वतां श्रेष्ठं त्वां नतोऽस्मि ॥२३॥ श्रीशुक उवाच ॥ एवमुक्त्वा नारदः कृष्णं प्रणिपत्य तदनुज्ञातः सन् ययौ ॥२४॥ भगवान् कृष्णोऽपि केशिनं हत्वा प्रीतैर्गोपालैः सह पशून् पालयामास ॥ २५ ॥ एकदा ते गोपा गोवर्धनपर्वतस्य परितः पशून् चारयंतः संतश्चोरपालमिषेण निलायनक्रीडाश्चक्रुः॥२६॥ तत्र कतिचिच्चोराः कतिचित्पालाः कतिचिन्मेषवच्च संतो निर्भया विजह्रुः॥२७॥ तत्र मयपुत्रो व्योमासुरो

अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै ॥ अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥२१॥ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवांछितम् ॥ स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं भगवंतमीमहि ॥ २२ ॥ त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनम् ॥ क्रीडार्थमद्यात्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वताम् ॥ २३ ॥ श्रीशुक उवाच ॥ एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः ॥ प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः ॥२४॥ भगवानपि गोविंदो हत्वा केशिनमाहवे ॥ पशूनपालयत्पालैः प्रीतैर्व्रजसुखावहः ॥ २५ ॥ एकदा ते पशून्पालाश्चारयंतोऽद्रिसानुषु ॥ चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः ॥२६॥ तत्रासन्कतिचिच्चोराः पालाश्च कतिचिन्नृप ॥ मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ॥२७॥ मयपुत्रो महामायो व्योमो गोपालवेषधृक् ॥ मेषायितानपोवाह प्रायश्चोरायितो बहून् ॥२८॥ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः ॥ शिलया पिदधे द्वारं चतुःपंचावशेषिताः ॥२९॥ तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सताम् ॥ गोपान्नयंतं जग्राह वृकं हरिरिवौजसा ॥ ३० ॥ स निजं रूपमास्थाय गिरींद्रसदृशं बली ॥ इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ॥ ३१ ॥ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले ॥ पश्यतां दिवि देवानां पशुमारममारयत् ॥ ३२ ॥ गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः ॥ स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ॥३३॥ इति श्रीम० महा० दश० पूर्वार्धे व्योमासुरवधो नाम सप्तत्रिंशोऽध्यायः ॥३७॥ ॥ श्रीशुक उवाच ॥ अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः ॥ उषित्वा रथमास्थाय प्रययौ नंदगोकुलम् ॥ १ ॥ ॥

गोपालवेषं धृत्वा चोरवदाचरितः सन् मेषवदाचरितान् गोपानपकृष्य निनाय ॥२८॥ ततः स दैत्यो नीतं नीतं गोपं पर्वतगुहायां निक्षिप्य शिलया द्वारं छादितवान् । ततश्चतुःपंचावशेषिताः ॥२९॥ कृष्णस्तस्य तत्कर्म ज्ञात्वा सिंहो वृकमिव तं जग्राह ॥३०॥ स पर्वततुल्यं स्वरूपं धृत्वा कृष्णादात्मानं विमोक्तुमिच्छन्नाशक्नोत् ॥३१॥ ततः कृष्णस्तं दोर्भ्यां धृत्वा भूतले निपात्य दिवि देवानां पश्यतां यज्ञे यथा पशुं मारयंति तथा श्वासहीनं तं कृत्वाऽमारयत् ॥३२॥ ततः कृष्णो गुहाया आच्छादनं निर्भिद्य गोपान् निःसार्य ततो गोपैर्देवैश्च स्तूयमानः सन् व्रजं विवेश ॥३३॥ इति श्रीमद्भाग० दश० पूर्वार्धे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ अष्टत्रिंशे यथा ध्यायन्नक्रूरो गोकुलं गतः । तथैव रामकृष्णाभ्यां गृहं नीत्वा सुसत्कृतः ॥१॥ श्रीशुक उवाच ॥ हे नृप, अक्रूरोऽपि मथुरायां तां रात्रिमुषित्वा

प्रातरेव रथमारुह्य नंदगोकुलं ययौ ॥१ स पथि गच्छन् कृष्णे परां भक्तिं प्राप्येदमचिंतयत् ॥२॥ मया किं कल्याणकारकं कर्म कृतं किं तपश्चरितं किंवा योग्याय दत्तं यतोऽद्य हरिं द्रक्ष्यामि ॥३॥ विषयासक्तचित्तस्य मम कृष्णदर्शनं दुर्लभं मन्ये ॥४॥ यद्वा नीचस्यापि मम कृष्णदर्शनं स्यात्। यथा कालनद्या ह्रियमाणः[1] कश्चित्पुमान् तरति तद्वत् ॥५॥ किंच । अद्य मम पापं नष्टं जन्म च सफलं जातम् । यतोऽहं हरिं नमस्ये ॥६॥ अद्य कंसो मेऽनुग्रहं कृतवान्। यतस्तेन प्रेरितोऽहं श्रीकृष्णचरणकमलं द्रक्ष्यामि ॥७॥ यच्चरणकमलं ब्रह्मशिवादिभिर्लक्ष्म्या भक्तैश्चार्चितम् । यच्च गोचारणार्थं गोपालैः सह वनेऽचरत् । तदहं द्रक्ष्यामि

गच्छन्पथि महाभागो भगवत्यंबुजेक्षणे ॥ भक्तिं परामुपगत एवमेतदचिंतयत् ॥२॥ किं मयाऽऽचरितं भद्रं किं तप्तं परमं तपः ॥ किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवम् ॥३॥ ममैतद्दुर्लभं मन्य उत्तमश्लोकदर्शनम् ॥ विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ॥४॥ मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनम् ॥ ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ॥५॥ ममाद्यामंगलं नष्टं फलवांश्चैव मे भवः ॥ यन्नमस्ये भगवतो योगिध्येयांघ्रिपंकजम् ॥ ६ ॥ कंसो बताऽद्याकृत मेऽत्यनुग्रहं द्रक्ष्येंऽघ्रिपद्मं प्रहितोऽमुना हरेः॥ कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन्यन्नखमंडलत्विषा ॥७॥ यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः ॥ गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुचकुंकुमांकितम् ॥८॥ द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनम् ॥ मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः ॥९॥ अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया ॥ लावण्यधाम्नो भवितोपलंभनं मह्यं न न स्यात्फलमंसा दृशः ॥ १० ॥ य ईक्षिताऽहंरहितोऽप्यसत्सतोः स्वतेजसाऽपास्ततमोभिदाभ्रमः ॥ स्वमाययात्मन्रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ॥ ११ ॥ यस्याखिलामीवहभिः सुमंगलैर्वाचो विमिश्रा गुणकर्मजन्मभिः ॥ प्राणंति शुंभंति पुनंति वै जगद्यास्तद्विरक्ताः शवशोभना मताः ॥ १२ ॥ स चावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् ॥ यशो वितन्वन्व्रज आस्त ईश्वरो गायंति देवा यदशेषमंगलम् ॥१३॥ तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवम् ॥ रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥ १४ ॥

॥८॥ तथा सुकपोलनासिकं हास्यावलोकनसहितं श्रीकृष्णमुखं च द्रक्ष्यामि । यतो हरिणा मम दक्षिणतश्चरंति ॥९॥ किं च । स्वेच्छया भूभारदूरीकरणाय मनुष्यत्वं प्राप्तस्य कृष्णस्य दर्शनं मे भविष्यति चेत्तर्हि मे दृष्टेः साफल्यं स्यात् ॥१०॥ यः कार्यकारणयोर्द्रष्टा तथाहंकाररहितः सोऽपि कृष्णो गोपीगृहेषु लीलया कर्माणि कुर्वन्नासक्तवत्प्रतीयते ॥११ ॥ यस्य गुणै[2]र्जन्मकर्मभिर्युक्ता वाचो जगत् जीवयंति शोभयंति पुनंति च । तैर्हीना वाचस्तु अमंगला ज्ञेयाः ॥१२॥ स यादवान्वयेऽवतीर्णः सन् स्वयशो विस्तारयन् गोकुले आस्ते । यस्य सर्वमंगलकारकं यशो देवा गायंति॥१३॥ तं सतां गतिमीश्वरमहं नूनं द्रक्ष्यामि । यतो मे प्र-

---

[1] यथा नद्या ह्रियमाणानां तृणादीनां मध्ये किंचित्कदाचित्तरति तीरं च प्राप्नोति । तथा कर्मवशेन कालेन ह्रियमाणानां जीवानां मध्ये कश्चित्तरेदिति संभावना । [2] गुणा भक्तवात्सल्यादयः । जन्मानि रामकृष्णादीनि । कर्माण्यहल्योद्धारगोवर्धनोद्धरणादीनि तैर्युक्ताः ।

भातसमयाः शुभसूचका भवंति ॥ १४ ॥ अथ दर्शनानंतरं तदैव रथादुत्तीर्य रामकृष्णयोश्चरणौ योगिभिरपि धिया धृतावहं नमस्ये । तयोश्च सखीन् गोपान् नमस्यामि ॥१५॥ किंच। कृष्णोंऽघ्रिमूले पतितस्य मे शिरसि स्वहस्तकमलं धारयति किम् ॥१६॥ यत्र हस्तकमले पूजां समर्प्यैंद्रो बलिश्च जगत्रयेंद्रतां प्राप ॥ १७ ॥ यद्यप्यहं कंसेन प्रेरितस्तस्य दूतश्चास्मि तथापि श्रीकृष्णो मयि शत्रुबुद्धिं न करिष्यति । यतः स सर्वज्ञोऽस्ति ॥ १८ ॥ तस्य चरणमूले कृतांजलिं मां स कृष्णः कृपादृष्ट्या द्रक्ष्यति किम् । यदि द्रक्ष्यति तर्ह्यहं परां मुदं प्राप्स्यामि ॥ १९ ॥ कृष्णो यदा मां दोर्भ्यामालिंगयिष्यति तदैव तेन मे देहः पवित्रीकरिष्यते । देहात्कर्मबंधश्च श्लथो भविष्यति ॥ २० ॥ श्रीकृष्णः कृतांजलिं नम्रं मां हे अक्रूर, हे तातेति यदा वक्ष्यते तदा वयं सफलजन्मानो भवेम ।

अथावरूढः सपदीशयो रथात्प्रधानपुंसोश्चरणं स्वलब्धये ॥ धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन्वनौकसः ॥ १५ ॥ अप्यंघ्रिमूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपंकजम् ॥ दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां शरणैषिणां नृणाम् ॥ १६ ॥ समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्रयेंद्रताम् ॥ यद्वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगंधिकगंध्यपानुदत् ॥ १७ ॥ न मय्युपैष्यत्यरिबुद्धिमच्युतः कंसस्य दूतः प्रहितोऽपि विश्वदृक् ॥ योंऽतर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥ १८ ॥ अप्यंघ्रिमूलेऽवहितं कृतांजलिं मामीक्षिता सस्मितमार्द्रया दृशा ॥ सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशंक ऊर्जिताम् ॥ १९ ॥ सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ माम् ॥ आत्मा हि तीर्थीक्रियते तदैव मे बंधश्च कर्मात्मक उच्छ्वसित्यतः ॥२०॥ लब्धांगसंगं प्रणतं कृतांजलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः ॥ तदा वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥ २१ ॥ न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा ॥ तथापि भक्तान्भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २२ ॥ किंचाग्रजो माऽवनतं यदूत्तमः स्मयन्परिष्वज्य गृहीतमंजलौ ॥ गृहं प्रवेश्याप्तसमस्तसत्कृतं संप्रक्ष्यते कंसकृतं स्वबंधुषु ॥ २३ ॥ श्रीशुक उवाच ॥ इति संचिंतयन्कृष्णं श्वफल्कतनयोऽध्वनि ॥ रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ॥ २४ ॥ पदानि तस्याखिललोकपालकिरीटजुष्टामलपादरेणोः ॥ ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवांकुशाद्यैः ॥ २५ ॥ तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाऽश्रुकलाकुलेक्षणः ॥ रथादवस्कंद्य स तेष्वचेष्टत प्रभोरमून्यंघ्रिरजांस्यहो इति ॥ २६ ॥ ॥ ॥

कृष्णेन योऽनादृतस्तस्य जंतोर्जन्म धिक् ॥ २१ ॥ तस्य हरेः कश्चित्प्रियोऽप्रियो मित्रः शत्रुरुपेक्ष्यश्च नास्ति । तथापि स भक्तान् कल्पवृक्ष इव भजते ॥२२॥ रामश्च नम्रं मामालिंग्यांजलौ धृत्वा गृहं प्रवेश्य स्वबंधुषु यादवेषु कंसकृतमपकारादिकं प्रक्ष्यति किम् ॥ २३ ॥ श्रीशुक उवाच । हे नृप, एवमक्रूरो मार्गे कृष्णं चिंतयन् सायंकाले रथेन गोकुलं प्राप्तः । सूर्यश्चास्तं प्राप्तः ॥२४॥ ततः सोऽक्रूरो हरेः पदानि पद्मयवांकुशादिचिह्नैश्चिह्नितानि गोकुले ददर्श ॥२५॥ तद्दर्शनाज्जातसंभ्रमो रोमांचितः प्रेमाश्रुलोचनश्च सोऽक्रूरो रथादवप्लुत्य हरेरमूनि पादरजांसीति दुर्लभतां भावयन् रजस्सु व्यलुठत् ॥ २६ ॥ ॥

देहंभृतामियानर्थो हित्वा दंभं भियं शुचम् ॥ संदेशाद्यो हरेर्लिंगदर्शनश्रवणादिभिः ॥२७॥ ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ ॥ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ ॥२८॥ किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ॥ सुमुखौ सुंदरवरौ बालद्विरदविक्रमौ ॥ २९ ॥ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजम् ॥ शोभयंतौ महात्मानावनुक्रोशस्मितेक्षणौ ॥ ३० ॥ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ॥ पुण्यगंधानुलिप्तांगौ स्नातौ विरजवाससौ ॥ ३१ ॥ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ॥ अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥३२॥ दिशो वितिमिरा राजन्कुर्वाणौ प्रभया स्वया ॥ यथा मारकतः शैलो रौप्यश्च कनकाचितौ ॥३३॥ रथात्तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः ॥ पपात चरणोपांते दंडवद्रामकृष्णयोः ॥ ३४ ॥ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः ॥ पुलकाचितांग औत्कंठ्यात्स्वाख्याने नाशकन्नृप ॥ ३५ ॥ भगवांस्तमभिप्रेत्य रथांगांकितपाणिना ॥ परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३६ ॥ संकर्षणश्च प्रणतमुपगुह्य महामनाः ॥ गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहम् ॥ ३७ ॥ पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनम् ॥ प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हणमाहरत् ॥ ३८ ॥ निवेद्य गां चातिथये संवाह्य श्रांतमादृतः ॥ अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ॥ ३९ ॥ तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् ॥ मुखवासैर्गंधमाल्यैः परां प्रीतिं व्यधात्पुनः ॥ ४० ॥ पप्रच्छ सत्कृतं नंदः कथं स्थ निरनुग्रहे ॥ कंसे जीवति दाशार्ह सौनपाला इवावयः ॥ ४१ ॥ योऽवधीत्स्वस्वसुस्तोकान्क्रोशंत्या असुतृप् खलः ॥ किं नु स्वित्तत्प्रजानां वः कुशलं विमृशामहे ॥ ४२ ॥ ॥

एतावानेन दंभादीन् हित्वा देहिनां पुरुषार्थः । योऽयं कंसस्याज्ञामारभ्य हरेश्चिह्नदर्शनादिभिरक्रूरस्य वर्णित इति ॥२७॥ ततोऽक्रूरो व्रजे गोदोहनस्थानं प्राप्तौ रामकृष्णौ पीतनीलांबरधरौ ॥२८॥ किशोरवयसौ श्यामलश्वेतौ बालहस्तिपराक्रमौ ॥२९॥ ध्वजवज्रांकुशादिचिह्नितैरंघ्रिभिर्गोकुलं शोभयंतौ ॥३०॥ उदारसुंदरक्रीडौ रत्नमालाधरौ वनपुष्पमालिनौ स्नातौ निर्मलवस्त्रधरौ ॥३१॥ प्रधानपुरुषौ पृथिव्या भारापनयनाय मूर्तिभेदेनावतीर्णौ ॥३२॥ स्वतेजसा गतांधकारा दिशः कुर्वाणौ च रामकृष्णौ ददर्श ॥३३॥ एवंभूतौ तौ दृष्ट्वाऽक्रूरः स्नेहविह्वलो भूत्वा रथादवप्लुत्य तयोश्चरणसमीपे दंडवत्पपात ॥३४॥ भगवद्दर्शनाद्रोमांचितांगो बाष्पलोचनः सन् त्वामहमक्रूरो नमस्करोमीति वक्तुमपि नाशकत् ॥३५ ॥ भगवानपि तं ज्ञात्वा[1] चक्रचिह्नांकितहस्तेनाभ्युपाकृष्य प्रीतः सन्नालिंगितवान् ॥३६॥ रामश्च तमालिंग्य पाणिना अंजलिरूपेण संहतौ तस्य हस्तौ धृत्वा सकृष्णस्तं गृहं निनाय ॥ ३७॥ अथ स्वागतं पृष्ट्वा तस्मा आसनं दत्वा पादौ प्रक्षाल्य मधुपर्कादिना पूजां कृतवान् ॥ ३८ ॥ तथा तस्मै गां निवेद्य श्रांतं तं संवाह्य श्रीकृष्णस्तस्मै बहुगुणमन्नं ददौ ॥ ३९ ॥ ततो भुक्तवते तस्मै रामो मुखवासैर्गंधमाल्यैः परां प्रीतिं चक्रे ॥ ४० ॥ ततो नंदस्तं पप्रच्छ । हे अक्रूर, निर्दये कंसे जीवति सति यूयं कथं जीवथ ॥ ४१ ॥ यः कंसः क्रोशंत्या भगिन्या बालान् जघान । तत्प्रजानां वः किंनु कुशलं विचारयाम ॥४२॥ ॥ ॥

---

[1] अक्रूरोऽयं मे भक्तो मां मथुरां नेतुमागत इति ज्ञात्वा ।

इत्थं सूनृतया वाचा नंदेन सुसभाजितः ॥ अक्रूरः परिपृष्टेन जहावध्वपरिश्रमम् ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धेऽक्रूरागमनं नामाऽष्टत्रिंशत्तमोऽध्यायः ॥ ३८ ॥ ॥ श्रीशुक उवाच ॥ सुखोपविष्टः पर्यंके रामकृष्णोरुमानितः ॥ लेभे मनोरथान्सर्वान्पथियान्स चकार ह ॥ १ ॥ किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने ॥ तथापि तत्परा राजन्नहि वाछंति किंचन ॥ २ ॥ सायंतनाशनं कृत्वा भगवान्देवकीसुतः ॥ सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चिकीर्षितम् ॥ ३ ॥ श्रीभगवानुवाच ॥ तात सौम्यागतः कच्चित्स्वागतं भद्रमस्तु वः ॥ अपि स्वज्ञातिबंधूनामनमीवमनामयम् ॥ ४ ॥ किं नु नः कुशलं पृच्छे एधमाने कुलामये ॥ कंसे मातुलनाम्न्यंग स्वानां नस्तत्प्रजासु च ॥ ५ ॥ अहो अस्मदभूद्भूरि पित्रोर्वृजिनमार्ययोः ॥ यद्धेतोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ॥ ६ ॥ दिष्ट्याद्य दर्शनं स्वानां मह्यं वः सौम्य कांक्षितम् ॥ संजातं वर्ण्यतां तात तवागमनकारणम् ॥ ७ ॥ श्रीशुक उवाच ॥ पृष्टो भगवता सर्वं वर्णयामास माधवः ॥ वैरानुबंधं यदुषु वसुदेववधोद्यमम् ॥ ८ ॥ यत्संदेशो यदर्थं वा दूतः संप्रेषितः स्वयम् ॥ यदुक्तं नारदेनास्य स्वजन्मानकदुंदुभेः ॥ ९ ॥ श्रुत्वाऽक्रूरवचः कृष्णो बलश्च परवीरहा ॥ प्रहस्य नंदं पितरं राज्ञादिष्टं विजज्ञतुः ॥ १० ॥ गोपान्समादिशत्सोऽपि गृह्यतां सर्वगोरसः ॥ उपायनानि गृह्णीध्वं युज्यंतां शकटानि च ॥ ११ ॥ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ॥ द्रक्ष्यामः सुमहत्पर्व यांति जानपदाः किल ॥ एवमाघोषयत्क्षत्रा नंदगोपः स्वगोकुले ॥ १२ ॥ ॥ ॥ ॥

एवं मधुरया वाचा नंदेन सत्कृतोऽक्रूरस्तत्प्रश्नेन मार्गपरिश्रमं जहौ ॥४३॥ इति श्रीम० चू० दश० पू० अष्टत्रिंशोऽध्यायः ॥३८॥ ॥ नवत्रिंशे पुरीं गच्छत्यच्युते गोपिकोक्तयः । अक्रूरेणाथ कालिंद्यां विष्णुलोकस्य दर्शनम् ॥१॥ श्रीशुक उवाच ॥ हे नृप, रामकृष्णाभ्यां बहुमानितः पर्यंक उपविष्टोऽक्रूरो मार्गे कृतान् सर्वान् मनोरथान् लेभे ॥ १ ॥ हे राजन्, हरौ प्रसन्ने सति किमलभ्यं तथापि भक्ताः किमपि नेच्छंति ॥ २ ॥ ततः कृष्णः सायंकालेऽशनं कृत्वा यादवेषु कंसस्य वृत्तं अन्यदपि यत्तस्य कर्तुमिष्टं तत्सर्वं पप्रच्छ ॥३॥ श्रीभगवानुवाच ॥ हे तात, तव स्वागतम् । स्वज्ञातिबंधूनामारोग्यमस्ति किम् ॥ ४ ॥ हे अक्रूर, कुलस्य रोगरूपे मातुलनाम्नि कंसे वृद्धिंगते सति स्वज्ञातीनां किंनु कुशलं पृच्छामि ॥५॥ अहो अस्मन्निमित्तं निरपराधयोर्देवकीवसुदेवयोर्भूरि दुःखमभूत् । मन्निमित्तं तयोः पुत्रमरणं बंधनं च जातम् ॥६॥ हे अक्रूर, मया बहु कांक्षितं तव दर्शनं जातं तद्भद्रं जातम् । हे तात, तवागमनकारणं [illegible]र्ण्यताम् ॥७॥ श्रीशुक उवाच ॥ एवं पृष्टोऽक्रूरो यदुषु कंसस्य वैरानुबंधं वसुदेववधोद्यमं च वर्णयामास ॥८॥ किंच । यदर्थं[1] कंसेन स्वयं प्रेषितस्तत् नारदोक्तं[2] च सर्वं वर्णयामास ॥९॥ कृष्णरामौ तदक्रूरवचः श्रुत्वा प्रहस्य कंसेनाज्ञापितं सर्वं नंदंप्रति विशेषेण ज्ञापयामासतुः ॥१०॥ ततो नंदो गोपानाह । हे गोपाः, क्षीरादिसर्वगोरसो गृह्यताम् । उपायनानि गृह्णीध्वम् । शकटानि च युज्यंताम् ॥ ११ ॥ वयं श्वो मथुरां यास्यामः । राज्ञे घृतादीन् रसान् दास्यामः । महत्पर्व द्र-

---

[1] चाणूरादिभिर्मारयितुं भवंतं नेतुम् । [2] वसुदेवाद्भवतो जन्मेत्यादि ।

क्ष्यामः । सर्वेऽपि देशवासिनो गच्छंति । एवं नंदो गोकुलरक्षणाधिकृतेन पुरुषेण भेरीघोषेण सर्वतो व्रजे घोषितवान् ॥१२॥ ततो गोप्यो रामकृष्णौ नेतुं प्राप्तमक्रूरं श्रुत्वा दुःखिता बभूवुः ॥१३॥ काश्चित् श्वासम्लानमुखश्रियः काश्चन श्लथितदुकूलवलयकेशग्रंथ्यो बभूवुः ॥१४॥ अन्याश्च तद्ध्यानेन निवृत्तेंद्रियवृत्तयः सत्यो देहमपि मुक्ता इव न जानंति स्म ॥१५॥ अपरा हरेश्चित्रपदयुक्ता वाचः स्मरंत्यः सत्यो मुमुहुः ॥ १६ ॥ एवं सर्वाः कृष्णस्य सुंदरां गतिं हास्यावलोकनं चरितानि च चिंतयंत्यः संघश एकत्र मिलित्वाऽश्रुमुख्यः सत्य ऊचुः॥१७॥१८॥गोप्य ऊचुः । हे विधातः, तव केनापि प्रकारेण दया नास्ति । यस्त्वं जीवान् मैत्र्यैकत्र संयोज्याप्राप्तभोगानपि तान् वियुक्तान् करोषि । अतस्तव क्रीडितं बालस्यैव व्यर्थम् ॥१९॥ यस्त्वं नीलकुंतलावृतं कृष्णमुखं सकृत् प्रदर्श्य पुनस्तस्या

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशम् ॥ रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ॥ १३ ॥ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः ॥ स्रंसद्दुकूलवलयकेशग्रंथ्यश्च काश्चन ॥१४॥ अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः॥ नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥१५॥ स्मरंत्यश्चापराः शौरेरनुरागस्मितेरिताः ॥ हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः ॥१६॥ गतिं सुललितां चेष्टां स्निग्धहासावलोकनम् ॥ शोकापहानि नर्माणि प्रोद्दामचरितानि च ॥ १७ ॥ चिंतयंत्यो मुकुंदस्य भीता विरहकातराः ॥ समेताः संघशः प्रोचुरश्रुमुख्योऽच्युताशयाः ॥ १८ ॥ गोप्य ऊचुः ॥ अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः ॥ तांश्चाकृतार्थान्वियुनंक्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा ॥ १९ ॥ यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसम् ॥ शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतम् ॥ २० ॥ क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत् ॥ येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः ॥२१॥ न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः स्वकृतातुरा बत ॥ विहाय गेहान्स्वजनान्सुतान्पतींस्तद्दास्यमद्धोपगता नवप्रियः ॥ २२ ॥ सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम् ॥ याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मितासवम् ॥ २३ ॥ तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि ॥ कथं पुनर्नः प्रतियास्यतेऽबला ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् ॥२४॥ अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजांधकवृष्णिसात्वताम् ॥ महोत्सवः श्रीरमणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतम् ॥ २५ ॥

दर्शनतां करोषि । अतस्ते कर्म निंद्यम् ॥२०॥ हे विधातः, अक्रूरनाम्ना क्रूरस्त्वमेवात्रागत्या[1]मर्षादस्मच्चक्षुर्हरसे । येन चक्षुषा हरेरवयवादौ त्वदीयं समग्रं सृष्टिनैपुण्यं वयं दृष्टवत्यः ॥२१॥ अथ परस्परमूचुः । अयं नंदपुत्र एव क्षणिकसख्यो नूतनप्रियोऽस्ति । यतो गृहादीन् विहाय तद्दास्यं प्राप्ता अस्मान् न विलोकयति ॥२२॥ इयं रात्रिर्मथुरायां सुप्रभाता जातास्ति। यतो मथुरास्त्रीणां मनोरथाः सत्या भविष्यंति । याः स्त्रियः प्रविष्टस्य हरेर्मुखमादरेण द्रक्ष्यंति ॥२३॥ मथुरास्त्रीणां मधुरभाषणैर्वशीकृतचित्तः कृष्णो ग्राम्या अस्मान्प्रति कथं पुनः प्रत्येष्यति । न कथंचित् ॥ २४ ॥ अद्य मथुरायां दाशार्हभोजादीनां दृष्टेर्महो-

---

[1] मम सर्वरहस्यमाभिर्ज्ञातमित्यमर्षेणैव कृष्णं वियोजयन्नस्मानंधीकरोषि ।

त्सवो भविष्यति । यतस्ते देवकीसुतं द्रक्ष्यंति ॥२५॥ ततोऽक्रूरं शपंत्य आहुः । अस्य निर्दयस्याक्रूर इति शुभं नाम मा भूत् । यो दुःखितं जनमनाश्वास्य प्राणादपि प्रियतरं हरिं दूरं नेष्यति ॥२६॥ अयं कृष्ण एव कठोरबुद्धिर्भूत्वा रथमधिरूढः । एते गोपाश्च त्वरां कुर्वंति । एते वृद्धा अपि न निवारयंति । अतो नो दैवमेव प्रतिकूलमस्ति । धिगस्मज्जीवितम् ॥२७॥ हे स्त्रियः, वयं सर्वा मिलित्वा कृष्णं निवारयामः। वृद्धा बांधवाश्च नः किं करिष्यंति ॥२८॥ हे गोप्यः, येन सह रासक्रीडायामस्माभिः क्षण इव रात्रयो नीतास्तं कृष्णं विना दुरंतं वियोगदुःखं कथं नु तरेम न कथंचित् ॥२९॥ किंच । यः कृष्णः सायंकाले रामगोपैः सह वेणुं क्कणयन् व्रजं विशन् स्वावलोकनेन नश्चित्तं हरति तं विना कथं जीवेम ॥३०॥ श्रीशुक उवाच ॥ एवं ब्रुवाणा विरहातुरा गोप्यो लज्जां त्यक्त्वा

मैतद्विधस्याकरुणस्य नामभूदक्रूर इत्येतदतीव दारुणः ॥ योऽसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः ॥ २६ ॥ अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयंति दुर्मदाः ॥ गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोऽद्य प्रतिकूलमीहते ॥ २७ ॥ निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन्कुलवृद्धबांधवाः ॥ मुकुंदसंगान्निमिषार्धदुस्त्यजाद्दैवेन विध्वंसितदीनचेतसाम् ॥ २८ ॥ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्याम् ॥ नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरंतम् ॥ २९ ॥ योऽह्नःक्षये व्रजमनंतसखः परीतो गोपैर्विशन्खुररजश्छुरितालकस्रक् ॥ वेणुं क्कणन्स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम ॥ ३० ॥ ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ॥ विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविंद दामोदर माधवेति ॥ ३१ ॥ स्त्रीणामेवं रुदंतीनामुदिते सवितर्यथ ॥ अक्रूरश्चोदयामास कृतमैत्रादिको रथम् ॥ ३२ ॥ गोपास्तमन्वसज्जंत नंदाद्याः शकटैस्ततः ॥ आदायोपायनं भूरि कुंभान्गोरससंभृतान् ॥ ३३ ॥ गोप्यश्च दयितं कृष्णमनुव्रज्यानुरंजिताः ॥ प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे ॥ ३४ ॥ तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ॥ सांत्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥ ३५ ॥ यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च ॥ अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः ॥ ३६ ॥ ता निराशा निववृतुर्गोविंदविनिवर्तने ॥ विशोका अहनी निन्युर्गायंत्यः प्रियचेष्टितम् ॥ ३७ ॥ ॥ ॥

हे गोविंद, हे दामोदर, हे माधव, इत्युच्चै रुरुदुः ॥३१॥ एवं तासां रुदंतीनां सतीनां ता अनादृत्य सूर्ये उदिते सति संध्योपासनादि कर्म कृत्वाऽक्रूरो रथं प्रेषयामास ॥३२॥ तमनु नंदादिगोपा भूर्युपायनं घृतादिभिः पूर्णान् कुंभांश्च गृहीत्वा शकटैरगच्छन् ॥ ३३ ॥ तदा कृष्णेन परावृत्य निरीक्षणादिभिः किंचिदानंदिता गोप्यश्च तमनुव्रज्य कृष्णस्य प्रत्याख्यानमिच्छंत्योऽवतस्थिरे ॥ ३४ ॥ कृष्णः स्वप्रस्थाने तप्यतीस्ता दृष्ट्वा सप्रेमैर्दूतवाक्यैरहं शीघ्रमागमिष्यामीति सांत्वयामास ॥३५॥ ततस्ता यावद्रथस्य ध्वजो रेणुश्च दृश्यते तावच्चित्रमयपुत्तलिका इव निश्चलाः स्थिताः ॥३६॥ ततो गोविंदनिवर्तने निराशा भूत्वा परा-

---

१ यदि दैवमस्माकमनुकूलं भवेत्तर्हि विघ्नैः कश्चिदेषां मध्ये प्रतिहन्येत । अकस्माद्वज्रपातो वा भवेत् अन्यद्वा किंचिदनिष्टं स्यान्न तु तत्किंचिदप्यस्तीति । २ एवंभूतानामस्माकं न मृत्योरपि भयमित्यर्थः ।

वृत्त्य तच्चेष्टितं गायंत्यो दिनानि निन्युः ॥३७॥ अथ कृष्णो रामाक्रूरयुतो वायुवेगेन रथेन यमुनातीरं प्राप्तः ॥ ३८ ॥ तत्र रथादुत्तीर्य यमुनाजलेन हस्तौ पादौ मुखं च प्रक्षाल्य तज्जलं पीत्वा वृक्षसमूहं गत्वा पुनः सरामः कृष्णो रथमाविशत् ॥३९॥ अक्रूरस्तौ रथोपरि निवेश्य तयोराज्ञां गृहीत्वा कालिंद्या ह्रदं गत्वा स्नानं चकार ॥४०॥ तत्र निमज्ज्य प्रणवादिकं जपन् तत्र तौ रामकृष्णौ ददर्श[1] ॥ ४१ ॥ तौ रथस्थाविह कथम् । एवं सति रथे न स्तः । उत्युन्मज्ज्य सोऽपश्यत्॥४२॥ तदा पूर्ववद्रथे तौ दृष्ट्वा तयोर्जले यन्मे दर्शनं जातं तन्मृषा वा सत्यं वेति ज्ञातुं पुनर्ममज्ज॥४३॥पुनश्च स जले सिद्धचारणगंधर्वैः स्तूयमा-

भगवानपि संप्राप्तो रामाक्रूरयुतो नृप ॥ रथेन वायुवेगेन कालिंदीमघनाशिनीम् ॥ ३८ ॥ तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम् ॥ वृक्षषंडमुपव्रज्य सरामो रथमाविशत् ॥ ३९ ॥ अक्रूरस्तावुपामंत्र्य निवेश्य च रथोपरि ॥ कालिंद्या ह्रदमागत्य स्नानं विधिवदाचरत् ॥ ४० ॥ निमज्ज्य तस्मिन्सलिले जपन्ब्रह्म सनातनम् ॥ तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ॥ ४१ ॥ तौ रथस्थौ कथमिह सुतावानकदुंदुभेः ॥ तर्हि स्वित्स्यंदने न स्त इत्युन्मज्ज्य व्यचष्ट सः ॥ ४२ ॥ तत्रापि च यथापूर्वमासीनौ पुनरेव सः ॥ न्यमज्जद्दर्शनं यन्मे मृषा किं सलिले तयोः ॥ ४३ ॥ भूयस्तत्रापि सोऽद्राक्षीत्स्तूयमानमहीश्वरम् ॥ सिद्धचारणगंधर्वैरसुरैर्नतकंधरैः ॥ ४४ ॥ सहस्रशिरसं देवं सहस्रफणमौलिनम् ॥ नीलांबरं बिसश्वेतं शृंगैः श्वेतमिव स्थितम् ॥ ४५ ॥ तस्योत्संगे घनश्यामं पीतकौशेयवाससम् ॥ पुरुषं चतुर्भुजं शांतं पद्मपत्रारुणेक्षणम् ॥ ४६ ॥ चारुप्रसन्नवदनं चारुहासनिरीक्षणम् ॥ सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरम् ॥ ४७ ॥ प्रलंबपीवरभुजं तुंगांसोरस्थलश्रियम् ॥ कंबुकंठं निम्ननाभिं वलिमत्पल्लवोदरम् ॥ ४८ ॥ बृहत्कटितटश्रोणिकरभोरुद्वयान्वितम् ॥ चारुजानुयुगं चारुजंघायुगलसंयुतम् ॥ ४९ ॥ तुंगगुल्फारुणनखव्रातदीधितिभिर्वृतम् ॥ नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजम् ॥ ५० ॥ सुमहार्हमणिव्रातकिरीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ॥ ५१ ॥ भ्राजमानं पद्मकरं शंखचक्रगदाधरम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥ ५२ ॥ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥ ५३ ॥ प्रह्रादनारदवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ॥ ५४ ॥ ॥ ॥

नम् ॥४४॥ सहस्रशिरसं सहस्रफणायुक्तमौलिनं नीलांबरं श्वेतमनंतं दृष्ट्वा ॥४५॥ तस्य कुंडलीकृतदेहस्यार्धे घनश्यामं पीतांबरधरं चतुर्भुजं ॥४६॥ सुंदरप्रसन्नमुखं शोभमानाभ्यां भ्रूभ्यामुन्नतया नासिकया च युक्तं सुकपोलं रक्ताधरोष्ठम् ॥४७॥ दीर्घमांसलभुजं कंबुकंठं निम्ननाभिम् ॥४८॥ बृहत्कटितटं मांसलोरुद्वयं सुंदरजानुजंघायुगम् ॥४९॥ ईषदुन्नतगुल्फं कोमलांगुल्यंगुष्ठदलैः शोभितपादपद्मम् ॥५०॥ अमौल्यकिरीटकटकांगदैः कटिसूत्रयज्ञोपवीतहारनूपुरकुंडलैः ॥ ५१ ॥ शोभमानं शंखचक्रगदापद्मधरं श्रीवत्सवक्षसं कौस्तुभवनमालाधरम् ॥ ५२॥ सुनंदनंदादिभिः पार्षदैः सनकादिभिर्ब्रह्मशिवादिभिर्देवैः ॥५३॥ मरीच्यादिभिर्ब्राह्मणैः प्रह्राद-

---

[1] केमौ बालौ क्व तौ मग्नाविति शंकितचित्तायाक्रूराय जलेऽत्याश्चर्यकरं स्वरूपं श्रीकृष्णो दर्शयामास ।

नारदमुख्यैर्भक्तैः पृथक् पृथगभिप्रायेण स्तूयमानम्॥५४॥लक्ष्म्या पुष्ट्या वाण्या कांत्या कीर्त्या तुष्ट्या इलया ऊर्जया विद्यया अविद्यया मायया शक्त्या संविदादिभिश्च सेवितम्॥५५॥एवंभूतं श्रीहरिं दृष्ट्वा प्रीतोऽक्रूरो रोमांचितः सन्॥५६॥हरिं नत्वा कृतांजलिर्गद्गदया वाचा तुष्टाव॥५७॥इति श्रीमद्भा० चू० दश० पू० एकोनचत्वारिंशोऽध्यायः ॥३९॥ ॥ चत्वारिंशे ततोऽक्रूरः कृष्णं मत्वेश्वरेश्वरम् । प्रणम्य भक्त्या तुष्टाव सगुणागुणभेदतः ॥१॥ अक्रूर उवाच ॥ हे कृष्ण, त्वामाद्यं पुरुषमव्ययं नारायणं नतोऽस्मि । यन्नाभिजातात्कमलकोशाद्ब्रह्माऽऽविरासीत् ॥१॥ हे हरे, पृथिव्यप्तेजोवाय्वाकाशाहंकारमहत्तत्वमायापुरुषरूपा ये जगतो हेतवस्ते सर्वे त्वत्त एव जाताः ॥२॥ एते मायाद्या जडास्तव सर्वात्मनः स्वरूपं न विदुः । ब्रह्मापि तव स्वरूपं न वेद । अन्यो जीवः कुतो ज्ञास्यति ॥३॥ एवं-

श्रिया पुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया ॥ विद्ययाऽविद्यया शक्त्या मायया च निषेवितम् ॥ ५५ ॥ विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः॥ हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥५६॥ गिरा गद्गदयाऽ स्तौषीत्सत्वमालंब्य सात्वतः॥ प्रणम्य मूर्ध्नाऽवहितः कृतांजलिपुटः शनैः ॥५७॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धेऽक्रूरप्रतियाने एकोनचत्वारिंशोऽध्यायः ॥३९॥ अक्रूर उवाच ॥ नतोऽस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययम्॥ यन्नाभिजातादरविंदकोशाद्ब्रह्माऽऽविरासीद्यत एष लोकः ॥१॥ भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि ॥ सर्वेंद्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंऽगभूताः ॥२॥ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोऽनात्मतया गृहीताः॥ अजोऽनुबद्धः स गुणैरजाया गुणात्परं वेद न ते स्वरूपम् ॥३॥ त्वां योगिनो यजंत्यद्धा महापुरुषमीश्वरम् ॥ साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ४ ॥ त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः ॥ यजंते विततैर्यज्ञैर्नानारूपापराख्यया॥५॥ एके त्वाखिलकर्माणि संन्यस्योपशमं गताः॥ ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहम् ॥६॥ अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते ॥ यजंति त्वन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकम् ॥७॥ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ॥ बह्वाचार्यविभेदेन भगवन्समुपासते ॥८॥ सर्व एव यजंति त्वां सर्वदेवमयेश्वरम् ॥ येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥९॥ यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो ॥ विशंति सर्वतः सिंधुं तद्वत्त्वां गतयोंऽततः ॥१०॥ सत्वं रजस्तम इति भवतः प्रकृतेर्गुणाः ॥ तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः ॥ ११ ॥ ॥

भूतं महापुरुषमंतर्यामिणं च त्वां योगिनः साधवश्च यजंति ॥ ४ ॥ केचित्कर्मयोगिनो यज्ञैरिंद्रवरुणाद्यनेकदेवतारूपं त्वामेव यजंति ॥५॥ एके ज्ञानिनः सर्वकर्माणि संन्यस्य समाधिना ज्ञानरूपिणं त्वां यजंति ॥६॥ अन्ये वैष्णव दीक्षयादीक्षिताः संतस्तदुक्तपंचरात्रविधिना संकर्षणादिबहुमूर्तिं नारायणरूपेणैकमूर्तिं च त्वामेव यजंति ॥७॥ तथापरे शिवोक्तमार्गेण शिवरूपिणं त्वामुपासते ॥८॥ ये च क्षुद्रदेवताभक्तास्तेऽपि सर्वदेवमयं त्वां यजंति ॥९॥ एवं सर्वे मार्गास्त्वयि प्रविशंति । यथा पर्जन्यापूरिता नद्यः सर्वतः समुद्रमेव प्रविशंति तद्वत् ॥ १० ॥ अत्र कारणमाह । भवन्मायायाः सत्वं रजस्तम इति त्रयो गुणास्तेषु सर्वे

---

१ तत्र पार्षदैः स्वामीति सनकादिभिर्ब्रह्मेति ब्रह्माद्यैर्महेश्वर इति मरीच्यादिभिः परः प्रजापतिरिति प्रह्लादादिभिः परं दैवतमिति स्तूयमानमित्यर्थः ।

आब्रह्मस्थावरादयो जीवाः प्रोताः संति । अतस्ते सर्वे नानोपासनया त्वामेव प्रविशंति। अतस्त्वमेव सर्वदेवमयोऽसि ॥११॥ एवंभूताय सर्वधियां साक्षिणे तुभ्यं
नमोऽस्तु ॥१२॥ अथ सगुणं स्तौति । हे हरे, तव मुखमग्निः । भूमिश्चरणः । सूर्यो नेत्रम् नभो नाभिः। दिशः श्रोत्रम् । स्वर्गः शिरः । देवा भुजाः । सागराः
कुक्षिः। वायुः प्राणबले॥१३॥ वृक्षौषधयो रोमाणि । केशा मेघाः। अस्थिनखानि पर्वताः। निमेषणं रात्रिदिवसौ। प्रजापतिः शिश्नम् । वीर्यं च वृष्टिरस्ति ॥१४॥
एवं सर्वे लोकास्त्वयि कल्पिताः संतः प्रचलंति । यथा उदुंबरफलेषु परस्परवार्तानभिज्ञा मशकाः संति तद्वत् ॥१५॥ हे देव, इह लोके क्रीडार्थं त्वं यानि यानि
रूपाणि बिभर्षि तैर्दूरीकृतशोका लोकास्तव यशो गायंति॥१६॥अथ प्रलयाब्धिचराय कारणमत्स्याय ते नमः । तथा मधुकटैभहंत्रे हयग्रीवाय ते नमः ॥१७॥

तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे ॥ गुणप्रवाहोऽयमविद्यया कृतः प्रवर्तते देवनृतिर्यगात्मसु ॥१२॥
अग्निर्मुखं तेऽवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ॥ द्यौः कं सुरेंद्रास्तव बाहवोऽर्णवाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितम्
॥१३॥ रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः ॥ निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते
॥१४॥ त्वय्यव्ययात्मन्पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसंकुलाः ॥ यथा जले संजिहते जलौकसोऽप्युदुंबरे वा मशका
मनोमये ॥१५॥ यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ॥ तैरामृष्टशुचो लोका मुदा गायंति ते यशः ॥१६॥ नमः कारण-
मत्स्याय प्रलयाब्धिचराय च ॥ हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥१७॥ अकूपाराय बृहते नमो मंदरधारिणे ॥ क्षित्युद्धार-
विहाराय नमः सूकरमूर्तये ॥१८॥ नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ॥ वामनाय नमस्तुभ्यं क्रांतत्रिभुवनाय च ॥१९॥ नमो
भृगूणां पतये दृप्तक्षत्रवनच्छिदे ॥ नमस्ते रघुवर्याय रावणांतकराय च ॥२०॥ नमस्ते वासुदेवाय नमः संकर्षणाय च ॥ प्रद्युम्ना-
यानिरुद्धाय सात्वतां पतये नमः ॥ २१ ॥ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ॥ म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे
॥२२॥ भगवन्जीवलोकोऽयं मोहितस्तव मायया ॥ अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥२३॥ अहं चात्मात्मजागारदारार्थस्व-
जनादिषु ॥ भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ॥२४॥ अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ॥ द्वंद्वारामस्तमोविष्टो न
जाने त्वात्मनः प्रियम् ॥२५॥ यथाऽबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ॥ अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुख ॥ २६ ॥

मंदरधारिणे कूर्माय भूम्युद्धारकर्त्रे वराहमूर्तये च ते नमः ॥१८॥ आश्चर्यकारकाय नृसिंहरूपाय व्याप्तत्रैलोक्याय वामनाय च ते नमः ॥ १९ ॥ क्षत्रियहंत्रे
परशुरामाय रावणहंत्रे रामाय च ते नमः ॥२०॥ वासुदेवसंकर्षणप्रद्युम्नानिरुद्धेति चतुर्मूर्तये ते कृष्णाय नमः ॥२१॥ दैत्यदानवमोहकर्त्रे बुद्धाय म्लेच्छप्रायक्ष-
त्रियहंत्रे कल्किरूपिणे च ते नमोऽस्तु ॥२२॥ हे भगवन्, अयं लोकस्तव मायया मोहितः सन् कर्ममार्गेषु भ्राम्यति ॥२३॥ अहमपि स्वप्नतुल्येषु देहपुत्रगृहा-
दिषु सत्यबुद्ध्या भ्रमामि ॥ २४ ॥ एवमनित्यानात्मदुःखरूपेषु देहपुत्रादिषु नित्यात्मसुखबुद्धिरहमात्मानं प्रेमास्पदं त्वां न जाने ॥ २५ ॥ यथाऽज्ञस्तृणादि-
भिर्गुप्तं जलं हित्वा मृगजलमभिगच्छति तथा त्वां हित्वाहं देहाभिमुखो वर्ते ॥ २६ ॥ ॥ ॥ ॥

विषयवासनाबुद्धियुक्तैरिंद्रियैरितस्तत आकृष्यमाणं मे मनो रोद्धुं न शक्नोमि ॥२७॥ सोऽहं दुष्टानां दुर्लभं तव चरणं शरणं प्राप्तोऽस्मि । इदमपि तवानुग्रहेणैव जातमिति मन्ये । यदा जीवस्य संसारसमाप्तिस्त्वत्कृपया भवेत्तदा सत्समागमेन त्वयि बुद्धिर्भवेत् ॥२८॥ अतोऽपरोक्षज्ञानरूपाय कालकर्मस्वभावादीनां नियंत्रे ब्रह्मणेऽनंतशक्तये ॥२९॥ वासुदेवाय सर्वभूताश्रयाय तुभ्यं नमः ॥३०॥ इति श्रीम० चू० दश० पूर्व० चत्वारिंशोऽध्यायः ॥४०॥ ॥ एकचत्वारिंशकेऽथ रजकं प्रविशन् पुरीम् । ततो वरानदात्तुष्टः सुदाम्नो वायकस्य च ॥१॥ श्रीशुक उवाच ॥ एवमक्रूरस्य स्तुवतः सतः कृष्णो जले वपुर्दर्शयित्वा पुनरुपसंजहार ॥१॥ सोऽपि तत्स्वरूपमंतर्हितं दृष्ट्वा जलादुन्मज्ज्यावश्यकं कर्म कृत्वा रथमागमत् ॥२॥ तदा हरिस्तमाह । हे अक्रूर, त्वयाऽद्भुतं भूमौ जले आकाशे वा किं

नोत्सहेऽहं कृपणधीः कामकर्महतं मनः ॥ रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥ २७॥ सोऽहं तवांघ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥ २८ ॥ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ॥ पुरुषेशप्रधानाय ब्रह्मणेऽनंतशक्तये ॥ २९ ॥ नमस्ते वासुदेवाय सर्वभूतक्षयाय च ॥ हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ॥ ३० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धेऽक्रूरस्तुतिर्नाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ ॥ श्रीशुक उवाच ॥ स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः ॥ भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः ॥१॥ सोऽपि चांतर्हितं वीक्ष्य जलादुन्मज्ज्य सत्वरः ॥ कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् ॥ २ ॥ तमपृच्छद्धृषीकेशः किं ते दृष्टमिवाद्भुतम् ॥ भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥ अक्रूर उवाच ॥ अद्भुतानीह यावंति भूमौ वियति वा जले ॥ त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ ४ ॥ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ॥ तं त्वानुपश्यतो ब्रह्मन्किं मे दृष्टमिहाद्भुतम् ॥ ५ ॥ इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः ॥ मथुरामनयद्रामं कृष्णं चैव दिनात्यये ॥६॥ मार्गे ग्रामजना राजंस्तत्रतत्रोपसंगताः ॥ वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ॥ ७ ॥ तावद्व्रजौकसस्तत्र नंदगोपादयोऽग्रतः ॥ पुरोपवनमासाद्य प्रतीक्षंतोऽवतस्थिरे ॥ ८ ॥ तान्समेत्याह भगवानक्रूरं जगदीश्वरः ॥ गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥ भवान्प्रविशतामग्रे सहयानः पुरीं गृहम् ॥ वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीम् ॥१०॥ ॥

दृष्टम् ॥३॥ अक्रूर उवाच । हे हरे, भूमिजलादिषु यावंत्यद्भुतानि संति तानि सर्वाणि त्वय्येव संति । तं त्वां पश्यता मया सर्वमपि दृष्टम् ॥४॥ हे परमेश्वर, त्वयि सर्वाण्यद्भुतानि संति तं त्वामिह रथे पश्यता मया त्वां विनान्यत् जले किमपि नाद्भुतं दृष्टम् ॥५॥ एवमुक्त्वाऽक्रूरो रथं प्रेरयामास । ततो रामं कृष्णं चापराह्णकाले मथुरासमीपमनयत् ॥६॥ तदा मार्गे जनास्तत्र तत्र तौ रामकृष्णौ दृष्ट्वा प्रीताः संतः पश्यंत एव स्थिताः ॥ ७ ॥ तावन्नंदादयो मथुरायाः पुरोपवनं प्राप्य रामकृष्णागमनं प्रतीक्षमाणाः संतः स्थिताः ॥८॥ ततः कृष्णो नंदादीन् प्राप्य स्वहस्तेनाक्रूरहस्तं गृहीत्वा प्रहसन्निवाह ॥९॥ हे सखे, त्वं सरथोऽग्रे गृहं गच्छ । वयं त्विह विश्रांतिं गृहीत्वा ततः पुरीं द्रक्ष्यामहे ॥१०॥ ॥ ॥ ॥

अक्रूर उवाच ॥ हे प्रभो, भवद्भ्यां विनाऽहं पुरीं न प्रवेक्ष्ये । हे नाथ, ते भक्तं मां त्यक्तुं नार्हसि ॥११॥ किंच। सबलो गोपैः सह त्वं नो गृहानेत्य नः सनाथान् कुरु ॥१२॥ तथा नो गृहान् पादरजसा पुनीहि । तव पादक्षालनोदकेन देवपित्रादयस्तृप्यंति ॥१३॥ तव चरणयुगलं प्रक्षाल्य बलिरतुलमैश्वर्यमेकांतभक्तानां गतिं च लेभे ॥१४॥ तव पादक्षालनोदकानि त्रैलोक्यं पुनंति । यानि शिवः शिरसा दधार । सगरपुत्राश्च यैः स्वर्गं याताः ॥१५॥ हे देवदेव, हे जगन्नाथ, हे पुण्यश्रवणकीर्तन, हे नारायण, ते नमोऽस्तु ॥१६॥ श्रीभगवानुवाच ॥ हे अक्रूर, आदौ कंसं हत्वा ततः सबलस्तव गृहमेत्य तवेतरेषां च सुहृदां प्रियं करिष्यामि ॥१७॥ श्रीशुक उवाच ॥ एवमुक्तोऽक्रूरो विमना इव पुरीं प्रविश्य कृतं कर्म कंसाय निवेद्य गृहं ययौ ॥१८॥ अथापराह्णे कृष्णो रामगोपैः सह मथुरां

अक्रूर उवाच ॥ नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो ॥ त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥११॥ आगच्छ याम गेहान्नः सनाथान्कुर्वधोक्षज ॥ सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम ॥१२॥ पुनीहि पादरजसा गृहान्नो गृहमेधिनाम् ॥ यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः ॥ १३ ॥ अवनिज्यांघ्रियुगलमासीच्छ्लोक्यो बलिर्महान् ॥ ऐश्वर्यमतुलं लेभे गतिं चैकांतिनां तु या ॥१४॥ आपस्तेंऽघ्र्यवनेजन्यस्त्रींल्लोँकान् शुचयोऽपुनन् ॥ शिरसाऽधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥१५॥ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन ॥ यदूत्तमोत्तमश्लोक नारायण नमोऽस्तु ते ॥१६॥ श्रीभगवानुवाच ॥ आयास्ये भवतो गेहमहमार्यसमन्वितः ॥ यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥१७॥ श्रीशुक उवाच ॥ एवमुक्तो भगवता सोऽक्रूरो विमना इव ॥ पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ ॥१८॥ अथापराह्णे भगवान्कृष्णः संकर्षणान्वितः ॥ मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः ॥ १९ ॥ ददर्श तां स्फाटिकतुंगगोपुरद्वारां बृहद्धेमकपाटतोरणाम् ॥ ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभिताम् ॥२०॥ सौवर्णशृंगाटकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृताम् ॥ वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥२१॥ जुष्टेषु जालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ॥ संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यांकुरलाजतंडुलाम् ॥ २२ ॥ आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः ॥ सवृंदरंभाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां सपट्टिकैः ॥ २३ ॥ तां संप्रविष्टौ वसुदेवनंदनौ वृतौ वयस्यैर्नरदेववर्त्मना ॥ द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥ काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ॥ कृतैकपत्रश्रवणैकनूपुरा नांक्त्वा द्वितीयं त्वपराश्च लोचनम् ॥२५॥ ॥

विवेश ॥१९॥ कथंभूतां ताम् । स्फाटिकतुंगगोपुरगृहद्वाराम् । सुवर्णकपाटतोरणाम् । परितः खातगतैर्दुर्गमाम् ॥२०॥ सुवर्णनिर्मितैश्चतुष्पथैर्धनिनां गृहादिभिश्चालंकृताम् । वैदूर्यादिरत्नैर्जुष्टेषु वलभीवेद्यादिषूपविष्टैः पारावतमयूरादिभिर्नादिताम् । संसिक्तराजमार्गादिभिर्युक्ताम् ॥२१॥२२॥ आपूर्णकुंभैः कदलीस्तंभैर्ध्वजपताकादिभिः प्रतिद्वारं शोभिताम् ॥२३॥ एवंभूतां तां मथुरां राजमार्गेण प्रविष्टौ रामकृष्णौप्रति द्रष्टुं पुरस्त्रियः समीयुः । हर्म्याण्यारुरुहुश्च ॥२४॥ काश्चिद्विपरीतधृतवस्त्रभूषणा ईयुः । काश्चिदेकमेव नूपुरं धृत्वा ययुः । अपराः एकनेत्रेंऽजनं निधाय ययुः ॥ २५ ॥ ॥ ॥

अश्नंत्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः ॥ स्वपंत्य उत्थाय निशम्य निःस्वनं प्रपाययंत्योऽर्भमपोह्य मातरः ॥२६॥ मनांसि तासामरविंदलोचनः प्रगल्भलीलाहसितावलोकनैः ॥ जहार मत्तद्विरदेंद्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवम् ॥२७॥ दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः ॥ आनंदमूर्तिमुपगुह्य दृशाऽऽत्मलब्धं हृष्यत्त्वचो जहुरनंतमरिंदमाधिम् ॥२८॥ प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखांबुजाः ॥ अभ्यवर्षन्सौमनस्यैः प्रमदा बलकेशवौ ॥२९॥ दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः ॥ तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥३०॥ ऊचुः पौरा अहो गोप्यस्तपः किमचरन्महत् ॥ या ह्येतावनुपश्यंति नरलोकमहोत्सवौ ॥३१॥ रजकं कंचिदायांतं रंगकारं गदाग्रजः ॥ दृष्ट्वाऽयाचत वासांसि धौतान्यत्युत्तमानि च ॥३२॥ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः ॥ भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥३३॥ स याचितो भगवता परिपूर्णेन सर्वतः ॥ साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥३४॥ ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ॥ परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ॥३५॥ याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ॥ बध्नंति घ्नंति लुंपंति दृप्तं राजकुलानि वै ॥३६॥ एवं विकत्थमानस्य कुपितो देवकीसुतः ॥ रजकस्य कराग्रेण शिरः कायादपातयत् ॥ ३७ ॥ तस्यानुजीविनः सर्वे वासःकोशान्विसृज्य वै ॥ दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ॥३८॥ वसित्वाऽऽत्मप्रिये वस्त्रे कृष्णः संकर्षणस्तथा ॥ शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥ ३९ ॥ ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् ॥ विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ॥४०॥ नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः ॥ स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ॥ ४१ ॥ ॥

काश्चिद्भोजनं हित्वा ययुः । काश्चिद्बालं पाययंत्यस्तं निरस्य ययुः । काश्चिन्निद्रितास्त्वरयोत्थाय ययुः ॥२६॥ तासां मनांसि कृष्णो हास्यावलोकनादिभिर्जहार ॥२७॥ ताः स्त्रियः कृष्णं दृष्ट्वा नेत्रद्वारेण मनसि प्राप्तं तमानंदमूर्तिमालिंग्य रोमांचयुक्ताः सत्योऽनंतां मानसीं व्यथां जहुः ॥२८॥ ततः प्रासादशिखरारूढाः स्त्रियस्तौप्रति पुष्पसमूहानां वृष्टिं चक्रुः ॥२९॥ तत्र तत्र ब्राह्मणा दध्यक्षतैर्गंधैर्मालाभिरुपायनैश्च तावानर्चुः ॥३०॥ ततः पुरस्त्रिय ऊचुः । अहो गोप्यः किं तप आचरन् । या गोप्य एतौ नित्यं पश्यंति ॥३१॥ तावत्कृष्णो मार्गेणागच्छंतं रजकं रंगकारं[1] दृष्ट्वा तंप्रति धौतानि श्रेष्ठानि वस्त्राणि ययाचे ॥३२॥ हे रजक, आवयोर्योग्यानि वस्त्राणि देहि । दातुस्ते परमं कल्याणं भविष्यति । अत्र संशयो नास्ति ॥३३॥ एवं याचितः स दुर्मदः कंससेवको रजकः कुपितः सन् सनिंदं जगाद ॥३४॥ हे उद्धताः, ये यूयं राजधार्याणि वस्त्राणि याचितवंतस्ते पर्वतवनसंचारिणो यूयमीदृशानि वस्त्राणि परिधत्त किम् ॥३५॥ हे बालिशाः, यात यात । यदि वो जीवितुमिच्छास्ति तर्ह्येवं न प्रार्थ्यम् । यतो गर्विष्ठं राजदूता बध्नंति घ्नंति द्रव्यं गृहीत्वा निर्धनं च कुर्वंति ॥३६॥ एवमुक्तो हरिः कुपितः सन् तस्य शिरः कराग्रेण पातयामास ॥३७॥ ततः सर्वे तत्सेवका वस्त्रपुटकान् हित्वा सर्वतो मार्गं दुद्रुवुः ॥३८॥ ततः कृष्णो रामश्च स्वप्रिये वस्त्रे वसित्वा शेषाणि गोपेभ्यो ददतुः ॥३९॥ ततस्तंतुवायकः प्रीतः सन् वस्त्रमयैर्भूषणैस्तयोर्वेषं चकार ॥४०॥ तदा नानालक्षणवेषाभ्यां स्वलंकृतौ तौ, उत्सवे स्वलंकृतौ बालगजा-

---

[1] वस्त्रनिर्णेजक एव वस्त्राणां रंगमपि कुर्वन् रंगकारस्तम् ।

विव विरेजतुः ॥४१॥ तस्य प्रसन्नो हरिरिह परमा संपत्तिं बलमैश्वर्यं स्मृतिमिंद्रियपाटवं च परत्र स्वसारूप्यं च ददौ ॥४२॥ ततो रामकृष्णौ सुदाम्नो मालाकारस्य गृहं जग्मतुः । तौ दृष्ट्वा स उत्थाय शिरसा भूमौ नत्वा ॥ ४३ ॥ आसनं दत्वा सगोपयोस्तयोर्मालातांबूलानुलेपनैः पूजां कृत्वा ॥४४॥ प्राह । हे प्रभो, मम जन्म सार्थकं जातम् । कुलं च पावितम् । अद्य युवयोरागमनेन मह्यं देवपित्रादयस्तुष्टाः॥४५॥भवंतौ विश्वस्य परं कारणं जगत उत्कर्षार्थं कल्यणार्थं चावतीर्णौ स्तः ॥४६॥ जगदात्मनोर्युवयोर्मित्रं शत्रुरिति विषमा दृष्टिर्नास्ति॥४७॥ तौ भृत्यं मामाज्ञापयतम् । युवयोर्दास्यमहं किं करवाणि । भवद्भिः पुंसो यदाज्ञाप्यते स महाननुग्रह एव ॥४८॥ एवं विज्ञापयन् सुदामा तयोर्मतं ज्ञात्वा ताभ्यां सुगंधपुष्पैर्विरचिता माला ददौ ॥ ४९ ॥ ततस्ताभिः स्वलंकृतौ प्रीतौ तौ रामकृष्णौ

तस्य प्रसन्नो भगवान्प्रादात्सारूप्यमात्मनः ॥ श्रियं च परमां लोके बलैश्वर्यस्मृतींद्रियम् ॥४२॥ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः ॥ तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥४३॥ तयोरासनमानीय पाद्यं चाथार्हणादिभिः ॥ पूजां सानुगयोश्चक्रे स्रक्तांबूलानुलेपनैः ॥४४॥ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो ॥ पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम् ॥४५॥ भवंतौ किल विश्वस्य जगतः कारणं परम् ॥ अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥४६॥ नहि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः ॥ समयोः सर्वभूतेषु भजंतं भजतोरपि ॥४७॥ तावाज्ञापयतं भृत्यं किमहं करवाणि वाम् ॥ पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥४८॥ इत्यभिप्रेत्य राजेंद्र सुदामा प्रीतमानसः ॥ शस्तैः सुगंधैः कुसुमैर्माला विरचिता ददौ ॥ ४९ ॥ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानुगौ ॥ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥ ५० ॥ सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ॥ तद्भक्तेषु च सौहार्दं भूतेषु च दयां पराम् ॥५१॥ इति तस्मै वरं दत्वा श्रियं चान्वयवर्धिनीम् ॥ बलमायुर्यशः कांतिं निर्जगाम सहाग्रजः ॥५२॥ इति श्रीमद्भाग०म०दश० पू० पुरप्रवेशो नाम एकचत्वारिंशोऽध्यायः॥४१॥श्रीशुक उवाच ॥ अथ व्रजन्राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनाम् ॥ विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन्रसप्रदः ॥१॥ का त्वं वरोर्वेतदुहानुलेपनं कस्यांगने वा कथयस्व साधु नः ॥ देह्यावयोरंगविलेपमुत्तमं श्रेयस्ततस्ते न चिराद्भविष्यति ॥२॥ सैरंध्र्युवाच ॥ दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि ॥ मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ॥ ३ ॥

प्रपन्नाय तस्मै वरान् ददतुः ॥५०॥ सोऽपि हरौ भक्तिं तद्भक्तेषु स्नेहं भूतेषु दयां च वव्रे ॥ ५१ ॥ तदा कृष्णस्तथेत्युक्त्वा तद्वंशे वृद्धिमतीं श्रियमायुर्यशआदिकं च दत्वा पुरतो निर्जगाम ॥५२॥ इति श्रीमद्भा० चू० दश० पू० एकचत्वारिंशोऽध्यायः ॥४१॥ ॥ द्विचत्वारिंशके कुब्जोन्नमनं धनुषो भिदा । वधस्तद्रक्षिणां कंसारिष्टिं रंगोत्सवादि च ॥१॥ श्रीशुक उवाच ॥ हे नृप, ततः कृष्णो राजमार्गेण गच्छन् गृहीतांगविलेपभाजनां[1] यांतीं तरुणीं कुब्जां स्त्रियं दृष्ट्वा प्रहसन्नुवाच ॥१॥ हे वरोरु, त्वं का । इदमंगविलेपनं कस्येति नः वद । अवयोरिदमंगविलेपनं देहि । ततस्तव श्रेयः शीघ्रं भविष्यति ॥२॥ सैरंध्र्युवाच ॥ हे सुंदर, अहं त्रिवक्रानाम्नी दासी कंसस्यानुलेपकर्मणि बहुमान्यास्मि । मत्कृतमंगविलेपनं तस्यातिप्रियं भवति । तद्युवां विना कोऽन्योऽर्हति ॥ ३ ॥ ॥

---

१ गृहीतानि अंगविलेपनानां चंदनादीनां भाजनानि पात्राणि यया ताम् ।

एवमुक्त्वा सा हरे रूपादिभिर्मोहिता सत्युभयोरप्यनुलेपनं ददौ ॥४॥ ततस्तौ रामकृष्णौ स्ववर्णाभ्यामितरवर्णेनागरागेण रंजितौ संतौ शुशुभाते ॥५॥ ततः प्रसन्नः कृष्णः स्वदर्शने सद्यः फलं दर्शयन् तां त्रिवक्रां सरलां कर्तुं मनश्चक्रे ॥ ६ ॥ स्वपद्भ्यां तस्याः पादाग्रद्वयमाक्रम्य द्व्यंगुल्युत्तानहस्तेन मुखस्याधोभागे धृत्वा देहमुन्नमयामास ॥७॥ सा तदैव कृष्णस्पर्शादृजुसमानांगी प्रमदोत्तमा बभूव ॥८॥ ततो रूपगुणौदार्यसंपन्ना जातमदना सा कृष्णस्योत्तरीयवस्त्रमाकृष्य तं जगाद ॥९॥ हे वीर, एहि गृहं यामः । त्वामिह त्यक्तुमहं नोत्सहे । हे पुरुषश्रेष्ठ, त्वं मे प्रसीद ॥१०॥ एवं तया याच्यमानः कृष्णो रामादीनां मुखं वीक्ष्य प्रहसन् तामुवाच ॥११॥ हे सुभ्रूः, अहं कंसवधेन साधितसुहृत्प्रयोजनः सन् तव गृहमेष्यामि । यतस्त्वमकृतदाराणां प्रवासिनां नः परमाश्रयोऽसि ॥१२॥

रूपपेशलमाधुर्यहसितालापवीक्षितैः ॥ धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनम् ॥४॥ ततस्तावंगरागेण स्ववर्णेतरशोभिना ॥ संप्राप्तपरभागेन शुशुभातेऽनुरंजितौ ॥५॥ प्रसन्नो भगवान्कुब्जां त्रिवक्रां रुचिराननाम् ॥ ऋज्वीं कर्तुं मनश्चक्रे दर्शयन्दर्शने फलम् ॥६॥ पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्युत्तानपाणिना ॥ प्रगृह्य चुबुकेऽध्यात्ममुदनीनमदच्युतः ॥७॥ सा तदर्जुसमानांगी बृहच्छ्रोणिपयोधरा ॥ मुकुंदस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ॥८॥ ततो रूपगुणौदार्यसंपन्ना प्राह केशवम् ॥ उत्तरीयांतमाकृष्य स्मयंती जातहृच्छया ॥९॥ एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे ॥ त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ ॥१०॥ एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः ॥ मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ॥११॥ एष्यामि ते गृहं सुभ्रूः पुंसामाधिविकर्शनम् ॥ साधितार्थोऽगृहाणां नः पांथानां त्वं परायणम् ॥१२॥ विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथैः ॥ नानोपायनतांबूलस्रग्गंधैः साग्रजोऽर्चितः ॥१३॥ तद्दर्शनस्मरक्षोभादात्मानं नाविदन्स्त्रियः ॥ विस्रस्तवासःकबरवलयालेख्यमूर्तयः ॥१४॥ ततः पौरान्पृच्छमानो धनुषः स्थानमच्युतः ॥ तस्मिन्प्रविष्टो ददृशे धनुरैंद्रमिवाद्भुतम् ॥१५॥ पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् ॥ वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥१६॥ करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यताम् ॥ नृणां विकृष्य प्रबभंज मध्यतो यथेक्षुदंडं मदकर्युरुक्रमः ॥१७॥ धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ॥ पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥१८॥ तद्रक्षिणः सानुचराः कुपिता आततायिनः ॥ ग्रहीतुकामा आवव्रुर्गृह्यतां बध्यतामिति ॥१९॥ अथ तान्दुरभिप्रायान्विलोक्य बलकेशवौ ॥ क्रुद्धौ धन्वन आदाय शकले तांश्च जघ्नतुः ॥२०॥

एवं मधुरया वाचा तां प्रस्थाप्य व्रजन् मार्गे वणिग्भिर्नानोपायनतांबूलमालागंधैः साग्रजोऽर्चितः ॥ १३ ॥ तदा तद्दर्शनेन जातान्मदनक्षोभात् स्त्रियो विह्वलिताः सत्य आत्मानं न विदुः ॥१४॥ ततः कृष्णः पौरान्प्रति धनुर्मखशालां पृष्ट्वा तत्र च गत्वा धनुर्ददृशे ॥१५॥ तद्बहुभिः पुरुषै रक्षितं धनुर्मनुष्यैर्निवारितोऽपि कृष्णो बलादाददे ॥१६॥ ततो वामकरेण तत्सज्यं कृत्वा सर्वेषां पश्यतां सतामिक्षुदंडं गज इव तन्मध्यतो बभंज ॥१७॥ तदा भज्यमानस्य धनुषः शब्द आकाशं द्यावापृथिव्यौ दिशश्च पूरयामास । तं शब्दं श्रुत्वा कंसस्त्रासं प्राप ॥१८॥ तदा धनुषो रक्षकाः क्रुद्धाः संतो गृह्यतां बध्यतामिति ब्रुवंतः कृष्णं वेष्टितवंतः ॥१९॥ तान् दृष्ट्वा रामकृष्णौ धनुषः शकले गृहीत्वा तान् जघ्नतुः ॥ २० ॥ ॥ ॥

तथा कंसप्रेरितं सैन्यं च हत्वा ततः शालामुखान्निर्गम्य पुरसंपदो दृष्ट्वा चेरतुः ॥ २१ ॥ तयोस्तमद्भुतं पराक्रमं तेजः प्रौढत्वं स्वरूपं च दृष्ट्वा पुरवासिनो जनास्तौ देवश्रेष्ठौ मेनिरे ॥ २२ ॥ एवं तयोर्मथुरायां स्वैरं विचरतोः सतोः सूर्योऽस्तं जगाम । तदा कृष्णरामौ गोपैः सह पुराच्छकटावमोचनस्थानं जग्मतुः ॥ २३ ॥ हे नृप, गोप्यो व्रजाद्धरेर्निर्गमनसमये या आशिष आशासत । ता मथुरायां हरिमूर्तिशोभां पश्यतां सत्या अभूवन् ॥२४॥ ततः कृष्णरामौ पादौ प्रक्षाल्य दुग्धमिश्रितमन्नं भुक्त्वा तां रात्रिं सुखं न्यवसताम् ॥२५॥ कंसस्तु धनुर्भंगं रक्षकाणां सैन्यस्य च वधं केवलं कृष्णरामयोर्विक्रीडितरूपं श्रुत्वा ॥२६॥ भीतः सन् दीर्घप्रजागरो भूत्वा स्वप्नजागरितभेदेन बहूनि मृत्युसूचकानि दुश्चिह्नानि ददर्श ॥२७॥ तान्याह । जलदर्पणादौ प्रतिबिंबे दृश्यमानेऽपि स्वशि-

बलं च कंसप्रहितं हत्वा शालामुखात्ततः ॥ निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसंपदः ॥ २१ ॥ तयोस्तदद्भुतं वीर्यं निशाम्य पुर-
वासिनः ॥ तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ ॥ २२ ॥ तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान् ॥ कृष्णरामौ वृतौ
गोपैः पुराच्छकटमीयतुः ॥ २३ ॥ गोप्यो मुकुंदविगमे विरहातुरा या आशासताऽशिष ऋता मधुपुर्यभूवन् ॥ संपश्यतां पुरु-
षभूषणगात्रलक्ष्मीं हित्वेतरान्नु भजतश्चकमेऽयनं श्रीः ॥ २४ ॥ अवनिक्तांघ्रियुगलौ भुक्त्वा क्षीरोपसेचनम् ॥ ऊषतुस्तां सुखं
रात्रिं ज्ञात्वा कंसचिकीर्षितम् ॥ २५ ॥ कंसस्तु धनुषो भंगं रक्षिणां स्वबलस्य च ॥ वधं निशम्य गोविंदरामविक्रीडितं परम्
॥ २६ ॥ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ॥ बहून्यचष्टोभयथा मृत्योर्दौत्यकराणि च ॥ २७ ॥ अदर्शनं स्वशिरसः
प्रतिरूपे च सत्यपि ॥ असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा ॥ २८ ॥ छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः ॥ स्व-
र्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनम् ॥ २९ ॥ स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनम् ॥ यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगंबरः
॥ ३० ॥ अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च ॥ पश्यन्मरणसंत्रस्तो निद्रां लेभे न चिंतया ॥ ३१ ॥ व्युष्टायां निशि
कौरव्य सूर्ये चाद्भ्यः समुत्थिते ॥ कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ॥ ३२ ॥ आनर्चुः पुरुषा रंगं तूर्यभेर्यश्च जघ्निरे ॥
मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ॥ ३३ ॥ तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः ॥ यथोपजोषं विविशू राजानश्च कृ-
तासनाः ॥ ३४ ॥ कंसः परिवृतोऽमात्यै राजमंच उपाविशत् ॥ मंडलेश्वरमध्यस्थो हृदयेन विदूयता ॥ ३५ ॥ ॥

रसोऽदर्शनं ददर्श । तथा चंद्रादीनां ज्योतिषां द्वैरूप्यम् ॥२८॥ छायायां छिद्रप्रतीतिः प्राणघोषस्याश्रवणं वृक्षेषु सुवर्णवर्णप्रतीतिः रजःकर्दमादिषु स्वपादानामदर्शनम् ॥२९॥ स्वप्ने प्रेतालिंगनं खरमारुह्य यानं विषभक्षणं जपाकुसुममालाधारणं तैलाभ्यक्तस्य दिगंबरस्य चात्मनो गमनम् ॥३०॥ इत्यादीनि दुश्चिह्नानि कंसो दृष्ट्वा मरणत्रस्तः सन् चिंतया निद्रां न लेभे ॥३१॥ ततश्चतुर्दश्यां प्रातः कंसो मल्लक्रीडामहोत्सवं कारयामास ॥३२॥ तदा पुरुषा रंगमानर्चुः । तूर्यभेर्यो जघ्निरे । मंचाश्च मालापताकादिभिरलंकृताः ॥ ३३ ॥ तेषु मंचेषु पुरदेशवासिनः सर्वे जना राजानश्च यथासुखमुपविविशुः ॥ ३४ ॥ अमात्यसहितः कंसश्च कंपितेन हृदयेन मंडलेश्वरमध्ये राजमंच उपविवेश ॥ ३५ ॥ ॥ ॥ ॥

तदा मल्लताल उच्चैः श्रूयते येषु तेषु तूर्येषु वाद्यमानेषु सत्सु गुरुसहिता मल्लाश्चाणूरमुष्टिककूटशलतोशला वल्गुवाद्यहर्षिताः संतो मल्लरंगमासेदुः ॥३६॥३७॥ तदा कंसेनाहूता नंदादयो गोपाः कंसायोपायनानि दत्वैकस्मिन् मंच आविशन् ॥३८॥ इति श्रीमद्भा०चू०द०पू०द्विचत्वारिंशः ॥ ४२ ॥ ॥ त्रिचत्वारिंशके हत्वा गजेंद्रं रामकृष्णयोः । रंगप्रवेशसौभाग्यं चाणूरेण च भाषणम् ॥ १ ॥ श्रीशुक उवाच ॥ हे राजन्, अथ कृतशौचौ[1] रामकृष्णौ मल्लदुंदुभिनादं श्रुत्वा तन्मल्लयुद्धं द्रष्टुमुपेयतुः ॥ १ ॥ तौ रंगद्वारं गत्वा तस्मिन् महामात्रप्रेरितं कुवलयापीडं गजं ददृशतुः ॥२॥ तदा कृष्णः परिकरं बद्ध्वा कुटिलकुंतलान्निबद्ध्य गंभीरवाण्या हस्तिपं जगाद॥३॥ हे अंबष्ठांबष्ठ, आवयोर्मार्गं देहि । नो चेत्सगजं त्वामद्य यमगृहं नयामि॥४॥ एवं निर्भर्त्सितोंऽबष्ठः क्रुद्धः सन् कृष्णाय को-

वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च ॥ मल्लाः स्वलंकृता दृप्ताः सोपाध्यायाः समागताः॥३६॥ चाणूरो मुष्टिकः कूटः शलस्तोशल एव च ॥ त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥३७॥ नंदगोपादयो गोपा भोजराजसमाहुताः॥ निवेदितोपायनास्ते एकस्मिन्मंच आविशन् ॥३८॥ इति श्रीमद्भा० महा० दश० पू० मल्लरंगोपवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥४२॥ ॥ श्रीशुक उवाच ॥ अथ कृष्णश्च रामश्च कृतशौचौ परंतप ॥ मल्लदुंदुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥१॥ रंगद्वारं समासाद्य तस्मिन्नागमवस्थितम्॥ अपश्यत्कुवलयापीडं कृष्णोंऽबष्ठप्रचोदितम् ॥२॥ बद्ध्वा परिकरं शौरिः समुह्य कुटिलालकान् ॥ उवाच हस्तिपं वाचा मेघनादगभीरया ॥३॥ अंबष्ठांबष्ठ मार्गं नौ देह्यपक्रम मा चिरम् ॥ नो चेत्सकुंजरं त्वाद्य नयामि यमसादनम् ॥४॥ एवं निर्भर्त्सितोंऽबष्ठः कुपितः कोपितं गजम् ॥ चोदयामास कृष्णाय कालांतकयमोपमम्॥५॥ करींद्रस्तमभिद्रुत्य करेण तरसाऽग्रहीत्॥ कराद्विगलितः सोऽमुं निहत्यांघ्रिष्वलीयत ॥६॥ संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवम् ॥ परामृशत्पुष्करेण स प्रसह्य विनिर्गतः ॥ ७ ॥ पुच्छे प्रगृह्यातिबलं धनुषः पंचविंशतिम् ॥ विचकर्ष यथा नागं सुपर्ण इव लीलया ॥ ८ ॥ स पर्यावर्तमानेन सव्यदक्षिणतोऽच्युतः॥ बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः॥९॥ ततोऽभिमुखमभ्येत्य पाणिनाऽऽहत्य वारणम्॥ प्राद्रवन्पातयामास स्पृश्यमानः पदे पदे ॥१०॥ स धावन्क्रीडया भूमौ पतित्वा सहसोत्थितः ॥ तं मत्वा पतितं क्रुद्धो दंताभ्यां सोऽहनत्क्षितिम्॥ ११ ॥

पितं गजं प्रेरयामास ॥५॥ ततो गजः कृष्णं शुंडया जग्राह । ततः शुंडाया विगलितः कृष्णो मुष्टिना तं हत्वा तस्य चरणेष्वदृश्यो बभूव ॥६॥ ततो गजस्तमपश्यन् घ्राणदृष्टिर्भूत्वा तं शुंडया धृतवान् । ततः कृष्णो बलान्निर्गतः सन् ॥७॥ तं पुच्छे धृत्वा पंचविंशति[2]धनुष्यपर्यंतं देशं नागं गरुड इवाकृष्य नीतवान् ॥ ८ ॥ ततः कृष्णः सव्य[3]दक्षिणतो भ्राम्यमाणेन तेन सह गोवत्सेन सह बालक इव बभ्राम ॥ ९ ॥ ततो गजसंमुखं गत्वा तं हस्तेन प्रताड्य धावन् तं पदेपदे स्पृश्यमानः सन् पातयामास ॥१०॥ धावन् कृष्णः क्रीडया भूमौ पतित्वा सहसोत्थितः । तदा गजस्तं पतितं मत्वा दंताभ्यां भूमिं जघान ॥ ११ ॥

---

[1] पूर्वेद्युरेव कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ । एतदुक्तं भवति । धनुर्भंगादिनाऽऽवाभ्यां निजैश्वर्ये सूचितेऽपि पितरौ न मुंचति आवां च पुनर्जिघांसति अतोऽस्य मातुलस्यापि वधे नावयोर्दोष इत्येवं कृतापराधपरिहाराविति । [2] शतहस्तप्रमाणं देशम् । [3] पुच्छग्राहिणं श्रीकृष्णं ग्रहीतुं यदि दक्षिणतो गजः परिवर्तते तर्हि कृष्णः सव्यतस्तं भ्रामयति । यदि च सव्यतः परिवर्तते तर्हि दक्षिणतस्तं भ्रामयन् तेन सह बभ्राम ।

एवं पराक्रमे व्यर्थे जाते क्रुद्धो महामात्रैश्च प्रेर्यमाणो गजः कृष्णमभ्यद्रवत् ॥१२॥ तदा कृष्णस्तं गजमागतं दृष्ट्वा हस्तेन शुंडां धृत्वा भूतले निपात्य ॥१३॥ पतितस्य तस्य देहं पदाऽऽक्रम्य दंतमुत्पाट्य तेनैव तं हस्तिनं हस्तिपांश्च जघान ॥ १४ ॥ ततो मृतं गजमुत्सृज्य दंतहस्तः कृष्णो गजरुधिरमदबिंदुभिरंकितः सन् बभौ ॥१५॥ ततो गजदंतवरायुधौ रामकृष्णौ गोपैः सह रंगमंडपं विविशतुः ॥१६॥ तदा शृंगारादिसर्वरसकदंबमूर्तिः कृष्णः पश्यतां तत्तदभिप्रायानुसारेण ज्ञातो बभूव । तदाह। मल्लानां वज्र[1]सदृशः नृणां [2]राजसदृशः स्त्रीणां म[3]दनः गोपानां स्वज[4]नः दुष्टानां राज्ञां [5]शास्ता पित्रोः शि[6]शुः कंसस्य मृत्यु[7]ः अज्ञानामपर्या[8]प्तः योगिनां परं त[9]त्त्वं यादवानां च परदे[10]वतेति च विदितः सन् साग्रजः कृष्णो रंगं गतः॥१७॥ एवं हतं गजं तौ च दुर्जयौ दृष्ट्वा शूरोऽपि कंसोऽत्यंतं भयं प्राप ॥१८॥ तदा रंगगतौ तौ रामकृष्णौ विचित्रवेषालंकारमालावस्त्रधरौ [11]नटाविव विरेजतुः ॥१९॥ तावुत्तमपुरुषौ दृष्ट्वा मंचस्थाः सर्वे जनास्तन्मुखं नयनैः पीत्वा तृप्तिं न प्रापुः ॥२०॥ ते जनाश्चक्षुर्भ्यां पिबंत इव बाहुभिरालिंगंत इव जिह्वया लिहंत इव ॥२१॥ तयोर्य[12]थादृष्टं य[13]थाश्रुतं रूपगुणमाधुर्यधार्ष्ट्यादिकं वीक्ष्य परस्परमूचुः ॥२२॥ एतौ हरेर्नारायणस्यांशौ वसुदेवगृहेऽवतीर्णौ स्तः ॥ २३ ॥ एष कृष्णो देवक्यां किल जातः । ततो गोकुलं नीतः । एतावंतं कालं

स्वविक्रमे प्रतिहते कुंजरेंद्रोऽत्यमर्षितः ॥ चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा ॥१२॥ तमापतंतमासाद्य भगवान्मधुसूदनः ॥ निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥ पतितस्य पदाक्रम्य मृगेंद्र इव लीलया ॥ दंतमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः ॥ १४ ॥ मृतकं द्विपमुत्सृज्य दंतपाणिः समाविशत् ॥ अंसन्यस्तविषाणोऽसृङ्मदबिंदुभिरंकितः ॥ विरूढस्वेदकणिकावदनांबुरुहो बभौ ॥१५॥ वृतौ गोपैः कतिपयैर्बलदेवजनार्दनौ ॥ रंगं विविशतू राजन्गजदंतवरायुधौ ॥१६॥ मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥ मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः ॥ १७ ॥ हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ॥ कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ॥ १८ ॥ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगंबरौ ॥ यथा नटावुत्तमवेषधारिणौ मनः क्षिपंतौ प्रभया निरीक्षताम् ॥ १९ ॥ निरीक्ष्य तावुत्तमपूरुषौ जना मंचस्थिता नागरराष्ट्रका नृप ॥ प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननम् ॥ २० ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ॥ जिघ्रंत इव नासाभ्यां श्लिष्यंत इव बाहुभिः ॥ २१ ॥ ऊचुः परस्परं ते वै यथा दृष्टं यथा श्रुतम् ॥ तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥ २२ ॥ एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि ॥ अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ २३ ॥ एष वै किल देवक्यां जातो नीतश्च गोकुलम् ॥ कालमेतं वसन्गूढो ववृधे नंदवेश्मनि ॥ २४ ॥ ॥ ॥

---

१ रौद्ररसरूपः । २ अद्भुतरसरूपः । ३ शृंगाररसरूपः । ४ हास्यरसरूपः । ५ वीररसरूपः । ६ करुणारसरूपः । ७ भयानकरसरूपः । ८ बीभत्सरसरूपः । ९ शांतरसरूपः । १० भक्तिरसरूपः । ११ अनेन निर्भयत्वं दर्शितम् । १२ धनुर्भंगादि । १३ गोवर्धनोद्धरणादि ।

नंदगृहे गुप्तः सन् ववृधे ॥२४॥ अनेन पूतना चक्रवातो यमलार्जुनौ शंखचूडः केशी धेनुकः अन्ये चाघासुरादयो नाशिताः ॥ २५ ॥ एतेन दावाग्नेः सकाशात् गोपसहिता गावो मोचिताः । कालियः सर्पो दमितः । इंद्रश्च विमदः कृतः ॥ २६ ॥ अनेन सप्ताहमेकहस्तेन गोवर्धनो धृतः । वातवर्षादिभ्यो गोकुलं च रक्षितम् ॥२७॥ तथा गोप्योऽस्य मुखं पश्यंत्यस्तापान् जहुः ॥२८॥ तथानेन परिरक्षितो यदोर्वंशो विख्यातः सन् श्रियं यशो महत्त्वं च लप्स्यते ॥ २९ ॥ अयं चास्याग्रजो रामः । अनेन प्रलंबो वत्सको बकादयश्च नाशिताः ॥३०॥ एवं जनेषु ब्रुवाणेषु तूर्येषु च निनदत्सु सत्सु कृष्णरामौ संबोध्य चाणूरो वाक्यमब्रवीत् ॥३१॥ हे कृष्ण, हे राम, युवां वीरमान्यौ युद्धनिपुणौ ज्ञात्वा कंसेनाहूतौ स्थः ॥३२॥ किंच । राज्ञः प्रियं कुर्वंत्यः प्रजाः कल्याणं प्राप्नुवंति । अन्यथा बंधना-

पूतनानेन नीतांतं चक्रवातश्च दानवः ॥ अर्जुनौ गुह्यकः केशी धेनुकोऽन्ये च तद्विधाः ॥२५॥ गावः सपाला एतेन दावाग्नेः परिमोचिताः ॥ कालियो दमितः सर्प इंद्रश्च विमदः कृतः ॥२६॥ सप्ताहमेकहस्तेन धृतोऽद्रिप्रवरोऽमुना ॥ वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥२७॥ गोप्योऽस्य नित्यमुदितहसितप्रेक्षणं मुखम् ॥ पश्यंत्यो विविधांस्तापांस्तरंति स्माश्रमं मुदा॥२८॥वदंत्यनेन वंशोऽयं यदोः सुबहु विश्रुतः ॥ श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः॥ २९ ॥ अयं चास्याग्रजः श्रीमान्रामः कमललोचनः ॥ प्रलंबो निहतो येन वत्सको ये बकादयः ॥ ३० ॥ जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च ॥ कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥३१॥ हे नंदसूनो हे राम भवंतौ वीरसंमतौ ॥ नियुद्धकुशलौ श्रुत्वा राज्ञाऽऽहूतौ दिदृक्षुणा ॥३२॥ प्रियं राज्ञः प्रकुर्वंत्यः श्रेयो विंदंति वै प्रजाः॥ मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥३३॥ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटम् ॥ वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः ॥३४॥ तस्माद्राज्ञः प्रियं यूयं वयं च करवामहे ॥ भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ॥३५॥ तन्निशम्याब्रवीत्कृष्णो देशकालोचितं वचः ॥ नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनंद्य च ॥३६॥ प्रजा भोजपतेरस्य वयं चापि वनेचराः ॥ करवाम प्रियं नित्यं तन्नः परमनुग्रहः॥३७॥ बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् ॥ भवेन्नियुद्धं माऽधर्मः स्पृशेन्मल्लसभासदः ॥३८॥ चाणूर उवाच ॥ न बालो न किशोरस्त्वं बलश्च बलिनां वरः ॥ लीलयेभो हतो येन सहस्रद्विपसत्वभृत् ॥३९॥ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नाऽनयोऽत्र वै॥ मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ॥४०॥ इति श्रीमद्भा० महा० दश० पूर्वार्धे कुवलयापीडवधो नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

दिकं प्राप्नुवंति ॥३३॥ किंच । गोपा नित्यं वनेषु मल्लयुद्धेन क्रीडंतो गाश्चारयंति ॥३४॥ तस्माद्राज्ञः प्रियं यूयं वयं च करवाम । राज्ञि प्रीते सति सर्वे लोका नः प्रसीदंति । यतः सर्वभूतमयो नृपः ॥३५॥ एवं श्रुत्वा कृष्णो देशकालयोग्यं वच आह ॥ ३६ ॥ हे मल्ल, अस्य राज्ञो यूयं वयं च प्रजाः । अतोऽस्य प्रियं करवाम ॥३७॥ वयं बालास्तुल्यबलैः क्रीडिष्यामश्चेत्तर्हि योग्यं बाहुयुद्धं स्यात् । अत्र मल्लसभास्थितान् जनान्प्रत्यधर्मो मा स्पृशेत् ॥३८॥ चाणूर उवाच ॥ त्वं बालः किशोरश्च नासि । येन सहस्रगजबलधारकः कुवलयापीडो हतः॥३९॥ तस्माद्भवद्भ्यां मत्सदृशैर्बलिभिः सह योद्धव्यम् । अत्राधर्मो नास्ति । अतस्त्वं मया सह पराक्रमं कुरु । बलेन सह मुष्टिकः पराक्रमं करोतु ॥४०॥ इति श्रीमद्भा० चूर्णि० दश० पूर्वा० त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥

चतुश्चत्वारिंशके तु मल्लकंसादिमर्दनम् । कंसयोषित्समाश्वासस्ताभ्यां पित्रोश्च दर्शनम् ॥१॥ श्रीशुक उवाच ॥ एवं निश्चितसंकल्पो भगवान् चाणूरेण सह युद्धं कर्तुं सिद्धो बभूव । रामश्च मुष्टिकेन सह योद्धुं प्रवृत्तः ॥१॥ (तौ हस्ताभ्यां हस्तौ ऊरुभ्यां चोरू आस्फोट्य ॥१॥) परस्परं हस्ताभ्यां हस्तौ धृत्वा पद्भ्यां पादौ परिवेष्ट्य परस्परं जेतुमिच्छयाऽऽकर्षतुः॥२॥ ततो जानुभ्यां जानुनी शीर्ष्णा शिरः वक्षसा वक्षश्चान्योन्यं जघ्नतुः॥३॥ततो हस्तादिषु गृहीत्वा परितश्चालनं प्रेरणं बाहुभ्यां निष्पीडनं अधः क्षेपः उत्सृज्य पुरतो गमनं पृष्ठतो गमनं चैतैः प्रकारैः परस्परं मल्लयुद्धं चक्रतुः ॥४॥ ततो जानुनी पादौ च पिंडीकृत्य पतितस्योच्चाटनं हस्ताभ्यामुद्धृत्य नयनं कंठादिलग्नस्य निःसारणं चैतैः प्रकारैः परस्परं देहस्यापकारं कृतवंतौ ॥५॥ तद्बलाबलवद्युद्धं दृष्ट्वा सर्वस्त्रियो मिथ ऊचुः ॥ ६ ॥

॥ श्रीशुक उवाच ॥ एवं चर्चितसंकल्पो भगवान्मधुसूदनः ॥ आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः ॥१॥ (आस्फोट्य हस्तौ हस्ताभ्यामूरू चैव पुनः पुनः ॥ विसृज्य भूयः संगृह्य परिक्रम्य परस्परम् ॥१॥) हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ॥ विचकर्षतुरन्योऽन्यं प्रसह्य विजिगीषया ॥२॥ अरत्नी द्वे अरत्नीभ्यां जानुभ्यां चैव जानुनी ॥ शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः॥३॥परिभ्रामणविक्षेपपरिरंभावपातनैः ॥ उत्सर्पणापसर्पणैश्चान्योऽन्यं प्रत्यरुंधताम्॥४॥उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि ॥ परस्परं जिगीषंतावपचक्रतुरात्मनः ॥५॥ तद्बलाबलवद्युद्धं समेताः सर्वयोषितः ॥ ऊचुः परस्परं राजन्सानुकंपा वरूथशः ॥६॥ महानयं बताधर्म एषां राजसभासदाम् ॥ ये बलाबलवद्युद्धं राज्ञोऽन्विच्छंति पश्यतः ॥७॥ क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसंनिभौ ॥ क्व चातिसुकुमारांगौ किशोरौ नाप्तयौवनौ ॥ ८ ॥ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ॥ यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥९॥ न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥ वल्गतः शत्रुमभितः कृष्णस्य वदनांबुजम् ॥ वीक्षतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः ॥११॥ किं न पश्यत रामस्य मुखमाताम्रलोचनम् ॥ मुष्टिकंप्रति सामर्षं हाससंरंभशोभितम् ॥ १२ ॥ पुण्या बत व्रजभुवो यदयं नृलिंगगूढः पुराणपुरुषो वनचित्रमाल्यः ॥ गाः पालयन्सहबलः क्वणयंश्च वेणुं विक्रीडयांचति गिरित्ररमार्चितांघ्रिः ॥ १३ ॥ गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ॥ दृग्भिः पिबंत्यनुसवाभिनवं दुरापमेकांतधाम यशसः श्रिय ऐश्वरस्य ॥ १४ ॥ ॥

अहो एषां सभासदां महानधर्मः पश्यत । ये बलाबलवद्युद्धं राज्ञः पश्यतः सतः स्वयमप्यनुमन्यंते ॥ ७ ॥ वज्रशरीरौ पर्वततुल्यौ चाणूरमुष्टिकौ क्व । अतिसुकुमारांगौ किशोरौ रामकृष्णौ च क्व ॥८॥ अतोऽस्याः सभाया धर्मोल्लंघनं भवेत् । यत्राधर्मः प्रवर्तते तत्र कदापि न स्थेयम् ॥ ९ ॥ किंच । सभासदां दोषान् स्मरन् प्राज्ञ आदौ सभामेव न प्रविशेत् । यतः सभ्यदोषान् ज्ञात्वा तूष्णीं तिष्ठन् धर्मविरुद्धं च ब्रुवन् नरः पापं प्राप्नोति ॥ १० ॥ हे स्त्रियः, शत्रुं सर्वतो धावतः कृष्णस्य श्रमबिंदुव्याप्तं मुखकमलं पश्यत ॥११॥ अन्या ऊचुः। अहो मुष्टिकंप्रति सक्रोधमारक्तनेत्रं रामस्य मुखं किं न पश्यत॥ १२ ॥अपरा ऊचुः । अहो गोकुलभूमयः पुण्याः । यास्वयं मनुष्यदेहेन गूढः पुराणपुरुषो गाः पालयन् वेणुं च क्वणयन् विविधक्रीडया गच्छति ॥ १३ ॥ हे स्त्रियः, गोप्यः किं तप

आचरन् । या अस्य लावण्यसारं रूपं नित्यं दृग्भिः पिबंति॥१४॥ या गोप्यो दोहने कंडने मथने उपलेपे दोलांदोलने बालकरुदिते सेचनमार्जनादौ च अनुरक्तधियो गद्गदितकंठ्यः सत्यः कृष्णं गायंति ता धन्याः ॥१५॥ किंच । प्रातर्गोकुलाद्गच्छतः सायं प्रविशतश्च कृष्णस्य वेणुनादं श्रुत्वा गृहात्तूर्णं निर्गम्य गोप्यः पथि सस्मितं तन्मुखं पश्यंति । अतस्ता बहुपुण्याः ॥१६॥ एवं सभयं स्त्रीषु ब्रुवतीषु सतीषु श्रीकृष्णस्तासां भयनिवृत्तये शत्रुं हंतुं मनश्चक्रे ॥१७॥ एवं स्त्रीणां गिरः श्रुत्वा पुत्रयोर्बलमजानंतौ देवकीवसुदेवावनुतापं प्राप्तौ ॥ १८ ॥ रामकृष्णौ तु तैस्तैर्युद्धमार्गैश्चाणूरमुष्टिकाभ्यां सह यथान्यायं युयुधाते ॥ १९ ॥ ततो वज्रपातनिष्ठुरैर्भगवतो हस्तजान्वादिप्रहारैः श्लथांगश्चाणूरो मुहुर्ग्लानिं प्राप ॥२०॥ ततः स मुष्टिं बद्ध्वोत्पत्य च क्रुद्धः कृष्णं वक्षसि ताडयामास॥२१॥तत्प्रहारे-

या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ ॥ गायंति चैनमनुरक्तधियोऽश्रुकंठ्यो धन्या व्रजस्त्रिय उरुक्रम-
चित्तयानाः ॥ १५ ॥ प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ॥ निर्गम्य तूर्णमबलाः पथि
भूरिपुण्याः पश्यंति सस्मितमुखं सदयावलोकम् ॥१६॥ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ॥ शत्रुं हंतुं मनश्चक्रे भगवान्भर-
तर्षभ ॥१७॥ सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ ॥ पितरावन्वतप्येतां पुत्रयोरबुधौ बलम् ॥१८॥ तैस्तैर्नियुद्धविधिभिर्वि-
विधैरच्युतेतरौ ॥ युयुधाते यथान्योन्यं तथैव बलमुष्टिकौ ॥ १९ ॥ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरो भज्यमानांगो
मुहुर्ग्लानिमवाप ह ॥ २० ॥ स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ ॥ भगवंतं वासुदेवं क्रुद्धो वक्षस्यबाधत ॥ २१ ॥ नाचल-
त्तत्प्रहारेण मालाहत इव द्विपः ॥ बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन्हरिः ॥ २२ ॥ भूपृष्ठे पोथयामास तरसा क्षीणजीवितम् ॥
विस्रस्ताकल्पकेशस्रगिंद्रध्वज इवापतत् ॥ २३ ॥ तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहतेन वै ॥ बलभद्रेण बलिना तलेनाभिहतो भृ-
शम् ॥ २४ प्रवेपितः स रुधिरमुद्वमन्मुखतोऽर्दितः ॥ व्यसुः पपातोर्व्युपस्थे वाताहत इवांघ्रिपः ॥ २५ ॥ ततः कूटमनुप्राप्तं रामः
प्रहरतां वरः ॥ अवधील्लीलया राजन्सावज्ञं वाममुष्टिना ॥ २६ ॥ तर्ह्येव हि शलः कृष्णप्रपदाऽऽहतशीर्षकः॥ द्विधा विदीर्णस्तो-
शलक उभावपि निपेततुः ॥ २७ ॥ चाणूरे मुष्टिके कूटे शले तोशलके हते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥ २८ ॥
गोपान्वयस्यानाकृष्य तैः संसृज्य विजह्रतुः ॥ वाद्यमानेषु तूर्येषु वल्गंतौ धृतनूपुरौ ॥ २९ ॥ जनाः प्रजहृषुः सर्वे कर्मणा
रामकृष्णयोः ॥ ऋते कंसं विप्रमुख्याः साधवः साधु साध्विति ॥ ३० ॥ ॥ ॥

ण कृष्णोऽचलितः सन् तं बाह्वोर्निगृह्य बहुशो भ्रामयन् ॥२२॥ भ्रामणेनैव गतप्राणं तं भूपृष्ठे पोथयामास । तदा स वज्र इव पपात॥२३॥ तथैव बलभद्रेण हस्ततलेन ताडितो मुष्टिको रक्तं वमन् गतप्राणः सन् भूतले पपात ॥२४॥२५॥ ततः प्राप्तं कूटं रामो लीलया सावज्ञं वाममुष्टिना जघान ॥ २६ ॥ तर्ह्येव शलः कृष्णपादाग्रेण हतमस्तकस्तोशलकश्च द्विधा विदीर्णस्तावुभावपि निपेततुः ॥२७॥ एवं चाणूरमुष्टिककूटशलतोशलकेषु हतेषु शेषा मल्लाः स्वप्राणरक्षणार्थं दुद्रुवुः ॥२८॥ ततो रामकृष्णौ धृतनूपुरौ भूत्वा गोपानाहूय तैः सह वाद्यगतिसमं नृत्यादि कुर्वंतौ संतौ विजह्रतुः ॥ २९ ॥ तदा कंसं विना सर्वे जना हर्षं

प्रापुः । साधवश्च साध्वित्यूचुः ॥३०॥ एवं मल्लवर्येषु हतेष्वन्येषु च पलायितेषु सत्सु कंसो वाद्यानि निवार्य जगाद ॥ ३१ ॥ हे दूताः, एतौ दुर्वृत्तौ वसुदेवसुतौ पुरान्निःसारयत । गोपानां धनं हरत । दुर्मतिं नंदं च बध्नीत ॥३२॥ दुर्बुद्धिर्वसुदेवो हन्यताम् । तथा परपक्षगामी नः पितोग्रसेनो हन्यताम् ॥ ३३ ॥ एवं कंसे विकत्थमाने सति क्रुद्धः कृष्ण उड्डाणं कृत्वोच्चं मंचमारुहत् ॥ ३४ ॥ तदा तं स्वमृत्युं प्राप्तं दृष्ट्वा कंस आसनादुत्थाय खङ्गचर्मणी जगृहे ॥ ३५ ॥ तदा खङ्गपाणिं दक्षिणतो वामत आकाशे च श्येनवत्संचरंतं तं कंसमविषह्यतेजाः कृष्णो गरुडः सर्पमिव शीघ्रं समग्रहीत् ॥३६॥ तं च केशेषु धृत्वा मंचाद्रंगोपरि निपात्य तस्योपरि विश्वाश्रयः[1] स्वयं पपात ॥३७॥ तावता मृतं तं कंसं सिंहो गजमिव विचकर्ष । तदा सर्वजनैरुच्चारितो हा हेति महान् शब्दो जातः

हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ॥ न्यवारयत्स्वतूर्याणि वाक्यं चेदमुवाच ह ॥३१॥ निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ॥ धनं हरत गोपानां नंदं बध्नीत दुर्मतिम् ॥३२॥ वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ॥ उग्रसेनः पिता चापि सानुगः परपक्षगः ॥३३॥ एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ॥ लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ॥ ३४ ॥ तमाविशंतमालोक्य मृत्युमात्मन आसनात् ॥ मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी ॥ ३५ ॥ तं खङ्गपाणिं विचरंतमाशु श्येनं यथा दक्षिणसव्यमंबरे ॥ समग्रहीद्दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥३६॥ प्रगृह्य केशेषु चलत्किरीटं निपात्य रंगोपरि तुंगमंचात् ॥ तस्योपरिष्टात्स्वयमब्जनाभः पपात विश्वाश्रय आत्मतंत्रः ॥ ३७ ॥ तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ॥ हाहेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेंद्र ॥३८॥ स नित्यदोद्विग्नधिया तमीश्वरं पिबन्वदन्वा विचरन्स्वपन्श्वसन् ॥ ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमाप ॥ ३९ ॥ तस्यानुजा भ्रातरोऽष्टौ कंकन्यग्रोधकादयः ॥ अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्वेशकारिणः ॥४०॥ तथातिरभसांस्तांस्तु संयत्तान्रोहिणीसुतः ॥ अहन्परिघमुद्यम्य पशूनिव मृगाधिपः ॥ ४१ ॥ नेदुर्दुंदुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः ॥ पुष्पैः किरंतस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ॥४२॥ तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः ॥ तत्राभीयुर्विनिघ्नंत्यः शीर्षाण्यश्रुविलोचनाः ॥ ४३ ॥ शयानान्वीरशय्यायां पतीनालिंग्य शोचतीः ॥ विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ॥ ४४ ॥ हा नाथ प्रिय धर्मज्ञ करुणानाथ वत्सल ॥ त्वया हतेन निहता वयं ते सगृहप्रजाः ॥ ४५ ॥

॥३८॥ हे नृप, स कंसो नित्यं भीतया बुद्ध्या तं श्रीकृष्णं भक्षणपानभाषणशयनादिष्वग्रतो ददर्श । अतोंऽते तदेव दुर्लभं स्वरूपं प्राप ॥३९॥ ततस्तद्भ्रातरोऽष्टौ कंकन्यग्रोधादयः क्रुद्धा भ्रातुरानृण्यं कर्तुं कृष्णमभ्यधावन् ॥ ४० ॥ ततोऽतिवेगवत्तरांस्तान् रामः परिघमुद्यम्य जघान ॥ ४१ ॥ तदा व्योम्नि दुंदुभयो नेदुः । ब्रह्मादिदेवाः पुष्पवृष्टिं कुर्वंतः संतः कृष्णं प्रशशंसुः । अप्सरसश्च ननृतुः ॥ ४२ ॥ हे नृप, ततः कंसादीनां स्त्रियः पतिमरणदुःखिता मस्तकानि निघ्नंत्योऽश्रुलोचनाः सत्यस्तत्राजग्मुः ॥४३॥ तदा वीरशय्यायां शयानान् स्वपतीनालिंग्य सुस्वरं विलापं चक्रुः ॥४४॥ हा नाथ, हे प्रिय, हे धर्मज्ञ, हे करु-

---

[1] गरिष्ठत्वाय विश्वाश्रयत्वमुक्तम् ।

णानाथ हे वत्सल, त्वया हतेन वयं गृहपुत्रादिभिः सह मृततुल्या जाताः ॥४५॥ हे पुरुषश्रेष्ठ, इयं पुरी त्वया पत्या हीना सती वयमिव न शोभते ॥४६॥
हे कंस, त्वं निरपराधिनां भूतानां द्रोहं कृतवान्। तेनेमां दशां प्रापितोऽसि ॥४७॥ एष कृष्णः सर्वेषां गोप्ता जन्मनां मृत्यूनां च कारणम्। अस्यावज्ञाकर्ता
पुमान् क्वापि सुखं न प्राप्नोति ॥४८॥ श्रीशुक उवाच ॥ ततः कृष्णो राजपत्नीराश्वास्य हतानां पारलौकिकीं क्रियां कारयामास ॥४९॥ ततो रामकृष्णौ मातरं
पितरं च बंधनान्मोचयित्वा तौप्रति ववंदाते ॥५०॥ तदा देवकी वसुदेवश्च कृतवंदनौ पुत्रौ जगदीश्वराविति ज्ञात्वा नालिंगितवंतौ। किं तु बद्धांजली तस्थतुः
॥५१॥ इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वार्धे कंसवधो नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥ ॥ पंचचत्वारिंशकेऽथ पितृनंदादिसांत्वनम्। उग्र-

त्वया विरहिता पत्या पुरीयं पुरुषर्षभ ॥ न शोभते वयमिव निवृत्तोत्सवमंगला ॥ ४६ ॥ अनागसां त्वं भूतानां कृतवान्द्रोहमुल्बणम् ॥
तेनेमां भो दशां नीतो भूतध्रुक्को लभेत शम् ॥ ४७ ॥ सर्वेषामिह भूतानामेष हि प्रभवाप्ययः ॥ गोप्ता च तदवध्यायी
न क्वचित्सुखमेधते ॥ ४८ ॥ श्रीशुक उवाच ॥ राजयोषित आश्वास्य भगवाँल्लोकभावनः ॥ यामाहुर्लौकिकीं संस्थां
हतानां समकारयत् ॥ ४९ ॥ मातरं पितरं चैव मोचयित्वाथ बंधनात् ॥ कृष्णरामौ ववंदाते शिरसाऽऽस्पृश्य पादयोः ॥ ५० ॥
देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ॥ कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितौ ॥ ५१ ॥ ॥ इति श्रीमद्भागवते महापुराणे
दशमस्कंधे पूर्वार्धे कंसवधो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥ श्रीशुक उवाच ॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ॥
मा भूदिति निजां मायां ततान जनमोहिनीम् ॥ १ ॥ उवाच पितरावेत्य साग्रजः सात्वतर्षभः ॥ प्रश्रयावनतः प्रीणन्नंब
तातेति सादरम् ॥ २ ॥ नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि ॥ बाल्यपौगंडकैशोराः पुत्राभ्यामभवन्क्वचित् ॥ ३ ॥
न लब्धो दैवहतयोर्वासो नौ भवदंतिके ॥ यां बालाः पितृगेहस्था विंदंते लालिता मुदम् ॥ ४ ॥ सर्वार्थसंभवो देहो जनितः
पोषितो यतः ॥ न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥ यस्तयोरात्मजः कल्प आत्मना च धनेन च ॥ वृत्तिं न दद्यात्तं
प्रेत्य स्वमांसं खादयंति हि ॥ ६ ॥ मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् ॥ गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः
॥ ७ ॥ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ॥ मोघमेते व्यतिक्रांता दिवसा वामनर्चतोः ॥ ८ ॥ ॥

सेनाभिषेकश्च गुरौ वासात्पुरागमः ॥१॥ श्रीशुक उवाच ॥ कृष्णः पितरौ प्राप्तज्ञानौ ज्ञात्वेदानीं तज्ज्ञानं मा भूदिति स्वमायां तयोरुपरि प्रसारितवान् ॥ १ ॥
ततः सबलः कृष्णः हे अंब, हे तातेति मतापितरौ प्रीणयन् जगाद ॥ २ ॥ हे पितरौ, अस्मत्तो युवयोर्बाल्यपौगंडकैशोरावस्थानुभवसुखानि नाभवन् ॥ ३ ॥
किंच। दैवहीनयोरावयोर्वासो भवतां समीपे न जातः। पितृगेहस्था बाला यां मुदं विंदंते सा चावयोर्न लब्धा ॥४॥ अयं देहो याभ्यां जनितः पोषितश्च तयोः
पित्रोरानृण्यं मर्त्यः शतवर्षेणायुष्येणापि नाप्नोति ॥ ५ ॥ यः सुतः समर्थः सन् देहेन धनेन च पित्रोर्जीविकां न संपादयेत्तं लोकांतरे यमदूताः तस्यैव मांसं खादयंति
॥६॥ वृद्धौ मातापितरौ पतिव्रतां स्त्रियं बालं सुतं गुरुं विप्रं शरणागतं च यः समर्थो न पोषयति स जीवन्मृततुल्यः ॥७॥ तस्मात्कंसाद्भीतयोर्वामपूजयतो-

रावयोरेते दिवसा व्यर्थं गताः ॥८॥ अतो हे पितरौ,युवयोः शुश्रूषामकुर्वतोः परतंत्रयोरावयोरपराधान् क्षंतुमर्हथः ॥९॥ श्रीशुक उवाच ॥ एवं मायामनुष्यस्य हरेर्वाण्या मोहितौ पितरौ सुतावंकमारोप्यालिंग्य मुदं प्रापतुः ॥१०॥ किंच । स्नेहाश्रुधाराभिः सिंचंतौ गद्गदकंठौ तौ किंचन नोचतुः ॥ ११ ॥ एवं कृष्णः पितरावाश्वास्य मातामहमुग्रसेनं यदूनां राजानमकरोत् ॥१२॥ आह च । हे महाराज, त्वमस्मान् प्रजाश्चाज्ञां कर्तुमर्हसि । ययातिशापाद्यदुभिर्नृपासने न स्थेयम् । तव तु यादवत्वेऽपि ममाज्ञया न दोषः ॥१३॥ किंच । भृत्ये मयि समीपे सति भवतो देवादय उपायनानि समर्पयिष्यंति। अन्ये नृपाः समर्पयिष्यंतीति किमु वक्तव्यम् ॥१४॥ ततः कृष्णः कंसभयव्याप्तान् सर्वान् स्वज्ञातिसंबंधान् यदुवृष्ण्यंधकादींश्च दिग्भ्य आनाय्य ॥१५॥ वित्तैः संतर्प्य स्वस्वगेहेषु स्थापयामास

तत्क्षंतुमर्हथस्तात मातर्नौ परतंत्रयोः ॥ अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशम् ॥ ९ ॥ श्रीशुक उवाच ॥ इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ॥ मोहितावंकमारोप्य परिष्वज्यापतुर्मुदम् ॥१०॥ सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ ॥ न किंचिदूचतू राजन्बाष्पकंठौ विमोहितौ ॥११॥ एवमाश्वास्य पितरौ भगवान्देवकीसुतः ॥ मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥ आह चास्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नासितव्यं नृपासने ॥ १३ ॥ मयि भृत्य उपासीने भवतो विबुधादयः ॥ बलिं हरंत्यवनताः किमुतान्ये नराधिपाः ॥१४॥ सर्वान्स्वान्ज्ञातिसंबंधान्दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् ॥१५॥ सभाजितान्समाश्वास्य विदेशावासकर्शितान् ॥ न्यवासयत्स्वगेहेषु वित्तैः संतर्प्य विश्वकृत् ॥१६॥ कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः ॥ गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥१७॥ वीक्षंतोऽहरहः प्रीता मुकुंदवदनांबुजम् ॥ नित्यं प्रमुदितं श्रीमत्सदयस्मितवीक्षणम् ॥१८॥ तत्र प्रवयसोऽप्यासन्युवानोऽतिबलौजसः ॥ पिबंतोऽक्षैर्मुकुंदस्य मुखांबुजसुधां मुहुः ॥१९॥ अथ नंदं समासाद्य भगवान्देवकीसुतः ॥ संकर्षणश्च राजेंद्र परिष्वज्येदमूचतुः ॥ २० ॥ पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् ॥ पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ २१ ॥ स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ २२॥ यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ २३ ॥ एवं सांत्वय्य भगवान्नंदं सव्रजमच्युतः ॥ वासोलंकारकुप्याद्यैरर्हयामास सादरम् ॥२४॥ ॥

॥१६॥ ततः सर्वे यादवा रामकृष्णभुजै रक्षिताः प्राप्तमनोरथा नित्यं कृष्णमुखांबुजं वीक्षमाणाश्च संतो गृहेषु रेमिरे ॥ १७ ॥ १८ ॥ तत्र ये वृद्धास्तेऽपि नेत्रैः कृष्णमुखामृतं पिबंतः संतस्तरुणा इवातिबलिष्ठाः पराक्रमिणश्चासन् ॥१९॥ अथ रामकृष्णौ नंदंप्रति गत्वाऽऽलिंग्योचतुः ॥ २० ॥ हे पितः, युवाभ्यामावामत्यंतं लालितौ पालितौ च । यतः पित्रोः स्वदेहादपि पुत्रेष्वधिका प्रीतिरुत्पद्यते ॥२१॥ किंच । स पिता सा च माता। यौ स्वपुत्रवत् बंधुभिस्त्यक्तान् शिशून् पुष्णीताम् ॥ २२ ॥ हे तात, यूयं व्रजं यात । वयमत्रस्थानां सुहृदां सुखमुत्पाद्य युष्मान् स्नेहदुःखितान् ज्ञातीन् द्रष्टुमेष्यामः ॥ २३ ॥ एवं कृष्णः सगोपं नंदं सांत्वयित्वा वस्त्रालंकारकांस्यादिपात्रादिभिः सादरं पूजयामास ॥ २४ ॥ ॥ ॥ ॥

एवमुक्तो नंदोऽश्रुभिर्नेत्रे आपूर्य प्रेमविह्वलस्तावालिंग्य गोपैः सह व्रजं ययौ ॥ २५ ॥ हे राजन्, अथ वसुदेवः रामकृष्णयोः पुत्रयोर्व्रतबंधं पुरोहितेन गर्गेण ब्राह्मणैश्च कारयित्वा ॥२६॥ स्वलंकृतेभ्यस्तेभ्यो दक्षिणाः स्वलंकृताः सवत्सा गाश्च ददौ ॥२७ ॥ किंच । रामकृष्णयोर्जन्मनि या मनोदत्तास्ता गा अपि स्मृत्वा ददौ ॥२८ ॥ ततः कृष्णरामौ द्विजत्वं प्राप्य स्वकुलाचार्याद्गर्गाद्ब्रह्मचर्यव्रतं स्वीकृतवंतौ ॥ २९ ॥ ततः सर्वज्ञौ सर्वविद्याप्रवर्तकौ जगदीश्वरावपि तौ ॥ ३० ॥ गुरुकुले वासमिच्छंतौ संतौ अवंतिपुरस्थं काशगोत्रोत्पन्नं सांदीपनिं नाम गुरुमुपजग्मतुः ॥ ३१ ॥ ततस्तौ गुरौ वर्तनमन्यान् ग्राहयंतौ संतौ गुरुं भक्त्या देवमिव सेवितवंतौ ॥३२॥ तयोस्तुष्टो गुरुः शिक्षाद्यंगैरुपनिषद्भिश्च सहितान् चतुरो वेदान् प्रोवाच ॥३३॥ धनुर्वेदं धर्मशास्त्राणि मीमांसां तर्कविद्यां षड्विधां[1] राजनीतिं च प्रोवाच ॥ ३४ ॥ तदा सर्वविद्याप्रवर्तकौ तौ एकवारं गुरोरुच्चारणमात्रेण सर्वं जगृहतुः ॥ ३५ ॥ ततश्चतुःषष्ट्याहोरात्रैर्गीतवाद्यनृत्यादयश्चतुःषष्टिकला[2]श्चतुर्दश विद्याश्च जगृहतुः ॥ ततो रामकृष्णौ गुरुं दक्षिणार्थमुपलोभितवंतौ ॥३६॥ तदा गुरुस्तयोरद्भुतं महिमानं दृष्ट्वा पत्न्या सह विचार्य प्रभासक्षेत्रे समुद्रे मृतं बालं वरयामास॥३७॥तदा तथेत्युक्त्वा तौ रथमारुह्य प्रभासे समुद्रतटे गत्वा स्थितौ ॥ तदा तावीश्वराविति ज्ञात्वा समुद्रस्तयोः पूजनं चकार ॥३८॥ तं कृष्ण आह । हे सिंधो, त्वया यो मद्गुरुबाल इहोर्मिणा ग्रस्तः स दीयताम् ॥ ३९ ॥ ॥ ॥

इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥ २५॥ अथ शूरसुतो राजन्पुत्रयोः समकारयत् ॥ पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिम् ॥ २६ ॥ तेभ्योऽदाद्दक्षिणा गावो रुक्ममालाः स्वलंकृताः ॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः ॥२७॥ याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ॥ ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥२८॥ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ॥ गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ ॥२९॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ॥ नान्यसिद्धामलज्ञानं गूहमानौ नरेहितैः ॥ ३० ॥ अथो गुरुकुले वासमिच्छंतावुपजग्मतुः ॥ काश्यं सांदीपनिं नाम ह्यवंतिपुरवासिनम् ॥ ३१ ॥ यथोपसाद्य तौ दांतौ गुरौ वृत्तिमनिंदिताम् ॥ ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ॥ प्रोवाच वेदानखिलान्सांगोपनिषदो गुरुः ॥ ३३ ॥ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ॥ तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥ ३४ ॥ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ॥ सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ॥ ३५ ॥ अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ॥ गुरुदक्षिणयाऽऽचार्यं छंदयामासतुर्नृप ॥ ३६ ॥ द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिम् ॥ संमंत्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयांबभूव ह ॥ ३७ ॥ तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरंतविक्रमौ ॥ वेलामुपव्रज्य निषीदतुः क्षणं सिंधुर्विदित्वार्हऽणमाहरत्तयोः॥ ३८ ॥ तमाह भगवानाशु गुरुपुत्रः प्रदीयताम् ॥ योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥ ॥ ॥

---

[1] संधिश्च विग्रहो यानमासनं द्वैधमाश्रय इत्येवं षड्विधाम्। [2] ऋग्वेदादयश्चत्वारो वेदाः । शिक्षादीनि षडंगानि । मीमांसादीनि चत्वार्युपांगानि । एवं चतुर्दश विद्याः ।

समुद्र उवाच ॥ हे देव, अहं बालं नाहार्षम् । किंतु ममांतर्जले पंचजननामा शंखरूपधरोऽसुर आस्ते॥४०॥ तेन नूनं हृतः । तच्छ्रुत्वा प्रभुर्जलं प्रविश्य दैत्यं हत्वा तदुदरे बालं नापश्यत् ॥ ४१ ॥ ततस्तदंगजं शंखमादाय रथमागमत् । ततः संयमिनीं यमपुरीं गत्वा ॥ ४२ ॥ सरामः कृष्णः शंखं दध्मौ । तं नादं श्रुत्वा यमः ॥४३॥ तयोर्महापूजां कृत्वा सर्वभूतहृदयनिवासं कृष्णं जगाद । हे विष्णो, हे राम, युवयोः किं करवाम ॥४४॥श्रीभगवानुवाच ॥ हे यम, स्वकर्मबद्धस्त्वद्दूतैरिहानीतो गुरुपुत्रो मदाज्ञया त्वया प्रत्यर्प्यताम् ॥४५॥ तथेति तेन प्रत्यर्पितं बालं गृहीत्वा गुरवे दत्वा रामकृष्णौ पुनर्वरं वृणीष्वेत्यूचतुः ॥४६॥ ततो गुरुराह । हे वत्सौ, युवाभ्यां गुरुदक्षिणा सम्यक् संपादिता । युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्टः स्यान्न कोऽपि ॥४७॥ अतो हे वीरौ,

समुद्र उवाच ॥ नैवाहार्षमहं देव दैत्यः पंचजनो महान् ॥ अंतर्जलचरः कृष्ण शंखरूपधरोऽसुरः ॥ ४० ॥ आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः ॥ जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकम् ॥ ४१ ॥ तदंगप्रभवं शंखमादाय रथमागमत् ॥ ततः संयमनीं नाम यमस्य दयितां पुरीम् ॥४२॥ गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ॥ शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः ॥४३॥ तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहिताम् ॥ उवाचावनतः कृष्णं सर्वभूताशयालयम् ॥ लीलामनुष्य हे विष्णो युवयोः करवाम किम् ॥४४॥ श्रीभगवानुवाच ॥ गुरुपुत्रमिहानीतं निजकर्मनिबंधनम् ॥ आनयस्व महाराज मच्छासनपुरस्कृतः ॥ ४५ ॥ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ ॥ दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४६ ॥ गुरुरुवाच ॥ सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः ॥ को नु युष्मद्विधगुरोः कामानामवशिष्यते ॥४७॥ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ छंदांस्ययातयामानि भवंत्विह परत्र च ॥४८॥ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ॥ आयातौ स्वपुरं तात पर्जन्यनिनदेन वै॥४९॥ समनंदन्प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ ॥ अपश्यंत्यो बह्वहानि नष्टलब्धधना इव ॥५०॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे गुरुपुत्रानयनं नाम पंचचत्वारिंशोऽध्यायः ॥४५॥ श्रीशुक उवाच॥ वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा॥ शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥ तमाह भगवान्प्रेष्ठं भक्तमेकांतिनं क्वचित्॥ गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह ॥ गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ॥ ३ ॥ ॥

युवां स्वगृहं गच्छतम् । वां कीर्तिः पावनी भवतु । तथेह परत्र च वेदा अगतसाराः संतु ॥४८ ॥ एवं गुरुणानुज्ञातौ तौ वायुवेगेन मेघनादेन रथेन मथुरां प्राप्तौ ॥४९ ॥ तौ दृष्ट्वा बहूनि दिनानि न पश्यंत्यः प्रजा नष्टलब्धधना इवानंदं प्रापुः ॥५०॥ इति श्रीमद्भा० चू० दश० पूर्वार्धे पंचचत्वारिंशोऽध्यायः॥४५॥ षट्चत्वारिंशके घोषमुद्धवं प्रेष्य तद्गिरा । यशोदानंदयोश्चक्रे कृष्णः शोकापनोदनम् ॥१॥ श्रीशुक उवाच ॥ हे नृप, यादवानां श्रेष्ठो बृहस्पतेः शिष्यो बुध्यातिश्रेष्ठ उद्धवः कृष्णस्यातिप्रियो मित्र आसीत् ॥ १ ॥ तमेकांतिनं प्रियं भक्तं हरिर्हस्तेन हस्तं गृहीत्वाऽऽह ॥ २ ॥ हे उद्धव, त्वं व्रजं गत्वा, आवयोः पित्रोः प्रीतिं कुरु । गोपीनां च मम वियोगजं दुःखं मत्संदेशैर्दूरीकुरु ॥ ३ ॥ ॥ ॥

यतस्ता अहमेव प्राणो यासां ता मदर्थे च त्यक्तपतिपुत्राद्याः (मामेव प्रियमात्मानं मनसा प्राप्ताः संति) ये मदर्थे त्यक्तलोकधर्मास्तानहं सुखयामि ॥४॥ अतिप्रिये मयि दूरस्थे सति मां स्मरंत्यो मदात्मिकास्ता गोप्योऽतिमुह्यंति ॥५॥ गोकुलनिर्गमनसमये शीघ्रमहमागमिष्यामीति मम प्रत्यागमनसंदेशैरतिदुःखेन प्राणान् धारयंति ॥६॥ श्रीशुक उवाच । एवमुक्त उद्धवो रथमारुह्य सूर्यास्तसमये प्रविशतां खुररजोभिश्छन्नरजः सन् गोकुलं प्राप्तः ॥ ७ ॥ ८ ॥ कथंभूतं गोकुलम् । पुष्पवतीनां गवां निमित्तं युद्ध्यद्भिर्मत्तैर्वृषैस्तथा स्ववत्सान् धावंतीभिर्गोभिर्नादितम् ॥ ९ ॥ इतस्तत उत्पतद्भिर्वत्सैर्मंडितम् ॥ किंच । गोदोह[1]शब्दैर्वेणूनां निःस्वनेन च मंडितम् ॥१०॥ रामकृष्णयोः कर्माणि गायंतीभिर्गोपीभिर्गोपैश्च विराजितम् ॥११॥ अग्निसूर्यातिथिगोब्राह्मणपितृदेवादीनां पूजान्वितैर्धूपदीपादिभिश्च युक्तैर्गोपगृहैर्मनोरमम् ॥१२॥ सर्वतः पुष्पितवनं भ्रमरपक्षिनादितम् ॥१३॥ एवंभूतं गोकुलं प्राप्तमुद्धवं दृष्ट्वा नंदः प्रीतः सन् तमालिंग्य वासुदेवबुद्ध्या पूजयामास ॥१४॥ ततः पायसादिना भोजितं शय्यायामुपविष्टं पादसंवाहनादिना विश्रांतं तं नंदः पप्रच्छ॥१५॥ हे उद्धव, नः सखा वसुदेवः पुत्रादिभिर्युक्तः सन् सुखी आस्ते कच्चित् ॥१६॥ किंच । पापः कंसः स्वेन पापेन मृतः एतद्दिष्ट्या । यो यदूनां सदा द्वेष्टा आस ॥१७॥ कृष्ण आवां पितरौ सखीन् गोपान् गोकुलं गा वृंदावनं गोवर्धनं च स्मरति किम् ॥१८॥ गोविंदः स्वजनान् सकृद्द्रष्टुमेष्यति किम् । तर्हि तन्मुखं द्रक्ष्यामः ॥ १९ ॥ ॥

ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ॥ (मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ॥) ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहम् ॥ ४ ॥ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥ स्मरंत्योऽङ्ग विमुह्यंति विरहौत्कंठ्यविह्वलाः ॥ ५ ॥ धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन ॥ प्रत्यागमनसंदेशैर्बल्लव्यो मे मदात्मिकाः ॥ ६ ॥ श्रीशुक उवाच ॥ इत्युक्त उद्धवो राजन्संदेशं भर्तुराहृतः ॥ आदाय रथमारुह्य प्रययौ नंदगोकुलम् ॥ ७ ॥ प्राप्तो नंदव्रजं श्रीमान्निम्लोचति विभावसौ ॥ छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ८ ॥ वासितार्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः ॥ धावंतीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ॥ ९ ॥ इतस्ततो विलंघद्भिर्गोवत्सैर्मंडितं सितैः ॥ गोदोहशब्दाभिरवं वेणूनां निःस्वनेन च ॥ १० ॥ गायंतीभिश्च कर्माणि शुभानि बलकृष्णयोः॥ स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितम्॥११॥ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः॥ धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ॥ १२ ॥ सर्वतः पुष्पितवनं द्विजालिकुलनादितम् ॥ हंसकारंडवाकीर्णैः पद्मषंडैश्च मंडितम् ॥ १३ ॥ तमागतं समागम्य कृष्णस्यानुचरं प्रियम् ॥ नंदः प्रीतः परिष्वज्य वासुदेवधियाऽर्चयत् ॥ १४ ॥ भोजितं परमान्नेन संविष्टं कशिपौ सुखम् ॥ गतश्रमं पर्यपृच्छत्पादसंवाहनादिभिः ॥ १५ ॥ कच्चिदंग महाभाग सखा नः शूरनंदनः ॥ आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥ १६ ॥ दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना ॥ साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा ॥१७॥ अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ॥ गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिम् ॥ १८ ॥ अप्यायास्यति गोविंदः स्वजनान्सकृदीक्षितुम् ॥ तर्हि द्रक्ष्यामस्तद्वक्त्रं सुनसं सुस्मितेक्षणम् ॥ १९ ॥ ॥

---

[1] मुंच मा मुंच नय आनय देहि गृहाणेत्यादिभिर्गोदोहसंबंधिभिः शब्दैः ।

किंच । कृष्णेन दावाग्नेर्वातवर्षादिभ्यो दुरतिक्रमेभ्यो मृत्युभ्यो वयं रक्षिताः स्मः॥२०॥अतस्तद्वीर्यलीलावलोकनहास्यभाषणानि स्मरतां नः सर्वक्रियाः शिथिला भवंति ॥२१॥ तथा कृष्णपदभूषितान् सरिच्छैलवनोद्देशान् वीक्षमाणानां नो मनस्तन्मयतां याति ॥२२॥ एतौ देवोत्तमौ देवकार्यार्थमिहावतीर्णौ इति मन्ये ॥२३॥ किंच । यौ रामकृष्णौ लीलया कुवलयापीडं गजं चाणूरमुष्टिकौ मल्लौ दशसहस्रगजबलं कंसं चावधिष्टाम् ॥२४॥ किंच । यः कृष्णस्तालत्रयमितं[1] धनुर्बभंज । एकेन हस्तेन च गिरिं सप्ताहं दधौ ॥२५॥ प्रलंबधेनुकवृषासुरतृणावर्तबकादयो याभ्यां हताः । अतस्तौ देवावेव स्तः ॥ २६ ॥ श्रीशुक उवाच ॥ एवं कृष्णं संस्मृत्य संस्मृत्य नंदोऽतिप्रेमविह्वलः सन् तूष्णीमभवत् ॥२७॥ एवं यशोदा पुत्रचरितानि श्रृण्वंती सती अश्रूणि मुमोच ॥२८॥ एवं कृष्णे यशोदानंदयोः प्रीतिं दृष्ट्वोद्धवो नंदमाह ॥२९॥ उद्धव उवाच । नूनं युवां मनुष्येष्वतिश्रेष्ठौ । यतो युवाभ्यामीदृशी बुद्धिर्हरौ कृतास्ति ॥३०॥ एतौ रामकृष्णौ निश्चयेन जगतो निमित्तोपादानरूपौ प्रधानपुरुषौ स्तः । किंच । एतौ भूतेष्वनुप्रविश्य नानाभेदयुक्तस्य ज्ञानस्य जीवस्य च नियंतारौ भवतः ॥ ३१ ॥ यस्मिन् जनः प्राणवियोगकाले क्षणं मन आवेश्य कर्मवासनां त्यक्त्वा स्वरूपज्ञानवान् सन् परां गतिं प्राप्नोति ॥ ३२ ॥ तस्मिन् मनुष्याकृतौ नारायणे युवां भक्तिं कुरुतः । अतो युवां कृतकृत्यौ ॥३३॥ हे नंद, स भगवान् कृष्णः स्वल्पेन कालेन गोकुलमेत्य युवयोः प्रियं करिष्यति ॥ ३४ ॥ ॥

दावाग्नेर्वातवर्षाच्च विषसर्पाच्च रक्षिताः ॥ दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥२०॥ स्मरतां कृष्णवीर्याणि लीलापांगनिरीक्षितम् ॥
हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः ॥२१॥ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्षमाणानां
मनो याति तदात्मताम् ॥२२॥ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा ॥२३॥ कंसं
नागायुतप्राणं मल्लौ गजपतिं तथा ॥ अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥२४॥ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ॥
बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिम् ॥२५॥ प्रलंबो धेनुकोऽरिष्टस्तृणावर्तो बकादयः ॥ दैत्याः सुराऽसुरजितो हता येनेह लीलया
॥२६॥ श्रीशुक उवाच ॥ इति संस्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः ॥ अत्युत्कंठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ॥ २७ ॥ यशोदा
वर्ण्यमानानि पुत्रस्य चरितानि च ॥ श्रृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा ॥२८॥ तयोरित्थं भगवति कृष्णे नंदयशोदयोः ॥
वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा ॥२९॥ उद्धव उवाच ॥ युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ
यत्कृता मतिरीदृशी ॥३०॥ एतौ हि विश्वस्य च बीजयोनी रामो मुकुंदः पुरुषः प्रधानम् ॥ अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य
चेशात इमौ पुराणौ ॥ ३१ ॥ यस्मिन्जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धम् ॥ निर्हृत्य कर्माशयमाशु याति परां
गतिं ब्रह्ममयोऽर्कवर्णः ॥३२॥ तस्मिन्भवंतावखिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ ॥ भावं विधत्तां नितरां महात्मन्किंवावशिष्टं
युवयोः सुकृत्यम् ॥ ३३ ॥ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ॥ प्रियं विधास्यते पित्रोर्भगवान्सात्वतां पतिः ॥ ३४ ॥

---

[1] नवशतहस्तपरिमितम् ।

किंच । कंसं हत्वा वः समीपमागत्य कृष्णो यदाह तदपि सत्यं करिष्यति ॥ ३५ ॥ हे महाभागौ, युवां कृष्णं समीपे द्रक्ष्यथः । यतः स सर्वभूतानामंतर्हृदये काष्ठेऽग्निरिवास्ते ॥ ३६ ॥ तस्य निरहंकारिणः कृष्णस्य प्रियोऽप्रिय उत्तमाधममध्यमाश्च न संति ॥ ३७ ॥ तस्य माता पिता भार्या पुत्रादयः स्वकीयः परकीयो देहः जन्म कर्म च न संति । तथापि स साधूनां रक्षणार्थं सात्विकराजसतामसयोनिषु प्रादुर्भवति ॥ ३८ ॥ ३९ ॥ स निर्गुणोऽपि सन् सत्वादीन् गुणान् सेवते । तैश्च विश्वं सृजति रक्षति संहरति च ॥ ४० ॥ हे नंद, भ्रमणं प्राप्तया दृष्ट्या भूमिरपि भ्राम्यतीव यथा प्रतीयते एवं चित्ते कर्तरि सति तत्राध्यासेनात्मा कर्तेव स्मृतः ॥ ४१ ॥ किंच । अयं हरिर्युवयोरेव पुत्रो नास्ति । किंतु सर्वेषामपि पुत्र आत्मा पिता माता ईश्वरश्चास्ति ॥ ४२ ॥

हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वताम् ॥ यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ ३५ ॥ मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमंतिके ॥ अंतर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३६ ॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियोऽवास्त्यमानिनः ॥ नोत्तमो नाधमो वापि समानस्यासमोऽपि वा ॥३७॥ न माता न पिता तस्य न भार्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥३८॥ न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु ॥ क्रीडार्थः सोऽपि साधूनां परित्राणाय कल्पते ॥३९॥ सत्वं रजस्तम इति भजते निर्गुणो गुणान् ॥ क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हंत्यजः ॥ ४० ॥ यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते ॥ चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥ ४१ ॥ युवयोरेव नैवायमात्मजो भगवान्हरिः ॥ सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥ दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च ॥ विनाच्युताद्वस्तुतरां न वाच्यं स एव सर्वं परमार्थभूतः ॥ ४३ ॥ एवं निशा सा ब्रुवतोर्व्यतीता नंदस्य कृष्णानुचरस्य राजन् ॥ गोप्यः समुत्थाय निरूप्य दीपान्वास्तून्समभ्यर्च्य दधीन्यमंथन् ॥४४॥ ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकंकणस्रजः ॥ चलन्नितंबस्तनहारकुंडलत्विषत्कपोलारुणकुंकुमाननाः ॥४५॥ उद्गायतीनामरविंदलोचनं व्रजांगनानां दिवमस्पृशद्ध्वनिः ॥ दध्नश्च निर्मंथनशब्दमिश्रितो निरस्यते येन दिशाममंगलम् ॥४६॥ भगवत्युदिते सूर्ये नंदद्वारि व्रजौकसः ॥ दृष्ट्वा रथं शातकौंभं कस्यायमिति चाब्रुवन् ॥ ४७ ॥ अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः ॥ येन नीतो मधुपुरीं कृष्णः कमललोचनः ॥ ४८ ॥ ॥

दृष्टं श्रुतं भूतं भविष्यं वर्तमानं अल्पं महच्च श्रीकृष्णाद्भिन्नं किमपि नास्ति । स एव सर्वेषां परमार्थरूपोऽस्ति ॥ ४३ ॥ हे राजन्, एवं नंदोद्धवयोर्ब्रुवतोः सतोः सा रात्रिर्गता । तदा गोप्य उत्थाय दीपान् प्रज्वाल्यांऽगणादीनभ्यर्च्य दधीनि ममंथुः ॥ ४४ ॥ तदा तां रज्जूर्विकर्षत्सु भुजेषु कंकणानां माला यासां ताश्चंचलनितंबस्तनहाराः सत्यो विरेजुः ॥ ४५ ॥ एवं गायंतीनां तासां शब्दो दधिमंथनशब्दमिश्रितः सन् स्वर्गं पस्पर्श । येन दिशां पापं नश्यति ॥ ४६ ॥ तावत्सूर्य उदिते सति नंदद्वारि सुवर्णमयं रथं दृष्ट्वा जनाः कस्यायं रथ इत्यादि जगदुः ॥ ४७ ॥ येन मथुरांप्रति कृष्णो नीतः स कंसार्थसाधकोऽक्रूर आगतः किम् ॥ ४८ ॥ ॥ ॥ ॥ ॥

किंच । अयमक्रूरः साधितेन कार्येण मृतस्य भर्तुरौर्ध्वदेहिकमस्मन्मांसैः पिंडान् कृत्वा साधयिष्यति किम् । एवं स्त्रीणां वदंतीनां सतीनामुद्धवो यमुनायां स्नानादिनियमं कृत्वाऽऽजगाम ॥४९॥ इति श्रीमद्भागवतचू० दश० पूर्वार्धे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ सप्तचत्वारिंशकेऽथ कृष्णादेशेन गोपिकाः । बोधयित्वोद्धवस्तत्त्वमनुज्ञाप्यागमत्पुरीम् ॥१॥ श्रीशुक उवाच ॥ ततो गोप्यो हरिदासं प्रलंबबाहुं पीतांबरं कमलमालिनं तं दृष्ट्वा ॥१॥ शुचिस्मिताः सत्यः कृष्णवेषभूषणः कोऽयं कस्य कुतो वा देशादागत इति वदंत्यस्तं सर्वतो वेष्टितवत्यः ॥२॥ ततश्च तमासने स्थितं हरेः संदेशहरं ज्ञात्वा रहसि पप्रच्छुः ॥ ३ ॥ हे उद्धव, त्वां हरेः सेवकमागतं वयं जानीमः । इह कृष्णेन यशोदानंदयोः प्रियं कर्तुं भवान् प्रेषितः किम् ॥४॥ अन्यथा तस्य गोकुले स्मरणीयं न पश्यामः ।

किं साधयिष्यत्यस्माभिर्भर्तुः प्रीतस्य निष्कृतिम् ॥ इति स्त्रीणां वदंतीनामुद्धवोऽगात्कृताह्निकः ॥४९॥ इति श्रीम० महा० दश० पू० नंदशोकापनयनं नाम षट्चत्वारिंशोऽध्यायः ॥४६॥ श्रीशुक उवाच ॥ तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनम् ॥ पीतांबरं पुष्करमालिनं लसन्मुखारविंदं मणिमृष्टकुंडलम् ॥१॥ शुचिस्मिताः कोऽयमपीच्यदर्शनः कुतश्च कस्याच्युतवेषभूषणः ॥ इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयम् ॥२॥ तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः ॥३॥ जानीमस्त्वां यदुपतेः पार्षदं समुपागतम् ॥ भर्त्रेह प्रेषितः पित्रोर्भवान्प्रियचिकीर्षया ॥४॥ अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे ॥ स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः ॥ ५ ॥ अन्येष्वर्थकृता मैत्री यावदर्थविडंबनम् ॥ पुंभिः स्त्रीषु कृता यद्वत्सुमनस्स्विव षट्पदैः ॥६॥ निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः ॥ अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥७॥ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ॥ दग्धं मृगास्तथाऽरण्यं जारो भुक्त्वा रतां स्त्रियम् ॥८॥ इति गोप्यो हि गोविंदे गतवाक्कायमानसाः ॥ कृष्णदूते व्रजं याते उद्धवे त्यक्तलौकिकाः ॥९॥ गायंत्यः प्रियकर्माणि रुदत्यश्च गतह्रियः ॥ तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥१०॥ काचिन्मधुकरं दृष्ट्वा ध्यायंती कृष्णसंगमम् ॥ प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ११ ॥ गोप्युवाच ॥ मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः ॥ वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडंब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥ ॥

मातृपित्रादीनां स्नेहसंबंधस्तु मुनेरपि दुस्त्यजोऽस्ति ॥ ५ ॥ बंधुभ्योऽन्येषु मैत्री कार्यनिमित्ता सती अनुकरणमात्रं न सत्या । पुष्पेषु भ्रमराणामिव ॥ ६ ॥ अस्यैव विस्तारः । वेश्या निर्द्रव्यं पुरुषं त्यजंति । प्रजा असमर्थं राजानं त्यजंति । प्राप्तविद्याः शिष्या गुरुं त्य० । ऋत्विजो दत्तदक्षिणं यजमानं त्य० ॥ ७ ॥ पक्षिणो निष्फलं वृक्षं त्य० । अतिथयो भुक्त्वा गृहं त्यजंति । मृगा दग्धं वनं त्य० । जारो रतां स्त्रियं भुक्त्वा त्यजति ॥ ८ ॥ एवं गोप्यो गोविंदे गतवाक्कायमानसाः त्यक्तलौकिकाः सत्यः ॥९॥ हरेः कर्माणि संस्मृत्य संस्मृत्य गायंत्यो रुदंत्यश्च सत्यस्तमुद्धवमपृच्छन् ॥१०॥ तावत्काचिद्गोपी भ्रमरं दृष्ट्वा कृष्णेन प्रस्थापितं दूतं कल्पयित्वा जगाद ॥ ११ ॥ गोप्युवाच ॥ हे धूर्तबंधो, भ्रमर, त्वं मम पादं मा स्पृश । यतस्त्वं सपत्न्याः कुच-

संमर्दितकृष्णमालायाः कुंकुमयुतश्मश्रुभिर्युक्तोऽसि । किंतु । तव स सखा तासामेव स्त्रीणां प्रसादं वहतु ॥ १२ ॥ स कृष्णः स्वकीयमधरामृतं सकृत्पाययित्वा नस्तत्यजे । एवंभूतस्य तस्य चरणकमलं लक्ष्मीः कथं सेवते । ज्ञातं मया । सा भगवतो मिथ्याकथाभिर्मोहितचित्ता जाता ॥ १३ ॥ हे भ्रमर, त्वमिह कृष्णं किमिति बहु गायसि । या इदानीं तत्प्रियास्तदग्रे तत्कथा गीयताम् । ता एव तवापेक्षितं दास्यंति ॥१४॥ किंच । तस्य हरेस्त्रैलोक्ये दुरापाः स्त्रियः काः । न का अपि । यस्य चरणरजो लक्ष्मीः सेवते तत्र वयं काः । तथापि दीनदयालोरेवोत्तमश्लोकशब्दो भवति । एवं तदग्रे त्वया कथनीयम् ॥१५॥ हे भ्रमर, मे शिरसि स्थापितं पादं विसृज । कृष्णाच्छिक्षित्वाऽऽगत्य प्रियोक्तिभिः प्रार्थनाचतुरस्य तव सर्वं कपटमहं वेद्मि। कृष्णवत्त्वमपि न विश्वसनीयः। अहो या वयं

सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान्भवादृक् ॥ परिचरति कथं तत्पादपद्मं तु पद्मा ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥१३॥ किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ॥ विजयसख सखीनां गीयतां तत्प्रसंगः क्षपितकुचरुजस्ते कल्पयंतीष्टमिष्टाः ॥ १४ ॥ दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृंभस्य याः स्युः ॥ चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ १५ ॥ विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुंदात् ॥ स्वकृत इह विसृष्टापत्यपत्यन्यलोका व्यसृजदकृतचेताः किं नु संधेयमस्मिन् ॥ १६ ॥ मृगयुरिव कपींद्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ॥ बलिमपि बलिमत्त्वाऽवेष्टयद्ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः॥१७॥ यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्मा विनष्टाः॥ सपदि गृहकुटुंबं दीनमुत्सृज्य दीना बहव इह विहंगा भिक्षुचर्यां चरंति ॥ १८ ॥ वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः ॥ ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमंत्रिन्भण्यतामन्यवार्ता ॥ १९ ॥ प्रियसख पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरुंधे माननीयोऽसि मेंऽग ॥ नयसि कथमिहास्मान्दुस्त्यजद्वंद्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥ २० ॥ अपि बत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते स्मरति स पितृगेहान्सौम्य बंधूंश्च गोपान् ॥ क्वचिदपि स कथा नः किंकरीणां गृणीते भुजमगुरुसुगंधं मूर्ध्न्यधास्यत्कदा नु ॥ २१ ॥ ॥ ॥

त्यक्तपतिपुत्रास्ता नो यः कृष्णस्तत्याज । अधुना तेन सहैक्यं कृत्वा किं कर्तव्यम् । न किमपि ॥१६॥ किंच । यो रामावतारे वालिनं लुब्धक इव विव्याध । तथा स्त्रीजितः सन् शूर्पणखां विरूपां चक्रे । वामनावतारेऽपि बलेः सकाशात्पूजां गृहीत्वा तं बलिं वारुणपाशैर्बबंध । तस्य कृष्णस्य सख्यैरलम् । परंतु तत्कथार्थो दुस्त्यजः ॥१७॥ यस्य चरितलीलामृतलेशस्यैकवारं सेवनाद्गतरागद्वेषादिधर्मा बहवः परमहंसा गृहसहितं कुटंबं हित्वा भोगहीनाः संतः प्राणवृत्तिमात्रं चरंति ॥१८॥ हे दूत, वयं तस्यानृतं वचः सत्यमिव श्रद्दधानाः सत्यः तन्नखस्पर्शेन प्राप्ततीव्रमदनपीडा भूत्वा वारंवारमेतद्दुःखं दृष्टवत्यः स्मः। अतः कृष्णकथां विनान्यवार्ता कथ्यताम् ॥१९॥ हे भ्रमर, त्वं कृष्णेन प्रेषितः किम् । किं प्राप्तुमिच्छसि तद्वरय । हे दूत, कथमस्मान् कृष्णसमीपं नेष्यसि ॥ २० ॥ हे द्विरेफ, श्रीकृष्णो गुरुकुलादागत्य

मथुरां वर्तते कच्चित् । सोऽस्माकं वार्तां ब्रूते किम् । स च स्वभुजं नो मस्तके कदा धास्यति ॥२१॥ श्रीशुक उवाच । एवं श्रुत्वोद्धवः कृष्णसंदेशैस्ता गोपीः सांत्वयन् समजगाद ॥२२॥ उद्धव उवाच ॥ हे गोप्यः, यूयं कृतार्थाः पूज्याः स्थ । यासां वो मनो भगवति वासुदेवे समर्पितमस्ति ॥२३॥ दानव्रततपोहोमा [illegible] नैः कृष्णे भक्तिरेव साध्यते ॥२४॥ हे गोप्यः । भवतीभिः कृष्णे याऽतिश्रेष्ठा भक्तिः प्रवर्तिता सा मुनीनामपि दुर्लभास्ति ॥२५॥ भवतीभिः पती [illegible] हित्वा यः श्रीकृष्णः परः पुरुषो वृतः एतद्भद्रं जातम् ॥२६॥ हे महाभागाः, युष्माकं भगवति विरहेण यत्प्रेमसुखं प्राप्तं तद्दर्शयित्वा युष्माभिर्ममोपरि महाननुग्रहः कृतः ॥२७॥ अतः परं हे कल्याण्यः, यं कृष्णसंदेशं गृहीत्वाऽहमत्रागतस्तं मत्तः श्रूयताम् ॥२८॥ श्रीभगवानुवच ॥ हे गोप्यः, युष्माकं

श्रीशुक उवाच ॥ अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ॥ सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत ॥२२॥ उद्धव उवाच ॥ अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ॥ वासुदेवे भगवति यासामित्यर्पितं मनः ॥२३॥ दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥२४॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ॥ भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा ॥२५॥ दिष्ट्या पुत्रान्पतीन्देहान्स्वजनान्भवनानि च ॥ हित्वा वृणीत यूयं यत्कृष्णाख्यं पुरुषं परम् ॥२६॥ सर्वात्मभावोऽधिकृतो भवतीनामधोक्षजे ॥ विरहेण महाभागा महान्मेऽनुग्रहः कृतः ॥२७॥ श्रूयतां प्रियसंदेशो भवतीनां सुखावहः ॥ यमादायागतो भद्रा अहं भर्तू रहस्करः ॥२८॥ श्रीभगवानुवाच ॥ भवतीनां वियोगो मे नहि सर्वात्मना क्वचित् ॥ यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ॥ तथाहं च मनःप्राणभूतेंद्रियगुणाश्रयः ॥२९॥ आत्मन्येवात्मनाऽऽत्मानं सृजे हन्म्यनुपालये ॥ आत्ममायानुभावेन भूतेंद्रियगुणात्मना ॥ ३० ॥ आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ॥ सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३१ ॥ येनेंद्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः ॥ तन्निरुंध्यादिंद्रियाणि विनिद्रः प्रत्यपद्यत ॥ ३२ ॥ एतदंतः समाम्नायो योगः सांख्यं मनीषिणाम् ॥ त्यागस्तपो दमः सत्यं समुद्रांता इवापगाः ॥ ३३ ॥ यत्त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशाम् ॥ मनसः संनिकर्षार्थं मदनुध्यानकाम्यया ॥ ३४ ॥ यथा दूरचरे प्रेष्ठे मन आविश्य वर्तते ॥ स्त्रीणां च न तथा चेतः संनिकृष्टेऽक्षगोचरे ॥ ३५ ॥ ॥

सर्वात्मना मया सह क्वापि वियोगो नास्ति । यथा पृथिव्यादीनि भूतानि चराचरेषु भूतेषु संति तथाहमुपादानकारणत्वेन सर्वकार्येषु स्थितोऽस्मि ॥ २९ ॥ अहं मायासामर्थ्येनात्मन्येव भूतेंद्रियगुणरूपेणात्मनाऽऽत्मानं सृजे पालये हन्मि च ॥ ३० ॥ आत्मा तु शुद्धः ज्ञानमयोऽस्ति । स मायाकार्यरूपैर्मनोवृत्तिभिर्विश्वतैजसप्राज्ञरूपेण प्रतीयते ॥३१॥ किंच । पुरुषो येन मनसा विषयान् चिंतयति प्राप्नोति च तन्मन आलस्यरहितः सन् स्वाधीनं कुर्यात् ॥३२॥ मनोनिग्रहपर्यवसाना एव वेदः योगः सांख्यं त्यागतपोदमाश्च संति यथा समुद्रपर्यवसाना नद्यस्तद्वत् ॥ ३३ ॥ अहं युष्माकं दृष्टीनां यद्दूरे तिष्ठामि तन्मदनुध्यानेन मनसः सन्निकर्षार्थम् ॥ ३४ ॥ यथा दूरचरेऽतिप्रिये मनः प्रविश्य निश्चलं तिष्ठति तथा समीपस्थिते न तिष्ठति ॥ ३५ ॥ ॥

---

१ भगवत्प्रेमसुखं दृष्ट्वाहमपि कृतार्थो जातोऽस्मीति भावः ।

अतो यूयं मयि मनो निधाय मां स्मरंत्यः शीघ्रं मां प्राप्स्यथ ॥३६॥ किंच। हे कल्याण्यः, रासक्रीडासमये स्वपतिभिः प्रतिबद्धा या गोप्यस्ता गोकुलस्थिता एव मच्चिंतया तदैव मत्स्वरूपं प्रापुः ॥३७॥ श्रीशुक उवाच ॥ एवं कृष्णसंदेशमुद्धवमुखतः श्रुत्वा प्रीता गोप्य उद्धवं प्राहुः ॥३८॥ गोप्य ऊचुः । हे उद्धव, पापी कंसः कृष्णेन हतः एतद्भद्रं जातम् । तथा प्राप्तसर्वमनोरथैर्यादवैः सह कृष्णोऽधुना सुखी आस्ते एतदपि समीचीनम् ॥३९॥ अधुना कृष्णः सलज्जहास्यादिभिर्मथुरास्त्रीणां प्रीतिं करोति किम्॥४०॥अन्या ऊचुः॥ अहो रतिविशेषज्ञः सः पुरस्त्रीणां वाक्यैर्विलासैश्च तासु कथमासक्तो न भवेत्। अपितु भवेदेव॥४१॥ अपरा ऊचुः। हे साधो, पुरस्त्रीणां वार्तामध्ये कदाचित् कृष्णो नः स्मरति किम्॥४२॥अन्या ऊचुः । यासु रात्रिष्वस्माभिः सह कृष्णो वृंदावने रेमे ।ता रात्रीः

मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत्॥ अनुस्मरंत्यो मां नित्यमचिरान्मामुपैष्यथ ॥३६॥ या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः ॥ अलब्धरासाः कल्याण्यो माऽपुर्मद्वीर्यचिंतया ॥३७॥ श्रीशुक उवाच ॥ एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः ॥ ता ऊचुरुद्धवं प्रीतास्तत्संदेशागतस्मृतीः ॥३८॥ गोप्य ऊचुः ॥ दिष्ट्याऽहितो हतः कंसो यदूनां सानुगोऽघकृत् ॥ दिष्ट्याप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना ॥ ३९ ॥ कच्चिद्गदाग्रजः सौम्य करोति पुरयोषिताम् ॥ प्रीतिं नः स्निग्धसव्रीडहासोदारेक्षणार्चितः ॥ ४० ॥ कथं रतिविशेषज्ञः प्रियश्च वरयोषिताम् ॥ नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानुभाजितः ॥ ४१ ॥ अपि स्मरति नः साधो गोविंदः प्रस्तुते क्वचित् ॥ गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वैरकथांतरे॥४२॥ ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृंदावने कुमुदकुंदशशांकरम्ये ॥ रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित्॥४३॥अप्येष्यतीह दाशार्हस्तप्ताः स्वकृतया शुचा ॥ संजीवयन्नु नो गात्रैर्यथेंद्रो वनमंबुदैः॥४४॥कस्मात्कृष्ण इहायाति प्राप्तराज्यो हताहितः ॥ नरेंद्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ॥४५॥ किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ॥ श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः॥४६॥ परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिंगला ॥ तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ॥४७॥ क उत्सहेत संत्यक्तुमुत्तमश्लोकसंविदम् ॥ अनिच्छतोऽपि यस्य श्रीरंगान्न च्यवते क्वचित् ॥४८॥ सरिच्छैलवनोद्देशा गावो वेणुरवा इमे ॥ संकर्षणसहायेन कृष्णेनाचरिताः प्रभो ॥ ४९ ॥ पुनः पुनः स्मारयंति नंदगोपसुतं बत ॥ श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ॥ ५० ॥

क्वचित्स्मरति किम् ॥४३॥ किंच । कृष्णः स्वनिमित्तेन शोकेन तप्ता नो हस्तस्पर्शादिभिर्जीवयन् पुनरिहागच्छति किम् ॥४४॥ इतरा ऊचुः । अहो कस्मात्स इहागच्छति । यतो महदैश्वर्यं प्राप्तः । तेन राजकन्याश्च परिणीताः॥४५॥अन्या ऊचुः। पूर्णकामस्य तस्य श्रीपतेर्वनचरीभिरस्माभिरन्याभिर्वा राजकन्याभिः कः कार्यभागः साध्योऽस्ति न कोऽपि ॥४६॥ किंच। कामचारिण्यपि पिंगला नैराश्यं परं सौख्यमाह । तज्जानतीनामपि नः कृष्णे आशाऽतिरिक्ता वर्तते किं कुर्मः ॥४७॥ तस्यैकांतवार्तां त्यक्तुं कः पुमान् समर्थो भवेन्न कोऽपि । यस्य वक्षःस्थले लक्ष्मीरपि निरंतरं तिष्ठति ॥४८॥ हे उद्धव, एते नदीपर्वतवनोद्देशा गावो वेणुनादाश्च रामकृष्णाभ्यां सेविताः संति । ते मुहुर्मुहुरस्माकं श्रीकृष्णं स्मारयंति । अतस्तं विस्मर्तुं न शक्नुमः ॥४९॥५०॥ ॥

गत्या ललितयोदारहासलीलावलोकनैः ॥ माध्व्या गिरा हृतधियः कथं तं विस्मरामहे ॥ ५१ ॥ हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ॥ मग्नमुद्धर गोविंद गोकुलं वृजिनार्णवात् ॥५२॥ श्रीशुक उवाच ॥ ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वराः ॥ उद्धवं पूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजम् ॥५३॥ उवास कतिचिन्मासान्गोपीनां विनुदन् शुचः ॥ कृष्णलीलाकथां गायन्रमयामास गोकुलम् ॥५४॥ यावंत्यहानि नंदस्य व्रजेऽवात्सीत्स उद्धवः ॥ व्रजौकसां क्षणप्रायाण्यासन्कृष्णस्य वार्तया ॥५५॥ सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् ॥ कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसाम् ॥५६॥ दृष्ट्वैवमादि गोपीनां कृष्णावेशात्मविक्लवम् ॥ उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥५७॥ एताः परं तनुभृतो भुवि गोपवध्वो गोविंद एव निखिलात्मनि रूढभावाः ॥ वांछंति यद्भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनंतकथारसस्य ॥५८॥ क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः ॥ नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥५९ ॥ नायं श्रियोंऽग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोऽन्याः ॥ रासोत्सवेऽस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद्व्रजवल्लवीनाम् ॥६० ॥ आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि गुल्मलतौषधीनाम् ॥ या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्याम् ॥६१॥ या वै श्रियार्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ॥ कृष्णस्य तद्भगवतश्चरणारविंदं न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥६२॥ वंदे नंदव्रजस्त्रीणां पादरेणुमभीक्ष्णशः॥ यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ६३॥ श्रीशुक उवाच ॥ अथ गोपीरनुज्ञाप्य यशोदां नंदमेव च ॥ गोपानामंत्र्य दाशार्हो यास्यन्नारुरुहे रथम् ॥ ६४ ॥ ॥

हरेर्गतिहास्यावलोकनादिभिर्हृतबुद्धयो वयं कथं तं विस्मरामः ॥५१॥ हे नाथ, हे रमानाथ, हे गोकुलनाथ, हे दुःखनाशक, त्वं दुःखसमुद्रे निमग्नं गोकुलमुद्धर ॥५२॥ श्रीशुक उवाच ॥ ततस्ताः कृष्णसंदेशैः श्रीकृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं ज्ञात्वोद्धवं पूजयांचक्रुः॥५३॥ तत उद्धवस्तत्र कतिचिन्मासान् स्थित्वा कृष्णलीलां गायन् गोकुलं रमयामास ॥५४॥ उद्धवो यावंति दिनानि तत्र स्थितस्तावंति दिनानि व्रजौकसां क्षणप्रायाण्यासन् ॥५५॥ एवं कृष्णसेवकः सरिद्वनपर्वतवृक्षान् दृष्ट्वा तेषु प्रत्येकं व्रजौकसां श्रीकृष्णं लीलासंप्रश्नादिभिः स्मारयन् रेमे ॥ ५६ ॥ हे नृप, एवं गोपीनां कृष्णावेशेन मनोवैक्लव्यं दृष्ट्वा परमप्रीत उद्धवस्ता नमस्यन्निदमुवाच ॥५७॥ इह भुवि गोपस्त्रिय एव सफलजन्मानः । यतः कृष्णे परमप्रेमवत्यः । यत्प्रेम मुमुक्षवो मुक्ता वयं भक्ताश्चेच्छामः ॥५८॥ किंच। इमा व्यभिचारदुष्टा वनचरीः स्त्रियः क्व । कृष्णे दृढभावश्च क्व । अथापि भगवान् भजतः पुंसः परमं कल्याणं करोति । अज्ञात्वापि सेवितममृतं यथाऽमरत्वं संपादयति तद्वत् ॥५९॥ अयं भगवतः प्रसादो लक्ष्म्या देवस्त्रीणामपि न प्राप्तः । यो रासोत्सवे व्रजगोपीनां प्राप्तः ॥६०॥ अतएव गोपीपादरजःसेविनां वृक्षलतादीनां मध्येऽहं किमपि स्यामितीच्छामि ॥६१॥ किंच। या गोप्यो हरेश्चरणकमलं ब्रह्मादिभिरर्चितं योगिभिश्च हृदये स्थापितं तत्स्तनेषु धारयित्वाऽऽलिंग्य तापं जहुः ॥६२॥ अत एव नंदव्रजस्त्रीणां पादरेणुमहं वंदे। यासां हरिकथोद्गीतं जगत्पुनाति ॥६३॥ श्रीशुक उवाच॥ अथोद्धवो गोपीर्यशोदां

नंदं गोपांश्चाज्ञाप्य मथुरां गमिष्यन् सन् रथमारुरोह ॥६४॥ ततो नानोपायनपाणयो नंदादयो गोपाः प्रेम्णाऽश्रुनेत्राः संत ऊचुः ॥ ६५ ॥ हे उद्धव, अस्माकं मनसो वृत्तयः कृष्णचरणकमलाश्रया भवेयुः । तथा वाचः कृष्णनामसंकीर्तनं कुर्वंत्यः संतु । देहश्च कृष्णनमस्कारादिषु तत्परोऽस्तु ॥६६॥ किंच । कर्मभिर्देवमनुष्यादियोनिषु यत्रकुत्रापि भ्राम्यमाणानामस्माकं जन्मांतरकृतैर्मंगलाचरणैः कृष्णे प्रीतिरस्तु ॥६७॥ एवं नंदादिभिर्गोपैः कृष्णभक्त्या सत्कृत उद्धवः पुनर्मथुरामागच्छत् ॥६८॥ तत उद्धवः कृष्णं प्रणिपत्य व्रजौकसां भक्त्युद्रेकं कथयामास । उग्रसेनवसुदेवरामेभ्यश्चोपायनानि ददौ ॥६९॥ इति श्रीमद्भाग० चू० दश० पूर्वा० सप्तचत्वारिंशोऽध्यायः ॥४७॥ ॥ अष्टचत्वारिंशकेऽथ कृष्णः कुब्जामरीरमत् । अक्रूरस्य गृहं गत्वा तं गजाह्वयमादिशत् ॥ १ ॥ श्रीशुक

तं निर्गतं समासाद्य नानोपायनपाणयः ॥ नंदादयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥६५॥ मनसो वृत्तयो नः स्युः कृष्णपादांबुजाश्रयाः ॥ वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥ ६६ ॥ कर्मभिर्भ्राम्यमाणानां यत्रक्वापीश्वरेच्छया ॥ मंगलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥६७॥ एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप ॥ उद्धवः पुनरागच्छन्मथुरां कृष्णपालिताम् ॥६८॥ कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसाम् ॥ वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ ६९ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे उद्धवप्रतियाने सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥ श्रीशुक उवाच ॥ अथ विज्ञाय भगवान्सर्वात्मा सर्वदर्शनः ॥ सैरंध्र्याः कामतप्तायाः प्रियमिच्छन्गृहं ययौ ॥ १ ॥ महार्होपस्करैराढ्यं कामोपायोपबृंहितम् ॥ मुक्तादामपताकाभिर्वितानशयनासनैः ॥ धूपैः सुरभिभिर्दीपैः स्रग्गंधैरपि मंडितम् ॥ २ ॥ गृहं तमायांतमवेक्ष्य साऽऽसनात्सद्यः समुत्थाय हि जातसंभ्रमा ॥ यथोपसंगम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः ॥ ३ ॥ तथोद्धवः साधु तयाऽभिपूजितो न्यषीददुर्व्यामभिमृश्य चासनम् ॥ कृष्णोऽपि तूर्णं शयनं महाधनं विवेश लोकाचरितान्यनुव्रतः ॥ ४ ॥ सा मज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवादिभिः ॥ प्रसाधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः ॥५॥ आहूय कांतां नवसंगमह्रिया विशंकितां कंकणभूषिते करे ॥ प्रगृह्य शय्यामधिवेश्य रामया रेमेऽनुलेपार्पणपुण्यलेशया ॥६॥ साऽनंगतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रंत्यनंतचरणेन रुजो मृजंती ॥ दोर्भ्यां स्तनांतरगतं परिरभ्य कांतमानंदमूर्तिमजहादतिदीर्घतापम् ॥ ७ ॥ ॥

उवाच ॥ अथ सर्वात्मा भगवान् कामतप्तायाः कुब्जायाः प्रियमिच्छन् तद्गृहं ययौ ॥१॥ कथंभूतं गृहम् । अमौल्यगृहसाहित्यैः कामोद्दीपकसुरतबंधादिचित्रैर्मुक्तादामपताकाभिर्धूपदीपादिभिश्च युक्तम् ॥२॥ गृहमागतं कृष्णं दृष्ट्वा कुब्जा शीघ्रमुत्थाय समीपं गत्वा तमुत्तमासनदानादिना संमानयामास ॥३॥ तथैव तया पूजित उद्धव आसनं स्पृष्ट्वा भुवि स्थितः । कृष्णस्तु तस्या महाधनं शयनं विवेश ॥४॥ तदा कुब्जापि स्नानानुलेपवस्त्रभूषणस्रग्गंधतांबूलादिभिर्योग्यं स्वदेहं कृत्वा सलज्जमंदहास्ययुक्ता कृष्णसमीपं जगाम ॥ ५ ॥ ततः कृष्णो नवसंगमलज्जया शंकितां तां करे धृत्वा शय्यां निवेश्य तया सह रेमे ॥ ६ ॥ तदा कुब्जा स्तनांतरगतं कृष्णं दोर्भ्यामालिंग्य बहुदिनस्थितं तापं जहौ ॥ ७ ॥ ॥ ॥

सैवं कैवल्यनाथं तं प्राप्य दुष्प्रापमीश्वरम् ॥ अंगरागार्पणेनाहो दुर्भगेदमयाचत ॥ ८ ॥ आहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया ॥ रमस्व नोत्सहे त्यक्तुं संगं तेऽम्बुरुहेक्षण ॥ ९ ॥ तस्यै कामवरं दत्वा मानयित्वा च मानदः ॥ सहोद्धवेन सर्वेशः स्वधामागमदर्चितम् ॥ १० ॥ दुराराध्यं समाराध्य विष्णुं सर्वेश्वरेश्वरम् ॥ यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसौ ॥ ११ ॥ अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः ॥ किंचिच्चिकीर्षयन्प्रागादक्रूरप्रियकाम्यया ॥ १२ ॥ स तान्नरवरश्रेष्ठानाराद्वीक्ष्य स्वबांधवान् ॥ प्रत्युत्थाय प्रमुदितः परिष्वज्याभिनंद्य च ॥१३॥ ननाम कृष्णं रामं च स तैरप्यभिवादितः॥ पूजयामास विधिवत्कृतासनपरिग्रहान् ॥ १४ ॥ पादावनेजनीरापो धारयन् शिरसा नृप ॥ अर्हणेनांबरैर्दिव्यैर्गंधस्रग्भूषणोत्तमैः ॥ १५ ॥ अर्चित्वा शिरसाऽऽनम्य पादावंकगतौ मृजन् ॥ प्रश्रयावनतोऽक्रूरः कृष्णरामावभाषत ॥ १६ ॥ दिष्ट्या पापो हतः कंसः सानुगो वामिदं कुलम् ॥ भवद्भ्यामुद्धृतं कृच्छ्राद्दुरंताच्च समेधितम् ॥ १७ ॥ युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ॥ भवद्भ्यां न विना किंचित्परमस्ति न चापरम् ॥ १८ ॥ आत्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभिः ॥ ईयते बहुधा ब्रह्मन् श्रुतप्रत्यक्षगोचरम् ॥ १९ ॥ यथा हि भूतेषु चराचरेषु मह्यादयो योनिषु भांति नाना ॥ एवं भवान्केवल आत्मयोनिष्वात्माऽऽत्मतंत्रो बहुधा विभाति॥२०॥ सृजस्यथो लुंपसि पासि विश्वं रजस्तमःसत्वगुणैः स्वशक्तिभिः ॥ न बध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बंधहेतुः ॥ २१ ॥ देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदाऽऽत्मनः स्यात् ॥ अतो न बंधस्तव नैव मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः ॥२२॥

हे नृप, एवं सा मोक्षदं दुष्प्रापं श्रीकृष्णं चंदनार्पणेन प्राप्य भाग्यहीना सेदं ययाचे॥८॥ हे कृष्ण, इह कतिचिद्दिनानि स्थित्वा मया सह त्वं रमस्व। त्वां त्यक्तुमहं नोत्सहे ॥९॥ ततः कृष्णस्तस्या इच्छितं वरं दत्वाऽलंकारादिदानैस्तां संतोष्य सोद्धवः स्वगृहं जगाम ॥१०॥ हे नृप, एवं दुराराध्यं विष्णुमाराध्य यो विषयसुखं वृणीते स दुर्मतिः ॥११॥ अथ रामोद्धवसहितः श्रीकृष्णः किंचिच्चिकीर्षयाऽक्रूरप्रियकाम्यया चाक्रूरगृहं जगाम ॥१२॥ ततोऽक्रूरस्तान् दृष्ट्वोत्थायालिंग्याभिनंद्य च ॥१३॥ रामं कृष्णमुद्धवं च प्रणम्य तैर्नमस्कृतः सन् तान्विधिवत्पूजयामास ॥१४॥ ततस्तत्पादप्रक्षालनजलानि शिरसा धारयन् वस्त्रभूषणगंधादिभिस्तान् ॥१५॥ संपूज्य रामकृष्णौ पुनर्नत्वोत्संगे स्थापितौ तत्पादौ मृजन् सन् तौ जगाद ॥१६॥ हे कृष्ण, हे राम, अयं सानुगः पापः कंसो हतः एतद्भद्रं जातम्। तथेदं यादवकुलं च भवद्भ्यां दुरंतदुःखात्समुद्धृतं सद्वृद्धिं गतमभूत्॥१७॥ किंच। युवां प्रधानपुरुषौ। भवद्भ्यां विना कार्यं कारणं च किंचिदपि नास्ति ॥१८॥ हे भगवन्, भवान् इदं स्वसृष्टं विश्वमनु[3]प्रविश्य स्थितः सन् स्वशक्तिभिर्देवमनुष्यादिरूपेण बहुधा प्रतीयते ॥१९॥ यथा चराचरेषु भूतेषु पृथिव्यादिपंचभूतानि नाना भांति तथा त्वं नरमृगादिशरीरेषु बहुधा भासि॥२०॥ किंच। इदं जगत्स्वशक्तिभिस्त्वं सृजसि पासि हरसि। तथापि तद्गुणकर्मभिर्न बध्यसे ॥२१॥ आत्मनस्तव केनापि प्रकारेण देहाद्युपाधेर्निरूपयितुमशक्यत्वान्न बंधः न च मोक्षः। तव बंधमोक्षौ स्यातामिति यत्तदस्माकमज्ञानमेव नान्य-

---

१ कतिचिद्दिनानि तस्या गृहे स्थित्वेत्यर्थः। २ अक्रूरस्य हस्तिनापुरप्रस्थापनं कारयितुमित्यर्थः। ३ कारणत्वादननुप्रविष्टोऽप्यनुप्रविश्येव स्थितः सन्।

त्वयोदितोऽयं जगतो हिताय यदा यदा वेदपथः पुराणः ॥ बाध्येत पाखंडपथैरसद्भिस्तदा भवान्सत्वगुणं बिभर्ति ॥ २३ ॥ स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः ॥ अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २४ ॥ अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः ॥ यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः॥ २५ ॥ कः पंडितस्त्वदपरं शरणं समीयाद्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ॥ सर्वान्ददाति सुहृदो भजतोऽभिकामानात्मानमप्युपचयापचयौ न यस्य ॥ २६ ॥ दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ॥ छिंध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायाम् ॥ २७ ॥ इत्यर्चितः संस्तुतश्च भक्तेन भगवान्हरिः ॥ अक्रूरं सस्मितं प्राह गीर्भिः संमोहयन्निव ॥ २८ ॥ श्रीभगवानुवाच ॥ त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बंधुश्च नित्यदा ॥ वयं तु रक्ष्याः पोष्याश्च अनुकंप्याः प्रजा हि वः ॥ २९ ॥ भवद्विधा महाभागा निषेव्या अर्हसत्तमाः ॥ श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥ ३० ॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥ ३१ ॥ स भवान्सुहृदां वै नः श्रेयान् श्रेयश्चिकीर्षया ॥ जिज्ञासार्थं पांडवानां गच्छस्व त्वं गजाह्वयम् ॥ ३२ ॥ पितर्युपरते बालाः सह मात्रा सुदुःखिताः ॥ आनीताः स्वपुरं राज्ञा वसंत इति शुश्रुम ॥ ३३ ॥ तेषु राजांबिकापुत्रो भ्रातृपुत्रेषु दीनधीः ॥ समो न वर्तते नूनं दुष्पुत्रवशगोऽधदृक् ॥ ३४ ॥ गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ॥ विज्ञाय तद्विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥ ॥ ॥ ॥

त्किंचिदपि ॥२२॥ हे कृष्ण, अयं पुराणो वेदमार्गो यदा पाखंडमार्गैर्बाध्येत तदा त्वं सत्वं गुणं बिभर्षि ॥२३॥ एवं भूतस्त्वमद्य दुष्टानां राज्ञामसंख्याताक्षौहिणीसेनावधेन भूभारं हर्तुं वसुदेवगृहेऽवतीर्णोऽसि ॥ २४ ॥ किंच । हे कृष्ण, अद्यास्माकं गृहास्तपोवनादपि बहुपुण्याः । यस्य तव पादक्षालनोदकं (गंगा) त्रैलोक्यं पुनाति । यश्च त्वं पंचयज्ञदेवतामूर्तिः स त्वं यान् प्रविष्टोऽसि ॥२५॥ हे ईश, कः पंडितो भक्तप्रियात् सत्यवचसस्त्वत्तः परं शरणं गच्छेत् । यतो भवान् भजतः सर्वकामान् आत्मानमपि ददाति ॥२६॥ हे जनार्दन, देवादिभिर्दुर्दर्शोऽपि त्वमविवेकिनो मे गृह एव प्रत्यक्षोऽसि एतद्दिष्ट्या । अतस्त्वं स्त्रीपुत्रगृहधनादिषु नः स्थितां मोहपाशरूपां त्वन्मायां छिंधि ॥२७॥ एवं भक्तेन स्तुतो हरिरक्रूरं मंदहास्येन मोहयन्निव प्राह ॥२८॥ श्रीभगवानुवाच ॥ हे अक्रूर, त्वं नो गुरुः पितृव्यश्चासि । वयं तु वः पुत्राः अतः पोष्या अनुकंप्याश्च स्मः ॥२९॥ किंच । त्वादृशाः साधवः श्रेयस्कामैर्नृभिरत्यंतं पूजनीयाः सेव्याश्च ॥३०॥ उदकमयानि तीर्थानि मृन्मयाः शिलामयाश्च देवा बहुकालेन पुनंति । साधवस्तु दर्शनादेव पुनंति ॥३१॥ तस्माद्धे अक्रूर, त्वं नः सुहृन्मध्ये श्रेष्ठोऽसि । अतः पांडवानां श्रेयश्चिकीर्षया हस्तिनापुरं गच्छ ॥३२॥ पांडौ मृते सति दुःखितास्ते बाला मात्रा सह धृतराष्ट्रेण स्वपुरमानीता वसंत इति शुश्रुम ॥३३॥ तेषु बालेषु स धृतराष्ट्रः समो न वर्तते । यतः स दुष्टाः स्वपुत्रा ये दुर्योधनादयस्तेषामधीनोऽस्ति ॥३४॥ अतस्त्वं गच्छ । अधुना तद्वृत्तं साध्वसाधु वा तज्जानीहि ।

तद्विज्ञाय यथा सुहृदां सुखं भवेत्तथा विधास्यामः ॥ ३५ ॥ एवमक्रूरमादिश्य कृष्णो रामोद्धवाभ्यां सह स्वभवनं ययौ ॥३६॥ इति श्रीमद्भागवतचूर्णिकायां दशमस्कंधे पूर्वार्धे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ ऊनपंचाशत्तमे तु गत्वाऽक्रूरो गजाव्हयम् । राज्ञः स्वभ्रातृपुत्रेषु बुद्ध्वा वैषम्यमागमत् ॥ १ ॥ ॥ श्रीशुक उवाच ॥ हे नृप, ततोऽक्रूरो हस्तिनापुरं गत्वा तत्र धृतराष्ट्रं भीष्मं विदुरं कुंतीम् ॥ १ ॥ बाह्लीकं सोमदत्तं द्रोणं कृपं कर्णं दुर्योधनं अश्वत्थामानं पांडवान् अन्यान् सुहृदश्च दृष्ट्वा ॥ २ ॥ तैः सह यथायोग्यं मिलित्वा तैः सुहृद्वार्तां पृष्टः सन् स्वयं तेषां कुशलं पप्रच्छ ॥ ३ ॥ ततस्तत्र धृतराष्ट्रस्य वृत्तं ज्ञातुमिच्छया कतिचिन्मासानुवास ॥ ४ ॥ किंच । पांडवानां प्रभावशस्त्रादिनैपुण्यबलशौर्यादिगुणानसहमानैर्दुर्योधनादिभिः कर्तुमिच्छितं तथा यच्च कृतं

इत्यक्रूरं समादिश्य भगवान्हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धेऽष्टचत्वारिंशोऽध्यायः ॥४८ ॥ ॥ श्रीशुक उवाच ॥ स गत्वा हास्तिनपुरं पौरवेंद्रयशोंऽकितम् ॥ ददर्श तत्रांबिकेयं सभीष्मं विदुरं पृथाम् ॥ १ ॥ सहपुत्रं च बाह्लीकं भारद्वाजं सगौतमम् ॥ कर्णं सुयोधनं द्रौणिं पांडवान्सुहृदोऽपरान् ॥२॥ यथावदुपसंगम्य बंधुभिर्गांदिनीसुतः ॥ संपृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययम् ॥ ३ ॥ उवास कतिचिन्मासान्राज्ञो वृत्तविवित्सया ॥ दुष्प्रजस्याल्पसारस्य खलच्छंदानुवर्तिनः ॥ ४ ॥ तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ॥ प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितम् ॥५॥ कृतं च धार्तराष्ट्रैर्यद्गरदानाद्यपेशलम् ॥ आचख्यौ सर्वमेवास्मै पृथा विदुर एव च ॥६॥ पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तम् ॥ उवाच जन्मनिलयं स्मरंत्यश्रुकलेक्षणा ॥ ७॥ अपि स्मरंति नः सौम्य पितरौ भ्रातरश्च मे ॥ भगिन्यो भ्रातृपुत्राश्च जामयः सख्य एव च ॥ ८ ॥ भ्रात्रेयो भगवान्कृष्णः शरण्यो भक्तवत्सलः ॥ पैतृष्वस्रेयान्स्मरति रामश्चांबुरुहेक्षणः ॥९॥ सपत्नमध्ये शोचंतीं वृकाणां हरिणीमिव ॥ सांत्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥ कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वभावन ॥ प्रपन्नां पाहि गोविंद शिशुभिश्चावसीदतीम् ॥ ११ ॥ नान्यत्तव पदांभोजात्पश्यामि शरणं नृणाम् ॥ बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् ॥१२॥ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ॥ योगेश्वराय योगाय त्वामहं शरणं गता ॥१३॥ श्रीशुक उवाच ॥ इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरम् ॥ प्रारुदद्दुःखिता राजन्भवतां प्रपितामही ॥१४॥

विषदानादि तत्सर्वं पृथा विदुरश्चास्मा अक्रूराय कथयामासतुः ॥५॥६॥ पृथा तु प्राप्तं भ्रातरमक्रूरं समीपं गत्वा स्वजन्मस्थानं स्मृत्वाऽऽह ॥ ७ ॥ हे भ्रातः, अस्माकं पितरौ भ्रातृभगिन्यो भ्रातृपुत्रादयश्च नः स्मरंति किम् ॥८॥ भक्तवत्सलो भगवान् कृष्णो रामश्च मत्पुत्रान् स्मरति किम् ॥९॥ किंच वृकाणां मध्ये हरिणीमिव शत्रुमध्ये शोचंतीं मां पितृहीनान् मे बालकांश्च हरिर्वाक्यैः सांत्वयिष्यति किम् ॥१०॥ हे कृष्ण । कृष्ण, हे महायोगिन्, हे विश्वपालक, पुत्रैः सह क्लिश्यंतीं शरणागतां मां पाहि ॥११॥ हे कृष्ण, मृत्युसंसाराद्भीतानां नृणां मोक्षप्रदात्त्वच्चरणकमलादन्यद्रक्षकं न पश्यामि ॥१२॥ अतो योगेश्वराय शुद्धाय ब्रह्मणे परमात्मने कृष्णाय ते नमः । अहं त्वां शरणं गताऽस्मि ॥१३॥ श्रीशुक उवाच ॥ हे नृप, एवं तव पितामही कुंती स्वजनं कृष्णं च

```
[OrderDescription]
,CREATED=14.01.20 09:39
,TRANSFERRED=2020/01/14 at 11:33:01
,PAGES=659
,TYPE=STD
,NAME=S0002507
,Book Name=M-2366-SHRIMAD BHAGWAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
```

```
FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
```

```
FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
```

```
FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
```

```
FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
```

```
FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
```

```
FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
```

```
FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
```

```
FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
```

FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

```
FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
```

```
FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
,FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF
```

```
FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF
,FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
,FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF
,FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF
,FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF
,FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF
```

```
FILE496=00000496.TIF
,FILE497=00000497.TIF
,FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF
,FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,FILE507=00000507.TIF
,FILE508=00000508.TIF
,FILE509=00000509.TIF
,FILE510=00000510.TIF
,FILE511=00000511.TIF
,FILE512=00000512.TIF
,FILE513=00000513.TIF
,FILE514=00000514.TIF
,FILE515=00000515.TIF
,FILE516=00000516.TIF
,FILE517=00000517.TIF
,FILE518=00000518.TIF
,FILE519=00000519.TIF
,FILE520=00000520.TIF
,FILE521=00000521.TIF
,FILE522=00000522.TIF
,FILE523=00000523.TIF
```

```
FILE524=00000524.TIF
,FILE525=00000525.TIF
,FILE526=00000526.TIF
,FILE527=00000527.TIF
,FILE528=00000528.TIF
,FILE529=00000529.TIF
,FILE530=00000530.TIF
,FILE531=00000531.TIF
,FILE532=00000532.TIF
,FILE533=00000533.TIF
,FILE534=00000534.TIF
,FILE535=00000535.TIF
,FILE536=00000536.TIF
,FILE537=00000537.TIF
,FILE538=00000538.TIF
,FILE539=00000539.TIF
,FILE540=00000540.TIF
,FILE541=00000541.TIF
,FILE542=00000542.TIF
,FILE543=00000543.TIF
,FILE544=00000544.TIF
,FILE545=00000545.TIF
,FILE546=00000546.TIF
,FILE547=00000547.TIF
,FILE548=00000548.TIF
,FILE549=00000549.TIF
,FILE550=00000550.TIF
,FILE551=00000551.TIF
```

```
FILE552=00000552.TIF
,FILE553=00000553.TIF
,FILE554=00000554.TIF
,FILE555=00000555.TIF
,FILE556=00000556.TIF
,FILE557=00000557.TIF
,FILE558=00000558.TIF
,FILE559=00000559.TIF
,FILE560=00000560.TIF
,FILE561=00000561.TIF
,FILE562=00000562.TIF
,FILE563=00000563.TIF
,FILE564=00000564.TIF
,FILE565=00000565.TIF
,FILE566=00000566.TIF
,FILE567=00000567.TIF
,FILE568=00000568.TIF
,FILE569=00000569.TIF
,FILE570=00000570.TIF
,FILE571=00000571.TIF
,FILE572=00000572.TIF
,FILE573=00000573.TIF
,FILE574=00000574.TIF
,FILE575=00000575.TIF
,FILE576=00000576.TIF
,FILE577=00000577.TIF
,FILE578=00000578.TIF
,FILE579=00000579.TIF
```

```
FILE580=00000580.TIF
,FILE581=00000581.TIF
,FILE582=00000582.TIF
,FILE583=00000583.TIF
,FILE584=00000584.TIF
,FILE585=00000585.TIF
,FILE586=00000586.TIF
,FILE587=00000587.TIF
,FILE588=00000588.TIF
,FILE589=00000589.TIF
,FILE590=00000590.TIF
,FILE591=00000591.TIF
,FILE592=00000592.TIF
,FILE593=00000593.TIF
,FILE594=00000594.TIF
,FILE595=00000595.TIF
,FILE596=00000596.TIF
,FILE597=00000597.TIF
,FILE598=00000598.TIF
,FILE599=00000599.TIF
,FILE600=00000600.TIF
,FILE601=00000601.TIF
,FILE602=00000602.TIF
,FILE603=00000603.TIF
,FILE604=00000604.TIF
,FILE605=00000605.TIF
,FILE606=00000606.TIF
,FILE607=00000607.TIF
```

```
FILE608=00000608.TIF
,FILE609=00000609.TIF
,FILE610=00000610.TIF
,FILE611=00000611.TIF
,FILE612=00000612.TIF
,FILE613=00000613.TIF
,FILE614=00000614.TIF
,FILE615=00000615.TIF
,FILE616=00000616.TIF
,FILE617=00000617.TIF
,FILE618=00000618.TIF
,FILE619=00000619.TIF
,FILE620=00000620.TIF
,FILE621=00000621.TIF
,FILE622=00000622.TIF
,FILE623=00000623.TIF
,FILE624=00000624.TIF
,FILE625=00000625.TIF
,FILE626=00000626.TIF
,FILE627=00000627.TIF
,FILE628=00000628.TIF
,FILE629=00000629.TIF
,FILE630=00000630.TIF
,FILE631=00000631.TIF
,FILE632=00000632.TIF
,FILE633=00000633.TIF
,FILE634=00000634.TIF
,FILE635=00000635.TIF
```

```
FILE636=00000636.TIF
,FILE637=00000637.TIF
,FILE638=00000638.TIF
,FILE639=00000639.TIF
,FILE640=00000640.TIF
,FILE641=00000641.TIF
,FILE642=00000642.TIF
,FILE643=00000643.TIF
,FILE644=00000644.TIF
,FILE645=00000645.TIF
,FILE646=00000646.TIF
,FILE647=00000647.TIF
,FILE648=00000648.TIF
,FILE649=00000649.TIF
,FILE650=00000650.TIF
,FILE651=00000651.TIF
,FILE652=00000652.TIF
,FILE653=00000653.TIF
,FILE654=00000654.TIF
,FILE655=00000655.TIF
,FILE656=00000656.TIF
,FILE657=00000657.TIF
,FILE658=00000658.TIF
,FILE659=00000659.TIF
,
```